

Almira 2
shelf 1
6

४०५८
४०५९

श्री ५ को सरकार
संरक्षण महाविभाग

बृहदारण्यकोपनिषत

भाष्य-टीका-युता

श्री ५ को सरकार
संरक्षण महाविभाग

श्रीगणेशाय नमः ॥ ॥ काण्वोपनिषद्विवरणव्याजेनाशेषामेवोपनिषदं शोधयितुकामो भगवान् भाष्यकारो विघ्नोपशमादिसमर्थं शिष्टाचारप्रमाणकं यथापरगुरून्न

श्रीगणेशाय नमः ॥ ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ॥ ॥ उषा वा अश्वस्येत्येवमाद्या वाजसनेयिब्राह्मणोपनिषत् तस्या इयमल्पग्रंथा वृत्तिरारभ्यते ॥ संसारव्याविवृत्सुभ्यः संसारहेतुनिवृत्तिसाधनब्रह्मात्मैकत्वविद्याप्रतिपत्तये ॥ सेयं ब्रह्मविद्योपनिषच्छब्दवाच्या ॥ तत्पराणां सहेतोः संसारस्यात्यंतावसादनात् उपनिपूर्वस्य सदेस्तदर्थत्वात् ॥ तादर्थ्यात् ग्रंथोप्युपनिषदुच्यते ॥ सेयं षडध्याय्यरण्येनूच्यमानत्वादारण्यकं बृहत्त्वात् परिमाणतो बृहदारण्यकं तस्यास्य कर्मकांडेन संबंधोभिधीयते ॥ सर्वोप्ययं वेदः प्रत्यक्षानुमानाभ्यामनवगतेष्टानिष्टप्राप्तिपरिहारोपायप्रकाशनपरः ॥ सर्वपुरुषाणां निसर्गत एव तत्प्राप्तिपरिहारयोरिष्टत्वात् ॥ दृष्टविषये चेष्टानिष्टप्राप्तिपरिहारोपायज्ञानस्य प्रत्यक्षानुमानाभ्यामेव सिद्धत्वान्नागमान्वेषणा । न चासति जन्मान्तरसंबंध्यात्मास्तित्वविज्ञाने जन्मान्तरेष्टानिष्टप्राप्तिपरिहारेच्छा स्यात् । स्वभाववादिदर्शनात् । तस्माज्जन्मान्तरसंबंध्यात्मास्तित्वे जन्मान्तरेष्टानिष्टप्राप्तिपरिहारोपायविशेषे च शास्त्रं प्रवर्तते ॥ येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके इत्युपक्रम्यास्तीत्येवोपलब्धव्य इत्येवमादिनिर्णयदर्शनात् यथा च मरणं प्राप्योपक्रम्य योनिमन्ये प्रपद्यंते शरीरत्वाय देहिनः । स्थाणुमन्येनुसंयंति यथाकर्म यथाश्रुतमिति स्वयंज्योतिरित्युपक्रम्य तं विद्याकर्मणी समन्वारभेते । पुण्यो वै पुण्येन कर्मणा भवति । ज्ञपयिष्यामीत्युपक्रम्य विज्ञानमय इति च व्यतिरिक्तात्मास्तित्वं । तत्प्रत्यक्षविषयमेवेति चेन्न वादिविप्रतिपत्तिदर्शनात् । नहि देहान्तरसंबंधिन आत्मनः प्रत्यक्षेणास्तित्वविज्ञाने लोकायतिका बौद्धाश्च नः प्रतिकूलाः स्युर्नास्त्यात्मेति वदंतो नहि घटादौ प्रत्यक्षविषये कश्चिद्विप्रतिपद्यते नास्ति घट इति । स्थाण्वादौ पुरुषादिदर्शनान्नेति चेन्न निरूपितभावान्नहि प्रत्यक्षेण निरूपिते स्थाण्वादौ विप्रतिपत्तिर्भवति । वैनाशिकास्त्वहमिति प्रत्यये जायमानेपि देहांतरव्यतिरिक्तस्य नास्तित्वमेव प्रतिजानते ।

नमस्काररूपं मंगलमाचरति ॥ नमो ब्रह्मादिभ्य इति ॥ १ ब्रह्मविद्याप्रापकत्वात् विद्यादातॄन् ॥ ३ प्रत्यक्षानुमानाभ्यामित्यागमातिरिक्तप्रमाणोपलक्षणार्थं ॥ ४ आत्मनः स्थूलदेहव्यतिरिक्तत्वं न प्रत्यक्षमिति प्रतिपाद्य सूक्ष्मदेहव्यतिरिक्तत्वमपि नाहंप्रत्ययग्राह्यमित्याह । वैनाशिकास्त्विति ते त्वहमिति धियमनुभवंति तथापि देहांतरस्थूलदेहातिरिक्तसूक्ष्मतत्प्रधानभूताद्युत्पन्नेतिरिक्तस्यात्मनो नास्तित्वमेव पश्यंति ॥ तस्मादहंधिया सूक्ष्मदेहातिरिक्तात्मसिद्धिरित्यर्थः ॥ १ ॥

अथेच्छादयः क्वचिदाश्रिताः गुणत्वात् रूपादिवत् इत्यनुमानादतिरिक्तात्मसिद्धिरिति नेत्याह ॥ तथेति । नात्मास्तित्वप्रसिद्धिः । अयं भावः । इच्छादीनां स्वातंत्र्येण स्वरूपासिद्धेः ॥ पारतंत्र्ये परस्पराश्रयत्वं
आधारस्येदानीमेव साध्यत्वात् । यः प्राणेन प्राणितीत्यादिश्रुत्या प्राणनादिव्यापारस्य लिंगस्यात्मनि प्रदर्शितत्वात् तस्य च व्याप्तिसापेक्षस्य प्रत्यक्षादिसिद्धात्मविषयत्वान्नैतस्य शब्दैकगम्यते
ति शंकते । श्रुत्येति । आत्मनो लिंगगम्यत्वाभिप्राये श्रुत्या लिंगं नोपन्यस्तमिति परिहरति नेति । योचेतनव्यापारः स चेतनाधिष्ठानपूर्वकः । यथा रथादिव्यापारः प्राणनादिव्यापारस्या

भा. तस्मात्प्रत्यक्षविषयवैलक्षण्यात्प्रत्यक्षान्नात्मास्तित्वसिद्धिस्तथानुमानादपि । श्रुत्यात्मास्तित्वे लिंगस्य दर्शितत्वाल्लिंगस्य च प्रत्यक्षविषयत्वान्नेति
चेन्न । जन्मांतरसंबंधस्याग्रहणात् । आगमेन त्वस्तित्वेवगते वेदप्रदर्शितलौकिकलिंगविशेषैश्च तदनुसारिणो मीमांसकास्तार्किकाश्चाहंप्र
त्ययं लिंगानि च वैदिकान्येव स्वमतिप्रभवानीति कल्पयंतो वदंति प्रत्यक्षश्चानुमेयश्चात्मेति । सर्वथाप्यस्त्यात्मा देहांतरसंबंधीत्येवं प्रतिपत्तुर्देहां
तरगतेष्टानिष्टप्राप्तिपरिहारोपायविशेषार्थिनस्तद्विशेषज्ञापनाय कर्मकांडं समारब्धं । नत्वात्मन इष्टानिष्टप्राप्तिपरिहारेच्छाकारणमा
त्मविषयमज्ञानं कर्तृभोक्तृस्वरूपाभिमानलक्षणं तद्विपरीतब्रह्मात्मस्वरूपविज्ञानेनापनीतं । यावद्धि तन्नापनीयते तावदयं कर्मफ
लरागद्वेषादिस्वाभाविकदोषप्रयुक्तः शास्त्रविहितप्रतिषिद्धातिक्रमेणापि प्रवर्त्तमानो मनोवाक्कायैर्दृष्टादृष्टानिष्टसाधनान्यधर्मसं
ज्ञकानि कर्माण्युपचिनोति बाहुल्येन स्वाभाविकदोषबलीयस्त्वात्ततः स्थावरांताधोगतिः । कदाचिच्छास्त्रकृतसंस्कारबलीयस्त्वं । त
तो मनआदिभिरिष्टसाधनं बाहुल्येनोपचिनोति धर्माख्यं तद्द्विविधं ज्ञानपूर्वकं केवलं च । तत्र केवलं पितृलोकादिप्राप्तिफलं विज्ञानपूर्वकं
देवादिब्रह्मलोकांतप्राप्तिफलं । तथा च शास्त्रमात्मयाजी श्रेयान्देवयाजी इत्यादि स्मृतिश्च द्विविधं कर्म वैदिकमित्याद्याः साम्ये च धर्माधर्मयो
र्मनुष्यत्वप्राप्तिरित्येवं ब्रह्माद्याः स्थावरांता स्वाभाविकाविद्यादिदोषवतो धर्माधर्मसाधनकृता संसारगतिर्नामरूपकर्माश्रया तदेवेदं व्याकृत
साध्यसाधनरूपं जगत् प्रागुत्पत्तेरव्याकृतमासीत्स एष बीजांकुरादिवदविद्याकृतः संसार आत्मनि क्रियाकारकफ

प्यचेतनव्यापारत्वात् चेतनाधिष्ठानपूर्वकत्वमिति संभावनामात्रेण लिंगोपपाते । न निश्चायकत्वेन तदुपपत्स्यते । आत्मनो जन्मांतरसंबंधस्य प्रमाणांतरेणाग्रहणात्तद्व्याप्तलिंगायोगादित्याह । जन्मांतरेति ।
ननु व्यतिरिक्तात्मास्तित्वमागमैकगम्यं चेत्कथं प्रत्यक्षमनुमेयं चेति वादिनो वदंति तत्राह । आगमेन त्विति । येयं प्रेते विचिकित्सेत्यागमेन को ह्येवान्यात् इत्यादिवेदोक्तैश्च प्राणनादिभिर्लौकिकैर्लिंगविशे
षैरात्मास्तित्वसिद्धौ यथोक्तमात्मसिद्धिमनुसरंतो वादिनः वैदिकमेवाहं प्रत्ययं प्रतिलभमाना वैदिकान्येव लिंगानि पश्यंतः स्वोत्प्रेक्षानिर्मितानि तानीति कल्पयंतो द्विविधमात्मानं वदंति । वस्तुतस्तु आत्मा श्रुत्यैकसम
धिगम्य इत्यर्थः ॥॥

उपासनेन कर्मप्रकरणस्थेपि तत्त्वाभाद्विद्याप्रकरणे नारभ्याध्ययनमनर्थवदित्याशंक्याह सर्वेषामिति॥ तस्येचेति। क्रतुप्रधानस्याश्वमेधस्योपास्तिसहितस्यापि संसारफलत्वं तदा लवीयसामग्निहोत्रादीनां संसारफलत्वे किं वाच्यमिति कर्मणामेवं बंधहेतौ विरक्तः साधनचतुष्टयविशिष्टो ज्ञानमपेक्षमाणस्तदुपायश्रवणादावेव सर्वकर्मसंन्यासपूर्वकं कथं न प्रवर्तेरन्नित्याशयवती श्रुतिरुपासनां विद्यारम्भेऽभिदधातीति ततोषा वा अश्वस्येत्याद्युपनिषदारंभो युक्तः। अस्य विशिष्टाधिकारिसमर्पकत्वादित्यर्थः॥

भा· ॥ मृत्योः स्थितं मृत्युत्वं फलाध्यायोपलक्षणोऽनादिरनंतोनर्थ इत्येतस्माद्विरक्तस्याविद्यानिवृत्तये तद्विपरीतब्रह्मविद्याप्रतिपत्त्यर्थोपनिषदारभ्यते। अस्यत्वश्वमेधकर्मसंबंधिविज्ञानस्य प्रयोजनं॥ येषामश्वमेधे नाधिकारस्तेषामस्मादेव विज्ञानात्तत्फलप्राप्तिर्विद्यया वा कर्मणा वा। तद्धैतल्लोकजिदेवेत्येवमादिश्रुतिभ्यः। कर्मविषयत्वमेव ज्ञानस्येति चेन्न। योऽश्वमेधेन यजते य उ चैनमेवं वेदेति विकल्पश्रुतेः॥ विद्याप्रकरणे चाम्नानात्॥ कर्मांतरेष्वसंपादनदर्शनात् विज्ञानात्फलप्राप्तिरस्तीत्यवगम्यते॥ सर्वेषां च कर्मणां परं कर्माश्वमेधः समस्तव्यष्टिप्राप्तिफलत्वात्॥ तस्य चेह ब्रह्मविद्याप्रारंभ आम्नानं सर्वकर्मणां संसारविषयत्वप्रदर्शनार्थं तथा च दर्शयिष्यति फलमशनायामृत्युभावं। ननित्यानां संसारविषयफलत्वमिति चेन्न सर्वकर्मफलोपसंहारश्रुतेः। सर्वा ह पत्नीसंबंधकर्म जाया मे स्यादेतावान्वै काम इति निसर्गतः एवं सर्वकर्मणां काम्यत्वं दर्शयित्वा पुत्रकर्मापरविद्यानां चायं लोकः पितृलोको देवलोक इति फलं दर्शयित्वा त्र्यन्नात्मकतां चांत उपसंहरति त्रयं वा इदं नाम रूपं कर्मेति। सर्वकर्मणां फलं व्याकृतं संसार एवेति। इदमेव तत्त्रयं प्रागुत्पत्तेः तर्ह्यव्याकृतमासीत्। तदेदं पुनः सर्वं प्राणिकर्मवशाद्व्याक्रियते॥ बीजादिव वृक्षः सोयं व्याकृताव्याकृतरूपः संसारोऽविद्याविषयः क्रियाकारकफलात्मतयात्मरूपत्वेनाध्यारोपितोऽविद्ययैव मूर्तामूर्तवासनात्मकोऽतो विलक्षणोऽनामरूपकर्मात्मकोऽद्वयो नित्यशुद्धबुद्धमुक्तस्वभावोपि क्रियाकारकफलभेदादिविपर्ययेणावभासते अतोऽस्मात्क्रियाकारकफलभेदस्वरूपादेतावदिदमिति साध्यसाधनरूपाद्विरक्तस्य कामादिदोषकर्मबीजभूताऽविद्यानिवृत्तये रज्ज्वामिव सर्पविज्ञानापनयनाय ब्रह्मविद्यारभ्यते॥ ॥रामः॥

लं दर्शयिष्यति। कामः फलं। काम्यत्वं फलवत्त्वं। पुत्रादीनां त्रयाणां क्रमेण मनुष्यलोकादिफलत्रयं एतावदित्यनर्थोक्तिः। क्रियादयः एव विपर्ययस्तद्रूपेण। आदिपदेनान्येपि भेदाः संगृह्यन्ते॥ आत्मन्यध्यासः साहजनयाभावेपि नभसि मलिनत्वादिवद्यतेऽनुभूयते तस्मादविद्यात्मनोऽविद्यानिवर्तकब्रह्मविद्यार्थत्वेन उपनिषदारंभः संभवतीत्युपसंहरति। अत इति।

विशेषणमिति। क्रव्यादादिनिवृत्त्यर्थं विशेषणम्। आत्माहत्यादीनामंगानामितिशेषः॥शरीरस्यांगानामात्मत्वप्रमाहमाह। मध्यंहीति। ॥रामः॥ ॥रामः॥ ॥

भा. तत्रतावदश्वमेधविज्ञानायउषावाअश्वस्येत्यादितत्राश्वविषयमेवदर्शनमुच्यते॥प्राधान्यादश्वस्यप्राधान्यंचतन्नामांकितत्वात्क्रतोःप्राजापत्यत्वा
च॥उषाइतिब्राह्मोमुहूर्त्तउषावैशब्दःस्मारणार्थःप्रसिद्धंकालंस्मारयति।शिरःप्राधान्याच्छिरश्चप्रधानंशरीरावयवानामश्वस्यमेध्यस्यमेधार्हः
स्ययज्ञियस्यउषाशिरइतिसंबंधःकर्मांगस्यपशोःसंस्कार्यत्वात्कालादिदृष्टयःशिरआदिषुक्षिप्यंतेप्राजापत्यत्वंप्रजापतिदृष्ट्याध्यारोपणात्का
लत्नोकदेवतात्वाध्यारोपणंचप्रजापतित्वकरणंपशोरेवंरूपोहिप्रजापतिर्विष्णुत्वादिकरणमिवप्रतिमादौसूर्यश्चक्षुःशिरसोनंतरत्वात्सूर्यादि
देवतत्वाच्चवातःप्राणोवायुस्वाभाव्यात्व्यात्तंविवृतंमुखमग्निर्वैश्वानरःवैश्वानरइत्यग्नेर्विशेषणंवैश्वानरोनामाग्निर्विवृतंमुखमित्याःमुख
स्याग्निदैवतत्वात्संवत्सरआत्मासंवत्सरोद्वादशमासस्त्रयोदशमासोवा। आत्माशरीरंकालावयवानांचसंवत्सरःशरीरंचात्मामध्यंह्येषा

प्र

उ. ॐ नमः श्रीब्रह्मणे॥ ॥उषावाअश्वस्यमेध्यस्यशिरःसूर्यश्चक्षुर्वातःवाणोव्यात्तमग्निर्वैश्वानरःसंवत्सरआत्माश्वस्यमे
ध्यस्यद्यौःपृष्ठमंतरिक्षमुदरंपृथिवीपाजस्यंदिशःपार्श्वेअवांतरदिशःपर्शवऋतवोंऽगानिमासाश्चार्द्धमासाश्चपर्वाण्यहो
रात्राणिप्रतिष्ठा

=८ सा

मंगानामात्मेतिश्रुतेःअश्वस्यमेध्यस्येतिसर्वत्रानुषंगार्थंपुनर्वचनंद्यौःपृष्ठंऊर्ध्वत्वसामान्यादंतरिक्षमुदरंसुषिरत्वसामान्यात्पृथिवीपाजस्यंपाद
स्यमितिवर्णव्यत्ययेनपादासनस्थानमित्यर्थःदिशश्चतस्रोपिपार्श्वेपार्श्वेनदिशांबंधात्पार्श्वयोर्दिशांचसंख्यावैषम्यादयुक्तमितिचेन्नस
र्वतोमुखत्वोपपत्तेरश्वस्यपार्श्वाभ्यामेवसर्वदिशांसंबंधाददोषःअवांतरदिशआग्नेय्याद्याःपर्शवःपार्श्वास्थीनिऋतवोंऽगानिसंवत्सरा
वयवत्वादंगसाधर्म्यान्मासाश्चार्द्धमासाश्चपर्वाणिसंधयःसंधिसामान्यादहोरात्राणिप्रतिष्ठाःबहुवचनात्प्राजापत्यदैवपित्र्यमानुषाणि
तिष्ठाःपादाःप्रतितिष्ठंत्येतैरितिअहोरात्रैर्हिकालात्माप्रतितिष्ठति॥ ॥ ॥ ॥ रामः ॥ ॥ ॥ ॥

रामरामः॥ ॥रामरामरामरामरामः॥ ॥रामरामरामरामरामरामः॥ ॥रामरामरामरामरामरामः॥ ॥रामरामराम॥ ॥रामरामरामरामरामराम॥

ग्रहाविति। ग्रहौ हवनीयद्रव्याधारौ पात्रविशेषौ। अग्रतः पृष्ठतश्चेति। संतपनात्प्राक् अग्रे चेत्यर्थः। अश्वसंतपनात्पूर्वं यो महिमाख्यो ग्रहः स्थाप्यते स चेदहर्दैवत्यो पाम्यते तत्कथं सोऽश्व
मन्वजायतेति पश्चादश्वस्य तज्जन्मवाचोयुक्तिरितिशंकते अहरश्वमिति। नायं पश्चादर्थोऽनुशब्दः। किंतु लक्षणार्थः। तथा चाश्वस्य प्रजापतिरूपत्वात्तं लक्षयित्वा ग्रहस्य यथोक्त

अश्वस्य पादैर्नक्षत्राणि अस्थीनि शुक्लत्वसामान्यात् नभोनभः स्थामेयाः अंतरिक्षस्योदरत्वोक्तेः॥ मांसानुदकरुधिरसेचनसामान्यात् ऊवध्यं उदरस्थ
मर्द्धजीर्णमशनं सिकता विच्छिन्नावयवसामान्यात्॥ सिंधवः स्पंदनसामान्यान्नद्यो गुदा नाड्यो बहुवचनाच्च क्लोमानश्च हृदयस्याधस्ताद्दक्षिणो
त्तरौ मांसखंडौ क्लोमान इति नित्यं बहुवचनमेकस्मिन्नेव पर्वताः काठिन्यादुच्छ्रितत्वाच्च ओषधयश्च क्षुद्राः स्थावराः वनस्पतयश्च महांतो लो
मानि केशाश्च यथासंभवं उद्यन्नुद्गच्छन् भवति सविता आमध्याह्नात्। अश्वस्य पूर्वार्द्धो नाभेरूर्द्ध्वमित्यर्थः। निम्लोचन्नस्तं यन्नामध्याह्नाज्जघनार्द्धो
ऽपरार्द्धः पूर्वापरत्वसाधर्म्यात् यद्विजृंभते गात्राणि विनामयति विक्षिपति तद्विद्योतनं मुखघनविदारणसामान्यात् यद्विधूनुते गात्राणि कंपय

नक्षत्राण्यस्थीनि नभो माꣳसान्यूवध्यꣳ सिकताः सिंधवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमा
न्युद्यन्पूर्वार्द्धो निम्लोचञ्जघनार्द्धो यद्विजृंभते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक्॥ १
अहर्वा अश्वं पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी

ति गर्जनं शब्दसामान्यात् यन्मेहति मूत्रं करोत्यश्वस्तद्वर्षति वर्षणं तत्सेचनसामान्यात् वागेव शब्द एव अस्याश्वस्य वागिति नात्र कल्पनेत्यर्थः॥ १॥
अहर्वा इति सौवर्णराजतौ महिमाख्यौ ग्रहावश्वस्याग्रतः पृष्ठतश्च स्थाप्येते तद्विषयमिदं दर्शनं। अहः सौवर्णो दीप्तिसामान्यात्। वै अहरश्वं पुरस्ता
न्महिमान्वजायतेति अश्वस्य प्रजापतित्वात् प्रजापतिर्ह्यादित्यादिलक्षणो ह्यालक्ष्यते॥ अश्वं लक्षयित्वाऽजायत सौवर्णो महिमग्रहो हृस्र
मनुवियातत इति यद्वत्। तस्य ग्रहस्य पूर्वे पूर्वः समुद्रे समुद्रो योनिर्विभक्तिव्यत्ययेन योनिरित्यासादनस्थानं॥ ॥

स्यपश्चाद्भनेरूपदेशादश्वमन्वजायतेत्यविरुद्धमिति परिहरति अश्वस्येति। स्वजनेन लक्षीक्रियते। ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अग्निचंद्रातपवत्वात्रात्रेः शैत्यं । कथमेतौ ग्रहौ महिमाख्यावुभौ महत्वोपेतत्वादित्याह । महिमेति । वाज्यादिशब्दानां जातिविशेषवाचित्वादिहापि तद्देवत्वप्राप्तमिति पक्षांतरमाह । जातीति । देवानां देवत्वप्रापकत्वं कथमस्येत्याशंक्याह । प्रजापतित्वादिति । समुत्पद्यभूतानि । एवं त्वस्मिन्नुद्भूतिसमुत्पन्नापारंगीणोऽस्याश्वस्य समुद्रशब्दतामाह ॥

तथा रात्रिः राजतो ग्रहो वर्णसामान्याज्जघन्यसमानाद्वा एनमश्वं पश्चात्पृष्ठतोऽन्वजायत तस्यापरे समुद्रे योनिः महिमा महत्वादश्वस्य हि विभूतिषा यत्सौवर्णो राजतश्च ग्रहावुभयतः स्थाप्येते तावेतौ वै महिमानौ महिमाख्यौ ग्रहावश्वमभितः संबभूवतुः उक्तलक्षणावेव संभूताविद्धसमावश्वो महत्वयुक्तमिति पुनर्वचनं स्तुत्यर्थं ॥ तथा च हयो भूत्वेत्यादि स्तुत्यर्थमेव हयो हिनोतेर्गतिकर्मणो विशिष्टगतिरित्यर्थः ॥ जातिविशेषो वा देवानवहद्देवत्वमगमयत्प्रजापतित्वाद्देवानां वा वोढाभवत् । ननु निंदैव वाहनत्वं नैष दोषो वाहनत्वं स्वाभाविकम

रात्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महिमानावभितः संबभूवतुर्हयो भूत्वा देवानवहद्वाजी गंधर्वानर्वासुरानश्वो मनुष्यान्समुद्र एवास्य बंधुः समुद्रो योनिः ॥ २ ॥ ॥ प्रथमं ब्राह्मणं ॥ ।

स्य स्वाभाविकत्वादुच्चप्राप्तिर्देवादिसंबंधेऽश्वस्येति स्तुतिरेवैषा तथा वाजी हयो जातिविशेषो वा वाजी भूत्वा गंधर्वानवहदित्यनुषंगः ॥ तथार्वा भूत्वासुरानश्वो भूत्वा मनुष्यान् समुद्र एवेति परमात्मा वंधुर्वध्नंते अस्मिन्निति च समुद्रो योनिः ॥ २ ॥ कारणमुत्पत्ति प्रातिएवमसौ समुद्रो योनिः अद्रस्थितिरिति स्मर्यते अप्सु योनिर्वा अश्व इति श्रुतेः प्रसिद्ध एव वा समुद्रो योनिः ॥ २ ॥ ॥ तृतीयस्य प्रथमब्राह्मणम् ॥ ॥ छ ॥ ॥

परमात्मेति । तत्र योनित्वमुत्पादकत्वं । वंधुत्वं स्थापकत्वं । समुद्रत्वं विलापकत्वमिति भेदः । आश्रयः । ॥ एमएमएमएम ॥ ॥ एमएमएमएमएमएम ॥ ॥

अथाग्नेरश्वमेधोपयोगिकस्योत्पत्तिरुच्यते। तद्विषयदर्शनविवक्षयैवोत्पत्तिः स्तुत्यर्था॥ नैवेह किंचनाग्र आसीदिह संसारमण्डले किंचन किंचिदपि नामरूपप्रविभक्तविशेषं नैवासीन्नैव बभूव। अग्रे प्रागुत्पत्तेर्मनआदेः। किं शून्यमेव बभूव शून्यमेव स्यान्नैवेह किंचनेति श्रुतेः न कार्यं कारणं वासीदुत्पत्तेश्च उत्पद्यते हि घटः अतः प्रागुत्पत्तेर्घटस्य नास्तित्वं ननु कारणस्य न नास्तित्वं मृत्पिण्डादिदर्शनात् यत् नोपलभ्यते तस्यैव नास्तिता अस्तु कार्यस्य न तु कारणस्योपलभ्यमानत्वान्न॥ प्रागुत्पत्तेः सर्वानुपलंभात् अनुपलब्धिश्चेदभावहेतुः सर्वस्य जगतः प्रागुत्पत्तेर्न कारणं कार्यं नोपलभ्यते तस्मात्सर्वस्यैवाभावोऽस्तु न मृत्युनैवेदमावृतमासीदिति श्रुतेः यदि हि किंचिदपि नासीद्येनाव्रियते यच्चाव्रियते

नैवेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीत्

तदा नावक्ष्यन्मृत्युनैवेदमावृतमिति नहि भवति गगनकुसुमच्छन्नो वन्ध्यापुत्र इति ब्रवीति च मृत्युनैवेदमावृतमासीदिति। तस्माद्येनावृतं कारणेन यच्चावृतं कार्यं प्रागुत्पत्तेः तदुभयमासीच्छ्रुतेः प्रामाण्यादनुमेयत्वाच्चानुमीयते च प्रागुत्पत्तेः कार्यकारणयोरस्तित्वं कार्यस्य हि सतो जायमानस्य कारणे सत्युत्पत्तिदर्शनादसति चादर्शनाज्जगतोऽपि प्रागुत्पत्तेः कारणास्तित्वमनुमीयते घटादिकारणास्तित्ववत्। घटादिकारणस्याप्यसत्त्वमेवानुपमृद्य मृत्पिण्डादिकं घटानुत्पत्तेरिति चेन्न मृदादेः कारणत्वान्मृत्सुवर्णादि हि तत्कारणं घटरुचकादेर्न पिंडाकारविशेषस्तदभावे भावादसत्यपि पिंडाकारविशेषे मृत्सुवर्णादिकारणद्रव्यमात्रादेव घटरुचकादिकार्योत्पत्तिर्दृश्यते तस्मान्न पिंडाकारवि ॥

५

पिंडाकारविशेषो घटरुचकादिकारणमसति तु मृत्सुवर्णादिद्रव्ये घटरुचकादिर्न जायत इति मृत्सुवर्णादिद्रव्यमेव कारणं न मृत्सुवर्णादिपिंडाकारवि
शेषः सर्वो हि कारणं कार्यमुत्पादयन्पूर्वोत्पन्नस्यात्मकार्यस्य तिरोधानं कुर्वत् कार्यान्तरमुत्पादयति एकस्मिन्कारणे युगपदनेककार्यविरोधात्
न च पूर्वकार्योपमर्दे कारणस्य स्वात्मनोपमर्दो भवति । तस्मात्पिंडाद्युपमर्दे कार्योपपत्तिदर्शनमहेतुः प्रागुत्पत्तेः कारणासत्त्वे पिंडादिव्य
तिरेकेण मृदादेरसत्त्वादयुक्तमिति चेत् पिंडादिपूर्वकार्योपमर्दे मृदादिकारणं नोपमृद्यते घटादिकार्यान्तरेष्वनुवर्त्तत इत्येतदयुक्तं पिंड
घटादि व्यतिरेकेण मृदादिकारणस्यानुपलंभादिति चेन्न मृदादिकारणानां घटाद्युत्पत्तौ पिंडादिनिवृत्तावप्यनुवृत्तिदर्शनात् सादृश्या

दशनापयाऽज्ञानापायाद्धि मृत्सुस्तन्मनोऽनुकृता

दन्वयदर्शनेन कारणानुवृत्तेरिति चेन्न । पिंडादिगतानां मृदाद्यवयवानामेव घटादौ प्रत्यक्षत्वेऽनुमानाभासात्सादृश्यादिकल्पनानुपपत्तेर्न च प्रत्य
प्रत्यक्षानुमानयोर्विरुद्धाः व्यभिचारिता प्रत्यक्षपूर्वकत्वादनुमानस्य सर्वत्र चानाश्वासप्रसंगात् यदि च क्षणिकं सर्वं तदेवेदमिति गम्यमान
तद्बुद्धेरपि ज्ञानान्तरापेक्षत्वे तस्यापि अन्यतदपेक्षत्वमित्यनवस्थायां तत्सदृशमिदमित्यस्या अपि बुद्धेर्मृषात्वात्सर्वज्ञानाश्वासनैव तदिदंबुद्ध्योरपि
कार्यभावसंबंधानुपपत्तेः सादृश्यात्तत्संबंध इति चेन्न । तदिदंबुद्ध्योरितरेतरविषयत्वानुपपत्तेरसति चेतरेतरविषयत्वे सादृश्यग्रहणानुपपत्तेः
रसत्येव सादृश्ये तद्बुद्धीरिति चेन्न । तदिदंबुद्ध्योरपि सादृश्यबुद्धिवदसद्विषयत्वप्रसंगादसद्विषयत्वमेव सर्वबुद्धीनामस्त्विति चेन्न बुद्धिबुद्धेरप्यसद्विषयत्वप्रसंगात्

बृ·भा·
५

भूमत्वायाह। नदपीति।१ कारणस्य मृदः कार्ये घटे उपलभ्यमानत्वात्कार्यात्प्राक्कारणसद्भावः सिद्धः॥१ कार्यकारणयोर्द्वयोरपि प्रागुत्पत्तेः सत्त्वमनुमेयमिति प्रतिज्ञाय कारणास्तित्वं प्रपंचितं। इदानीं कार्यास्तित्वानुमानं दर्शयति कार्यस्येति॥१ कथं तर्हि इहानुमानं प्रयोक्तव्यमित्याशंक्य प्रथमं व्याप्तिमाह। यद्धीति। यदभिव्यज्यमानं तत्प्रागभिव्यक्तेरस्ति। पयानभोंतःस्थशदीत्यर्थः॥२ संप्रत्यनुमिनोति। तथेति।३ अनुमानबाधकोपन्यासं विघटयति। नहीति।४ नतेइत्यादि पूर्वोक्तस्यैव व्याख्यानं नहि तवेति।५ नवमेत्यर्थः। मृदादिः सकाशादभिव्यक्तस्य घटादेः तमः कुड्यादि आवरणं।६ मृदः सकाशादभिव्यक्तेः प्राक्मृदा॰नंतरूपमावरणं।६ पिंडादिर्घटाद्यावरणं। तेन समानदेशत्वात्

दृष्टमस्त्विति चेन्न सर्वेषु बीजानां संघात्वे सत्यप्यनुपपत्तेः तस्मादसदेतत्साहस्रणान्न बुद्धिरित्यतः सिद्धः प्राक्कार्योत्पत्तेः कारणसद्भावः। कार्यस्य चाभिव्यक्तिलिंगत्वात्कार्यस्य च सद्भावः प्रागुत्पत्तेः सिद्धः कथमभिव्यक्तिलिंगत्वादभिव्यक्तिलिंगमस्य त्वभिव्यक्तिः साक्षाद्विज्ञानालंबनत्वप्राप्तिर्यद्धि लोके प्रावृतं तमआदिना घटादिवस्तु तदालोकादिना प्रावरणाद्विज्ञानविषयत्वं प्राप्नुवत् प्राक्सद्भावं न व्यभिचरतीति तथेदमपि जगत्प्रागुत्पत्तेरित्यवगच्छामो न ह्यविद्यमानो घटउदितेप्यादित्यउपलभ्यते तेन ते ऽविद्यमानत्वान्नास्त्युपलभ्यते वेति चेन्न हि तव घटादिकार्यं कदाचिदप्यविद्यमानमित्युदित आदित्यउपलभ्येत वन्हिपिंडे संनिहिते तमआद्यावरणे चासति· विद्यमानत्वादिति· चेन्न द्विविधत्वादावर·

त्मन्वी स्यामिति सोर्चन्नचरत्तस्यार्चतआपोऽजायंता·

णस्य घटादिकार्यस्य द्विविधं ह्यावरणं मृदादेरभिव्यक्तस्य तमः कुड्यादि प्राङ्मृदोभिव्यक्तेः मृदवयवानां पिंडादिकार्यांतररूपेण संस्थानं तस्मात्प्रागुत्पत्तेर्विद्यमानस्यैव घटादिकार्यस्यावृतत्वादनुपलब्धिर्नष्टोत्पन्नभावाभावशब्दप्रत्ययभेदस्त्वभिव्यक्तितिरोभावयोर्द्विविधत्वापेक्षः पिंडकपालादेरावरणवैलक्षण्यादयुक्तमिति चेन्न तमः कुड्यादि हि घटाद्यावरणं घटादिभिन्नदेशं दृष्टं न तथा घटादिभिन्नदेशे दृष्टे पिंडकपाले तस्मात्पिंडकपालसंस्थानयोर्विद्यमानस्यैव घटस्यावृतत्वादनुपलब्धिरित्ययुक्तमावरणधर्मवैलक्षण्यादिति चेन्न क्षीरोदकादेः क्षीराद्यावरणेनैकदेशत्वदर्शनाद्घटादिकार्ये कपालचूर्णाद्यवयवानामंतर्भावादनावरणत्वमिति चेन्न विभक्तानां कार्यांतरत्वादावरणत्वोपपत्तेरावरणाभाव एव यत्नप्राप्तिरिति चेत्·

शिवः
५
5

आवरणाभावस्त्वादिपूर्वोक्तस्यैवव्याख्यानंपिंडकपालेति। तदेवप्रपंचयतिपिंडेति। किमिदानीमावरणभंगोप्रयत्नोनेत्येवंनियमोनतुनेत्याह।क्वचिदिति।अनियमंनिगमयन्ननुभवविरोधाभा
वंउपसंहरति।तस्मादिति।किंचअभिव्यंचनव्यापारेसतिनियमेनघटोव्यज्यते।तदभावे।इत्यन्वयव्यतिरेकावधारणोघटार्थःकुलालादिव्यापारस्तस्यार्थवत्वार्थमभिव्यक्त्यर्थःएवयत्नोमव
क्तव्यः।आवरणभंगस्त्वार्थिकइत्याह।नियमार्थवत्वाच्चेति।घटार्थःघटप्रयोजनकः।आवृत्तिभंगार्थयत्नेयतोघटानुलब्धिरतस्तदुपलब्ध्यर्थत्वेननियतःसन्यत्नःसफलःस्यादितिफलितं

पिंडकपालवस्थोपिविद्यमानमेवघटादिकार्यमावृतत्वान्नोपलभ्यतइतिचेत्कुलालादिकार्यार्थिनातदावरणविनाशएवयत्नःकर्त्तव्योनघटाकृत्यत्नोन्वैतदस्तितत्
स्यादयुक्तंविद्यमानस्यैवावृतत्वादनुपलब्धिरितिचेन्न।नियमान्नहिविनाशमात्रप्रयत्नादेवघटाद्यभिव्यक्तिर्नियतातमसआवृतेघटादौप्र
दीपाद्युत्पत्तौप्रयत्नदर्शनात्लोपितमानाशायैवेतिचेद्दीपाद्युत्पत्तावपियःप्रयत्नःसोपितमस्तिरस्करणनाशायतस्मिन्नष्टेघटःस्वयमेवोपलभ्य
ते॥नहिघटेकिंचिदाधीयतइतिचेन्नप्रकाशवतोघटस्योपलभ्यमानत्वात्यथाप्रकाशविशिष्टोघटउपलभ्यतेप्रदीपकरणेनतथाप्राक्प्रदी
पकरणात्तस्मात्तमस्तिरस्कारएवप्रदीपकरणे।किंतर्हिप्रकाशवत्वायप्रकाशवत्वेनैवोपलभ्यमानत्वात्क्वचिदावरणविनाशेपिय·

वंतैवैमैकमभूदितितदेवाकार्यस्याकार्यं

त्नःस्याद्यथाऊर्ध्वादिविनाशे।तस्मान्ननियमोस्तिअभिव्यक्त्यर्थिनाआवरणविनाशएवयत्नःकार्यइतिनियमार्थवत्वाच्चकारणेवर्त्तमानंकारणंकार्यंत
गरणामावरणमित्यवोचामतत्रयदिपूर्वाभिव्यक्तस्यकार्यस्यपिंडस्यव्यवहितस्यवाकपालस्यविनाशएवयत्नःक्रियेततद्विदलचूर्णाद्यपिकार्यंजायेततेन
नाप्यावृतोघटोनोपलभ्यतइतिपुनर्यत्नांतरापेक्षतैवतस्माद्घटाद्यभिव्यक्त्यर्थिनोनियतएवकारकव्यापारोर्थवांतस्मात्प्रागत्यंतेरपिसदेवका
र्यमतीतानागतप्रत्ययभेदाच्चातीतोघटोनागतोघटइत्येतयोश्चप्रत्ययोर्वर्त्तमानघटप्रत्ययवन्ननिर्विषयत्वंयुक्तं।अनागतार्थिप्रवृत्तेश्च
नह्यसत्यार्थिनयाप्रवृत्तिर्लोकेदृष्टायोगिनांचातीतानागतज्ञानस्यसत्यत्वादसंश्चेद्भविष्यद्घटःऐश्वरंभविष्यद्घटविषयंप्रत्यक्षज्ञानंमि
थ्यास्यात्नचप्रत्यक्षउपचर्यते॥ ॥एमएमएमएमएम॥ ॥एमएमएम॥ ॥एमएमएमएमएम॥ ॥एमएमएम॥ ॥

माह।तस्मादिति।कार्यस्यसत्वेयुक्तंतरमाह।अतीतेति।तत्रैवोपपत्त्यंतरमाह। ।अनागतेति।आगामिनिघटेतदर्थित्वेनलोकेप्रवृत्तिर्दृष्टा।नचात्यंतासतिसायुक्ता।तेनत
स्याःसत्किलक्षणातेत्यर्थः।किंचयोगिनाशस्यचातीतादिविषयंप्रत्यक्षंज्ञानमिष्टं।तत्रविद्यमानोपलंभनं।अतोघटस्यसदासत्वमित्याह।योगिनांचेति।ईश्वरस्यसर्वव
यार्थश्चकारः।भविष्यद्गृहाणामतीतोपलक्षणं।ऐश्वरंयोगिकंचेतीतिदृष्टव्यं।भविष्यद्घटविषयंप्रत्यक्षज्ञानमुपचर्यतेइतितुनवाच्यमित्यर्थः। ॥एमएम॥ ॥

घटसद्भावेस्त्वनुमानवोचाम·विप्रतिषेधाश्च।यदिहिघटोभविष्यतीतिकुलालादिषुव्याप्रियमाणेषुघटार्थंप्रमाणेननिश्चितंयेनचकालेनघटस्यसंबंधोभविष्यतीत्युच्यतेतस्मिन्नेवकालेघटोऽस्तीतिविप्रतिषिद्धमभिधीयते।भविष्यद्घटोऽस्तीतिनभविष्यतीत्यर्थः।अयंघटोनवर्त्ततइतियद्वादथप्रागत्यन्तेघटोऽस्तीत्युच्येतघटार्थप्रवृत्तेषुकुलालादिषुतत्रयथाव्यापाररूपेणवर्त्तमानास्तावत्कुलालादयस्तथाघटेनवर्त्ततइत्यसम्बद्धस्यार्थश्चेन्नविरुध्यतेकस्मात्स्वेनहिभविष्यद्रूपेणघटोवर्त्ततेनहिपिंडस्यवर्त्तमानताकपालस्यवाघटस्यभवति।नचतयोर्भविष्यताघटस्यतस्मात्कुलालादिव्यापारवर्त्तमानतायांप्रागत्यन्तेघटोऽस्तीतिनविरुध्यतेयदिहिघटस्यपरत्वंभविष्यताकार्यरूपंतत्प्रतिषिध्येतननप्रतिषेधे·

कर्द्धंहवाअस्मैभवति·

विरोधःस्यान्नतुतद्ववान्प्रतिषेधतिनचसर्वेषांकायावत्तासैकैववर्त्तमानताभविष्यत्तावाअपिचचतुर्विधानामभावानांघटस्येतरेतराभावोघटादन्योद्रष्टव्योयथाघटाभावःपटादिरेवनघटस्वरूपमेवनचघटाभावःसन्घटोऽभावात्मकःकिंतर्हिभावरूपएवेवंघटस्यप्राक्प्रध्वंसात्यंताभावानामपिघटादन्यत्वंस्याद्घटेनव्यपदिश्यमानत्वात्घटस्येतरेतराभाववत्तथैवभावात्मकताःभावानामेवंचसतिघटस्यप्रागभावइतिनघटस्वरूपमेवप्रागत्यन्तेनास्त्यथघटस्यप्रागभावइतिघटस्यस्वरूपंतदेवोच्यतेघटस्येतिव्यपदेशानुपपत्तिःअथकल्पयित्वाव्यपदिश्यतेशिलापुत्रकस्यशरीरमितियद्वत्तथापिघटस्यप्रागभावइतिकल्पितस्यैवाभावस्यघटेनव्यपदेशोनघटस्वरूपस्यैवाथार्थांतरंघटाद्घटस्याभावइत्युक्तोत्ररमेतन्नकिंचान्यत्प्रागत्यन्तेःशशविषाणवदसा·॥ ॥रामरामराम॥ ॥राम॥ ॥रामरामराम॥ ॥रामरामरामराम॥ ॥

त्वकारणेति। स्वहेतुसंबंधः सत्तासंबंधो वा जन्मेति तार्किकाः। नच प्रागुत्पत्तेरसतः संबंधः। तस्यशतोर्हेतोरित्यर्थः।१। युतसिद्धयोरंतुघटयोर्मिथः संयोगे पृथक्सिद्धिरपेक्षिता॥ अयुतसिद्धानां परस्परपरिहारेण प्रतीत्यनर्हाणां कार्यकारणादीनां मिथो योगे पृथक्सिद्ध्यभावो न दोषयावहतीति शंकते। अयुतेति॥१ परिहरति॥१ सत्तात्मा॥ मनएवक

वभूतस्य घटस्य स्वकारणसत्तासंबंधानुपपत्तिर्द्विनिष्ठत्वात्संबंधस्य अयुतसिद्धानामदोष इति चेन्न। भावाभावयोरयुतसिद्धत्वानुपपत्तेर्भावभूतयोर्हि युतसिद्धता युतसिद्धता वा स्यात्। नतु भावाभावयोरभावयोर्वा तस्मात्सदेव कार्यं प्रागुत्पत्तेरिति सिद्धं॥ ॥किंलक्षणेन मृत्युनावृतमित्यत आह॥ ॥ असनायया शितुमिच्छा तशनाया सैव मृत्योर्लक्षणं तथा लक्षितेन मृत्युनाशनायया कथमशनाया मृत्युरित्युच्यते॥ अशनाया हि मृत्युर्हि शब्देन प्रसिद्धं हेतुमवद्योतयति योह्यशितुमिच्छति सोशनायानंतरमेव हंति जंतून्। तेन माशनायया लक्षते मृत्युरित्यशनाया हीत्याह। बुध्यात्मनोऽशनायाधर्म इति स एव तु बुध्यवस्थो हिरण्यगर्भो मृत्युरित्युच्यते। तेन मृत्युनेदं कार्यमावृतमासीत्। यथा पिंडावस्थया मृदा घटादय आवृताः स्युरिति। तन्मनोकुरुत तदिति मनसो निर्देशः। सः प्रस्तुतो मृत्युर्वक्ष्यमाणकार्यसिसृक्षया तत्कार्यालोचनक्षमं मनः शब्दवाच्यं संकल्पादिलक्षणं

य एवमेतदर्कस्यार्कत्वं वेद॥ २॥ ० ॥

मनः करणमकुरुत तत्सनवान्केनाभिप्रायेण मनोकरोदित्युच्यते। आत्मन्वी आत्मवान् अहमनेनात्मना मनसा मनस्वी स्यामित्यभिप्रायः। स प्रजापतिरभिव्यक्तेन मनसा समनस्कः सन्नर्चयन् पूजयन्नात्मानमेव कृतार्थोस्मीत्यचरद्विचरणमकरोत्। तस्य प्रजापतेरर्चतः पूजयतः आपो रसात्मिकाः पूजांगभूता अजायंत उत्पन्ना अत्राकाशप्रभृतीनां त्रयाणामुत्पत्त्यनंतरमिति वक्तव्यं श्रुत्यंतरसामर्थ्याद्धि कल्पासंभवा यस्माद्धि कमस्य अर्चते पूजां कुर्वते वै मे मह्यं कं उदकमभूदित्येवं सोमन्यत यस्मान्मृत्युस्तदेव तस्माद्धेतोरर्कस्याग्नेराश्वमेधक्रतूपयोगिकस्यार्कत्वं अर्कत्वहेतुरित्यर्थः अग्नेरर्कनामनिर्वचनमेतदर्चनात्सुखहेतुपूजाकारणात् संबंधाच्चाग्नेरेतद्गौणं नामार्क इति य एवं यथोक्तमर्कस्यार्कत्वमर्कत्वं वेद जानाति कम् उदकं सुखं वा नामसामान्यात्। ह वै इत्यवधारणार्थौ भवत्येवेति। अस्मै एवंविदे एवंविदर्थं भवति॥ २॥ ॥

रणं मनः करणमित्यर्थः।६। केनेति। अपंचीकृतानां भूतानां हिरण्यगर्भदेहभूतानां प्रागेव लब्धात्मकत्वात्तेभ्यो मनोभिव्यक्तमिति केनेति मन्वानो ब्रूते। उच्यत इति॥६। सत्यसंकल्पत्वादभिव्यक्तेन।५। अर्चन्निति। सप्तम्या हिरण्यगर्भकर्तृकस्य गौणक्रियात्रयाणामपंचीकृतानामिति यावत्॥४। पूजोपयोगिभूताः।४। एवं मृत्योरर्कत्वेपि कथमग्नेरर्कत्वमित्याशंक्य मृत्युसंबंधादित्याह। अर्कस्याग्नेरिति।२। अर्कस्यार्च्यस्य मृत्योः संबंधिनोग्नेरित्यर्थः। अद्भिः तनैः कृतपूजनमेवार्कत्वहेतुः अर्च्यतेद्भिर्नैरित्यर्कः इत्येतन्न मुख्यं मृत्योर्नाम गौणं अग्नेः।२॥ ॥एमएमएम॥ ॥७॥ ॥एमएमएम॥ ॥७॥ ॥एमः॥ ॥

अपामर्कत्वाश्रवणात्साग्नेरर्कत्वमितिशंकते। कः पुनरिति। प्रकरणमाश्रित्य तासामर्कत्वमौपचारिकमित्युत्तरमाह। उच्यतइति। तास्वंतर्हिरण्मयमंडं संबभूवेति श्रुतिमनुस्मरन्नुपचारहेत्वंतरमाह। अप्सु वेति। तासामयामप्रकरणाद्।

आपोवाअर्कस्तद्यदपाꣳशरआसीत्तत्समहन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रांतस्य
तप्तस्य तेजोरसो निरवर्ततग्निः ॥ ४ ॥ स त्रेधात्मानं व्यकुरुतादित्यं तृतीयं वायुं तृतीयꣳ स एष
प्राणस्त्रेधा विहितः

आपोवाअर्कः कः पुनरसावर्क इत्युच्यते। आपोया अर्चनांगभूतास्ता एव वार्कोऽग्नेरर्कस्य हेतुत्वादप्सु वाग्निः प्रतिष्ठित इति। न पुनः साक्षादेवार्कस्तासामप्रकरणादग्नेश्च प्रकरणं वक्ष्यति चायमग्निरर्क इति तत्तत्र यदपां शर इव शरो दध्न इव मंडीभूतमासीत्तत्समहन्यत तत्संघातमापद्यत तेजसा बाह्यांतः पच्यमानं लिंगव्यत्ययेन वा योऽपां शरः स समहन्यतेति सा पृथिव्यभवत् स संघातो येयं पृथिवी साभवत् ताभ्योऽद्भ्योऽण्डमभिनिर्वृत्तमित्यर्थः तस्यां पृथिव्यामुत्पादितायां स मृत्युः प्रजापतिरश्राम्यत् श्रमयुक्तो बभूव। सर्वो हि लोकः कार्यं कृत्वा श्राम्यति प्रजापतेश्च तन्महत्कार्यं यत्पृथिवीसर्गः किं तस्य श्रांतस्येत्युच्यते तस्य श्रांतस्य तप्तस्य खिन्नस्य किं तेजोरसस्तेज एव रसस्तेजोरसः सारः निरवर्तत प्रजापतिशरीरान्निःक्रांत इत्यर्थः। कोऽसौ निःक्रांतोऽग्निः सोऽण्डस्यांतर्विराट् प्रजापतिः प्रथमजः कार्यकरणसंघातवान् जातः स वै शरीरी प्रथम इति स्मरणात्॥ ४ ॥ स च जातः प्रजापतिस्त्रेधा त्रिःप्रकारमात्मानं स्वयमेव कार्यकरणसंघातं व्यकुरुत व्यभजदित्येतत् कथं त्रेधेत्याह आदित्यं तृतीयमग्निवाय्वपेक्षया त्रयाणां पूरणमकुरुतेत्यनुवर्त्तते तथाग्न्यादित्यापेक्षया वायुं तृतीयं तथा वाय्वादित्यापेक्षयाग्निं तृतीयमिति द्रष्टव्यं। सामर्थ्यस्य तुल्यत्वात्त्रयाणां संख्यापूरणत्वे स एष प्राणः सर्वभूतात्माप्यग्निवाय्वादित्यरूपेण विशेषतः स्वेनैव मृत्य्वात्मना त्रेधा विहितो विभक्तो न विराट्स्वरूपोपमर्दनेन तस्यास्य प्रथमजस्याग्नेरश्वमेधोपयोगिकस्यार्कस्य विराजश्चित्यात्मकस्याश्वस्य दर्शनमुच्यते। सर्वा हि पूर्वोक्तोत्पत्तिरस्य स्तुत्यर्थमित्यवोचाम इत्थम

[illegible]

कर्मांगस्याग्नेःसंस्कर्तव्यत्वाच्चित्याग्निशिरसिप्राचीदृष्टिःकर्त्तव्येत्याह । तस्येति । प्रजापतिशब्दवाच्यस्यविराट्रूपस्याऽश्वमेधोपयोगिनोऽग्नेः । सक्रियपदंपृष्ठनिष्ठो

तस्यप्राचीदिक्शिरोविशिष्टत्वसामान्यादसौचासौचसेशान्याग्नेय्योईर्म्मौबाहूईरयतेर्गतिकर्मणः । अथास्याग्नेःप्रतीचीदिक्पुच्छंजघन्योभागः
प्राङ्मुखस्यप्रत्येकदिक्संबंधादसौचासौचवायव्यनिर्ऋत्यौसक्थ्यौसक्थिनीपृष्ठकोणत्वसामान्याद्दक्षिणाचोदीचीचपार्श्वेउभयदिक्संबंधसा
मान्याद्द्यौःपृष्ठमंतरिक्षमुदरमितिपूर्ववदियमुरःअधोभागसामान्यात्सएषोऽग्निःप्रजापतिरूपोलोकत्रयात्मकोऽग्निरप्सुप्रतिष्ठितः । एवमिमेलोकाअ
प्स्वंतरितिश्रुतेः । यत्रक्वचयस्मिन्कस्मिंश्चिदेतिगच्छति । तदेवतत्रैवप्रतितिष्ठतिस्थितिंलभतेकोसावेवंयथोक्तमप्सुप्रतिष्ठितत्वमग्नेर्विद्वान् वि

तस्यप्राचीदिक्शिरोसौचासौचेर्मावथास्यप्रतीचीदिक्पुच्छमसौचासौचसक्थ्यौदक्षिणाचोदीचीचपार्श्वेद्यौःपृष्ठमंतरिक्ष
मुदरमियमुरःसएषोप्सुप्रतिष्ठितोयत्रक्वचैतितदेवप्रतितिष्ठत्येवंविद्वान्॥ ५ ॥सोऽकामयतद्वितीयोमआत्मा
जायेतेतिसमनसावाचंमिथुनंसमभवदशनायांमृत्यु

वान्विज्ञानतः । गुणफलमेतत्॥ ५ ॥सोकामयतयोसौमृत्युःसोऽअवादिक्रमेणात्मनात्मानमंडस्यांतःकार्यकारणसंघातवंतंविराजमग्निमसृजत । त्रे
धात्वात्मानमकुरुतेत्युक्तं । सकिंव्यापारःसन्नसृजतेत्युच्यते । समृत्युरकामयतकामयितवान्किंद्वितीयोमेवमात्माशरीरंयेनाहंशरीरीस्यां
सजायेतोत्पद्येतेत्येवमेतदकामयतसएवंकामयतसएवंकामयित्वामनस्यापूर्वोत्पन्नेनवाचंत्रयीलक्षणांमिथुनंद्वंद्वभावंसमभवत्स
भवन्संक्षतवान्मनसात्रयीमालोचितवंत्रयीविहितंसृष्टिक्रमंमनसाअन्वालोचयदित्यर्थः । कोसावशनायांलक्षितोमृत्युःअशनायाल
क्षणोमृत्युरितियदुक्तंतमेवपरामृशत्यन्यत्रप्रसंगोमाभूदिति ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ।

न्तरिक्षोदरविषयं । उरसिपृथिवीदृष्टिमाह । इयमिति । प्रजापतिनाऽग्नेरभेदंसत्त्वोच्यते । सएषोऽग्निःप्रजापतिरूपइत्यादि । तस्योपसनार्थमेवाप्सुप्रतिष्ठितत्वंगुणः
मुपदिशति । उपास्तिफलमपपुनर्मृत्युंजयतीत्यादिनावक्ष्यते । अन्यत्रानंतरप्रश्नेविराडात्मनातियावत् । ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

जय्यालोचनायां।प्रसिद्धंरेतोव्यावर्त्तयति।ज्ञानेति।ननुप्रजापतेर्नज्ञानंकर्मवासंभवतितत्रानधिकारादित्याशंक्यासीदित्यस्यार्थमाह।जन्मांतरेति।ज्ञानकर्मणीएवरेतोभूतोतेनरेतसा।अस्त्व॥ननुसंवत्सरस्यप्रागेवस्थितत्वात्नप्रजापतेर्निर्माणत्वेनतदात्मत्वमित्याशंक्योत्तरवाक्यमुपादत्ते।नहपुरेति।पूर्वमितिप्रजापतेरादित्यात्म

तत्रत्रमिथुनेयद्रेतआसीत्प्रथमशरीरिणःप्रजापतेरुत्पत्तौकारणंरेतोबीजंज्ञानकर्मरूपंत्रय्यालोचनायांयद्दृष्टवानासीज्जन्मांतरकृतंतद्भावभावितोयःसृष्ट्वातेनरेतसाबीजेनाप्स्वनप्रविश्याण्डरूपेणगर्भीभूतःससंवत्सरोऽभवत्संवत्सरकालनिर्मातासंवत्सरःप्रजापतिरभवत्।नहपुरापूर्वंततस्तस्मात्संवत्सरनिर्मातुःप्रजापतेःसंवत्सरःकालोनामनाशनवभूवहतंसंवत्सरकालनिर्मातारमंतर्गर्भेप्रजापतिंयावानिहप्रसिद्धःकालःएतावंतंएतावत्संवत्सरपरिमाणंकालमविभर्भृतवान्।यावान्संवत्सरइतिप्रसिद्धःततःपरस्तात्किंकृतवान्तमेतावतःकालस्यसंवत्सरमात्रस्यपर

स्तयद्रेतआसीत्ससंवत्सरोऽभवन्नहपुराततःसंवत्सरआसतमेतावंतंकालमविभर्यावांसंवत्सरस्तमेतावतःकालस्यपरस्तादसृजततंजातमभिव्याददात्सभाणकरोत्सैववागभवत्॥ ४ ॥ सऐक्षतयदिवाइममभिमꣳस्येकनीयोन्नंकरिष्यइति॰

स्तादूर्ध्वमसृजतसृष्टवानण्डमभिनदित्यर्थस्तमेवंकुमारंजातमग्निंप्रथमशरीरिणमशनायावत्वात्मृत्युरभिव्याददात्मुखविदारणंकृतवान्कुमत्वकुमारोभीतःस्वाभाविक्याऽविद्ययायुक्तोभाणित्येवंशब्दमकरोत्सैववागभवत्वाक्शब्दोभवत्॥ ४ ॥सऐक्षतसएवंभीतंकृतारवंकुमारंदृष्ट्वामृत्युरैक्षतईक्षितवानशनायावानपियदिकदाचिदिमंकुमारमभिमंस्येअभिपूर्वोमन्यतिर्हिंसार्थःहिंसिष्यइत्यर्थः॥कनीयोन्नंकरिष्येकनीयोऽल्पमन्नंकरिष्यइत्येवमीक्षित्वातद्भक्षणादुपररामः।बहुह्यन्नंकर्त्तव्यंदीर्घकालभक्षणायनकनीयस्तद्भक्षणेहिकनीयोन्नंस्याद्बीजभक्षणाद्इवसस्याभावः॥ ॥ ॰ ॥ ॥ ॰ ॥ ॥ ॰ ॥ ॥ ॰ ॥ ॥ ॰ ॥ ॥

कत्वात्मदत्वेधीनत्वाच्चसंवत्सरव्यवहारस्यादित्यात्पूर्वंनतद्व्यवहारोनासीदेवेत्यर्थः॥इंद्रियदेवतानांचव्यावर्त्तयति।वाक्शब्दइति।इदानींमृगादिसृष्टिमुपदेष्टुंपातनिकांकरोति।सइत्यादिना।विराजोभक्षणेकाक्षतिरित्याह।तद्भक्षणेहीति।तस्यान्नात्मकत्वात्तदुत्पादकत्वाच्चेतिशेषः।अश्वमेधकर्त्तुर्विराजोहिउत्तरवाक्यकालिकसृष्टिविधायकत्वात्बीजस्याद्यरूपसंगतमित्यर्थः

यथोक्तेक्षणानंतरं मिथुनीभावात्त्रयीसृष्टिं प्रस्तौति । स एवमिति ।१। केवलानामृचां सर्गासंभवात्तदारूढानामृग्यजुःसामात्मनां मंत्राणां सृष्टिरत्र विवक्षितेत्याह ॥ स्तोत्रेति ।
उद्गात्रादिना गीयमानं स्तकमात्रं स्तोत्रं । तदेव होत्रादिना शंस्यमानं शस्त्रं स्तुतमनुशंसतीति हि श्रुतिः । यन्न गीयते न च शंस्यते अध्वर्युप्रभृतिभिश्च प्रयुज्यते तत्तदपि यथाख्यायिम
त्यादिपदं ॥ अत एव त्रिविधानित्युक्तं । अजादयो ग्राम्याः । गवयादयश्चारण्याः । स मनसा वाचं मिथुनं समभवदित्युक्तत्वात्प्रागेवत्रय्याः सिद्धत्वान्न तस्याः

स एवं प्रयोजनमन्नवाद्युत्पमालोच्य तयैव त्रय्या वाचा पूर्वोक्तया तेनैव च आत्मना मनसा मिथुनीभावमालोचनलक्षणमुपगम्योपगम्येदं
सर्वं स्थावरं जंगमं चासृजत यदिदं किंच यत्किंचेदं किं तत् ऋचो यजूंषि सामानि छंदांसि च सप्त गायत्र्यादीनि स्तोत्रशस्त्रादिकर्मभूतांस्त्रिविधान्
मंत्रान् गायत्र्यादिछंदोविशिष्टान्यज्ञांश्च तत्साध्यान्प्रजाश्च तत्कर्त्रीः पशूंश्च ग्राम्यारण्यान्कर्मसाधनभूतान् ननु त्रय्या मिथुनीभूतयासृजतेत्युक्तं
ऋगादीनीह कथमसृजतेति नैष दोषो मनसस्त्वव्यक्तो मिथुनीभावः त्रय्या वाचः ऋगादीनां विद्यमानानामेव कर्मसु विनियोगभावेन व्यक्तीभावः सर्ग इति स

स तया वाचा तेनात्मनेदꣳ सर्वमसृजत यदिदं किंच र्चो यजूꣳषि सामानि छन्दाꣳसि यज्ञान् प्रजां पशून्स यद्यदेवासृजत
तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वꣳ सर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदि
तित्वं वेद ॥ ५ ॥

जापतिरेवमन्नादिसृष्टिं बुद्ध्वा यद्यदेव क्रियां क्रियासाधनं फलं वा किंचिदसृजत तत्तदत्तुं भक्षयितुमध्रियत धृतवान्मनः सर्वं क्षत्त्वं वै यस्माददत्तीति तत्त
स्माददितेरदितिनाम्नो मृत्योरदितित्वं प्रसिद्धं तथा च मंत्रोऽदितिर्द्यौरित्यादि सर्वस्यैतस्य जगतोऽन्नभूतस्यात्ता सर्वात्मनैव भवत्यन्यथा विरोधान्न
हि कश्चित्सर्वस्यैकोऽत्ता दृश्यते तस्मात्सर्वात्मा भवतीत्यर्थः सर्वमस्यान्नं भवत्यत एव सर्वात्मनो ह्यत्तुः सर्वमन्नं भवतीत्युपपद्यते य एवमेतद्यथोक्त
मदितेर्मृत्योः प्रजापतेः सर्वस्यादनाददितित्वं वेद तस्यैव तत्फलम् ॥ ५ ॥ ॥ रामरामराम ॥ ॥ २७ ॥ ॥ रामरामराम

सृष्टिः क्लिष्टेति शंकते । नन्विति । व्यक्ताव्यक्तविभागेन परिहरति । नेत्यादिना । विद्यमानानामेव ऋगादीनां कर्मसु येन वा [illegible] व्यक्तीभावः स सर्ग इत्युच्यते । इदानीमुपा
दानस्यास्य प्रजापतेरशनानंतरं निर्दिशति । स प्रजापतिरित्यादिना । कथं मृत्योरदितिनामत्वं सिद्धं तत्राह । तथा चेति । अदितेः सर्वात्मत्वं वदता मंत्रेण सर्वकारणस्य मृत्यो
रदितिनामत्वं सूचितमिति भावः । सर्वात्मकत्वादेव । अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः । विश्वेदेवा अदितिः पंचजना अदितिर्जातमदितिर्जनित्वं ॥ ५ ॥

सोकामयतेत्यश्वाश्वमेधयोर्निर्वचनार्थमिदमाह॥भूयसामहतायज्ञेनभूयःपुनरपियजेयेतिजन्मांतरकरणापेक्षयाभूयःशब्दःसप्रजापति
र्जन्मांतरेऽश्वमेधेनायजतसतद्भावभावितएवकल्पादौव्यवर्त्ततसोश्वमेधक्रियाकारकफलात्मत्वेननिर्वृत्तःसन्नकामयतभूयसामह
तायज्ञेनभूयःपुनरपियजेयेत्येवंमहत्त्वायकामयित्वालोकवदश्राम्यत्सतपोतप्यततस्यश्रांतस्यतप्तस्येतिपूर्ववद्यशोवीर्यमुदक्रा
मदितिस्वयमेवपदार्थमाह।प्राणाश्चक्षुरादयःवैयशोयशोहेतुत्वात्तेषुहिसत्सुख्यातिर्भवतितथावीर्यंबलंअस्मिन्शरीरेनहिनिष्क्रां

सोकामयतभूयसायज्ञेनभूयोयजेयेतिसोऽश्राम्यत्सतपोऽतप्यततस्यश्रांतस्यतप्तस्ययशोवीर्यमुदक्रामत्प्रा
णावैयशोवीर्यंतत्प्राणेषूत्क्रांतेषुशरीरंश्वयितुमध्रियततस्यशरीरएवमनआसीत्॥ ६ ॥ ६ ॥

तप्राणोयशस्वीबलवान्वाभवति।तस्मात्प्राणाएवयशोवीर्यंचास्मिन्शरीरेतदेवंप्राणलक्षणंयशोवीर्यमुदक्रामदुत्क्रांतवत्तदेवंयशो
वीर्यभूतेषुप्राणेषूत्क्रांतेषुशरीरान्निर्गतेषुतच्छरीरंप्रजापतेःश्वयितुमुच्छूनभावंगंतुमध्रियतमेध्यंचाभवत्तस्यप्रजापतेःशरीरा
न्निर्गतस्यापितस्मिन्नेवशरीरेमनआसीद्यथाकस्यचित्प्रियेविषयेदूरंगतस्यापिमनोभवतितद्वत्तस्मिन्नेवशरीरेगतमनाःसन्किमकरोदि

दृह:।३

वीतदेहस्य। कामनाऽयुक्तेति शंकते कथमिति। सामर्थ्यातिशयाच्छरीरस्यापि प्रजापतेस्तदुपपत्तिरिति मन्वानो ब्रूते मेध्यमिति। देहस्याश्वत्वेऽपि कथं प्रजापतेस्तथात्वमित्याशंक्य तत्तादात्म्यादित्याह। तत इति। उषा वा इत्यादिप्रकारेण। तथापि कथमश्वमेधनाम्नो निर्वचनं तत्राह। यस्मादिति। अतस्तदात्मकस्य प्रजापतेर्देहो हि प्राणवियोगादश्वयत् पुनस्तत्प्रवेशान्मेधार्होऽभूदतः सोऽश्वमेधः तत्तादात्म्यात् प्रजापतिरपि तथेत्यर्थः। कस्य प्रजापतेर्देहो हि प्राणवियोगादश्वत पुनस्तत्प्रवेशान्मेधार्होऽभूदतः सोऽश्वमेधः तत्तादात्म्यात् प्रजापतिरपि तथेत्यर्थः। एतासां देवतानामेकोऽभवतीत्यनेनाग्नित्वमपि अश्वमेधस्य फलमुक्तं। ननु प्रजापतित्वेनाश्वमेधस्य स्तुतिर्नोपयोगिनी अग्नेरूपास्यत्वेन प्रक्रान्तत्वात् क्रतूपासनाभावादत आह। क्रियेति। ननु क्रतुत्वं गतस्याऽश्वस्य अश्वमेधकत्वात्मनस्त्वाग्नेः उक्तरीत्या स्तुतत्वात् उपास्तेश्च प्रागेवोक्तत्वाद्वृथा वाऽश्वमेधमित्या

सोऽकामयत कथं मेध्यं मेधार्हं यज्ञीयं मे मम इदं शरीरं स्यात्किं चात्मन्वी आत्मवांश्चानेन शरीरेण शरीरवान् स्यामिति प्रविवेश यस्मात्तच्छरीरं तद्वियोगात् गतयशोवीर्यं सदश्वदश्वयत्ततस्तस्मादश्वः समभवत्ततोऽश्वनामा प्रजापतिरेव साक्षादिति स्तूयते। यस्माच्च पुनः तत्प्रवेशात् गतयशोवीर्यत्वादमेध्यं सन्मेध्यमभूत्तदेव तस्मादेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधनामलाभः क्रियाकारकफलात्मको हि क्रतुः स च प्रजापतिरेव

सोऽकामयत मेध्यं म इदꣳ स्यादात्मन्व्यनेन स्यामिति ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वमेष ह वा अश्वमेधं वेद य एनमेवं वेद

इति स्तूयते क्रतुनिर्वर्तकस्याश्वस्य प्रजापतित्वमुक्तं उषा वा अश्वस्येत्येवमादिना तस्यैवाश्वस्य मेध्यस्य प्रजापतिस्वरूपस्याग्नेश्च यथोक्तस्य क्रतुफलात्मरूपतया समस्योपासनं विधातव्यमित्यारभ्यते पूर्वत्र क्रियापदस्य विधायकस्याश्रुतत्वात् क्रियापदापेक्षत्वाच्च प्रकरणस्यायमर्थोऽवगम्यते। एष ह वै अश्वमेधं क्रतुं वेद यः कश्चिदेनमश्वं अर्कं च यथोक्तमेवं वक्ष्यमाणेन समान्येन प्रदर्श्यमानेन विशेषेण विस्पष्टं वेदः। स एवाश्वमेधं वेद नान्यः तस्मादेवं विदितव्य इत्यर्थः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

दिवाकांनोपपद्यते तत्राह। क्रतुनिवर्तकस्येति। उक्तं च चित्यस्याग्नेस्तस्य प्राची दिगित्यादिना प्रजापतित्वमिति शेषः। अश्वोपासनमग्न्युपासनं चैकमेवेति वक्तुमुत्तरवाक्यमित्याह। तस्यैवेति। यथोक्तस्य प्रजापतिरूपस्यास्तमस्यतुल्यस्य। विधातव्यमुपासनमेकमेवेति वक्तुमारभ्यते। अर्च्यते क्रतौ इत्यर्कः तं अर्कं अग्निमित्यर्कः अग्निरेव यद्वा त्रयो लोकाः सूर्यरूपप्राप्तिसाधनभूतः इति वक्ष्यति। य एवमदितेरदितित्वं वेदेत्यादौ प्रागेव विहितमुपासनं किं पुनरारंभेणेत्याशंक्याह पूर्वत्रेति॥ यद्यपि विधिरदितेरदितित्वं वेदेति कृतस्तथापि सः गुणोपास्तिविधिः न प्रधानविधिः। अत्र तु प्रधानविधिरूपास्तिप्रकरणत्वादपेक्ष्यते। अतोऽश्वमेधं वेदेति प्रधानविधिरिति भावः। एष हेति तमेन विरुध्येत्यादि प्रदर्श्यमानविशेषणं। विधिरत्रस्य स्थाने न भवतीत्याशंक्याह तस्मादिति। उपलक्षितं॥ ॥७॥ ॥७॥

वेदितव्यः मंत्रैः संस्क्रियमाणः। प्रजापतिरित्यभिमन्यते तत्र किं प्रमाणमित्याशंक्य संप्रतिपत्कार्यभूतायास्तथाविधचेष्टाया दृष्टिरित्याह। अत एवेति। उपासनविधिरूक्षः। संप्रति प्रतिकमादाय तात्पर्यमाह। एष हेति। द्विविधो हि। क्रतुः कल्पितपशुहेतुकोवास्तवतद्धेतुकश्च। स च द्विप्रकारोपि फलरूपेणास्थितः सवितैवेति उपास्तिफलं कथ

कथं तत्र पशुविषयमेव तावद्दर्शनमाह। तत्र प्रजापतिर्भूयसा यज्ञेन भूयो यजेयेति कामयित्वात्मानमेव पशुं मेध्यं कल्पयित्वा तं पशुमनवरुध्यैवोत्सृष्टपशुमवरोधमकृत्वैवमुक्तप्रग्रहमन्यत। चिंतयत तस्य संवत्सरस्य पूर्णस्य परस्ता[illegible]मात्मने आत्मार्थमालभ प्रजापतिदेवताकत्वेनेत्येतदालभतालंभं कृतवान् पशूनन्यान्ग्राम्यानारण्यांश्च देवताभ्यो यथादेवतं प्रति हृतप्रत्यौहत्प्रतिगमितवान् यस्माच्चैवं प्रजापतिरमन्यत तस्माद्देवमन्योप्युक्तेन विधिनात्मानं पशुमश्वं मेध्यं कल्पयित्वा सर्वदेवत्यो अहं प्रोक्ष्यमाण आलभ्यमानस्त्वहं मद्देवत्य एव स्यामन्ये इतरे पशवो यथा·

तमनवरुध्यैवामन्यत तं संवत्सरस्य परस्तादात्मन आलभत पशून्देवताभ्यः प्रत्यौहत्तस्मात्सर्वदेवत्यं प्रोक्षितं· प्राजापत्यमालभंत एष ह वा अश्वमेधो य एष तपति तस्य संवत्सर आत्मायमग्निरर्कस्तस्येमे लोका आत्मानः·

स्यारस्त्वा यथादेवतमन्याभ्यो देवताभ्यः आलभंते मद्देवयज्ञभूतास्त एवेति विद्यात्‌ य अत एवादानीं सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभंते याज्ञिकाः एवं एष ह वा अश्वमेधो य एष तपति यस्त्वेवं पशुसाधनकः क्रतुः स एष साक्षात्फलभूतो निर्दिश्यते एष ह वै अश्वमेधः कोसौ य एष सविता तपति जगदवभासयति तेजसा तस्यास्य क्रतुफलात्मनः संवत्सरः कालविशेषः आत्मा शरीरं तन्निर्वर्त्यत्वात्संवत्सरस्य तस्यैव क्रत्वात्मनः अग्निसाध्यत्वाच्च फलस्य क्रतुरूपेणैव अयं पार्थिवोग्निरर्कः साधनभूतः तस्य चार्कस्य क्रतोः चितस्येमे लोकास्त्रयोप्यात्मनः शरीरावयवाः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

10

मेतद्वावाक्यमित्यर्थः॥ इति विधिवाक्यं। अश्वमेधफलभूतत्वात् अश्वमेध इत्युच्यते अश्वमेधयाजी आदित्यत्वं प्राप्नोतीति आदित्यः अश्वमेधफलभूतः॥ साधनभूतस्य। अग्नेः॥ ॥एमएमएमः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

क्रतुश्चफलंचक्रतुफले। अतः। फलंआदित्यः। अवयवत्वात्रूपंयस्यफलरूपः। प्राण्या। जीवदवस्थायांमृत्यु॰अन्त्यमरणादूर्ध्वंएतासां॰भवति। ॥एमराम।

तथाचव्याख्यातंतस्यप्राचीदिगित्यादिनातावश्वादित्यौएतौयथाविशेषितावर्काश्वमेधौक्रतुफले अर्कोऽयंपार्थिवोऽग्निःससाक्षात्क्रतुरूपःक्रियात्मकःक्रतोरग्निसाध्यत्वात्तद्रूपेणैवनिर्देशःक्रतुसाध्यत्वाच्चक्रतुफलस्यक्रतुरूपेणैवनिर्देशः आदित्योऽश्वमेधइतितौसाध्यसाधनौक्रतुफलभूतावग्न्यादित्यौसाउपुनर्भूयःएकैवदेवताभवति।कासामृत्युरेवपूर्वमप्येकैवासीत्क्रियासाधनफलभेदायविभक्तातथाचोक्तंसत्रेधात्मानंव्यकुरुतेतिसापुनरपिक्रियानिर्वृत्त्युत्तरकालमेकैवदेवताभवति।मृत्युरेवफलरूपोयःपुनरेवमेनमश्वमेधं

एतावेतावर्काश्वमेधौसोपुनरेकैवदेवताभवतिमृत्युरेवापपुनर्मृत्युंजयति
नैनंमृत्युराप्नोतिमृत्युरस्यात्माभवत्येतासांदेवतानामेकोभवति ॥
॥ १ ॥ ॥इतिद्वितीयंब्राह्मणम्॥ २ ॥ ॥छ॥ ॥छ॥

मृत्युमेकांदेवतांवेदाऽहमेवमृत्युःरस्याश्वमेधःएकादेवतामद्रूपाऽश्वाग्निसाध्येतिसोपजयतिपुनर्मृत्युंपुनर्मरणंसकृन्मृत्वापुनर्मरणायनजायतइत्यर्थः।अपजितोपिमृत्युरेनंपुनराप्नुयादित्याशंक्याह।नैनंमृत्युराप्नोतिकस्मान्मृत्युरस्यैवंविदःआत्माभवतिकिंच मृत्युरेवफलरूपःसन्नेतासांदेवतासांदेवतानामेकोभवति॥ तस्यैतत्फलम्॥ ॥१॥ ॥छ॥ ॥इतितृतीयस्याध्यायस्यद्वितीयंब्राह्मणम्॥ ॥२॥ ॥एमरामरामरामराम॥ ॥एमरामरामरामरामरामराम॥ ॥ [illegible] ॥

गुरुशरणं॥ ॥गुरुशरणं॥ ॥श्रीश्रीश्रीश्रीश्रीश्रीश्री॥ ॥कृष्णकृष्णकृष्णकृष्णकृष्ण॥ ॥छ॥ ॥रामरामरामश्रीश्रीश्री॥ ॥

विवक्षितं संबंधं वक्तुं वृत्तं कीर्त्तयति। कर्मणायाति। अपेति। ज्ञानयुक्तानां कर्मणां संसारफलत्वदर्शनानंतरं ज्ञानकर्मणोरुद्भावकस्य प्राणस्य स्वरूपं निरूपयितुं ब्राह्म
णमित्युत्थाप्योत्थापकत्वं संबंधं उक्तमाक्षिपति। नन्विति। मृत्युमतिक्रांतो दीप्यत इति मृत्योरतिक्रमणस्यावस्थमारणज्ञानकर्मफलत्वात्पूर्वत्र च मृत्युभावस्य
फलस्योक्तत्वादुभयस्यापि फलस्य भेदात्पूर्वोत्तरयोः ज्ञानकर्मणोः विषयश इतितो हेतुभेदान्न पूर्वोक्तयोस्तयोरुद्भवकारणप्रकाशनार्थं ब्राह्मणमित्यर्थः। पू
र्वोत्तरज्ञानकर्मफलभेदाभावादेकविषयत्वात्तदुद्भावकप्रकाशनार्थं ब्राह्मणं युक्तमिति परिहरति। नायमिति। स्वाभाविकः शास्त्रानाधेयो यं पाप्मा विषयास्मे

कल्पितविषयः४

द्वयाहेत्यस्य कः संबंधः कर्मणां ज्ञानसहितानां परा गतिरुक्ता मृत्व्यात्मभावोऽश्वमेधगत्या। अथेदानीं मृत्व्यात्मभावसाधनभूतयोः कर्म
ज्ञानयोर्य उद्भवः तत्प्रकाशनार्थमुद्गीथब्राह्मणमारभ्यते। ननु पूर्वत्र ज्ञानकर्मणोः फलमुक्तं मृत्व्यात्मभावः उद्गीथज्ञानकर्मणो
र्मृत्व्यात्मभावातिक्रमणं फलं वक्ष्यत्यतो भिन्नविषयत्वात्फलस्य न पूर्वकर्मज्ञानोद्भवप्रकाशनार्थमिति चेन्नायं दोषोऽग्न्यादित्वा
त्मभावत्वादुद्गीथफलस्य पूर्वेणाप्यतदेव फलमुक्तमेतासां देवतानामेको भवतीति ननु मृत्युमतिक्रांत इत्यादि विरुद्धं न स्वाभाविकपाप्मासं

द्वयाह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरास्त एषु लोकेष्वस्पर्धंत ते ह दे
वा ऊचुर्हंतासुरान्यज्ञ उद्गीथेनात्ययामेति॥ १० ॥ ॥छ॥ ॥छ॥ ॥

गविषयत्वादतिक्रमणस्य कोऽसौ स्वाभाविकपाप्मासंगो मृत्युः कुतो वा तस्योद्भवः केन वा तस्यातिक्रमणं कथं चेत्येतस्यार्थस्य प्रकाशनाया
ख्यायिकारभ्यते कथं द्वयाः द्वि प्रकाराः ह इति पूर्ववृत्तावद्योतको निपातो वर्त्तमानप्रजापतेः पूर्वजन्मनि यद्वृत्तं तदेव द्योतयति हशब्देन प्रा
जापत्याः प्रजापतेर्ह्यत्र जन्मावस्थस्यापत्यानि प्राजापत्याः। के ते देवाश्चासुराश्च तस्यैव प्रजापतेः प्राणा वागादयः कथं पुनस्तेषां दे
वासुरत्वमुच्यते शास्त्रजनितज्ञानकर्मभाविताः तद्योतनाद्देवा भवंति त एव स्वाभाविकप्रत्यक्षानुमानजनितदृष्टप्रयोजनकर्मज्ञा

गरूपः स मृत्युस्तस्यातिक्रमणं वा वाक्यशेषेपि कथ्यते। नहि रागपगर्भाख्यस्य मृत्योः ज्ञानकर्मणोरुद्भावकत्वं वक्तुं ब्राह्मणमारभ्यतां आख्यायिका तु किमर्थेत्या
शंक्य तस्यास्तात्पर्यमाह। कोऽसाविति। स्वाभाविकपाप्मासंगमृत्योः स्वाभाविकज्ञानकर्मभाविताऽसुराख्येभ्यो वागादिभ्य उद्भवः शास्त्रीयज्ञानकर्मसमुच्चयेन त
स्यातिक्रमणं मृत्योः। केवलं सात्विक्या वृत्त्या वागादीनामवस्थानं अतिक्रमणस्वरूपं। शास्त्रानपेक्षयोः ज्ञानकर्मणोरुत्थाकमाह॥ प्रत्यक्षेति॥ ॥रामराम

स्वप्रयोजनस्यैव साधकत्वात्। स्वेष्वसुष्वारमणं नामात्मंभरित्वं। देवेभ्यो। निमित्तभूतेषु। शास्त्रजनिता। वासना। योयमुद्गीथः कर्मांगभूतः पदार्थस्तत्कर्तुः प्राणस्य स्वरूपाश्रयणमेव कथमभिप्रवृत्तीत्याशंक्याह। उद्गीथकर्मेति। किं तत्कर्म। किं वा ज्ञानं तदाह। कर्मेति। तान्येतान्यसतो मा सद्गमयेत्यादीनि यजूंषि जपेदिति विधित्स्यमानमि

नभाविता असुराः स्वेष्वेवासुषु रमणात्सुरेभ्योऽन्यत्वाद्यस्माद्दृष्टप्रयोजनकर्मज्ञानभाविता असुरास्ततस्तस्मात्कानीयसाः कनीयांस एव कानीयसाः स्वार्थे वृद्धिः कनीयांसोऽल्पा एव देवाः ज्यायसा असुराः ज्यायांसोऽसुराः स्वाभाविकी हि कर्मज्ञानप्रवृत्तिर्महत्तरा प्राणानां शास्त्रजनितायाः कर्मज्ञानप्रवृत्तेर्दृष्टप्रयोजनत्वादत एव कनीयस्त्वं देवानां शास्त्रजनितप्रवृत्तेरल्पत्वादत्यन्तयत्नसाध्या हि सा ते देवाश्चासुराश्च प्रजापतिशरीरस्था एषु लोकेषु फलेषु स्वाभाविकेतरकर्मज्ञानसाध्येष्वस्पर्द्धंत स्पर्द्धां कृतवंत· देवानां चासुराणां च वृत्त्युद्भवाभिभवौ स्पर्द्धा कदाचिच्छास्त्रजनितकर्मज्ञानभावनारूपा वृत्तिः प्राणानामुद्भवति यदा चोद्भवति तदा दृष्टप्रयोजना प्रत्यक्षानुमानजनितकर्मज्ञानभावनारूपा तेषामेव प्राणानां वृत्तिरासुर्यभिभूयते। स देवानां जयोऽसुराणां पराजयः कदाचित्तद्विपर्ययेण देवानां वृत्तिरभिभूयते आसुर्या उद्भवः सोऽसुराणां जयो देवानां पराजयः एवं देवानां जये धर्मभूयस्त्वादुत्कर्षः आप्रजापतित्वप्राप्तेरसुरजये धर्मभूयस्त्वादपकर्षः आस्थावरत्वप्राप्तेरुभयसाम्ये मनुष्यत्वप्राप्तिस्त एवं कनीयस्त्वादभिभूयमाना असुरैर्देवा बाहुल्यादसुराणां किं कृतवंत इत्युच्यते। देवा असुरैरभिभूयमाना ह किल ऊचुरुक्तवंत· कथं हंतेदानीमस्मिन्यज्ञे ज्योतिष्टोमे उद्गीथेनोद्गीथकर्मपदार्थकर्तृस्वरूपाश्रयेणात्ययामेति गच्छामोऽसुरानभिभूय स्वं देवाभावं शास्त्रप्रकाशितं प्रतिपद्यामह इत्युक्तवंतोऽन्योन्यमुद्गीथकर्मपदार्थकर्तृस्वरूपाश्रये च ज्ञानकर्मभ्यां कर्म वक्ष्यमाणं मंत्रजपलक्षणं विधित्स्यमानं तदेतानि जपेदिति ज्ञानं त्विदमेव निरूप्यमाणं। नन्विदमभ्यारोहजपविधिशेषोऽर्थवादो न ज्ञाननिरूपणपरं न य एवं वेदेति वचनादुद्गीथप्रस्तावे पुराकल्पश्रवणादुद्गीथविधिपरमिति चेन्नाप्रकरणादुद्गीथस्यान्यत्र विहितत्वात्। विद्याप्रकरणत्वाच्चास्य ।

तियोजना। योयमुद्गीथो नाम कर्मांगभूतः पदार्थस्तत्कर्तुः प्राणस्य स्वरूपाश्रयेण। अतिघ्नतीत्यर्थः। तत्किं कर्मेत्याशंक्याह कर्म वक्ष्यमाणमित्यादि। द्वयाहेत्यादि। न ज्ञाननिरूपणपरं। जपविधिशेषत्वेनार्थवादत्वात्। तत्कृतो ज्ञानस्य निरूप्यमाणत्वमित्याक्षिपति। नन्विति। उपास्तिविधिश्रवणान्नत्परं वाक्यं न जपविधिशेष इति· दूषयति नेति मा भूज्जपविधिशेषत्वं तथाप्युद्गीथस्य कर्मणः संनिधाने पुरातनकल्पनाप्रकारस्य द्वयाहेत्यादिनाश्रवणात्तद्विधिशेषोऽर्थवादोऽयमिति शंकते। उद्गीथेति। न देवासुरज्ञानं वोद्गीथशेषः तत्प्रकरणा[illegible]त्वाभावेन संनिध्यभावादिति दूषयति। नाप्रकरणादिति॥ ॥७॥ ॥८॥ ॥

द्वयाहेत्यादिना [illegible] निरूप्यमाणां विषयादिभ्यो विलक्षणाः अदोवाक्यपदार्थविवे

गुणाधुना विज्ञानुपादिभिन्नः आत्मप्राणो [illegible] इत्याकारकं ३

जपविधिशेषत्वस्य तीर्थविधिशेषत्वं वा ज्ञानस्य नास्तीत्युक्तं । इदानीं जपविधिशेषत्वाभावे युक्त्यंतरमाह । अभ्यासेहेति । एवंविदिति । प्राणविज्ञानवतानुष्ठेयो जपो न तद्विज्ञानात् प्रागपि । तन्नासौ पश्चाद्भावी प्रागेव सिद्धं विज्ञानं प्रयोजयतीत्यर्थः । तस्यापि प्राचीनत्वं कथमित्याशंक्याह । विज्ञानस्य चेति । य एवंविद्वान् पौर्णमा-

भ्यारोहजपस्य चानित्यत्वादेवंवित्प्रयोज्यत्वात् । विज्ञानस्य च नित्यवच्छ्रवणात्तेन ह्योकजिदेवेति च श्रुतेः । प्राणस्य वागादीनां च अशुद्धिवचनात् अन्यस्य तूपास्यत्वे प्राणस्य शुद्धिवचनं वागादीनां सहोपन्यस्तानामशुद्धिवचनं वागादिनिंदया मुख्यप्राणस्तुतिश्चेत्येतन्नाभिप्रेतमुपपद्यते ॥ मृत्युमतिक्रांतो दीप्यत इत्यादिफलवचनं च प्राणस्वरूपापत्तेर्हि फलं तद्यद्वागाश्यन्याद्भावः भवतु नाम प्राणस्योपासनं न तु विशुद्ध्यादिगुणवत्त्वेनेति । ननु स्याद्भूतत्वान्न स्यादुपास्यत्वे स्तुत्यर्थत्वोपपत्तेः नाविपरीतार्थप्रतिपत्तेः श्रेयःप्राप्त्युपपत्तेर्लोकवत् । यो ह्यविपरीतमर्थं प्रतिपद्यते लोके स इष्टं प्राप्नोत्यनिष्टाद्वा निवर्त्तते नेन विपरीतार्थप्रतिपत्त्या तथेहापि श्रौतशब्दजनितार्थप्रतिपत्तौ श्रेयःप्राप्तिरुपपन्ना न विपर्ययेण वोपासनार्थं श्रुतत्वाद्वोक्तविज्ञानविषयस्यायथार्थत्वे प्रमाणमस्ति न च तद्विज्ञानस्यापवादः श्रूयते ततः श्रेयःप्राप्तिदर्शनात्तथार्थतां प्रतिपद्यामहे विपर्यये चानर्थप्राप्तिदर्शनात् यो हि विपर्ययेणार्थं प्रतिपद्यते लोके पुरुषं स्थाणुरित्यमित्रं मित्रमिति वा सोऽनर्थं प्राप्नुवन् दृश्यते आत्मेश्वरदेवतादीनामप्ययथार्थानामेव चेद्ग्रहणं श्रुतितोऽनर्थप्राप्त्यर्थं शास्त्रमिति ध्रुवं प्राप्नुयाल्लोकवदेव न चैतदिष्टं तस्माद्यथाभूतानेवात्मेश्वरदेवतादीन् ग्राहयत्युपासनार्थं शास्त्रं नामादौ ब्रह्मदृष्टिदर्शनादयुक्तमिति चेत्स्फुटं नामादेरब्रह्मत्वं तत्र ब्रह्मदृष्टिं स्थाणाविव पुरुषदृष्टिं ग्राहयच्छास्त्रं दृश्यते तस्मादयथार्थमेव शास्त्रतः प्रतिपत्तेः श्रेय इत्ययुक्तमिति चेन्न प्रतिमावद्भेदप्रतिपत्तेर्नामादावब्रह्मणि ब्रह्मदृष्टिं विपरीतां ग्राहयति शास्त्रं स्थाणाविव पुरुषदृष्टिमिति नैतत्सारं कस्माद्भेदेन हि ब्रह्मणो नामादिवस्तु प्रतिपन्नस्य नामादौ विधीयते ब्रह्मदृष्टिः प्रतिमायामिव विष्णुदृष्टिरालंबनत्वेन हि नामादिप्रतिपत्तिः प्रतिमावदेव न तु नामाद्येव ब्रह्मेति यथा स्थाणावनिर्ज्ञाते न स्थाणुरिति·

सीं पमनत इति वय एवं वेदेति विज्ञानं श्रुतं । नहि प्रयाजादि पौर्णमासीप्रयोजकं । तस्यापूर्ववत्तत्प्रयोजनकत्वात्तथा प्राणविन्नियोज्यो जपो न विज्ञानप्रयोजकः फलवत्वाच्च प्राणविज्ञानं स्वतंत्रविधिसिद्धमित्याह । नेति । उक्तमेव व्यनक्ति । प्राणेति । यथार्थं यथा स्यात्तथा शास्त्रतः यो अर्थस्य प्रतिपत्तिः तस्याः एव सकाशात् श्रेय इत्युक्तं । प्रतिमायां विष्णुदृष्टिप्रति आलंबनत्वमेव न विष्णुतादात्म्यं । नामादेस्तु ब्रह्मतादात्म्यं श्रुतमिति चेत्तत्राश्यमाशंक्याह । आलंबनत्वेति । उक्तमर्थं विधर्मदृष्टांतेन स्पष्टयति · तथेति ॥ ॥राम

पौर्णमासी । कर्मज्ञानस्य । ३ प्रयाजादिप्रयोजकत्वात् । २

कर्ममीमांसको ब्रह्म विहेध्यं प्रकृत्यत्र प्रत्यवतिष्ठते। ब्रह्मेति। केवलात्तदृष्टिर्विनात्रिचोद्यते। चोदनावशाद्धि फलं सेत्स्यति। ब्रह्मण्यकर्तनास्ति मानाभावादित्यर्थः। अथ यथा देवानां प्र
तिमादिषु पूज्यमानानामन्यत्र सत्त्वं। यथा च वस्वादीनां पितॄणां ब्राह्मणादिदेहेऽर्च्यमानानामन्यत्र सत्त्वं। तथा ब्रह्मणोऽपि नामाद्युपास्यत्वादन्यत्र सत्त्वं भविष्यतीत्याशंक्या
ह। एतेनेति। नामादौ ब्रह्मदर्शनेनेति। ब्रह्मास्तित्वे हेत्वन्तरमाह। मुख्यापेक्षत्वादिति। उक्तमेव विवृणोति यच्चेति। योषा वा अग्निः १ ननु वेदान्तवेद्यं ब्रह्मेष्यते। न च ते

प्रत्यक्ष एवायमिति प्रतिपद्यते विपरीतं न तु तथा नामादौ ब्रह्मदृष्टिर्विपरीता ब्रह्मदृष्टिरेव केवला नास्ति ब्रह्मेति चेदेतेन प्रतिमाब्राह्मणादिषु वि १
ष्ण्वादिदेवपित्रादिदृष्टीनां तुल्यता न गवादिषु पृथिव्यादिदृष्टिदर्शनाद्विद्यमानपृथिव्यादिवस्तुदृष्टीनामेव गवादिविषये सापेक्षदर्शनात्तस्मात्त
त्सामान्यान्नामादिषु ब्रह्मादिदृष्टीनां विद्यमानब्रह्मादिविषयत्वासिद्धिः एतेन प्रतिमाब्राह्मणादिषु विष्ण्वादिदेवपित्रादिदृष्टीनां च तथा
वस्तुविषयत्वसिद्धिः मुख्यापेक्षत्वाद्गौणत्वस्य पे चाग्न्यादिषु चाग्नित्वादेर्गौणत्वान्मुख्याग्न्यादिषु सद्भाववन्नामादिषु ब्रह्मत्वस्य गौण
त्वान्मुख्यब्रह्मसद्भावोपपत्तिः क्रियार्थैश्चाविशेषाद्विद्यार्थानां यथा च दर्शपूर्णमासादिक्रियेयं फलविशिष्टेति कर्त्तव्यताका एवंक्रमप्र
युक्ताङ्गा वेत्यनेनालौकिकं वस्तु प्रत्यक्षाद्यविषयं तथाभूतं च वेदवाक्यैरेव ज्ञाप्यते। तथा परमात्मेश्वरदेवतादिवस्त्व स्थूलादिधर्मकम
शनायापतीतं चेत्येवमादिविशिष्टमिति वेदवाक्यैरेव ज्ञाप्यते इति अलौकिकत्वात्तथाभूतमेव भवितुमर्हति। न च क्रियार्थैर्वाक्यैस्ता
न वाक्यानां तु प्रत्यायकत्वे विशेषोऽस्ति न चानिश्चितताविपर्यस्तता वा परात्मादिवस्तुविषयाद्बुद्धिरुत्पद्यते अनुष्ठेयाभावादयुक्तमिति चे
त् क्रियार्थैर्वाक्यैरंशभावना अनुष्ठेया ज्ञाप्यते अलौकिक्यपि न तथा परमात्मेश्वरादिविज्ञाने त्वनुष्ठेयं किंचिदस्त्यतः क्रियार्थैः साधर्म्य
मयुक्तमिति चेत् न ज्ञानस्य तथाभूतार्थविषयत्वात्। न ह्यनुष्ठेयस्यांशस्य भावनाख्यस्यानुष्ठेयत्वात्तथात्वं किं तर्हि प्रमाणसमधि
गतत्वान्न च तद्विषयाया बुद्धेरनुष्ठेयविषयत्वात्तथात्वं किं तर्हि वेदवाक्यजनितत्वादेवं वेदवाक्याधिगतस्य वस्तुनस्तथात्वे सत्यनु
ष्ठेयत्वविशिष्टं चेदनुतिष्ठति न चेदनुष्ठेयत्वविशिष्टं तदा नानुतिष्ठत्यननुष्ठेयत्वे वाक्यप्रमाणत्वानुपपत्तिरिति चेन्न ह्यनुष्ठेयेऽसति
पदानां संहतिरुपपद्यतेऽनुष्ठेये तु सति तादर्थ्येन पदानि संहन्यन्ते तत्रानुष्ठेयनिष्ठं वाक्यं प्रमाणं भवतीदमनेनैवं कर्त्तव्यमिति नालिदमनेनैव

भानद्वीः सिध्यतीत्येवां विधिवैधुर्येण प्रामाण्यान्न कुतो ब्रह्मसिद्धिरत आह। क्रियार्थैरिति। विमतं स्वार्थे प्रमाणं। अज्ञातज्ञापकत्वात्संमतवत्। अतो वेदान्तशास्त्रादेव ब्र
ह्मसिद्धिरित्यर्थः। क्रियावाक्यविद्यावाक्यानां तुल्यत्वात्। शास्त्रीयं। सह। यजेत। किं। केन। कथं। इति त्रिंशा। क्रिया। वाक्योत्थ उक्ते यथार्थत्वाद्विध्यभावेऽपि वाक्य
प्रामाण्यमज्ञातज्ञापकत्वेनाविरुद्धमिति परिहरति न। ज्ञानस्येति। सत्यत्वे। क्रियाविषयायाः। ब्रह्मणो वाक्यार्थत्वं पदार्थत्वं वानायइत्याह। अननुष्ठेयत्व इति।

क्रुर्यादित्यादीनामन्यतमेऽसति इत्यनेनैवं इत्यादीनां वाक्यत्वं नास्ति। द्वितीयं दूषयति। पदार्थेत्वेति। ब्रह्मणः शास्त्रार्थत्वमेतदित्युच्यते। कार्य्यास्पृष्टेऽर्थे वाक्यप्रामाण्यं दृष्टान्तेन साधयति। नेत्यादिना। शुक्लकृष्णलोहितमिश्रलक्षणानां वर्णानां चतुष्टयं। यथा घटः पट इत्यादीनां पदार्थानां प्रमाणान्तरविषयत्वं तथा ब्रह्मणोऽपि स्यात्। ब्रह्मज्ञानस्य। संप्रतिशास्त्रस्य कार्यपरत्वानियमे हेत्वंतरमाह। प्रतिषिद्धेति। प्रतिषिद्धं चानिष्टफलं च तयोः संबंधः। प्रतिषेधज्ञानवतोऽपि कलंजभक्षणादिज्ञानदर्शना

मित्येवंप्रकाराणां पदज्ञातानामपि वाक्यत्वमस्ति कुर्यात् क्रियेत भवेत् कर्त्तव्यं स्यादित्येवमादीनामन्यतमेऽसत्यतः परमात्मात्मेश्वरदेवतादीनामवाक्यप्रमाणत्वे पदार्थत्वे च प्रमाणान्तरविषयत्वं अतोऽसदेतदिति चेन्नास्ति मेरुर्वर्णचतुष्टयोपेत इत्येवमाद्यननुष्ठेयेऽपि वाक्यदर्शनात्। न च मेरुर्वर्णचतुष्टयोपेत इत्येवमादिवाक्यश्रवणे मेर्वादावनुष्ठेयत्वबुद्धिरुत्पद्यते तथास्ति पदसंहितानां परमात्मेश्वरादिप्रतिपादकवाक्यपदानां विशेषणविशेष्यभावेन संहतिः केन वार्यते मेर्वादिज्ञानवत्परमात्मज्ञाने प्रयोजनाभावादयुक्तमिति चेन्न ब्रह्मविदाप्नोति परं भिद्यते हृदयग्रंथिरिति फलश्रवणात्। संसारबीजाविद्यादिदोषनिवृत्तिदर्शनाच्चाऽनन्यशेषत्वाच्च तज्ज्ञानस्य जुह्वामिव फलश्रुतेरर्थवादत्वानुपपत्तिः प्रतिषिद्धानिष्टफलसंबंधश्च वेदादेव विज्ञायते न चानुष्ठेयः सः न च प्रतिषिद्धविषये प्रवृत्तिरूपस्याऽकरणादन्यदनुष्ठेयमस्ति अकर्त्तव्यताज्ञाननिष्ठतैव हि परमार्थतः प्रतिषेधविधीनां स्यात्। क्षुधार्त्तस्य प्रतिषेधज्ञानसंस्कृतस्याभक्ष्येऽभोज्ये वा प्रत्युपस्थिते कलंजाभिशस्तान्नादाविदं भक्ष्यमदो भोज्यमिति वा ज्ञानमुत्पन्नं तद्विषयया प्रतिषेधज्ञानस्मृत्या वाध्यते मृगतृष्णिकायामिव पेयज्ञानं तद्विषययाथात्म्यविज्ञानेन तस्मिन्वाधिते स्वाभाविकविपरीतज्ञानेऽनर्थकरी तद्भक्षणभोजनप्रवृत्तिर्न भवति विपरीतज्ञाननिमित्तायाः प्रवृत्तेर्निवृत्तिरेव न पुनर्यत्नः कार्यस्तदभावे तस्मात्प्रतिषेधविधीनां वस्तुयाथात्म्यज्ञाननिष्ठतैव न पुरुषव्यापारनिष्ठता गंधोऽप्यस्ति तथेहापि परमात्मादियाथात्म्यज्ञानविधीनां तावन्मात्रपर्यवसानतैव स्यात्तथा तद्विज्ञानसंस्कृतस्य तद्विपरीतार्थज्ञाननिमित्तानां प्रवृत्तीनामनर्थार्थत्वेन ज्ञायमानत्वात्परमात्मादियाथात्म्यज्ञानस्मृत्या स्वाभाविके तन्निमित्तेऽविज्ञाने वाधितेऽभावः स्यान्ननु कलंजादिभक्षणाद्यनर्थार्थत्वं वस्तुयाथात्म्यज्ञा ॥

क्रिया।१ ततो निवृत्तेर्नियोगाधीनत्वात्तन्निष्ठमेव वाक्यमेष्टव्यमिति चेन्नेत्याह। क्षुधार्त्तस्येति। विषदिग्धशरहतस्य पशोर्मांसं कलंजं। ब्रह्मवधाद्यभिशापयुक्तस्यान्नपानादिरतस्मिन्नभक्ष्येऽभोज्ये प्राप्ते य इदमज्ञानं क्षुधार्त्तस्योत्पन्नं तन्निषेधधीसंस्कृतस्य तद्धीस्मृत्या वाध्यमित्यत्र लौकिकं दृष्टान्तमाह। मृगतृष्णिकायामिवेति। भवति। तथात०स्यपर०धिते सति तद्वि०त्तीनामभावः स्यात्। अतः प्रवृत्तीनामनर्थार्थत्वेन ज्ञायमानत्वात्। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाशंकते। तन्विति। प्रवृत्तिनिमित्तेऽविज्ञाने वाधिते सति प्रवृत्तीनामभावः स्यात्

अभिशस्तं।१

कलंजभक्षणादेर्निषिद्धत्वात्तच्छास्त्राप्रमाणेनविपरीतज्ञानेनबाधितेतत्कार्यप्रवृत्त्यभावेनिमित्याभावेनैमित्तिकाभावन्यायेनयुक्तः। नतथाग्निहोत्रादिप्रवृत्त्यभावोयुक्तोऽविद्याःग्निहो-
त्रादिनकर्तव्यमितिनिषेधानुपलंभादित्यर्थः। नत्वमस्यादिवाक्येनाऽथन्निषिद्धमग्निहोत्रादीतिमन्वानःसाम्यमाह। नेत्यादिना। काम्यानामज्ञानहेतुत्वानर्थार्थत्वाहेतुभ्यांविउव-
तेषुप्रवृत्त्यभावोयुक्तः। नित्यानांतुशास्त्रमात्रप्रयुक्तानुष्ठानत्वान्नाशानक्षतत्वं। प्रत्यवायपरिव्यानर्थध्वंसित्वान्नानर्थहेतुत्वं। अतस्तेषुप्रवृत्त्यभावोयुक्तोनभवतीति-
शंकनेनान्वेति। नित्यानांशास्त्रमात्रलक्षणानुष्ठानत्वमसिद्धमितिपरिहरति। नेत्यादिना। तदेवप्रपंचयतियथेति। अविद्यादीत्यादिशब्देनाऽस्मितादिक्लेशचतुष्टयोक्तिः। अविद्यादिभि-

नस्तस्यास्वाभाविकेतद्रूपत्वादिविपरीतज्ञानेनिवर्तितेतद्भक्षणाद्यनर्थप्रवृत्तिभाववत्अप्रतिषेधविषयत्वाच्छास्त्रविहितप्रवृत्त्यभावोनयुक्तइ-
तिचेन्न। विपरीतज्ञाननिमित्तत्वानर्थार्थत्वाभ्यांतुल्यत्वात्कलंजभक्षणादिप्रवृत्तेर्मिथ्याज्ञाननिमित्तत्वमनर्थार्थत्वंचयथातथाशा-
स्त्रविहितप्रवृत्तीनामपितस्मात्परमात्मयाथात्म्यविज्ञानवतःशास्त्रविहितप्रवृत्तीनामपिमिथ्याज्ञाननिमित्तत्वेनानर्थार्थत्वे
नचतुल्यत्वात्परमात्मज्ञानेनविपरीतज्ञानेनिवर्त्तितेयुक्तएवाभावः॥ ननुतत्रयुक्तोनित्यानांतुकेवलशास्त्रनिमित्तत्वादनर्थार्थत्वाभा-
वाच्चाऽभावोनयुक्तइतिचेन्नाविद्यारागद्वेषादिदोषवतोविहितत्वात्यथास्वर्गकामादिदोषवतोदर्शपूर्णमासादीनिकाम्यानिकर्मा-
णिविहितानितथासर्वानर्थबीजाविद्यादोषवततज्जनितेष्टानिष्टप्राप्तिपरिहाररागद्वेषादिदोषवतश्चतत्प्रेरिताविशेषप्रवृत्तेरिष्टानि-
ष्टप्राप्तिपरिहारार्थिनोनित्यानिकर्माणिविधीयंतेतेनकेवलंशास्त्रनिमित्तान्येवनचाग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुबंधसोमा-
नांकर्मणांस्वतःकाम्यनित्यत्वविवेकोस्तिकर्तृगतेनहिस्वर्गादिकामदोषेणकामार्थतातथाऽविद्यादिदोषवतःस्वभावप्राप्तेष्टानि-
ष्टप्राप्तिपरिहारार्थिनस्तदर्थान्येवनित्यानीतियुक्तंतत्प्रतिविहितत्वान्नपरमात्मयाथात्म्यविज्ञानवतःशमोपायव्यतिरेकेणकिंचित्कर्मवि-
हितमुपलभ्यतेकर्मनिमित्तदेवतादिसर्वसाधनविज्ञानोपमर्दनह्यात्मज्ञानंविधीयतेनचोपमर्दितक्रियाकारकादिविज्ञानस्यकर्मप्रवृत्तिरुपपद्यते।

ष्टानितेष्टप्राप्तौतादृगनिष्टप्राप्तौचकर्मणिरागद्वेषवतःपुरुषस्येष्टप्राप्तिमनिष्टपरिहारंचवांछतस्ताभ्यामेवरागद्वेषाभ्यामिष्टंमेभूयादनिष्टंमेमाभूदित्यविशेषकामनाःप्रे-
रिताऽविशेषप्रवृत्तियुक्तस्यनित्यानिविधीयंते। स्वर्गकामःपशुकामइतिविशेषार्थिनःकाम्यानितुल्यंतूभयेषांकेवलशास्त्रनिमित्तमित्यर्थः। किंचकाम्यानांदुष्टत्वंमुक्ता
नित्यानांतदिष्टंउत्पत्तिविनियोगाधिकारविधिरूपविशेषाभावादित्याह। नचेति। कथंतर्हिकाम्यनित्यविभागःतत्राह। कर्तृगतेनेति। नन्वविद्यादिदोषवतोनित्यानिकर्मा-
णीत्युक्तंःपरमात्मज्ञानवतोयावज्जीवश्रुतेस्तेषामनुष्ठेयत्वादित्याशंक्यश्रुतेरविरक्तविषयत्वान्मैवमितिआह। नपरमात्मेति। तथासतिनित्यानांकाम्यैरविशेषत्वमितिभा-

वः। कर्मोपशमः॥ ॥

अग्निहोत्राद्यपि तथा स्यादिति चेन्नेत्याह । अविद्यया रागवत्तो यः क्षुत्पिपासादिदोषः स निमित्तं यस्याः तस्या भावः तस्मात् । नित्यकर्मावसरः स्यात् । भोजनादिप्रवृत्तेरावश्यककत्वानुपपत्तिं विवृणोति । केवलेति । केवलक्षुत्पिपासादिदोषनिमित्तत्वात् । नित्यकर्मावसरः स्यात् ननु तथेत्यादि प्रपञ्चयति । शास्त्रनिमित्तेति । दोषः क्षुधाख्यः । तर्हि शास्त्रविहितकालाद्यपेक्षत्वान्नित्यानामदोषोत्पादकत्वं भवेदित्याशंक्याह । दोषेति । एवं दोषेत्याह कत्वेपि नित्यानां शास्त्रमात्रापेक्षत्वात्कालाद्यपेक्षत्वमविरुद्धमित्याह ॥ एवमिति भोजनादेर्दोषवशत्वेपि चातुर्वर्ण्यं चरेद्भक्ष्यं यतीनां तु चतुर्णाम् इत्यादिनियमवदविदुषोग्निहोत्रादिनियमोपि स्यादिति शंकते । त्वभोजनादीति । विदुषो नास्ति भोजनादिनियमः अतिक्रान्तविधित्वात् न चैतावता अर्थेष्टचेष्टापत्तिः । अधर्माधीनाऽविवेकक्षता हिंसा । न तो विदुषो विद्यते । अतो विद्यावस्थायामप्यसन्नियमश्

विशिष्टक्रियासाधनादिज्ञानपूर्वकत्वात्तत्क्रियाप्रवृत्तेर्नहि देशकालाद्यनवच्छिन्नाः स्थूलाद्यात्मप्रत्ययधारिणः कर्मावसरोस्ति भोजनादिप्रवृत्त्यवसरवत्स्यादिति चेन्नाविद्यादिकेवलदोषनिमित्तत्वाद्भोजनादिप्रवृत्तेरावश्यकत्वानुपपत्तेः नतु तथा नियतं कदाचित्क्रियते कदाचिन्न क्रियते चेति नित्यं कर्मोपपद्यते । केवलदोषनिमित्तत्वाद्भोजनादिकर्मणोऽनियतत्त्वं स्याद्दोषोद्भवाभिभवयोरनियतत्वात्कामानामिव काम्ये शास्त्रनिमित्तकालाद्यपेक्षित्वान्नित्यानामनियतत्वानुपपत्तिर्दोषनिमित्तत्वे सत्यपि यथा काम्याग्निहोत्रस्य शास्त्रविहितत्वात्सायंप्रातःकालाद्यपेक्षित्वमेवं त्वभोजनादिप्रवृत्तेर्नियमवत्स्यादिति चेत् न । नियमस्याक्रियात्वात्क्रियायाश्च प्रयोजनकत्वान्नासौ ज्ञानस्यापवादकरः तस्मात्परमात्मयाथात्म्यज्ञानविधिरपि तद्विपरीतस्थूलद्वैतादिज्ञाननिवर्तकत्वात्सामर्थ्यात्सर्वकर्मप्रतिषेधविध्यर्थं संपद्यते कर्मप्रवृत्त्यभावस्य तुल्यत्वाद्यथा प्रतिषेधविषये तस्मात्प्रतिषेधविधिवत्त्वस्तुप्रतिपादनपरत्वं च सिद्धं शास्त्रस्य ॥ १० ॥ ॥रामरामरामरामरामराम॥ ॥रामरामरामराम॥

चेत्स विद्यादशायां कुतः स्यात् । इति मनसि निधायाह । नेति । किंच । अविदुषां विविदिषूणामेव नियमः तेषां विधिनिषेधगोचरत्वात् । न च तेषामप्येष ज्ञानोदयपरिपंथी । तस्मात्स निवृत्तिरूपस्य स्वयं क्रियात्वाभावात् । नापि सः क्रियामाक्षिपन् ब्रह्मविद्यां प्रतिक्षिपति । अन्यनिवृत्त्यात्मनस्तदाक्षेपकत्वासिद्धेरित्याह । नियमस्येति । कर्मप्रवृत्त्यभावस्येति । यथा प्रतिषेधविषये भक्षणादौ प्रतिषेधशास्त्रवशात्प्रवृत्त्यभावः तथा तत्त्वमस्यादिवाक्यसामर्थ्यात्कर्मस्वपि प्रवृत्त्यभावस्य तुल्यत्वात्प्रामाण्यमपि तुल्यमित्यर्थः । प्रतिषेधशास्त्रसाम्येन तत्त्वमस्यादिवाक्यस्योच्यमानेन तथैव निवृत्तिनिष्ठत्वस्यान्न वस्तुप्रतिपादकत्वमित्याशंक्याह । तस्मादिति । प्रतिषेधादिप्रमत्तक्रियां निवर्तयंतस्तदुपलक्षितोदासीन्यात्मके वस्तुनि पर्यवस्यति । तथा तत्त्वमस्यादिवाक्यस्यापि वस्तुप्रतिपादकत्वमविरुद्धमित्यर्थः ॥ ॥७॥ ॥

जपमंत्रेणप्रकाश्या।१

असत०ज्ञःतेनाभिधेयंप्रकाश्य।१

नियोक्तॄणांदेवानामभिप्रायमाह।वाग्देवतेति।नन्वोक्तादृष्टंकर्मजपमंत्रप्रकाश्यादेवतानिर्वर्त्तिष्यतिनतुवाग्देवतेतितत्राह।तामेवेति।असतोमासद्गमयेतिजपमंत्राभिधेयादृष्टवंतइतिपूर्वेणसंबंधः।वागाद्याश्रयंकर्तृत्वादि।दर्शयतस्तात्पर्यमाह।अत्रेति।अनामरूपकर्मात्मकमित्यस्मादुपरिष्टात्तत्पदमध्याहर्त्तव्यं।पृथ

ब्रह्मणोविशेषणानि।२

तेदेवाहएवंनिश्चित्यवाचंवागभिमानिनींदेवतामूचुरुक्तवंतस्त्वंनोस्मभ्यमुद्गायौद्गात्रंकर्मकुरुष्ववाग्देवतानिर्वर्त्यमौद्गात्रंकर्मदृष्टवंतस्तामेवचदेवतांजपमंत्राभिधेयामसतोमासद्गमयेति।अत्रचोपासनायाःकर्मणश्चकर्तृत्वेनवागादयएवविवक्ष्यंतेकस्माद्यस्मात्परमार्थतस्तत्कर्तृकस्तद्विषयएवचसर्वोज्ञानकर्मसंव्यवहारोवक्ष्यतिहिध्यायतीवलेलायतीवेत्यात्मकर्तृत्वाभावंविस्तरतःषष्ठेइहापिचाध्यायांतउपसंहरिष्यत्यव्याकृतादिक्रियाकारकफलजातंत्रयंवाइ

तेहवाचमूचुस्त्वंनउद्गायेतितथेतितेभ्योवागुदगाय

दंनामरूपंकर्मेत्यविद्याविषयमव्याकृतानुक्रम्यपरमात्माख्यंविद्याविषयमनामरूपकर्मात्मकंनेतिनेतीतीतरप्रत्याख्यानेनोपसंहरिष्यतिपृथक्।यत्तुवागादिसमाहारोपाधिपरिकल्पितःसंसार्यात्मातंचवागादिसमाहारपक्षपातिनमेवदर्शयिष्यत्येतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतीतितस्माद्युक्तावागादीनामेवज्ञानकर्मकर्तृत्वफलप्राप्तिविवक्षातथेतितथास्त्वितिदेवैरुक्तावाक्तेभ्योर्थिभ्योर्थायोदगायदुद्गानंकृतवती॥ ॥७॥ ॥

गविद्याविषयात्क्रियाकारकफला।ज्ञानादितिशेषः।माभूत्परमात्मकर्तृत्वाद्याश्रयः।जीवस्तुस्यादित्याशंक्याह।यत्त्विति।जीवशब्दवाच्यस्यविशिष्टस्यकल्पितत्वान्नतात्त्विकंकर्तृत्वादिकं।किंतुमायास्वरूपेसमारोपितंइतिभावः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

सुखप्राप्तये दिवाऽऽदिश्य । वदनादिव्यापारेण सतिय सुखविशेषः संघातस्य निष्पद्यते स एव कार्यविशेष इत्याह । उच्यत इति । वाक्कर्तृत्वं यज्ञाधराणां ते नाभिः । ज्योतिष्टोमे वा द्वादशस्तोत्राणि । तत्र त्रिषु पवमानाख्येषु स्तोत्रेषु याजमानं फलम् उद्गातुनस्त्वा अवशिष्टेषु नवसु स्तोत्रेषु यत्कल्याणवदनसामर्थ्यं तदात्मने स्वार्थमेवागायदित्याह । तं भोगमिति । अस्मानतिन्येष्यतीति संबंधः । कोऽसावसुरात्ययप्रत्तं व्याचष्टे । स्वाभाविकमिति । तत्रोपायमप्रत्यस्यति । शास्त्रीति । असुरानभिभूय केवलरूपेण देवाऽस्थास्यंतीति तत्राह । ज्योतिषेति । ×कल्याणवदनस्य आत्मना वाचैव संबंधयोग्यतासंगोभिनिवेशः संप्राप्येत्यर्थः । ==पं× स यः स पाप्मेति । यः पाप्मा प्रजावाचि अनुमित स एव

कः पुनरसौ देवेभ्योऽर्थो योऽज्ञानकर्मणा वाचा निर्वर्तितः कार्यविशेष इत्युच्यते । यो वाचि निमित्तभूतायां वागादिसमुदायस्य य उपकारो निष्पद्यते वदनादिव्यापारेण स एव सर्वेषां यो वाग्वदनाभिनिर्वृत्तो भोगः फलं तं भोगं साम्नि त्रिषु पवमानेषु स्तुत्वाऽवशिष्टेषु नवसु स्तोत्रेषु वाचनिकमार्त्विज्यं फलं यत्कल्याणं शोभनं वदति वर्णानभिनिर्वर्तयति तदात्मने मह्यमेव तदसाधारणं वाग्देवतायाः कर्म यत्सम्यग्वर्णानामुच्चारणमतस्तद्विशिष्यते यत्कल्याणं वदतीति यत्तु वदनकार्यं सर्वसंघातोपकारात्मकं तद्याजमानमेव तत्र कल्याणवदनात्मसंबंधासंगावसरं देवतारंध्रं प्रतिलभ्य ते विदुरसुराः कथमनेनोद्गात्रा नोऽस्मान्स्वाभाविकं ज्ञानं कर्म चाभिभूयातीत्य शास्त्रजनितकर्मज्ञानरूपेण

यो वाचि भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यंतीति तमभिद्रुत्य
पाप्मनाविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मा ॥ ११ ॥ ।७॥ ॥

ज्योतिषोद्गात्रात्मनात्येष्यंति अतिगमिष्यंतीत्येवं विज्ञाय तमुद्गातारमभिद्रुत्याभिगम्य स्वेनासंगलक्षणेन पाप्मनाऽविध्यंस्ताडितवंतः संयोजितवंत इत्यर्थः स यः स पाप्मा प्रजापतेः पूर्वजन्मावस्थस्य वाचि विच्छिन्नः स एष प्रत्यक्षीक्रियते कोऽसौ यदेवेदमप्रतिरूपमननुरूपं शास्त्रप्रतिषिद्धं वदति येन प्रयुक्तोऽसभ्यबीभत्सानृताद्यनिच्छन्नपि वदत्यनेन कार्येणाप्रतिरूपवदनेनानुगम्यमानः प्रजापतेः कार्यभूतासु प्रजास्वनुवर्तते । स एवाप्रतिरूपवदनेनानुमितः सः प्रजापतेर्वाचि पाप्मा कारणानुविधायि हि कार्यमिति ॥ ११ ॥गम

प्रजापतिवाचि पाप्मानं गमयति । विमतं कारणपूर्वकं कार्यत्वात् घटवत् । न च तत्कारणेऽपि परस्मिन्प्रसंगः अपापविद्धमिति श्रुतेः न च न ह वै देवान्पापं गच्छतीति श्रुतेर्न तत्रापि पापवेधः । तस्य फलावस्थस्यापहतपाप्मत्वेऽपि यजमानावस्थस्य तत्राविरोध इत्यर्थः । आयस्तकारणाकारस्थं पाप्मानमनुयतस्यैव कार्यस्थत्वमुच्यते । उद्गात्रास्यां तु कार्यस्य पाप्मानमनुयतस्यैव कारणस्थत्वमिति विभागः । वाक्संबंधिना अभिनिवेशलक्षणेनासुराः प्रजापतिशरीरे अभिविध्य हत्वा यजमानं गोचरयंतीत्याख्यायिकारंभे आनंदगिरौ । विराड्रूपप्राप्तेः प्राक् यज्जन्म तदवस्थस्य । स एष इत्यस्य विवरणं । अप्रतिरूपत्यादि । अप्रति० मितांतः स एवेत्यर्थः ॥ ॥७॥ ॥ एमाम।

वागेव नाम जपमंत्रप्रकाश्यत्वमुपास्यत्वं चेनेति निर्धार्य अवशिष्टापर्यायचतुष्टयस्य तात्पर्यमाह । तथैवेति । उक्ता॰ त्रिष्वात्तथैव प्राणा॰ ताः प्रतिक्रमेण देवाः उक्तवंतः
परिक्षितवंत इत्यतः । इतरः कार्यकारणसंघातस्मिन्नव्यापकत्वं परिछिन्नत्वं । पाप्मविरूपासृजन् पाप्मनाऽविध्यन्नित्यनयो रत्तिपोनरूक्त्यमित्याशीर्षव्याख्या

तथैव प्राणादिदेवता उद्गीथनिर्वर्तकत्वाज्जपमंत्रप्रकाश्या उपास्याश्चेति क्रमेण परीक्षितवंतो देवानां चैतन्निश्चितमासीत् वागादिदेवताः क्रमेणापरिसमाप्ताः क
ल्याणविषयविशेषासंबंधासंगहेतोश्चासुरपाप्मसंसर्गादुद्गीथनिर्वर्तनेऽसमर्थाः । अतो नाभिधेया अस्ततोमासन्नमयंत्वनुपास्याश्चाउक्तत्वादितरावा

अथह प्राणमूचुस्त्वन्न उद्गायेति तथेति तेभ्यः प्राण उद्गायद्यः प्राणे भोगस्तं देवेभ्य आगायद्यत्कल्याणं जिघ्रति तदात्मने ते विदुरनेन
वै न उद्गात्रात्येष्यंतीति तमभिद्रुत्य पाप्मनाविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा ॥ १२ ॥ अथह चक्षु
रूचुस्त्वन्न उद्गायेति तथेति तेभ्यश्चक्षुरुद्गायद्यश्चक्षुषि भोगस्तं देवेभ्य आगायद्यत्कल्याणं पश्यति तदात्मने ते विदुरनेन
वै न उद्गात्रात्येष्यंतीति तमभिद्रुत्य पाप्मनाविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा ॥ १३ ॥ अथह श्रोत्र
मूचुस्त्वन्न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ शृणोति तदात्मने ते विदुरने
न वै न उद्गात्रात्येष्यंतीति तमभिद्रुत्य पाप्मनाविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ शृणोति स एव स पाप्मा ॥ १४ ॥ अ
थह मन ऊचुस्त्वन्न उद्गायेति तथेति तेभ्यो मन उद्गायद्यो मनसि भोगस्तं देवेभ्य आगायद्यत्कल्याणꣳ संकल्पयति तदात्म
ने ते विदुरनेन वै न उद्गात्रात्येष्यंतीति तमभिद्रुत्य पाप्मनाविध्यन्स यः स पाप्मा यदेवेदमप्रतिरूपꣳ संकल्पयति स एव
स पाप्मैवमु खल्वेता देवताः पाप्मभिरुपासृजन्नेवमेनाः पाप्मनाऽविध्यन् ॥ १५ ॥ ॥ रामरामरामरामराम ॥ ॥

पकत्वान्नेति एवमु खल्वनुक्ता अपि त्वगादिदेवताः कल्याणाऽकल्याणकार्यदर्शनादेवं वागादिवद्देवताः पाप्मनाऽविध्यन् पाप्मनाविध्यवंत इति यदुक्तं
तत्पाप्मभिरूपासृजन् पाप्मभिः संसर्गं क्षितवंतः इत्येतद्वागादिदेवता उपासंतोपि मृत्युमतिगमनायाशरणाः संतो देवाः क्रमेण ॥ १२ ॥ १३ ॥
॥ १४ ॥ १५ ॥ ॥ रामरामरामरामरामरामराम ॥ ॥ रामरामरामराम ॥ ॥ रामरामराम ॥ ॥ रामराम ।

नव्याख्येयभावान्नैवमित्याह । इति यदुक्तमिति । एता॰ यदुक्तं तत् । पाप्म॰ इत्येतत् । इत्येतस्य विवरणमित्यर्थः । द्वितीया । क्रमेण वागा॰पि देवाः मृत्युमत्यसंतः इति योजना ॥ राम ॥

पासंगदोषेणइतिच्छेद। तदभ्यासानुवृत्त्या। तस्यपाप्मसंसर्गकरणस्याभ्यासवशादितियावत्॥ ॥रामरामरामरामरामराम॥ ॥रामरामरामरामरामराम।

अथानंतरंहइममित्यभिनयप्रदर्शनमासन्य॥ आस्येभवमासन्यंमुखांतर्विलस्थंप्राणमूचुस्त्वन्नउद्गायेतितथात्येवं
शरणोपगतेभ्यः सएषप्राणोपगतेभ्यः सएषप्राणोमुख्यउदगायदित्यादिपूर्ववत्पाप्मनाविव्यत्सवेधनंकर्त्तुमि
च्छंतस्तेचदोषासंसर्गिणंसंतुमुख्यंप्राणंस्वनासंगदोषेणवागादिष्विवलब्धप्रसराः तदभ्यासानुवृत्त्यासंश्लि

अथहेममासन्यंप्राणमूचुस्त्वन्नउद्गायेतितथेतितेभ्यएषप्राणउ
दगायत्तेविदुरनेनवैनउद्गात्रात्येष्यंतीतितमभिद्रुत्यपाप्मनाविव्य
त्सन्सयथाऽश्मानमृत्वालोष्टोविध्वंसेतैवंहैवविध्वंसमानावि

ष्वमाणाविनेशुर्विनष्टाः विध्वस्ताः कथमितिवेतिदृष्टांतउच्यते॥ सयथासदृष्टांतोयथालोकेऽश्मानंपाषाणमृ
त्वागत्वाप्राप्यलोष्टः पांसुपिंडः पाषाणचूर्णनायाऽश्मनिक्षिप्तःस्वयंविध्वंसेत॥ विध्वंसेतविचूर्णीभवेदेवंहै
वयथायंदृष्टांतएवमेवविध्वंसमानाविष्वंचोनानागतयोविनेशुः विनष्टायतः॥ ॥रामरामराम॥ ॥

रामरामरामरामरामरामरामराम॥ ॥रामरामराम॥ ॥रामरामरामराम॥ ॥रामरामरामरामरामराम॥ ॥रामरामरामराम॥

प्राप्नुवंतः। वागादीनामग्न्यादिभावापत्तिवचनेनतत्त्वंहृतस्ययजमानस्यदेवताप्राप्तिरासुरपाप्मध्वंसस्यफलमित्युक्तंतत्पूर्वकल्पीययजमानस्यातिशयशालित्वाद्यथोक्तफलवत्त्वेऽपिनेदानींतनस्यैवमित्याशंक्यभवतीत्यादिश्रुतिमवतारयतियथेति। तेनैवक्रमेणेत्यस्यविवरणंपुराकल्पेनेति। वर्णितःसप्राणात्मजनकत्वेनवर्णितःपूर्वकल्पनाप्रकारेण। वागादयोयस्यस्वरूपेसंनिताहशायःपिंडमात्रः तेनपरित्वा। आत्मनेत्यस्यविवरणंप्रजापतिस्वरूपेणेति। द्विषन्नित्यस्यविवरणंप्रजापतित्वप्रतिपक्षभू

ततस्तस्मादसुरविनाशाद्देवत्वप्रतिबंधभूतेभ्यःस्वाभाविकासंगजनितपाप्मभ्योवियोगादसंसर्गधर्मिमुख्यप्राणाश्रयबलाद्वावागादयःप्रक्षअभवन्। किमभवन्स्वंदेवतारूपमग्न्याद्यात्मकंवक्ष्यमाणंपूर्वमप्यग्न्याद्यात्मनएवसंतःस्वाभाविकेनपाप्मनातिरस्कृतविज्ञानाःपिंडमात्राभिमानाआसन्ततस्तत्पाप्मवियोगात्उज्झित्वापिंडमात्राभिमानंशास्त्रसमर्पितवागाद्यग्न्याद्यात्माभिमानावभूवुरित्यर्थः। किंचतेप्रतिपक्षभूताअसुराःपराऽभवन्इत्यनुवर्त्ततेपराभूताविनष्टाइत्यर्थः। यथापुराकल्पेनवर्णितःपूर्वयजमानोऽतिक्रांतकालिकःएतामेवाख्यायिकारूपांश्रुतिंदृष्ट्वातेनैवक्रमेणवागादिदेवताःपरीक्ष्यताश्चापोह्यासंगपाप्मास्पददोषवत्त्वेनादोषास्पदंमुख्यंप्राणमात्मत्वेनोपगम्यवागाद्याध्या

स्ततोऽरेवाअभवन्पराऽसुराभवत्यात्मनापराऽस्यद्विषन्भ्रातृव्योभवतियएवंवेद॥१६॥

त्मिकपिंडमात्रपरिच्छिन्नात्माभिमानंहित्वावैराजपिंडाभिमानंवागाद्यग्न्याद्यात्मविषयंवर्त्तमानप्रजापतित्वंशास्त्रप्रकाशितंप्रतिपन्नः। तथैवायंयजमानस्तेनैवविधिनाभवतिप्रजापतिस्वरूपेणात्मनापराचाऽस्यप्रजापतित्वप्रतिपक्षभूतःपाप्माभ्रातृव्योभवति। यतोऽद्वेष्टापिभवतिकश्चित्भ्रातृव्याभरतादितुल्ये। यस्त्विंद्रियविषयासंगजनितःपाप्माभ्रातृव्योद्वेष्टाचपारमार्थिकात्मस्वरूपतिरस्कारणहेतुत्वात्सचपराभवति। विशीर्यतेलोष्टवत्प्राणापरिष्वंगात्कस्यैतत्फलमित्याह। यएवंवेदयथोक्तंप्राणमात्मत्वेनप्रतिपद्यते। पूर्वयजमानवदित्यर्थः

॥१६॥ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥२॥

तःकोसावित्याह। पाप्माःपाप्माख्यःभ्रातृव्यःशत्रुःपराभवति। यस्त्विंपाप्मासद्वेष्टाभ्रातृव्यः। पापरूपःशत्रुः। अतोद्विषन्नितिविशेषणंसार्थकं। सतिविशेषणेपापरूपःशत्रुरित्यर्थः। स्यात्। सपत्नोभ्रातृव्यः। तस्यद्विषन्नितिकुतोविशेषणंअर्थसिद्धत्वाद्द्वेषस्येत्याशंक्याह। यतोऽद्वेष्टेति। यतःभरतादितुल्यःअद्वेष्टापिकश्चिद्भ्रातृव्यःभ्रातृव्यशब्दवाच्योभवति। अतोद्विषन्नितिविशेषणंसार्थकं। सतिविशेषणेपापरूपःशत्रुरित्यर्थःस्यात्॥ ॥रामरामरामरामरामरामराम॥

अयास्यांगिरसः ३

बृ॰भा॰ ७

प्राणोऽखिलेंद्रियेषु मुख्येन प्राणेन आत्मत्वेन। संजितवान्। उपलब्धिसिद्धेऽर्थे युक्तिं समुच्चिनोति विशेषेति। ।यस्मा॰श्रे वर्त्तमानो देवैरुपलब्धः विशेषाणामाश्रयाच्च विशेषेस
च वागादीन् अग्न्यादिभावेनात्मस्वरूपेण संजितवान् तस्मादयास्यः। सर्वानेव वागादीन् अविशेषेण अग्न्यादिभावेन प्राणः संजितवान्। च नामधेयस्य साधारणं कार्यं निर्व
यति। अतो युक्तितोऽप्ययमास्यान्तराकाशे वर्त्तमानः सिद्ध इत्यर्थः। अयास्यवदांगिरसत्वं गुणांतरं दर्शयति। अत एवेति। सर्वसाधारणत्वादेव। वाक्यार्थं प्रपंचयति। आत्मा

फलमुपसंहृत्याधुना ख्यापिकारूपमेवाश्रित्याह। कस्माच्च हेतोर्वागादीन्मुक्त्वा मुख्य एव प्राण आत्मत्वेनाश्रयितव्य इति तदुपपत्तिनिरूपणाय
यस्मादयं वागादीनां पिंडादीनां च साधारण आत्मेत्येतमर्थमाख्यायिकया दर्शयंत्याह श्रुतिः। ।।ते प्रजापतिप्राणा मुख्येन प्राणेन परि
प्रापितदेवस्वरूपा ह ऊचुः कृतवंतः फलावस्थाः किमित्याह। क्व नु इति वितर्के। क्व नु कस्मिन्नु सोऽभूत् कः यो नोऽस्मानित्थमेवमसक्त सं
जितवान् देवभावायात्मत्वेनोपगमितवान् स्मरंति हि लोके केन विउपसक्ता उपकारिणं लोकवद्देवस्मरंतो विचारयमाणाः कार्यकरणसं
घात आत्मन्येवोपलब्धवंतः कथमयमास्येंऽतरित्यास्ये मुखे य आकाशस्मिन्नंतरयं प्रत्यक्षो वर्त्तत इति सर्वो हि लोको विचार्याध्यवस्यतित
था देवाः। यस्मादयमंतराकाशे वागाद्यात्मत्वेन विशेषमनाश्रित्य वर्त्तमान उपलब्धो देवैः तस्मात्स प्राणः आयास्यः विशेषानाश्रयाच्चासक्त संजि

तेहोचुः क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्तरिति सोऽयास्य आंगिरसोऽंगानाꣳ हि रसः॥ ७ ॥ ॥छ॥ ॥

तवान् वागादीन् अत एवांगिरस आत्मा कार्यकरणानां कथमांगिरसः प्रसिद्धं ह्येतदंगानां कार्यकरणलक्षणानां रसः सार आत्मेत्यर्थः। कथं पुनरंगर
सत्वं तदपाये शोषप्राप्तेरिति वक्ष्यामः। यस्माच्चायमंगरसत्वाद्विशेषाणामाश्रितत्वाच्च कार्यकरणानां साधारण आत्मा विशुद्धश्च। तस्माद्वा
गादीन् अपास्य प्राण एवात्मत्वेनाश्रयितव्य इति वाक्यार्थः। आत्मा ह्यात्मत्वेनोपगंतव्यो विपरीतबोधात् श्रेयःप्राप्तेर्विपर्यये चानिष्टप्राप्तिद
र्शनात्। स्यान्मतं प्राणस्य विशुद्धिरसिद्धेति ननु परिहृतमेतत् वागादीनां कल्याणवदनाद्यासंगवत्प्राणस्यासंगास्पदत्वाभावेन वाक्किं त्वां
गिरसत्वेन वागादीनामात्मत्वोक्त्या वागादिकारणाशेषस्पृशः तन्मृत्युरिवाशुद्धताशंक्यते। इत्याह शुद्ध एव प्राणः उक्तः॥ ७ ॥ ॥

शिवः ७

17

हेति। प्राणस्य शुद्धत्वाद्व्यापकत्वाद्वोपास्यत्वमुक्तं। तस्य शुद्धत्वं वागादिवदसिद्धमित्याशंकते। स्यादेतन्मिति। शंकामाक्षिप्य समाधत्ते। नन्वित्यादिना। शाद्येन स्पृष्टत्वं
स्याशिद्धितेन स्पृष्टाऽपरस्याऽशुद्धता वक्तुं शुद्धवागादिसंबंधाशुद्धत्वाशंका प्राणस्याप्यस्तीत्यर्थः। स चासौ स्पृष्टश्चाचतस्य। इत्याशंकायामाहेत्यर्थः॥ ॥

नन्वत्र प्राणो नोच्यते स्त्रीलिंगेनार्थांतरोक्तिप्रतीतेरित्याशंक्याह । यं प्राणमिति । येयमिति सैवेषा देवता स्यात् । कुतः उपा०त्वात् । प्राणमुपास्त इति कर्मत्वं गुणभूतत्वात् । प्रसिद्ध
त्वात् । प्रकरणे । देह । मनुष्योऽहमितिवद्देवोऽहमिति यस्य जीवत एवाभिमानाभिव्यक्तिस्तस्यैव देहपातादूर्ध्वं तद्भावः फलतीत्यत्र प्रमाणमाह । देवो भूत्वेति । का देवता

सा वा एषा देवता दूर्नाम यं प्राणं प्राप्याश्मानमिव लोष्टवद्विध्वस्ता असुराः तं परामृशति श्रुतिः सैवैषा येयं वर्त्तमानयजमानशरीरस्था देवैर्निर्धारिताय
मास्यंतरिति देवता च स्यात् । उपासनक्रियायाः कर्मभावेन गुणभूतत्वात् यस्मात्सा दूर्नाम दूरित्येवं ख्याता नामशब्दः ख्यापनपर्यायः तस्मा
त्प्रसिद्धास्य विशुद्धिर्दूर्नामत्वात् कुतः दूर्नामत्वमित्याह दूरं दूरे हि यस्मादस्याः प्राणदेवतायाः मृत्युः आसंगलक्षणः पाप्मा असंश्लेषधर्मि
त्वात् प्राणस्य समीपस्थस्यापि दूरता मृत्योः तस्माद्दूरित्येवं ख्यातिरेवं प्राणस्य विशुद्धिं ज्ञापयित्वा विदुषः फलमुच्यते ॥ दूरं ह वा अस्मान्मृ
त्युर्भवति अस्मादेवंविदः य एवं वेद तस्मादेवमिति प्रकृतं विशुद्धिगुणोपेतं प्राणमुपास्त इत्यर्थः । उपासनं नामोपास्यार्थवादे यथा देवता

सा वा एषा देवता दूर्नाम दूरꣳ ह्यस्या मृत्युर्दूरꣳ ह वा अस्मान्मृत्युर्भवति य एवं वेद ॥ १८ ॥

दिस्वरूपं श्रुत्या ज्ञाप्यते तथा मनसोपगम्यासनं चिंतनं लौकिकप्रत्ययाव्यवधानेन यावत्तद्देवतादिस्वरूपात्माभिमानाभिव्यक्तिरि
ति लौकिकात्माभिमानवत् । देवो भूत्वा देवानप्येति किंदेवतोस्यां प्राच्यां दिश्यसीत्येवमादिश्रुतिभ्यः ॥ १८ ॥ सा वा एषा देवता दूरं ह वा अ
स्मान्मृत्युर्भवतीत्युक्तं । कथं पुनरेवंविदो दूरं मृत्युर्भवतीत्युच्यते । एवंवित्त्वविरोधादिंद्रियविषयसंसर्गासंगजो हि पाप्मा प्राणात्मा
भिमानिनो हि विरुध्यते । वागादिविशेषात्माभिमानहेतुत्वात्स्वाभाविकाज्ञानहेतुत्वाच्च ॥ शास्त्रजनितो हि प्राणात्माभिमानः तस्मा
देवंविदः पाप्मा दूरं भवतीति युक्तं विरोधात्तदेतत्प्रदर्शयति ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

रूपं तद्वेति किंदेवतोऽसीति तद्भावो भातीत्यर्थः । कंडिकांतरमवतार्य वृत्तं कीर्त्तयति । सा वा इति । पाप्मनः वागाद्यत्व । इंद्रियेति । इंद्रियाणां विषयेषु संसर्गे योऽभि
निवेशस्तेन जनितः पाप्मा परिच्छिन्नाभिमानः अपरिच्छिन्ने प्राणात्मनि आत्माभिमानवतो विरुध्यते ॥ ॥ एमरामरामरामरामराम ॥ ॥ ७ ॥ ॥

पाप्मा।१।प्राणदेवताचेत्पाप्मानंहंतिसदेवकिंनहन्यात्इत्याशंक्याह।२भवतुप्राणोवागादीनांपाप्मनोहंताविद्वस्तुकिमायातमित्याशंक्याह।विरोधादिति।२।मृत्योरपहं

सावाएषादेवतेत्युक्तार्थमेतासांवागादीनांपाप्मानंमृत्युंस्वाभाविकाज्ञानप्रयुक्तेंद्रियविषयसंसर्गासंगजनितेनहिपाप्मनासर्वोम्रियतेसह्यतो
मृत्युःसतंप्राणात्माभिमानरूपाभ्योदेवताभ्योऽपच्छिद्यापहत्यप्राणात्माभिमानमात्रतयैवप्राणोऽपहंतेत्युच्यते।विरोधादेवतुपाप्मैवं
विदोह्रंगमोभवति।किंपुनश्चकारदेवतानांपाप्मानंमृत्युमपहत्येत्युच्यते।यत्रयस्मिन्नासांप्राच्यादीनांदिशामंतोऽवसानंतत्तत्रगम
यांचकारगमनंकृतवानित्येतत्।ननुनास्तिदिशामंतःकथमंतंगमितवानित्युच्यते।श्रौतविज्ञानवज्जनावधिनिमित्तकल्पितत्वा
द्दिशांतद्विरोधिजनाध्युषितएवदेशोदिशामंतोदेशी।तोऽस्त्यमितियदादित्यदोषः।तत्तत्रगमयित्वासांदेवतानांपाप्मनइतिद्वितीयाबहु

श्रौतज्ञानरहितजनानांवासं।२

सावाएषादेवतैतासांदेवतानांपाप्मानंमृत्युमपहत्ययत्रासांदिशामंतस्तद्गमयांचकारतदासां
पाप्मनोविन्यदधात्तस्मान्नजनमियान्नांतमियान्नेत्पाप्मानंमृत्युमन्ववायानीति॥ १०॥

वचनं।विन्यदधात्विविधंन्यग्भावेनादधात्।स्थापितवती।प्राणदेवताप्राणात्माभिमानशून्येष्वंत्यजनेष्वितिसामर्थ्यादिंद्रियसंसर्गजो
हिसइतिपाप्मास्माभिरवगम्यते।तस्माच्चांत्यजनंनेयान्नगच्छेत्।संभाषणदर्शनादिभिर्नसंसृजेत्।तत्संसर्गेपाप्मनःसंसर्गः
क्षतःस्यात्पाप्माश्रयोहिसः।तज्जननिवासत्वाद्दिगंतशब्दवाच्यंतेषांजनंशून्यमपिजनमपितद्देशावियुक्तमित्यभिप्रायः।ने
दितिपरिभवार्थेनिपातः।इत्थंजनसंसर्गेणपाप्मानंमृत्युमन्ववायानीति।अनुअवअयानीतिअनुगच्छेयमित्यभीतोनजमंतंनेयादिति·

दुःसंसर्गः॥९॥

ता।२।गतवानित्यर्थः।३।श्रौतेति।शास्त्रीयज्ञानकर्मसंस्कृतंजनंतदधिष्ठितंचदेशमवधिंकृत्वातेनैवनिमित्तेनदिशांकल्पितत्वादानंत्याभावात्।४।किमि
त्यंत्यजनेष्वित्यधिकावापःक्रियतेतत्राह॥इतिसामर्थ्यादिति।६॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

यस्मादिति।पाप्मापहतंतत्त्वमनूद्यावशिष्टमागम्याचष्टे।तस्मात्तस्यैवेति।।तस्माद्देवस्वरूपप्रापणेसमर्थत्वात्।अतिक्रमण्य।मुक्ताभूत्।मृत्युमतिक्रांतःवागग्निरूपाभि

सावाएषादेवतानांतदेतत्प्राणात्मज्ञानकर्मफलंवागादीनामग्न्याद्यात्मत्वमुच्यते।अथैनामृत्युमत्यवहत्।यस्मात्आध्यात्मिकपरिच्छेदकरःपाप्मामृत्यु
प्राणात्मविज्ञानेनापहतःतस्मात्तत्प्राणोपहतपाप्मनोमृत्योः॥तस्मात्सएवप्राणएनावागादिदेवताःप्रकृतंपाप्मानंमृत्युमतीत्यावहत्प्राप
यत्स्वंस्वमपरिच्छिन्नमग्न्यादिदेवतात्मरूपं॥२०॥सवैवाचमेवप्रथमामत्यवहत्।सप्राणोवाचमेवप्रथमांप्रधानामित्येतदुद्गीथकर्मणीत
रकरणापेक्षयासाधकतमत्वंप्राधान्यंतस्याः।तांप्रथमामत्यवहत्।वहनंकृतवान्।तस्याःपुनर्मृत्युमतीत्योढायाःकिंरूपमित्युच्यते।सावाग्यदायस्मिन्का

सावाएषादेवतैतासांदेवतानांपाप्मानंमृत्युमपहत्याथैनामृत्युमत्यवहत्॥२०॥सवैवाचमेवप्रथमामत्यवहत्
सायदामृत्युमत्यमुच्यतसोग्निरभवत्सोयमग्निःपरेणमृत्युमतिक्रांतोदीप्यते॥२१॥अथप्राणमत्यवहत्स
यदामृत्युमत्यमुच्यतसवायुरभवत्सोयंवायुःपरेणमृत्युमतिक्रांतःपवते॥२२॥ ॥७॥ ॥

लेपाप्मानंमृत्युमत्यमुच्यत।अतीताऽमुच्यतसोऽचितास्वयमेवतदासोग्निरभवत्।सावाक्पूर्वमपिअग्निरेवसतीमृत्युवियोगेप्यग्निरेवा
भवत्।एतावांस्तुविशेषोमृत्युवियोगेसोयमतिक्रांतोग्निःपरेणमृत्युंपरस्तात्मृत्योर्दीप्यते।प्राङ्मोक्षात्मृत्युप्रतिबद्धोध्यात्मंवाः
गात्मनानेदानीमिवदीप्तिमानासीदिदानींतुमृत्युंपरेणादीप्यतेमृत्युवियोगात्॥२१॥तथाप्राणःघ्राणोवायुरभवत्।सतुपवतेमृ
त्युंपरेणाऽतिक्रांतःसर्वमन्यदुक्तार्थं॥२२॥ ॥रामरामरामरामरामरामरामराम॥ ॥राम॥ ॥रामरामराम।

अभूत्॥ ॥रामरामराम॥ ॥राम॥ ॥रामरामराम॥ ॥राम॥ ॥रामरामराम॥ ॥रामरामराम॥रामराम।

वागादीनामग्न्यादिरूपस्य प्राणेन। वाञ्चकानविशिष्टं श्रेष्ठं। कथमनु आतुर्विक्रीतस्य फलसंबंधस्तत्राह। कर्ज्जेपीति। अन्नशब्दश्चेत्प्राणपर्यायस्तर्हि कथं शकटे अनः। शब्दप्रयोगस्तत्राह। अनःशब्द इति। प्राणेन वागादिवदात्मार्थमन्नमागीतं चेन्नाहृतस्यापि पाप्मवेधः स्यादित्याशंक्याह। यदपीति। देहाकारपरिणतेऽन्ने प्राणो निष्ठति। तदनुसारिणश्च वागादयः।

तथा चक्षुरादित्योऽभवत्। सतु तपति॥ २३॥ तथा श्रोत्रं दिशोऽभवत्। दिशः प्राच्यादिविभागेनावस्थिताः॥ २४॥ मनश्चंद्रमा भाति यथा पूर्वं यजमानं वागाद्यग्न्यादिभावेन मृत्युमत्यवहत् एवमेनं वर्त्तमानयजमानमपि ह वै एषा प्राणदेवतातिवहति वागाद्यग्न्यादिभावेनैव यो वागादिपंचकविशिष्टं प्राणं वेद तं यथा यथोपासते तदेव भवतीति श्रुतेः॥ २५॥ अथात्मने यथा वागादिभिरात्मार्थमागानं कृतं तथा मुख्योऽपि प्राणः सर्वप्राणसाधारणं प्राजापत्यफलमागानं कृत्वा त्रिषु पवमानेषु यथानंतरं शिष्टेषु नवसु स्तोत्रेष्वात्मानं आत्मार्थमन्नाद्यमन्नं च तदाद्यं चान्नाद्यमागायत। कर्ज्जेः काम संयोगो वाचनिकः।

अथ चक्षुरत्यवहत्तद्यदा मृत्युमत्यमुच्यत स आदित्योऽभवत्सोऽसावादित्यः परेण मृत्युमतिक्रांतस्तपति॥ २३॥ अथ श्रोत्रमत्यवहत्तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभवंस्ता इमा दिशः परेण मृत्युमतिक्रांताः॥ २४॥ अथ मनोऽत्यवहत्तद्यदा मृत्युमत्यमुच्यत स चंद्रमा अभवत्सोऽसौ चंद्रः परेण मृत्युमतिक्रांतो भात्येवं ह वा एनमेषा देवता मृत्युमतिवहति य एवं वेद॥ २५॥ अथात्मनेऽन्नाद्यमागायद्यद्धि किंचान्नमद्यतेऽनेनैव तदद्यत इह प्रतितिष्ठति॥ २६॥ ॥

इत्युक्तं कथं पुनस्तदन्नाद्यं प्राणेनात्मार्थमागीतमिति जिज्ञास्यत इत्यत्र हेतुमाह। यद्धि किंचेति सामान्यान्नमात्रपरामर्शार्थो हिरिति हेतौ यस्माल्लोके प्राणिभिर्यत्किंचिदन्नमद्यते भक्ष्यते अनेनैव प्राणेनैवान इति प्राणस्याख्या इति प्रसिद्धानः शब्दः श्रांतः शकटवाची यस्त्वन्यः स्वरांतः सः प्राणपर्यायः प्राणेनैवान्नमद्यत इत्यर्थः। किंच न केवलं प्राणेनाद्यत एवान्नाद्यं तस्मिन् शरीराकारपरिणतेऽन्नाद्ये इह प्रतितिष्ठति प्राणस्तस्मात्प्राणेनात्मनः प्रतिष्ठार्थमागीतमन्नाद्यं यदपि प्राणेनान्नादनं तदपि प्राणस्य प्रतिष्ठार्थमेवेति न वागादिवद्विकल्याणासंगजपाप्मसंभवः प्राणेऽस्ति॥ २६॥ ॥

वागादीनां।१

स्थितिभाजः। अतः स्थित्यर्थं प्राणस्यान्नमिति न पाप्मवेधस्तस्मिन्नस्तीत्यर्थः। प्राणस्य वागादेः। ॥रामरामराम॥ ॥राम॥ ॥रामरामराम॥ ॥राम॥

तेहदेवानान्स्वविधारणामपृक्तं प्राणेनैवनदद्यतइतिवागादीनामप्यन्ननिमित्तोपकारदर्शनान्नैषदोषः प्राणद्वारत्वात्तदुपकारस्यकथंप्राणद्वारको
ऽन्नकृतोवागादीनामुपकारइत्येतमर्थंप्रदर्शयन्नाहतेवागादयोदेवाः स्वविषयद्योतनाद्देवाः अब्रुवन्नुक्तवन्तोमुख्यंप्राणं।इदमेतावन्नातोऽधि
कमस्तिवैइतिस्मरणार्थः।इदंतत्सर्वमेतावद्देवाकिंयदन्नंलोकेतत्सर्वमेतावद्देवाकिंयदन्नंप्राणस्थितिकरमस्मिंल्लोकेतत्सर्वमात्मनेआत्मा
र्थमागासीःआगीतवानस्यागानेनात्मसात्कृतमित्यर्थः।वयंचान्नमन्तरेणस्थातुंनोत्सहामहेऽतोऽनुपश्चान्नोऽस्मानस्मिन्नन्नेआत्मार्थेतवान्नेआभ

तेदेवाअब्रुवन्नेतावद्वाइदꣳसर्वंयदन्नंतदात्मनआगासीरनुनोऽस्मिन्नन्नआभजस्वेतितेवैमाभिसंविशतेतितथे
तितꣳसमन्तंपरिण्यविशन्ततस्माद्यदनेनान्नमत्तितेनैतास्तृप्यन्त्येवꣳहवाएनꣳस्वाअभिसंविशन्तिभर्तास्वा
नाꣳश्रेष्ठःपुरएताभवत्यन्नादोऽधिपतिर्यएवंवेद

नस्वाभाभजस्वशिरावोऽश्रवणंछांदसंअस्मांश्चान्नभागिनःकुरु।इतउक्तआह।तेयूयंयद्यन्नार्थिनःवैमामामभिसंविशत।समंततोमामाभिमुख्येन
निविशतेत्येवमुक्तवतिप्राणेतथेत्येवमितितंप्राणंपरिसमंतंपरिसमंतात्निविशंतनिश्चयेनाविशंततंप्राणंपरिवेष्ट्यनिविष्टवंतइत्यर्थः
तथानिविष्टान्नाप्राणानुज्ञयाऽस्थितिक्रियातेषांप्राणेनैवाद्यमानंप्राणस्थितिकरंसदन्नंतृप्तिकरंभवति।नस्वातंत्र्येणान्नसंबंधोवागादीनां
तस्मात्युक्तमेवावधारणंअनेनैवनदद्यतइति।तदेवचाहतस्मात्प्राणाश्रयतयैवप्राणानुज्ञयाऽभिसन्निविष्टावागादिदेवताः।तस्माद्यदन्नमनेन
नप्राणेनात्तिलोकःतेनान्नेनैतावागाद्यास्तृप्यंतिवागाद्याश्रयंप्राणंयोवेदः॥ ॥रामराम॥ ॥रामरामराम॥ ॥रामरामराम

ह॰भा॰
२०

वागादयश्चेति। सचप्राणोहमस्मीतिवेदेतिचकारार्थः। प्राणस्यकार्यकरणानामात्मत्वकथनायप्राणो॰क्तं। ॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम

वागादयश्चप्राणाश्रयाइति। तमप्येवमेवहवैस्वाज्ञातयः अभिसंविशंतिवागादयइवप्राणंज्ञातीनामाश्रयणीयोभवतीत्यभिप्रायः। अभिसं
मिविष्टानांचस्वानांप्राणवदेववागादीनांस्वान्नेनभर्त्ताभवतितथाश्रेष्ठःपुरोयातपुरोगंताभवतिवागादीनामिवप्राणःतथान्नादःअना·
मयावीत्यर्थः। अधिपतिरधिष्ठायपालयितास्वतंत्रःपतिः। प्राणवदेववागादीनांयएवंवेदतस्यैतद्यथोक्तंफलंभवति। किंचयउहएवंवि
दंप्राणविदंप्रतिस्वेषुज्ञातीनांमध्येप्रतिःप्रतिकूलोबुभूषतिप्रतिस्पर्द्धीभवितुमिच्छति। सोऽसुराइवप्राणप्रतिस्पर्द्धिनोनहैवा·

यउहैवंविदꣳस्वेषुप्रतिप्रतिर्बुभूषतिनहैवालंभार्येभ्योभवत्यथयएवैतमनुभवति
योवैतमनुभार्यान्बुभूर्षतिसहैवालंभार्येभ्योभवति॥ ७ ॥ ॥३॥ ॥

लंपर्याप्तोभार्येभ्योभरणीयेभ्योभर्त्तुमित्यर्थः। अथपुनर्यएवज्ञातीनांएनमेवंविदंवागादयइवप्राणंअन्वनुगतोभवतियोवाएवंविदम
न्वेवानुवर्त्तयन्नेवात्मीयान्भार्यान्बुभूर्षतिभर्त्तुमिच्छति॥ यथैववावागादयःप्राणानुवृत्त्याआत्मबुभूर्षवःआसन्सहैवालं
पर्याप्तोभार्येभ्योभरणीयेभ्योभवतिभर्त्तुंनेतरःस्वतंत्रः॥ सर्वमेतत्प्राणगुणविज्ञानफलमुक्तं॥ कार्यकरणानामा·
त्मत्वप्रतिपादनायप्राणस्यांगिरसत्वमुपन्यस्तं॥ ७ ॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥

20

शिवः
२०

रामरामराम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥रामराम॥

अग्रे।आत्मैना॥ ॥रामरामरामरामरामराम॥ ॥राम॥ ॥राम॥ ॥रामरामरामरामरामराम॥ ॥राम॥ ॥राम॥ ॥रामराम ॥

सोयास्यआंगिरसइति।अस्माद्धेतोरयमांगिरसस्त्यांगिरत्वेहेतुर्नोक्तःतद्धेतुसिद्ध्यर्थमारभ्यते।तद्धेतुसिद्ध्यायत्तंहिकार्यकरणात्मत्वंप्राणस्यानंतरंचवागादीनांप्राणाधीनतोक्तासाचकथमुपपादनीयेत्याह।सोयास्यआंगिरसइत्यादिर्यथोपन्यस्तमेवोपादीयते।उत्तरार्थंप्राणोवाअंगानांरसइत्येवमंतंवाक्यंयथाव्याख्यातार्थमेवपुनःस्मारयति।कथंप्राणोवाअंगानांरसइति।प्राणोहिहियस्मात्प्रसिद्धोअंगानांरसःप्रसिद्धमेतत्प्राणस्यांगरसत्वंनवागादीनांतस्मात्प्राणोवैइतिस्मारणंकथंपुनःप्रसिद्धत्वमित्यतइ

सोऽयास्यआंगिरसोऽगानांऽहिरसःप्राणोवाअंगानांऽरसःप्राणोहिवाअंगानांऽरसस्तस्माद्यस्मात्कस्माच्चांगात्प्राणउत्क्रामतितदेवतच्छुष्यत्येषहिवाअंगानांऽरसः॥ १९ ॥ ७ ॥

त्याह।तस्माच्छब्दउपसंहारार्थउपरिहेतुत्वेनसंबध्यते॥यस्मात्यतोऽवयवात्कस्मादनुक्तविशेषणात्।यस्मात्कस्माद्यतःकुतश्चिच्छारीरावयवात्अविशेषितात्प्राणउत्क्रामत्यपसर्पतितदेवतन्नैवतदंगंशुष्यतिनीरसंभवति।शोषमुपैतितस्मादेषहिवाअंगानांरसइत्युपसंहारः।अतःकार्यकरणानामात्माप्राणइत्येतत्सिद्धमात्मापायेहिशोषोमरणंस्यात्तस्मात्तेनजीवंतिप्राणिनःसर्वेतस्मादपास्यवागादीन्प्राणएवोपास्यइतिसमुदायार्थः॥ १९ ॥ ॥राम॥ ॥राम॥ ॥

रामराम॥ ॥रामराम॥ ॥रामराम॥ ॥रामराम॥ ॥रामराम॥ ॥रामराम॥ ॥रामराम॥ ॥रामराम॥ ॥राम॥

बृहस्पत्यादिधर्मकं प्राणोपासनं वक्तुं वाक्यांतरमवतारयति। एष इति। कार्यं स्थूलशरीरं प्रत्यक्षेणोच्यमानं रूपात्मकं। करणं च ज्ञानक्रियाशक्तिमत्कर्मभूतं। भवतु नामात्मिकाद्बृहतीत्वं तथापि तत्पतित्वेन प्राणस्य कथं तद्रूपतित्वमित्याशंक्याह। बृहत्याश्चेति। सर्वात्मकप्राणरूपेण बृहत्याः स्तुतत्वात् तच्च सर्वासां छंदसामंतर्भवसं भवति। तस्मात्प्राणस्य बृहस्पतित्वे सिद्धं ऋक्पतित्वमित्यर्थः। प्राणरूपेणात्मना बृहतीत्यत्र प्रमाणमाह। प्राणो बृहतीति। तथापि प्राणस्य विवक्षितं ऋगात्मत्वं कथं सिध्यतीत्याशंक्याह। प्राण इति। अत ऋ

एष उ न केवलं कार्यकरणयोरेवात्मा प्राणो रूपकर्मभूतयोः किं तर्हि ऋग्यजुःसाम्नां वाग्भूतानामात्मेति। सर्वात्मकतया प्राणं स्तुवन्महीकरोत्युपास्यत्वाय एष उ एव प्रकृत आंगिरसो बृहस्पतिः। कथं बृहस्पतिरित्युच्यते। वाग्वै बृहती छंदः। षट्त्रिंशदक्षराऽनुष्टुप् च वाक् कथं वा वाऽनुष्टुप् इति श्रुतेः। सा च वागनुष्टुप् बृहत्यां छंदस्यंतर्भवति अतो युक्तं वाग्वै बृहतीति प्रसिद्धवद्वक्तुं बृहत्यां च सर्वा ऋचोऽन्तर्भवंति।

एष उ एव बृहस्पतिर्वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः॥ २९॥

प्राणसंस्कृतत्वात्प्राणो बृहती प्राणो बृहतीत्येव विद्यादिति श्रुत्यंतरात् वागात्मत्वाच्च ऋचां प्राणेऽन्तर्भावः। तत्कथमित्याह। तस्या वाचो बृहत्या ऋचः एष हि प्राणः पतिस्तस्या निर्वर्तकत्वात्कोष्ठाग्निप्रेरितमारुतनिर्वर्त्या हि ऋक् पालनाद्वा वाचः पतिः प्राणेन हि पाल्यते वाक्। अप्राणस्य शब्दोच्चारसामर्थ्याभावात्तस्माद्बृहस्पतिः ऋचां प्राण आत्मेत्यर्थः॥ २९॥ ॥रामरामराम॥ ॥

21

वेदमंत्राः प्राणरूपेण संस्कृतत्वात्। तस्य तदात्मत्वे हेत्वंतरमाह। वागात्मत्वादिति। नामां तदात्मत्वेऽपि कथं प्राणेऽन्तर्भाव। नहि घटो मृदात्मा पटेऽन्तर्भवतीति शंकते। तत्कथमिति। प्राणस्य वाङ्निष्पादकत्वात्तद्भूतानामृचां प्राणे कारणे युक्तोऽन्तर्भाव इत्याह। आह इत्यादिना॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

बृहतीशब्दस्यश्रावरणामप्यर्थः। ब्रह्मशब्दस्यद्विजोप्यर्थोस्ति। अतेवाचःस्तामशाक्। वाक्यद्वयेपिवाग्वैवागिति पौनरुक्त्यप्रसंगात्। हेत्वंतरमाह। ऋगिति। इतश्चवाकसमानाधिकरणयोर्बृह

तथायजुषांकथमेषउएवब्रह्मणस्पतिः। वाग्वैब्रह्मब्रह्मयजुस्तच्चवाग्विशेषएवतस्यावाचोयजुषोब्रह्मणएषपतिस्तस्मादुब्रह्मणस्पतिः। पूर्ववत् कथंपुनरेतद्गम्यतेबृहतीब्रह्मणोःऋग्यजुष्ट्वंनपुनरन्यार्थत्वमित्युच्यतेवाचोतेथामसामानाधिकरण्यनिर्देशाद्वाग्वैसामेति। तथाचवाग्वैबृहतीवाग्वैब्रह्मेतिचवाकसमानाधिकरणयोःऋग्यजुष्ट्वंयुक्तंपरिशेषाद्सामन्यभिहितेऋग्यजुषीएवपरिशिष्टेवाग्विशेषत्वाच्च

एषउएवब्रह्मणस्पतिर्वाग्वैब्रह्मतस्याएषपतिस्तस्मादुब्रह्मणस्पतिः॥ २०॥ ॥

वाग्विशेषौहिऋग्यजुषीतस्मात्तयोर्वाचासमानाधिकरणतायुक्ताविशेषप्रसंगाच्च। सापोऽयाथइतिचस्पष्टंविशेषाभिधानत्वं॥ तथाहिबृहतीब्रह्मशब्दयोरपिविशेषाभिधानत्वंयुक्तं॥ अन्यथाऽनिर्द्धारितविशेषयोरानर्थक्यापत्तेश्चविशेषाभिधानस्यसामान्यान्यत्वेचोभयत्रपौनरुक्त्यादृग्यजुःसामोद्गीथशब्दानांचश्रुतिष्वेवंक्रमदर्शनात्॥ २०॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

तीब्राह्मणोर्ऋग्यजुष्ट्वमेष्टव्यमित्याह। वाग्विशेषत्वाच्चेति। तत्रैवहेत्वंतरमाह। विशेषेति॥ ॥७॥ ॥७॥ ॥७॥ ॥रामरामराम॥

अथयजुष्ट्वंप्राणस्यप्रतिपाद्यतस्यैवसामत्वंसाधयति।एषइत्यादिना।एष०ह।वाग्वैसाम।एष०ह।वाग्वैसा।साशब्दवाच्या।वाग्वाचकसाशब्दाभिधेयभूतमित्यर्थः।सर्वेति।सामस्त्रीहिसर्वनाम।तयाचयःस्त्रीलिंगःसर्वशब्दस्तेनाभिधेयंवस्तुवागित्यर्थः।अमःप्राणइत्युक्तमुपपादयति।सर्वपुंशब्देति।पुंलिंगेनसर्वेणसर्वेणाभिधेयंवस्तुप्राणइत्यर्थः।तत्रश्रुतत्वंतदंशामाणयति।केनेति।आचार्यस्यशिष्यंप्रतिएतद्वाक्यं।योऽस्मानिपुंस्त्रीवाचकानि।तथापिकस्यसामशब्दवाच्यत्वमित्याशंक्याह।वागिति।वागुपसर्जनःप्राणःसामशब्दाभिधेयएकवचननिर्देशादित्यर्थः।ननुगीतिरुक्तासामाख्येतिविशिष्टाकाचिद्गीतिःसामेत्युच्यतेतत्कथंवागुपसर्जनस्यप्राणस्यसामत्वमतआह।तथेति।प्रगीतेमंत्रवाक्येसामशब्दस्यरूढेरीतिन्वादीनिप्राणादिव्यतिरेकेणसामेत्याशंक्याह।स्वरेति।आदिपदेनवाक्यादिग्रहः।वागुपसर्जनेप्राणेमुख्यःसामशब्दःतत्से·

एषउएवसामकथमित्याह।वाग्वैसा।यत्किंचित्स्त्रीशब्दाभिधेयंसावाक्सर्वस्त्रीशब्दाभिधेयंसावाक्सर्वस्त्रीशब्दाभिधेयवस्तुविषयोहिसर्वनामसाशब्दः।तथाऽमएषप्राणःसर्वपुंशब्दाभिधेयवस्तुविषयोऽमःशब्दः।केनमेपौंस्नानिनामान्याप्नोषीतिप्राणेनेतिब्रूयात्केनस्त्रीनामानीतिवाचेतिश्रुत्यंतरात्।वाक्प्राणाभिधानभूतोसामशब्दोतथाप्राणनिर्वर्त्यस्वरादिसमुदायमात्रंगीतिःसामशब्देनाभिधीयते।अतोनप्राणवाग्व्यतिरेकेणसामनामाऽस्तिकिंचित्स्वरवर्णादेश्चप्राणनिर्वर्त्यत्वात्प्राणतंत्रत्वाच्चएषउएवप्राणःसाम।यस्मात्सामसामेति

एषउएवसामवाग्वैसाऽमैषसाचामश्चेतितत्साम्नःसामत्वंयद्वेवसमःप्लुषिणासमोमशकेनसमोनागेनसमएभिस्त्रिलोकैःसमोनेन
सर्वेण·

वाक्प्राणात्मकंसाचामश्चेति।तत्तस्मात्साम्नोगीतिरूपस्यस्वरादिसमुदायस्यसामत्वंतत्प्रगीतंभुवि।यद्वेवसमस्तुल्यःसर्वेणानेनप्राणोनप्रकारेणतस्मात्सामसामेत्यनेनसंबंधः।वाशब्दःसामशब्दलाभनिमित्तप्रकारांतरनिर्देशसामर्थ्यलभ्यः।केनपुनःप्रकारेणास्यतुल्यत्वमित्युच्यते।समःप्लुषिणापुत्तिकाशरीरेणसमोमशकेनमशकशरीरेणसमोनागेनहस्तिशरीरेणसमएभिस्त्रिभिर्लोकैस्त्रैलोक्यशरीरेणप्राजापत्येनसमोऽनेनजगद्रूपेणहैरण्यगर्भेण।पुत्तिकादिशरीरेषुगोत्वादिवत्कार्त्स्न्येनपरिसमाप्तइतिसमत्वंप्राणस्य॥ ॥रामरामराम·

बंधादि।तत्रगौणःसंबंधादिशब्दवदित्यर्थः।इदंसामइदंसामइतिप्रत्यवमृश्यतेनैववाक्प्राणात्मकमेवोच्यतेसाचामश्चेतिश्रुत्यंते।यस्मादेवंतस्मात्प्रसिद्धस्यसाम्नोयत्सामत्वंतत्सामनिर्वर्त्यत्वात्प्राणमेवसंदध्यतेतद्व्यवहारेषुप्रसिद्धमितियोजना।इत्यानंदगिरेः।प्रकारांतरेणप्राणस्यसामत्वमुपासनार्थमुपन्यस्यति।यद्वित्यादिना।ननुप्राणस्यनतच्छरीरपरिमाणत्वंपरिच्छिन्नत्वादानंत्यानुपपत्तिः।तत्कथमस्यविरुद्धेषुशरीरेषुसमत्वमित्याशंक्याह।पुत्तिकादीति·॥ ॥रामरामरामरामराम

उक्तेर्थेतत्साम्नःसामत्वमितिवाक्यंयोजयति।यस्मादिति।

मनोवाक्प्राणाः।४

समशब्दस्य यथाश्रुतार्थत्वं किं न स्यादित्याशंक्याह। न पुनरिति। वायुं तनीयमित्युक्त्या विभुरूपत्वादमूर्तत्वं वा प्राणस्य। न तु प्रदीपो घटे संकुचति। प्रासादे तु च विकसति। तथा प्राणोपि मशकादिशरीरेषु संकोचमिभादिशरीरेषु विकाशं वा प्राप्नोतीति समत्वासिद्धिरित्याशंक्याह। न चेति। गोत्वादिवत्कार्त्स्न्येन परिसमाप्तत्वस्य समत्वस्य सिद्धेः आप्नोतीति। इदं फलं मध्यप्रदीपन्यायेन तु उभयतः संबद्धमवधेयं। प्रस्तावादिशब्दवदुद्गीथशब्दस्यापि भक्तिविशेषरूपत्वात्कथमसौ उद्गीथः प्राणः स्यादित्याशंक्याह। उद्गीथो नामेति

न पुनः शरीरमात्रप्रमाणो नैवामूर्तत्वात्सर्वगतत्वाच्च न च घटप्रासादादिप्रदीपवत्संकोचविकाशितया शरीरेषु तावन्मात्रसमत्वं त एते सर्व एव समाः सर्वेऽनंताः इति श्रुतेः। सर्वगतस्य तु शरीरेषु शरीरपरिमाणवृत्तिलाभो न विरुध्यते एवं समत्वात्साम प्राणं वेद यः श्रुतिप्रकाशितमहत्त्वं तस्यैतत्फलमश्नुते व्याप्नोति साम्नः प्राणस्य सायुज्यं सयुग्भावं समानदेहेन्द्रियाभिमानत्वं सालोक्यं समानलोकतां वा भावनाविशेषतो य एवमेतद्यथोक्तं साम प्राणं वेद। आप्राणात्माभिमानाभिव्यक्तेरुपास्त इत्यर्थः॥ २१ ॥ एष उ वा उद्गीथः। उद्गीथो नाम सामावयवो भक्तिविशेषो नोद्गानं। सामाधि

तस्माद्वेव साम। अश्नुते साम्नः सायुज्यं सलोकतां य एवमेतत्साम वेद॥ २१ ॥ एष उ वा उद्गीथः प्रा
णो वा उत्प्राणेन हीदं सर्वमुत्तब्धं वागेव गीथोच्च गीथा चेति स उद्गीथः॥ २२ ॥ ॥रामः॥

कारात् कथमुद्गीथः प्राणः। प्राणो वा उत्। प्राणेन हि यस्मादिदं सर्वं जगदुत्तब्धं। उदित्युत्तब्धं उत्तंभितं विष्टब्धमित्यर्थः। उच्छब्दार्थो विद्योतकोऽयमुच्छब्दः प्राणगुणाभिधायकः। तस्मादुत्प्राणो वागेव गीथा शब्दविशेषत्वादुद्गीथभक्तिव्यक्ते गीथा गायते। शब्दार्थत्वात्सा वागेव न ह्यन्यदुद्गीथभक्तेः शब्दव्यतिरेकेण किंचिद्रूपमुत्प्रेक्ष्यते। तस्माद्युक्तमवधारणं वागेव गीथेत्युच्च प्राणो गीथा च प्राणतंत्रा वागित्युभयमेकेन शब्देनाभिधीयते स उद्गीथः॥ ३२ ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥राम राम राम

वाग्गीयत्वेनप्रकाशनत्वात्।१

मन्त्रपदस्योभयतः संबंधः। उद्गीथ उद्गीथशब्दवाच्य। एवं सामशब्दितस्य प्राणस्योद्गीथत्वादिहेतुमाह। सामाधिकारादिति। उद्गीथरूपा भक्तिः उद्गीथभक्तिस्तस्याः॥ उद्गीथभक्तेः। शब्दविशेषत्वेपि गीथा वागिति कथमुच्यते तत्राह। गायतेरिति। गायतेः शब्दार्थत्वादुद्गीथभक्तेर्गीथेति नामधेयं। सा च उद्गीथभक्तिर्वागेवातो वाचोपि गीथाशब्दवाच्यत्वमविरुद्धमित्यर्थः। सेति। सा। उद्गीथभक्तिः। ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥राम।

अयहंअनृतवादीस्यांतर्हितस्यघ्नु॥ उक्तानांवाक्यंयुक्तात्प्राणादन्येनदेवतांतरेणाउक्तानंकृतवानइतियदिलवेत्‌तर्हिअहमनृतवादीस्यामित्यर्थः।अयहंअनृतवादीस्यांतस्य

उक्तार्थदार्ढ्यायाख्यायिकारभ्यते। तत्रापितत्त्वैतस्मिन्नुक्तेर्थेहअपिआख्यायिकापिश्रूयते। हस्मब्रह्मदत्तोनामततःचिकितानस्यापत्यंचैकितान:तदपत्यंयुवाचैकितानेयोराजानंयज्ञेसोमंभक्षयन्नुवाचकिमयंचमसस्थोमयाभक्ष्यमाणोराजात्वस्यतस्यममानृतवादिनोमूर्द्धानंशिरोवियातयतुविस्पष्टंपातयतु॥ नोरयंतातङादेशशिथिलोह्विपातयतादितियद्यहमनृतवादीस्यामित्यर्थः। कथंपुनरनृतवादित्वप्राप्तिरित्युच्यते। यत्‌यदिइतोस्मात्प्रकृतात्प्राणात्वाक्संयुक्तादयास्योमुख्यप्राणाभिधायकेनायास्यांगिरसशब्देनाभिधीयतेविश्वस्र

तत्रापिब्रह्मदत्तश्चैकितानेयोराजानंभक्षयन्नुवाचायंत्यस्यराजामूर्द्धानंविपातयताद्यदितोया
स्यआंगिरसोन्येनोदगायदितिवाचाचह्येवसप्राणेनचोदगायदिति॥ २२॥ ॥७॥ ॥

नंपूर्ववंशीयानांसत्रेउद्गातासोन्येनदेवतान्तरेणवाक्प्राणव्यतिरिक्तेनोदगायत्उक्तानंअनृतवान्ततोऽहमनृतवादीस्यांतस्यममदेवताविपरीतप्रतिपत्तुर्मूर्द्धानंविपातयत्वित्येवंशपथंचकारेतिविज्ञानेप्रत्ययदार्ढ्यकर्तव्यतांदर्शयति। तमिमंआख्यायिकानिर्धारितमर्थंस्वेनैवचसोपसंहरतिश्रुतिः। वाचाचप्राणप्रधानयाप्राणेनचस्वस्यात्मभूतेनसोयास्यआंगिरसउद्गाताउदगायदित्येवोर्थोनिर्द्धारितःशपथेन॥ २२॥ ॥७॥ ॥८॥ ॥७॥ ॥७॥ ॥७॥ ॥रामराम॥

23

कारः। प्राणएवोद्गीथदेवतेत्यस्मिन्विज्ञानेप्रत्ययोविश्वासःतस्यदार्ढ्यंतस्यकर्तव्यतामाख्यायिकयादर्शयतिश्रुतिः॥ आख्यायिकार्थस्यैववाचेत्यादिना। उक्तेःपौनरुक्त्यमित्याशंक्याहतमिति॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥राम॥

उद्गीथदेवताप्राणस्यैवेतिनिर्द्धार्यस्वसुवर्णप्रतिष्ठागुणविधानार्थमुत्तरकंडिकात्रयमवतारयतितस्येत्यादिना। प्रकृतेप्राणविज्ञानेगुणविधिर्विवक्षितश्चेत्किमित्यृफलुरस्य
कर्त्तव्यमुपदिश्यतइत्याशंक्यादृष्टफलतयेत्याह। स्वंवेदेति। साम्नइतिप्राणस्योपासकात्मकस्यस्वरत्वप्रत्ययेकार्येसतिविहितेच्छामात्रेणसाम्नःसौस्वर्यंनभवतीत्यस्मात्स
मर्थ्याद्दंतधावनादिकर्त्तव्यमित्येतदत्रविधित्सितमितियोजना। प्रासंगिकत्वेन। भवतिहास्यस्वमितिप्रागेवोक्तत्वादनार्थकापुनरुक्तिरित्याशंक्याह। भिन्नस्येति। साम्नोगुणं

तस्यहैतस्यप्र   तंप्राणमभिसंबध्नाति। हएतस्येतिमुख्यंव्यपदिशत्यभिनयेनसाम्नःसामशब्दवाच्यस्यप्राणस्ययःस्वंधनंवेदतस्यहकिंस्याद्भवति
हास्यस्वंफलेनप्रलोभ्याभिमुखी   त्यशुश्रूषवेआह। तस्यवैसाम्नःस्वरएवस्वं। स्वरइतिकंठगतंमाधुर्यंतदेवास्यस्वंविभूषणंतेनहिभूषितंसमृद्धिम
ल्लक्ष्यतउद्गानं। यस्मादेवंतस्मादार्त्विज्यं   त्विक्कर्मोद्गानंकरिष्यन्वाचिविषयेवाचिवाश्रितंस्वरमिच्छेतसाम्नोधनवत्तांस्वरेणचिकीर्षुरुद्गा
ताइदंतुप्रासंगिकंविधीयतेसाम्नःसौस्वर्येणास्वरवत्त्वप्रत्ययकर्त्तव्यइच्छामात्रेणसौस्वर्यंनभवतीतिदंतधावनतैलपानादिसामर्थ्यात्कर्त्तव्यमि

तस्यहैतस्यसाम्नोयःस्वंवेदभवतिहास्यस्वंतस्यवैस्वरएवस्वंतस्मादार्त्विज्यंकरिष्यन्वाचिस्वरमिच्छेततयावाचास्वरसं
पन्नयार्त्विज्यंकुर्यात्तस्माद्यज्ञेस्वरवंतंदिदृक्षंतएवाथोयस्यस्वंभवतिभवतिहास्यस्वंयएवमेतत्साम्नःस्वंवेद॥ २५ ॥

त्यर्थः। तयैवंसंस्कृतयावाचास्वरसंपन्नयार्त्विज्यंकुर्यात्तस्मात्तस्मात्‌यस्मात्साम्नःस्वंभूतःस्वरस्तेनस्वेनभूषितंसामातोयज्ञेस्वरवंतमुद्गातारंदि
दृक्षंतएवद्रष्टुमिच्छंतएवधनिनमिवलौकिकाः। प्रसिद्धंहिलोकेअथोऽपियस्यस्वंधनंभवतितंधनिनंदिदृक्षंतइतिभिन्नस्यगुणविज्ञानफलसं
संबंधस्योपसंहारश्चक्रियतेभवतिहास्यस्वंयएवमेतत्साम्नःस्वंवेदेति॥ २५ ॥अथान्योगुणःसुवर्णवत्तालक्षणोविधीयते। अत्रापि
सौस्वर्यमेवएतावान्विशेषःपूर्वंकंठगतंमाधुर्यमिदंतुलाक्षणिकंसुवर्णशब्दवाच्यं॥ ।७॥ ।७॥ ।७॥ ॥

नरसंपन्नयेति। अथेति। तर्हिपुनरुक्तिःस्यान्नेत्याह। एतावानिति। लाक्षणिकंकंठ्योऽयंवर्णोदंत्योऽयमितिज्ञानपूर्वकं। शोभनवर्णवत्ता। लक्षणाज्ञानेनेनिवृत्तं। शोभनो
वर्णःसुवर्णःइतिव्युत्पत्त्यायःसुवर्णशब्दःतेनवाच्यंसुवर्णशब्दवाच्यंसौस्वर्यं॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ राम ॥

शोभनवर्णस्य शोभोत्पादकत्वात्सुवर्णत्वं ज्ञेयं।१

बृ·भा·
२४

शोभनवर्णकनकयोः सुवर्णशब्द०न्तु। प्राणेनत्वाकनिष्पाद्यते। वाचश्च भूषणं स्वरः। अतः वाचामकाराकीर्त्य प्राणं श्रुतिराह। तस्य प्राणस्य स्वर एव सुवर्णं शोभनवर्णः। पासां

तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णं। सुवर्णशब्दसामान्यात्स्वरसुवर्णयोर्लौकिकमेव सुवर्णं गुणविज्ञानफलं भवतीत्यर्थः। तस्य
वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेदेति पूर्ववत्सर्वं॥ ॥तथा प्रतिष्ठागुणं विधित्सन्नाह॥ २५ ॥तस्य हैतस्य
साम्नो यः प्रतिष्ठां वेद प्रतितिष्ठत्यस्यामिति प्रतिष्ठा वाक् तां प्रतिष्ठां साम्नो गुणं यो वेद स प्रतितिष्ठति ह तं यथा यथोपासत इति श्रुतेः
तद्गुणत्वं युक्तं। पूर्ववत्फलेन प्रतिलोभिताय का प्रतिष्ठेति शुश्रूषव आह। तस्य वै साम्नो वागेव वागिति जिह्वामूलीयादीनां स्थानानामा॰

तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य ए
वमेतत्साम्नः सुवर्णं वेद॥ २५ ॥तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति तस्य वै वाग
व प्रतिष्ठा वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयतेऽन्न इत्यु हैक आहुः॥ २६ ॥ ॥

स्यासैव प्रतिष्ठा। वाचि हि जिह्वामूलीयादिषु हि यस्मात्प्रतिष्ठितः सन्नेष प्राण एतज्ज्ञानं गीयते। गीतिभावमापद्यते। तस्मात्साम्नः प्रतिष्ठा वा
गन्ने प्रतिष्ठितो गीयते। इत्यु ह एके अन्ये आहुरिह प्रतितिष्ठतीत्युक्तमनिंदितत्वादेकीयपक्षस्यापि कल्पेन प्रतिष्ठागुणविज्ञानं कार्यं ज्ञात्वाप्र
तिष्ठान्नं वेति॥ ॥एवं प्राणविज्ञानवतो जपकर्म विधित्स्यते। यद्विज्ञानवतो जपकर्मण्यधिकारः तद्विज्ञानमुक्तं॥ २६॥ ॥छ॥ ॥

24

शिवः
२४

तमाह। अन्न इति। अन्नशब्देन तत्परिणामो देहो गृह्यते। एकीयपक्षेऽप्युक्तिमाह। इ हेति। कथं तर्हि अनिष्ठागुणस्य विज्ञानं कर्तव्यमत आह। अनिंदितत्वादिति। दे
हे। अन्ने प्रतिष्ठित इत्यस्य एकीयपक्षस्य॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

स्वर्गाद्यारोहफलं जपस्य । २हेति । प्राणविद्युक्तिः ॥ कदा तर्हि जपकर्म कर्त्तव्यं तत्राह । तस्येति । उद्गीथेनाऽत्मगायत्वं न उक्तायेति च प्रकरणात् उद्गीथेन संबंधाज्जपस्य सर्वत्रोद्गानकाले प्राप्तौ पवमानानामेव वचनात्कालनियमसिद्धिरित्यर्थः । यजमानयाजुषाः मंत्रास्तर्हि मात्रे णास्त्वरेणैव भाषिकयथोक्तेन भाव्यमित्याशंक्याह । त्रितीयेति । यत्र स्वरो विहितस्तत्र तृतीयानि ईशो ऽरयते । उच्चैः ऋचा क्रियते । उच्चैः साम्ना । उपांशु यजुषेति । प्रकृते तु द्वितीयानि ईशाज्जपकर्मसमाम्नातानि प्रतायते । मंत्रात्मकत्वेनाभातीत्यर्थः । केनतीईत्वेरणप्रयोगो मंत्राणामत

अथानंतरं । यस्मादेवंविदुषः प्रयुज्यमानं देवभावायाभ्यारोहफलं जपकर्म अतः तस्मात्तद्विधीयते इह । तस्य चोद्गीथसंबंधात्सर्वत्र प्राप्तौ पवमानानामिति वचनात् पवमानेषु त्रिष्वपि कर्त्तव्यतायां प्राप्तायां पुनः कालसंकोचं करोति । स वै खलु प्रस्तोता साम प्रस्तौति स प्रस्तोता यत्र यस्मिन्काले साम प्रस्तुयात् । प्रारभेत तस्मिन् काले एतानि जपेत् । अस्य च जपकर्मण आख्या अभ्यारोहः आभिमुख्येनारोहत्यनेन जपकर्मणा एवं विद्देवभावमात्मान इत्यभ्यारोहः एतानीति बहुवचना त्रीणि यजूंषि द्वितीयानि ईशाब्राह्मणोत्पन्नत्वाद्यथा पठितस्वर एव स्वरः प्रयोक्तव्य न मन्त्रः याजमानं जपकर्म एतानि यजूंषि असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति मंत्राणामर्थस्तिरोहितो भवतीति स्वयमेव व्याचष्टे ब्राह्मणं मंत्रार्थं स मंत्रो यदाह यदुक्तवान्कोऽस्यार्थ इत्युच्यते । मृत्युर्वा असत्स्वाभाविककर्मविज्ञाने मृत्युरित्युच्यते । असत् इदं तयोः अधोभावहेतुत्वात् । सदमृतं मत् शास्त्रीयकर्मविज्ञाने अमरणहेतुत्वादमृत

अथातः पवमानानामेवाभ्यारोहः स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येवैतदाह मृत्योर्माऽमृतं गमयेति नात्र तिरोहितमिवास्ति ।

तस्मादसतो मा कर्मणोऽज्ञानाच्च सतः शास्त्रीयकर्मविज्ञाने गमय देवभावसाधनात्मभावमापादयेत्यर्थः । तत्र वाक्यार्थमाह । अमृतं मा कुर्वित्येवैतदाहेति । तथा तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमः सर्वं ह्यज्ञानमावरणात्मकत्वात्तमः तदेव च मरणहेतुत्वान्मृत्युः ॥ ज्योतिरमृतं पूर्वोक्तविपरीतं दैवं स्वरूपं प्रकाशात्मकत्वाज्ज्ञानं ज्योतिः । तदेवामृतमविनाशात्मकत्वात् तस्मात्तमसो मा ज्योतिर्गमयेति पूर्ववन्मृत्योर्माऽमृतं गमयेत्यादि अमृतं मा कुर्वित्येवैतदाह दैवं प्राजापत्यं फलभावमापादयेत्यर्थः ॥ ॥ पूर्वो मंत्रोऽसाधनस्वभावात्साधनभावमापादयेति द्वितीयस्तु साधनभावादप्यज्ञानरूपात्साध्यभावमापादयेति मृत्योर्माऽमृतं गमयेति पूर्वयोरेव मंत्रयोः समुच्चितार्थः तृतीयेन मंत्रेणोच्यत इति प्रसिद्धार्थं नैव नात्र तृतीये मंत्रे तिरोहितमस्ति नहि तमिवार्थरूपं ॥

चाह । प्रस्तोतेति । श्रोतयेन स्तोता समंत्राणां प्रयोगः कर्तृः प्रथमायाद्विवचं । देवभावसाधनेन ज्ञानकर्मणात्मभावमादय । मामित्यर्थः । अहमर्थि सर्वात्माविराड्रूपहमाकारकेनानं प्राजापत्याख्यस्य फलस्य रूपमापादयेत्यर्थः प्रथमे द्वितीये च मंत्रयोरर्थभेदाप्रतीतेः पुनरुक्तिमाशंक्यावांतरभेदमाह । पूर्वो मंत्र इति । ॥ ७ ॥ ॥

यस्मादिति। स एष एवंविदुद्गातात्मने वा यजमानाय वा यं कामं कामयते तमागानेन साधयतीति यस्मादिति हेतुग्रंथस्तस्मादिति प्रतिज्ञाग्रंथात्प्रागेव संबध्यत इति योजना। कर्माभावे सति पूर्वयोरिव मंत्रयोरस्तीति यथाकृत एवार्थो याजमानमुद्गानं कृत्वा पवमानेषु त्रिष्वथानंतरं यानीतराणि शिष्टानि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत। प्राणविदुद्गाता प्राणभूतः प्राणवदेव यस्मात्स एष उद्गाता एवं प्राणं यथोक्तं वेत्त्यतः प्राणवदेव तं कामं साधयितुं समर्थः। तस्माद्यजमानस्तेषु स्तोत्रेषु प्रयुज्यमानेषु वरं वृणीत यं कामं कामयेत तं कामं वृणीत प्रार्थयेत। यस्मात्स एष एवंविदुद्गातेति तस्माद्ब्रूयात्प्रागेव संबध्यते। आत्मने वा यजमानाय वा यं कामं कामयत इच्छति उद्गाता तमागानेन साधयत्येवं तावत्ज्ञानकर्मभ्यां प्राणात्मापत्तिरित्युक्तं। तत्र नास्त्याशंका संभवतः कर्मापाये प्राणापत्तिर्भवति वा न वेत्याशंक्यते। तदाशंकानिवृत्त्यर्थमाह। तद्धैतल्लोकजिदेवेति। तत्ह तदेतत्प्राणदर्शनं कर्मवियुक्तं केवलमपि लोकजिदेवेति। लोकसाधनमेव न ह एवाऽलोक्यताया अलोकार्हत्वायाशासंसवं प्रार्थनं नैवास्ति ह। नहि प्राणात्मन्यवस्थितस्यानात्माभिमानस्य तत्राप्याशंसनं संभवति। नह्यात्मस्थः कदाचि·

यजमानः।१

अथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु वरं वृणीत यं कामं कामयेत तं स एष एवंविदुद्गातात्मने वा यजमानाय वा यं कामं कामयते तमागायति तद्धैतल्लोकजिदेव न हैवालोक्यताया आशास्ति य एवमेतत्साम वेद ॥ २८ ॥ ॥ तृतीयं ब्राह्मणम् ॥ ॥

मं प्राप्नुयामित्यप्राप्यस्थ इवाशास्ते। स निरस्तविषये ह्यनात्मनि आशंसनं ततस्त्वात्मनि संभवति। तस्मान्नाशास्ति कदाचित्प्राणात्मभावं न प्रपद्येयमिति कस्यैतद्य एवमेतत्साम प्राणं यथोक्तं निर्धारितमहिमानं वेदाहमस्मि प्राणः इंद्रियविषयासंगात्सुरैः पाप्मभिरधर्षणीयो विशुद्धो वागादिपंचकं त्वमदाः श्रयत्वादात्मोऽन्नाद्यात्मरूपस्वाभाविकविज्ञानेनातीतोच्छितेंद्रियविषयासंगजनितासुरपाप्मदोषविमुक्तः सर्वभूतेषु च समदाश्रयान्नाद्योपयोगवंधनमात्मा वाहं सर्वभूतानामांगिरसत्वाद्यजुः सामोद्गीथभूताया वाचः आत्मा तत्प्राप्तनिर्वर्तकस्य च मम साम्नो गीतिभावमापद्यमानस्य वाह्यधनभूषणांसौस्वर्यं ततोप्यंतरतरं सौवर्णलक्षणं सौर्यं गीतिभावमापद्यमानस्य मम कंठादिस्थानानि प्रतिष्ठैवं गुणोहं पुत्तिकादिशरीरेषु कार्त्स्न्येन परिसमाप्तः प्राणोऽमूर्तत्वात्सर्वगतत्वाच्चेति आ एवं अभिमानः अभिव्यक्तो वेदोपास्त इत्यर्थः॥ ॥इति बृहदारण्यभाष्ये तृतीयं ब्राह्मणम् ॥ ३ ॥

केवलेन ज्ञानेन प्राणाप्तो। प्राणात्मत्वं प्रपद्येयमिति नाशास्ति। वागादिपंचकविशेषणमिदं। व्याप्नाश्रितः॥ ॥रामरामराम॥ ॥राम॥ ॥राम ॥

त्वात्‌द्रष्टव्यत्वाच्च प्रजापतित्वं संसारान्तर्गतमित्याहाऽनित्येति। किमित्येतद्विवक्षितमुपवर्ण्यतेनत्राह। ब्रह्मविद्याया इति। ननु मोक्षार्थं विद्यायां प्रवर्तितव्यं। मोक्षश्चापु

आत्मैवेदमग्र आसीत्॥ ज्ञानकर्मभ्यां समुच्चिताभ्यां प्रजापतित्वप्राप्तिर्व्याख्याता। केवलप्राणदर्शनेन च तद्धैतल्लोकजिदेवेत्यादिना। प्रजापतेः फलभूतस्य सृष्टिस्थितिसंहारेषु जगतः स्वातन्त्र्यादिविभूत्युपवर्णनेन ज्ञानकर्मणोर्वैदिकयोः फलोत्कर्षो वर्णयितव्य इत्येवमर्थपारभ्यते। तेन च कर्मकाण्डविहितज्ञानकर्मस्तुतिः कृता भवेत्सामर्थ्याद्विवक्षितं चैतत्सर्वमप्येतत् ज्ञानकर्मफलं संसार एव भयारत्यादियुक्तत्वश्रवणात्कार्यकरणलक्षणत्वाच्च स्थूलव्यक्तानित्यविषयत्वाच्चेति। ब्रह्मविद्यायाः केवलाया वक्ष्यमाणाया मोक्षहेतुत्वमित्युत्तरार्थं चेति। नहि संसारविषयात्साध्यसाधनादिभेदलक्षणादविरक्तस्यात्मैकत्वज्ञानविषयेऽधि-

आत्मैवेदमग्र आसीत्पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्सोऽहमस्मीत्यग्रे व्याहरत्ततोऽहंनामाभवत्

काराः तृषितस्येव पानेन तस्मात् ज्ञानकर्मफलोत्कर्षोपवर्णनमुत्तरार्थं। तथा च वक्ष्यति। तदेतत्पदनीयमस्य तदेतत्प्रेयः पुत्रादित्यादि। आत्मैव। आत्मेति प्रजापतिः प्रथमोऽण्डजः शरीर्यभिधीयते। वैदिकज्ञानकर्मफलभूतः स एव किमिदं शरीरभेदजातं तेन प्रजापतीशरीरेणाविभक्तमात्मैवासीदग्रे प्राक् शरीरान्तरोत्पत्तेः। स च पुरुषविधः पुरुषप्रकारः शिरःपाण्यादिलक्षणो विराट् स एव प्रथमः संभूतः॥ अनुविक्ष्यान्वालोचनं कृत्वा कोऽहं किंलक्षणो वास्मीति नान्यद्वस्त्वन्तरं आत्मनः प्राणपिण्डात्मकात्कार्यकरणरूपान्नापश्यन्न ददर्श केवलं त्वात्मानमेव सर्वात्मानमपश्यत्तथा पूर्वजन्मश्रौतविज्ञानसंस्कृतः सोऽहं प्रजापतिः सर्वात्माहमस्मीत्यग्रे व्याहरत्व्याहृतवान् ततस्तस्माद्यतः पूर्वज्ञानसंस्कारादात्मानमेवाहमित्यभ्यधादग्रे तस्मादहंनामाभवत्॥

तदर्थत्वान्नप्रेक्षावता प्रार्थ्यते तत्राह॥ तदेतदिति॥ तथेति। यथा सर्वात्मा प्रजापतिरहमिति पूर्वस्मिन्नेव जन्मनि श्रौतेन विज्ञानेन संस्कृतो विराडात्मा। तथेदानीमपि फलावस्थः सोऽहं प्रजापतिरस्मीति प्रथमं व्याहृतवानित्ययोजना॥ ॥ ७ ॥ रामराम ॥

वाक्यशेषस्य पुरुषस्याहमिति नाम वक्ष्यति। विराजं ज्ञानकर्मभ्यां संप्राप्तप्रजापतित्वं तेनांशेनास्य सह एकीकृत्य उच्यते स चेति॥ पुरुषनामनिर्वचनं करोति स यदित्यादिना। पूर्वस्मिन्जन्मनि साधकावस्थायां कर्माद्यनुष्ठानेनाहमहमिकया प्रजापतित्वप्रेप्सूनां मध्ये पूर्वो यः सम्यक्कर्माद्यनुष्ठानैः सर्वप्रतिबंधकं यस्माददहत्तस्मात्स प्रजापतिः पुरुष इति योजना। उक्तमेव स्फुटयति।

तस्योपनिषदहमिति श्रुतिप्रदर्शितमेव नाम वक्ष्यति। तस्मात् यस्मात्कारणात्प्रजापतावेवं वृत्तं तस्मात्तत्कार्यभूतेषु तेषु प्राणिष्वेतर्ह्येतस्मिन्नपि काले आमंत्रितः कस्त्वमित्युक्तः सन्नहमयमित्येवाग्र उक्त्वा कारणात्माभिधानेनात्मानमभिधायाग्रे पुनर्विशेषनामजिज्ञासवे अथानंतरं विशेषपिंडाभिधानं देवदत्तो यज्ञदत्तो वेति प्रब्रूते॥ कथयति। यन्नामास्य विशेषपिंडस्य मातापितृकृतं भवति। तत्कथमिति। स च प्रजापतिरतिक्रांतजन्मनि सम्यक्कर्मज्ञानभावनानुष्ठानैः साधकावस्थायां यद्यस्मात्कर्मज्ञानभावनानुष्ठानैः प्राजापत्यप्रतिपित्सूनां पूर्वः प्रथमः सन्नस्मात्प्रजापतित्वप्रतिपित्सुसमुदायात्सर्वस्मादादावौषट् अदहत्। किं? आसंगाज्ञानलक्षणान्सर्वान्पाप्मनः सर्वान्स पुरुषः प्रजापतित्वप्रतिबंधकारणभूतान् यस्मादेवं तस्मात्पुरुषः पूर्वमौषदिति पुरुषो यथायं प्रजापतिरोषित्वा प्रतिबंधान्पाप्मनः सर्वान्स पुरुषः प्रजापतिरभवत् एवमन्योऽपि ज्ञानकर्मभावनानुष्ठानवह्निना केवलज्ञानबलाद्वौषति भस्मीकरो-

तस्मादप्येतर्ह्यामंत्रितोऽहमयमित्येवाग्र उक्त्वाथान्यंनाम प्रब्रूते यदस्य भवति स यत्पूर्वोऽस्मात्सर्वस्मा
त्सर्वान्पाप्मन   षत्तस्मात्पुरुष उषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद॥ ३८ ॥ रामराम।

ति ह वै सः तं कं? यः अस्माद्विदुषः पूर्वः प्रथमः प्रजापतित्वं बुभूषति। भवितुमिच्छति तमित्यर्थः। तं दर्शयति य एवं वेदेति सामर्थ्यात् ज्ञानभावनाप्रकर्षवान्। नन्वनर्थाय प्राजापत्यप्रतिपित्सैवंविदा चेद्दह्यते। नैष दोषः॥ ज्ञानभावनोत्कर्षाभावात्प्रथमप्रजापतित्वप्रतिपत्त्यभावमात्रत्वाद्दाहस्य। उत्कृष्टसाधनः प्रथमं प्रजापतित्वं प्राप्नुवन्न्यूनसाधनो न प्राप्नोतीति स तं दहतीत्युच्यते न पुनः प्रत्यक्षमुत्कृष्टसाधनेनेतरो दह्यते॥ यथा लोके आजिसृतां यः प्रथममाजिमुपसर्पति तेनेतरे दग्धा इवापहृतसामर्थ्या भवन्ति॥ तद्वत्॥ यदिदं तुष्टितं कर्मकाण्डविहितं ज्ञानकर्मफलं प्राजापत्यलक्षणं नैव तत्संसारविषयमत्यक्रामदितीममर्थं दर्शयिष्यन्नाह॥ ३८ ॥ ७ ॥ रामरामराम॥ ॥ ॥श्रीकृष्णार्पणमस्तु॥ ~ ॥

प्रथमः सन्निति। यथेति। अयं प्रजापतिरिति भविष्यद्वृत्त्या साधकोक्तिः। पुरुषः प्रजापतिरिति फलावस्थः कथ्यते॥ पूर्वोऽस्मात् बुभूषतीत्यत्र पूर्वस्मिन्काले प्रजापतित्वं प्राप्तुमिच्छति॥ भू प्राप्तौ। पुरुषगुणः प्रजापतिरहमस्मीति यो विद्यात्सोऽन्यानोषतीत्यर्थः॥ विद्यासाम्ये कथमेषावस्थेत्याशंक्याह॥ सामर्थ्यादिति। हेतुसाम्ये दाहकत्वानुपपत्तेस्तत्प्रकर्षवान्दहतीत्यर्थः॥ ॥रामराम॥ ॥

ज्ञानत्वमेवाज्ञानध्वंसहेतुरित्यर्थस्यानिश्चितत्वात् । यतोद्वितीयंवस्तुपरमार्थतःनास्ति । मरणाकालीनंतदज्ञानध्वंसी अंत्यंमे॰

सोविभेत्प्रजापतिः योयंप्रथमः शरीरी पुरुषविधोव्याख्यातः सोऽविभेत् । भीतवानस्मदादिवदेवेत्याह । यस्मादयंपुरुषविधः शरीरकरणवानात्मनाशविपरीतदर्शनवत्वादविभेत्तस्मात्तत्सामान्यादद्यत्वेपिएकाकीविभेति । किंचास्मदादिवदेवभयहेतुविपरीतदर्शनापनोदकारणंयथाभूतार्थदर्शनंसोयंप्रजापतिरीक्षामीक्षणंचक्रेकृतवान्कथमित्याह । यद्यस्मान्मत्तोऽन्यदात्मव्यतिरेकेणवस्त्वंतरंप्रतिद्वंद्वीभूतंनास्तितस्मिन्नात्मविनाशहेत्वभावेकस्मान्नुविभेमीति । ततएवयथाभूतात्मदर्शनादस्यभयंवीयायविस्पष्टमपगतवत्तस्यप्रजापतेर्यद्भयंतत्केवलाऽविद्यानिमित्तमेवपरमार्थदर्शनेऽनुपपन्नमित्याह । कस्माद्ध्यभेष्यत्किमित्यसौभीतवान्परमार्थनिरूपणायांभयमनुपपन्नमेवेत्यभिप्रायः । यस्माद्द्वितीयाद्वस्त्वंतराद्वैभयंभवतिद्वितीयंचवस्त्वंतरमविद्याप्रत्युपस्थापितमेवनह्यदृश्यमानंद्वितीयंभयजन्महेतुः ॥ तत्रकोमोहःकःशोकएकत्वमनुपश्यतइतिमंत्रवर्णाद्यच्चैकत्वदर्शनेन

सोविभेत्तस्मादेकाकीविभेतिसहाऽयमीक्षांचक्रेयन्मदन्यन्नास्ति

भयमपनुनोदापनोदितं ॥ कस्माद्द्वितीयाद्वस्त्वंतराद्भयंभवति ॥ तदेकत्वदर्शनेनद्वितीयदर्शनमपनीतमितिनास्तियतः । अत्रचोदयंति ॥ कुतःप्रजापतेरेकत्वदर्शनंजातंकोवास्माउपदिदेशाथानुपदिष्टमेवप्रादुरभूदस्मदादेरपितथाप्रसंगोऽथजन्मनांतरकृतसंस्कारहेतुकमेकत्वदर्शनानर्थक्यप्रसंगोयथाप्रजापतेरतिक्रांतजन्मावस्थस्यैकत्वदर्शनंविद्यमानमप्यविद्याबंधकारणस्यनापनिन्येयतोऽविद्यासंयुक्तएवायंजातोऽविभेदेवंसर्वेषामेकत्वदर्शीनानर्थक्यंप्राप्तं । अंत्यमेवनिवर्तकमितिचेन्नपूर्ववत्पुनःप्रसंगेनानैकांत्यात् । तस्मादनर्थकमेवैकत्वदर्शनमिति । नैषदोषउत्कृष्टहेतूद्भवत्वाल्लोकवद्यथापुण्यकर्मोद्भवैर्विविक्तैःकार्यकरणैःसंयुक्तेजन्मनिसतिप्रज्ञामेधास्मृतिवैशारद्यंदृष्टम् ॥ ॥श्रीरामः॥ ॥ ७ ॥ ॥

वेति ॥ पूर्ववदिति ॥ अज्ञानध्वंसिपूर्वज्ञानेऽपिबंधहेत्वज्ञानध्वंसित्वाद्दृष्टेर्ज्ञानरनैकांत्यात् ॥ नचांत्यमैक्यज्ञानमैक्यज्ञानत्वादज्ञानध्वंसीत्युक्तं । उपांत्यतादृक्
ज्ञानवदंत्येपिनदयोगात् ॥ ॥ ॥रामरामराम॥ ॥श्रीरामश्रीरामश्रीराम॥ ॥श्रीरामचन्द्रायनमः॥ ॥ ॥

धर्मादिचतुष्टयाद्विपरीतमधर्मादिचतुष्टयं तत्र हेतोः सर्वस्य पाप्मनो ज्ञानाद्यप्रतिबन्धेन दाहात्। यस्मिंस्तच्चतुष्टयं सहसिद्धं स निरवर्त्तत इति संबंधः॥ अप्रतिबद्धं निरंकुशमित्येतत्प्रत्येकं संबध्यते। ज्ञानोत्पत्तेराचार्याद्यनपेक्षत्वे श्रवणादिविधानानर्थक्यादनेकश्रुतिस्मृतिविरोधः स्यादिति शंकते। श्रुतेति। विरोधं निराकरोति। नेति। निमित्तेत्यादिना। निमित्तानां विकल्पः समुच्चयो गुणवत्त्वमगुणवत्त्वमित्यनेन प्रकारेण कार्योत्पत्तौ विशेषसंभवान्न श्रवणादिविधानानर्थक्यमित्यर्थः। संग्रहवाक्यं विवृणोति लोके हीति। तद्विस्तरं विकल्पादि यथा ज्ञातुं शक्यते तथा कस्मिंश्चिन्नेत्रवति नैमित्तिके रूपज्ञाने व्यक्तार्थं दर्शयामीत्याह। तद्यथेति। संयुक्ताभ्यां मनसन्निकर्षालोकाभ्यां रूपज्ञानं भवति। तथादित्य॰भेदे समुच्चयवान्निमित्तभेदो भिन्नो भवति। तत्र विकल्पमुदाहरति। तमसीत्यादिना। =पं समुच्चयं दर्शयति अस्माकं त्विति। विकल्पितानां समुच्चितानां च निमित्तानां गुणवदगुणवत्त्वप्रयुक्तं भेदं कथयति। तथेति। आलोकविशेषस्य गुणवत्त्वं बहुलं। अगुणवत्त्वं मंदप्रभत्वं चक्षुरादेर्गुणवत्त्वं निर्मलत्वादि। तिमिराद्युपहतत्वादिरगुणवत्त्वमिति भेदः। यथा वामनादेः। एकान्तनियतज्ञानोदयलाभेन निमित्तत्वं। क्वचिदाचार्यनिमित्तं। अथ प्रा-

तथा प्रजापतेर्धर्मज्ञानवैराग्यैश्वर्यविपरीतहेतुसर्वपाप्मदाहाद्विशुद्धैः कार्यकरणैः संयुक्तमुत्कृष्टं जन्म तदुद्भवं चानुपदिष्टमेवैकत्वैकदर्शनं प्रजापतेस्तथा च स्मृतिर्ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः॥ ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयमिति। सहसिद्धत्वे भयानुपपत्तिरिति चेन्न ह्यादित्येन सह तम उदेति। ना॰न्यानुपदिष्टार्थत्वात्सहसिद्धवाक्यस्य। सहसिद्धशब्देन जन्मत एव ज्ञानित्वं नोच्यते किं त्वाचार्यादिनिरपेक्षत्वमेव सहसिद्धवाक्यस्य श्रवणात् प्रणिपातादीनामहेतुत्वमिति चेत्स्यान्मतं। श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेंद्रियः। तद्विद्धि प्रणिपातेनेत्येवमादीनां श्रुतिस्मृतिविहितानां ज्ञानहेतूनामहेतुत्वं प्रजापतेरिव जन्मांतरकृतधर्महेतुत्वे ज्ञानस्येति चेन्न निमित्तविकल्पसमुच्चयगुणवत्त्वागुणवत्त्वभेदोपपत्तेः॥ लोके हि नैमित्तिकानां कार्याणां निमित्तभेदोऽनेकधा विकल्प्यते। तथा निमित्तसमुच्चयः तेषां च विकल्पितानां समुच्चितानां च पुनः गुणवदगुणवत्त्वकृतो भेदो भवति। तद्यथा रूपज्ञानकमस्यैव तावन्नैमित्तिके कार्ये तमसि विनालोकेन च चक्षूरूपसन्निकर्षान्नक्तंचराणां रूपज्ञानं भवति मन एव केवलं रूपज्ञाननिमित्तं योगिनाम्

कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय कस्माद्ध्यभेष्यद्द्वितीयाद्वै भयं भवति॥ २९॥

अस्माकं तु सन्निकर्षालोकाभ्यां सह तथादित्यचंद्राद्यालोकभेदैः समुच्चितो निमित्तभेदो भवति। तथालोकविशेषगुणवत्त्वेन भेदाः स्युरेवमात्मैकत्वज्ञानेऽपि क्वचिज्जन्मांतरकृतं कर्म निमित्तं भवति। यथा प्रजापतेः क्वचित्तपो निमित्तं तपसा ब्रह्म विजिज्ञासस्वेति श्रुतेः। क्वचिदाचार्यवान्पुरुषो वेद श्रद्धावाँल्लभते ज्ञानं तद्विद्धि प्रणिपातेनाचार्याद्धैव बुद्ध्यस्व इति श्रोतव्यः श्रुतिस्मृतिभ्यः। एकान्तज्ञानलाभनिमित्तत्वं श्रद्धाप्रणिपातादीनामधर्मादिनिमित्तवियोगहेतुत्वात् वेदान्तश्रवणमनननिदिध्यासनानां च साक्षाज्ज्ञेयविषयत्वात्। पापादिप्रतिबंधक्षये चात्ममनसोर्भूतार्थज्ञाननिमित्तस्वाभाव्यात्। तस्मादहेतुत्वं न ज्ञानस्य श्रद्धाप्रणिपातादीनामिति। इतश्च संसारविषय एव प्रजापतित्वं यतः॥ २९॥ ॥रामराम॥

पातादिव्यतिरेकेण प्रजापतेरपि ज्ञानं संभवति। तामसस्वभावादत आह। अधर्मादीति। प्रणिपातादर्शनादयप्रतिबंधनिवर्तकत्वात्प्रजापतेश्च नन्विह नैर्जन्मांतरीयसाधनापेक्षत्वादाधुनिकप्रणिपातादिना विनाप्यस्य वाक्यादेर्बोधः संभवतीत्यर्थः। तर्हि श्रवणादिव्यतिरेकेणापि प्रजापतेर्ज्ञानं स्यादित्याशंक्याह। वेदांतेति। न तैर्विना ज्ञानं कस्यचिदपि स्यात्प्रजापतेस्तु जन्मांतरीयश्रवणादि इदानीमनुस्मृतवाक्यान्न तदुत्पत्तिरिति शेषः। तर्हि श्रद्धादिकमपि प्रतिबंधनिवर्तकत्वेन प्रजापतेरादरणीयं तन्निवृत्तिसत्तेरागाज्ञानोत्पत्त्यनुपपत्तेरित्याशंक्याह। पापादीति। आत्ममनसोर्मिथः संयुक्तयोः संबंधि यत्पापं तत्कार्यं च रागादि तेन ज्ञानोत्पत्तौ प्रतिबंधस्य पूर्वोक्तेन न्यायेन क्षये सति प्रजापतेरीश्वरानुग्रहात्स्मृतवाक्यस्य परमार्थज्ञानोत्पत्तौ केवलस्य निमित्तत्वात्तस्याधुनिकश्रद्धाव्यतिरेकेणाज्ञानोदयेऽपि न तद्विधिवैयर्थ्यमस्माकं तद्वशादेव तदुत्पत्तेः। अधिकारिभेदेन ज्ञानहेतुषु विकल्पेऽपि तेषामस्मासु समुच्चयान्न श्रुतिस्मृतिविरोधोऽस्तीत्युपसंहरति। तस्मादिति। प्रजापतेर्भयाविष्टत्वेन संसारांतर्भूतत्वमुक्तमिदानीं तत्रैव हेत्वंतरमाह। इतश्चेति। प्रतिबंधक्षयभूता॰व्यात्। अस्याग्रिमेणान्वयः॥ ॥राम

आनंदुःखेतन्मनुशतरूपात्मकेनरूपांतरेणाहरमनःखोद्ध। सत्येच्छत्वात्। संप्रतिस्त्रीपुंसयोःस्पतिमाह। सतथेति। नकेवलंमनुःशतरूपेण्यनयोरेवदंपत्योरिदंनिर्वचनं। किंतुलोकप्रसिद्धयोः
सर्वयोरेवतयोरेतद्रष्टव्यं। विराट्। नद्वैधाभावेविराजोवा। संसक्तस्त्रीपुंमांसस्यपिंडस्यवा। नाद्यः। सशब्देनविराड्ग्रहणायोगात्॥ द्वितीयेत्वात्मशब्दानुपपत्तिरित्याह। इममिति।

सप्रजापतिः वैनैवरेमेरतिंनान्वभवद्रत्याविरहितोभूदित्यर्थः। अस्मदादिवदेवयत इदानीमपितस्मादेकाकित्वादिधर्मवत्त्वादेकाकीनरमतेरतिंनानुभवतिरतिर्नामेष्टा
र्थसंयोगजाक्रीडातत्प्रसंगिनइष्टवियोगान्मनस्याकुलीभावोऽरतिरुच्यते। सतस्याअरतेरपनोदनायद्वितीयमरत्यपघातसमर्थंस्त्रीवस्त्वैच्छत्गृद्धिमकरोत्तस्यैवंस्त्री
विषयंगृध्यतःस्त्रियापरिष्वक्तस्येवात्मनोभावोबभूवसतेनसत्येप्सुत्वात्सहएतावानेतत्परिमाणआसबभूवहकिंपरिमाणइत्याह। यथालोकेस्त्रीपुंमावरत्यपनो
दनायसंपरिष्वक्तौयत्परिमाणौस्यातांतथातत्परिमाणोबभूवेत्यर्थः। सतथातत्परिमाणमेवेममात्मानंद्वेधाद्विप्रकारमपातयत्पातितवानिममेवेत्यव
धारणस्यमूलकारणाद्विराजोविशेषणार्थं। नक्षीरस्यसर्वोपमर्देनदधिभावापत्तिवद्विराट्सर्वोपमर्देनैतावानासकिंतर्हिआत्मनाव्यवस्थितस्यैवविराजःसत्यसं
कल्पत्वादात्मव्यतिरिक्तस्त्रीपुंपरिष्वक्तपरिमाणशरीरांतरंबभूव। सएवचविराट्तथाभूतःसहैतावानासेतिसामानाधिकरण्यात्तेनतस्मात्पातनात्पतिश्चपत्नीचाभव

सवैनैवरेमेतस्मादेकाकीनरमतेसद्वितीयमैच्छत्सहैतावानासयथास्त्रीपुमांसौसंपरिष्वक्तौसइममेवात्मानंद्वे
धापातयत्ततःपतिश्चपत्नीचाभवतांतस्मादिदमर्धबृगलमिवस्वइतिहस्माहयाज्ञवल्क्यस्तस्मादयमाकाशःस्त्रि
यापूर्यतएवतांसमभवत्ततोमनुष्याअजायंत॥ ४०॥ ॥

तामितिदंपत्योर्निर्वचनंलौकिकयोरतएव। तस्माद्यस्मादात्मनएवार्धःपृथग्भूतोयेयंस्त्रीतस्मादिदंशरीरमात्मनोर्धबृगलमर्धंचतद्बृगलंविदलमर्धविदलमिवे
त्यर्थः। प्राक्स्त्र्युद्वहनात्कस्यार्धबृगलमित्यपेक्ष्यते॥ स्वआत्मइति॥ एवमाहस्मउक्तवान्किलयाज्ञवल्क्यः। यज्ञस्यवल्कःवक्तायज्ञवल्कःतस्यापत्यंयाज्ञवल्क्यः।
दैवरातिरित्यर्थः। ब्रह्मणोवापत्यं। यस्मादयंपुरुषार्धआकाशःस्त्र्यर्धशून्यःपुनरुद्वहनात्तस्मात्पूर्यतेस्त्र्यर्धेनपुनःसंपुटीकरणेनेवविदलार्धः। तांसःप्रजापति
र्मन्वाख्यःशतरूपाख्यामात्मनोदुहितरंपत्नीत्वेनकल्पितांसमभवन्मैथुन्यमुपगतवान्ततस्तस्मादुपगमनान्मनुष्याअजायंतोत्पन्नाः॥ ४०॥ ७॥

तथाचसशब्देनकथंतयाविराड्ग्रहणमविरुद्धमित्यर्थः॥ ॥तदेवस्फुटयति। नेत्यादिना। भेदार्थं। विराड्विशेषणम्। पात्यतेर्द्वैधत्वेनेतिपतिः। पात्यं पत्नी। यस्मा
दिति। उद्वहनात्प्रागवस्थायामाकाशःपुरुषार्धःस्त्र्यर्धशून्योयस्मादसंपूर्णोवर्ततेतस्मादुद्वहनेनप्राप्तस्त्र्यर्धेनपुनरितरोभागःपूर्यते। यथाविदलार्धोऽसंपूर्णःसंपुटी
करणेनपुनःसंपूर्णःक्रियतेतद्वदितियोजना। विराजामहमनुमेकीकृत्याहात्मनोदुहितरमिति॥ ॥श्रीगुरुभ्योनमः॥ ॥श्रीः श्रीः श्रीः॥ ॥

वृषभः श्रेष्ठः। वाक्ये वीप्सा विवक्षितेत्याह॥ तामिति। विराट्। वेदेत्यर्थः। तदेव प्रपंचमिति आदौ अभ्यमंथदिति संबंधः॥ ॥ ॥रामरामरामश्रीः रामरामरामश्रीः॥

सा शतरूपा उह। इयं मे यं ऽह्यहं गमनेस्मान्न प्रतिषेधमनुस्मरंती ईक्षांचक्रे। कथंन्विदमह्यं यन्मामात्मन एव जनयित्वोत्पाद्य संभवत्युपगच्छति। यद्यप्ययं निर्घृणः अहं हंतेदानीं तिरोभानि जात्यंतरेण तिरस्कृता भवानीत्येवमीक्षित्वा सा गौरभवदुत्पाद्य प्राणिकर्मभिश्चोद्यमानायाः पुनः पुनः सैवमतिः शतरूपाया मनोश्चाभवत्ततश्च ऋषभ इतरः तां समेवाभवदित्यादि पूर्ववत्ततो गावोजायंत तथा वडवेतराभवदश्ववृष इतरस्तथा गर्दभीतरा गर्दभ इतरः। तत्र वडाश्ववृषादीनां संगमात्ततः एकशफं एकखुरं अश्वतर गर्दभाख्यं त्रयमजायत। तथाजेतराभवद्वस्त इतरस्तथाविरितरा मेष इतरः स तां समेवाभवत्तामिति वीप्सा तां समजां तां अविं च समभवदेवेत्यर्थः। ततो जाश्चावयश्चाजावयोजायंत। एवमेव यदिदं किंच यत्किंचेदं मिथुनं स्त्रीपुंलक्षणं द्वन्द्वमा-

सोयहमीक्षांचक्रे कथंनु मात्मन एव जनयित्वा संभवति हंत तिरोसानीति सा गौरभवदृषभ इतरस्तांऽसमेवाभवत्ततो गावोजायंत वडवेतराभवदश्ववृष इतरो गर्दभीतरा गर्दभ इतरस्तांऽसमेवाभवत्ततोऽजाऽवयोजायंतैवमेव यदिदं किंच मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत॥ ४१ ॥ सोऽवेदहंवाव सृष्टिरस्म्यहंऽहीदंऽसर्वमसृक्षीति ततः सृष्टिरभवत्सृष्ट्याऽंऽहास्यैतस्यां भवति य एवं वेद॥ ४२ ॥ ॥

पिपीलिकाभ्यः पिपीलिकाभिः सहानेनैव न्यायेन तत्सर्वमसृजत जगत्सृष्टवान्॥ ४१ ॥ स प्रजापतिः सर्वमिदं जगत्सृष्ट्वावेत् कथमहं वाव अहमेव सृष्टिः सृज्यत इति सृष्टं जगदुच्यते सृष्टिरिति॥ यन्मया सृष्टं जगत् मद्भेदाद् अहमेवास्मि न मत्तो व्यतिरिच्यते॥ कुत एतदहं हि यस्मादिदं सर्वं जगदसृक्षि सृष्टवानस्मि तस्मादित्यर्थः। यस्मात्सृष्टिशब्देनात्मानमेवोक्तवान्प्रजापतिः॥ अतस्तस्मात्सृष्टिरभवत्सृष्टिनामाभवत्॥ सृष्ट्यां जगति ह अस्य प्रजापतेरेतस्यामेतस्मिन् जगति प्रजापतिवत्स्रष्टा भवति स्वात्मनोऽनन्यभूतस्य जगतः कः य एवं प्रजापतिवत् यः कोऽपि त्वात्मनोऽनन्यभूतं जगत्साध्यात्माधिभूताधिदैवं जगदहमस्मीति वेद॥ एवं स प्रजापतिर्जगदिदं मिथुनात्मकं सृष्ट्वा ब्राह्मणादिवर्णान् नियंतॄन् देवताः सिसृक्षुरादौ॥ ४२ ॥ ॥

28

श्रीरामः श्रीरामः श्रीरामः ॥ श्रीकृष्णः श्रीकृष्णः श्रीकृष्णः ॥ श्रीभगवन् श्रीहरि ॥ श्रीरामरामरामरामरामश्रीरामरामरामश्रीः ॥

प्रजापतेर्मुखात्स्वयमग्निःसृष्टोपिकथंब्राह्मणमनुगृह्णातीतितत्राह।।तथेति।उक्तेर्थेश्रुतिसंवादंदर्शयति।अग्निमसृजतेत्यतेत्येतदुपलक्षणार्थमित्यभिप्रेत्यसृष्ट्यंतरमाह।। ॥

अथेतिशब्दद्वयमभिनयप्रदर्शनार्थमनेनप्रकारेणमुखेहस्तौप्रक्षिप्याभ्यमंथदाभिमुख्येनमंथनमकरोत्।समुखंहस्ताभ्यांमथित्वामुखाच्चयोनेर्हस्ताभ्यां चयोनिभ्यामग्निंब्राह्मणजातेरनुग्रहकर्तारमसृजतसृष्टवान्यस्माद्दाहकस्याग्नेर्योनिरेतदुभयंहस्तौमुखंचतस्मादुभयमप्येतदलोमकंलोमवर्जितंकिं सर्वमेवनअंतरतःअभ्यंतरतोऽस्तिहियोन्यासामान्यमुभयस्यापिकमलोमकाहियोनिरंतरतःस्त्रीणां।तथाब्राह्मणोपिमुखादेवजज्ञेप्रजापतेस्तस्मादेकयो नित्वाज्ज्येष्ठेनेवानुजोनुगृह्यतेऽग्निनाब्राह्मणःतस्माद्ब्राह्मणोग्निदेवत्योमुखवीर्यश्चेतिश्रुतिस्मृतिसिद्धं।तथाबलाश्रयाभ्यांबाहुभ्यांबलं भिदादिकंक्षत्रियजातेर्नियंतारंक्षत्रियंचतस्मादैंद्रःक्षत्रोबाहुवीर्यश्चेतिश्रुतौचावगतंतथोरुतइहाचेष्टाश्रयाद्वस्वादिलक्षणंविशोनियंता

अथेत्यभ्यमंथत्समुखाच्चयोनेर्हस्ताभ्यांचाग्निमसृजततस्मादेतदुभयमवलोमकमंतरतोऽलो
मकाहियोनिरंतरतस्तद्यदिदमाहुरमुंयजामुंयजेत्येकैकंदेवमेतस्यैवसाविसृष्टिरेषउह्येवसर्वेदेवाः

रंविशंच।तस्मान्मरुद्वायादिगणोवस्वादिदैवत्योवैश्यः।तथापूषणंपृथिवीदेवतांशूद्रंचपद्भ्यांपरिचरणक्षममसृजतेतिश्रुतिस्मृतिप्रसिद्धं।तत्रक्ष त्रादिदेवतासर्गमिहानुक्तंवक्ष्यमाणमप्यत्रोक्तवान्‌उपसंहरतिसृष्टिसाकल्यानुकीर्त्यर्थयथेयंश्रुतिर्व्यवस्थितातथाप्रजापतिरेवसर्वेदेवाइति। निश्चितोर्थःस्रष्टुरनन्यत्वात्सृष्टानांप्रजापतिनैवतुसृष्टत्वाद्देवानामभेदंप्रकरणार्थव्यवस्थितेतत्तदभिप्रायेणाऽविद्वन्मतांतरनिंदोपन्या सोऽन्यनिंदान्यस्तुतयेतत्‌तत्राकर्मप्रकरणेकेवलयाज्ञिकायागकाले।यदिदंवचआहुरमुमग्निंयजामुमिंद्रंयजेत्यादितामशास्त्रज्ञास्तत्रक र्मादिभिन्नत्वाद्भिन्नमेवाग्न्यादिदेवमेकैकंमन्यमानाआहुरित्यभिप्रायस्तन्नतथाविद्याद्यस्मादेतस्यैवप्रजाप

तथाबलेति।सृष्टिरत्रनविवक्षिता।किंत्वनेनप्रकारेणसृष्टिश्रुतिःस्थितातेनप्रकारेणदेवतादिसर्वंप्रजापतिरेवेतिविवक्षितमित्याह।यथेति।तत्रहेतुमाह।
स्रष्टुरिति।विराजामहत्कत्वज्ञानं। ॥ राम॥ ॥राम॥ ॥७॥ राम॥ ॥ः॥ ॥राम॥

=विज्ञेयं।१

प्राणाख्यः वायुतत्त्वीयं इति वचनात् विराट् प्राणाख्यः। विवदंते। अत्रेतेति। हिरण्यगर्भस्य परत्वमाद्ये। द्वितीये तु संसारित्वं विधेयमिति विभागः। तत्र पूर्वपक्षं गृह्णाति। पर एव:
त्विति। हिरण्यगर्भाख्यो विराट् कीदृशः। पररूपो वा संसारिरूपो वा। तत्र पर एव ०रे॥ मंत्रब्राह्मणस्मृतिषु परस्य सर्वदेवतात्मत्वदृष्टेरत्र च सूत्रस्य नत्रतीति तत्परत्वमित्युक्त्वेदा
दानीं पूर्वपक्षांतरमाह। संसार्येवेति। असृजतेति च श्रवणाद् दिसंबंधः। न केवलं मनुष्यत्वश्रुतेरेव संसारित्वं। किं तु जन्मश्रुतेश्चेत्याह। हिरण्यगर्भमिति। कर्मफलदर्शनाधि
कारेऽस्मिन् स्यायायाः स्मृतेश्च तत्फल। भूतस्य प्रजापतेः संसारित्वमेवेत्याह। स्मृतेश्चेति। विराट् ब्रह्मेत्युच्यते। विश्वसृजो मन्वादयः। धर्मः यमः। भ इत्युक्तौ हि विविधवाक्यवशा
त्प्रजापतेः संसारित्वचेत्याशंक्याह। अर्थेति। विरोधकृतमप्रामाण्यं निराकरोति। नेत्यादिना। एवतोऽसंसारित्वकल्पनया च संसारित्वमिति कल्पनांतरसंभवात् विविधश्रुतीना

तेः सावृष्टिर्देवभेदः सर्व एष उ हि एव प्रजापतिरेव प्राणाः सर्वे देवाः अत्र विप्रतिपद्यंते पर एव हिरण्यगर्भ इत्येके। संसारीत्यपरे पर एव तु मंत्रवर्णात्
इदं मित्रं वरुणमग्निमाहुरिति श्रुतेः। एष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा इति च श्रुतेः। स्मृतेश्च एतमेके वदंत्यग्निं मनुमन्ये प्रजापतिमिति॥ यो
सावतींद्रियो ग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः। सर्वभूतमयोऽचिंत्यः स एष स्वयमुद्बभाविति। संसार्येव वा स्यात्। सर्वान् पाप्मन औषदिति श्रुतेः। न ह्यसंसा
रिणः पाप्मदाहप्रसंगोऽस्ति भयारतिसंयोगश्रवणाच्च। अथ यन्मर्त्यः सन्नमृतानसृजतेति च हिरण्यगर्भं पश्यत जायमानमिति च मंत्रवर्णात् स्मृतेश्च
कर्मविपाकप्रक्रियायां ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च। उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिण इत्येवं विरुद्धार्थानुपपत्तेः प्रामाण्य
व्याघात इति चेन्न। कल्पनांतरोपपत्तेरविरोधात् उपाधिविशेषसंबंधाद्विशेषकल्पनांतरमुपपद्यते। आसीनो दूरं व्रजति शयानो याति सर्वतः। कस्तं मदामदं दे
वं मदन्यो ज्ञातुमर्हतीत्येवमादिश्रुतिभ्यः उपाधिवशात् संसारित्वं परमार्थतः स्यातोऽसंसारित्वमेकत्वं नानात्वं च हिरण्यगर्भस्य तथा सर्वजीवानां तत्त्वमसीति श्रुतेः। हिरण्यग
र्भस्तूपाधिशुद्ध्यतिशयापेक्षया प्रायशः पर एवेति श्रुतिस्मृतिवादाः प्रवृत्ताः संसारित्वं तु क्वचिद्दर्शयंति जीवानां तूपाधिगताशुद्धिबाहुल्यात् संसारित्वमेव प्रायशो
ऽभिलप्यते। व्यावृत्तकृत्स्नोपाधिभेदापेक्षया तु सर्वः परत्वेनैवाभिधीयते श्रुतिस्मृतिवादैः। तार्किकैः कपिलत्यक्तागमबलैर्नास्तिकलोकैर्न्यायविरुद्धं वकुतर्कैय
द्भिराकुलीकृतः शास्त्रार्थस्तेनार्थनिश्चयो दुर्लभो येन तु केवलं शास्त्रानुसारिणः शांतदर्पास्तेषां प्रत्यक्षविषय इव निश्चितः शास्त्रार्थो देवतादिविषय। तत्र प्रजापतेरेकस्य
देवयानाद्यलक्षणो भेदो विवक्षित इति

मविरोधात् प्रामाण्यमित्यविरोधीत्यर्थः। औपाधिकी परस्य कल्पनेत्यत्र प्रमाणमाह। आसीन इति। स्वापे तत्कृतस्वोपाधि आत्मा मनसः शरीरं दूरगमनदर्शनात् सोपाधिको दूरं व्रजति। यथा स्वे
स्वप्नेऽपि मनसो गतिश्चोपासर्वव्यापी भवभाति। तथा जागरितेऽपीत्यर्थः। कल्पितेन मनसा सार्किकं इत्याशंक्याह। परमार्थतस्तु संसारिरूपरहितः। कल्पितेऽहंकारादिविकारेणा
त्माभाविकेन तत्स्वभावेन च युक्तो ऽसावात्मतत्त्वानंदको विद्वानेव ज्ञातुमर्हतीत्याह। कस्तमिति। तस्मात् प्रत्यक्षमदादिवत् सत्त्वेनाप्युपलब्धि कि तु संसारित्वमेव तत्त्वविकल्पिमाश्रित्य इत्यातस्य
साध्यविकलता आह। तथेति। तेषां त्वतो ब्रह्मत्वप्रमाणमाह। तत्त्वमिति। कल्पातु हिरण्यगर्भे विशेषाहृतामावस्मदादिभिरूपास्यत्वेनाह। हिरण्यगर्भस्त्विति। सामान्येन तत्त्वनिश्च
यमुक्त्वा परमेनतदभावमाह। तार्किकास्त्विति। सर्वदेवतात्मकस्य प्रजापतेः स्वतोऽसंसारित्वकल्पनया वैपरीत्यमिति तिष्ठ तत्त्वानि अथ त्वाइ मरयथस्यतात्पर्यमाह। नचेति। विप
क्षतस्फुटार्थप्रवृत्तिरिति निष्कर्षः॥ ॥

29

अनुःसर्गानंतर्यमथशब्दार्थःरेतसःसाकाशादपांसर्गेमत्सर्गेकिमायातमित्याशंक्याह।द्रवात्मकश्चेति। सोमस्यद्रवात्मकत्वेफलितमाह।तस्मादिति।अग्नीषोमयोरन्नान्नादयोःसृष्टावपिजगतितद्व्यतिरेकेणावशिष्टमस्तीत्याशंक्याह।एतावदिति। आप्यायकःसोमोद्रवात्मकत्वात्।अन्नंचाप्यायकंप्रसिद्धंतस्मात्।सोमस्यान्नत्वमुपपन्नमित्याह।द्रवात्मकत्वादिति।सोमएवान्नमग्निरन्नादइत्यवधारणस्यविवक्षितमर्थमाह।।तत्रेति।यथाश्रुतमवधारणमवधीर्यकुतःप्रकारान्तरेणव्याख्यानमित्याशंक्याह।अर्थब

तत्राग्निरुक्तोऽन्नादःसोमइदानीमुच्यते।।अथयत्किंचेदंलोकेआर्द्रंद्रवात्मकंतद्रेतसःआत्मनोबीजादसृजतरेतसआपइतिश्रुतेः।।द्रवात्मकश्चसोमःतस्माद्यदार्द्रंप्रजापतिनारेतसःसृष्टंतदुसोमएव।एतावद्वैएतावदेवनातोऽधिकमिदंसर्वंकिंतदन्नंचैवसोमोद्रवात्मकत्वादाप्यायकमन्नादश्चाग्निरौष्ण्याद्रूक्षत्वाच्चतत्रैवमवध्रियते।सोमएवान्नंयदद्यतेतदेवसोमइत्यर्थः।यएवात्तासएवाग्निरर्थबलाद्ध्यवधारणमग्निरपिक्वचिद्धूयमानःसोमपक्षस्यैवसोमोपीज्यमानोऽग्निरेवात्तृत्वादेवमग्नीषोमात्मकंजगदात्मत्वेनपश्यन्नकेनचिद्दोषेणलिप्यतेप्रजापतिश्चभवति।।

अथयत्किंचेदमार्द्रंतद्रेतसोऽसृजततदुसोमएतावद्वाइदमन्नंचैवान्नादश्चसोम
एवान्नमग्निरन्नादःसैषाब्रह्मणोऽतिसृष्टिर्यच्छ्रेयसोदेवानसृजताथयन्मर्त्यः
सन्नमृतानसृजततस्मादतिसृष्टिरतिसृष्ट्यांहास्यैतस्यांभवतियएवंवेद॥६॥

सैषाब्रह्मणःप्रजापतेरतिसृष्टिरात्मनोप्यतिशयाकासावित्याह।यच्छ्रेयसःप्रशस्यतरानात्मनःसकाशाद्यस्मादसृजतदेवांस्तस्माद्देवसृष्टिरतिसृष्टिःकथंपुनरात्मनोऽतिशयासृष्टिरित्यतआह।अथयद्यस्मान्मर्त्यःसन्मरणधर्मासन्नमृतानमरणधर्मिणोदेवान्कर्मज्ञानवह्निनासर्वानात्मनःपाप्मनओषित्वाऽसृजततस्मादियमतिसृष्टिरुत्कृष्टज्ञानस्यफलमित्यर्थः।।तस्मादेतामतिसृष्टिंप्रजापतेरात्मभूतांयोवेदसएतस्यामतिसृष्ट्यांप्रजापतेरस्यभवतिप्रजापतिरिवदेवस्रष्टाभवति॥६॥ ॥७॥ ॥ः॥ ॥श्रीराम॥ ॥

लादिति।नन्वन्नस्यसोमत्वेननानियमः।अग्नेरपिजलादिनासंहारात्।नचात्तुरग्नित्वेननियमः।सोमस्यापिकदाचिदिज्यमानत्वेनात्तृत्वात्तत्कुतोऽर्थबलमित्याशंक्याह।अग्निरपीति।देवसृष्टेरतिसृष्टित्वाऽभावशंकानुवादार्थोऽथशब्दः।ज्ञानस्योत्कृष्टत्वसूचनार्थंप्रजापतेःमरणधर्मत्ववर्णनं।। ॥७॥ ॥८॥ ॥

पूर्वोत्तग्रंथयोः संबंधं वक्तुं प्रतीकमादाय वृत्तं कीर्त्तयति। तद्धेत्यादिना। ननु संसारस्य मूलमेव नास्ति। स्वभाववादात्। प्रधानादेर्वा तन्मूलं। नाज्ञातं ब्रह्मेत्याशंक्य। श्रुतिस्मृतिभ्यां परिहरति
ऊर्ध्वमुत्कृष्टं कारणं। कार्यापेक्षया परमव्याकृतं मूलमस्येवेत्यूर्ध्वमूलः। हिरण्यगर्भोऽस्य मूलापेक्षयाऽवाक् शाखः। एवं गीतापि नेतव्या। अस्ति संसारस्य मूलं नेदममूलं भवि-
ष्यतीति श्रुतेः। तच्चाज्ञातं ब्रह्मैवेति श्रुतिस्मृतिप्रसिद्धमिति भावः॥ वृक्षस्य बीजावस्था लोके निर्दिशतीति संबंधः। अज्ञातं ब्रह्म जगतो मूलं। सति परमार्थज्ञाने तु केवलं

तद्धेदं तर्ह्यव्याकृतमासीत्॥ सर्वं वैदिकं साधनं ज्ञानकर्मलक्षणं कर्त्राद्यनेककारकापेक्षं प्रजापतित्वफलावसानं साध्यमेतावदेव यदेतद्व्या-
कृतं जगत्संसारोऽथैतस्यैव साध्यसाधनलक्षणस्य व्याकृतस्य जगतो व्याकरणात्प्राग्बीजावस्था या तां निर्दिदिक्षत्यंकुरादिकार्यानुमि-
तामिव वृक्षस्य। कर्मबीजोऽविद्याक्षेत्रो ह्यसौ संसारवृक्षः समूल उद्धर्तव्य इति॥ तदुद्धरणे हि पुरुषार्थपरिसमाप्तिस्तथा चोक्तं॥ ऊर्ध्व-
मूलोऽवाक्शाख इति काठके गीतासु च ऊर्ध्वमूलमधःशाखमिति पुराणे च ब्रह्मवृक्षः सनातन इति तद्धेति तत्र ह इदं तदिति बीजावस्थं ज-
गत्प्रागुत्पत्तेः। तर्हि तस्मिन्काले परोक्षत्वात्सर्वनाम्नाऽप्रत्यक्षाभिधानेनाभिधीयते॥ भूतकालसंबंधित्वादव्याकृतभाविनो जगतः सु-

तद्धेदं तर्ह्यव्याकृतमासीत्

खग्रहणार्थमितिहप्रयोगो हशब्दः एवं ह किल तदासीदित्युच्यमाने सुखं तां परोक्षामपि जगतो बीजावस्थां प्रतिपद्यते॥ युधिष्ठिरो ह किल रा-
जासीदित्युक्ते यद्वदिदमिति व्याकृतनामरूपात्मकं साध्यसाधनलक्षणं यथावर्णितमभिधीयते। तदिदंशब्दयोः परोक्षप्रत्यक्षावस्थज-
गद्वाचकयोः सामानाधिकरण्यादेकत्वमेव परोक्षप्रत्यक्षावस्थस्य जगतोऽवगम्यते। तदेवेदमिदमेव च तदव्याकृतमासीदित्यथैवं स-
ति नासत उत्पत्तिर्न सतो विनाशः कार्यस्येत्यवधृतं भवति॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ९ ॥ ⁘ ॥

30

ब्रह्मैवेति स्थितेनाऽज्ञातं ब्रह्मेत्याशयेनाह। समूल उद्धर्तव्य इति। यथा मूलमाश्रित्य वृक्षस्तिष्ठति तथा अव्याकृताख्यमीमांस्यमाश्रित्य जगत्तिष्ठतीति। ईश्वरो जगन्मूल-
मुच्यते। संप्रति प्रतीकमादाय पदानि व्याचष्टे तद्धेत्यादिना। अप्रत्यक्षाभिधानेनेति सर्वनाम्ना बीजावस्थं जगदभिधीयते। परोक्षत्वादिति संबंधः। कथं तस्य प-
रोक्षत्वं तत्राह। भूतेति। अव्या॰भावि। अत्यस्येति अव्याकृतभावि। तस्य। निपातार्थमाह। उक्तेति। एकत्वमपि नेयत्तो दाहरति। तदेवेति। एकत्वावगतिफलं कथयति। अ-
थेति। अंतर्भूतजगद्विशिष्टात्मरूपमासीत्। अथाऽच्यते जालकं प्राक् ऊर्णनाभिरासीत्तनतः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ⁘ ॥ ॥ ७ ॥

अथज्ञातंब्रह्मजगतोमूलमित्युक्तात्तद्विवर्त्तोजगदितिनिरूपयति।तदेवंभूतमिति। नाम०णेनसमर्पयस्यतच्चाहशीअभूत।असौशब्दःश्रौतोऽव्ययस्तेननेयः।जगद्रूपस्यकार्यस्यका
रणमंतरेणोत्पत्तिरुक्तेत्याशंक्याहसामर्थ्यादिति।असौनामास्येत्यसौनामायं।असावित्यव्ययं।सर्वनामसुपाठादुच्यतेसर्वनाम्नेति।पूर्वंव्याकृयतइतिभूतार्थवाचिलकारेण
निर्देशात्पुनःवर्त्तमानार्थवाचिलकारेणनिर्देशःकृतःव्याक्रियतइति।इदानींप्रवेशवाक्यस्थशब्दापेक्षितमर्थमाह।यदर्थइति।कांडद्वयात्मनोवेदस्यारंभोयस्यपरस्यप्र
तिपत्त्यर्थोविज्ञायते।कर्मकांडंहिस्वार्थानुष्ठानाहितचित्तशुद्धिद्वारातत्त्वज्ञानोपयोगीष्यते।ज्ञानकांडंतुसाक्षादेवतत्रोपयुज्यते।सर्वेवेदायत्पदमामनंतीतिचश्रूयते।
सएषइहप्रविष्टोदेहादावितियोजना।व्याकर्तुरात्मनःस्वभावतःशुद्धत्वेदृष्टांतमाह।सलिलादिति।व्याक्रियमाणयोर्नामरूपयोःस्वतोऽशुद्धत्वेदृष्टांतमाह।मलमिवेति।यथाफे

तदेवंभूतंजगदव्याकृतंसन्नामरूपाभ्यामेवनाम्नारूपेणैवचव्याकृयतव्याक्रियतेतिकर्मकर्तृप्रयोगात्तत्स्वयमेवात्मैवव्याक्रियतविआअक्रियतविस्पष्टं
नामरूपविशेषावधारणमर्यादंव्यक्तीभावमापद्यतसामर्थ्यादाक्षिप्तनियंतृकर्तृसाधनक्रियानिमित्तं।असौनामेतिसर्वनाम्नाऽविशेषाभिधानेननाममात्रं
व्यपदिशतिदेवदत्तोयज्ञदत्तइतिवानामास्येत्यसौनामायं।तथेदमितिशुक्लकृष्णादीनामविशेषइदंशुक्लमिदंकृष्णंरूपंवास्येतीदंरूपः।तदिदमव्याकृ
तंवस्त्वेतर्ह्येतस्मिन्नपिकालेनामरूपाभ्यामेवव्याकृयते।असौनामायमिदंरूपइति।यदर्थःसर्वशास्त्रारंभोयस्मिन्नविद्ययास्वाभाविक्याकर्तृक्रियाफलाध्यारोप
णाकृतायःकारणंसर्वस्यजगतोयदात्मकेनामरूपेसलिलादिवस्वच्छान्मलमिवफेनमव्याकृतेव्याकृयतेयश्चताभ्यांनामरूपाभ्यांविलक्षणःस्वतः

तन्नामरूपाभ्यामेवव्याक्रियतासौनामाऽयमिदंरूपइतितदिदमप्येतर्हिनामरूपाभ्यामेवव्याकृतेसौनामायमि
दंरूपइतिसएषइहप्रविष्टः

नित्यशुद्धबुद्धमुक्तस्वभावःसएषोऽव्याकृतेआत्मभूतेनामरूपेव्याकुर्वन्ब्रह्मादिस्तंबपर्यंतेषुदेहेष्विहकर्मफ
लाश्रयेष्वशनायादिमत्सुप्रविष्टः।नन्वव्याकृतंस्वयमेवव्याकृयतेत्युक्तंकथमिदमिदानीमुच्यते।परएवआत्माअव्याकृतंव्याकुर्वन्निहप्रविष्टइतिनैषदोषः।प
रस्याप्यात्मनोऽव्याकृतजगदात्मत्वेनविवक्षितत्वादाक्षिप्तनियंतृकर्तृक्रियानिमित्तंहिजगदव्याकृतंव्याकृयतेत्यवोचाम।इदंशब्दसामानाधिकरण्याच्चाव्याकृत
शब्दस्ययथेदंजगन्नियंत्राद्यनेककारकनिमित्तादिविशेषवद्व्याकृतंतथाऽपरित्यक्तान्यतमविशेषवदेवतदव्याकृतं।व्याकृताव्याकृतमात्रंतुविशेषोदृष्टश्चलो
केविवक्षातःशब्दप्रयोगोग्रामआगतोग्रामःशून्यइतिकदाचिद्ग्रामशब्देननिवासमात्रविवक्षायांग्रामःशून्यइतिप्रयोगोभवतिकदाचिन्निवासिजनविवक्षायां
ग्रामआगतइतिकदाचिदुभयविवक्षायामपिग्रामशब्दप्रयोगोभवतिग्रामंचनप्रविशेदितियथातद्वदिहापि ॥ ॥७॥ ७ ॥ २ ॥ ॥ ॥

नादिजलोत्थंतन्मात्रमेव।तथाऽज्ञानब्रह्मोत्थंजगद्ब्रह्ममात्रंतज्ज्ञानबाध्यंचेतिभावः।परमात्मास्रष्टासृष्टेजगतिप्रविष्टइत्यादिष्टमाक्षिपति।नन्विति।आक्षिप्तेति।कर्मकर्त्तरि
लकारोव्याकरणेसौकर्यापेक्षयाऽसत्यकर्त्तारंनिर्वहतीतिभावः।अव्याकृतशब्दस्यनियंत्रादिप्रकृतजगद्वाचित्वेहेत्वंतरमाह।इदंशब्देति।नियंत्रादीत्यादिशब्देनकर्तृकरणा
दिग्रहणं।निमित्तादीत्यादिशब्देनउपादानमुच्यते।विमतंनियंत्रादिसापेक्षकार्यत्वात्संमतवदित्यर्थः।कथंपुनरव्याकृतशब्देनकेवलजगद्वाचिनानियंत्रादिविशि
ष्टंजगदुच्यते।एकशब्दस्यानेकार्थत्वायोगादतआह।दृष्टश्चेति।निवासमात्रविशिष्टोनिवासिविवक्षायां।उभयविवक्षायांग्रामशब्दप्रयोगस्योदाहृतिमाह। ॥राम॥

निवासिजनविवक्षयां ग्रामप्रयोगस्य दाष्टांतिकं कथयति । तथा महानिति । पूर्वोक्तस्यैव विवरणं । यथेति । सर्पादेरस्मादिरूपेण स्थितभूतपंचकपरिणामत्वात्तत्र सहत्त्वं । पाषाणादौ या निम्नतानां निश्छिद्रता निसेयां परिणामः सर्पादिस्तद्रूपेण तत्र भूतानामनुप्रवेशवदपरिच्छिन्नस्यापि परस्य जीवाकारेण जगदादौ प्रवेशसिद्धिरित्यर्थः । अस्तु तर्हि परस्य माङ्गेनादिवत्पूर्वावस्थानत्यागेनावस्थानांतरसंयोगात्मा प्रवेशो नेत्याह । नचेति । प्रवेशश्रुत्या निरवयवत्वासिद्धिं शंकते । सावयव इति । प्रकारांतरेण प्रवेशोपपत्तिं शंकते । प्रतिबिंबेति ।

जगदिदं व्याकृतमव्याकृतं चेत्यभेदविवक्षायामात्मानात्मनोर्भवति व्यपदेशः । तथेदं जगदुत्पत्तिविनाशात्मकमिति केवलजगद्व्यपदेशः । तथा महानज आत्मा । स एष नेति नेत्यादि केवलात्मव्यपदेशः । ननु परेणाव्याकृतं व्याकृतं सर्वतो व्याप्तं सर्वदा जगत्स कथमिह प्रविष्टः परिकल्प्यते । अप्रविष्टो हि देशः परिच्छिन्नेन प्रवेष्टुं शक्यते । यथा पुरुषेण ग्रामादिर्नाकाशेन किंचिन्नित्यप्रविष्टत्वात् । पाषाणसर्पादिवद्धर्मांतरेणेति चेत् । अथापि स्यान्न पर आत्मा स्वेनैव रूपेण प्रविवेश किं तर्हि तत्स्थ एव धर्मांतरेणोपजायते । तेन प्रवेष्टृत्वमुपचर्यते । यथा पाषाणे सहजोऽन्तःस्थः सर्पो नालिकेरे वा तोयं न । ततः सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । यः स्रष्टा स भावांतरमनापन्न एव कार्यं सृष्ट्वा पश्चात्प्राविशदिति श्रूयते । यथा भुक्त्वा गच्छतीति भुजिगमिक्रिययोः पूर्वापरकालयोरितरेतरविच्छेदः विशिष्टश्च कर्त्ता तद्वदिहापि स्यात् । न तु तत्स्थस्यैव भावांतरोपजनन एतत्संभवति । न च स्थानांतरेण वियुज्य स्थानांतरसंयोगलक्षणः प्रवेशो निरवयवस्यापरिच्छिन्नस्य दृष्टः । सावयव एव प्रवेशश्रवणादिति चेत् । न दिव्यो ह्यमूर्त्तः पुरुषो निष्कलं निष्क्रियमित्यादिश्रुतिभ्यः सर्वव्यपदेश्यधर्मविशेषप्रतिषेधश्रुतिभ्यश्च । प्रतिबिंबप्रवेशवदिति चेन्न वस्त्वंतरेण विप्रकर्षानुपपत्तेः । द्रव्ये गुणवदिति चेन्नानाश्रितत्वात् नित्यपरतंत्रस्यैवाश्रितस्य गुणस्य द्रव्ये प्रवेश उपचर्यते । नच ब्रह्मणः स्वातंत्र्यश्रवणात्तथा प्रवेश उपपद्यते । फले बीजवदिति चेन्न सावयवत्ववृद्धिक्षयोत्पत्तिविनाशादिधर्मवत्त्वप्रसंगान्न चैवंधर्मत्वं ब्रह्मणोऽजोऽजर इत्यादिश्रुतिन्यायविरोधात् । अन्य एव संसारी परिच्छिन्न इह प्रविष्ट इति चेन्न सेयं देवतैक्षतेत्यारभ्य नामरूपे व्याकरवाणीति तस्या एव प्रवेशव्याकरणकर्तृत्वश्रुतेः । तथा तत्सृष्ट्वा तदेवानुप्राविशदिति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते त्वं कुमार उत वा कुमारी त्वं जीर्णो दंडेन वंचसि । पुरश्चक्रे रूपं रूपमिति च मंत्रवर्णान्न परादन्यस्य प्रवेशः । प्रविष्टानामितरेतरभेदात् परानेकत्वमिति चेन्नैको देवो बहुधान्निविष्टः एकः सन्बहुधा विचचार त्वमेकोऽसि बहूननुप्रविष्टः एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मेत्यादिश्रुतिभ्यः । प्रवेश उपपद्यते नोपपद्यत इति तिष्ठतु तावत् प्रविष्टानां संसारित्वात्तदनन्यत्वाच्च परस्य संसारित्वमिति चेन्नाशनायाद्यत्ययश्रुतेः । सुखित्वदुःखित्वादिदर्शनान्नेति चेन्न न लिप्यते लोकदुःखेन बाह्य इति श्रुतेः । प्रत्यक्षादिविरोधादयुक्तमिति चेन्नोपाध्याश्रयजनितविशेषविषयत्वात्प्रत्यक्षादेः ॥ ॥ ॥

परस्य सर्वप्रकारेण प्रवेशासंभवे श्रुतेरालंबनं वाच्यमित्याशंक्य पूर्वपक्षमुपसंहरति । अन्य एवेति । परस्य प्रवेशे प्रविष्टानां मिथो भेदात्तदभिन्नस्य तस्यापि नानात्वप्रसक्तिरिति शंकते । प्रविष्टानामिति । न परस्यानेकत्वं । एकत्वश्रुतिविरोधादिति परिहरति । नैकइत्यादिना । सिद्धांती त्वाभिसंधिमाह । नोपाधीति । उपाधिरंतःकरणं तदाश्रयत्वेन जनिता विशेषस्तदाभासस्तत्सुखदुःखादिविषयत्वात्प्रत्यक्षादेराभासत्वात्तेनात्मनि असंसारित्वागमस्य न विरोधोऽस्तीत्यर्थः ॥ ॥ ॥७॥ ॥श्री·श्री·श्री॥

किंच ॥ प्रत्यक्षादीनामनात्मविषयत्वादात्मविषयत्वाच्चागमस्य भिन्नविषयतया नानयोर्मिथो विरोधोस्तीत्यभिप्रेत्यात्मनो प्रत्यक्षाद्यविषयत्वे श्रुतिमुदाहरति ॥ न दृष्टेरिति ॥ स्वचिदाभासद्वारा दृष्टे र्दर्शनसामर्थ्यदातारं ॥ किं तर्हीति ॥ बुद्ध्याद्युपाधिविशिष्टात्मप्रतिच्छायाप्रतिबिंबः । तद्विषयमेवमनुव्यवहारमित्यादिविज्ञानमिति योजना ॥ आत्मनो दुःखित्वाभावे हेत्वंतरमाह ॥ अयमिति ॥ अयं देहोहमिति देहतद्धर्मादात्माध्यासदर्शनाद्देहविशिष्टस्यैव प्रत्यक्षविषयत्वान्न केवलस्यात्मनो दुःखादिसंसारोस्तीत्यर्थः ॥ किंच ॥ अस्थूलादिविशेषणगणस्मरणपुरःसरमन्यस्येव तस्यात्मत्वं दर्शयंती रात्मनः संसारित्वं वारयतीत्याह ॥ नान्यदिति ॥ किंच पादे मे दुःखं शिरसि मे दुःखमिति देहावयवावच्छिन्नत्वेनानुव्यतीतुलनात्वनिश्चयान्नात्मनि संसारित्वप्रमाणकमित्याह ॥ स्पृहेति ॥ भ्रांतिवशादात्मनः संसारित्वं शंकते ॥ आत्मनश्चेति ॥ सुखं तावदात्मार्थं अयमात्मनस्तु कामायेति सुखसाधनस्यात्मार्थत्वश्रुतेः ॥ अतस्तद्विनाभूतं दुःखमपि तद्वदेवेति आत्मनस्संसारित्वमयुक्तमित्यर्थः ॥ आविद्यकसंसारित्वानुवादिनात्मनो नात्मज्ञायानेनुत्वप्रतिपादकमात्मनस्तु कामायेत्यादि ॥ वाक्यमिति मत्वाह ॥ नेति ॥ तदाविद्यकसंसारानुवादीत्यत्र गमकमाह ॥ यद्वेति ॥ तर्कशास्त्रप्रामाण्यादात्मनः संसारित्वमिति शंकते ॥ तार्किकेति ॥ बुद्ध्यादिचतुर्दशगुणवानात्मेति तार्किकसमयस्तेन विरोधात्तस्यासंसारित्वमयुक्तम् ॥ तर्कोऽविरुद्धो

न दृष्टेर्द्रष्टारं पश्येर्विज्ञातारमरे केन विजानीयादविज्ञातं विज्ञात्रित्यादिश्रुतिभ्यश्च नात्मविषयं ज्ञानं किं तर्हि बुद्ध्याद्युपाध्यात्मप्रतिच्छायाविषयमेव सुखितोहं दुःखितोहमित्येवमादि प्रत्यक्षविज्ञानमयमहमिति विषयविषयिणोः समानाधिकरणोपचारात् नान्यदतोस्ति द्रष्टृ इत्यन्यात्मप्रतिषेधाच्च देहावयवविशेष्यत्वाच्च सुखदुःखयोर्विषयधर्मत्वं आत्मनस्तु कामायेत्यात्मार्थत्वश्रुतेरयुक्तमिति चेन्न यत्र वा अन्यदिव स्यादित्यविद्याविषयात्मार्थत्वाभ्युपगमात् तत्केन कं पश्येदित्यन्नेह नानास्ति तत्र को मोहः कः शोक इत्यादिना विद्याविषये तत्प्रतिषेधाच्च नात्मधर्मत्वं । तार्किकसमयविरोधादयुक्तमिति चेन्न युक्त्याप्यात्मनो दुःखित्वानुपपत्तेर्न हि दुःखेन प्रत्यक्षविषयेण आत्मनो विशेष्यत्वं प्रत्यक्षविषयत्वादाकाशस्य शब्दगुणत्ववदात्मनो दुःखित्वमिति चेन्नैकप्रत्ययविषयत्वानुपपत्तेर्न हि सुखग्राहकेण प्रत्यक्षविषयेण प्रत्ययेनानित्यानुमेयस्यात्मनो विषयीकरणमुपपद्यते । तस्य च विषयीकरणे आत्मन एकत्वात् विषय्यभावप्रसंगः । एकस्यैव विषयविषयित्वं दीपवदिति चेन्न । युगपदसंभवादात्मन्यंशानुपपत्तेश्चैतेन विज्ञानस्य ग्राह्यग्राहकत्वं प्रत्युक्तं । प्रत्यक्षानुमानविषययोश्च दुःखात्मनोर्गुणगुणित्वेनानुमाने । दुःखस्य नित्यमेव प्रत्यक्षविषयत्वात् रूपादिसामानाधिकरण्याच्च मनःसंयोगजत्वेप्यात्म ।

हि सिद्धांतो भवतीत्यर्थः सर्वतर्काविरोधी वा । कतिपयतर्काविरोधी वा सिद्धांतः । नाद्यः । तार्किकसिद्धांतस्यापि मिथो वैदिकतर्कैश्च विरोधादसिद्धिप्रसंगात् । द्वितीयश्चेत्तत्तर्काऽविरोधादात्माऽसंसारित्वसिद्धांतोपि सिद्ध्येदित्यभिसंधायाह । न युक्त्यापीति । दुःखादिरात्मनो धर्मो न भवति वेद्यत्वाद्रूपादिवदित्याह । नहीति । प्रत्यक्षाविषयो नाप्रतीयते विषयाऽदुःखाऽविशेष्यत्वमयुक्तं प्रत्यक्षाप्रत्यक्षयोः शब्दाकाशयोरिव दुःखात्मनोरपि गुणगुणित्वसंभवादिति शंकते । आकाशस्येति । यत्र धर्मधर्मिभावस्तत्रैकतानगम्यत्वं दृष्टं यथा शुक्लो घटः इति । तद्व्यापकं व्यावर्तमानं दुःखात्मनोर्धर्मधर्मित्वं व्यावर्तयति । शब्दाकाशयोरपि गुणगुणिभावो नास्माकं मतः । शब्दतन्मात्रमाकाशमिति स्थितिरित्याशयेनाह ॥ नैकेति । कथं तदनुपपत्तिस्तत्राह । नहीति । नित्यानुमेयेति । जरत्तार्किकमतानुसारेणास्मत्समतानुसारेण वोक्तम् ॥ तस्मा[illegible]ग्राहकः कः स्यात् । दीपस्य प्रकाशहेतुत्वेन विषयविषयित्ववदेकस्यैवात्मनो द्रष्टृदृश्यत्वसिद्धेरनुभावो नास्तीति शंकते । एकस्येति । दीपस्य यथा ग्राह्यग्राहकभावः । न युगपदिति । क्रियायां गुणत्वं कर्तृत्वं क्रियायां प्राधान्यं कर्मत्वं अतो युगपदेकक्रियां प्रति एकस्य साकल्येन गुणप्रधानत्वायोगान्नैवमित्यर्थः ॥ प्रत्यक्षविषये दुःखेति तेनाप्रत्यक्ष । आत्मा एकस्यानित्यत्वात्मनः संयोगादात्मनि दुःखादयोनन्वयोदोषिकागुणा भवंतीति तद्दूषयति । मनःसंयोगेति । दुःखस्यात्मनि मनःसंयोगजत्वाभ्युपगमेपि मनोवदात्मनः संयोगित्वात्सावयवत्वादिप्रसंगादात्मत्वमेव न स्यादित्यर्थः ॥ ॥ ॥७॥ ॥

आकाशेव्यभिचारमाशंक्याह।नचेति।विक्रियावतोद्रव्यस्यावयवान्यथा।त्वंवाच्यं।तदेवतस्याऽनित्यत्वं।अत्यंताभावस्यप्रामाणिकदुर्वचत्वादितिपरिहरति।नद्रव्यस्येति।परस्यप्रवेशोक्तां
दोषपरंपरामपाकृत्यतत्प्रवेशस्वरूपंनिरूपयति।जलेति।यथाजलेसूर्यादेःप्रतिबिंबलक्षणःप्रवेशोदृश्यतेतेनतथात्मनोपिकार्येकाल्पनिकःप्रवेशइत्यर्थः।त्वाभिप्रेतंप्रवेशंप्रतिपादय

विदुःखस्यसावयवत्वक्रियावत्त्वानित्यत्वप्रसंगान्नह्यविकृत्यसंयोगिद्रव्यंगुणाःकश्चिदुपपन्नःप्रवेशोदृष्टःकश्चित्।नचनिरवयवंविक्रियमाणंदृष्टंक्वचिद
नित्यगुणाश्रयंवानित्यं।नचाकाशआगमवादिभिर्नित्यतावगम्यते।नचान्योदृष्टांतोस्ति।दुःखेविक्रियमाणमपितत्त्वंत्यजतिनित्यमेवेतिचेन्नद्रव्य
स्याऽवयवान्यथात्वव्यतिरेकेणविक्रियानुपपत्ते।सावयवत्त्वेपिनित्यत्वमितिचेन्नसावयवस्यावयवसंयोगपूर्वकत्वेसतिविभागोपपत्ते।वज्रादिष्व
दर्शनान्नेतिचेन्नानुमेयत्वात्संयोगपूर्वत्वस्यतस्मान्नात्मनोदुःखाद्यनित्यगुणाश्रयत्वोपपत्तिः।परस्यादुःखित्वेन्यस्यचदुःखित्वेनोऽभावेदुःखोपशम
नायशास्त्रारंभानर्थक्यमितिचेन्नाविद्याध्यारोपितदुःखित्वभ्रमापोहार्थत्वादात्मनिप्रकृतसंख्याऽपूरणभ्रमापोहवत्कल्पितदुःख्यात्माभ्युपग
माच्चजलसूर्यादिप्रतिबिंबवदात्मप्रवेशश्चप्रतिबिंबवद्व्याकृतेकार्यउपलभ्यत्वंप्रागुत्पत्तेरनुपलब्धआत्मापश्चात्कार्येचसृष्टेव्याकृतेबुद्धेरंतर
रुपलभ्यमानःसूर्यादिप्रतिबिंबवज्जलादौकार्यंसृष्ट्वाप्रविष्टइवलक्ष्यमाणोनिर्दिश्यतेसएषइहप्रविष्टःतत्सृष्ट्वातदेवानुप्राविशदेतमेवसीमानं
विदार्यैतयाद्वाराप्रापद्यत।सेयंदेवतैक्षतहंताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्येत्येवमादिभिः।नतुसर्वगतस्यनिरवयवस्यआत्म
नोदिग्देशकालांतरापक्रमणप्राप्तिलक्षणःप्रवेशःकदाचिदप्युपपद्यते।नचपरादात्मनोन्योस्तिद्रष्टानान्यदतोस्तिदृष्टानान्यदतोस्तिश्रोत्रि
त्यादिश्रुतेरित्यवोचाम।उपलब्ध्यर्थत्वाच्चसृष्टिप्रवेशस्थित्यप्ययवाक्यानामुपलब्धेःपुरुषार्थश्रवणादात्मानमेवावेदत्तस्मात्तत्सर्वमभ
वत्ब्रह्मविदाप्नोतिपरंसयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवत्याचार्यवान्पुरुषोवेद।तस्यतावदेवचिरमित्यादिश्रुतिभ्यः।ततोमांतत्त्वतोज्ञा
त्वाविशतेतदनंतरं।तदग्र्यंसर्वविद्यानांप्राप्यतेह्यमृतंततः।इत्यादिस्मृतिभ्यश्च।भेददर्शनापवादाच्चसृष्ट्यादिवाक्यानामात्मैकत्वदर्शनार्थ
परत्वोपपत्तिः।तस्मात्कार्यस्थस्योपलभ्यत्वमेवप्रवेशइत्युपचर्यते॥ ॥रामरामरामराम॥ ॥राम॥ ॥रामरामरामः

32

शेषंप्रवेशंपराचष्टे।नत्विति।कुतश्चिद्दिशोदेशात्कालाद्वापक्रमणेनदिगंतरेदेशांतरेकालांतरेचप्राप्तिलक्षणइतियावत्॥ः॥यत्तुपरस्मादन्यस्यप्रवेष्टृत्वमिति।तत्राह।नचेति।
अथेदंप्रवेशादि।व्याकृतेविद्यमानवस्तुकिमित्याविद्यंकल्प्यतेतत्राह॥उपलब्धीति॥आत्मज्ञानार्थत्वेनप्रवेशादीनांकल्पितत्वात्तद्वाक्यानांनस्वार्थेपर्यवसानमित्यर्थः॥ ॥७॥

कापुनरस्यमर्यादाप्रवेशस्येत्याशंक्याह॥आनखाग्रेभ्यइति॥ तत्रप्रवेशिनत्वंक्षुरस्यकथमित्यतआह॥ अंतःस्थउपलभ्यइति॥दार्ष्टांतिकमाह॥यथेत्यादिना॥ आत्मनोजाग्रत्स्वप्नयोर्देहेद्वयीवृत्तिः॥स्वा
पेतुसामान्यवृत्तिरित्यवान्तरविभागमाह॥नहीति॥ अवस्थाद्वयमत्रस्यार्थः॥नकेवलविशेषवृत्तिरेवतत्रोपलभ्यो किंतुसामान्यवृत्तिरपीतिचकारार्थः॥अवस्थान्तरेतुसैवेत्यपितस्यैवार्थः॥ द्वयीवृत्तिः
जीवरूपेणवृत्तिः परमात्मरूपेणचवृत्तिः॥ स्वापेतुसुषुप्तौतुसामान्यवृत्तिः॥ परमात्मरूपेणवृत्तिः॥ अवस्थाद्वयं॥ जाग्रत्स्वप्नाख्यं॥ अवस्थान्तरेसुषुप्तौतुसैवपरमात्मरूपेणवृत्तिरेवइत्यपितः
स्यचकारस्यार्थः॥ ॥तस्मादिति॥ यस्मादुभयवृत्तिरात्मनोदृश्यतेशरीरेतस्मात्तत्रैवजलसूर्यवदाविश्य प्रविष्टोस्मीतियोजना॥ व्याकृतौजगतः आत्मानंपृथक्कर्त्तुंतंनपश्यंतीति

आनखाग्रेभ्योनखाग्रमर्यादंआत्मनश्चैतन्यमुपलभ्यते॥ तत्रकथमिवप्रविष्टइत्याह॥यथालोकेक्षुरधानेक्षुरोधीयतेऽस्मिन्नितिक्षुरधानंतस्मि
न्नापितोपस्कराधानेक्षुरोन्तःस्थोयथोपलभ्यतेऽवहितःप्रवेशितःस्याद्यथावाविश्वंभरोऽग्निर्विश्वस्यभरणाद्विश्वंभरःकुलायेनीडेऽग्निःकाष्ठा
दाववहितःस्यादित्यनुवर्त्तते॥ तत्रहिसमथ्यमानउपलभ्यतेयथाचक्षुरःक्षुरधानएकदेशेवस्थितोयथावाग्निःकाष्ठादौसर्वतोव्याप्याव
स्थितएवंसामान्यतोविशेषतश्चदेहंसंव्याप्यावस्थितः आत्मातत्रहिसप्राणनादिक्रियावान्दर्शनादिक्रियावांश्चोपलभ्यते॥तस्मात्तत्रैव

आनखाग्रेभ्योयथाक्षुरःक्षुरधानेऽवहितस्याद्विश्वंभरोवाविश्वंभरकुलायेतंनपश्यंतकृत्स्नोहिस

प्रविष्टः तमात्मानंप्राणनादिक्रियाविशिष्टंनपश्यंतिनोपलभंते॥ नन्वप्राप्तप्रविशेषोयंतंनपश्यंतीतिदर्शनस्याप्रकृतत्वान्नैषदोषः॥ सृष्ट्या
दिवाक्यानामात्मैकत्वप्रतिपत्त्यर्थपरत्वात्प्रकृतमेवतस्यदर्शनंरूपंरूपंप्रतिप्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणायेतिमंत्रवर्णात्तत्रप्रा
णनादिक्रियाविशिष्टस्यदर्शनेहेतुमाह॥अकृत्स्नोसमस्तोहियस्मात्सप्राणनक्रियाविशिष्टः॥ ॥ ॥श्रीरामरामश्रीरामरामः॥

वाक्यंतद्व्याचष्टे॥ तमात्मानमितिविशिष्टंपश्यंतोपिकेवलमात्मानंनपश्यंति॥ तन्नामरूपाभ्यांसएवइत्यादिवाक्यानांज्ञातार्थत्वेमानमाह॥ रूपमिति॥ विशिष्टदर्श्यद
र्शनेपिपूर्णस्यादर्शनेहेतुः किमनंतरंवाक्यमित्याह॥ तेषामिति॥ प्रतिज्ञावाक्यार्थेस्थितेसतीतियावत्॥ तस्मात्तद्दर्शनेपिपूर्णस्याऽदर्शनेनमितिशेषः॥ अपिपूर्णस्यात्मनोऽदर्श
नेहेतुमाह॥ अकृत्स्नोहिसइत्यनंतरंवाक्यमित्यर्थः॥ केवलप्राणनक्रियायाःकेवलवदनक्रियायाः वाउपाधिद्वाराधिवर्त्तकमात्मानंयेपश्यंतितेयाथात्म्येनात्मानंन
जानंतीत्यर्थः॥ ॥ ॥श्रीरामश्रीरामश्रीरामश्रीरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामः॥श्रीगुरुशरणार्प्पणमस्तु॥

विशिष्टस्यापिपूर्णत्वमात्मनोऽन्यथाप्राणनादिकर्तृत्वायोगादितिशंकते।कुतइति।प्राणनादिक्रियाकर्तृप्राणादिभिःसंहतत्वात्पूर्णोनभवतीत्युत्तरवाक्येनोत्तरमाह।उच्यतइति।आत्मनिप्राण
शब्दप्रवृत्तिमुपपादयति।प्राणन्नेति।प्राणनक्रियाकर्तृत्वादात्माप्राणउच्यते।प्राणितीतिव्युत्पत्तेरितियोजना॥कृत्स्नश्चेदिंद्रियव्यापाराभ्यामनुक्रान्तव्यापारेणोपलब्ध्यात्मनःस्वरूपत्वा
दपरिच्छेदोनस्यादितिसंबंधविनोपलक्षणायोगादित्याशंक्याह।नामरूपेत्यादिना।प्रकाश्यप्रकाशातिरिक्तज्ञेयाभावात्तदुपलंभेचक्षुःश्रोत्रयोरिवत्वगादेरपिकरणत्वादेका
र्थत्वात्तत्सर्वथाउपलक्षणसंभवादात्मनःस्वरूपत्वादिसिद्धिरित्यर्थः।प्राणन्नेव०वःप्राणवागादिरुपाधिद्वारेणात्मनिप्रदर्शितोभवति।पं नामरूपयोःसाधनंग्राहकं।विज्ञानं
विज्ञानशक्तिः।तथाप्युक्तकर्मेन्द्रियव्यापारेणाकृत्स्नव्यापारोपलक्षणादात्मनोनगाढत्वादिपरिच्छेदःसंगच्छते।विनामेवधर्मुपलक्षणमित्याशंक्याह।क्रियाचेति।स

कुतःपुनरकृत्स्नत्वमित्युच्यते।प्राणन्नेवप्राणनक्रियामेवकुर्वन्प्राणोनामप्राणसमाख्यःप्राणाभिधानोभवति।प्राणनक्रियाकर्तृत्वाद्धिप्राणःप्राणितीत्युच्यते॥
नान्यांक्रियांकुर्वन्यथालावकःपावकइत्यादितद्वत्क्रियांतरविशिष्टस्यानुपसंहारादकृत्स्नोहिसः।तथावदन्वदनक्रियांकुर्वन्वक्तीतिवाक्पश्यंश्चक्षुश्चष्टेद्रष्टा
इतिशृण्वञ्छृणोतीतिश्रोत्रं।प्राणन्नेवप्राणोवदन्वागित्याभ्यांक्रियासमुद्भवःप्रदर्शितोभवति।पश्यंश्चक्षुःशृण्वञ्छ्रोत्रमित्याभ्यांविज्ञानसमुद्भवःप्रदर्शि
तो।नामरूपविषयत्वाद्विज्ञानशक्तेः।श्रोत्रचक्षुषीविज्ञानस्यसाधनेविज्ञानंनामरूपसाधनंनहिनामरूपव्यतिरिक्तंविज्ञेयमस्तितयोश्चोपलंभेकरणंच
क्षुःश्रोत्रे।क्रियाचनामरूपसाध्याप्राणसमवायिनीतस्याःप्राणाश्रयायाअभिव्यक्तौवाक्करणंतथापाणिपादपायूपस्थाख्यानिसर्वेषामुपलक्षणा
र्थोवागेतदेवहिसर्वमाहृतंत्रयंवाइदंनामरूपकर्मेतिहिवक्ष्यति।मन्वानोमनइति।ज्ञानशक्तिविकासानांसाधारणंकरणंमनःमनुतेनेनेति।पुरुषस्तुक

प्राणन्नेवप्राणोनामभवतिवदन्वाक्पश्यंश्चक्षुःशृण्वञ्छ्रोत्रंमन्वानोमनस्तान्यस्यैतानिकर्मनामान्येवसयोत
एकैकमुपास्तेनसवेदाकृत्स्नोह्येषोतएकैकेनभव॥

र्तासन्मन्वानोमनइत्युच्यते।तान्येतानिप्राणादीन्यस्यात्मनःकर्मनामानिकर्मजानिनामान्येवनतुवस्तुमात्रविषयाण्यतोनकृत्स्नात्मवस्तुद्योतकान्येवंह्यसावात्माप्राणनादिक्रि
ययातत्क्रियाजनितप्राणादिनामरूपाभ्यांव्याक्रियमाणोऽवधार्यमाणोऽपिसयोऽतोऽस्मात्प्राणनादिक्रियासमुदायादेकैकंप्राणंचक्षुर्वेतिवाविशिष्टमनुपसंहृते
तरविशिष्टक्रियात्मकंमनसाऽयमात्मेत्युपास्तेचिन्तयतिनसवेदब्रह्मयस्मादकृत्स्नोऽसमस्तोहियस्मादेषआत्माअस्मात्प्राणप्राणनादिसमुदाया
तःप्रविभक्तएकैकेनविशेषणेनविशिष्टइतरधर्मान्तराऽनुपसंहाराद्भवति॥यावदयमेवंवेदपश्यामिशृणोमिस्पृशामीतिवास्वभावप्रवृत्तिविशिष्टं
वेदतावदञ्जसाकृत्स्नमात्मानंनवेद। ॥रामरामरामरामरामराम। — ॥७॥ — ॥श्रीकृष्णार्पणमस्तु। — ॥ — ॥७॥ — ॥श्रीतारामरामराम

वंक्रियानामरूपवद्व्यापाराप्राणाश्रयावा।तत्रप्राणाश्रयत्वमभिव्यक्तिविषयोवाचाप्राणक्रियाभिव्यंजकत्वंवाचोहस्तादीनांप्राणाश्रयादानादिव्यंजकत्वात्।तस्मादेकाश्रयाभिव्यंजकत्वात्पादादेः
पलक्षणसंभवादात्मनोऽगदत्वादिसिद्धिरित्यर्थः।शक्तिकर्याद्भवोक्त्याप्रतीतिःसमस्तसंसारस्याध्यात्मोविवक्षितइत्याह।एतदेवेति।एतदेवनामरूपकर्माणि।प्रती
चिज्जीवात्मनि।कर्मेन्द्रियाणां।कारणधर्मिकस्यमनःशब्दस्यकथमात्मनिप्रवृत्तिरित्याशंक्यव्युत्पत्तिभेदमाह।ज्ञानशक्तीत्यादिना।मनःइत्यत्रमनोऽभिधानेइन्द्रियेविवक्षिते
करणेऽसुन्प्रत्ययः।आत्मविवक्षायांकर्तरीत्यर्थः।आत्माभिधानेविशेषमाह।तानीति।कर्मभिःकृतानिनामानिउपाधीकृतानिनामानीत्यर्थः।एवंहीति।प्राणादीनांकर्म
नामत्वसिद्धिरितियावत्।अवधार्यमाणेऽपिनकृत्स्नोदृष्टःस्यादितिशेषः।अकृत्स्नदर्शिनोऽप्यात्मदर्शित्वमाशंक्याह।सयइति।क्रियावत्तत्समुदायात्।अतःइत्यस्यार्थकथनंअस्मादिति॥

आत्मेत्येवोपासीतेतिविद्यासूत्रं विधिस्पर्शो वि
नाकर्मस्पर्शं विना।३

आत्मेति व्याचष्टे। प्राणादीति। यस्मिन्पक्ष इति नित्यप्राप्तपक्षोक्तिः। उपाधिद्वारा प्राणनादिक्रियया प्राणादिरिति सर्वो व्याख्या द्रष्टव्या। तस्मिन्पक्षे पूर्वोक्तदोषं गृहीत्वं दर्शयति स तथेति। महताविनिश्चआः संयुक्तस्य। स्वस्वरूपमात्रेणावर्तमानः। कथं तर्हि विशेषोपसंहारीत्यत तेनात्मेति सुनकृतत्वःस्यादित्याह। वस्तुमात्रेति। स्वतोऽस्य प्राणनादिसंबंधे सं भवति किमित्युपाधिसंबंधेन इत्याशंक्याह। नथेति। स्वतन्त्वावस्थानमात्रेणानात्मनाकार्यकरणान्यप्रत्युपभूतेनेत्यर्थः। विशेषा इति। स्वावभासैव भाषितान्तःकरणेन्द्रियकृतकर्मवशानिखिलजगद्व्युपभूता जीवा इत्यर्थः। विद्यासूत्रं विधिस्पर्शो विना विवक्षितेर्थे व्याख्याय अपूर्वविधिरयमिति पक्षमुत्थापाह आत्मेत्येवेति। अत्यन्ताप्राप्तेर्थे ह्यपूर्वविधिः यथा स्वर्गकामो अग्निहोत्रं जुहुयादिति। नायं तथा। पक्षे प्राप्तत्वादात्मोपासनस्यातस्य आत्मज्ञानस्य:

कथं पुनः पश्यन्नेव स्यादित्याहात्मेत्येव आत्मा इति प्राणादीनि विशेषणानि यान्युक्तानि तानि यस्य आप्नुवंतान्यात्मेत्युच्यते। स तथा कृत्स्नविशेषोपसंहारी सन्कृत्स्नो भवति वस्तुमात्ररूपेण हि प्राणाद्युपाधिविशेषक्रियाजनितानि विशेषणानि व्याप्नोति। तथा च वक्ष्यति ध्यायतीव लेलायतीवेति तस्मादात्मेत्येवोपासीत एवं कृत्स्नो ह्यसौ स्वेन वस्तुरूपेण गृह्यमाणो भवति। कस्मात्कृत्स्न इत्याह। अत्रास्मिन्नात्मनि हि यस्मान्निरुपाधिके जलसूर्यप्रतिबिंबभेदा इवादित्ये प्राणाद्युपाधिकृता विशेषाः प्राणादिकर्मजनामाभिधेया यथोक्ता ह्येते एकमभिन्नतां भवंति प्रतिपद्यंते। अतः आत्मेत्येवोपासीतेति। ।आत्मेत्येवोपासीतेति नापूर्वविधिः पक्षे प्राप्तत्वात् यत्साक्षादपरोक्षाद्ब्रह्म कतम आत्मेति योऽयं विज्ञानमय इत्येवमाद्यात्मप्रतिपादनपराभिः श्रुतिभिरात्मविषयं विज्ञानमुत्पादितं तत्रात्मस्वरूपविज्ञानेनैव तद्विषयानात्माभिमानबुद्धिः कारकक्रियाफलाध्यारोपणात्मिका अविद्या निवर्तिता तस्यां निवर्तितायां कामादिदोषानुपपत्तेरनात्मचिंतानुपपत्तेः परिशेष्यादात्मचिंतैव तस्मात्तदुपासनमस्मिन्पक्षे न विधातव्यं प्राप्तत्वान्निसुतावत्पाक्षिकात्मोपासनाप्राप्तिर्नित्या वा इति अपूर्वविधिः स्यात् ज्ञानो

आत्मेत्येवोपासीतात्र ह्येते सर्व एकं भवंति॰

पासनयोरेकत्वे सत्यप्राप्तत्वान्न स वेदेति विज्ञानं प्रकृत्य आत्मेत्येवोपासीतेत्यभिधानाद्वेदोपासनशब्दयोरेकार्थता वगम्यते अनेन ह्येतत्सर्वं वेदात्मानमेवावेदित्यादिश्रुतिभ्यश्च विज्ञानमुपासनं। तस्य च प्राप्तत्वाद्विध्यर्थत्वं। न च स्वरूपान्वाख्याने पुरुषप्रवृत्तिरुपपद्यते। तस्मादपूर्वविधिरेवायं कर्मविधिसामान्याद्यथा यजेत जुहुयादित्यादयः कर्मविधयोऽनंतरस्यात्मेत्येवोपासीतात्मेवारे द्रष्टव्य इत्याद्यात्मोपासनविधेर्विशेषोऽवगम्यते। मानसक्रियात्वाद्विज्ञानस्य यथा यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्निति यथा मानसी क्रिया विधीयते। तथात्मेत्येवोपासीत मंतव्यो निदिध्यासितव्य इत्याद्या क्रियैव विधीयते ज्ञानात्मिका तथा चावोचाम वेदोपासनशब्दयोरेकार्थत्वमिति भावनांशत्रयोपपत्तेश्च यथा हि यजेतेत्यस्यां भावनायां विधीयमानायां किं केन कथमिति भाव्याद्याकांक्षापनायकारणमंशत्रयमवगम्यते। तथोपासीतेत्यस्यामपि भावनायां विधीयमानायां किमुपासीत केनोपासीत कथमुपासीतेत्यस्यामाकांक्षायामात्मानमुपासीत मनसा त्यागब्रह्मचर्यशमदमोपरमतितिक्षादीतिकर्तव्यतासंयुक्त इत्यादिशास्त्रेणैव स॰

पक्षप्राप्तिश्च:ऽ तन्मात्रिश्च पुरुषविशेषोपसर्पणं चारोवसनेनस्पष्टीभविष्यतीत्यर्थः। इदानीमात्मज्ञानस्याविधेयत्वख्यापनार्थं वस्तुस्वभावालोचनया नित्यप्राप्तिमाह। यत्साक्षादिति। अपूर्वविधिवादी शंकते। तिष्ठतु तावदित्यादिना। सर्वथा स्वभावतो विषयप्रवणानीति। नात्मज्ञानवार्तामपि न स्पृशते। न दृष्टत्वादप्राप्तत्वादात्मज्ञानं भवत्यपूर्वविधिरिति भावः। विशिष्टस्याधिकारिणः शास्त्रं ज्ञानशब्दादवसिद्धमिति कथं न प्राप्तिरित्याशंक्याह। ज्ञानेनेति। यदिज्ञानं श्रुतं तदुपास्यमेवेति योजना। इतश्च तस्मिन्नवश्यमविधिरित्याह। न चेति। शब्दाद्दुसारेणाविशेषप्रसिद्धेर्धानि यथेति। विशेषा इति। स्वावभासभासितान्तःकरणेन्द्रियकृतकर्मवशानिखिलजगद्व्युपभूता जीवा इत्यर्थः। सं प्रत्यर्थांसविशेषमाह। मानसेति। यदिक्रियाविधीयते कथं ज्ञानात्मिकेति विशेष्यते तत्राह। न थेति। इतश्चात्मोपासनविधिरस्ती

त्याह। भावनेति। याद्याद्याकांक्षापनयकारणमंशत्रयं। ।

अपूर्वविधित्वेनआत्मोपासनंवाच्यं।।१ एकोतिअपूर्वविधिपक्षआदौ।१

आत्मोपासनंविधेयमितिपक्षमुक्त्वापक्षांतरमाह।अपरइति।पक्षद्वयेप्राप्तेप्रथमपक्षंप्रत्याह।नार्थांतराभावादिति।नार्थांतरेत्यस्यव्याख्यानंनचात्मेत्यादि।कर्त्तव्यांतराभावेपिवाक्यजन्यविज्ञानमे
वविधेयंस्यादित्याशंक्याह।नहीति।कर्मकारित्वं।विज्ञानादन्यत्करणीयंनास्तीतिनापूर्वविधिः।वर्त्तमाना।दृष्टांतरेपिवाक्यार्थज्ञानव्यतिरेकेणपुरुषप्रवृत्तिरसिद्धेत्याशंक्याह।।

मर्प्यतेऽज्ञातत्वं।यथाचक्रतौदर्शपूर्णमासादिप्रकरणस्यदर्शपूर्णमासादिविध्युद्देशत्वेनोपयोगएवमुपनिषदात्मोपासनप्रकरणस्यात्मोपासनविध्युद्देशत्वेने
वोयोगोनेतिनेत्यस्थूलमेकमेवाद्वितीयमशनायाद्यतीतइत्येवमादिवाक्यानामुपास्यात्मस्वरूपविशेषसमर्पणेनोपयोगः।फलंचमोक्षोऽविद्यानिवृ
त्तिर्वाअपरेवर्णयंत्युपासनेनात्मविषयंविशिष्टंविज्ञानांतरंभावयेत्तेनात्मायंज्ञायते।अविद्यानिवर्त्तकंचनदेवनात्मविषयंवेदवाक्यजनितंवि
ज्ञानमित्येतस्मिन्नर्थेवचनान्यपिविज्ञायप्रज्ञांकुर्वीतद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्यःसोन्वेष्टव्यःसविजिज्ञासितव्यइत्यादीनिनार्थांतराभावा
त्।नचात्मेत्येवोपासीतेत्यपूर्वविधिः।कस्मादात्मस्वरूपकथनानात्मप्रतिषेधवाक्यजनितविज्ञानव्यतिरेकेणार्थांतरस्यकर्त्तव्यस्यमानसस्यवा
ह्यस्यचाभावात्तत्रहिविधेःसाफल्यंयत्रविधिवाक्यश्रवणमात्रजनितविज्ञानव्यतिरेकेणपुरुषप्रवृत्तिर्गम्यतेयथादर्शपूर्णमासाभ्यांस्वर्गकामोयजे
तेत्येवमादौ।नहिदर्शपूर्णमासविधिवाक्यजनितविज्ञानमेवदर्शपूर्णमासानुष्ठानंतच्चाधिकाराद्यपेक्षानुभावि।ननुनेतिनेत्यात्मप्रतिपादकवाक्य
जनितविज्ञानव्यतिरेकेणदर्शपूर्णमासादिवत्पुरुषव्यापारःसंभवति।सर्वव्यापारोपशमहेतुत्वात्तद्वाक्यजनितविज्ञानस्य।नह्युदासीनविज्ञानंप्र
वृत्तिजनकमब्रह्माऽनात्मविज्ञाननिवर्तकत्वाच्चैकमेवाद्वितीयंतत्त्वमसीत्येवमादिवाक्यानां।नचतन्निवृत्तौप्रवृत्तिरुपपद्यतेविरोधात्।वाक्यजनित
विज्ञानमात्रान्नाब्रह्मानात्मविज्ञाननिवृत्तिरितिचेन्नतत्त्वमसिनेतिनेत्यात्मेवेदमेकमेवाद्वितीयंब्रह्मैवेदममृतंनान्यदतोस्तिद्रष्टृतदेवब्रह्मत्वंविद्धी
मादिवाक्यानांतद्वादित्वाद्द्रष्टव्यविधेर्विषयसमर्पकाण्येतानीतिचेन्नार्थांतराभावादित्युक्तोत्तरमेतदात्मवस्तुस्वरूपसमर्पकैरेववाक्यैस्तत्त्व
मसीत्यादिभिःश्रवणकालएवतद्दर्शनस्यकृतत्वाद्द्रष्टव्यविधेर्नानुष्ठानांतरंकर्त्तव्यमित्युक्तोत्तरमेतदात्मस्वरूपाऽन्वाख्यानमात्रेणात्मविज्ञानंवि
धिमंतरेणनप्रवर्त्ततइतिचेन्नात्मवादिवाक्यश्रवणेनात्मविज्ञानस्यजनितत्वात्किंभोःकृतस्यकरणात्तच्छ्रवणेपिनप्रवर्त्ततइतिचेन्नाऽवस्थाप्रसं
गाद्यथात्मवादिवाक्यार्थश्रवणेपिविधिमंतरेणनप्रवर्त्ततेतथाविधिवाक्यार्थश्रवणेपिविधिमंतरेणनप्रवर्तिष्यतइतिविध्यंतरापेक्षातथात
दर्थश्रवणेपीत्यनवस्थाप्रसंगः।नवाक्यजनितात्मज्ञानस्मृतिसंततेःश्रवणविज्ञानमात्रादर्थांतरत्वमितिचेन्नार्थप्राप्तत्वाद्यदेवात्मप्रतिपादकवा
क्यश्रवणादात्मविषयंविज्ञानमुत्पद्यतेतदेवतदुत्पद्यमानंतद्विषयमिथ्याज्ञानंनिवर्त्तयदेवोत्पद्यते।आत्मविषयमिथ्याज्ञाननिवृत्तौचतत्प्रभवाः
स्मृतयोनभवंतिस्वाभाविक्योऽनात्मवस्तुभेदविषयाः।अनर्थत्वावगतेश्च।आत्मावगतौहिसत्यामन्यद्वस्तुअनर्थत्वेनावगम्यते।अनित्यदुःखा
शुद्ध्यादिबहुदोषवत्त्वादात्मवस्तुनश्चतद्विलक्षणत्वात्।तस्मादनात्मविज्ञानस्मृतीनामात्मावगतेरभावप्राप्तिः।पारिशेष्यादात्मैकत्वविज्ञानस्मृतिसंतते·

नहीति।वर्तमान·ब्रह्मज्ञानं।अनेनाद्वितीयोपिपूर्वपक्षोनिरस्तोबोध्यः।तद्वाचित्वाद्वस्तुपरत्वादियावत्।उक्तानांवाक्यानांविध्यपेक्षितार्थैकत्वेनतच्छेषत्वंशंकितमनुभाषतेद्रष्टव्येति।सिद्धांतोपक्रमेसमाहितमेतदि
त्याह।नेति।आत्मज्ञानस्याप्रकारितत्वात्।आत्मवादिवाक्यश्रवणेसत्यपिविधिमंतरेणआत्मज्ञानंनभवतीतिचेत्तर्हिविधिवाक्यार्थश्रवणेसत्यपिविधिमंतरेणविधिवाक्यार्थविज्ञानंनभवेत्।विधिवाक्यविज्ञानं।वि
ध्यंतरार्थश्रवणेपिविधिवाक्यविज्ञानंनप्रवर्तिष्यतिअनवस्थेतः।तथाचात्मज्ञानस्मृतिसंततिर्विधिःस्यादितिभावः।इदानीमनात्मस्मृतेरनर्थत्वस्यान्वयव्यतिरेकसिद्धत्वात्तदात्मस्मृतिःस्वभावप्राप्तेत्याह।अनर्थत्वेति।।

प्रकृताधीनत्वभावात् ।१

इष्टफलत्वात्स्वात्मस्मृतिर्न विधेयेत्याह ॥ शोकेति ॥ यद्विधेयं तस्य ईदृग्विधं फलं नास्ति अतः स्वात्मस्मृतिर्न विधेयेत्यर्थः ॥ निरोधस्तर्हीति ॥ यदि वाक्योत्थज्ञानादेर्न विधेयत्वं तर्हि चित्तवृत्तिनिरोधो मुक्तिसाधनत्वेन विधीयतां । निरोधस्तर्हीत्यस्य व्याख्या । तस्योक्तज्ञानादेरर्थान्तरत्वादित्यर्थः । चोद्यमेव विवृणोति । अथापीति । अर्थान्तरत्वान्नस्य विधेयविशेषः । तस्य मुक्तिहेतुत्वेन विधेयत्वे योगशास्त्रं संवादयति । तन्त्रान्तरेऽपीति । अथ योगानुशासनमिति निःश्रेयसहेतुः समाधिः सूचितः ॥ तस्य च लक्षणमुक्तं ॥ योगश्चित्तवृत्तिनिरोध इति । तन्निरोधावस्थायां वात्मस्वरूपप्रतिष्ठत्वं कैवल्यमाख्यातं ॥ तदा द्रष्टुः स्वरूपेऽवस्थानमिति । एवं योगशास्त्रे मुक्तिहेतुत्वेनास्य निरोधविधिरित्यर्थः ॥ योगशास्त्रादपि बलवतीं श्रुतिमाश्रित्योत्तरमाह । नेः

र्थं तत एव भावान्न विधेयत्वं । शोकमोहभयायासादिदुःखदोषनिवर्तकत्वाच्चात्मस्मृतेर्विपरीतज्ञानप्रभवो हि शोकमोहादिदोषस्तथा च तत्र को मोहः विद्वान्न बिभेति कुतश्चन अभयं वै जनक प्राप्तोऽसि भिद्यते हृदयग्रन्थिरित्यादिश्रुतिभ्यो निरोधस्तर्ह्यर्थान्तरत्वात्तन्त्रान्तरमिति चेद्यद्यपि स्याच्चित्तवृत्तिनिरोधस्य वेदवाक्यजनितात्मविज्ञानादर्थान्तरत्वं तन्त्रान्तरेषु च कर्तव्यतयावगतत्वाद्विधेयत्वमिति चेन्न । मोक्षसाधनत्वेनाऽनवगमात् । न हि वेदान्तेषु ब्रह्मात्मविज्ञानादन्यत्परमपुरुषार्थसाधनत्वेनावगम्यते । आत्मानमेवावेत्तस्मात्तत्सर्वमभवद्ब्रह्मविदाप्नोति परं स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं अभयं हि वै ब्रह्म भवति य एवं वेद इत्येवमादिश्रुतिशतेभ्यो नान्यसाधनत्वाच्च निरोधस्य न स्यात्मविज्ञानवतः स्मृतिसन्तानव्यतिरेकेण चित्तवृत्तिनिरोधस्य साधनमस्ति । अभ्युपगम्य चेदमुक्तं न तु ब्रह्मविज्ञानव्यतिरेकेणान्यन्मोक्षसाधनमवगम्यते । आकाङ्क्षाभावाच्च भावनाऽभावो यदुक्तं यजेतेत्येवमादौ किं केन कथमिति भावनाकाङ्क्षायां फलसाधनेतिकर्तव्यताभिराकाङ्क्षापनयनं न तथा तदिहाप्यात्मविज्ञानविधावप्युपपद्यते इति । तदसदेकमेवाद्वितीयं तत्त्वमसि नेति नेत्यनन्तरमबाह्यमयमात्मा ब्रह्मेत्यादिवाक्यार्थविज्ञानसमकालमेव सर्वाकाङ्क्षानिवृत्तेर्न च वाक्यार्थविज्ञाने विधिप्रयुक्तः प्रवर्तते विध्यन्तरप्रयुक्तो वाऽनवस्थादोषमवोचाम । न चैकमेवाद्वितीयं ब्रह्मेत्यादिवाक्येषु विधिरवगम्यते । आत्मस्वरूपान्वाख्यानेनैवावसितत्वाद्वस्तुस्वरूपान्वाख्यानमात्रत्वादप्रमाणमिति चेद्यथापि स्याद्यथा सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमित्येवमादौ वस्तुस्वरूपान्वाख्यानमात्रत्वादप्रामाण्यमेवमात्मार्थवाक्यानामपीति चेन्न विशेषात् । ज्ञानवाक्यस्य वस्त्वन्वाख्याने क्रियान्वाख्याने वा प्रामाण्यं वाऽप्रामाण्यकारणं । किं तर्हि निश्चितफलवद्विज्ञानोत्पादकत्वं तद्यत्रास्ति तत्प्रमाणं वाक्यं यत्र नास्ति तदप्रमाणं किं च भोः पृच्छामस्त्वामात्मस्वरूपान्वाख्यानपरेषु वाक्येषु फलवन्निश्चितं च विज्ञानमुत्पद्यते न वा उत्पद्यते चेत्कथमप्रामाण्यमिति । किं वा न पश्यस्यविद्याशोकमोहभयादिसंसारबीजदोषनिवृत्तिं विज्ञानफलं । न शृणोषि वा किं तत्र को मोहः कः शोक एकत्वमनुपश्यतः मन्त्रविदेवास्मि नात्मवित्सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्वित्येवमाद्युपनिषद्वाक्यशतानि एवं विद्यते किं सोऽरोदीदित्यादिषु निश्चितं फलवच्च विज्ञानं

न चेद्विधेयतैः स्वप्रमा·

त्यादिना । शास्त्रोत्थज्ञानाविधेयमिति पक्षं प्रतिक्षिप्य पूर्वोक्तं पक्षान्तरमनुवदति । यत्तूक्तमिति ॥ अभ्युपगमवादेन परिहरति । सत्यमिति । प्रकृतवाक्यादिप्रवृत्तिर्निवृत्त । इदानीमितिशब्दप्रयुक्तं चोद्यमुत्थापयति । अनात्मेति । आत्मशब्दादूर्ध्वमितिशब्दप्रयोगादात्मशब्दार्थस्योपास्यत्वेनाऽविवक्षितत्वादात्मगुणस्याऽनात्मनः प्रधानस्योपासनमस्मिन्वाक्ये विवक्षितमित्यर्थः । पाय । ऽपरपर्यायस्य प्रधानस्योपासनं ॥ निर्धारणे षष्ठी ॥ तदेतदित्यादि अनन्तरमित्यादि च अग्रिमग्रन्थः ॥ आत्मनश्चेदुपास्यत्वं तदा पक्रमवि

रोधः स्यादिति शंकते । प्रविवक्ष्यति· ॥ ॥

सयोनिमृच्छतिसपापीयान्भवतियथाश्रेयाꣳसꣳहिꣳसित्वा॥ ४८ ॥ ॥

त्युःरोगादीनामीशानोभासामित्येवमादीनिदेवेषुक्षत्राणितदनुइंद्रादिक्षत्रदेवताधिष्ठितानिमनुष्यक्षत्राणिसोमसूर्यवंश्यानिपुरूरवःप्रभृतीनिसृष्टान्येवद्रष्टव्याः
नितदर्थएवहिदेवक्षत्रसर्गःप्रस्तुतोयस्माद्ब्राह्मणातिशयेनसृष्टंक्षत्रंतस्मात्क्षत्रात्परंनास्तिब्राह्मणजातेरपिनियंत्रुतस्माद्ब्राह्मणःकारणभूतोपिक्षत्रियस्यक्षत्रिय
मधस्तादवस्थितःसन्नुपरिस्थितमुपास्ते। क्वराजसूयेक्षत्रएवतदात्मीयंयशःख्यातिरूपंब्रह्मेतिविद्यधातिस्थापयति। राजसूयमभिषिक्तेनासंद्यांस्थितेनराज्ञासं
त्विजाब्रह्मन्नितित्रिराहूतेऋत्विक्पुनस्तंप्रत्याहत्वंराजन्ब्रह्मासीतितदेतदभिधीयतेक्षत्रएवतद्यशोदधातीति। सैषाप्रकृताक्षत्रस्ययोनिरेवयद्ब्रह्मतस्माद्यद्यपिराजापरमतांराजसू
याभिषेकगुणंगच्छतिआप्नोतिब्रह्मैवब्राह्मणंजातिमेवांततोन्तेकर्मपरिसमाप्तौउपनिश्रयतिआश्रयतिस्वांयोनिंपुरोहितंपुरोनिधत्तइत्यर्थः। यस्तुपुनर्बला
भिमानात्स्वांयोनिंब्राह्मणजातिंब्राह्मणंयउएनंहिनस्तिहिंसतिन्यग्भावेनपश्यति स्वां स्मात्स्वांयोनिमेवसयोनिमृच्छतिस्वप्रसवविच्छिन्नंनिर्विनाशयतिसएतत्कृ
त्वापापीयान्पापतरोभवति। पूर्वमपिक्षत्रियः। पापएवक्रूरत्वादात्मप्रसवहिंसयापुनरां। यथालोकेश्रेयांसंप्रशस्ततरंहिंसित्वापरिभूयपापतरोभवतितद्वत्क्षेत्र

यद्दधाति। आसंद्यांमंचिकायांस्थितेन। आसंदीमंचिकाविशेषः। उपअग्निंनिधत्तेकरोति। निजसंततिनाशयति। तरवर्थस्यइयमुनःप्रयोगेहेतुमाह। पूर्वमपीति॥ ॥

तथाक्षेत्रसर्गात्पूर्वमित्येवेतियावत्॥देवजातानि अत्र तत्कारो निष्ठा।देवेषुजातानि देवजातानि।देवजान्येव देवजातानि।तेभ्योहृद्योविशः इत्यर्थः।सर्वाणिविश्वायाः अपत्यानि।कुतोधर्मस्यसर्वनियं-
तृत्वंक्षेत्रस्येवतत्प्रसिद्धेरित्याह।तत्कथमिति।धर्मरूपेणावलेनेत्यर्थः।यथाकुटुं०कः सर्वं० नराज्ञास्यदर्शमानोधर्मेणातिबलीयांसंजेतुंवाञ्छतितद्वत्॥धर्मस्योक्तरूपत्वेनानुपपत्तिं सत्यादभिन्न-
त्वंहेतूकृतमाह।योवाइति।सत्यंवैतत् सः सत्यमित्यर्थः।कथंधर्मस्यसत्यत्वं। सहिपुरुषधर्मः।सत्यत्वंवचनतूर्थः।इत्यवान्तरभेदादित्याशङ्क्याह।सएवेति।सधर्मसत्ययोरेकत्वअस्तितस्मा-
त्धर्ममेवव्याचष्टे लौकिकमिति।सत्यंवदतीत्यत्रदेवास्फुटयति शास्त्रादिति।कार्यकारणभावेनानयोरेकत्वमुपसंहरति एतदिति।शास्त्रार्थसंशयेतुकविशिष्टव्यवहारान्निश्च-

सनैवव्यभवत्कर्मणेऽप्यलंतथानव्यभवद्वित्तोपार्जयितुरभावात्सविशमसृजत कर्मसाधनवित्तोपार्जनायकः पुनरसौविट् यान्येतानिदेवजातानि स्वार्थेनिष्ठा यएतेदेवजातिभेदाः इ-
त्यर्थः।गणशोगणंगणमाख्यायन्तेगणप्रायाहिविशः प्रायेणसंहताहिवित्तोपार्जनेसमर्थाःनैकैकशः वसवोऽष्टसंख्योगणः॥तथैकादशरुद्राः द्वादशादित्याः॥विश्वे
देवास्त्रयोदशविश्वायाअपत्यानिसर्वेवादेवाः मरुतःसप्तसप्तगणाः॥ ४९॥सपरिचारकाभावात्पुनरपिनैवव्यभवत् सशौद्रंवर्णमसृजत।शूद्रएवशौद्रः स्वार्थेवृद्धिः कः पुनर-
सौशौद्रोवर्णः यः सृष्टः पूषणं।पुष्यतीतिपूषा।कःपुनरसौपूषेतिविशेषतस्तन्निर्दिशति इयंपृथिवीपूषा।स्वयमेवनिर्वचनमाह॥इयंहीदंसर्वंपुष्यतियःदिदंकिं-
च॥ ५०॥सचतुरः सृष्ट्वापिवर्णान्नैवव्यभवत् उग्रत्वात्क्षत्रस्यानियतत्वाशङ्कयातच्छ्रेयोरूपमत्यसृजत।किंतद्धर्मं।तदेतच्छ्रेयोरूपंसृष्टं क्षत्रस्यक्षत्रंक्षत्रस्यापिनियन्तृ
उग्रादप्युग्रंयद्धर्मोयोधर्मःतस्मात्क्षत्रस्यापिनियन्तृत्वाद्धर्मात्परंनास्तितेनहिनियम्यते सर्वं तत्कथमिति॥उच्यते।अथोअप्यबलीयान्दुर्बलतरोबलीयांसमात्मनोबलवत्त-

सनैवव्यभवत्सविशमसृजत यानेतानिदेवजातानिगणश आख्यायन्तेवसवोरुद्राआदित्याविश्वेदेवामरुतइति॥ ४९ ॥
सनैवव्यभवत्सशौद्रंवर्णमसृजतपूषणमियंवैपूषेयꣳहीदꣳसर्वंपुष्यतियदिदंकिंच॥ ५०॥सनैवव्यभवत्तच्छ्रेयोरूप-
मत्यसृजतधर्मंतदेतत्क्षत्रस्यक्षत्रंयद्धर्मस्तस्माद्धर्मात्परंनास्त्यथोअबलीयान्बलीयाꣳसमाशꣳसतेधर्मेणयथाराज्ञै-
वंयोवैसधर्मःसत्यंवैतत्तस्मात्सत्यंवदन्तमाहुर्धर्मंवदतीतिधर्मंवावदन्तꣳसत्यंवदतीत्येतद्ध्येवैतदुभयंभवति॥ ५१ ॥

रमप्याशंसतेकामयतेजेतुंबलेनधर्मेण।यथालोकेराज्ञासर्वबलवत्तमेनापिकुटुम्बिकएवंतस्मात्सिद्धंधर्मस्यसर्वबलवत्तरत्वात्सर्वनियन्तृत्वंयोवैसधर्मोव्यवहारलक्ष-
णोलौकिकैर्व्यवह्रियमाणः ससत्यंवैतत्सत्यमितियथाशास्त्रार्थतास्यवानुष्ठीयमानोधर्मनामाभवति शास्त्रार्थज्ञायमानस्तुसत्यंभवति॥यस्मादेवंतस्मात्स-
त्यंयथाशास्त्रंवदन्तंव्यवहारकालेआहुःसमीपस्थाउभयविवेकज्ञाधर्मंवदतीतिप्रसिद्धंलौकिकंन्याय्यंवदतीति॥ तथाविपर्ययेणधर्मंवालौकिकव्यवहार
वदन्तमाहुःसत्यंवदतीतिशास्त्रादनपेतंवदतीति॥ एतद्ध्येवैतदुभयंज्ञायमानमनुष्ठीयमानंचैतद्धर्मएवभवति॥तस्मात्सर्वधर्मोज्ञानानुष्ठानलक्षणः
शास्त्रज्ञानितराश्चसर्वानेवनियमीति।तस्मात्क्षत्रस्यापिक्षत्रंसतत्त्वदभिमानोऽविद्वान्ब्राह्मणाद्यनुष्ठानायब्रह्मक्षत्रविट्शूद्रनिमित्तविशेषमभिमन्यते॥तानिच
निसर्गतएवाधिकारनिमित्तानि॥ ५१ ॥ ॥रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामसर्वज्ञ॥ ॥

योयथायववराहादिषु धर्मज्ञोयेशास्त्रार्थवशान्निर्णयोयथादोमेनाग्निहत्यादौ।अतोऽहेतुहेतुमद्भावयोरैक्यमितिभावः।ज्ञानानुष्ठानेलक्षणोयस्यसः।तर्हियथोक्तधर्मवशादेवकर्मा-
नुष्ठानसिद्धेर्वर्णाश्रमाभिमानस्याकिंचित्करत्वमित्याशङ्क्याह।अतइति।ब्राह्मणाद्यभिमानः।कर्मविशेषानुष्ठानाय।धार्मिकत्वाद्यभिमानाद्ब्राह्मणाद्यभिमानःप्रधानःयागा-
नुष्ठापकश्चेत्तस्याद्यभिमानोऽपितथैवाभिमानात्पारम्पर्यनुष्ठापयेदित्याशङ्क्याह।तानिचेति।नस्वल्पविद्योधार्मिकस्याब्राह्मणस्यादिष्वनिमित्तेषुसत्सुकर्मप्रवृत्ताविनिमित्ता-
नरमपेक्ष्यते।प्रमाणाभावादित्यर्थः॥ ॥

पुनरुक्तिवैयर्थ्यमाशंक्योक्तमनुवादार्थमिति। ब्राह्म॰ ब्रह्म ब्राह्मणो ब्राह्मणजातिरभवत्। अयं तोदयः। कर्मफलदानार्थमेव। ब्राह्मणजात्यभिमानविशिष्टं पारिव्राज्यं स्वलोकसाधनं। मनुष्याणां मध्ये कर्मसि मनुष्यमात्रस्य कर्मफलो भोगापेक्षाया मधिकारस्यास्य प्रदानभावेनावस्थितत्वादग्न्यादिनिमित्तक्रियापेक्षा नास्ति किंतु ब्राह्मणजातिप्राप्तिमात्रेण तत्त्वं तद्वृत्तिवद्ध जप्यादिकर्म। अवश्यंभावि। इति तस्मात्त्राण पुरुषार्थः सिध्यतीत्याह। मनुष्याणामिति। देवानां मध्ये ऽग्निसंबद्धमेव कर्म कृत्वा पुरुषार्थलाभो मनुष्याणां मध्ये तु ब्राह्मणस्य प्रयुक्तजप्यादिमात्रेण तत्प्राप्तिरत्र प्रमाणमाह। स्मृतेश्चेति। जप्येनेति। जप्यग्रहणं जातिमात्र। प्रयुक्तकर्मोपलक्षणार्थं। अन्यदग्निसंबद्धकर्म कोपब्राह्मणो नाम तत्राह। मैत्र इति। सर्वेभ्यो भूतेभ्यो ऽभयप्रदो विशिष्टजातिमानिति यावत्। ननु यथोक्तस्मृतेर्ब्राह्मणप्रतिलंभमात्रादस्मुदयलाभे ऽपि जातमनो निःश्रेयससिद्धिरित्याह। पारिव्राज्येति। ब्राह्मणस्यैवास्या याथभिक्षाचर्यं चरंतीति ब्राह्मणस्य पारिव्राज्यश्रुतेस्तच्च ब्रह्मलोकसाधनं। यस्मादेताभ्यां त्वतस्तस्माद्ब्राह्मणत्वेनैव। कर्मक

तदेतच्चातुर्वर्ण्यं सृष्टं ब्रह्म क्षत्रं विट् शूद्र इत्युत्तरार्थ उपसंहारो यत्तत्स्रष्टृ ब्रह्म तदग्निनैव नान्येन रूपेण देवेषु ब्रह्म ब्राह्मणजातिरभवद्ब्राह्मणो ब्राह्मणस्वरूपेण मनुष्येषु ब्रह्माभवदितरेषु विकारांतरं प्राप्य क्षत्रियेण क्षत्रियो ऽभवदिंद्रादिदेवताधिष्ठितो वैश्येन वैश्यः शूद्रेण शूद्रः यस्मात्क्षत्रादिषु विकारापन्नं ब्राह्मण एव चाविकृतं स्रष्टृ ब्रह्म तस्मादग्नावेव देवेषु देवानां मध्ये लोकं कर्मफलमिच्छंति अग्निसंबद्धं कर्म कृत्वेत्यर्थः। तदर्थमेव हि तद्ब्रह्म कर्माधिकरणत्वेनाग्निरूपेण व्यवस्थितं तस्मात्तस्मिन्नग्नौ कर्म कृत्वा तत्फलं प्रार्थयंत इत्येतदुपपन्नं ब्राह्मणो मनुष्येषु मनुष्याणां पुनर्मध्ये कर्मफलेच्छायां नाग्न्यादिनिमित्तक्रियापेक्षा किं तर्हि जातिमात्रस्वरूपप्रतिलंभेनैव पुरुषार्थसिद्धिः। यत्र तु देवाधीना पुरुषार्थसिद्धिस्तत्रैवाग्न्यादिसंबद्धक्रियापेक्षा स्मृतेश्च जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते इति। पारिव्राज्यदर्शनाच्च। तस्माद्ब्राह्मणत्व एव मनुष्येषु लोकं कर्मफलमिच्छंति। तस्मादेताभ्यां हि ब्राह्मणाग्निरूपाभ्यां यत्स्रष्टृ ब्रह्म साक्षादभवत्। अत्र तु परमात्मलोकमवाग्नौ ब्राह्मणे च इच्छंतीति केचित्। तदसदविद्याधिकारे कर्माधिकारार्थं वर्णविभागस्य प्रस्तुतत्वात् परेण च विशेषणात्। यदि ह्यत्र लोकशब्देन परमात्मोच्यते परेण विशेषणमनर्थकं स्यात्। स्वं लोकमदृष्ट्वेति स्वलोकव्यतिरिक्तश्चेदग्न्यधीनतया प्रार्थ्यमानः प्रकृतो लोकस्ततः स्वमिति युक्तं विशेषणं प्रकृतपरलोकनिवृ

तदेतद्ब्रह्म क्षत्रं विट् शूद्रस्तदग्निनैव देवेषु ब्रह्माऽभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छंते ब्राह्मणे मनुष्येष्वेताभ्यां हि रूपाभ्यां ब्रह्माभवदथ यो ह वा अस्माल्लोकात्स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाननूक्तोऽन्यद्वा कर्माकृतं ॥१॥

र्थत्वात्। स्वत्वेन चाव्यभिचारात्परमात्मलोकस्याविद्याकृतानां च स्वत्वव्यभिचारात् ब्रवीति च कर्मकृतानां व्यभिचारं क्षीयत एवेति ब्रह्मणा सृष्टा वर्णाः कर्मार्थं तच्च कर्म धर्माख्यं सर्वानेव कर्तव्यतया नियंतृ पुरुषार्थसाधनं च तस्मात्तेनैव कर्मणा स्वो लोकः परमात्माख्यो विदितोऽपि प्राप्यते किं तस्य वेदनीयत्वेन क्रियत इति अत आह। अथेति पक्षनिवृत्त्यर्थः। यः कश्चिद्वा अस्मात्सांसारिकात्पिंडग्रहणलक्षणादविद्याकामकर्महेतुकादग्न्यधीनकर्माभिमानितया वा ब्राह्मणजातिमात्रकर्माभिमानितया वा आगंतुकादस्वभूताल्लोकात्स्वं लोकमात्माख्यमात्मत्वेनाव्यभिचारित्वाददृष्ट्वा अहं ब्रह्मास्मीति प्रैति म्रियते स यद्यपि स्वो लोकोऽविदितोऽविद्यया व्यवहितोऽस्व इवाज्ञात एनं संख्यापूरणाइव लौकिक आत्मानं न भुनक्ति न पालयति शोकमोहभयादिदोषापनयेन यथा वा लोके वेदोऽननूक्तोऽनधीतः कर्माद्यर्थाववोधकत्वेन न भुनक्ति अन्यद्वा लौकिकं कृष्यादि कर्माकृतं स्वात्मनानभिव्यंजितमात्मीयफलप्रदानेन न भुनक्ति एवमात्मा स्वो लोकः स्वेनैव नित्यात्मस्वरूपेणानभिव्यंजितोऽविद्यादिग्रहणेन न भुनक्त्येव ननु किं स्वलोकदर्शनानिमित्तपरिपालनेन कर्मणः फलप्राप्तिप्रौढ्यादिदृष्टफलनिमित्तस्य च कर्मणो बाहुल्यान्निमित्तपालनमक्षयं भविष्यतीति तन्न कृतकस्य क्षयवत्त्वादिति॥ ॥ ग्नौ चाधिकरणं चेते रूपयोः। ताभ्यां। अग्नावेव लोकमिच्छंतीति वाक्यं। अथो न्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मि न स वेद इत्यादि वाक्यशेषगतविशेषणवशादपि कर्मफलस्यैवात्र लोकशब्दवाच्यत्वमित्याह। परेण चेति। परेण वाक्यशेषेणेत्यर्थः। तदेव प्रपंचयति। यदि हीति परपक्षे स्वमिति विशेषणं व्यावर्त्याभावान्न घटते। ननु प्रकृते वाक्ये लोकशब्देन परमात्मा नोच्यते चेत् परपाक्षिके तत्तेन नामोच्यते। विशेषणाभावादित्याशंक्य विशेषणसामर्थ्यात्तेन तमित्याह। स्वमनेनेति। नेयत्वेन। देवताग्राणकर्मभुक्तिहेतुरिति पक्षपरिशेषेत वाक्यमुपपन्न

ति।अतआहेति।निमित्तंविहरणोति।अन्यधीनेति।शरीरात्।आत्मास्वस्यलोकस्यस्वत्वेहेतुमाह।आत्मत्वेनिति।तत्पत्र०क्तःतथापिह्यविदित।यथालौकिकोदशमोस्मीत्यज्ञातोनशोकादिनिवर्तनेनात्मानंभुनं॰
क्तितथापरमात्मापीत्यर्थः।ननुउक्तः।तुइतिनिश्चयेनउक्तः।अनुक्तमित्यर्थः।तत्कृतमित्यर्थः।अर्थेनसहअनधीतस्यवेदस्यकर्मणोयथावद्बोधकत्वाभावात्अनधीतोवेदोनभुनक्ति।स्वलोकदर्शनेनकृतंपत्यादिपा
लनंतेनकिमित्यर्थः॥ १ ॥४॥स्वलोकं।स्वस्वरूपमात्मानमेवेत्यर्थः।कर्मविशेषणं।कर्म।पुण्य०फलेनकृतंपत्यादिपालनानंत्यंतस्यआज्ञानादिति एवं।स्वलो०र्थेआत्मानमितिशब्दःप्रयुक्तोस्ति।उपासीतेत्यनेन
संबंधः।मोक्षानुवादः।आत्मज्ञानेनसर्वाणिनाशितानिअतःकर्माभावादेवास्यकर्मनक्षीयतइत्यस्यनित्यमोक्षप्राप्तेरित्यर्थः।कर्मफलस्यक्षयित्वमुक्त्वाकर्मणोऽक्षयत्ववदतोव्याहतिमाशंक्याह॥क
र्मेति।स्वात्मलोकंविराजंस्वआत्मरूपमापाद्यतदुपासकस्य।कर्मसाध्यं।कर्मप्राप्यमितियावत्।आत्मानमित्यादि।केवलज्ञानान्मुक्तिरित्येवंमतंयाव्याख्यातं।संप्रतिभर्तृप्रपंचव्याख्यानमुत्थाप
यति।स्वात्मलोकोपासकस्येति।आत्मलोकोपासकस्यकर्माभावेकथंतदक्षयवाचोयुक्तिरित्याशंक्यकर्माऽभावस्याऽसिद्धिमभिसंधायकर्मसाध्यंलोकंव्याकृताऽव्याकृतरूपेणाभिनत्ति

एतदाह।अदिहवैसंसारेअद्भुतकश्चिन्महात्मापिअनेवंविन्स्वंलोकंयथोक्तेनविधिनाऽविद्वान्महदश्वमेधादिकंपुण्यकर्मबहुफलमेवनैरंतर्येणकरोति
यनेनैवानंत्यंममभविष्यतीति।तत्कर्महअस्याविद्यावतोऽविद्याजनितकामहेतुत्वात्स्वप्नदर्शनविभ्रमोद्भूतविभूतिवदंततोऽन्तेफलभोगस्यक्षीय
तएवतत्कारणयोर्विद्याकामयोश्चलत्वात्कृतक्षयध्रौव्योपपत्तेस्तस्मात्पुण्यकर्मफलपालनानंत्याशयेवाऽतआत्मानमेवस्वंलोकमात्मानमिति
स्वलोकमित्यस्मिन्नर्थेस्वंलोकमितिप्रकृतत्वादिहचस्वशब्दस्याऽप्रयोगादुपासीतसयआत्मानमेवलोकमुपास्तेतस्यकिमित्युच्यते।नहास्यकर्मक्षीय

यदिहवाअप्यनेवंविन्महत्पुण्यंकर्मकरोतितद्धास्यांततःक्षीयतएवात्मानमेव
लोकमुपासीतसयआत्मानमेवलोकमुपास्तेनहास्यकर्मक्षीयते

तेकर्माभावादेवेतिनित्यानुवादोयथाऽविविदुषःकर्मक्षयलक्षणंसंसारदुःखंसंततमेवनतथातदस्यविद्यतइत्यर्थः।मिथिलायांप्रदीप्तायांनमेद
ह्यतिकिंचनेतियद्वत्स्वात्मलोकोपासकस्यविदुषोविद्यासंयोगात्कर्मैवनक्षीयतइत्यपरेवर्णयंति।लोकशब्दार्थंचकर्मसमवायिनंद्विधापरिकल्प
यंतिकिलैकोव्याकृतावस्थःकर्माश्रयोलोयोहैरण्यगर्भाख्यस्तंकर्मसमवायिनंलोकंव्याकृतंपरिच्छिन्नंयउपास्तेतस्यकिलपरिच्छिन्नकर्मात्मद
र्शिनःकर्मक्षीयते।तमेवकर्मसमवायिलोकमव्याकृतावस्थंकारणरूपमापाद्ययउपास्तेपरिच्छिन्नकर्मात्मदर्शित्वात्तस्यकर्मनक्षीयतइति॥ ॥

लोकशब्दार्थंचेति।तत्राद्यंलोकशब्दार्थमनूद्यतदुपासकस्यदोषमाह।एकइति।परिच्छिन्नकर्मात्मानस्ताथोव्याकृतावस्थोलोकस्तस्मिन्नहंग्रहोपासकस्येतियावत्।द्वितीयंलोकश
ब्दार्थमनूद्यतदुपासकस्यलाभंदर्शयति।तमेवेति।यथाकुंडलादेस्तन्वीहारन्वेषणेसुवर्णान्निरिक्तरूपानुपलंभान्नरूपेणास्यनित्यत्वं।तथाकर्मसाध्यंहिरण्यगर्भादिलोकं॰
कार्यत्वादव्याकृतंकारणमेवतंगीकृत्ययस्तस्मिन्नहंबुद्ध्योपास्तेतस्याऽपरिच्छिन्नकर्मसाध्यलोकात्मोपासकत्वात्।ब्रह्मवित्त्वंकर्मित्वंचघटते।तस्यखल्वात्मैव
कर्म।तेनतस्यतन्नक्षीयते।यःपुनरद्वैतावस्थामुपास्तेतस्यात्मैवकर्मभवतीतिहिभर्तृप्रपंचैरुक्तमित्यर्थः।विराजं॥ ॥५॥ ॥६॥ ॥एम॥

कर्म १

उपासकस्या।२

वाक्यंतरमादाय व्याख्यातुं पातनिकां करोति। आत्मैवेत्यादिना। प्रेरित। धर्माधिकारेति। धर्माधिकारो गात्वगोचरत्वं शास्त्रे देवादयोऽपि रक्षंति। न तु सर्वाश्रमसाधारणं ब्रह्मचारिणां। अतो स्वकर्ममार्गे प्रवृ-
त्तो देवादिरक्षणस्याहेतुत्वात् ब्रह्मचारिणो निवृत्तिमत्यन्त्याः प्रवृत्तिपक्षे पातेकारणं वाच्यमित्यर्थः। मनुष्यमात्रं कर्मस्वेव तेन बलात् प्रवर्त्तयंति॥ तेषामचिंत्यशक्तित्वादित्याशंक्याह। अन्यथेः

आत्मैवेदमग्र आसीत्। ब्रह्मविदां श्रेष्ठस्मात्पश्चभावात्कर्त्तव्यतावंधनरूपात्प्रतिमुच्यते। केनायं कारितः कर्मबंधनादिकारे वश इव प्रवर्त्तते तेन पुनरस्तु हि मोक्षणोपाये
विद्याधिकार इति। ननूक्तं देवा रक्षंतीति चेत्॥ कर्माधिकारस्य गोचरात्वात् नैव ते परिरक्षंति। अन्यथा अकृताभ्यागमकृतनाशप्रसंगात्। तत्सामान्यरूपमात्रविशिष्टाधि-
कारानाह॥ तस्मात् द्रष्टव्यं तेन येन प्रेरितोऽवशा एवं बहिर्मुखी भवति तस्माच्छोकात्। नन्वविद्यया। अविद्यावान् हि बहिर्मुखीभूतः प्रवर्त्तते। सापि नैव प्रवर्त्ति-
कावस्तुत्वरूपावरणात्मिका हि सा। प्रवर्त्तकवीजत्वं तु प्रतिपद्यते॥ अंधत्वमिव गर्त्तादिपतनप्रवर्त्तिहेतुरेव तत्तर्हि उच्यतां किं प्रवृत्तिहेतुरिति तदिहाभिधीय-
ते। एषणा कामः स त्वाभाविक्यामविद्यायां वर्त्तमानो बालाः पराचः कामाननुयंति इति काठकश्रुतौ॥ स्मृतौ च॥ काम एष क्रोध एष इत्यादि॥ मानवेच
सर्वा प्रवृत्तिः कामहेतुकैवेति। स एवार्थः सविस्तरः प्रदर्श्यते इहाध्यायपरिसमाप्तेः। आत्मैवेदमग्र आसीत्॥ आत्मैव स्वभाविको विज्ञानकार्यकरणसंघा-
तलक्षणो वर्णाश्रमप्राक्दारसंबंधात्। आत्मेत्यभिधीयते। तस्मादात्मनः पृथग्भूतकाम्यमानजायादिभेदरूपेण नासीत्। स एकस्य वा सीत् जायाद्येषणावी-

आत्मैवेदमग्र आसीदेक एव सोऽकामयत

नभूतोऽविद्यावानेकएवासीत्। स्वाभाविक्यां स्वात्मनि कर्त्रादिकारकक्रियाफलात्मताध्यारोपलक्षणायामविद्यायां वासितः सोऽकामयत कामितवान्॥
॥१॥ ॥कथम्॥ जायाकर्माधिकारहेतुभूता मे मम कर्तुः स्यात्तया विनाहमनधिकृत एव कर्मणि। अतः धर्माधिकारसंपन्नये भवेत् जायाऽथाहं प्रजायेय प्रजा-
रूपेणाहमेवोत्पद्येय। अथ वित्तं मे स्यात्कर्मसाधनं गवादिलक्षणं। अथाहमभ्युदयनिःश्रेयससाधनं कर्म कुर्वीय येनाहमनृणीभूतो देवादीनां लोकान् प्राप्नुयां।
तत्कर्म कुर्वीय काम्यानि च पुत्रवित्तस्वर्गादिसाधनानि। एतावान्वै काम एतावानेव विषयपरिच्छिन्न इत्यर्थः॥ एतावान्वाहि कामयितव्यो विषयो यदुत जायापुत्र-
वित्तकर्माणि साधनलक्षणो एषणा लोकास्त्रयो मनुष्यलोकः पितृलोकः देवलोक इति फलभूताः साधनैषणायाश्च प्राप्त्यर्थाः हि जायापुत्रवित्तक-
र्मलक्षणा साधनैषणा। तस्मात् लोकैषणया लोकैषणासैकैव सत्यषणा साधनापेक्षेति द्विधाऽतो वक्ष्यति ह्येते एषणा एव भवति॥ ॥१७॥ ॥

निरक्षंति। अविद्यायां तर्हि प्रवृत्तिरन्वयव्यतिरेकौ यथामित्याशंक्य कारणकारणत्वेनेत्याह। प्रवर्त्तकेति। अविद्या प्रवर्त्तकवीजत्वं कामकारणत्वं प्रतिपद्यते शास्त्रेति॥ यथांधत्वं विपरीतज्ञानका-
रणत्वेन गर्त्तपातहेतुः। अर्थतः श्रुतिं संवादयति। स्वाभाविक्यामिति। बहिर्भूतान् कामान्। मनुस्मृतौ। अभ्युदयातिशयोऽत्र निःश्रेयसशब्देनोक्तः न तु मोक्षः। अविदुषस्तत्रेच्छाया अभा-
वात्। नित्यनैमित्तिककर्मणां मे वानुष्ठानं नेत्याह। काम्यानीति। जायादिविषयिणीयाइच्छा सा साधनेच्छा। सत्ता एषणा। साधनपेक्षते इति हेतोः द्विधा॥ ॥१७॥ ॥

साध्यफलमिति काममात्रं चेत्कथं तर्हि कृत्स्नसाधनमात्रमभिधाय एतावानित्यवधार्यते तत्राह । फलार्थत्वादिति । एका जायायेषणा एका लोकैषणा ॥ साध्यं लोकत्रयं । साधनं जाया पुत्र वित्त कर्माणि । अग्निहोत्रादिकारणमेव श्रेयःसाधनं नात्मज्ञानमित्यभिमानवान् । धूमतान्तो धूमेन ग्लानिमापन्नः । फलं च साधनं च फलसाधने लक्षणा यस्य तस्मात् । लब्धव्यान्तराभावेऽपि कामयितव्यान्तरं स्यादित्याशंक्याह । लब्धव्येति । तस्य कामस्य एतद् इयत्ता केन साध्यसाधनविषयत्वव्यतिरेण । श्रुतेरभिप्रायमाह । एतदुक्तमिति । कामस्यानर्थत्वात् साध्यसाधन॰

फलार्थत्वात्सर्वारम्भस्य लोकैषणार्थो ह्येवैतेनोक्तेनान्वेषणेन एतावानेव काम इत्यवधार्यते । भोजने निमित्ते तृप्तिनिमित्ते पृथगभिधेयात्तदर्थत्वाद्भोजनस्यैतत एषणा साध्यसाधनलक्षणा कामयते न युक्तोऽविद्वान् स्वभावात् कोशकारवदात्मानं वेष्टयति । कर्ममार्गे स्वात्मानं प्रणिदधत् बहिर्मुखीभूतो न स्वं लोकमात्मानं जानाति । तथा च तैत्तिरीयके । अग्निमुग्धो हैव धूमतान्तः स्वं लोकं न प्रतिजानातीति । कथं पुनरेतावत्त्वमवधार्यते कामानामनन्तत्वात् । अनन्ता हि कामा इत्येतदाशंक्य हेतुमाहमाह । यस्मान्न कृत्स्नमिच्छन्नपि अतोऽस्मात्फलसाधनलक्षणाद्भूयोऽधिकतरं न विन्देत न लभेत ॥ नहि लोके फलसाधनव्यतिरिक्तं दृष्टमदृष्टं वा लब्धव्यमस्ति लब्धव्यविषयो हि कामः तस्य चैतद्व्यतिरेकेणाभावादुपपन्नमेतावान्वै काम इत्येतदुक्तं भवति । दृष्टार्थमदृष्टार्थं वा साध्यसाधनलक्षणमविद्यावदनुरूपाधिकारविषयमेषणा ह्ययं कामः । अतोऽस्माद्धि एषा कृत्स्नेति । एवमविद्वानात्मकामी पूर्वः कामयामास तथा पूर्वतरोऽप्येषा लोकस्थितिः । प्रजापतेश्चैवमेषणमासीत्सोऽबिभेदविद्यया ततः काममयुक्तः एकाकी कामयामास अत्यपघात्यत्वियमेषु तत्सर्वमभवत्ततः सर्गोऽयमासीदिति तदुक्तं तस्मात्तत्स्थाने तर्ह्येतस्मि

जायामे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान्वै कामो नेच्छंश्चनातो भूयो विन्देत्तस्मादप्येतर्ह्येकाकी
कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव ता
वन्मन्यते तस्यो कृत्स्नता मन एवास्यात्मा वाग्जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषा हि तद्विन्दते ॥ ॥

न्नपि काल एकाकी सन्नकृतदारक्रियातः कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्यकृतार्थं वा असम एवं कामयमानः संपादयंश्च जायादीनि यावदेतेषां यथोक्तानां जायादीनामेकैकमपि न प्राप्नोत्यकृत्स्नोऽसंपूर्णोऽहमित्येवं तावदात्मानं मन्यते पारिशेष्यात्समस्तानेवैतान्संपादयति यदा तदास्य कृत्स्नता यदा तु न शक्नोति कृत्स्नतामसंपादयितुं तदास्याः कृत्स्नत्वं तदास्य कृत्स्नत्वसंपादनायाह । तस्य उ तस्याकृत्स्नत्वाभिमानिनः कृत्स्नतेयमेवं भवति । कथमियं कार्यकरणसंघातः प्रविभज्यते तत्र मनोऽनुवृत्ति हि तत्सर्वकार्यकरणजातमिति मनः प्रधानत्वादात्मेवात्मा यथा जायादीनां कुटुम्बपतिरात्मवत्तदनुकारित्वात् जायादिचतुष्टयस्यैवमिहापि मन आत्मा परिकल्प्यते कृत्स्नतायै तथा वाक् जाया मनसोऽनुगामित्वसामान्यात् वाचो वागिति शब्दश्चोदनादिलक्षणा मनसा श्रोत्रादिद्वारेणावगतोऽवधार्य तत्प्रयुज्यते । चेति मनसो जायेव वाक् तस्याश्च वाङ्मनसयोर्जायापतित्वोत्पाद्यं प्रसूयते प्राणः कर्मार्थमिति प्राणः प्रजेव तत्प्राणादिचेष्टादिलक्षणं कर्म चक्षुर्दृष्टं वित्तसाध्यं भवतीति चक्षुर्मानुषं हि । तद्धि द्विविधं वित्तं मानुषमितरच्च गवादि रत्नादि वित्तं निमित्तत्वान्मानुषमिति । गवादि हि मनुष्यसंबन्धि वित्तं चक्षुर्ग्राह्यं कर्मसाधनं ॥ तस्मात्तत्स्थानीयत्वेन संबन्धाच्चक्षुर्मानुषं वित्तं चक्षुषा यस्मात्तन्मानुषं वित्तं विन्दते गवादि उपलभत इत्यर्थः ॥ ॥ यो धनादन्याद्वलात्स्वर्गादौ पुमर्थतावित्याशंक्य स्यादेवं न लाभतुल्याभ्यासित्तिलभ्यो

ऽषणाभ्योऽनुत्थानं संन्यासात्मकं कृत्वाकांक्षितमोक्षहेतुज्ञानं कुर्यादिति पृथग्विचारणावद्यावर्त्मेयेदित्यर्थः । अवि॰ यस्याधिकारो यच्च तज्जातिविधरूपं । प्राकृतस्थितिमृतेरधानगुत्तरपूर्वकारीणा मिदं पृच्छति इत्याशंक्याह । प्रजापतेरिति । तत्र हेतुत्वेन पूर्वोक्तं स्मारयति । सोऽबिभेदित्यादिना । प्रथमैकवचनं । तथेति मनसो यजमानत्वकल्पनावदित्यर्थः । कर्त्री । चेष्टा । प्राणचेष्टादिभिः साध्यं यत्कर्म तच्चक्षुर्मानुषं वित्तं । चक्षुर्मानुषवित्तस्थानीयम् । ॥ रामरामसीतारामरामसीतारामः । ॥

45

परस्यैव लोकशब्दार्थत्वे हेत्वंतरमाह। परेणेति। परस्मात्मवाचकात्मशब्देनेत्यर्थः। येषां नः एषां अस्माकं। यः अयं अशनायाद्यतीतः आत्मा अयं लोः। इदं फलं अभिप्रेतमित्यर्थः। उक्तमेव प्रपंचयति। पुत्रेणेति। लोकशब्देनात्र परमात्मपरिग्रहे हेत्वंतरमाह। स्वलोकमितीति। प्रकरणेन परस्य लोकशब्दार्थत्वमुक्तं। लिंगविरोधादिति चोदयति। अस्मादिति। तदेव विवृणोति। इहेत्यादिना। अस्मात्कामयत इत्यस्यैव व्याख्यानं इह लोक इति। अथ परेष्ववाक्येषु परमात्मा लोकशब्दार्थः प्रकृते तु कर्मफलमिति व्यवस्थेति चेन्नेत्यव एकवाक्यत्वसंभवे तद्भेदस्यान्याय्यत्वादित्याह। नेति। अर्थवादस्थं लिंगं न प्रकरणाद्बलवदिति मत्वा समाधत्ते। नेत्यादिना। यथोक्तादोषागंतुत्यर्थमात्मनः स्वरूपत्वमुच्यते तेन तथात्वात्प्यात्मलोककालतुमतस्फ

भवतीयं संभावना कल्पनानर्थेति। स्वलोकशब्देन प्रकृतस्य परमात्मनोऽभिहितत्वात् स्वं लोकमिति प्रकृतस्य स्वशब्दं विहायात्मशब्दप्रक्षेपेण पुनस्तस्यैव प्रतिनिर्देशादात्मानमेव लोकमुपासीतेति। तत्र कर्मसमवायिलोककल्पनाया अनवसर एव। परेणापि केवलविद्याविषयेणाद्येषां नोयमात्मायं लोक इति॥ पुत्रकर्माऽपरविद्याकृतेभ्यो हि लोकेभ्यो विच्छिन्नस्य परमात्मनो लोक इति नहास्य केनचित्कर्मणा लोको मीयत एषोऽस्य परमो लोक इति च तैः। सविशेषणस्यैकवाक्यतायुक्ता इहापि स्वलोकमिति विशेषणादर्शनादस्मात्कामयत इत्ययुक्तमिति चेद्विह स्वो लोकः परमात्मा तदुपासनात्तत्स एव भवतीति स्थिते यद्यत्कामयते तत्तदस्मादात्मनः सृजत इति तदात्मप्राप्तिरेकेण फलवचनमयुक्तमिति चेत्॥ न स्वलोकोपासनस्तुतिपरत्वात्॥ अस्मादेव

ऽस्माद्ध्येवात्मनो यद्यत्कामयते तत्तत्सृजते॥ ५२॥

लोकात्सर्वं मिष्टं संपद्यत इत्यर्थो नान्यतः प्रार्थनीयमात्र कामस्तावदात्मतः प्राणा आत्मत आशेत्यादिश्रुत्यंतरेण यथा सर्वभावप्रदर्शनार्थो वा पूर्ववद्यदि ह्यप एवात्मा संपद्यते तदायुक्तोऽस्माद्ध्येवात्मन इत्यात्मशब्दप्रयोगः स्वस्मादेव प्रकृतादात्मनो लोकादित्येवमर्थोऽन्यथाऽव्याकृतावस्थात्कर्मणो लोकादिति सः विशेषणमेव स्वयत प्रकृतपरमात्मलोकव्यावृत्तये व्याकृतावस्थाव्यावृत्तये च न ह्यस्मिन्प्रकृते विशेषितेऽकृतात्तरालावस्थाप्रतिपत्तुं शक्यते॥ अथो अयं वात्माऽऽविद्वान्वर्णाश्रमाद्यभिमानो धर्मेणानियम्यमानो देवादिकर्मकर्तृत्वेन तया पशुवत्परतंत्र इत्युक्तं॥ कानि पुनस्तानि कर्माणि यत्कर्तृत्वेन तया परतंत्रो भवति॥ के वा ते देवादयो येषां कर्मभिः पशुवदुपकारीतीति॥ ५२॥ ॥ ॥ रामरामराम॥ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

लवचनमित्याह। आत्मत इति। भवतु वा माभूदस्माद्ध्येवेत्यादिरर्थवादः। तथापि तस्य सर्वात्मत्वप्रदर्शनार्थत्वादुक्तमत्र लोकशब्देन परमात्मग्रहणमभित्याह। सर्वात्मेति। तस्मात्तत्त्वमेवेदिति। वाक्यद्वयातयति। पूर्ववदेवेति। किंच॥ आत्मशब्दस्य त्रिधापरिच्छेदशून्यार्थवाचितायाः तत्समानाधिकरणलोकशब्दस्यापि तदर्थत्वात्परस्यैवात्र लोकत्वमित्याह। यदिहीति। संपद्यते लोकशब्देन हृत्वा गृह्यते। प्रकृत इति। स्वं लोकमिति प्रकृते परमात्मनि आत्मानमेवेति विशेषिते च उत्तरपत्रे स्थितस्य मूल

स्य प्रतीकः अथो इत्यादि। ॥

शब्दः। आसेचनं प्रक्षेपः। देवानां भोग्य इत्यर्थः॥ आत्मीयत्वं॥ भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञश्चेत्येव मते पंच महायज्ञाः। ॥ ॥रामरामरामरामरामरामरामरामराम।

तदुभयं प्रपंचयति। अथो इत्ययं वाक्योपन्यासार्थः। अयं यः प्रकृतो गृहीतकर्माधिकृतोऽविद्वान्शरीरेंद्रियसंघातादिविशिष्टः पिंड आत्मेत्युच्यते॥ सर्वेषां देवादीनां पिपीलिकांतानां भूतानां लोको भोग्य आत्मेत्यर्थः। सर्वेषां वर्णाश्रमादिविहितैः कर्मभिरुपकारित्वात्। कैः पुनः कर्मविशेषैरुपकुर्वन्केषां भूतविशेषाणां लोक इत्युच्यते स गृही यज्जुहोति यजते यागो देवतामुद्दिश्य स्वस्वपरित्यागः स एवासेचनाधिको होमस्तेन होमयागलक्षणेन कर्मणावश्यकर्तव्यत्वेन देवतानां पशुवत्परतंत्रत्वेन प्रतिबद्धशृतलोकोऽथ यदनुब्रूते स्वाध्यायमधीतेऽहरहस्तेन ऋषीणां लोकोऽथ यत्पितृभ्यो निपृणाति निपृणाति प्रयच्छति पिंडोदकादि यच्च प्रजामिच्छते प्रजार्थमुद्यमं करोतीच्छा चोत्पत्त्युपलक्षणार्थो प्रजां चोत्पादयतीत्यर्थः। तेन कर्मणावश्यकर्तव्यत्वेन पितॄणां लोकः पितॄणां भोज्यत्वे परतंत्रो लोकोऽथ यन्मनुष्यान्वासयते भूम्युदकादिदानेन गृहे स्वतेभ्यो वसद्भ्योऽवसद्भ्यो वार्थिभ्योऽसनं ददातीति। तेन मनुष्याणां अथ यत्पशुभ्यस्तृणोदकं विंदति लंभयति तेन पशूनां। यदस्य गृहेषु श्वापदाक्त

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते तेन पितॄणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विंदति तेन पशूनां यदस्य गृहेषु श्वापदा वयांस्या पिपीलिकाभ्य उपजीवंति तेन तेषां लोको यथा ह वै स्वाय लोकायाऽरिष्टिमिच्छेदेवं हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छंति तद्वा एतद्विदितं मीमांसितं॥ ५३॥ ॥

वयांसि च पिपीलिकाभिः सह कणबलिभांडक्षालनाद्युपजीवंति तेन तेषां लोकः। यस्मादयमेतानि कर्माणि कुर्वन्नुपकरोति देवादिभ्यस्तस्माद्यथा ह वै स्वाय लोकाय स्वस्मै देहायारिष्टिमविनाशं स्वत्वभावाऽप्रच्युतिमिच्छेत्॥ स्वत्वभावप्रच्युतिभयात्पोषणरक्षणादिभिः सर्वतः परिपालयेदेवं ह एवंविदे सर्वभूतभोग्योऽहमनेन प्रकारेण मयावश्यमृणिवत्प्रतिकर्तव्यमित्येवमात्मानं परिकल्पितवते सर्वाणि भूतानि देवादीनि यथोक्तान्यरिष्टमविनाशमिच्छंति॥ स्वत्वाऽप्रच्युत्यै सर्वतः संरक्षंति॥ ऊकुं विनश्यत्पशुभूत्॥ तस्मादेषां तन्न प्रियमित्युक्तं॥ तद्वा एतत्तद्यथोक्तानां कर्मणामृणवदवश्यकर्तव्यत्वं पंचमहायज्ञप्रकरणे विहितं कर्तव्यतया मीमांसितं विचारितं चावदानप्रकरणे॥ ५३॥ ॥७॥ ॥७॥ ॥७॥

राम।

दैवं वित्तं । संपन्नो विषयभूतं । शरीरस्य कर्मत्वमप्रसिद्धमिति शंकित्वा परिहरति । कथं पुनरिति । उक्तरीत्या कृत्स्नत्वे सिद्धे फलितमाह । तस्मादिति । कृत्स्नस्य प्रयोजकत्वाविशेषात् पृथग्ग्रहणमयुक्तमित्या
शंक्याह । पशुत्वेऽपीति । न केवलं पशुपुरुषयोरेव पांक्तत्वं । किंतु सर्वस्येत्याह । किं च कृत्स्नेति । पञ्चभिरात्मजायापुत्रकर्ममानुषवित्तदैववित्तैः कर्म निर्वर्त्यत इति कर्म पांक्तं । फलस्यापि कर्मका
र्यत्वात् पांक्तत्वं । य एवं वेदेति । साध्यं साधनं च पांक्तमुक्त्वा आत्मना ज्ञात्वा तत्त्वोपासनेनानुसंदधानस्य तदाप्तिरेव फलं । तत ऊर्ध्वं न्यायादित्यर्थः । ब्राह्मणान्तरमवतार्य संगतिं वक्तुं वृत्तं संकीर्त्त

किं पुनस्तद्दैववित्तं श्रोत्रं च दैवं देवविषयत्वाद्विज्ञानस्य विज्ञानं दैवं वित्तं तदिह श्रोत्रमेव संपन्नं तद्विषयं कस्मात् श्रोत्रेण हि यस्मात्तद्दैवं वित्तं विज्ञानं शृणोत्यतः श्रोत्राधीनत्वाद्विज्ञा
नस्य श्रोत्रमेव तदिति । किं पुनरेतैरात्मादिवित्तान्तैरिह निर्वर्त्यं कर्म उच्यते आत्मैव आत्मेति शरीरमुच्यते । कथं पुनः शरीरमात्मा कर्मस्थानीयः अस्य कर्महेतुत्वात् कथं कर्महेतुत्वमात्मना हि
शरीरेणायं कर्म करोतीति तस्य कृत्स्नत्वाभिमानिन एव कृत्स्नता संपन्ना यथा वा जायादिलक्षणो वित्तं तस्मात्स एष पांक्तः पंचभिर्निर्वृत्तः पांक्तो यज्ञस्य दर्शनमात्रनिर्वृत्तो ऽ
कर्मिणोऽपि कथं पुनरस्य पञ्चत्वसंपत्तिमात्रेण यज्ञत्वमुच्यते ॥ यस्माद्बाह्योऽपि यज्ञः पशुपुरुषसाध्य ॥ स च पशुः पुरुषश्च पांक्त एवं यथोक्तमनआदिपञ्चत्वयोगा
त्तदाह पांक्तः पशुर्गवादिः पांक्तः पुरुषः पशुत्वेऽप्यधिकृतत्वेनास्य विशेषः पुरुषस्येति पृथक्पुरुषग्रहणं किं बहुना पांक्तमिदं सर्वं कर्मसाधनफलं च यदिदं यत्किं
चिदिदं सर्वमेवं पांक्तं यज्ञमात्मानं यः संपादयति स तदिदं सर्वं जगदात्मत्वेनाप्नोति य एवं वेद ॥ ५४ ॥ ॥ इति श्रीबृहदारण्यकभाष्ये तृतीये प्रपाठके चतुर्थं ब्राह्मणं ॥
यत्सप्तान्नानि मेधया अविद्या प्रकृता । तत्राविद्वानन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति स वर्णाश्रमाभिमानः कर्मकर्त्ता व्रतयानियतो जुहोत्यादिकर्मभिः कामप्र

श्रोत्रं दैवꣳ श्रोत्रेण हि तच्छृणोत्यात्मैवास्य कर्मात्मना हि कर्म करोति स एष पांक्तो यज्ञः पांक्तः पशुः पांक्तः पुरुषः पांक्तमिदꣳ सर्वं यदिदं किंच
तदिदꣳ सर्वमाप्नोति य एवं वेद ॥ ५४ ॥ चतुर्थं ब्राह्मणं ॥ ॥ यत्सप्तान्नानि मेधया तपसाजनयत्पिता एकमस्य साधारणं द्वे देवानभाजयत् त्रीण्यात्मनेऽकु
रुत पशुभ्य एकं प्रायच्छत्तस्मिन्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन स देवानपिगच्छति स ऊर्जमुपजी

प्रयुक्तो देवादीनामुपकुर्वन्नेवमेषां भूतानां लोक इत्युक्तं यथा च स्वकर्मभिरेकैकेन सर्वैर्भूतैरसौ लोको भोज्यत्वेन सृष्ट एवमसावपि जुहोत्यादिपांक्तकर्मभिः सर्वाणि भूतानि सर्वं च
जगदात्मभोज्यत्वेनासृजत एवमेकैकः स्वकर्मविद्यानुरूपेण सर्वस्य जगतो भोक्ता भोज्यं च सर्वस्य सर्वः कर्त्ता कार्यं चेत्यर्थः । एतदेव च विद्याप्रकरणे मधुविद्यायां वक्ष्याम
ः सर्वं सर्वस्य कार्यं सर्वाधिकत्वात्मैकत्वविज्ञानार्थं । यदसौ जुहोतीत्यादिना पांक्तेन काम्येन कर्मणा आत्मभोज्यत्वेन जगदसृजत विज्ञानेन च तज्जगत्सर्वं सप्तधा प्रविभज्य
मानं कार्यं करत्वेन सप्तान्नान्युच्यन्ते भोज्यत्वात् तेनान्नानीति तानि तेषां मन्त्रान् सूत्रभूतान् संक्षेपतः प्रकाशकत्वादिमान् मंत्रान् यत्सप्तान्नानि यदजनयदिति क्रियाविशेषणा
मेधया प्रज्ञया विज्ञानेन तपसा च कर्मणा ज्ञानकर्मणी एव हि मेधातपःशब्दवाच्ये तयोः प्रकृतत्वात् नेतरे मेधातपसी अप्रकरणात् । पांक्तं हि कर्म जायादिसाधनं य एवं वेदेति
चानन्तरमेव ज्ञानं प्रकृतं तस्मान्न प्रसिद्धमेधातपसी आशंका कार्या । अतो यानि सप्तान्नानि ज्ञानकर्मभ्यां जनितवान् पिता तानि विप्रकाशयिष्याम इति वाक्यशेषः ॥ ॥ ५५ ॥

वति । यत्सप्तान्नानीत्यादिना । नेदं त्यतिक्रान्तब्राह्मणोक्तिं वशीकृतः । पृथा चेति निगृहीणो जगतश्च परस्परं स्वकर्मोपार्जितत्वमेष्टव्यं । अन्यथाऽन्योन्योपकारकत्वायोगादित्यर्थः । एकैकेनेत्यस्य विवरणं सर्वैर्भूतैरि
ति । सर्वाणि भूतानीत्युक्तं उपकुर्वन्तीति सर्वेषामपि भूतानामविद्याभोज्यत्वं अविद्याश्च भोक्ता । असौ अविद्वान् जुहोति त्वेन यत्जगदसृजत विज्ञानेन च इति योजना । ज्ञानं चात्र कर्मविषयं । साध्यसाधनत्वेन
वर्तेनेति ज्ञानकर्मभ्यां उत्पादकत्वेन । यानि सप्तान्नानि अजनयत् इत्यं क्रियायामन्वयात् यदिति तस्याः क्रियाविशेषणत्वं । प्रकृते । अत इति । ज्ञानकर्मणोरेव प्रकृतत्वात् । एकमस्य साधारणमित्यादिना वक्ष्य
माणेन वचनेन तानि सप्तान्नानि विभागेन कथयिष्याम इत्यर्थः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

कथं न प्रकाशेरन्॥ प्रसिद्धिमुपपादयन्पृच्छति॥ नन्विति॥ उत्पादकत्वं पुत्रेणायं लोको जय्य इत्यादौ वक्ष्यमाणत्वात्तस्यार्थस्य प्रसिद्धतेत्याह॥ वक्ष्यमाणं चेति। सर्वो हि० अयमिति विचार्य एतस्मा० त्वा इति हेतोः शास्त्रीयः साध्यसाधनभावोऽविवक्षित इति भावः। विद्यादीति फ० साधनं। साध्यकश्चाविद्वान्॥ प्रकाराणामुक्तार्थस्य प्रसिद्धत्वमाह॥ एषणा हीति॥ वाक्यरचनान्तरेण। इच्छाविषयभूतजायादिकं इत्यर्थः। जायाद्यात्मकस्य कामस्य संसारारम्भकत्ववन्मोक्षेऽपि कामः संसारमारभेत॥ कामत्वादित्याशङ्क्याह॥ ब्रह्मविद्येति। अशास्त्रीयप्रज्ञावत्तपश्च तपसी ताभ्यां। स्वाभाविकाभ्यामिति। अवि······ मप्रयुक्ताभ्यामित्यर्थः। एतेनेति। अविद्यात्मकामस्य संसारहेतुत्वोपदर्शनेन॥ इतश्चाविद्याधानकामप्रयुक्तयोः प्रज्ञानतपसोर्जगत्सृष्टिप्रयोजकत्वमेष्टव्यमित्याह। स्थावरान्तस्येति॥ ब्राह्मणस्याक्षरार्थमर्थं

तत्र संग्रहणार्थाः श्लोका हि तत्त्वान्यायेन दुर्विज्ञेया भवन्तीति तदर्थव्याख्यानाय ब्राह्मणं प्रवर्तते॥ तत्र यत्सप्तान्नानि मेधया तपसाजनयत्पितेति अस्य कोऽर्थः उच्यत इति हिशब्देनैव व्याचष्टे प्रसिद्धार्थद्योतकेन प्रसिद्धो ह्यस्य मन्त्रस्यार्थ इत्यर्थः। यदजनयदिति चानुवादस्वरूपेण प्रसिद्धार्थतैव प्रकाशिता नुता ब्राह्मणमविशंकयैवाह मेधया हि तपसाजनयत्पितेति। ननु कथं प्रसिद्धतास्यार्थस्येत्युच्यते। जायादिकर्मान्तानां लोकफलसाधनानां पितृत्वं तावत्प्रत्यक्षमेवाभिहितं जायामुपेयादित्यादिना। तत्र च दैवं वित्तं विद्या कर्म पुत्रश्च फलभूतानां लोकानां साधनत्वेनोक्तानीत्यभिहितं वक्ष्यमाणं च प्रसिद्धमेव तस्माद्यत्किंच कर्मेत्यादिरेषणा हि फलविषया प्रसिद्धैव च लोके। एषणा च जायादिफलकर्मत्वादा च काम इत्यनेन। ब्रह्मविद्याविद्याविषयं च सर्वं कृत्वा कामादुपपद्येरन्नेनाशास्त्रीयप्रज्ञान

यत्सप्तान्नानि मेधया तपसाजनयत्पितेति मेधया हि तपसाजनयत्पितैकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमद्यते स य एतदुपास्ते·

तपोभ्यां स्वाभाविकाभ्यां जगत्सृष्टत्वमुक्तमेव भवति स्थावरान्तस्य चानिष्टफलस्य कर्मविज्ञाननिमित्तत्वादविवक्षितश्च शास्त्रीय एव साध्यसाधनभावो ब्रह्मविद्याविधित्सया तद्वैराग्यस्य विवक्षितत्वात्सर्वो ह्ययं व्यक्ताव्यक्तलक्षणः संसारोऽशुद्धोऽनित्यः साध्यसाधनरूपो दुःखोऽविद्याविषय इति एतस्माद्विरक्तस्य ब्रह्मविद्यार तत्रान्नानां विभागेन विनियोग उच्यते॥ एकमस्य साधारणमिति। मन्त्रपदं तस्य व्याख्यानमिदमेवास्य तत्साधारणमन्नमित्युक्तमस्य भोक्तृसमुदायस्य किं तद्यदिदमद्यते भुज्यते सर्वैः प्राणिभिरहन्यहनि तत्साधारणं सर्वभोक्त्रर्थमकल्पयत्पिता सृष्ट्वान्नं। स य एतत्साधारणं सर्वप्राणभृत्स्थितिकरं भुज्यमानमन्नमुपास्ते तत्परो भवतीत्यर्थः। उपासनं हि नाम तात्पर्यं दृष्टं लोके गुरुमुपास्ते राजानमुपास्त इत्यादौ। तस्माच्छरीरस्थित्यर्थान्नोपयोगप्रधानो नादृष्टार्थकर्मप्रधा

मुक्तानां तात्पर्यार्थमाह। विवक्षितत्वादिति। आत्मपरत्वस्य श्रुत्यापि तद्वेद्यसाध्यसाधनभावादशास्त्रीयादेरसंभवान्न तस्यात्र विवक्षितत्वमित्यर्थः॥ शास्त्रीयस्य साध्यसाधनभावस्याविवक्षितत्वे हेतुमाह॥ ब्रह्मेति॥ तदेव प्रपञ्चयति॥ सर्वो हीति॥ अभावो मिथ्यात्वं। मन्त्रविधेर्नसृष्टेसति। व्याख्यानमेव विवृणोति॥ अस्येत्यादि॥ अस्य० यस्य यत्साधारणमन्नमुक्तं तदिदमेवेत्यर्थः॥ पितात्र कर्ता। स्वयमेव केवलं भुंक्ते इत्यर्थः॥ तस्मात्तच्छरीरस्थित्यर्थादन्नादितरजनेभ्यो। उत्सदानपरो नापि देवाद्यर्थकर्मवानित्यर्थः। यो नं कस्मैचिन्न प्रयच्छति। नो वा देवेभ्यो ददाति स पा

47

त्वस्यान्नभक्षके स्वपापं मार्ष्टि शोधयतीत्यन्नदातुः पापक्षयो भोक्तेति तस्य पापमिति । दुष्कृतं हीति । यदा हि मनुष्याणां दुष्कृतमन्नमाश्रित्य तिष्ठति । तदा तदा साधारणीं कुर्वतो महत्तरपापं भवतीत्यर्थः । चंडालादिभिर्भक्ष्यमाणस्यान्नस्यापि ग्रहणं यथा भवति तथा व्याख्यानं युक्तं । इदानीं तस्य प्रत्यवायस्य त्वादिदमापरमर्शश्च नयुक्तिमात्रमित्याह । मपीति । इतश्च साधारणशब्देन सर्वप्राणिनां ग्राह्यमित्याह । सर्वेति । सर्वसाधारणेनान्नेन । चंडालादिभिर्भक्ष्यमाणस्यान्नस्यापि ग्रहणं यथा भवति तथा व्याख्यानं युक्तं । परपक्षे चावश्यंभाविविरोधं दोषान्तरमाह न चेति । अवश्यं यातीति यत्किं दुष्यावैवा कृतं हविरित्यं कस्माद्वैश्वदेवस्य प्रत्यवायश्रवणाच्चेत्तदनुष्ठापिनेनापाप्मवेधोस्तीत्याह । अकरणे चेति । सर्वसाधारणान्नग्रहे तु तन्परस्य निंदावचनमुपपद्यते । तेन

स एवंभूतो न पाप्मनोऽधर्माद्व्यावर्त्तते न विमुच्यत इत्येतत्तथा च मंत्रवर्णो मोघमन्नं विंदते इत्यादि स्मृतिरपि नात्मार्थं पाचयेदन्नमप्रदाय येभ्यो यो भुंक्ते स्तेन एव सः अन्नादो भ्रूणहन्मार्ष्टीत्यादि । कस्मात्पुनः पाप्मनो न व्यावर्त्तते मिश्रं ह्येतत्सर्वेषां हि स्वं तदप्रविभक्तं यत्प्राणिभिर्भुज्यते सर्वभोज्यत्वाद्वैश्वदेवस्य यथासुखेन प्रक्षिप्यमाणो ग्रासः परस्य पाणिकरो दृश्यते समेदं स्यादिति हि सर्वेषां तत्रासाप्रतिवद्धा तस्मान्न परमपीडयित्वा ग्रसितुमपि शक्यते दुष्कृतं हि मनुष्याणामित्यादिस्मरणाच्च । गृहिणा यद्वैश्वदेवाख्यमन्नमह्न्यह्नि निरूप्यत इति किंचित्तन्न सर्वभोक्तृसाधारणत्वं वैश्वदेवाख्यस्यान्नस्य न सर्वप्राणिभृज्यमानान्नवत्प्रत्यक्षं । नापि यदिदमप्यत इति तद्विषयं वचनमनुकूलं सर्वप्राणिभिर्भुज्यमानान्नः पातित्वाच्च वैश्वदेवाख्यस्य युक्तं च चंडालाद्यस्यान्नस्य ग्रहणं वैश्वदेवव्यतिरेकेणापि श्वचंडालाद्याद्यान्नदर्शनं । तत्र युक्तं यदिदमद्यत इतिवचनं यदि हि तन्न गृह्येत साधारणशब्देन पित्र्यः मनुष्याः विनियुक्तत्वात्तस्य प्रसज्येयातां । इष्यते हि तत्स्वत्वं तत्विनियुक्तात्वं च सर्वस्यान्नजातस्य न च वैश्वदेवाख्यं शास्त्रोक्तकर्म कुर्वतः पाप्मनो विनिवृत्तिर्युक्ता । न च तस्य प्रतिषेधोऽस्ति न च तस्य बंधनादिकर्मवत्स्वभावजुगुप्सितमेतच्छिष्टानिवर्त्तत्वादकारणे च प्रत्यवायश्रवणादि

न स पाप्मनो व्यावर्त्तते मिश्रं ह्येतत् तद्देवान्भाजयेदिति हुतं च प्रहुतं च तस्माद्देवेभ्यो जुहोति प्रच जुहूत्यथो आहुर्दर्शपूर्णमासाविति तस्मान्नेष्टियाजुकः स्यात्पशुभ्य एकं प्रायच्छेदिति शतपथः)

तत्र च प्रत्यवायोपपत्तेः स्वमन्नमन्नमदंतमद्मीति मंत्रवर्णात् । देवान्भाजयेदिति मंत्रपदं ये देवअग्न्यादयस्तान्देवान्भाजयेत्ते देवा इत्युच्यते । हुतं च प्रहुतं च हुतमित्यग्नौ हवनं । प्रहुतं हुत्वा बलिहरणं । यस्माद्धुते अग्नौ हुतप्रहुते देवान्भाजयतीति । तस्मादेतर्हि पि गृह एव ले देवेभ्यो जुहोति देवेभ्यः स्वमन्नमस्माभिर्दीयमानमिति मन्वानाः जुहोति प्रचजुहोति प्रजुहोति च । हुत्वा बलिहरणं च कुर्वत इत्यर्थः । अथो अप्यन्य आहुः अग्नेरपि ग्रावदेवेभ्यः प्रेतन हुतप्रहुते किं तर्हि दर्शपूर्णमासाविति । द्वित्वश्रवणाविशेषादत्यन्तप्रसिद्धत्वाच्च हुतप्रहुते इति प्रथमः पक्षः । यद्यपि द्वित्वं हुतप्रहुतयोः संभवति तथापि श्रौतयोरेव तु दर्शपूर्णमासयोर्देवान्नत्वं प्रसिद्धतरं मंत्रप्रकाशितत्वात् गुणप्रधानप्राप्तौ च प्रधानं प्रथमतरमवगतं दर्शपूर्णमासयोश्च प्राधान्यं हुतप्रहुतापेक्षया । तस्मात्तयोरेव ग्रहणं युक्तं देवान्भाजयेदिति । यस्माद्देवार्थमेतेपि श्रावेत्ते दर्शपूर्णमासावेव अन्नेन तस्मात्तयोर्देवार्थत्वाऽवियातायन इष्टियाजुकः इष्टियजनशीलः इष्टिशब्देन किल काम्याः इष्टय उच्यन्ते शतपथीय प्रसिद्धिर्ह्लाछील्य प्रत्यययोगात्काम्येष्टियजनप्रधानो न स्यादित्यर्थः । पशुभ्य एकं प्रायच्छेदिति । यत्पशुभ्यः प्रायच्छत्यितां किं पुनस्तद

तो द्यन्नं स्यादित्याह । तरेवेति । यदि दर्शपूर्णमासौ देवान्ने कथं तर्हि हुतप्रहुते इति पक्षस्य प्राप्तिस्तत्राह । द्विवेति । तर्हि द्वे देवान्नेति भ्रांत्या द्वित्वसाहुतप्रहुतयोरपि संभवान्न प्रथमपक्षस्य पूर्वपक्षत्वमत आह । एवमेति । स्तत्र दर्शपूर्णमासयोरेव देवान्नत्वमिति वक्तुं न्याय्यमित्याह । गुणेति । कस्य पुनः शीलता सत्र स्थाननिषेधे लिंगं काम्येवा काम्या वा स्यादित्याशंक्याह । ताच्छील्येति । शतपथे इष्टिशब्दः काम्येष्टौ प्रसिद्धः इत्यर्थः । त्रीण्यात्मनेः कुर्वते न यदुक्तं तान्यग्रे कथयिष्यति । दर्शपूर्णमासौ अकुर्वन्न केवलं काम्येष्टिर्न कुर्यादित्यर्थः । बालेभ्यो मनुष्येभ्यः पशुभ्यश्चेत्यर्थः ॥ ॥

बृ·भा·
४८

पशवो द्विपादश्चतुष्पादश्चेति श्रुतिमाश्रित्य मनुष्याश्चेत्युक्तं। नियमेन पशूनां तदुपजीवनमसंप्रतिपन्नमिति शंकते। कथमग्र इति। मनुष्यविषये वा प्रश्नस्तद्भिन्नपशुविषये वेति पृच्छति उच्यत इति। तत्राद्यमनुभवावष्टंभेन प्रत्याचष्टे। मनुष्याश्चेति। सुवर्णसंयुक्तं। यङ्लुगंतात्णिचि। त्रैवर्णिकेष्वेवान्येषामजातकर्मभावाद्योग्यतामनतिक्रम्य स्तनमेव जातं कुमारं प्र यर्मपानयंतीत्याह। यथासंभवमिति। पशुविषयं प्रश्नं प्रत्याह। स्तनमेवेति। मनु० भूनां जातं वत्समिति संबंधः। पशूनां पयोन्नमित्यत्र लोकप्रसिद्धिं प्रमापयति। अथेति। वित्तेन पयसा साध्यं

कथं पुनरवगम्यते पशवोऽप्यस्यान्नस्य स्वामिन इति अत आह। पयो हि अग्रे प्रथमे यस्मान्मनुष्याश्च पशवश्च पय एवोपजीवंती। उचितं हि तेषां तदन्नम न्यथा कथं तदेवाग्रे नियमेनोपजीवेयुः। कथमग्रे तदेवोपजीवंतीत्युच्यते। मनुष्याश्च पशवश्चेदानीमपि यस्मात्तेनैवान्नेन वर्त्तंते ऽग्रत्वेपि यथा पित्रा आदौ विनियोगः कृतः तस्मात्कुमारं बालं जातं घृतं त्रैवर्णिका जातकर्मणि जातरूपसंप्रयुक्तं प्रतिलेहयंति। प्राशयंति स्तनं वानुधापयंति पश्चात्पाययंति। यथासंभवमन्येषां स्तनमेवाग्रे धापयंति मनुष्येभ्योन्येषां पशूनामथ वत्सं जातमाहुः कियत्प्रमाणो वत्स इत्येवं पृष्टाः संतो ऽतृणाद इति

पयो ह्येवाग्रे मनुष्याश्च पशवश्चोपजीवंति तस्मात्कुमारं जातं घृतं वैवाग्रे प्रतिलेहयंति स्तनं वानुधापयंत्यथ वत्सं जातमाहुरतृणाद इति। ॥७॥ ॥७॥ ॥

नाद्यापि तृणमत्त्यतीव बालः पयसैवाद्यापि वर्त्तत इत्यर्थः। यद्वाग्रे जातकर्मादौ घृतमुपजीवंति यच्चेतरे पय एव तत्सर्वथापि पयस्येवोपजीवंति घृतस्यापि पयोविकारत्वात्पयस्त्वमेव कस्मात्पुनः सप्तमं सत्पश्वन्नं चतुर्थत्वेन व्याख्यायते। कर्मसाधनत्वात्कर्म हि पयः साधनाश्रयमग्निहोत्रादि तच्च कर्म साधनं वित्तसाध्यं च वक्ष्यमाणस्यान्नत्रयस्य साध्यस्य यथा दर्शपूर्णमासौ पूर्वोक्तावन्ने अतः कर्मपक्षत्वात्कर्मगणासह पिंडीकृत्योपदेशः साधनत्वाविशेषादर्थसंबंधादानंतर्यमकारणमिति च व्याख्याने प्रतिपत्तिसौकार्यार्थंतु खहि नैरंतर्येण व्याख्यातुं शक्यतेन्यानि व्याख्यानानि च सुखं प्रतीयते।

48

शिवः
४८

कर्म। वक्ष्यमा० साध्यस्य साधनं। तत्र दृष्टांतमाह। यथेति पूर्वोक्तौ दर्शपूर्णमासौ वक्ष्यमाणस्यान्नत्रयस्य यथा साधने तथा पयोप्यग्निहोत्रादिद्वारा तत्साधनत्वात्कर्मकोटिनिविष्टत्वात्तद्व्याख्यानंतर्यं पयोव्याख्यानस्य युक्तमित्यर्थः। आनंतर्यं पाठक्रमं। अकारणं अविवक्षितमिति प्रथमतंत्रे स्थितं। पश्वन्नस्य चतुर्थत्वेन व्याख्याने हेत्वंतरमाह व्याख्यानमिति। चत्वारि साधनानि त्रीणि साध्यानीति विभज्योक्तौ वक्तृश्रोत्रोः सौकर्येण धीर्भवति। ततश्च पाठातिक्रमः श्रेयानित्यर्थः॥ ॥७॥ ॥राम॥ ॥

मंत्रोक्तेरेव ब्राह्मणेन प्रतिभातीत्याशंक्याह । तत्त्वेति । पयस्विनीर्हीति ब्राह्मणोक्तिहिशब्दस्य प्रसिद्धवद्योतकत्वमस्ति । तेन हेतुना हिशब्देन तस्मिन्नित्यादिपदं व्याख्यातमिति योजना । यद्ब्राह्मणान्तरेष्विदमाहुः वक्ष्यमाणमाहुः तत्तन्न तथा विद्यात । न केवलेन कर्मणा मृत्युमपजयति । किंतु दर्शनसहितेनेति दर्शयितुमग्निहोत्राहुतिसंख्यां कथयति । संवत्सरे वेति । आहुतीनां संख्यामुक्त्वा अहोरात्राहुतीरिष्टकीकृत्य तासु षष्ट्यधिकत्रिशतसंख्याकासु याजुष्मतीनामिष्टकानां दृष्टिमाह । याजुष्मतीरिति । तासामपि षष्ट्यधिकानि त्रीणि शतानि संख्यया भवंतीति तथा च प्रत्यहमाहुतीरभिनिष्पद्यमानाः संख्यासामान्येन याजुष्मतीरिष्टका अभिसंपद्यंत इत्यर्थः । संवत्सरावयवाहोरात्रेषु संख्यासामान्येन दृष्टिमन्वाचष्टे । संवत्सरस्येति । तान्यपि षष्ट्यधिकानि त्रीणि शतानि प्रसिद्धानि । तथा च तेषु इष्टकादृष्टिसिद्धिरित्यर्थः । चितोऽग्निः संवत्सरात्मप्रजापतिदृष्टिमाह । संवत्सरमिति । यः संवत्सरः प्रजापतिः स चित्योऽग्निर्विद्वांसः संपादयंति । दृष्टिमनूद्य फलं दर्शयति । एवं कृत्वा संवत्सरमिति । अग्नि

तस्मिन्त्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेत्यस्य कोऽर्थ इत्युच्यते । तस्मिन्नग्न्यब्भस्ते पयसि सर्वमध्यात्माधिभूताधिदैवलक्षणं कृत्स्नं जगत्प्रतिष्ठितं यच्च प्राणिति प्राणचेष्टावद्यच्च न स्थावरं तदित्यत्र हि शब्देनैव प्रसिद्धावद्योतकेन व्याख्यातं । कथं पयसो द्रव्यस्य सर्वप्रतिष्ठात्वं कारणत्वोपपत्तेः । कारणत्वं चाग्निहोत्रादिकर्मसमवायित्वमग्निहोत्राहुतिविपरिणामात्मकं च तत्कृत्स्नमिति श्रुतिस्मृतिवादाः शतशो व्यवस्थिताः । अतो युक्तमेव हि शब्देन व्याख्यातुं यत्तद्ब्राह्मणान्तरेष्विदमाहुः । संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति । संवत्सरेण किल त्रीणि षष्टिशतान्यप्युनेषु चाहुतीनां सप्तशतानि विंशतिश्चेति याजुष्मतीरिष्टका अभिसंपद्यमानाः संवत्सरस्य चाहोरात्राणि संवत्सरमग्निं प्रजापतिमाप्नुवंत्येवं कृत्वा संवत्सरं जुह्वदपजयति पुनर्मृत्युमसितः प्रेत्य देवेषु संभूतः पुनर्न म्रियत इत्यर्थः । इत्येवं ब्राह्मणवादा आहुः । न तथा विद्यान्न तथा द्रष्टव्यं । यदहरेव जुहोतीति । तदहः पुनर्मृत्युमपजयतीति न संवत्सराभ्यासमपेक्षते एवं विद्वान्यदुक्तं पयसि हीदं सर्वं प्रतिष्ठितं पय आहुतिविपरिणामात्मकत्वात्सर्वस्येति तदेकेनैवाहु

तस्मिन्त्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न । तद्यदिदमाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वान्त्सर्वं हि देवेभ्योऽन्नाद्यं प्रयच्छति कस्मात्तानि न क्षीयंतेऽद्यमानानि सर्वदेति ·

जगदात्मत्वं प्रतिपद्यते तदुच्यते अपजयति पुनर्मृत्युं पुनर्मरणं सकृन्मृत्वा विद्वान्शरीरेण वियुज्य सर्वात्मा भवति न पुनर्मरणाय परिच्छिन्नं शरीरं गृह्णातीत्यर्थः । कः पुनर्हेतुः सार्वात्म्यप्राप्तौ मृत्युमपजयतीत्युच्यते सर्वं समस्तं हि यस्माद्देवेभ्यः सर्वेभ्योऽन्नाद्यमन्नमेव तदाद्यं च सायंप्रातराहुतिप्रक्षेपेण प्रयच्छति तद्युक्तं सर्वमाहुतिमयमात्मानं कृत्वा सर्वदेवान्नरूपमात्मानं देवैरेकात्मभावं गत्वा सर्वदेवमयो भूत्वा पुनर्न म्रियत इत्यर्थः । एतदप्युक्तं ब्राह्मणेन ब्रह्म वै स्वयंभु तपोऽतप्यत तदैक्षत न वै तपस्यानंत्यमस्ति हंताहं भूतेष्वात्मानं जुहवानि भूतानि चात्मनीति तत्सर्वेषु भूतेष्वात्मानं हुत्वा भूतानि चात्मनि सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्यैदिति । कस्मात्तानि न क्षीयंतेऽद्यमानानि सर्वदेति । यदा पित्रान्नानि सृष्टानि पृथक्पृथग्भोक्तृभ्यः प्रत्तानि । तदाप्रभृत्येव तैर्भोक्तृभिरद्यमानानि तन्निमित्तत्वात्तेषां स्थितेः सर्वदानवरतं येन कृतक्षयोपपत्तेश्च युक्तस्तेषां क्षयो न च तानि क्षीयमाणानि जगतोऽविप्रकृष्टरूपेणैवावस्थादर्शनाद्भवितव्यं चाक्षयकारणेन तस्मात्कस्मात्पुनस्तानि न क्षीयंत इति प्रश्नः ॥ ॥राम॥ ॥राम॥ ॥राम॥

ख्यासामान्ये । नाग्निहोत्राहुतीष्वन्यवयवभूतयाजुष्मतीसंज्ञकेष्टकाः संपादयतद्रूपेणाहुतीर्ध्यायन्नाहुतिममी चेष्टकाः संवत्सराहोरात्राणि संख्यासामान्येनैव संपाद्य पुरुषनाडीस्थसंख्यासामान्येन तन्नाडीलान्यवाहोरात्राण्यपायाद्यतद्रूपेणाहुतीरिष्टकानाडीश्चानुसंदधानो नाद्यहोत्रयाजुष्मतीनाद्यपुरुषसंवत्सरचित्यानां समत्वमापाद्याऽहमग्निः संवत्सरात्मा प्रजापतिरेवेति ध्यायन्नग्निहोत्रं पयसा संवत्सरं जुहोतीत्येवं यत्संहितहोमवशात्प्रजापतिं संवत्सरात्मकं प्राप्य मृत्युमपजयतीत्यर्थः । एषोऽत्र कल्पार्थभिदं । एवं विद्वानित्युक्तं व्यक्तीकरोति यदुक्तमिति । तत्तथैव विद्वानेकाहोरात्रावच्छिन्नाहुतिमात्रेणा जन्मद्रूपं प्रजापतिं प्राप्य मृत्युमपजयतीत्याह । तदेकेनेति । अहमग्निः संवत्सरात्मा प्रजापतिरिति ध्यायन्पयसा जुह्वत्पथोक्तदर्शनवशादेकयाहुत्या मृत्युं जयतीत्यत्र ब्राह्मणांतरसंवाद इत्यर्थइति । ब्रह्म हिरण्यभावी जीवः । स्वयंभूः यः स एव तदात्मनावस्थानात् । तपोऽतप्यत कर्मान्वतिष्ठत् । कर्मसहायभूतामुपासनामुपदिशति । हंतेति । तान्यन्नानि कस्मान्न क्षीयंते ॥ ॥रामरामराम ॥

यस्मादेवेत्यर्थः। यथाज्ञातं। प्रतिक्षणाध्वंसित्वे पुनःपुनः क्रियमाणत्वात्स्वबाह्यात्मना नदृश्चलं मंदाः पश्यंतीत्यत्र श्रुतेस्तात्पर्यमाह। अत इति। प्रज्ञाक्रियाभ्यां हेतुभ्यां लक्ष्यते निष्पाद्यः प्रतिबंधः समुदायरूपः
दारूढलक्षणात्मकः सर्वो लोकः चेतनाचेतनात्मकः प्रपंचः स्थास्नुत्वेन च वर्तमानः ज्ञानकर्मफलभूतः क्षणिकोऽपि नित्य इव लक्ष्यते। प्रतिक्षणध्वंसित्वेऽपि पुनःपुनः क्रियमाणत्वात्। तत्र हेतु।
संहतेति। संहतानां मिथः सहायत्वेनास्थितानां नानात्मनेकेषां प्राणिनामनंतानि कर्माणि वासनाश्च तत्संतानेन दृढीकृतत्वात्। प्रातीतिकमेव संसारस्य स्थैर्यं न तात्त्विकमिति वक्तुं विशि॰

तस्येदं प्रतिवचनं पुरुषो वा अक्षितिर्यथासौ पूर्वमन्नानां स्रष्टासीत्पिता मेधया ज्ञानया दास्वंवंधेन च पाङ्क्तकर्मणा भोक्ता च तथा येभ्यो दत्तान्यन्नानि तेऽपि तेषामन्नानां भो
क्तारोऽपि संततः पितर एव मेधया तपसा च यतो जनयंति तान्यन्नानि तदेतदभिधीयते पुरुषो वै योऽन्नानां भोक्ता सोऽक्षितिरक्षयहेतु कथं तस्याक्षितित्वमित्युच्यते। सो
हि यस्मादिदं भुज्यमानं सप्तविधं कार्यकरणलक्षणं क्रियाफलात्मकं पुनःपुनर्भूयो भूयो जनयते उत्पादयति धिया धिया तत्तत्कालभाविन्या तया प्रज्ञया कर्म
भिश्च वाङ्मनःकायचेष्टितैर्यद्यदि यद्येतत्सप्तविधमन्नमुक्तलक्षणमात्रमपि न कुर्यात्प्रज्ञया कर्मभिश्च ततो विच्छिद्यते भुज्यमानत्वात्सातत्येन क्षीयेत तद्। तस्मा
द्यथैवायं पुरुषो भोक्तान्नानां नैरंतर्येण यथाप्रज्ञं यथाकर्म च करोत्यपि तस्मात्पुरुषोऽक्षितिः सातत्येन कर्तृत्वात्तस्माद्भुज्यमानान्यप्यन्नानि न क्षीयंत इत्य
र्थः। अतः प्रज्ञाक्रियाफललक्षणप्रबंधारूढः सर्वो लोकः साध्यसाधनलक्षणः क्रियाफलात्मकः संहतानेकप्राणिकर्मवासनासंतानावष्टब्धत्वात्क्ष॰

पुरुषो वा अक्षितिः स हीदमन्नं पुनः पुनर्जनयते यो वैतामक्षितिं वेदेति पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया ज
नयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत ह सोऽन्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत्स देवानपि गच्छति स ऊर्ज
मुपजीवतीति प्रशंसा ॥ ५६ ॥ ॥रामरामरामराम॥ ॥रामरामरामरामरामराम॥

णिकोऽशुद्धोऽसारो नदीश्रोतः प्रदीपसंतानकल्पः कदलीस्तंभवदसारः फेनमायामरीच्यंभःस्वप्नादिसमस्तदात्मगतदृष्टीनामवकीर्यमाणो नित्यः सारवानि
वलक्ष्यते। तदेतद्वैराग्यार्थमुच्यते धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत हेति। विरक्तानां ह्यस्मा ब्रह्मविद्यारब्धव्या चतुर्थप्रमुखेनेति। यो
वैतामक्षितिं वेदेति वक्ष्यमाणान्यपि त्रीण्यन्नानि अस्मिन्नवसरे व्याख्यातान्येवेति कृत्वा तेषां याथात्म्यविज्ञानफलमुपसंह्रियते। यो वैतामक्षितिमक्ष
यहेतुं यथोक्तं वेद। पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत हेति सोऽन्नमत्ति प्रतीकेनेत्यस्यार्थ उच्यते। मुखं मुख्य
त्वं प्राधान्यमित्येतत्प्राधान्येनैवान्नानां पितुः पुरुषस्याक्षितित्वं यो वेद सोऽन्नमत्ति नान्नं प्रति गुणभूतः सन्यथाऽज्ञो न तथा विद्वानन्नानामात्मभूतो भोक्तैव भवति न भो
ज्यतामापद्यते। स देवानपि गच्छति स ऊर्जमुपजीवतीति। देवानपि गच्छति देवात्मभावं प्रतिपद्यते। ऊर्जममृतं चोपजीवतीति यदुक्तं सा प्रशंसा नापूर्वोऽर्थोऽन्योऽस्ति॥ ५६॥ ॥

नदीस्रोत इति। संसारस्वरूपगतदृष्टीनां। तदासक्तचेतसामित्यर्थः। किमर्थं श्रुत्या प्रतिक्षणध्वंसिजगदुच्यते तत्राह। तदेतदिति। संसारात्। चतुर्थाध्यायारंभेण। व्याख्यातान्येव कृत्वेत्यर्थः। साधनोक्तौ
साध्यमुक्तमेव ज्ञेयं तयोः कार्यकारणभावेनाभेदाभावात्। यथोक्तमनुवदति। पुरुष इति। यः वेद। मुख्यत्वेनेत्यर्थः। प्रधान एव भवति। किं च तथाविद्वान् अन्ना॰ नेति। अप्रधानत्वं न प्राप्नोति॥ ॥

फलंसाधनतान्ग्रेस्संभवतीतिकार्यत्वमुत्कृष्टत्वेनहेतुरुक्तः।कल्पादौ·विषयेणसहस्वस्यसंबंधेसत्यपि।सति·यस्यमनस·।संनिधौसतिचक्षुरादेरूपशब्दादिज्ञानंभवति।विचारणां।पिण्ड्यास।

पांक्तस्यकर्मणः फलभूतानियानित्रीण्यन्नानिसुपक्षिप्तानितानिकार्यत्वाद्वत्तीर्णविषयत्वाच्चपूर्वेभ्योन्नेभ्यः पृथगुत्कृष्टानितेषांव्याख्यानार्थः उत्तरोग्रंथः।आद्यास्त्राणपरिसमा
प्तेः।त्रीण्यात्मनेऽकुरुतेति।कोस्यार्थइत्युच्यते।मनोवाक्प्राणएतानित्रीण्यन्नानितानिमनोवाचंप्राणंचात्मनेआत्मार्थमकुरुतकृतवान्सृष्ट्वादौपिता तेषांमनसो
स्तित्वंस्वरूपंचप्रतिसंशयइत्यतआह।अस्तितावन्मनः श्रोत्रादिबाह्यकरणव्यतिरिक्तं।यतएवंप्रसिद्धंबाह्यकरणविषयात्मसंबंधेसत्यप्यभिमुखीभूतंविषयं
नगृह्णातिकिंदृष्टवानसीदंरूपमितिपृष्टोवदत्यन्यत्रमेगतंमनआसीत्सोहंअन्यत्रमनाःसन्नादर्शं।तथेदंश्रुतवानसिमदीयंवचनमित्युक्तोन्यत्रमनाअभूवन्नाश्रौ
षंनश्रुतवानस्मीतितस्माद्यस्यासन्निधौरूपादिग्रहणसमर्थस्यापिसतश्चक्षुरादेस्स्वविषयसंबंधेरूपशब्दादिज्ञानंनभवतियस्यचभावेसतितदन्यदस्तिमनो
नामांतःकरणंसर्वकारणविषययोगीत्यवगम्यते।तस्मात्सर्वोहिलोकोमनसाह्येवपश्यतीमनसाशृणोतीतितद्व्यग्रत्वेदर्शनाद्यभावादस्तित्वेसिद्धेमनसःस्वरूपा
र्थमिदमुच्यते।कामःस्त्रीव्यतिकराभिलाषादिःसंकल्पःप्रत्युपस्थितविषयविकल्पनंशुक्लनीलादिभेदेनविचिकित्सासंशयज्ञानं।श्रद्धादृष्टार्थेषुकर्मस्वा
स्तिक्यबुद्धिर्देवतादिषुच।अश्रद्धातद्विपरीताबुद्धिर्धृतिर्धारणंदेहाद्यवसादउत्तंभनमधृतिस्तद्विपर्ययः ह्रीर्लज्जाधीःप्रज्ञाभीर्भयमिति। ।एतदेवमादिकंसर्वंमन·

त्रीण्यात्मनेऽकुरुतेतिमनोवाचंप्राणंतान्यात्मनेऽकुरुतान्यत्रमनाअभूवन्नादर्शमन्यत्रमनाअभूवन्नाश्रौषमितिमनसाह्येवपश्य
तिमनसाशृणोतिकामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवतस्मादपिपृष्ठतउपस्पृष्टोमनसाविजा
नातियःकश्चशब्दोवागेवसैषाह्यंतमायत्तैषाहिन एवंमनसोंतःकरणस्यरूपस्वरूपेणतानिमनोस्तित्वंप्रत्यन्यच्चकारणमुच्यते।तस्मात्मनोनामास्त्यंतःकरणं
यस्माच्चक्षुषोविषयगोचरेपृष्ठतोप्युपस्पृष्टःकेनचिदज्ञस्तस्यायंस्पर्शोजानोरयमितिविवेकेनप्रतिपद्यते।यदिविवेककृन्मनोनामनास्तितर्हित्वङ्मात्रेणकुतोविवेकप्रति
पत्तिःस्यात्यत्तद्विवेकप्रतिपत्तिकारणंतन्मनोस्तितावन्मनःस्वरूपंचतस्याऽधिगतंत्रीण्यन्नानिइहफलभूतानिकर्मणांमनोवाक्प्राणाख्यान्यध्यात्ममधिभूत
मधिदैवंचव्याचिख्यासितानितत्राध्यात्मिकानांवाङ्मनःप्राणानांमनोव्याख्यातं।अथेदानींवाग्वक्तव्येत्यारंभोयःकश्चिल्लोकेशब्दोध्वनिस्ताल्वादिव्यंगः
प्राणिभिर्वर्णादिलक्षणइतरोवादित्रमेघादिनिमित्तःसर्वोध्वनिर्वागेवसाइदंतावद्वाचःस्वरूपमुक्तमथतस्याःकार्यमुच्यतेएषावाक्हियस्मादंतमभिधेया
वसानमभिधेयनिर्णयमायत्तानुगताएषापुनःस्वयंनाभिधेयवत्प्रकाश्याभिधेयप्रकाशिकैवप्रकाशात्मकत्वात्प्रदीपादिप्रकाशेःप्रकाशांतरेणप्रका
श्यतेतद्वद्वाक्प्रकाशिकैववस्त्वयंनप्रकाश्यतेत्यनवस्थाश्रुतिःपरिहरत्येषाहिनप्रकाश्याप्रकाशकत्वमेववाचःकार्यमित्यर्थः॥ ॥राम॥ ॥राम॥ ॥

तस्यविवेकप्रतिपत्तिकारणस्यपदार्थस्यमनोरूपत्वंनिश्चितमित्यर्थः।उत्तरग्रंथमवतारयितुंभूमिकांकरोति।त्रीणीति।मध्ये।प्रकाशमात्रंवागित्यर्थः।वाचोपिप्रकाश्यत्वात्कथंप्रकाश
कमात्रंवागित्युक्तमित्याशंक्याह।एषेति।अभिधेयनिर्णायिकाकिमितिपृष्टेघटःइत्युक्तोनिश्चयोभवति।इत्यर्थस्यउक्त्या।कर्मणोस्यत्॥ ॥७॥ ॥७॥ ॥८॥

मुखादौसंचारगार्हाद्धृदयसंबंधिनीयावायुवृत्तिस्तत्रप्राणशब्दप्रवृत्तौनिमित्तमाह।प्रणयनादिति।पुरतोनिःसरणादितियावत्।हृदयादारभ्यनाभिपर्यंतंवर्तमान।व्यायच्छनंप्राणापानयोर्नियमनकर्मास्य।उत्कर्षोदेहपुष्टिः आदिपदेनउत्क्रांतिरुक्ता।व्यायच्छनं।प्राणाद्यन्वेनाऽनशब्दस्यपुनरुक्तिमाशंक्याह।अनइत्येषामिति।अनितिचेष्टतइतिअनः।प्राणशब्दस्यपुनरुक्तिमाशंक्याह।प्राणइतिवृत्तिमानिति।प्रजापतिःकर्माधिकृतःपुरुषःतदीयोऽयमित्यर्थः।विशेषणंऽयमित्यस्यैवस्फुटीकरणमित्यर्थः।वागादीनामाध्यात्मिकविभूतिप्रदर्शनानंतर

अथप्राणउच्यते।प्राणोमुखनासिकासंचारीहृदयवृत्तिःप्रणयनात्प्राणः।अपनयनान्मूत्रपुरीषादेरपानोऽधोवृत्तिरानाभिस्थानोव्यानोव्यायच्छनकर्माव्यानःप्राणापानयोःसंधिर्वीर्यवत्कर्महेतुश्च।उदानउत्कर्षोर्ध्वगमनादिहेतुःआपादतलमस्तकस्थानऊर्ध्ववृत्तिःसमानःसमंनयनाद्भुक्तस्यपीतस्यचकोष्ठस्थानोऽन्नपक्ताअनइत्येषांवृत्तिविशेषाणांसामान्यदेहचेष्टाभिसंबंधिनीवृत्तिरेवंयथोक्ताप्राणादिजातवृत्तिमेतत्सर्वंप्राणएवप्राणइतिवृत्तिमानाध्यात्मिकोऽनुक्तःकर्मचास्यवृत्तिभेदप्रदर्शनेनैवव्याख्यातं।व्याख्यातान्याध्यात्मिकानिमनोवाक्प्राणाख्यान्यन्नान्येतन्मयःएतद्विकारःप्राजापत्यैरेतैर्वाङ्मनःप्राणैरारब्धःकोऽसावयंकार्यकरणसंघातआत्मापिंडआत्मरूपत्वेनाभिमतोऽविवेकिभिर्विशेषेणतन्मयइत्युक्तस्यविशेषणंवाङ्मयोमनोमयःप्राणमयइतिस्फुटीकरणं।।५७।।तेषामेवप्राजापत्यानामन्नानामाधिभौतिकोविस्तरोऽभिधीयते।त्रयोलोकाभूर्भुवःस्वरित्याख्याःएतएववाङ्मनःप्राणास्तत्रविशेषोवागेवायंलोकोमनोऽन्तरिक्षलोकःप्राणोऽ

प्राणोऽपानोव्यानउदानःसमानोऽनइत्येतत्सर्वंप्राणएवैतन्मयोवाअयमात्मावाङ्मयोमनोमयःप्राणमयः॥ ५७ ॥त्रयोलोकाएतएववागेवायंलोकोमनोऽन्तरिक्षलोकःप्राणोऽसौलोकः॥ ५८ ॥त्रयोवेदाएतएववागेवर्ग्वेदोमनोयजुर्वेदःप्राणःसामवेदः॥ ५९ ॥देवाःपितरोमनुष्याएतएववागेवदेवामनःपितरःप्राणामनुष्याः॥ ६० ॥पितामाताप्रजैतएवमनएवपितावाङ्माताप्राणःप्रजा॥ ६१ ॥विज्ञातंविजिज्ञास्यमविज्ञातमेतएवयत्किंचविज्ञातंवाचस्तद्रूपंवाग्घिविज्ञातावागेनंतद्भूत्वावति॥ ६२ ॥यत्किंचविजिज्ञास्यंमनसस्तद्रूपंमनोहिविजिज्ञास्यंमनएनंतद्भूत्वावति॥ ६३ ॥यत्किंचाविज्ञातंप्राणस्यतद्रूपंप्राणो ॥

सौलोकः॥ ५८॥ तथात्रयोवेदाइत्यादीनिवाक्यानिस्पष्टार्थानि॥ ५९॥ ६०॥ ६१॥विज्ञातंविजिज्ञास्यमविज्ञातमेतएव।तत्रविशेषोयत्किंचविज्ञातंविस्पष्टंज्ञातंवाचस्तद्रूपं।तत्रस्वयमेवहेतुमाह।वाग्घिविज्ञाताप्रकाशात्मकत्वात्कथमविज्ञाताभवेद्याऽन्यानपिविज्ञापयति।वाचोविभागस्तद्बुधैःप्रज्ञायतइतिहिवक्ष्यति।वाग्विभूतिविदःफलमुच्यते।वागेवैनंयथोक्तवाग्विभूतिविदंतद्विज्ञातंभूत्वावतिपालयति।विज्ञातरूपेणैवास्यान्नंभोज्यतांप्रतिपद्यतइत्यर्थः॥ ६२ ॥तथायत्किंचविजिज्ञास्यंविस्पष्टंज्ञातुमिष्टंविजिज्ञास्यंतत्सर्वंमनसोरूपंमनोहियस्मात्संदिह्यमानाकारत्वाद्विजिज्ञास्यंपूर्ववन्मनोविभूतिविदःफलंमनएनंतद्विजिज्ञास्यंभूत्वावतिविजिज्ञास्यस्वरूपेणैवास्यान्नत्वमापद्यते॥ ६३ ॥तथायत्किंचाविज्ञातंविज्ञानागोचरंनचसंदिह्यमानंप्राणस्यतद्रूपंप्राणोह्यविज्ञातःअविज्ञातरूपोहियस्मात्प्राणोऽनिरुक्तइतिश्रुतेःविज्ञातविजिज्ञास्याऽविज्ञातभेदेनवाङ्मनःप्राणविभागस्थितेस्त्रयोलोकाइत्यादयोवाचनिकाएवसर्वत्रविज्ञातादिरूपदर्शनाद्वचनाद्वनि ॥

माधिभौतिकविभूतिप्रदर्शनार्थमुत्तरग्रंथमवतारयति।त्रयोलोकाइति।स्वर्लोकः।वागादयएव।विज्ञातस्यवाग्विभूतित्वात्तद्वागेव्यति।वाग्विभूतिविदः।वाग्विज्ञातंवक्तृभूत्वेत्यर्थः।विज्ञातरूपेणैववर्तमानावागस्यअन्नंभोज्यताउपकारत्वमितियावत्।प्रतिपद्यतेप्राप्नोतीत्यर्थः।मनोविभूतिविदं।अनिरुक्तइतिश्रुतेःविज्ञातरूपायस्मात्प्राणः।स्वस्मादविज्ञातंसर्वंप्राणस्यस्वरूपमितियोजना।विज्ञातादिरूपाणिदेवेलोकवेदादयभावाद्विज्ञातादिरूपत्वाभिधानेनैववागादेरात्मत्वेनिर्दिष्टेकिमर्थंत्रयोलोकाःइत्यादिवाक्यमित्याशंक्यात्तथैवध्यानार्थमित्याह।विज्ञातेति।भूरादिष्वेकैकत्रविज्ञातादित्रयदृष्टेर्वागादेश्चैवस्थितत्वात्कुतोविज्ञातादेर्वागाद्यात्मत्वंनियंतुंशक्यमित्याह।सर्वत्रेति।ध्यानार्थंवक्तुमर्हाः॥

लोके विज्ञातस्यैव भोग्यत्वोपलंभाद्विज्ञातादिरूपेण प्राणादेर्भोग्यत्वोपपत्तिं कथयितुमित्याह। शिष्येति। अविवेकिभिः शिष्यैः संदिह्यमानोपकारा अपि गुरवस्तेषां भोग्यतामापद्यमाना दृश्यन्ते। पुत्रादिभिश्चापि बालैरविज्ञातोपकाराः पित्रादयस्तेषां भोग्यत्वमापद्यन्ते तथा प्रकृतेऽपि संभवतीत्यर्थः। संदिह्यमानाः तथापि अविज्ञातः उपकारो येषां ते। संदिह्यमाना विज्ञातोपकारकाः। नहि श्रुतिप्रदर्शितोऽर्थ इति यावत्। अध्यात्ममधिभूतं च यावा वाक्परिच्छिन्ना। तस्या आधिदैविकवाचो महत्त्वमुक्त्वा परिमाणत्वं दर्शयति। कुतः। अध्यात्ममधिभूतं च यावा वाक्परिच्छिन्ना। तस्मादाधिदैविकवागंशत्वात्। अंशांशिनोश्च तादात्म्यात्। तत्रेति। तत्तत्र तथा सति इति यावत्। याव० भवति सर्वत्रा० भवति समानमुत्तरं। आधिदैविकवागात्मत्वं चाध्यात्माधिभूते परिच्छिन्ना। या वाचः वचनप्रमाणमपादवगतम्। तथा वागादीनां लोकादिरूपत्वं च श्रुतिवचनप्रामाण्यात्। वाचः शरीरभूता। समानमुत्तरमित्यस्यायमर्थः। अध्यात्ममधिभूते च मनः प्राणाश्चाधिदैविकमनःप्राणांशत्वात् अंशांशिनोश्च तादात्म्यात् तद्वद्भिः प्रायेण तुल्यपरिमाणत्वमुच्यते। तथा च प्राणादावुत्तरवाक्ये कथ्यमानं समानपरिमाणत्वं वाचा समानमिति। आधिदैविकवागिव भू-

यमः स्वतंत्र्यः प्राणा एतेनैतदुक्तान्यविज्ञातरूपेणैवास्य प्राणान्नं भवतीत्यर्थः। शिष्यपुत्रादिभिः संदिह्यमाना विज्ञातोपकारका अप्याचार्यपित्रादयो दृश्यन्ते। तथा मनःप्राणादयोऽपि संदिह्यमाना अविज्ञातयोरन्नत्वोपपत्तिः॥ ६४॥ व्याख्यातो वाङ्मनःप्राणानामाधिभौतिको विस्तरो यथायमाधिदैविकार्थ आरम्भः तस्यैतस्या वाचः प्रजापतेरन्नत्वेन प्रकृतायाः पृथिवी शरीरं बाह्य आधारो ज्योतीरूपं प्रकाशात्मकं करणं पृथिव्या आधेयभूतमयं पार्थिवोऽग्निः द्विरूपा हि प्रजापतेर्वाक् कार्यं चाधारो प्रकाशकः करणं चाधेयं प्रकाशस्तदुभयं पृथिव्यग्नी वागेव प्रजापतेस्तत्तत्र यावत्येव यावत्परिमाणैवाध्यात्माधिभूतभेदभिन्ना सती वाक् भवति तत्र सर्वत्राधारत्वेन पृथिवी व्यवस्थिता तावती भवति कार्यभूता तावानयमग्निराधेयः करणरूपो ज्योतीरूपेण पृथिवीमनुप्रविष्टस्तावानेव भवतीति समानमुत्तरं॥ ६५॥ अथैतस्य प्राजापत्यान्नभूतस्यैव मनसो द्यौः रूपः शरीरं कार्यमाधारो ज्योतीरूपं करणमाधेयोऽसावादित्यस्तत्र यावत्परिमाणैव यावत्परिमाणमेवाध्यात्ममधिभूतं वा मनस्तावती तावद्विस्तारा तावत्परिमाणा मनसो

ह्यविज्ञातः प्राण एनं तद्भूत्वावति॥ ६४॥ तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निस्तद्यावत्येव वाक्तावती पृथिवी तावानयमग्निः॥ ६५॥ अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यस्तद्यावदेव मनस्तावती द्यौस्तावानसावादित्यस्तौ मिथुनं समैतां ततः प्राणोऽजायत स इन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति य एवं वेद॥ ६६॥

ज्योतीरूपस्य करणस्याधारत्वेन व्यवस्थिता द्यौस्तावानसावादित्यो ज्योतीरूपं करणमाधेयं तावग्न्यादित्यौ वाङ्मनसी आधिदैविके मातापितरौ मिथुनं मैथुन्यमितरेतरसंसर्गं समैतां संगच्छेतां मनसादित्येन प्रसूतं पित्रा वाचाग्निना मात्रा प्रकाशितं कर्म करिष्यामीत्यन्तराले द्यावापृथिव्योरवसंगमाणात्प्राणो वायुरजायत परिस्पन्दाय कर्मणे यो जातः स इन्द्रः परमेश्वरो न केवलमिन्द्र एवासपत्नः अविद्यमानः सपत्नो यस्य कः पुनः सपत्नो नाम द्वितीयो वै प्रतिपक्षत्वेनोपगतः स द्वितीयः सपत्न इत्युच्यते तेन द्वितीयत्वेऽपि सति वाङ्मनसे न सपत्नत्वं भजते प्राणं प्रति गुणभावोपगते एव हि ते अध्यात्मे भवतश्च प्रासंगिका सपत्नविज्ञानफलमिदं नास्य विदुषः सपत्नः प्रतिपक्षो भवति य एवं यथोक्तं प्राणमसपत्नं वेद॥ ६६॥ ॥

निर्व्याख्यातमनंतरं मंत्रपदार्थः। ऊर्ध्वलोकः। मनसो द्यौरूपत्वमुक्त्वा व्याप्तिमभिधत्ते। तद्येति। मन एकस्यात्मा वाग्जाया प्राणः प्रजेत्यधिभूतं च वाङ्मनसयोः प्राणस्य प्रजात्वमुक्तं तथाधिदैवेऽपि तस्य तत्प्रजात्वं वाचाभिमभिप्रेत्याह। ताविति। कथमादित्यस्य मनसः प्राणं प्रतिपितृत्वं तत्राह। मनसेति। सावित्रं पाक आग्नेयं च प्रकाशमानं तत्कार्यसिद्ध्यर्थं दर्शनात्तयोः सिद्धं जनकत्वमित्यर्थः। कर्मशब्देन कार्यमुच्यते। तत्करिष्यामीति। प्रत्येकमभिसंधिपूर्वकमादित्याग्न्योर्द्यावापृथिव्योरन्तरा संगतिरासीदित्याह। कर्मेति। मनसा० ध्यासीत्यभिसंधाय कर्म करोति सर्वोऽपि जनः। कर्महेतुश्च प्राणः। अतः कर्मणा सह प्राणस्याभेदं कृत्वोक्तं प्राणो वायुरजायतेति। इन्द्रत्वासपत्नगुणविशिष्टस्योपासनमभिप्रेत्याह। यो जात इति। अनुकूलभावोपगते। पथाध्यात्ममनुकूले तथेत्यर्थः। मन एवास्यात्मा वाग्जाया प्राणः प्रजेत्यध्यात्ममिति पूर्वमुक्तं। इदं वस्यमाणं॥ ॥

आधिदैविकरूपेण वाङ्मनःप्राणानामुपासनं विधातुं वृत्तं कीर्त्तयति। नानीति। प्रजापतिरेतेभ्योऽतिरिक्तोऽस्तीत्याशंक्याह। समस्तानीति। अं॰ च यावानु प्राणः ताव॰ नैव चंद्रः। उक्तां व्याप्तिमेव व्यनक्ति यावदिति। तावदशेषं जगद्व्याप्नोतीति योजना। साध्यसाधनात्मकाः अन्नत्रयफलवद्ध्यानविषये व्याख्याते वक्तव्याभावात्किमुत्तरग्रंथेनेत्याशंक्य वृत्तं कीर्त्तयति। पितेति। कथं पुनस्तत्र पांक्तत्वधीरित्याशंक्याह। वित्तेनेति आत्माजायाप्रजेति त्रयसंग्रहार्थमपिशब्दः। श्रुतिवचनप्रामाण्यादेव संवत्सरत्वे चंद्रत्वं च अन्नात्मकस्य प्रजापतेरवधेयं। समस्तान्

अथैतस्य प्रकृतस्य प्राजापत्यान्नस्य प्राणस्य वाङ्मनः प्रकृतोक्तस्यानंतरनिर्दिष्टस्यापः शरीरं कार्यं करणाधारः पूर्ववत् ज्योती रूपमसौ चंद्रः तत्र यावानेव प्राणो यावत्परिमाणोऽध्यात्मादिभेदेषु तावदवाप्तिमत्य आपस्तावत्परिमाणास्तावानसौ चंद्रो वाऽऽधेयस्तास्वनुप्रविष्टः करणभूतोऽध्यात्ममधिभूतं च तावद्व्याप्तिमानेव तान्येतानि पित्रा पांक्तेन कर्मणा सृष्टानि त्रीण्यन्नानि वाङ्मनःप्राणा अध्यात्ममधिभूतं च जगत्समस्तमेतैर्व्याप्तं नैतेभ्योऽन्यदतिरिक्तं किंचिदस्ति कार्यात्मकं कारणात्मकं च समस्तानि त्वेतानि प्रजापतिस्त एते वाङ्मनःप्राणाः सर्व एव समास्तुल्या व्याप्तिमंतो यावत्प्राणिगोचरास्ताऽध्यात्माऽधिभूतं व्याप्य व्यवस्थिताः एत एवानंता यावत्संसारभाविनो हि तेन हि कार्यकरणप्रत्याख्यानेन संसारोऽवगम्यते। कार्यकरणात्मका हि ते इत्युक्तं स यः कश्चिद्ध्येतान् प्रजापतेरात्मभूतानंतवतः परिच्छिन्नानध्यात्मरूपेणाधिभूतरूपेण वोपास्ते स च तदुपासनानुरूपमेव फलं संतवंतं लोकं सज्जयति परिच्छिन्न एव जायते नैतेषामात्मभूतो भवतीत्यर्थः। अथ पुनर्यो हैताननंतान् सर्वात्मकान्सर्वप्राण्यात्मभूतानपरिच्छिन्नानुपास्ते सोऽनंतमेव लोकं जयति। पिता पांक्तेन कर्मणा सप्तान्नानि सृष्ट्वा तत्र त्रीण्यन्नान्यात्मार्थमकरोदित्युक्तं। तान्येतानि पांक्तकर्म

अथैतस्य प्राणस्यापः शरीरं ज्योती रूपमसौ चंद्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चंद्रस्त एते सर्व एव समाः सर्वेऽनंताः स यो हैतानंतवत उपास्तेंतवंतꣳ स लोकं जयत्यथ यो हैताननंतानुपास्तेनंतꣳ स लोकं जयति॥ १३॥ स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पंचदश कला ध्रुवैवास्य षोडशी रात्रिभिरेवा च पूर्यतेऽप च क्षीयते सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य

फलभूतानि व्याख्यातानि॥ १३॥ तत्र कथं पुनः पांक्तस्य कर्मणः फलमेतानीत्युच्यते। यस्मात्तेष्वपि पत्न्यंतेषु पांक्तताऽवगम्यते वित्तकर्मणोरपि तत्र संभवात् तत्र पृथिव्यग्निर्माता द्यौरादिः स पिता योऽयमनयोरंतरा प्राणः स प्रजेति व्याख्यातं तत्र वित्तकर्मणोः संभावयितव्य इत्यारंभः॥ ॥ स एष संवत्सरो यः पंचान्नात्मा प्रजापतिः प्रकृतः स एष संवत्सरात्मना विशेषतो निर्दिश्यते। षोडशकलः षोडश कला अवयवा यस्य सोऽयं षोडशकलः संवत्सरः संवत्सरात्मा कालरूपस्तस्य च कालात्मनः प्रजापते रात्रय एवाहोरात्राणि तिथय इत्यर्थः। पंचदश कलाः ध्रुवैव नित्यैव व्यवस्थिता अस्य प्रजापतेः षोडशी षोडशानां पूरणी कला स रात्रिभिरेव तिथिभिः कलोक्ताभिरापूर्यते चापक्षीयते च प्रतिपदादिभिर्हि चंद्रमाः प्रजापतिः शुक्लपक्ष आपूर्यते कलाभिरुपचीयमानाभिर्वर्धते यावत्संपूर्णमंडलः पौर्णमास्यां ताभिरेवापचीयमानाभिः कलाभिरपक्षीयते कृष्णपक्षे यावद्ध्रुवैका कलाऽवस्थिता मावास्यायां स प्रजापतिः कालात्मा मावास्यायां रात्रौ एतया व्यवस्थिता ध्रुवा कलोक्ता एतया षोडश्या कलया सर्वमिदं प्राणभृत्प्राणिजातमनुप्रविश्य यदपः पिबति यच्चौषधीरश्नाति तत्सर्वमेवौषध्यात्मना सर्वं व्याप्यामावास्यां रात्रिमवस्थाय ततो

तानि प्रजापतिरित्युक्तत्वात् अन्नात्मा प्रजापतिः। षोडशकलस्य चंद्रस्य तिथिनिमित्तकोपचयापचयदर्शनात् प्रजापतेरपि तदुपाधेर्वृद्धिक्षयदर्शनादुभयोः साम्यमिह प्रजापतेः षोडशकलत्वं चंद्रत्वं चोक्तं। किंच। तिथीनां चंद्रावयवभूतकलाहेतुत्वात्संवत्सरावयवत्वाच्च चंद्रसंवत्सरयोस्तुल्यत्वे जाते सति चंद्ररूपेणोक्तस्य प्रजापतेः संवत्सरात्मकत्वमप्यभिहितं। स्थावरजंगमं चेत्यर्थः। ओषध्यात्मनेत्युपलक्षणं जलात्मनेत्यपि द्रष्टव्यं॥ ॥

फलभूते प्रजापतौ पांक्तत्वं वक्तुमुपक्रमनं तद्व्यापिनो क्तमित्याशंक्याह। स एवमिति। तदेव पांक्तत्वं व्यनक्ति द्विरिति। पांक्तत्वनिर्देशो न तत्रार्थमाह। एवमेवेत्यादिना। ३॥ संप्रति कृत्स्नस्य प्रजापतेरुपक्रमानुसारित्वं दर्शयति। जायत इति। भवतु प्रजापतेरुक्तरीत्या पांक्तत्वं तथापि कथं पांक्तकर्मफलत्वं तत्राह कारण इति। आसां त्वं वर्तते तत्र प्रजापतेः कर्मः ३ कलया तिथीनां कामानुरूपः यथासंकल्प इत्यः

प्रातर्जायत इत्येतावता संयुक्तः॥ एवं पांक्तात्मकोऽसौ प्रजापतिः द्यौ दिवादित्यो मनः पिता पृथिव्यग्निर्वाक् जाया माता तयोश्च प्राणः प्रजा चान्द्रमस्यस्तिथयः कला वित्तमुपचयापचयधर्मित्वाद्वित्तवत्ता। आसां च कालावयवानां जगत्परिणामहेतुत्वं कर्म एवमेष कृत्स्नः फलभूतः संवृत्तः कारणानुविधायि हि कार्यमिति लोकेऽपि जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति। एषणानुरूप एव पांक्तस्य कर्मणः फलभूतः संवृत्तः कारणानुविधायि हि कार्यमिति लोकेऽपि स्थितिर्यस्मादेष चंद्र एतां रात्रिं सर्वप्राणिजातमनुप्रविश्य वर्तते। तस्मादेतां रात्रिममावास्यां रात्रिं प्राणभृतः प्राणिनः प्राणं न विच्छिंद्यात् प्राणिनं न प्रमापयेदित्येतत् अपि कृकलासस्य कृकलासोऽपि पापात्मा स्वभावेनैव हिंस्यते प्राणिभिर्दृष्टोऽपमंगलमिति कृत्वा ननु प्रतिषिद्धैव प्राणिहिंसा मा हिंस्यात्सर्वा भूतानीत्यन्यत्र तीर्थेभ्य इति। बाढं प्रतिषिद्धा तथापि नामावास्याया अन्यत्र प्रतिप्रसवार्थं वचनं हिंसायाः कृकलासविषये वा। किं तर्हि तस्याः सोमदेवताया अपचित्यै पूजार्थं॥ १४॥ यो वै स परोक्षाभिहितः संवत्सरः प्रजापतिः षोडशकलः स नैवात्यंतं

ततः प्रातर्जायते तस्मादेतां रात्रिं प्राणभृतः प्राणं न विच्छिंद्यादपि कृकलासस्यैतस्या एव देवताया अपचित्यै॥ १४॥ यो वै स संवत्सरः प्रजापतिः षोलशकलोऽयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पंचदशकला आत्मैवास्य षोलशी कला स वित्तेनैवा च पूर्यतेऽप च क्षीयते तत स्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनागादित्येवाहुः॥ १५॥ ॥

परोक्षो मंतव्यो यस्मादयमेव स प्रत्यक्ष उपलभ्यते कोऽसौ योऽयं यथोक्तं त्र्यन्नात्मकं प्रजापतिमात्मभूतं वेत्ति स एवंवित् पुरुषः केन सामान्येन प्रजापतिरिति तदुच्यते। तस्यैवंविदः पुरुषस्य गवादि वित्तमेव पंचदशकला उपचयापचयधर्मित्वात् वित्तसाध्यं च कर्म तस्य कृत्स्नतायै आत्मैव पिंड एवास्य विदुषः षोडशानां पूरणी षोडशी कला ध्रुवास्थानीयास्य च चंद्रवद्वित्तेनैवापूर्यते चापक्षीयते तदेतल्लोके प्रसिद्धं। तदेतन्नभ्यं नाभ्यै हितं नभ्यं नाभिं वार्हतीति किं तद् यदयं योऽयमात्मा पिंडः प्रधिर्वित्तं परिवारस्थानीयं बाह्यं चक्रस्येवारनेम्यादि। तस्माद्यद्यपि सर्वज्यानिं सर्वहानिं सर्वस्वापहरणं जीयते हीयते ग्लानिं प्राप्नोत्यात्मना चक्रनाभिस्थानीयेन चेद्यदि जीवति प्रधिनावाह्येन परिवारेणायमागात् क्षीणोऽयं यथा चक्रमरनेमिविमुक्तमेवमाहुः जीवंश्चेदरनेमिस्थानीयेन वित्तेन पुनरुपचीयत इत्यभिप्रायः। एवं पांक्तेन दैववित्तविद्यासंयुक्तेन कर्मणा त्र्यन्नात्मा प्रजापतिर्भवतीति व्याख्याते

र्थः। पांक्तकर्मफले प्रजापतौ पांक्तत्वं दृष्ट्वा पांक्तकर्मफलत्वं प्रजापतेर्ज्ञायत इत्यर्थः। प्रासंगिकमर्थमाह। यस्मादिति। १। कृक० वा हिंसायाः प्रतिप्रसवार्थं वचनं न भवति २ यत्पूर्वमाधिदैविकं त्र्यन्नात्मकं प्रजापतेरुपासनमुक्तं तदहमस्मि प्रजापतिरित्यहंग्रहेणाकर्तव्यमित्याह। यो वा इति। १। कलानां जगद्विपरिणामहेतुत्वं कर्मेत्युक्तं। विशेषिकमर्महेतुत्वमस्ति। तेन तत्र कलाशब्दप्रवृत्तिरुचितेत्याह। तद्धेनेति। २। पांक्तेन कर्मणा त्र्यन्नानि उत्पद्यंते अतस्त्र्यन्नतैव पांक्ते० स्यात् १ योऽहेतानन्नं नानुपास्ते नाः सलोकं जयतीति फलोक्तिः। १। वित्तं प्रधिरित्यर्थः परिवारस्थानीयं प्रधिस्थानीयं इत्यर्थः १ परिवारहेतुभूतेन वित्तेनेत्यर्थः। अन्नत्रयात्मनि प्रजापतावहंग्रहोपासनस्य सफलस्योक्तत्वात्तत्कथाभावादुत्तरग्रंथवैयर्थ्यमाशंक्य तद्विषयं वक्तुं वृत्तमनुवदति एवं पांक्तेनेति १ आत्मैव ध्रुवा केवलेनोक्तं तदेव रथचक्रदृष्टांतेन स्फुटयति तदेत

द्विविधोमनुष्यलोकजयःकर्त्तव्यशेषानुष्ठानभोगश्च।तत्राद्यमाश्रित्यान्ययोगव्यवच्छेदमेवकारार्थंदर्शयति·नान्येनेति।पुत्रश्चकर्मचअपरविद्याचतासां१तत्रपूर्वग्रंथे१पुत्रादिवज्जायावित्तयोरपिप्रक्र

अनंतरंचजायादिवित्तंपरिवारस्थानीयमित्युक्तंतत्रपुत्रकर्मापरविद्यानांलोकप्राप्तिसाधनत्वमात्रंसामान्येनावगतंनपुत्रादीनांलोकप्राप्तिफलंप्रतिविशेषसंबंधनियमः।सोयंपु
त्रादीनांसाधनानांसाध्यविशेषसंबंधोवक्तव्यइत्युत्तरकंडिकाप्रणीयते॥ ॥अथेतिवाक्योपन्यासार्थः।त्रयोवावेत्यवधारणार्थः।त्रयएवशास्त्रोक्तसाधनार्हालोकानन्यू
नानाधिकावाकेतइतिउच्यते।मनुष्यलोकःपितृलोकोदेवलोकइति।तेषांसोयंमनुष्यलोकःपुत्रेणैवसाधनेनजय्योजेतव्यःसाध्योयथाचपुत्रेणजेतव्यस्तथोत्तरत्रव
क्ष्यामोनान्येनकर्मणाविद्ययावेतिवाक्यशेषः।कर्मणाअग्निहोत्रादिलक्षणेनकेवलेनपितृलोकोजेतव्योनपुत्रेणनापिविद्यया॥विद्ययादेवलोकोनपुत्रेणनापिकर्म
णादेवलोकोवैलोकानांत्रयाणांश्रेष्ठःप्रशस्यतमस्तस्मात्तत्साधनत्वाद्विद्यांप्रशंसंति॥ ॥एवंसाध्यलोकत्रयफलभेदेनविनियुक्तानिपुत्रकर्मविद्याख्यानित्रीणिसा
धनानि।जायातुपुत्रकर्मार्थत्वान्नपृथक्साधनमितिपृथङ्नाभिहिता।वित्तंचकर्मसाधनत्वान्नपृथक्साधनं।विद्याकर्मणोर्लोकजयहेतुत्वंस्वात्मप्रतिलाभेने
वभवतीतिप्रसिद्धं।पुत्रस्यत्वक्रियात्मकत्वात्केनप्रकारेणलोकजयहेतुत्वमितिज्ञायते॥७०॥अतस्तद्वक्तव्यमित्यथानंतरमारभ्यते।संप्रत्तिःसंप्रदानंसंप्रत्तिरि

विद्याकर्मस्वरूपलाभेन

अथत्रयोवावलोकामनुष्यलोकःपितृलोकोदेवलोकइतिसोयंमनुष्यलोकःपुत्रेणैवजय्योनान्येनकर्मणाकर्मणापितृलोकोविद्य
यादेवलोकोदेवलोकोवैलोकानाꣳश्रेष्ठस्तस्माद्विद्यांप्रशꣳसंति॥७०॥अथातःसंप्रत्तिर्यदाप्रैष्यन्मन्यतेऽथपुत्रमाहत्वंब्रह्मत्वं
यज्ञस्त्वंलोकइतिसपुत्रःप्रत्याहाऽहंब्रह्माहंयज्ञोहंलोकइतियद्वैकिंचानूक्तंतस्यसर्वस्यब्रह्मेत्येकतायेवैकेचयज्ञास्तेषाꣳस
वेषांयज्ञइत्येकतायेवैकेचलोकास्तेषाꣳसर्वेषांलोकइत्येकता

अन्तर्भवतिशास्त्रमित्यर्थः

तिवक्ष्यमाणस्यकर्मणोनामधेयं।पुत्रेहिस्वात्मव्यापारसंप्रदानंकरोत्यनेनप्रकारेण
पितातेनसंप्रत्तिसंज्ञकमिदंकर्मतत्कस्मिन्कालेकर्त्तव्यमित्याहसपितायदायस्मिन्कालेप्रैष्यन्म्रियिष्यन्म्रियिष्यामीत्यरिष्टादिदर्शनेनमन्यतेऽथतदापुत्रमाहूयाह।त्वंब्रह्मत्वं
यज्ञस्त्वंलोकइति।सएवमुक्तःपुत्रःप्रत्याह।सतुपूर्वमेवानुशिष्टोजानातिमयैतत्कर्त्तव्यमितितस्मादाहाहंब्रह्माहंयज्ञोहंलोकइतियत्तद्वाक्यत्रयमेतस्यार्थस्तिरोहितइ
तिमन्वानाश्रुतिर्व्याख्यानायप्रवर्त्तते।यद्वैकिंचयत्किंचावशिष्टमनूक्तमधीतमनधीतंचतस्यसर्वस्यैवब्रह्मेत्येतस्मिन्पदएकतैकत्वंयोध्ययनव्यापारोममकर्त्तव्यः॥
आसीदेतावंतंकालंवेदविषयःसइतऊर्ध्वंत्वंब्रह्मत्वत्कर्त्तृकोस्त्वित्यर्थः॥तथायेवैकेचयज्ञाअनुष्ठेयाःसंतोमयाअनुष्ठिताश्चअननुष्ठिताश्चतेषांसर्वेषांयज्ञइत्येतस्मि
न्पदएकत्वंमत्कर्त्तृकायज्ञायेआसंस्तेइतऊर्ध्वंत्वंयज्ञस्त्वत्कर्त्तृकाभवंत्वित्यर्थः।येवैकेचलोकामयाजेतव्याःसंतोजिताअजिताश्चतेषांसर्वेषांलोकइत्येतस्मिन्पदएकता
ऽतइतऊर्ध्वंत्वंलोकस्त्वयाजेतव्यास्तेइतऊर्ध्वंमयाध्ययनयज्ञलोकजयकर्त्तव्यक्रतुस्त्वयिसमर्पितोऽहंतुमुक्तोस्मिकर्त्तव्यताबंधनविषयात्क्रतोः।सचसर्वंतथैवप्रतिपन्नवान्पु·
त्रोनुशिष्टत्वात्तमेपितुरभिप्रायंमन्वानाचष्टे·

तत्कर्मः
समर्पणं

अध्ययनंचयज्ञश्चलोकजयश्चलोकजये उक्तः कर्त्तव्यताकाः

तत्वात्फलविशेषेविनियोगोवक्तव्यइत्याशंक्याह।जायात्विति।२।अथातइतिपदद्वयंव्याख्यायसंप्रत्तिपदंव्याचष्टेसंप्रत्तिरिति।१।अनेनेतिवक्ष्यमाणप्रकारोक्तिः२कर्त्तव्यतैवबंधनंतद्विषयंक्रतुःसंकल्पःत
स्मात२

५२

इदंसर्वंतत्सर्वं एतावदेव· सन्नशोभन· कर्त्तव्यतार्थंधनरूपात्पुत्रेणाधारेस्वस्मिन्गृहीतेसतिकर्त्तव्यतावंधनरूपात्लोकान्मुक्तोभवति पिता· लोकायंकर्त्तव्यतारूपवंधनभारग्रहणायहितंलोक्यंकर्त्तव्यतावंधनादित्यर्थः।।शिक्षयतीति।अध्यात्मीतहेतुभिर्व्याज्ञानादि· वागादिप्राविष्टेस्वर्पिकृतोऽर्थोतस्यपितुरावेशधीरित्याह।वागिति।इतन्न।भावःअजिस्येति· यस्मीप्रथमाभ्यांपितापुत्रउच्यते· स्याप्यते· किंपेकदे

श्रुतिरेतावदेतत्याख्यानांवैइदंसर्वंयत्कृत्स्नंकर्त्तव्यंयदुतवेदाअध्येतव्यायज्ञायष्टव्यालोकाश्चजेतव्याएतत्सर्वंमन्नयंसर्वंहीमंभारंमदधीनंमत्तोपच्छिद्यात्मनिनिधायेतोस्माल्लोकान्मांअभुनजत्पालयिष्यतीतिलृडर्थेलङ्छन्दसिकालनियमाभावाद्यस्मादेवंसंपन्नःपुत्रःपितरंअस्माल्लोकात्कर्त्तव्यतावंधनवतोमोचयिष्यतितस्मात्पुत्रमनुशिष्टंलोक्यंलोकहितंपितुराकुर्व्वन्तस्तगाः।अतएवह्येनंपुत्रमनुशासतिलोक्यायंनःस्यादितिपितरःसपितायदायस्मिन्कालेएवंवित्पुत्रसमर्पितकर्त्तव्यताक्रतुरस्माल्लोकात्प्रैतिम्रियतेअथतदाएभिरेवप्रकृतैर्वाग्मनःप्राणैःपुत्रमाविशति।पुत्रंस्वात्मत्वेनाध्यात्मपरिच्छेदहेत्वपगमात्पितुर्वाङ्मनःप्राणाःस्वेनाधिदैविकेनरूपेणपृथिव्यग्न्याद्यात्मनाभिन्नघटप्रदीपप्रकाशवत्सर्वमाविशन्तितैःप्राणैःसहपिताप्याविशति।वाङ्मनःप्राणात्मभावित्वात्पितुरहमस्म्यनन्तावाङ्मनःप्राणाअध्यात्मादिभेदविस्तारा इत्येवंभावितोहिपिता।।तस्मात्सर्वप्राणानुप्रवेशित्वंपितुर्भवतीतियुक्तमुक्तमेभिरेवप्राणैःसहपुत्रमाविशतीति।सर्वेषांह्यसावात्माभवतिपुत्रस्यचैतदुक्तंभवतियस्यापिपितुरेवमनुशिष्टःपुत्रोभवतिसोऽस्मिन्नेवलोकेवर्त्ततेपुत्ररूपेणैवमृतोवगंतव्यइत्यर्थः।तथाचश्रुत्यंतरे सोऽस्यायमितरआत्मापुण्येभ्यः कर्मभ्यः चतुर्थीप्रतिधीयतइति।। ॥

तावद्वाइदꣳसर्वमेतन्मासर्वꣳसन्नयमितोभुनजदितितस्मात्पुत्रमनुशिष्टंलोक्यमाहुस्तस्मादेनमनुशासतिसयदैवंविदस्माल्लोकात्प्रैत्यथैभिरेवप्राणैःसहपुत्रमाविशतिसयद्यनेनकिंचिदक्ष्णयाऽकृतंभवतितस्मादेनꣳसर्वस्मात्पुत्रोमुंचतितस्मात्पुत्रोनामसपुत्रेणैवास्मिल्लोकेप्रतितिष्ठत्यथैनमेतेदैवाःप्राणाअमृताआविशंति ॥ १७ ॥

अथेदानींपुत्रनिर्वचनमाह।।सपुत्रोयदिकुदाचिदनेनपित्राक्ष्णयाक्रियाकोणच्छिद्रान्तराःअकृतंभवतिकर्त्तव्यं· तस्मात्कर्त्तव्यतारूपात्पित्राऽकृतात्सर्वस्माल्लोकप्राप्तिप्रतिबंधरूपात्पुत्रोमुंचतिमोचयतितत्सर्वंस्वयमनुतिष्ठन्पूरयित्वायस्मात्पूरणेनत्रायतिपितरंतस्मात्पुत्रोनामेदंतत्पुत्रस्यपुत्रत्वंयत्पितुः छिद्रंपूरयित्वात्रायतेतिसपितैवंविधेनपुत्रेणमृतोपिसन्नमृतोऽस्मिन्नेवलोकेप्रतितिष्ठत्येवमसौपितापुत्रेणेमंमनुष्यलोकंजयति।नतथाविद्याकर्मभ्यांदेवलोकपितृलोकौस्वरूपलाभसत्तामात्रेण· नहिविद्याकर्मणीस्वरूपलाभव्यतिरेकेणपुत्रवद्व्यापारापेक्षंलोकजयहेतुत्वंप्रतिपद्येते।अथकृतसंप्रत्तिकंपितरमेनमेतेवागादयःप्राणादेवाहैरण्यगर्भाअमृतामरणश्चाविशंति॥ १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्वेकत्वेन· मनुष्यलोकस्यानामवश्यकर्त्तव्यत्वेनस्थितंयत्कर्त्तव्यतारूपंबंधनंतज्जयतीत्यर्थः।अनुशिष्टपुत्रेणैतल्लोकजयित्वंपितरमधिकृत्याथैनमित्यादिवाक्यंतद्व्याकरोति।अथेतियथोक्तात्पुत्रात्विद्याकर्मणोर्विशेषमाह· नतथेति।कथंतर्हिताभ्यांपितादेवलोकपितृलोकौजयतितिचाह।स्वरूपेति।तदेवस्फुटयति· नहीति·॥ ॥रामरामरामरामराम॥

यदुक्तेऋणापाकरणश्रुतिस्मृतिभ्यां पुत्रादेर्मुक्तिफलत्वेनेति तत्राह। तस्मादिति। मीमांसकपक्षं निराकृत्य भर्तृप्रपंचपक्षमुत्थापयति। केचित्त्विति। कार्यकरणत्वश्रुतेरपि मुत्रभावो न मुक्तिरित्याह। शारीरमि-
ति। अविद्यातद्वस्थ्यैतस्य आत्मकत्वेनोपसंहारान्तरात्मसूत्रभावो बंधान्तर्भूतो न मुक्तिरिति युक्तं तत्राह। त्रयमिति। श्रुतेरादिमध्यावसानालोचनया वाक्यादेः संसारफलत्वावगमनान्न मुक्तिफलत्वमित्याह। आपेत्यादि।
नन्वविरक्तस्याप्यस्य प्रजापतिफलमपि कर्मादि विरक्तस्य तु मोक्षफलमिति व्यवस्थितानेत्याह। न चेदमिति नहि पृथिव्यै चेत्यादिवाक्यस्यैकस्य सकृदुच्चरितस्यानेकार्थत्वमुक्तम्। मियते हि तथा वाक्य-

कथमिति वक्ष्यति पृथिव्यै चैनमित्यादि। एवं पुत्रकर्मापरविद्यानां मनुष्यलोकपितृलोकदेवलोकसाध्यता प्रदर्शिता श्रुत्या स्वयमेव। अन्ये केचित्तावदुक्ताः श्रुत्युक्तविद्याशब्दार्थानभि-
ज्ञाः संतः पुत्रादिसाधनानां मोक्षार्थतां वदन्ति। ते यास्तु स्वापिधानं श्रुतेर्दृष्टं तं जायामेस्यादित्यादिना कामस्यैव कर्म तु पक्षे कर्मणा पुत्रादीनां चानां विद्या विनियोगोपसंहारात्तु।
तस्माद्या श्रुतिरविद्वद्विषया न परमात्मविद्यावद्विषयेति सिद्धं। वक्ष्यति च किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति। केचित्तु पितृलोकदेवलोकत्रयापि पितृलो-
कदेवलोकाभ्यां व्यावृत्तिरेव तस्मात्तु कर्मापरविद्याभिः समुच्चित्यानुष्ठिताभिस्त्रयस्य एतेभ्यो लोकेभ्यो व्यावृत्तः परमात्मविज्ञानेन मोक्षमधिगच्छतीति परंपरया मोक्षार्थ-
त्वं पुत्रादिसाधनानीच्छन्तीति तेषामपि मुख्यापिधानायेयमेव श्रुतिः कृत्ताकृतसंप्रतिकस्य पुत्रिणः कर्मिणस्त्वपरात्मविद्याविदः फलदर्शनायप्रवृत्ता न चेदमेव फलं मो-
क्ष इति शक्यं वक्तुं अन्नसंबंधान्मेधातपःकार्यत्वाद्वान्नानां पुनः पुनर्जनयत इति दर्शनात् तद्यद्धैतन्न कुर्यात् क्षीयेत हेति च क्षयश्रवणात्। शरीरं ज्योतीरूपमिति च कार्यक-
रणत्वोपपत्तेः। त्रयं वा इदमिति च नामरूपकर्मात्मकत्वेनोपसंहारान्न चेदमेव साधनत्रयं संहतं सत् कस्यचिन्मोक्षार्थं कस्यचित्त्वनात्मफलमित्यस्मादेव वाक्या-
द्वगंतुं शक्यः। पुत्रादिसाधनानामनात्मफलप्रदर्शनेनैवोपक्षीणत्वाद्वाक्यस्य॥ पृथिव्यै पृथिव्याश्चैनमग्नेश्च दैवी आधिदैवात्मिका वाग्नेन कृत्स्नसंप्रत्तिकमाविश-

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति॥ ७२॥ दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै दैवं
मनो येनानन्द्येव भवत्यथो न शोचति॥ ७३॥ अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणो यः संचरꣳश्चासंचरꣳश्च न
व्यथतेऽथो न रिष्यति स एवंवित्सर्वेषां भूतानामात्मा भवति यथैषा देवतैवꣳ स यथैतां देवताꣳ सर्वाणि भूतान्यवन्त्येवꣳ

ति। सर्वेषां हि वाच उपादानभूता दैवी वाक् पृथिव्यग्निलक्षणा सा ह्याध्यात्मिकासंगादिदोषैर्निरुद्धा विदुषस्तद्दोषापगमे आवरणभंग इवोदकप्रदीपप्रकाशवच्च व्याप्नोतीति त-
देतदुच्यते पृथिव्या अग्नेश्चैनं दैवी वागाविशतीति सा च दैवी वागनृतादिदोषरहिता शुद्धा यया वाचा दैव्या यद्यदेवात्मने परस्मै वा वदति तत्तद्भवत्यमोघाऽप्रतिबंधाऽस्य
वाक् भवतीत्यर्थः॥ ७२॥ तथा दिवश्चैनमादित्याच्च दैवं मन आविशति। तच्च दैवं मनः स्वभावनिर्मलत्वाद्येन मनसाऽऽनन्द्येव भवति। सुख्येव भवत्यथो अपि न
शोचति शोकादिनिमित्तासंयोगात्॥ ७३॥ तथा अद्भ्यश्चैनं चंद्रमसश्च दैवः प्राण आविशति। स वै दैवः प्राणः किंलक्षण इत्युच्यते। यः संचरन् प्राणिभेदेषु संचा-
रन्समष्टिव्यष्टिरूपेण अथवाऽसंचरन् स्थावरेषु न व्यथते न दुःखनिमित्तेन भयेन युज्यते। अथो अपि न रिष्यति न विनश्यति न हिंसामापद्यते। स यो यथोक्तमेवं वेत्ति
अन्नात्मदर्शनं स लभते सर्वेषां भूतानामात्मा भवति सर्वेषां भूतानां प्राणो भवति सर्वेषां भूतानां मनो भवति वाक् भवतीत्येवं सर्वभूतात्मतया सर्वज्ञो भवतीत्यर्थः। स-
र्वकृच्च। यथैषा पूर्वसिद्धा हिरण्यगर्भदेवता एवमेव नास्य सर्वज्ञत्वे सर्वकृत्त्वे वा क्वचित्प्रतिघातः। किं च स इति दृष्टान्तनिर्देशो यथा एतां हिरण्यगर्भदेवतामिज्यादिभिः सर्वाणि भूतानि अ-वन्ति पालयन्ति पूजयन्ति

यः व्यष्टिरूपेण प्राणिभेदेषु संचरन् समष्टिरूपेण असंचरन्। ऽत्रापि प्राणिभेदे प्राणसमष्टिर्नास्ति। अत उच्यते समष्टिरूपेणाऽसंचरन्निति॥ ॥रामरामराम॥ ॥रामरामराम

सर्वभूतात्मन्येतद्देहयोगात्प्राजापत्यं पदमनोरथमिति सुखदुःखवाक्याव्याप्तिमाशंक्याह। अथेति। सर्वप्राणिसुखदुःखैरित्यस्मादूर्ध्वं सशब्दोऽध्याहर्तव्यः। सर्वात्मकेऽपि दुःखैकैकभूतनिबद्धो योगो नास्ति तत्र

[illegible]

एवं हैवंविदं सर्वाणि भूतान्यवंतीज्यादिलक्षणां पूजां सततं प्रयुंजत इत्यर्थः। अथेदमाशंक्यते सर्वप्राणिनामात्मा भवतीत्युक्तं तस्य च सर्वप्राणिकार्यकरणात्मत्वे सर्वप्राणिसुखदुःखैः सं
बध्येतेति तन्नापरिच्छिन्नबुद्धित्वात्परिच्छिन्नात्मबुद्धीनां ह्याक्रोशादौ दुःखसंबंधो दृष्टोऽनेनाहमाक्रुष्ट इत्यस्य तु सर्वात्मनो य आक्रुश्यते यश्चाक्रोशति तयोरात्मत्वबुद्धिविशे
षाभावान्न तन्निमित्तं दुःखमुपपद्यते। मरणदुःखवच्च निमित्ताभावाद्यथा हि कस्मिंश्चिन्मृते कस्यचिद्दुःखमुत्पद्यते ममासौ पुत्रो भ्राता चेति पुत्रादिनिमित्तं तन्निमित्ताभावे तन्म
रणदर्शिनोऽपि नैव दुःखमुपजायते। तथेश्वरस्याप्यपरिच्छिन्नात्मनो ममत्वेनादिदुःखनिमित्तमिथ्याज्ञानादिदोषाभावान्नैव दुःखमुपजायते तदेतदुच्यते यदु किंच यत्किंचेमाः
प्रजाः शोचंति अमैव सह ताभिः प्रजाभिस्तच्छोकादिनिमित्तं दुःखं संयुक्तं मिलितं भवत्यासां प्रजानां परिच्छिन्नबुद्धिजनितत्वात्सर्वात्मनस्तु केन सह किं संयुक्तं भवेद्वियुक्तं वा अमुं तु प्रा
जापत्ये पदे वर्तमानं पुण्यमेव शुभमेव फलमभिप्रेतं पुण्यमिति निरतिशयं हि तेन पुण्यं कृतं तेन तत्फलमेव गच्छति न ह वै देवान्पापं गच्छति। पापफलस्यावसराभावात्पापफ
लं दुःखं न गच्छतीत्यर्थः॥ ७४॥ तएते सर्वएव समाः सर्वेऽनंता इत्यविशेषेण वाङ्मनःप्राणानामुपास्यत्वमुक्तं नान्यतमगतो विशेष उक्तः। किमेषामेव प्रतिपत्तव्यं किं वा विचार्य

हैवंविदꣳ सर्वाणि भूतान्यवंति यद्दु किंचेमाः प्रजाः शोचंत्यमैवासां तद्भवति पुण्यमेवामुं गच्छति न ह वै देवान्पापं गच्छति॥ ७४॥
अथातो व्रतमीमाꣳसा प्रजापतिर्ह कर्माणि ससृजे तानि सृष्टान्यन्योन्येनास्पर्धंत वदिष्याम्येवाहमिति वाग्दध्रे द्रक्ष्याम्यह
मिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि यथाकर्म तानि मृत्युः श्रमो भूत्वोपयेमे तान्याप्नोत्तान्याप्त्वा
मृत्युरवारुंधत तस्माच्छ्राम्यत्येव वाक्छ्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाप्नो

माणो कश्चिद्विशेषो व्रतमुपासनं प्रतिपत्तुं शक्यत इत्युच्यते। अथातोऽनंतरं व्रतस्य मीमांसा उपासनकर्मविचारणेत्यर्थः॥ एषां प्राणानां कस्य कर्म व्रतत्वेन धारयितव्यमिति मी
मांसा प्रवर्तते तत्र प्रजापतिर्ह ह शब्दः किलार्थः प्रजापतिः किल स्रष्टा कर्माणि करणानि वागादीनि कर्मार्थानि हि तानीति कर्माणीत्युच्यंते ससृजे सृष्टवान्वागादीनि करणा
नीत्यर्थः तानि पुनः सृष्टान्यन्योन्येनेतरेतरमस्पर्धंत स्पर्धां संघर्षं चक्रुः॥ कथं वदिष्याम्येव स्वव्यापाराद्वदनादनुपरतैवाहं स्यामिति वाग्व्रतं दध्रे धृतवती॥ यदन्योऽपि म
त्समोऽस्ति स्वव्यापारादनुपरंतुं शक्तः सोऽपि दर्शयत्वात्मनो वीर्यमिति। तथा द्रक्ष्याम्यहमिति चक्षुः श्रोष्यामि श्रोत्रमेवमन्यानि कर्माणि करणानि यथाकर्म यद्यस्य कर्म य
थाकर्म तानि करणानि मृत्युर्मारकः श्रमः श्रमरूपी भूत्वा उपयेमे संजग्राह स्वकर्मभ्यः प्रच्यावितवानित्यर्थः। कथं तानि करणानि स्वव्यापारे प्रवृत्तान्याप्नोच्छ्रमरूपेणात्मा
नं दर्शितवान्। आप्त्वा च तान्यवारुंध अवरोधं कृतवान्मृत्युः स्वकर्मभ्यः प्रच्यावितवानित्यर्थः॥ तस्माद्यत्वेऽपि स्वकर्मणि प्रवृत्ता वाक्श्राम्यत्येव श्रमरूपिणा मृत्युनाक्रां
ता स्वकर्मतः प्रच्यवते। तथा श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव मुख्यं प्राणं नाप्नोन्नाप्तवान्मृत्युः श्रमरूपी॥ ॥रामेरामराम॥ ॥राम॥ ॥

प्रवृत्तायां मीमांसायां प्राणव्रतमभग्नत्वेन धारणीयमिति निर्द्धारणार्थमाख्यायिकां प्रणयति तत्रेत्यादिना· कर्माणीन्द्रियस्य वागादिकरणानीत्यर्थः॥ यथाकर्म व्रतं दध्रिरे इत्यर्थः॥ विराड्रूपस्रष्टा॥ ॥रामराम·

[illegible]

बृ॰भा॰
५४

मंगमेषु संचरन् । स्थावरेषु असंचरन् ७ प्राणो नेत्यस्य विशेषणं १ यस्माच्चलजा प्राणेनाश्वेनला इतराणि करणानि रूपवंति प्राणरूपत्वेषु त्वाकरणानां तन्नामत्वमाह । यस्मादिति । यस्मादित्यस्य तस्मादिति व्यवहितेन संबंधः

योयं मध्यमप्राणस्तं तेनाप्यत्वेप्यश्रांत एव स्वकर्मणि सम्प्रवर्त्तते तानीतराणि करणानि तं ज्ञातुं दध्रिरे दृढतवंति मनः अयं वै नोस्माकं मध्ये श्रेष्ठः प्रशस्यतमोप्यधिको यस्माद्यः संचरं श्चासंचरंश्च न व्यथतेऽथो न रिष्यति । हंतेदानीं मस्यैव प्राणस्य सर्वे वयं रूपमसाम प्राणमात्मत्वेन प्रतिपद्येमहि ॥ एवं विनिश्चित्य त एतस्यैव सर्वे रूपमभवन् प्राणरूपमेवात्मत्वेन प्रतिपन्नाः प्राणव्रतमेव दध्रिरेऽन्यव्रतानि न मृत्योर्वारणाय पर्याप्तानीति ॥ यस्मात्प्राणरूपेण रूपवंतीतराणि करणानि चलनात्मना स्वेन च प्रकाशात्मना ॥ नहि प्राणादन्यत्र चलनात्मकत्वोपपत्तिः चलनव्यापारपूर्वकान्येव हि सर्वदा व्यापारप्रलक्ष्यंते तस्मादेते वागादय एतेन प्राणाभिधानेनाख्यायंते अभि

योयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरे अयं वै नः श्रेष्ठो यः संचरꣳश्चासंचरꣳश्च न व्यथतेथो न रिष्य
ति हंतास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवꣳस्तस्मादेत एतेनाख्यायंते प्रा
णा इति तेन ह वाव तत्कुलमाचक्षते यस्मिन्कुले भवति य एवं वेद य उ हैवंविदा स्पर्द्धतेऽनुशु
ष्यत्यनुशुष्य हैवांततो म्रियत इत्यध्यात्मं ॥ २१ ॥

धीयंते प्राणा इत्येवं ॥ य एवं प्राणात्मतां सर्वकरणानां वेत्ति प्राणशब्दाभिधेयत्वं च तेन ह वाव तेनैव विदुषा तत्कुलमाचक्षते लौकिकाः । यस्मिन्कुले स विद्वान् जातो भवति तत्कुलं विद्वन्नाम्नैव प्रथितं भवति अमुष्येदं कुलमिति ॥ यथा तापत्य इति । य एवं यथोक्तं वेद वागादीनां प्राणरूपतां प्राणाख्यत्वं च तस्यैतत्फलं किं च यः कश्चिदु ह एवंविदा प्राणात्मदर्शिना स्पर्द्धते प्रतिपक्षी सन् सोस्मिन्नेव शरीरेऽनुशुष्यति शोषमुपगच्छति ॥ अनुशुष्य हैव शोषं गत्वैवांततोऽन्ते म्रियते न सहसानुपद्रुतो म्रियते । इत्येवमुक्तं अध्यात्मं प्राणात्मदर्शनमित्युक्तोपसंहारोधिदैवतप्रदर्शनार्थः ॥ २१ ॥ ॥ रामरामरामरामराम ॥ ॥ रामराम ॥ ॥ राम ॥

६५

शिवः
५४

संप्रति विद्याफलमाह । य एवमिति । तपती सूर्यसुता तस्या वंश्यः तापत्यः ॥ ॥ रामरामरामरामरामरामरामरामरामराम ॥ ॥ रामराम ॥ ॥ रामरामरामराम ॥

सएवसूर्यअध्यात्मंप्रबोधसमयेचक्षुरात्मनाप्राणादुदेति।

यथादैवतंस्वंस्वंदेवताव्यापारमनतिक्रम्यात्मादेवताविद्युदाद्यादधिदैवतमित्यर्थः। आत्मीयंदेवतासंबंधिकमनतिक्रम्य नन्नेतिसप्तमीसंपूर्णांमंत्रमधिकरोतीमंमंत्रमितिपूर्वोक्तिः।सएवसूर्यःअध्यात्मं

उपासन

अथानंतरमधिदैवतंदेवताविषयंदर्शनमुच्यते॥कस्यदेवताविशेषस्यव्रतधारणंश्रेयइतिमीमांस्यतेऽध्यात्मवत्सर्वं।ज्वलिष्याम्येवाहमित्यग्निर्दध्रेतप्स्याम्यहमित्यादित्योभास्या
म्यहमितिचंद्रमाएवमन्यादेवतायथादैवंसदृष्टांतोऽध्यात्मंवागादीनामेषांप्राणानांमध्येमध्यमःप्राणोमृत्युनानाप्तःस्वकर्मणोनप्रच्यावितइतिस्वव्रतधारणाद्व्रतेनाभग्न
व्रतोयथाएवमेतासामग्न्यादीनांदेवतानांवायुरपिम्लोचंत्यस्तंयंतिस्वकर्मभ्यउपरमंतेयथाध्यात्मंवागादयोन्यादेवतास्तथाग्न्याद्यानवायुरस्तंयातियथामध्यमःप्रा
णोऽनम्लोचाऽस्तमित्ताऽनस्तमितादेवतायद्वायुर्योयंवायुरेवमध्यात्ममधिदैवंचमीमांसित्वानिर्द्धारितंवाऽध्यात्मनोव्रतमभग्नमिति॥ ७६ ॥अथैतस्यैवार्थस्य
प्रकाशकस्यश्लोकोमंत्रोभवति।यतश्चयस्मात्वायोरुदेतुरुच्छतिसूर्योऽध्यात्मंचक्षुरात्मनाप्राणादस्तंचयत्रवायौप्राणेचगच्छत्यपरसंध्यासमयेस्वापसमये
चतुरुभस्यतंदेवास्तस्यधर्मंदेवाश्चक्रिरेधृतवंतःवागादयोऽग्न्यादयश्चप्राणव्रतंवायुव्रतंचपुराविचार्यसएवाद्येदानींश्वोपिभविष्यत्यपिकालेऽनुवर्त्ततेअनु

स्वप्न

अथाधिदैवतंज्वलिष्याम्येवाहमित्यग्निर्दध्रेतप्स्याम्यहमित्यादित्योभास्याम्यहमितिचंद्रमाएवमन्यादेवतायथादैव
तं॰सयथैषांप्राणानांमध्यमःप्राणएवमेतासांदेवतानांवायुर्म्लोचंतिह्यन्यादेवतानवायुःसैषानस्तमितादे
वतायद्वायुः॥ ७६ ॥अथैषश्लोकोभवतियतश्चोदेतिसूर्योऽस्तंयत्रचगच्छतीतिप्राणाद्वाएषउदेतिप्राणेऽस्त
मेतितंदेवाश्चक्रिरेधर्मं॰सएवाद्यसउश्वइतियद्वाएतेऽमुर्ह्यध्रियंततदेवाऽप्यद्यकुर्वंति

वर्त्तिष्यतेचदैवी।इत्यभिप्रायः॥तत्रेमंमंत्रंसंक्षेपतोव्याचष्टेब्राह्मणं॥प्राणाद्वाएषसूर्यउदेतिप्राणेऽस्तमेतितंदेवाश्चक्रिरेधर्मंसएवाद्यसउश्वइत्यस्यकोऽर्थइत्युच्यते॥य
देतद्व्रतममुर्हिअमुष्मिन्कालेवागादयोऽग्न्यादयश्चप्राणव्रतंवायुव्रतंचाध्रियंततद्देवाद्यापिकुर्वंत्यनुवर्त्ततेअनुवर्त्तिष्यंतेच॥व्रतंतेषामभग्नमेव॥यत्तुवागादि
व्रतंअग्न्यादिव्रतंचतद्भग्नमेवयतस्तेषामस्तमनकालेस्वापकालेचवायौप्राणेचनिम्रुक्तिदर्शनादथैतदन्यत्रोक्तं॥यदावैपुरुषःस्वपितिप्राणंतर्हिवागप्येतिप्राणंम
नःप्राणंचक्षुःप्राणंश्रोत्रंयदाप्रबुध्यतेप्राणादेवाधिपुनर्जायंतइत्यध्यात्ममथाधिदैवतंयदाअग्निरनुगच्छतिवायुंतर्ह्यनूद्वातितस्मादेनमुदवासीदित्याहु
र्वायुंह्यनूद्वातियदादित्योऽस्तमेतिवायुंतर्हिप्रविशतिवायुंचंद्रमावायौदिशःप्रतिष्ठितावायोरेवाधिपुनर्जायंतइति॥ ॥रामरामरामरामरामरामरामराम।

प्रबोधसमयेचक्षुरात्मनाप्राणादुदेति।प्राणादेतिब्राह्मणंमंत्रस्यपूर्वार्द्धंव्याचष्टेइत्यर्थः।कार्यकरणयोर्वाय्वाकाशयोरभेदंकृत्वोच्यतेवायौदिशःप्रतिष्ठिताः॥ ॥रामरामराम॥ ॥रामरामरामः॥

यस्मादिति॥ नहि वागादयोऽग्न्यादयो वा परिस्पंदविरहिणः स्थातुमर्हन्तीति तेन प्राणादिव्रतं तैरनुवर्त्यत एवेत्यर्थः। प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण एवेति पूर्वमुक्तं। प्राणव्रतस्य तत्रादनुष्ठानमाशंक्य सर्वेन्द्रियव्यापारनिवृत्तिरूपं संन्यासमाचरणमनुवर्त्तयेदित्याह। यदीति। इंद्रियांतरव्यापारं त्यक्त्वा प्राणमात्मत्वेन भावयेदित्यर्थः। प्राणादिपरिभवपरिहारार्थं नियमं निगमयति। तस्मादिति। एकस्मिन्नि

यस्मादेतदेकं व्रतं वागादिष्वग्न्यादिषु चानुगतं यदेतद्वायोश्च प्राणस्य च परिस्पंदात्मकत्वं सर्वैर्देवैरनुवर्त्यमानं व्रतं तस्मादन्योऽप्येकमेव व्रतं चरेत्। किं तत्। प्राण्यात् प्राणनव्यापारं कुर्यात् अपान्यादपानन व्यापारं च नहि प्राणव्यापारस्य प्राणनापानन लक्षणस्योपरमोऽस्ति तस्मात्तदेवैकं व्रतं चरेत् हित्वेंद्रियांतरव्यापारं। नेन्मा मां पाप्मा मृत्युः श्रमरूपी आप्नुवन्नाप्नुयान्नेरुद्धः परिभवेयं यद्यहमस्माद्व्रतात्प्रच्युतः स्यां ग्रस्त एवाहं मृत्युनेत्येवं त्रस्तो धारयेत् प्राणव्रतमित्यभिप्रायः। यदि कदाचिदुपरंस्यारभेत प्राणव्रतं समापिपयिषेत् समापयितुमिच्छेत्॥ यदि ह्यस्माद्व्रतादुपरमेत् प्राणः परिभूतः स्यात् देवाश्च तस्मात्समापयेदेव तेन उ अनेन व्रतेन प्राणात्मप्रतिपत्त्या सर्वभूतेषु वागादयोऽग्न्यादयश्च मदात्मका एवाहं प्राण आत्मा परिस्पंदकृदेवतेनानेन व्रतधारणेन तस्या एव प्राणदेवतायाः सायुज्यं सयुग्भावमेकात्मकत्वं सलोकतां समानलोकतां चैकस्थानत्वं विज्ञानमात्रापेक्षमेतज्जयति प्राप्नोतीति॥ २३ ॥ ॥पंचमब्राह्मणं समाप्तम्॥ ॥यदेतदविद्याविषयत्वेन प्रस्तुतं साध्यसाधनलक्षणं व्याकृतं

तस्मादेकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्यु चरेत्समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति॥ २३ ॥तृतीयस्य पंचमं ब्राह्मणं॥ ॥त्रयं वा इदं नामरूपं कर्म तेषां नाम्नां वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठं-

मनुष् प्राग्वत् [illegible] प्रकृता तत्कार्यमेतत्त्रयं

जगत्प्राणात्मप्राप्त्यंतोत्कर्षवदपि फलं यच्चैतस्य आकरणात्प्रागवस्थाऽव्याकृतशब्दवाच्या वृक्षबीजवत्। सर्वमेतत्त्रयं किं तत्त्रयमित्युच्यते नामरूपं कर्म चेत्यनात्मैव नात्मायत्साक्षादपरोक्षाद्ब्रह्म तस्मादस्माद्विरज्येतेत्येवमर्थस्त्रयमित्याद्यारंभो न ह्यस्मादनात्मनो व्यावृत्तचित्तस्यात्मानमेव लोकमहं ब्रह्मास्मीत्युपासितुं बुद्धिः प्रवर्त्तते। बाह्यप्रत्यगात्मप्रवृत्त्योर्विरोधात्॥ तथा च काठके। पराचि खानि व्यतृणात्स्वयंभूस्तस्मात्पराङ्पश्यति नांतरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्नित्यादि। कथं पुनरस्य व्याकृताव्याकृतस्य क्रियाकारकफलात्मनः संसारस्य नामरूपकर्मात्मकत्वमेव न पुनरात्मत्वमित्येतत्संभावयितुं शक्यत इत्यत्रोच्यते। तेषां नाम्नां यथोपन्यस्तानां वागिति शब्दसामान्यमुच्यते। यः कश्चन शब्दो वागेव सेत्युक्त्वा वागिति तस्याः शब्दस्य योऽर्थः॥ शब्दसामान्यमात्रमेतदेषां नाम्नामविशेषाणामुक्थं कारणमुपादानं सैंधवलवणकणानामिव सैंधवाऽचलं। तदाहातो ह्यस्मान्नामसामान्यात्सर्वाणि नामानि देवदत्तो यज्ञदत्त इत्येवमादिप्रविभागान्युत्तिष्ठंति उत्पद्यंते प्रविभज्यंते लवणाचलादिव लवणकणाः कार्यं च कारणेनाऽव्यतिरिक्तं तथा विशेषाणां च सामान्येऽन्तर्भावः॥ शब्दसामान्य॥ श्रीरामरामराम॥

55

शिवः
५५

ज्ञानेन फलविकल्पः कथं स्यादित्याशंक्य विज्ञानप्रकर्षापेक्षं सायुज्यं तन्निकर्षापेक्षं च सालोक्यमित्याह विज्ञानेति

वागित्येतदुक्थमिति शेषः

शब्दजातिरित्यर्थः

अतः शब्दमात्रात् तद्विशेषाणां नाम्नामात्मलाभो भवतीति शेषः तत्र युक्तिमाह ततो हीति ३ रूपसामान्यात् १ व्याख्यानसापेक्षाणि पदानि व्याकरोति अथेत्यादिना ४

उक्तमेव प्रश्नपूर्वकं प्रपंचयति। कथमित्यादिना। सामत्वं साधयति। एतद्धीति। एतच्च नामविशेषा नामसामान्ये ऽन्तर्भवंतीत्याह। किंचेति नाम्नां विशेषाणां नाममात्रादात्मलाभात् तस्माद् विशेषा न्नश्येवांतर्भवंति। चक्षुरिति। चक्षुर्ग्राह्यमिति संबंधः। चक्षुरिति चक्षुःशब्दाभिधेयं चक्षुर्विषयसामान्यमभिधीयते। नन्वत्र रूपसामान्यं तदपि प्रकाश्यमात्रमिति योजना। शब्दसामान्यं समत्वात् सामेत्यर्थः शब्दसामान्यं स्वविशेषेषु शब्दात् शब्दसामान्यात् शब्दविशेषाणां नामविशेषाणां शब्दसामान्यं। तदेतत्त्रयमित्यादि ऽविरुद्धं भवतीत्यत एकमिति संबंधः कथं सह तत्त्वमत आह त्रयाणामिति रूपविषयमाश्रित्य नामकर्मणी सिध्यतः। एतत्त्रयाणि निर्विषयाणीतयोः सिद्ध्यदर्शनात्। नामकर्मणामाश्रित्य रूपं सिद्ध्यति नहि तेहि त्वाकांक्षे चक्षुरुपपद्यते वा चक्रे न वा व्यस्यते नेतरस्य ताभ्यां च क्रियायाः। तयोस्तयोरपेक्षादर्शनात्। अन्योन्यमभिव्यंजकत्वमाह। इतरेतरमि

कथं सामान्यविशेषभाव इति एतच्छब्दसामान्यमेषां नामविशेषाणां सामसमत्वात् सामसामान्यमित्येत्यर्थः। एतद्धि यस्मात् सर्वैर्नामभिरात्मविशेषैः समं किंचात्मलाभाविशेषाच्च नामविशेषाणां यस्य यस्माद् आत्मलाभो भवति स तेनाप्रविभक्तो दृष्टो यथा घटादीनां मृदा कथं नामविशेषाणामात्मलाभो वाच इत्युच्यते। यत एतदेषां वाक् शब्दसामान्यमेव ब्रह्मात्मा ततो ह्यात्मलाभो नाम्नां शब्दव्यतिरिक्तस्वरूपानुपपत्तेरात्मेति प्रतिपाद्यत्वेत शब्दसामान्यं हि यस्माच्छब्दविशेषान् सर्वाणि नामानि विभर्त्ति धारयति स्वरूपप्रदानेन स्वकार्यकारणत्वोपपत्तेः सामान्यविशेषोपपत्तेरात्मप्रदानोपपत्तेश्च नामविशेषाणां शब्दमात्रता सिद्धा एवमुत्तरयोरपि सर्वं योज्यं यथोक्तं ॥ ७८ ॥ अथेदानीं रूपाणां सितासितप्रभृतीनां चक्षुरिति चक्षुर्विषयसामान्यं चक्षुःशब्दाभिधेयं रूपसामान्यमात्रं प्रकाश्यमात्रमभिधीयते। अतो हि सर्वाणि भूत रूपाण्युत्तिष्ठंत्येतदेषां सामैतद्धि सर्वैरूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि विभर्त्ति ॥ ७९ ॥ अथेदानीं सर्वकर्मविशेषाणां मननदर्शनात्मकानां चलनात्मकानां च क्रियासामान्यमात्रे ऽन्तर्भावमुच्यते। कथं सर्वे-

रूपसामान्यं

आत्मसंबोधकमन्यथः

त्येतदेषाꣳ सामैतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि विभर्त्ति ॥ ७८ ॥ अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठंत्येतदेषाꣳ सामैतद्धि सर्वै रूपैः सममेतदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि विभर्त्ति ॥ ७९ ॥ अथ कर्मणामात्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्माण्युत्तिष्ठंत्येतदेषाꣳ सामैतद्धि सर्वैः कर्मभिः सममेतदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि विभर्त्ति तदेतत्त्रयꣳ सदेकमयमात्मात्मा उ एकः सन्नेतत्त्रयं तदेतदमृतꣳ सत्येन छन्नं प्राणो वा अमृतं नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥ ८० ॥ बृ० आ० तृतीयोऽध्यायः

वाचकेन नाम्ना वाचा
[illegible] नामसामान्याभ्यां

षां कर्मविशेषाणामात्मा शरीरं सामान्यमात्मनः कर्मेत्युच्यते। आत्मना हि शरीरेण कर्म करोतीत्युक्तं। शरीरे हि सर्वं कर्माभिव्यज्यते तस्मात्तात्स्थ्यात्तच्छब्दं कर्म कर्मसामान्यमात्रं सर्वेषामुक्थमित्यादि पूर्ववन्नेतत्त्रयोक्तं नामरूपकर्मत्रयमितरेतराश्रयमितरेतराभिव्यक्तिकारणमितरेतरप्रलयं संहतं मतं त्रिदंडविष्टंभवदेकेनात्मनैकत्वमिष्यते ॥ अयमेवात्मा अयं पिंडः कार्यकरणात्मसंघातः सन्नध्यात्माधिभूताधिदैवभावेन व्यवस्थितमेतदेव त्रयं नामरूपं कर्मेति तदेतदस्यामामृतं सत्येन छन्नमित्येतस्य वाक्यस्यार्थमाह। प्राणो वा अमृतं करणात्मकोंतरुपष्टंभक आत्मरूपो ऽमृतो विनाशी नामरूपे सत्यं कार्यात्मकं शरीरावस्थं क्रियात्मकस्तु प्राणस्तयोरुपष्टंभको वा ह्याभ्यां शरीरात्मकाभ्यामुपजनापायधर्मिभ्यां मर्त्याभ्यां छन्नो प्रकाशीकृत एतदेव संसारसतत्त्वमविद्याविषयं प्रदर्शितं। अत ऊर्ध्वं विद्याविषय आत्माधिगंतव्य इति चतुर्थ आरभ्यते ॥ ८० ॥ ॥ इतिश्रीमच्छंकरभगवत्पादकृतावारण्यकभाष्ये [illegible]

ति। सति नाम्नि रूपसंहारदर्शनाद्रूपं च सति नामसंहारदृष्टेः सतोश्चैतयोः कर्मणः। तस्मिंश्च सति तयोरूपसंहारोपलंभादितरेतरप्रलयमित्याह इतरेतरप्रलयमिति त्रयाणां एकत्वं। विरुद्धमिति शंकित्वा परिहरति एकेनेत्यादिना ॥ आत्मा इत्यनेन शब्देन भवता शरीरनिवर्त्यकर्मसामान्यमुच्यते। नामादित्रयस्य संघातमात्रत्वे कथं व्यवहारासांकर्यमित्याह आत्मेति। संघातोयमात्मशब्दितः स्वयमेकोपि सन्नध्यात्मादिभेदेनास्थितः त्रयमेवमवनीति व्यवहारासांकर्यमिति नार्थः। एकस्मिन्नपि संघाते कार्यकरणरूपेण दान्तरविभागमाह। तदेतदिति। अविनाशीति। स्थूलदेहे गच्छत्यपि सति यावन्मोक्षं न गच्छतीत्यर्थः। सत्यं त्वत्र सत्यं भूतपंचकं। तदात्मके नामरूपे इत्याह। नामेति

कथं वास्तवतत्संघातानां [illegible]
[illegible] कार्यकारणसंघात [illegible]
[illegible] कर्मात्मभावेन रूपमधिभूतभावेन नामाधि [illegible] २
[illegible]

नामरूपत्वेन

बृ॰ भा॰
५६

वृत्तमनूद्याजातशत्रुब्राह्मणमवतारयति।सएषेति।आदित्यचंद्रादयोबाह्याधारभेदाः।अनेकधात्वप्रतिष्ठामूर्त्यादिदेवस्ययागाद्युपाधिवशात्द्रष्टव्यं।कथंतर्हिएकस्यैकत्वंतत्राह।प्राणइति।प्राणस्यनानात्वमेकत्वं
चउक्तंतत्रैकत्वंविवृणोति।तस्येति।प्राणस्यैवबाह्यभूतोऽन्नात्मलक्षणःपिंडःसमष्टिरूपोहिरण्यगर्भोद्दिष्टोदेहोपाधिविषयेस्तत्रश्रुतिस्मृत्योरुच्यते।यद्ब्रह्मसमस्तंव्यस्तंचतदिदंहिरण्यगर्भमात्रमे
वनतस्मादधिकमस्तीतिहिरण्यगर्भस्तोत्येकंचेति।एकत्वंविशदीकृत्यप्राणस्यनानात्वंविशदयति।प्रत्येकंचेति।तृतीयेध्यायेसूचितविद्याऽविद्ययोरविद्याप्रपंचितासंप्रतिविद्यांप्रपंचयितुंचतु

आत्मेत्येवोपासीत।तदन्वेष्टव्यंचसर्वमन्विष्टंस्यात्।तदेवचात्मतत्त्वंसर्वस्मात्प्रियतमत्वादन्वेष्टव्यमात्मानमेवावेदहंब्रह्मास्मीत्यात्मतत्त्वमेकंविद्याविषयः।यस्तुभेदहृष्टिविषयःसो
ऽसावन्योऽहमस्मीतिनसवेदेत्यविद्याविषयः।एकधैवानुद्रष्टव्यंमृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतीत्येवमादिभिःप्रविभक्तौविद्याऽविद्याविषयौसर्वोपनिषत्सु।त
त्राविद्याविषयःसर्वएवसाध्यसाधनादिभेदविशेषविनियोगेनव्याख्यातआतृतीयाध्यायपरिसमाप्तेः।सचव्याख्यातोऽविद्याविषयःसर्वएवंविधप्रकारोंतःप्राणउपष्टंभकोगृह
स्येवस्तंभादिलक्षणःप्रकाशकोऽमृतोवास्यकार्यलक्षणोऽप्रकाशकःउपजनापायकधर्मकस्तृणकुशमृत्तिकासमोगृहस्येवसत्यशब्दवाच्योमर्त्यस्तेनामृतशब्दवा
च्यःप्राणश्छन्नइतिचोपसंहृतं।सएवचप्राणोबाह्याधारभेदेष्वनेकधाविस्तृतःप्राणएकोदेवइत्युच्यते।तस्यैवबाह्यःपिंडएकःसाधारणोविराड्ख्यानात्।आत्मैवेदमग्रआसीत्पुरुष
विधःप्रजापतिःकोहिरण्यगर्भइतिआदिभिःपिंडप्रधानशब्दैराख्यायतेसूर्यादिप्रविभक्तकरणः।एकंचानेकंचब्रह्मैतावदेवनातःपरमस्तिप्रत्येकंचशरीरभेदेषुपरिसमाप्तंचेतनाव
त्कर्तृभोक्तृचेत्यविद्याविषयमेवात्मत्वेनोपगतोगार्ग्योब्राह्मणोवक्ताप्रस्थाप्यते।तद्विपरीतात्मदृगजातशत्रुःश्रोता।एवंहियतःपूर्वपक्षसिद्धांताख्यायिकारूपेणसमर्प्यमा
णोऽर्थःश्रोतुश्चित्तस्यवसमेतिविपर्ययेहितर्कशास्त्रवत्केवलार्थानुगमवाक्यैःसमर्प्यमाणोदुर्विज्ञेयःस्यात्।अत्यंतसूक्ष्मत्वाद्वस्तुनः।तथाचकाठकेश्रवणायापिबहुभिर्योनलभ्यइत्या
दिवाक्यैःसुमहत्तुतदेवदुर्गमत्वंसालान्यमात्रेणध्यगम्यत्वंचसप्रपंचंप्रदर्शितम्।आचार्यवानाचार्याद्धैवविद्येतिचच्छांदोग्येउपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिनइतिचगीतासु।इ

ॐ दृप्तबालाकिर्हानूचानो गार्ग्य
आस स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावंतीति ॥ १ ॥

हापिचशाकल्ययाज्ञवल्क्यसंवादेनातिगह्वरत्वंमहतासंरंभेणब्रह्मणोवक्ष्यति।तस्मात्श्लिष्टएवाख्यायिकारूपेणपूर्वपक्षसिद्धांतरूपमापद्यवस्तुसमर्पणार्थआरंभः।आचारवि
धिप्रदर्शनार्थश्च।एवमाचारवतावक्त्राश्रोत्राचाख्यायिकानुगतोऽर्थोऽवगम्यते।केवलतर्कबुद्धिनिषेधार्थाचाख्यायिका॥नैषातर्केणमतिरापनेयानतर्कशास्त्रदग्धायेतिचश्रुतिस्मृति
भ्यांश्रद्धावाब्रह्मविज्ञानेपरंसाधनमित्याख्यायिकार्थः।तथाहिगार्ग्याजातशत्र्वोःश्रद्धालुताहृश्यते।आख्यायिकायां।श्रद्धावाल्लभतेज्ञानमितिचस्मृतिः।तत्रपूर्वपक्षवादीविद्या
विषयब्रह्मवित्।दृप्तबालाकिर्दृप्तोगर्वितोऽसम्यक्ब्रह्मवित्त्वादेव।बलाकायाअपत्यंबालाकिर्दृप्तश्चासौबालाकिश्चेतिदृप्तबालाकिः।हशब्दऐतिह्यार्थआख्यायिकायां।अ
नूचानोऽनुवचनसमर्थः।वक्तावाग्मी।गार्ग्योगोत्रतआसबभूवकस्मिंश्चित्कालविशेषे।सहउवाचाजातशत्रुमजातशत्रुनामानंकाश्यंकाशिराजमभिगम्यब्रह्मतेब्रवाणीतिब्र
ह्मतेतुभ्यंब्रवाणिकथयानीत्येवमुक्तोऽजातशत्रुरुवाचसहस्रंगवांदद्मएतस्यांवाचियामांप्रत्यवोचोब्रह्मतेब्रवाणीतितावन्मात्रमेवगोसहस्रप्रदानेनिमित्तमित्यभिप्रायःसा
क्षाद्ब्रह्मकथनमेवनिमित्तंकस्मान्नापेक्ष्यतेसहस्रदानेब्रह्मतेब्रवाणीतियमेवतुवाग्निमित्तमपेक्षतइत्युच्यते।यतःश्रुतिरेवराज्ञोऽभिप्रायमाह।जनकोदाताजनकःश्रो
तेतिचोतस्मिन्वाक्यद्वयेपदद्वयमभ्यस्यतेजनकोजनकइतिवैशब्दःप्रसिद्धावद्योतनार्थोजनकोदित्सुर्जनकःशुश्रूषुरितिप्रसिद्धाश्रवविदुषःप्रतिजिघृक्षवश्चजनाधावंत्यभिगच्छंति

तस्मात्सर्वमप्यभिसंभावितवानस्मीति ॥ १ ॥

र्थाध्यायमारभमाणोवृत्तंकीर्तयति।आत्मेति।आत्मतत्त्वज्ञानस्यसर्वाभिफलत्वात्तदेवान्वेष्टव्यमित्याह।आत्मानमिति।उक्तयापरिपाट्याक्षिप्तमर्थंसंक्षिपति।आत्मतत्त्वमिति।तावेवप्रकारौदर्शयन्नाद्यंसूक्ष्मंशरीरमुपन्य
स्यति।अंतरिति।वर्णनेन।एवमिति।वक्तृश्रोत्रोर्मध्येयथोक्ताचारवत्त्वाश्रोत्राविद्यालब्धाऽऽवक्ताचतदुद्देशेनसाउपदेष्टव्येत्यर्थोऽस्यामाख्यायिकायामनुगम्यतेकेवलेनतर्केणतत्त्वबुद्धिर्नास्तिध्वनीयाश्रुतिस्मृतीदर्शयति।नैषेति॥

जनको॰ इति।तत्रार्थमप्य॰ नत्विति [illegible]

शिवः
५६
56

नयाक्रान्ता·

द्रियप्रविष्टो भोक्ताहमित्यादिप्रत्यक्षं प्रमाणयन्नहमिति। अस्यास्यार्थमाह। मामेति विनिवारयन्प्रत्यवाचेति संबंधः। एकस्यामाडोनिवारकत्वमपरस्य संवोदनसंगतिरिति विभागसंभवति कुतो द्विर्वचनमि त्याशंक्याह। मामेत्याबाधनार्थमिति। नदेवस्फुटयत्यवमिति। त्वदुक्तेन प्रकारेण यो विज्ञानविषयार्थस्तस्मिन्नावयोर्विज्ञानसाम्यादेवसमानेपि विज्ञानवत्वे तत्यस्मान विज्ञानवत इव स्वीकृत्य तमेवार्थ मस्मान्प्रत्युपदेशेन ज्ञापयता भवतावयं बाधिताः स्याम इति योजना। एवमावयोः समानश्चासौ विज्ञानविषयश्चेतस्मिन्निति· आवयोः समानविज्ञानविषयसतीत्यर्थः। विशेषणानि च उपासनाचि फल। निव

[illegible] एवं राज्ञानेप्रत्युक्तमभिज्ञस्वीभूतं स ह उवाच गार्ग्यः य एवासौ आदित्ये चक्षुषि चैकोभिमानी चक्षुर्द्वारेणेह हृदि प्रविष्टोऽहं भोक्ताहं कर्त्ता चेत्यवस्थितः एतमेवाहं ब्रह्मत्वेन पश्याम्यस्मिन् कार्यकरणसंघाते उपासे तस्मात्त्वमहं पुरुषं तुभ्यं ब्रवीम्युपास्वेति। स एवमुक्तः प्रत्युवाचाजातशत्रुर्मा मामेति हस्तेन विनिवारयन्नेतस्मिन् ब्रह्मणि विज्ञेये मा संवदिष्ठाः मामेत्याबाधनार्थं द्विर्वचनमेवं समानविज्ञानविषय आवयोरस्मानविज्ञानवत इव दर्शयता बाधिताः स्याम। अतो मा संवदिष्ठाः मा संवादं कार्षीरस्मिन् ब्रह्मणि अन्य वेज्ञानासि तं ब्रह्म वक्तुमर्हसि ननु यन्मया ज्ञायते एवाः अथ चेन्मन्यसे जानाम्येवाहं ब्रह्म मात्रं ननु तद्विशेषणोपासनफलानीति तन्न मंतव्यं यतः सर्वमेतदहं जाने यद्भवान् ब्रवीषि कथमतिष्ठा अतीत्य सर्वाणि भूतानि तिष्ठतीत्यतिष्ठाः सर्वेषां च भूतानां मूर्द्धा शिरो राजेति वै राजा दीप्तिगुणोपेतत्वादेतैर्विशेषणैर्विशिष्टमेतद्ब्रह्मास्मिन् कार्यकर

स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाऽजातशत्रुर्मा मैतस्मिन्संवदिष्ठा अतिष्ठाः सर्वेषां भूतानां मूर्द्धा राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्द्धा राजा भवति॥ २॥ स होवाच गार्ग्यो य एवासौ चंद्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहन्पांडरवासाः सोमो राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्याऽन्नं क्षीयते॥ ३॥ स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति॥ ४॥ १

॥ रामरामराम॥ ॥ रामरामरामरामराम॥ ॥

[illegible]

णसंघाते कर्त्ता भोक्ता चेत्यहमेतमुपास इति फलमप्येवंविशिष्टोपासकस्य। स य एतमेवमुपास्ते अतिष्ठाः सर्वेषां भूतानां मूर्द्धा राजा भवति॥ २॥ यथागुणोपासनमेव हि फलं॥ तं यथा यथोपासते तदेव भवतीति श्रुतेः संवादेनादित्यब्रह्मणि प्रत्याख्याते ऽजातशत्रुणा चंद्रमसि ब्रह्मान्तरं प्रतिपेदे गार्ग्यो य एवासौ चंद्रमसि मनसि चैकः पुरुषो भोक्ता कर्त्ता चेति पूर्ववद्विशेषणं। बृहन्महान्पांडरं शुक्लं वासो यस्य सोयं बृहत्पांडरवासा अप्शरीरत्वात्प्राणस्य मश्चान्नभूतोभिश्रूयते लतात्मको यज्ञे तमेकीकृत्य एतमेवाहं ब्रह्मोपासे। यथोक्तगुणं च उपासे तस्याहरहः सोमो भिषुतो यज्ञे प्रसुतः प्रविकारेणान्नं चास्य न क्षीयते तन्नात्मकोपासकस्य॥ ३॥ तथा विद्युति त्वचि हृदये चैका देवता तेजस्वीति विशेषणं तस्याः तत्फलं तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवतीति विद्युतां बहुत्वस्यांगीकरणादात्मनि प्रजायां च फलबाहुल्यं॥ ४॥ रामराम ॥ राम· ॥

कथं पांडरं वासश्चंद्राभिमानिनः प्राणस्य संभवतीत्याशंक्याह। अप्शरीरत्वादिति। पुरुषो हि शरीरेणावासः सेव वेष्टितो भवति। पांडरत्वं चापां प्रसिद्धं। आपो वासः प्राणस्येति श्रुतिः। अतो युक्तं प्राणस्य पांडरवासस्त्वमित्यर्थः। न केवलं सोमश्चारेन चंद्रमा गृह्यते किंतु लतापि। समाननामधर्मत्वादित्याह। यज्ञे तितं चंद्रमसं लतात्मकं च उद्भिन्निर्दिष्टं पुरुषं चैकीकृत्याऽहं ग्रहोपास्मीत्यर्थः। ४। चकाराद्बुद्धौ चेत्यर्थः ॥

[illegible]

सपत्ननननीत्ग्रनाणांइत्यर्थः॥ २
परेः अजिता २

अप्रवर्त्तित्वमक्रियात्वं।कथमेकस्मिन्वायौअपराजितासेनेतिगुणाःसंभवतिनत्राह।मरुतामिति॥अन्यतरत्तानामन्यतोभ्रातृतोजातानां·स्थानत्रये १ देवता १ वक्ष्यमाण १ अपराजितसेनरूपः॥

तथाकाशेह्याकाशेहृदयेचैकापूर्णमप्रवर्त्तिचेतिविशेषणाद्वयंपूर्णत्वविशेषणाफलमितिपूर्यतेहप्रजयापशुभिरप्रवर्त्तिविशेषणाफलंनास्यास्माल्लोकात्प्रजोद्वर्त्ततेइ॒
तिप्रजासंतानाविच्छित्तिः॥ ५ ॥तथावायौप्राणेहृदिचैकाविशेषणामिंद्रःपरमेश्वरोवैकुंठोऽप्रसह्यानपराजितपूर्वापराजितासेनामरुतांगणत्वप्रसिद्धेरूपासनफलम॒
पिजिष्णुर्हजयनशीलोऽपराजिष्णुर्नचपराजितस्वभावोभवत्यन्यतस्त्यजयीअन्यतस्त्यानांसपत्नानांजयनशीलोभवति। ६ ॥अग्नौवाचिहृदिचैकाविशेषणांविषा·

सहोवाच्चगार्ग्योयएवायमाकाशेपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाःपूर्णमप्रवर्त्तीति
वाअहमेतमुपासइतिसयएतमेवमुपास्तेपूर्यतेप्रजयापशुभिर्नास्यास्माल्लोकात्प्रजोद्वर्त्तते॥ ५ ॥सहोवाचगा॒
र्ग्योयएवायंवायौपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाइंद्रोवैकुंठोपराजि
तासेनेतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेजिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी॥ ६ ॥सहोवा
चगार्ग्योयएवायमग्नौपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाविषासहिरितिवा
अहमेतमुपासइतिसयएतमेवमुपास्तेविषासहिर्हभवतिविषासहिर्हास्यप्रजाभवति॥ ७ ॥सहोवाचगार्ग्योयए
वायमप्सुपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाःप्रतिरूपइतिवाअहमेतमुपास
इतिसयएतमेवमुपास्तेप्रतिरूपꣳहैवैनमुपगच्छतिनाप्रतिरूपमथोप्रतिरूपोस्माज्जायते॥ ८ ॥सहोवाचगा·
र्ग्योयएवायमादर्शेपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठारोचिष्णुरितिवाअ
हमेतमुपासइतिसयएतमेवमुपास्तेरोचिष्णुर्हभवतिरोचिष्णुर्हास्यप्रजाभवत्यथोयैःसंनिगच्छतिसर्वाꣳस्तानति

सहिर्मर्षयितापरेषामग्निवाहुल्यात्फलबाहुल्यंपूर्ववत्॥ ७ ॥अप्सुरेतसिहृदिचैकाविशेषणांप्रतिरूपःअनुरूपःश्रुतिस्मृत्यप्रतिकूलइत्यर्थःफलंप्रतिरूपंश्रुतिस्मृतिशासना
नुरूपमेवैनमुपगच्छतिप्राप्नोतिनविपरीतमन्यच्चास्मात्तथाविधएवोपजायते॥ ८ ॥आदर्शेप्रसादस्वभावेचान्यत्रखड्गादौहार्देचसत्वशुद्धिस्वाभाव्येचैकाविशेषणांरोचिष्णु
र्दीप्तिस्वभावःफलंचतद्देवरोचनाधारबाहुल्यात्फलबाहुल्यम्॥ ९ ॥ ॥रामरामरामरामरामराम॥ ॥रामरामरामरामरामराम॥ ॥रामरामराम॥

57

उच्यते·उपासकात्·फलमितिसंबंध।तथाविधः·श्रुतिस्मृत्यनुकूल·आदर्शेइतिप्रसादस्वभावस्यउपलक्षणांतराह·प्रसाद·का·खड्गादेरित्यत्रदेवस्यस्पृश्यति·सत्वेति।दीप्त्याधारबाहुल्यात्। ॥रामरामराम॥

कापुनरत्र का देवतेत्याह। आश्विनाविति निगतस्यात्र
देवस्येत्यर्थः। द्वितीयवत्त्वं मा[illegible]न्वयोरन्तरम्॥

गमनक्रियायां स्थितः शब्द इत्यर्थः। अनुउद् आ एति। सर्वमायुरित्येतद्व्याचष्टे। यथोपात्तमिति। आहैतमेवाहमित्यादिति शेषः। असुर्जीवनहेतुत्वमेव गुणस्तेन विशिष्ट इत्यर्थः॥ अकालेहि न म्रियते इत्यर्थः ॥

यं तं गच्छन्तं यस्य वायं शब्दः पृष्ठतोऽनूदेति अध्यात्मं च जीवनहेतुः प्राणस्तमेकीकृत्याहासुः प्राणो जीवनहेतुरिति गुणस्तस्य फलं सर्वमायुरस्मिंल्लोक एतीति। यथोपात्तं
कर्मणायुः कर्मफलपरिच्छिन्नकालात्पुरा पूर्वं रोगादिभिः पीड्यमानमप्येनं प्राणो न जहाति॥ १०॥ दिक्षु कर्णयोर्हृदि चैकाः अश्विनौ देवावविप्रयुक्तस्वभावो गुणस्तस्य द्वि
तीयवत्त्वमनपगत्वमविच्छिन्नता चान्योन्यं॥ द्विशामश्विनोश्चैवं धर्मित्वान्नदेवच फलमुपासकस्य गणाविच्छेदो द्वितीयवत्त्वं च॥ ११॥ छायायां वाह्यतमस्य अध्यात्मे

सहोवाचगार्ग्योयएवायंयंतंपश्चाच्छब्दोनूदैत्येतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदि
ष्ठाअसुरितिवाअहमेतमुपासइतिसयएतमेवमुपास्तेसर्वꣳहैवास्मिंल्लोकआयुरेतिनैनंपुराकालात्प्रा
णोजहाति॥ १०॥ सहोवाचगार्ग्योयएवायंदिक्षुपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रु
र्मामैतस्मिन्संवदिष्ठाद्वितीयोनपगइतिवाअहमेतमुपासइतिसयएतमेवमुपास्तेद्वितीयवान्हभ
वतिनास्माद्गणश्छिद्यते॥ ११॥ सहोवाचगार्ग्योयएवायंछायामयःपुरुषएतमेवाहंब्रह्मोपा
सइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठामृत्युरितिवाअहमेतमुपासइतिसयएतमेवमु
पास्तेसर्वꣳहैवास्मिंल्लोकआयुरेतिनैनंपुराकालान्मृत्युरागच्छति॥ १२॥ सहोवाचगार्ग्योयए
वायमात्मनिपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाआत्मन्वी
तिवाअहमेतमुपासइतिसयएतमेवमुपास्तआत्मन्वीहभवत्यात्मन्विनीहास्यप्रजाभवतिसहतूष्णी

॥ ५८ ॥ गार्ग्यम

चावरणात्मकेः तानेहृदि चैका देवता विज्ञेयणं मृत्युः फलं सर्वं पूर्ववत् मृत्योरनागमनेन रोगादिपीडाभावो विशेषः॥ १२॥ प्रजापतौ विराजि आत्मनि प्रजापतौ बुद्धौ च हृदि
चैका। आत्मन्वीह आत्मवानिति विशेषणं फलमात्मन्वी ह भवत्यात्मवान्भवत्यात्मन्विनी हास्य प्रजा भवति बुद्धिवकुलत्वात्प्रजायाः संपादनं। स्वयं परिज्ञानत्वेनैवक्र
मेणाप्रत्याख्यातं ब्रह्मसु स गार्ग्यः क्षीणब्रह्मविज्ञानोऽप्रतिभासमानोत्तरः तूष्णीमवाक्शिरा आस तथाभूतमालक्ष्य गार्ग्यं॥ १३॥ रामरामरामरामरामराम

प्रजापतौ विराजि बुद्धौ च द्वौ वर्त्तमानावात्माभिमानिनी देवता। बुद्धिप्रतिबिंबितं चैतन्यं जीव· व्यस्तानि ब्रह्मसाराण्युपन्यस्य समस्तं ब्रह्मोपदिशति। प्रजापताविति। आत्मवत्त्वं पञ्चधात्मत्वं फलसंबंधकथनं

[illegible]

ब्रह्मसंपन्नं [illegible] नैतावता विदितं न भवतीत्युच्यते। तत्तु [illegible]
तावता [illegible] मुख्यं ब्रह्मादि विदितं न भवतीत्युच्यत इत्यभिप्रायः॥

न्नूइतिश्रुतिविचारार्था। नैतानिवाक्यानिफलवद्विज्ञानपराणिअर्थवादत्वादित्याशंक्याह नचेति। पूर्ववत्त्वाच्चापूर्वविधिपरायणेपतानिवाक्यानीत्याह। तदनुरूपाणीति। अर्थवादत्वेपिनैषामपूर्वार्थत्वंकिं
नस्यादित्याशंक्याह। अर्थवादत्वइति। एतद्विज्ञानद्वारत्वात्निष्कामेनचैतानिउपासनान्यनुष्ठीयंतेतदैतेषांब्रह्मज्ञानार्थत्वादित्यर्थः। परंब्रह्मविज्ञानस्यएतद्विज्ञानात्परत्वादितियोजना॥ ॥

सहोवाचाजातशत्रुरेतावन्नू३इतिकिमेतावद्ब्रह्मनिर्ज्ञातमाहोस्विदधिकमप्यस्तीतितरआह। एतावद्धीतिनैतावताविदितेनब्रह्मविदितंभवतीत्याहाजातशत्रुः। किमर्थंगा
र्ग्येणोक्तिब्रह्मत्वेनब्रह्माणीतिकिमेतावद्विदितंविदितमेवनभवतीत्युच्यते। नफलवद्विज्ञानश्रवणान्नचार्थवादत्वमेवमुक्तानामवगन्तुंशक्यमपूर्वविधानपराणिहिवाक्यानि
प्रत्युपासनोपदेशंलक्ष्यन्तेऽतिष्ठाःसर्वेषांभूतानामित्यादीनि। तदनुरूपाणिचफलानिसर्वत्रश्रूयन्तेविभक्तान्यर्थवादत्वएतदसमञ्जसं। कथंतर्हिनैतावताविदितंभव
तीतिनैषदोषः। अधिकृतापेक्षत्वाद्ब्रह्मोपदेशार्थंहिशुश्रूषवेऽजातशत्रवेमुख्यब्रह्मविद्गार्ग्यःप्रवृत्तःसयुक्तःएवंमुख्यब्रह्मविदजातशत्रुणाऽमुख्यब्रह्मविज्ञानंगार्ग्य
वक्तुंयन्मुख्यंब्रह्मवक्तुंप्रवृत्तस्त्वंतन्नजानीषइति॥ यद्यमुख्यब्रह्मविज्ञानमपिप्रत्याख्यायेततत्तदेतावदेतिनब्रूयान्नकिंचित्ज्ञातंत्वयेत्येवंब्रूयात्तस्मान्नैवंएतावन्त्यःवि

सहोवाचाजातशत्रुरेतावन्नू३इत्येतावद्धीतिनैतावताविदितंभवतीतिसहोवाचगार्ग्यउपत्वायानीति॥ १४ ॥सहोवा
चाजातशत्रुःप्रतिलोमंचैतद्यद्ब्राह्मणःक्षत्रियमुपेयाद्ब्रह्ममेवक्ष्यतीतिव्येवत्वाज्ञपयिष्यामीतितंपाणावादा
योत्तस्थौतौहपुरुषꣳसुप्तमाजग्मतुस्तमेतैर्नामभिरामन्त्रयांचक्रेबृहत्पांडरवासःसोमराजन्नितिसनो
त्तस्थौतंपाणिनापेषंबोधयांचकारसहोत्तस्थौ॥ १५ ॥ ॥रामरामरामरामरामरामरामराम॥

तदेतावता [illegible] नैवेति न ब्रूयात्
[illegible]

द्याविषयब्रह्मरूपैतद्विज्ञानद्वारत्वाच्चपरब्रह्मविज्ञानस्यमुख्यमेववक्तुंनैतावताविदितंभवतीति। अविद्याविषयेविज्ञेयत्वंनामरूपकर्मात्मकंचैषांतृतीयेऽध्यायेप्रदर्शितं
तस्मान्नैतावताविदितंभवतीतिब्रुवताधिकंब्रह्मज्ञातव्यमस्तीतिदर्शितंभवतितच्चानुपसन्नायनवक्तव्यमित्याचारविधिज्ञोगार्ग्यःस्वयमेवाचपरत्वाहोपत्वायानीत्युप
गच्छानित्वांयथान्यःशिष्यःशिष्योगुरुं॥ १४ ॥ सहोवाचाजातशत्रुःप्रतिलोमंविपरीतंचैतत्किंतत्। यद्ब्राह्मणःउत्तमवर्णःआचार्यत्वेऽधिकृतःसन्क्षत्रियमनाचार्यस्वभावमु
पेयादुपगच्छेच्छिष्यवृत्त्याब्रह्ममेममवक्ष्यतीत्यतआचारविधिशास्त्रेषुनिषिद्धंतस्मात्तिष्ठत्वमाचार्यएवसन्विज्ञापयिष्याम्येवत्वामहं॥ यस्मिन्विदितेब्रह्मविदितंभवतियन्मु
मुख्यंब्रह्मवेद्यंतंगार्ग्यंसलज्जमालक्ष्यविश्रंभजननायपाणौहस्तआदायगृहीत्वोत्तस्थावुत्थितवान्। तौहगार्ग्याजातशत्रूपुरुषंसुप्तंराजगृहप्रदेशेक्वचिदाजग्मतुरागतौ
तंचपुरुषंसुप्तंप्राप्यैतैःनामभिर्बृहत्पांडुरवासःसोमराजन्नित्येतैरामंत्रयांचक्रे। एवमामंत्र्यमाणोपिससुप्तोनोत्तस्थौतमप्रतिबुध्यमानंपाणिनापेषमापिष्यापिष्यबोध
यांचकार·प्रतिबोधितवान्। सहोत्तस्थौतस्मात्योगार्ग्येणाभिप्रेतोनासावस्मिन्शरीरेकर्ताभोक्ताब्रह्मेति·॥ १५॥ ॥रामरामरामरामराम॥ ॥रामरामराम

आदित्यादीनां
आदित्यादिकमप्यमुख्यंब्रह्मेति
निश्चयात् [illegible] वि
धीते

58

आदित्यादिब्रह्मभ्योविशेषमाह। यस्मिन्निति। अब्राह्मणादध्ययनमापत्कालेविधीयते। अनुव्रज्याचशुश्रूषायावदध्ययनंगुरोः। नाब्राह्मणेगुरौशिष्योवासमात्यंतिकंवसेदित्यादीन्याचारविधिशास्त्राणियस्मिन्मुख्येब्रह्म
णिविदितेसतिअमुख्यंब्रह्मविज्ञानंभवति। यन्न०यंनतेकथयिष्यामीत्यर्थः। प्राणस्यव्याप्रियमाणस्येवसंबोधनार्थंप्रयुक्तनाम्नःश्रवणादपेषणाच्चोत्थानात्तस्याभोक्तृत्वंप्रसज्यतेतिफलितमाह। तस्मादिति॥ ॥

बृहत्पांडरवासः [illegible] इत्येतानि [illegible] नामानि।

[illegible]

यद्यपि जागरितं हित्वा सुषुप्ते पुरुषे विवेकार्थं तयोरुपगतिस्तत्र च भोक्त्रैव संबोधितः स्वनामभिस्तत्र दंभोध्यतिना चेतनस्तथापि नेह विवेकसिद्धिर्गार्ग्यकाश्यपाभीष्टात्मनो। उत्थितिसंशयादिति शंकते। नन्विति। कोवेद बृहत्पांडवासः प्रभृतीनि नामानि प्राणं चेतन्येवानवधारितानि जनैः इति कृत्वा शब्दग्रहणं कुर्वन्नपि प्राणो नोत्थितः। यद्वा बृहत्पांडरवासः प्रभृतीनां नाम्नां जनैः प्राणेन प्राप्तिनत्वेपि जडत्वात्तच्छब्दार्थग्रहणान्नोत्थित इति संशयः। कथमिति। गार्ग्यकाश्यपाभिमतयोरपि जागरितकरणेषु सन्निधानाविशेषात्तत्रैवाकिमिति विवेकोपि न दर्शित इत्यर्थः। जागरितकरणेषु द्वयोः सन्निधानेपि शंकया दुष्करं विवेचनमिति परिहरति। जागरितेति। नहि स्वामिभृत्यन्यायेन तयोर्विवेकोपि सुकरः स्यादित्याशंक्याह। किंत्विति। जागरितकरणेषु संनिहित। किंतु विवेकावधारणं तदाह। यद्दृष्टत्वामीति गार्ग्येण प्राणे भोक्तृत्वेन प्राप्ते स्वनामाभिमतः कोयं तत्तु चेतनस्य ॥

कथं पुनरिदमवगम्यते सुप्तपुरुषागमनतत्संबोधनानुत्थाने गार्ग्याभिमतस्य ब्रह्मणोऽब्रह्मत्वं ज्ञापितमिति। जागरितकाले यो गार्ग्याभिप्रेतः कर्ता भोक्ता च ब्रह्म स सन्निहितः कारणेषु यथा तथाऽजातशत्र्वभिप्रेतोपि तस्मिन्स्वामी भृत्येष्विव राजा सन्निहित एव। किंतु भृत्यस्वामिनोर्गार्ग्याजातशत्र्वभिप्रेतयोर्यद्विवेकावधारणकारणं तत्संकीर्णत्वादनवधारितविशेषं यद्दृष्टृत्वमेव भोक्तुर्न दृश्यत्वं यच्च भोक्तुर्दृश्यत्वमवनतु दृष्टत्वं तच्चोभयमिह संकीर्णत्वाद्विविच्य दर्शयितुमशक्यमिति सुप्तपुरुषगमनं। ननु सुप्तेपि पुरुषे विशिष्टैर्नामभिरामंत्रिते भोक्तैव प्रतिपत्स्यते नाभोक्तेति नैव निर्णयः स्यादिति। न निर्धारितविशेषत्वाद्गार्ग्याभिप्रेतस्य। यो हि सत्येन छन्नः प्राण आत्माऽमृतो वागादिष्वनस्तमितो निम्लोचत्सु यस्यापः शरीरं पांडरवासा यश्चासपत्नत्वाद्बृहन्यश्च सोमो राजा षोडशकलः सत्त्वव्यापाराकृतौ यथा निर्ज्ञात एवानस्तमितस्वभाव आस्ते न चान्यस्य कस्यचिद्व्यापारस्तस्मिन्काले गार्ग्येणाभिप्रेयते तद्विरोधिनः। तस्मात्स्वनामभिरामंत्रितेन प्रतिबोधव्यं न च प्रत्यबुध्यत तस्मात्पारिशेष्याद्गार्ग्याभिप्रेतस्याभोक्तृत्वं ब्रह्मणः। भोक्तृस्वभावश्चेज्ज्ञितैव स्वं विषयं प्राप्तं नहि दग्धृस्वभावः सन्वह्निस्तृणोलपादि दाह्यं स्वविषयं प्राप्तं न दहति प्रकाश्यं वा न प्रकाशयति। न चेद्दहति प्रकाशयति वा प्राप्तं विषयं नासौ वह्निः

ज्ञात्मनस्स्वनामप्रयोगेऽप्रतिपत्तिदर्शनादब्रह्मत्वमिति चेन्न ॥ छ ॥

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागादिति तदु ह न मेने गार्ग्यः॥ १६ ॥

स्वा प्रकाशयिता चेति निश्चीयते। तथासौ प्राप्तशब्दादिविषयोपलब्धृस्वभावश्चेद्गार्ग्याभिप्रेतः प्राणो बृहत्पांडरवास इत्येवमादिशब्दं स्वविषयमुपलभेत यथा प्राप्तं तृणोलपादि वह्निर्देहेत् प्रकाशयेच्चाव्यभिचारेण तद्वत्। तस्मात्प्राप्तानां शब्दादीनामप्रतिबोधादभोक्तृस्वभावश्रुतिनिश्चीयते। नहि यस्य यः स्वभावो निश्चितः स तं व्यभिचरति कदाचिदप्यतः सिद्धं प्राणस्याभोक्तृत्वं संबोधनार्थनामविशेषसंबंधाग्रहणादप्रतिबोध इति चेत्। स्यादेतत् यथा बहुष्वासीनेषु स्वनामविशेषणसंबंधाग्रहणान्मामयं बोधयतीति स्थाणुवन्नापि संबोध्यमानो विशेषतो न प्रतिपद्यते। तथैमानि बृहन्नित्येवमादीनि मम नामानीत्यगृहीतसंबंधत्वात्प्राणो न गृह्णाति संबोधनार्थं शब्दं न त्वविज्ञातृत्वादेवेति चेत्। न देवताभ्युपगमे ग्रहणानुपपत्तेः। यस्य हि चंद्राभिमानिनी देवताध्यात्मं प्राणो भोक्ताऽभ्युपगम्यते तस्य तया संव्यवहारार्थविशेषनाम्ना संबंधोऽवश्यं गृहीतव्योऽन्यथाह्वानादिविषयसंव्यवहारोनुपपन्नः स्यात्। व्यतिरिक्तपक्षेप्यप्रतिपत्तेरयुक्तमिति चेत्। यस्य च प्राणव्यतिरिक्तो भोक्ता तस्यापि बृहन्नित्यादिनामभिः संबोधने बृहत्त्वादिनाम्नामतद्विषयत्वात्प्रतिपत्तिर्युक्ता न च कदाचिदपि बृहत्त्वादिशब्दैः संबोधितः प्रतिपद्यमानो दृश्यते। तस्मादकारणमभोक्तृत्वे संबोधनाप्रतिपत्तिरिति चेत्। न तत्कृतस्तावन्मात्राभिमानानुपपत्तेः। यस्य प्राणव्यतिरिक्तो भोक्ता स प्राणादिकरणवान्प्राणी तस्य न प्राणदेवतामात्रेऽभिमानो यथा हस्ते तस्मात्प्राणनामसंबोधने कृत्स्नाभिमानिनो युक्तैवाप्रतिपत्तिः। ननु प्राणस्यासाधारणनामसंयोगे देवतात्मत्वानभिमाना

तस्य स्वनामाग्रहणं संबंधाग्रहणात्कृतं नत्वाभोक्तृत्वमिति शंकते। संबोधनार्थेति। शंकामेव विशदयति। स्यादेतदित्यादिना। देवतायाः संबंधाग्रहणमयुक्तं सर्वज्ञत्वादित्युत्तरमाह। न देवतेति। तदेव प्रपंचयति। यस्य हीत्यादिना। प्राणवदितरात्मनोपि प्राणतया सर्वाभिमानसिद्धेर्बोधाबोधौ तुल्याविति त्वाशंक्याह। देवतेति। विशिष्टस्यात्मनो देवतायामात्मत्वाभिमानाभावादितरस्य कृत्स्नस्य तदभिमानत्वेन तद्योगान्न तुल्यतेत्यर्थः। प्रकारांतरेण प्राणस्याभोक्तृत्वं वारयन्नाशंकते। स्वनामेति। संबोधननामाग्रहस्तत्कृतानात्मदोषश्च त्वदिष्टात्मनोपि तुल्य इति शंकते। व्यतिरिक्तेति। संगृहीतं चोद्यं विवृणोति। यस्य चेति। यथा हस्तपादांगुलिरित्यादिनाभोक्ता भेदेनो निष्ठति सर्वदेहाभिमानित्वेन तन्मात्रानभिमानत्वात्। एवं काश्यपस्यात्मनः सर्वकार्यकरणाभिमानित्वादंगुलिस्थानीयप्राणमात्रे तदभावान्नाम्नामग्रहणं न त्वचेतनत्वादिति परिहरति। न तत्कृत इति॥ ॥

[illegible]

नाविशिष्टा [illegible] हारणस्वामिनं [illegible]
परमात्मन्यात्यंतत्वचासुपरतकरणस्य स्वनामाग्र
हणोऽनुक्रमात्मनः

प्राणस्य भोक्तृत्वपक्षेऽप्राणभोक्तृत्वमिति केचित्तान्प्रत्याह प्राणेति
प्राणाकरणच इंद्रदेवता नान्यभोक्ता स्यात्पि [illegible] देवतांतर भवनाद
स्यादित्याशंक्याह। देवतांतरेति

चंद्रदेवताऽस्मिन्देहे कर्त्ता भोक्ता चास्मीति गार्ग्याभिप्रायनिषेधे निमित्ते देवतानामग्रहणस्य तात्पर्यान्न दग्धोऽर्थवानिति परिहरति न देवतेति। देवदत्तादिनानामभिः संबोध्यमानस्यात्मनः चूडहस्त्यांडरवाख्यः प्रभृतिनामभिः संबो
ध्यमानस्य च सुप्त॰न्ने। करणानाम भोक्तृत्वे हेत्वंतरमाह। तथेति। देवताभेदेऽपिवेति यावत्। अनाशंका भोक्तृत्वस्येति शेषः। तत्रोदाहरणांतरमाह। देहभेदेऽपीवेति। नहि हस्त्यादिशुद्धप्रत्येकभोक्तृत्वं शंकते। तथाश्रो
त्रनेत्रादिष्वपि न भोक्तृत्वाशंका। बुद्धत्वात्तेभ्यः स्मृतिरूपज्ञानस्य इच्छायाः योऽहं रूपमद्राक्षं स शब्दं शृणोमि इत्यादिप्रतिसंधानस्य चायोगात्। अनुपपत्तिमेव स्फुटयति। न हीति। क्षणिकविज्ञानस्य निराश्रयस्य भोक्तृ
त्वाशंकापि प्रतिसंधानाभावादेव प्रत्युक्तेत्याह विज्ञानेनेति॥ संघातेति। तस्य संघातेन संबंधविशेषाः स्वकर्मारभ्यत्वात्मीयत्वस्वपाल्यत्वादयस्तेषां मनने कृत्वा त्वेषणपेषणयोरिंद्रियोऽवाभिभवकृतवेदनायाः

इंद्रियाणां प्राणाधीनत्वात्प्रा
अध्यात्मिकमात्मान्

मस्य पक्षे लौकिके देवदत्तादिनामतेनापि बोध्यमानः कदाचिन्न प्रतिपद्यते सुषुप्तस्तथा भोक्तापि सन्प्राणो न प्रतिपद्यत इति चेन्नात्मप्राणयोः सुषुप्तासुषुप्तत्वविशेषोपपन्नेः सुषुप्तत्वात्प्राण
ग्रस्ततयोपरतकरणआत्मा स्वनाम प्रयुज्यमानमपि न प्रतिपद्यते न तु तदासुषुप्तस्य प्राणस्य भोक्तृत्वे उपरतकरणत्वेन संबोधनाग्रहणं वा युक्तं। अप्रसिद्धनामभिः संबोधनमयुक्तमिति चे
न्नेति हि प्राणविषयाणि प्रसिद्धानि प्राणादिनामानि तान्यपोह्य अप्रसिद्धैर्बृहत्वादिनामभिः संबोधनमयुक्तं। लौकिकन्यायापोहात्। तस्मान्नभोक्तृत्वमतः प्राणस्याप्रतिपत्तिरिति
चेन्न देवताप्रत्याख्यानार्थत्वात् केवलसंबोधनमात्राऽप्रतिपत्तेर्वाऽसुप्तस्याध्यात्मिकस्य प्राणस्याभोक्तृत्वसिद्धये चंद्रदेवताविषयैर्नामभिः संबोधनं न चंद्रदेवता प्राणो
ऽस्मिन्शरीरे भोक्तेति गार्ग्यस्याविशेषप्रतिपत्तिनिराकरणार्थं नहि तल्लौकिकनाम्नासंबोधनेऽशक्यं कर्त्तुं। प्राणप्रत्याख्यानेनैव प्राणग्रस्तत्वात्करणांतराणां प्रवृत्त्यनुपपत्तेर्भो
क्तृत्वाशंकानुपपत्तिः देवतांतराभावाच्च। नन्वतिष्ठा इत्यादाक्षन्वी त्वमेनेन गुणवद्वेताभेदस्य दर्शितत्वादिति चेन्न तस्य प्राणस्यैकत्वाभ्युपगमात्सर्वश्रुतिष्वनामभिनिर्द
र्शनेन सत्येन छन्नः प्राणो वा अमृतमिति च प्राणवाचस्यात्यस्मानभ्युपगमात् भोक्तुरेवं च एष उ एव सर्वदेवाः कतम एको देव इति प्राण इति च सर्वदेवानां प्राणस्यैकत्वोपपा
दनाच्च। तथा करणभेदेऽप्यनाशंका देहभेदेऽपीव स्मृतिहानेऽस्मादिप्रतिसंधानानुपपत्तेः। नह्यन्यद्दृष्टमन्यः स्मरति जानाति वा इति प्रतिसंदधाति वा तस्मान्न करणभेदविषये
भोक्तृत्वाशंका विज्ञानमात्रविषयां वा कदाचिदुपपद्यते न तु संघातस्याप्युभोक्ताकिंव्यतिरिक्तकल्पनेयाति न पुण विशेषदर्शनात्। यदि हि प्राणशरीरसंघातमात्रो भो

भूतमात्रस्यमनाहार
स्थूलोदेह इत्यर्थः

चेतनस्य भुक्तइत्यनेनान्वयः

क्तास्यात्संघातमात्राविशेषेऽशात्सर्वदापि तस्यानापि तस्य च प्रतिबोधे विशेषो न स्यात्। संघातव्यतिरिक्ते तु पुनर्भोक्तरि संघातसंबंधविशेषानेकत्वात् पेषणापेषणाकृतवेदनायाः
सुखदुःखमोहमध्यमाधमोत्तमकर्मफलभेदोपपत्तेश्चाविशेषो युक्तः। ननु संघातमात्रे संबंधकर्मफलभेदानुपपत्तेर्विशेषो युक्तः। तथा शब्दादिपटुमांद्यादिकृतश्चास्तिचा
यं विशेषो यस्मात् स्पर्शमात्रेणाप्रतिबुध्यत्वे ज्वलन्निव स्फुलिंगवक्त्रात् छिद्रागतइव पिंडश्च पूर्वविपरीतं बोधश्चैत्याकारविशेषादिमत्त्वेनापरं यन्नासौ अन्योऽस्ति गार्ग्याभिमतप्रा
णेभ्यो व्यतिरिक्त इति सिद्धं। संहतत्वाच्च परार्थोपपत्तिः प्राणस्य गृहस्तंभादिवत् छौरस्यानुपपत्तेश्च अभेकः प्राणः शरीरादिभिः संहत इत्यवोचाम अरे नमिवच्च का नाभिस्थाना
य एतस्मिन्सर्वमिति च। तस्माद् गृहादिवत्स्वावयवसमुदायात्मजातीयव्यतिरिक्तार्थं संहन्यत इत्येवमवगच्छामहे। लभमज्ज्ञात् प्रणकाष्ठादिगृहावयवानां स्वात्मज
न्नोपचयापक्षयविनाशनामाकृतिकार्यधर्मनिरपेक्षलब्धसत्तादितद्विषयद्रष्टृश्रोतृमंतृविज्ञात्रर्थत्वं दृष्टं मन्यामहे तत्संघातस्य च तथा प्राणाद्यवयवानां तत्संघा
तस्य च स्वात्मजन्मोपचयापक्षयविनाशनामाकृतिकार्यधर्मनिरपेक्षलब्धसत्तादितद्विषयद्रष्टृश्रोतृमंतृविज्ञात्रर्थत्वं भवितुमर्हतीति देवताचेतनावत्त्वे गुणभावा
नुपगम इति चेत्। प्राणस्य विशिष्टैर्नामभिरामंत्रणादर्शनाच्चेतनावत्त्वमभ्युपगतं चेतनावत्त्वे च पारार्थ्योपगमः स मत्वादनुपपन्न इति चेत् न निरूपाधिकस्य केवलस्याऽवि
ज्ञातापर्यायसिद्धत्वात्। क्रियाकारकफलात्मकतायास्यात्मनो नामरूपोपाधिजनिताऽविद्यमानंतद्रूपं सुषुप्ते पाणिना पेषणमपि स्यापिप्रबोधयां च कार राजातःशत्रुः तस्माद्य आपणो

59

स्फुटत्वास्फुटत्वात्मको विशेषोऽयुक्तः सुखदुःखमोहानामुत्तममध्यमाधमकर्मफलानां कर्मोपभवकृतविशेषतं भवाव यथोक्तविशेषः संभवतीत्यर्थः। परपक्षेऽपि तथैव विशेषः स्यादित्याशंक्याह। नन्विति। नहि तत्रस्व
कर्मारभ्यत्वादयः संबंधविशेषाः कर्मफलभेदो वा युज्यते संघातवादिना निष्क्रियकर्मानंगीकारादतः संघातमात्रे भोक्तरि प्रतिबोधविशेषासिद्धिरित्यर्थः। शब्दस्य शौद्धीनांपटुत्व मतिपटुत्व मतिमांद्यत्वमित्येव
मादिना कृतो विशेषो बोधेऽदृश्यते सोऽपि संघातवादेनासिध्यतीत्याह। तथेति। अयुक्त इति यावत्। चकोरविशेषणानुकर्षणार्थं मानाहि विशेषः प्रतिबोधे भूदित्याशंक्याह। अस्तीति। संघातमात्रे भोक्तरि बाह्यकृते

चेतनभोगार्थं ध्यर्थं प्राणादयः संहन्यंता

[illegible]

[illegible]

प्राणस्य गृहादिवत्परार्थेऽपि संहतत्वे विशिष्टत्वमेष्टव्यं गृहादेस्तथादर्शनादित्याशंक्याह । नेमेति । स्वात्मना स्तंभादीनां जन्मं चापचयश्चाविशेषदर्शनफलमाह । तस्मादिति । कृतिश्च कार्यं चेत्येते धर्मास्तत्पक्षस्य च विनाशश्च नामाचान्निरपे-
क्षतयालभ्यास नाम्कुरणं च येषामसत्वासौ नेभुक्तं भादिसुविषयेषु द्रष्टा च श्रोता च मंता च विज्ञाता च तदर्थत्वं तेषां तत्त्वं घातस्य दुष्प्राणादीनामपि तथात्वं भवितुमर्हतीति मन्यामहे इति संबंधः । प्राणादिस्वातिरि-
क्तद्रष्टुशेषः संहतत्वाद्गृहादिवत् । प्राणदेवतापारार्थ्यानुमानं व्याप्त्यंतरविरुद्धमिति शंकते । देवतेति । प्राणादिः स्वातिरिक्तद्रष्टुः शेषः । उपकारकः । शेषात्मस्य उपकार्य इत्यर्थः । प्राणा देवता याश्चेतनत्वमेक-
यमभ्युपगतं तत्राह । प्राणस्यापि विशिष्टेरिति । तथापि प्रकृतेनुमाने कथं व्याप्त्यंतरविरोधस्तत्राह चेतनावत्त्वे चेति । येन समः सत्र च्छेषो न भवति । यथा दीपो दीपांतरेणातुल्यो मतः च्छेष इति मापि विरो-
धः स्यादित्यर्थः । नायं विरोधः समाधातव्यः । शेषविशेषाभावस्यात्राप्रतिपाद्यत्वादित्तिपरिहरति । न निरूपाधिकस्येति ॥ ॥ किमर्थं तर्हि शेषिविशेषिभावकल्पनं तत्राह । विशेषवतो हीति । सोपाधिक

याध्यारोपितान्निमित्तोलोकस्य क्रियाकारकफलाभिमानलक्षणः संसारः स निरूपाधिकात्मस्वरूपविषयानिवर्त्यते इति तत्स्वरूपविजिज्ञापयिषयोपनिषदारंभः । ब्रह्म ते ब्रवाणि
नैतावता विदितं भवतीत्युपक्रम्यैतावद्रे खल्वमृतत्वमिति चोपसंहारात् । न चातोऽन्यदंतराले विवक्षितमुक्तं वास्ति तस्मादनवसरः समत्वाद्यभावानुगम इति चोद्यस्य वि-
शेषवतो हि सोपाधिकस्य । संव्यवहारार्थो गुणगुणिभावो न तु विपरीतस्य निरूपाख्यस्य हि विजिज्ञापयिषितः सर्वस्यामुपनिषदि नेति नेतीत्युपसंहारात् । तस्मादादि-
त्यादिब्रह्मभ्य एतेभ्योऽविज्ञानमयेभ्यो विलक्षणोऽन्योऽस्ति विज्ञानमय इति स्थितमिदं । । स एव मजातशत्रुर्व्यतिरिक्तात्मास्तित्वं प्रतिपाद्य गार्ग्यमुवाच यत्रैत
स्मिन्काल एष विज्ञानमयः पुरुष एतत्सुप्तं सुप्तोऽभूत्तदा क्वाभूदिति पेयप्रतिबोधाद्विज्ञानं विज्ञायतेऽनेनेत्यंतःकरणं बुद्धिरुच्यते तन्मयोऽत्र प्रायो विज्ञानमयः किंचु

न तत्प्रायत्वं तस्मिन्नुपलभ्यत्वं तेन वोपलभ्यत्वमुपलब्धृत्वं च । कथं पुनर्मयटोनैकार्थ्ये प्रायार्थतैवावगम्यते । स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमय इत्येवमादौ प्रायार्थस्व
प्रयोगदर्शनात् । परविज्ञानविकारत्वस्याप्रसिद्धत्वाद्यस्य विज्ञानमय इति च प्रसिद्धवदनुवादात् अवयवोपमार्थयोश्चात्रासंभवात् पारिशेष्यात्प्रायार्थतैव ॥ ॥ तस्मात्संकल्प
विकल्पात्मकमंतःकरणं तन्मय इत्येतत्पुरुषः पुरिशयनात् । क्वैष तदाभूदिति प्रश्नः स्वभावविजिज्ञापयिषया ॥ प्राक्प्रतिबोधात्क्रियाकारकफलविपरीतस्वभाव
आत्मेति कार्याभावेन दिदर्शयिषितं । नहि प्राक्प्रतिबोधात्कर्मादिकार्यं सुखादि किंचन गृह्यते । तस्मादकर्मप्रयुक्तत्वात्तथा स्वाभाव्यमेवात्मनोवगम्यते । यस्मिन्
स्वाभाव्ये भूयतश्च स्वाभाव्यात् । प्रच्युतः सन्संसारिस्वभावविलक्षण इत्येतद्विवक्षया पृच्छति गार्ग्यं प्रति भूतनिर्गृहीतं बुद्धिमुत्पादनाय । क्वैष तदाभूत्कुत एतदागादित्येतदु-
भयं गार्ग्येणैव प्रष्टव्यमासीत्तथापि गार्ग्यः पृष्टमिति नोदासीनोऽजातशत्रुर्बोधयितव्य एवेति प्रवर्त्तते ज्ञपयिष्याम्येवेति प्रतिज्ञातत्वादेवमसौ पृच्छ्यमानोऽपि गार्ग्यो यन्नैव
आत्माऽभूत्प्राक्प्रबोधाद्यतश्चैतदागमनमागात्तदुभयं न वेद तत्क्वैष तदाभूत्कुतो वा प्रत्युं वा गार्ग्योऽहं तमनेन ज्ञातवान् ॥ ॥ १६ ॥ ॥रामरामरामरामरामराम

स्येषशेषिभावो विवक्षितस्तत्र च त्वामिन्नृत्यन्यायेन विशेषसंभवादसिद्धं समत्वमित्यर्थः । न विपरीतस्य निरूपाधिकस्य विशेषित्वमस्तीत्यत्र हेतुमाह । निरूपाख्यो हीति । शेषशेषित्वाद्यशेष-
विशेषशून्य इत्यर्थः । निरूपाख्यत्वं नाम सर्वभेदरहितत्वं । तदेव शेषशेषित्वाभावे हेतुभूतं ॥ तत्साक्षित्वाद्बत तत्प्रायत्वमित्याह । उपलब्धृत्वं चेति । अप्रसिद्धमपि विज्ञानविकारित्वं श्रु-
तिवशादिह पतमित्याशंक्याह । यस्य एष इति । जीवो ब्रह्मावयवस्ततस्तद्धो वादत इदर्थो मयडित्याशंक्याह । अत्र य चेति । ब्रह्मणो निरवयवत्वश्रुतेः । स्वभावो भवति चेत्तदा गच्छतैव ॥ ॥रामराम

[illegible]

स्वप्नयथाभवतितथा। [illegible] गृहीतव्यापाराणामर्थः। [illegible]

विज्ञानेनेति। उपाधिरंतःकरणं तस्य स्वभावस्तदुपादानं अज्ञानं तेन जनितमंतःकरणगतमभिव्यक्तं विशेषविज्ञानं चैतन्याभासलक्षणं तेन करणेनेत्यर्थः। विज्ञानमिति। वागादीनां स्वं स्वं विषयगतं प्रतिनियतं प्रकाशनसमर्थं विज्ञानमित्यर्थः। कूटस्थचिदेकरसोयमात्मा। न च क्रियाकारकफलव्यवहारो वस्तुनो नास्तीति। तस्य प्रकटीकरणार्थं प्रस्तुतप्रश्नद्वयमनुवदति यत्रेति। येनात्मना चैतन्याभासेनान थः वागादयो वागादिसामर्थ्या उपसंहृतानीत्यर्थः। आपारवद्भिर्वागादिभिः संबंधे। ।अन्वयव्यतिरेकाभ्यां वागाद्युपाधिकमात्मनः संसारित्वमुक्तं। तद्व्यतिरेकासिद्धिमाशंकते। नन्विति। तन्मृषात्वमुपपादयन् स्वप्नेत्यादीन्यक्षराण्यादौ योजयति। स प्रकृत इत्यादिना। स्वप्नस्थस्य सर्पादिवन्मिथ्यात्वेन वस्तुधर्मत्वाभावान्नात्मनः संसारित्वमित्युत्तरमाह। न मृषात्वादिति। स्वप्ने दृष्टानां महाराजत्वादीनां जाग्रत्यनुवृत्तिराहित्यं व्यभिचारदर्शनं। विमताः लोकाः न मिथ्या तत्कालव्यभिचारित्वाज्जाग्रल्लोकवदिति शंकते। ननु च यथेति। साध्यवैकल्यं वक्तुं सिद्धान्त[illegible]-

स होवाचाजातशत्रुर्विवक्षितार्थसमर्पणाय यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागादिति यत्पृष्टमासीत्तत्रोच्यमानं यत्रैष एतत्सुप्तोऽभूत्तदा तस्मिन्काले एषां वागादीनां प्राणानां विज्ञानेनान्तःकरणगताभिव्यक्तविशेषविज्ञानेनोपाधिस्वभावजनितेनादाय विज्ञानं वागादीनां स्वविषयगतसामर्थ्यं गृहीत्वा य एषो मध्ये हृदये हृदयस्याकाशो यः आकाशशब्देन पर एव स्व आत्मोच्यते। तस्मिन्स्व आत्मन्याकाशे शेते स्वाभाविकेऽसंसारिके न केवल आकाश एव श्रुत्यन्तरसामर्थ्यात् सता सोम्य तदा संपन्नो भवतीति लिंगोपाधिसंबंधकृतं विशेषात्मस्वरूपमुत्सृज्याविशेषे स्वाभाविक आत्मन्येव केवले वर्तत इत्यभिप्रायः। यदा शरीरेंद्रियाध्यक्षतामुत्सृ तितदासौ स्वात्मनि प्रवर्तत इति कथमवगम्यते नामप्रसिध्याकाशो नामप्रसिद्धेरित्याह। तानि वागादिविज्ञानानि यदा यस्मिन्काले गृह्णात्यादत्ते अथ तदा ह एतत्पुरुषः स्वपिति नामस्य तन्नामास्य पुरुषस्य तत्प्रसिद्धं भवति गौणमेवास्य नाम भवति स्वमेवात्मानमपीत्यपिगच्छतीति स्वपितीत्युच्यते। सत्यं स्वपितीति नामप्रसिध्यात्मनः संसारधर्मविलक्षणं रूपमवगम्यते। नन्वत्र युक्तिरुक्तेत्याशंक्याह। तत्तत्स्वापकाले गृहीत एव प्राणो भवति घ्राण इति घ्राणमिन्द्रियं वागादिप्रकरणात्। वागादिसंबंधे हि सति तदुपाधि-

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीता वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः ॥ ७ ॥ स यत्रैतत्स्वप्न्यया चरति ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निगच्छति।

त्वादस्य संसारधर्मित्वं लक्ष्यते वागादयश्चोपसंहृता एव तदा तेन। कथं गृहीता वाग्गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः तस्मादुपसंहृतेषु वागादिषु क्रियाकारकफलात्मनोऽभावात् स्वात्मस्थ एवात्मा भवतीत्यवगम्यते॥ ७ ॥ ननु दर्शनलक्षणायां स्वप्नावस्थायां कार्यकरणवियोगेऽपि संसारधर्मित्वमस्य दृश्यते। यथा च जागरिते सुखी दुःखी बंधुवियुक्तः शोचति मुह्यते च। तस्माच्छोकमोहधर्मवानेवायं नास्य शोकमोहादयः सुखदुःखादयश्च कार्यकरणसंयोगजनितत्वात्याऽध्यारोपिता इति न मृषात्वात्। स प्रकृत आत्मा यत्र यस्मिन्काले दर्शनलक्षणया स्वप्न्यया स्वप्नवृत्त्या चरति वर्त्तते तदा ते हास्य लोकाः कर्मफलानि के ते तत्र उत अपि महाराज इव भवति सोऽयं महाराजत्वमिवास्य लोको न महाराजत्वमेव जागरित इव तथा महाब्राह्मण इव उत इव अपि उच्चावचं उच्चं देवत्वाद्यवचं च तिर्यक्त्वादि उच्चमिवावचमिव च निगच्छति मृषैव महाराजत्वादयोऽस्य लोका इव शब्दप्रयोगाद्व्यभिचारदर्शनाच्च। तस्मान्न बंधुवियोगादिजनितशोकमोहादिभिः स्वप्ने संबध्यत एव। ननु च यथा जागरिते जाग्रत्कालाव्यभिचारिणो लोका एवं स्वप्नेऽपि तस्य महाराजत्वादयो लोकाः स्वप्नकालभाविनः स्वप्नकालाव्यभिचारिणः आत्मभूता एव न त्वविद्याध्यारोपिता इति। ननु च जाग्रत्कार्यकरणात्मकं देवतात्मत्वं चाविद्याध्यारोपितं न परमार्थत इति व्यतिरिक्तविज्ञानमयात्मप्रदर्शनेन प्रदर्शितं। न त्वं कथं दृष्टान्तत्वेन स्वप्नलोकस्य मृतत इवाज्ञो विध्यन्त्वाद्दुर्भविष्यति।

कोक्तमात्रयतिनतु चेति। पूर्ववादी दृष्टान्तं साधयति। सत्यमित्यादिना। देहद्वयस्यात्मनश्च विवेकमात्रं प्रागुक्तं। ननु प्राधान्येनात्मनः शुद्धिरुक्तेति विभागमंगीकृत्य वस्तुतोऽसंतमपि दृष्टांतं संतं कृत्वाते

तदभिमानं

स्वस्वरूपमात्मानमित्यर्थः

[illegible]
[illegible]

कार्यनिमित्ता [illegible] अज्ञाने
न आरोपिता।

व्यापारवद्भिः वागादिभिः संबंधी
[illegible]
मिति भावः।

स्वापकरणोपसंहारं विहरणमिति कथा[illegible]मित्यादिना

उक्तो विध्यन्तं मृतत इव जाग्रल्लोकः स्वप्नलोकस्य दृष्टान्तं नैव क
थं [illegible] भविष्यति जाग्रल्लोकविलक्षणत्वं भावितमित्यर्थः।

अलमत्र येनुग्रासुत्र सप्रमीतन्तुवचः

जनपदेष्वाव

तस्य महाराजस्य पर्यंकेशयानाद्द्वितीयरूपं प्रकृत्य तु येवंअहंमिति विषयेषयं अनाद्रूपं च लोके प्रसिद्धं नास्ति।

वागादीन्

न स्वप्नसत्यत्वमाशंक्य तन्निरासेनात्मोऽतिरिक्तोऽशुद्धिरात्मनः स्वप्नवाक्येनोच्यते। तथा च जाग्रतोऽपि तथा मिथ्यात्वादात्मैकरसः शुद्ध इत्यादित्याशयवानाह। स्वप्नपीति। परिशिष्टं वाक्यं जाग्रन्मिथ्यात्वोक्त्याऽर्थाद्दुक्ताशुद्धिरपि शेषो वाच्येति चेन्न पुनरुक्तिरित्याशंक्याह। सर्वो हीति। पूर्वं च शुद्धिवासार्थिकत्वादिह वाच्य निकान्न पुनरुक्तिरिति भावः। नाग्रहे ग्रहणं तेन स्वप्नसत्यत्वचोद्यसमाधानं अलमत्र साधितमिति पूर्ववादिसुखेन कास्तमाधिमधुना कथयति। न नावदिति॥ ॥विमतानदृष्टात्मनोऽधर्मावात दृश्यत्वात् घटादिवत्। किं च स्वप्नदृष्टानां जाग्रत्दृष्टादर्थान्तरत्वेन दृष्टे मिथ्यात्वमित्याह। महाराजइति। अन्यस्येति। घटादिवदात्मनोऽन्यस्य जाग्रत्त्वादिविबंभूतस्य लोकस्य आत्मना दर्शनात् जाग्रत्दृष्टार्थान्तरत्वमसिद्धमित्याशंक्याह। न चैतस्मि। जाग्रद्दृष्टात्स्वप्नदृष्टस्यार्थान्तरं यदि नस्यात्तर्हि जाग्रद्दृष्टवत्स्वप्नमपि प्रसिद्धस्यादि

तत्तत्क्रमेणेत्यर्थः

अनेन पथिप्रवृत्तमा
त्मानं पश्यतीत्येत
निरस्तम्

लोका आत्मभूता आत्मनोऽन्यस्य जाग्रत्प्रतिबिंबभूतस्य लोकस्य दर्शनान्महाराजप्रसिद्ध एव तावदस्तमुप्रास्तु प्रकृतिष्ठ पर्यंकेशयानः स्वप्नान्यस्य तूपसंहृत्य करनः पुनरूपगतप्रकृति महाराजमिवात्मानं जागरित इव पश्यति। यत्रागतं भुंजानमिव च भोगान्। न च तस्य महाराजस्य पर्यंकेशयानो द्वितीयोऽन्यः प्रकृत्युपेतो विषये पर्यटन्नहनि लोके प्रसिद्धोऽस्ति यस्य सोऽसुप्तः पश्यति। न चोपसंहृतकरणस्य रूपादिमतो दर्शनमुपपद्यते न च देहे देहान्तरस्य तत्तुल्यस्य संभवोऽस्ति देहस्थस्यैव हि स्वप्नदर्शनं ननु पर्यंकेशयानः पथि प्रवृत्तमात्मानं पश्यति न बहिः स्वप्नान्न पश्यतीत्येतदाह। स महाराजो जानपदान्राजोपकरणभूतान्भृत्यानन्यांश्च गृहीत्वोपादाय स्व आत्मीय एव जयादिनोपार्जिते जनपदे यथाकामं यो यः कामोऽस्य यथाकाममिच्छातो यथा परिवर्त्तेतेत्यर्थः। एवमेवैष विज्ञानमयः एतदिति क्रियाविशेषणं प्राणान्गृहीत्वा जागरितस्थानेभ्य उपसंहृत्य स्वशरीरे स्व एव देहे न बहिः यथाकामं परिवर्त्तते कामकर्मभ्यामुद्भासिताः पूर्वानुभूतवस्तुसदृशीर्वासना अनुभवतीत्यर्थः। तस्मात्स्वप्ने मृषाध्यारोपिता एवात्मभूतत्वेन लोका अविद्यमाना एव सन्तस्तथा जागरितेऽपीति प्रत्येतव्यं। तस्माद्विशुद्धोऽक्रियाकारकफलात्मको विज्ञानमय इत्येतत्सिद्धं। यस्माद्दृश्यंते तेन दृष्टविषयभूता जागरितलोकेभ्यो विज्ञानमयो विशुद्धः॥ १८ ॥

स यथा महाराजो जानपदान्गृहीत्वा स्वे जनपदे यथाकामं परिवर्त्ततैवमेवैष एतत्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्त्तते॥ १८ ॥ अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिः सहस्राणि हृदयात्पुरीततमभिप्रतिष्ठंते

दर्शनवृत्तौ स्वप्ने वासनाराशेर्दृश्यत्वादतद्धर्मेत्येतिविशुद्धतावगतात्मनः। तच्च यथाकामं परिवर्त्तत इति। कामवशात्परिवर्त्तनमुक्तं। दृश्यदृश्यसंबंधश्चास्य स्वाभाविक इत्यशुद्धताशंक्यते न विशुद्धअर्थमाह। अथ यदा सुषुप्तो भवति। यदा स्वप्नया चरति तदाप्ययं विशुद्ध एव। अथ पुनर्यदा हित्वा दर्शनवृत्तिं स्वप्नं यदा यस्मिन्काले सुषुप्तः सुषुप्तः संप्रसादं स्वाभाव्यं गतो भवति सलिलमिवान्यसंबंधकालुष्यं हित्वा स्वाभाव्येन प्रसीदति। कदा सुषुप्तो भवति। यदा यस्मिन्काले न कस्यचन न किंचनेत्यर्थः। वेद विजानाति कस्यचन शब्दाद्वे संबंधिवस्त्वंतरं किंचन न वेदेत्यध्याहार्यं। पूर्वं तु न्याय्यं विशेषज्ञानाभावस्य विवक्षितत्वात्। एवं तावद्विशेषविज्ञानाभावे सुषुप्तो भवतीत्युक्तं केन पुनः क्रमेण सुषुप्तो भवतीत्युच्यते। हिता नाम हिता इत्येवं नाम्न्यो नाड्यः शिरा देहस्यान्नरसविपरिणामभूतास्ताश्च द्वासप्ततिः द्वे सहस्रे अधिके सप्ततिश्च सहस्राणि तासां सप्ततिसहस्राणि नाडीनां हृदयात् हृदयं नाम मांसपिंडस्तस्मान्मांसपिंडात्पुंडरीकाकारात् पुरीततं हृदयपरिवेष्टनमाचक्षते तदुपलक्षितं शरीरमिह पुरीतच्छब्देनाभिप्रेतं पुरीततमभिप्रतिष्ठंत इति शरीरं कृत्स्नं व्याप्नुवंत्यश्वत्थपर्णराजय इव बहिर्मुखाः प्रवृत्ता इत्यर्थः॥ ॥रामरामराम॥ ॥रामरामराम॥ ॥रामरामराम

तिभावः। प्रमाणासामग्र्याभावाच्च स्वप्नस्य मिथ्यात्वमित्याह। न चोपसंहृतेति। योग्यदेशाभावाच्च तन्मिथ्यात्वमित्याह। न च देहे इति। एतदिति क्रियाया ग्रहणस्य विशेषणं। एतद्ग्रहणं यथा भवति तथेत्यर्थः। स्वप्नस्य मिथ्यात्वेन न दृश्यं तेन जडत्वादिहेतुना जागरितस्यापि तथात्वं ग्राह्यं निश्चेतुमित्याह। तथेति। आक्षिपदेन दृश्यत्वादिर्जागरितं दृश्यंतीकृत्य दृष्टांतकमाह। तथेति। दृश्यदृश्यभावे मिथ्याकालेन माह। तस्मादिति। देहाद्बहिरेव स्वप्नदर्शनस्यांगीकाराद्योग्यदेशसिद्धिरित्याशंक्याह। देहस्थस्येति। तदेव साधयितुं शक्यते। नन्विति। तत्र स यथेत्यादिवाक्यमुत्तरत्वे

किंचनवस्त्वंतरमित्यध्याहार्यमित्यर्थः तदा भिद्यस्य मुक्तानां मिथ्यानिरीश्वरः
पूर्वं पूर्वमारब्धानामपि [illegible] भावः

बहिः प्रसारयति बुद्धिः

तत्रव्यंत

सविवार्यं प्रसरद्विकाशमनुतद्यौक्य भवति भोगमायादिरूपः

अतिसंकोचे सुषुप्तिः अल्पसंकोचे स्वप्नदर्शनं प्रत्यागमनं

नावतार्यव्याचष्टे। नवेहीरित्यादिनाह्यन्नानुवादपूर्वकमुत्तरं श्रुतिर्निरस्याशंकामाह। दृष्टोनष्टस्याविप्यादिना। यद्दृष्टस्पंनमस्य पूर्वधर्मः यद्यवस्तु पुरुषसंबंधः स्वाभाविकोभवेद्येन्न कदाचित्व्यभिचरेत्। सुषुप्तेव्यभिचरति। तस्मान्नपुरुषरूपसंबंधः स्वाभाविक इति दर्शयितमथेत्यादिवाक्यं॥ ॥ताभिरित्यादिव्याकर्तुं भूमिकांकरोति। नवेति। शरीरंसमग्रस्यार्थः। भागइत्यस्यविशेषणंजाग्रद्विकाशानुभवति। पदार्थमुक्त्वावाक्यार्थमाह। तत्र निवेति। हृदयाकाशे ब्रह्मणि शेते तानात्मेत्युक्तात्पुरीततिशयनमाचक्षाणो स्यपूर्वापरविरोधः स्यादित्याशंक्याह। स्वाभाविक इति। औपचारिकमिदं वचनमित्यत्र हेतुमाह। नह्येति

तत्रबुद्धेरंतःकरणस्य हृदयं स्थानं तत्रस्थबुद्धितंत्राणि चेतराणि वाह्यानि करणानि। तेन बुद्धिः कर्मवशाच्छ्रोत्रादीनि तानि नाडीभिर्मत्स्यजालवत्कर्णशष्कुल्यादिस्थानेभ्यः प्रसारयति। प्रसार्य चाधितिष्ठति जागरितकाले तां विज्ञानमयोभिव्यक्तस्वात्मचैतन्यावभासतया व्याप्नोति संकोचनकाले च तस्यां अनुसंकुचति स्वप्नविज्ञानमयस्य स्वापो जाग्रद्विकाशानुभवो भोगो बुद्ध्युपाधिस्वभावानुविधायी हि सः चंद्रादिप्रतिबिंबइव जलाद्यनुविधायी तस्मात्तस्या बुद्धेः जाग्रद्विषया यास्ताभिर्नाडीभिः प्रत्यवसर्पणमनुप्रत्यवसृप्यपुरीतति शरीरे शेते तिष्ठति तप्तलोहमिवाग्निः पिंडसविशेषेण संव्याप्याग्निवत्स्त्रीशरीरं संव्याप्य वर्त्तत इत्यर्थः। स्वाभाविक एवस्वात्मनि वर्त्तमानो पि कर्मानुगतबुद्ध्यनुवर्त्तनात्पुरीतति शेत इत्युच्यते। नहि सुषुप्तकाले शरीरसंबंधोस्ति तीर्णो हि तदा सर्वान्शोकान्हृदयस्येति वक्ष्यति। सर्वसंसारदुःखवियुक्तः सुषुप्तावस्थेति। अत्र दृष्टांतः सयथाकुमारोवात्यंतबालो वा महाराजो वा त्यंतवश्यप्रकृतिर्यथोक्तकृत्महाब्राह्मणो वात्यंतपरिपक्वविद्याविनयसंपन्नो तिघ्नीमतिशयेन दुःखं हंतीति अतिघ्नी आनंदस्यावस्था सुखावस्थातां प्राप्य गत्वा शयीता वतिष्ठेत एषां च कुमारादीनां स्वभावावस्थानां सुखं निरतिशयं प्रसिद्धं लोके। विक्रियमाणानां हि तेषां दुःखं न स्वभावतस्ते

ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वा ऽतिघ्नीमानंदस्य गत्वा शयीतैवमेवैष एतच्छेते॥ १९॥

विज्ञानमयःशेतेसुषुप्तावस्थावान्
वर्त्ततइत्यर्थः
स्वयथोवादेःसंगतिंवक्तुंद्द
शंकानिरस्यति। क्वैषइति॥

नैतेषां स्वाभाविकावस्था दृष्टांतत्वेनोपादीयते। प्रसिद्धत्वात्मनेषां स्वाप एवाभिप्रेतः स्वापस्य दार्ष्टांतिकत्वेन विवक्षितत्वात् विशेषाभावाद्विशेषो हि सति दृष्टांतदार्ष्टांतिकभेदः स्यात् तस्मात्तेषां स्वापो दृष्टांतः। एवमेव यथायं दृष्टांत एष विज्ञानमयः एतत्शयनं शेत इत्येतच्छब्दः क्रियाविशेषणार्थः एवमयं स्वाभाविकेस्वआत्मनि सर्वसंसारधर्मातीतो वर्त्तते स्वापकालइति॥ १९॥ क्वैषतदाभूदित्यस्य प्रश्नस्य प्रतिवचनमुक्तमनेन च प्रश्ननिर्णयेन विज्ञानमयस्य स्वभावतो विशुद्धिरसंसारित्वं चोक्तं। क्वतएतदागादित्यस्य प्रश्नस्यापाकरणार्थ आरंभः। ननु यस्मिन्ग्रामे नगरे वा यो भवति सोन्यत्र गच्छन्तत एव ग्रामान्नगराद्वागच्छति नान्यतः तथा सति क्वैषतदाभूदित्येतावानेवास्तु प्रश्नो यत्राभूत्तत एवागमनं प्रसिद्धं स्यान्नान्यत इति क्वतएतदागादिति प्रश्नो निरर्थक एव। किंश्रुतिरूपालभ्यते भवतानकिं तर्हि द्वितीयस्य प्रश्नस्यार्थांतरं श्रोतुमिच्छाम्यत आनर्थक्यं चोदयामि। एवंतर्हि क्वत इत्यपादानार्थता गृह्यते ऽपादानार्थत्वेहि पुनरुक्तता नानान्यार्थत्वे। अस्तु तर्हि निमित्तार्थः। प्रश्नः कुत एतदागात्किं निमित्तमिहागमनमिति। न निमित्तार्थतापि प्रतिवचनवैरूप्यात्। आत्मनस्सर्वस्य जगतो ऽग्निविस्फुलिंगादिवदुत्पत्तिः प्रतिवचने श्रूयते। नहि विस्फुलिंगानां विद्रवणे ऽग्निर्निमित्तमपादानमेव तु सः। तथा परमात्मा विज्ञानमयस्यात्मनो ऽपादानत्वेन श्रूयते ऽस्मादात्मन इत्यतस्मिन्वाक्ये तस्मात्प्रतिवचनवैलोम्यात्कुतइति प्रश्नस्य निमित्तार्थता न शक्यते वर्णयितुं। नन्वपादानपक्षेपि पुनरुक्ततादोषो वस्थित एव नैषदोषः प्रश्नाभ्यामात्मनि क्रियाकारकफलात्मतापोहस्य विवक्षितत्वात् इह

किंपुनरत्रप्रश्नाभि
प्रायेनफलति। तेष
दार्थशुद्धिरित्याह॥

61

कर्मादिस्वापस्येव दृष्टांतत्वं किं न स्यादित्याशंक्याह। नतेषामिति। क्वैषतदाभूदितिप्रश्नस्योत्तरमुपपादितमुपसंहरति। एवमिति। क्वतइति अपादानार्थतैरपंचम्याः प्रश्नसमाप्तेसतिएकदेशीब्रवीति॥ एवंतर्हीति। कथमन्यार्थत्वं तदाह। नन्विति। एकदेशिनं पूर्ववादी दूषयति। नेति। भवतु तर्हि अपादानार्थपंचमीत्याशंक्य पूर्ववादी पूर्वोक्तं स्मारयति। नन्विति। पूर्वविघातज्ज्ञपि सुकप्रश्नागद्वयं ब्रह्मप्रश्नद्वयस्या

[illegible]

ननुनिश्चये

जगतः सर्वस्यचेतनस्यचेतिवक्तव्ये शब्दः। तेनोभयोपादानत्वं
स्यात्तं सदोषाइतिभावः

अपोहविषयीश्रुतिरयोविशेषावभूमत्वादनतिशंकनीयेतिसिद्धांतोगूढा
भिसंधिराह। किंश्रुतिरिति।

प्रतिवचनयोस्तात्पर्यमाह। नायमिति। स्वात्मन्येवाभूदित्यत्र प्रमाणमाह। स्वमात्मानमिति। सुषुप्तौ स्वात्मन्येवावस्थितिरतःशब्दार्थः। आगमने आत्मन एवावधित्वमित्यत्रोपपत्तिमाह। आत्मव्यतिरेकेणेति आधेयः। अपादानात्। निवर्त्तयितव्येति प्रतिवचनप्रवृत्तिरिति शेषः। अग्रे वर्त्तमानेने अनेनेत्यर्थः। ब्रह्मणोऽक्रियत्वात् ततो न प्राणाद्युत्पत्तिरिति शंकते। तत्कथमिति। सृष्टेर्मायामयत्वमाश्रित्य परि

उपासीतेति विद्याविषयः। तथाविद्याविषयश्च पाङ्क्तं कर्म तत्फलं चान्नत्रयं नामरूपकर्मात्मकमिति। न चाविद्याविषय एव कृत्स्नं सर्वमुक्तं विद्याविषयस्त्वात्मा केवल उपन्यस्तो न निर्णीतः। तन्निर्णयाय च ब्रह्म ते ब्रवाणीति प्रक्रान्तं ज्ञपयिष्यामीति च तद्ब्रह्मविषयभूतं ज्ञापयितव्यं याथात्म्यतः। तस्य च याथात्म्यं क्रियाकारकफलभेदशून्यमत्यन्तविशुद्धमद्वैतमित्येतद्विवक्षितं। अतस्तद्वस्तुरूपोपप्रश्नावुत्थाप्येनेकृत्वा क्वैष तदाभूत्कुत एतदागादिति। तत्र यत्र भवति तदधिकरणं यद्भवति तदधिकर्त्तव्यं तयोश्चाधिकरणाधिकर्त्तव्ययोर्भेदो दृष्टो लोके। तथा यत आगच्छति तदपादानं य आगच्छति स कर्त्ता तस्मादन्यो दृष्टस्तथात्मा क्वाप्यभूदन्यस्मिन्नन्यः कुतश्चिद्वागादन्यस्मादन्यः केनचिद्भिन्नसाधनान्तरेणेत्येवं लोकवत्प्राप्ता बुद्धिः। सा प्रतिवचनेन निवर्त्तयितव्येति। नायमात्माऽऽत्मनोऽन्यत्राभूदन्यो वान्यस्मादागतः साधनान्तरं वाऽऽत्मन्यस्ति किं तर्हि स्वात्मन्येवाभूत्स्वात्मानमपीतो भवति सता सोम्य तदा संपन्नो भवति प्राज्ञेनात्मना संपरिष्वक्तः। परे आत्मनि संप्रतिष्ठित इत्यादिश्रुतिभ्यः। अत एव नान्योऽन्यस्मादागच्छतीति। तच्छ्रुत्यैव प्रदर्श्यते अस्मादात्मन इत्यात्मव्यतिरेकेण वस्त्वन्तराभावात्। नन्वस्ति प्राणाद्यात्मव्यतिरिक्तं वस्त्वन्तरं। न प्राणादेस्तत एव निष्पत्तेः ॥ १९ ॥ तत्कथमित्युच्यते। अत्र दृष्टान्तः। स यथा लोके ऊर्णनाभिरूर्णनाभिर्लूताकीट एक एव प्र

स यथोर्णनाभिस्तन्तु-
नोच्चरेद्यथाग्नेः क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरंति तस्योपनिष-
त्सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यं ॥ २० ॥ ॥ प्रथमं ब्राह्मणम् ॥ ॥ राम ॥ ॥ रामरामराम।

सिद्धः सन् स्वात्माप्रविभक्तेन तंतुनाउच्चरेदुद्गच्छेन्न चास्ति तस्योद्गमने स्वतोऽतिरिक्तं कारकान्तरं। यथा चैकरूपादेकस्मादग्नेः क्षुद्रा अल्पा विस्फुलिंगास्त्रुटयोऽग्न्यवयवा व्युच्चरंति विविधं नाना वा उच्चरंति यथेमौ दृष्टान्तौ कारकभेदाभावेऽपि प्रवृत्तिं दर्शयतः। प्राक्प्रवृत्तेश्च स्वभावत एकत्वमेवमेवास्मादात्मनो विज्ञानमयस्य प्राक्प्रतिबोधात् यत्स्वरूपं तस्मादित्यर्थः। सर्वे प्राणा वागादयः सर्वे लोका भूरादयः सर्वाणि कर्मफलानि सर्वे देवाः प्राणलोकाधिष्ठातारोऽग्न्यादयः। सर्वाणि भूतानि ब्रह्मादिस्तंबपर्यंतानि प्राणिजातानि। सर्व एत आत्मान इत्यस्मिन्पाठे उपाधिसंपर्कजनितप्रतिबुध्यमानविशेषात्मान इत्यर्थो व्युच्चरंति। यस्मादात्मनः स्थावरजंगमं जगदिदमग्निविस्फुलिंगवद्व्युच्चरत्यनिशं यस्मिन्नेव च प्रलीयते जलबुद्बुदवद्यदात्मकं च वर्त्तते स्थितिकाले तस्यास्यात्मनो ब्रह्मण उपनिषदलौकिकार्थत्वाद्दुर्विज्ञेयार्थेति तदर्थमाचष्टे प्राणा वै सत्यं तेषामेष सत्यमिति। एतस्यैव वाक्यस्य व्याख्याना-

हरति। उच्यत इति। ब्रह्मणो वाचकेषु शब्दान्तरेष्वपि सत्सु किमन्येन सत्यशब्दविषयमादरः शंक्यते। तत्राह। प्राणा वेति। प्रतिबिंबस्य वागादीनां भूरादीनां चाधिष्ठातारः वागादयः सत्यं पंचभूतत्वादचिरस्थायित्वाच्च स्थूलापेक्षया आत्मा किमत्र नियामकमित्याशंक्य ब्रह्म वा इदमित्यादिशास्त्रमित्याह। सर्वमेतदिति। जीवब्रह्मणोर्भेदोऽभेदो वेति विकल्प्याद्योऽयमाह

संसारिणः परः श्रुत्वा [illegible] प्रमितान[illegible]

जीवादन्यः

किंत्विति। अभेदपक्षं द्रढयति। संसारिणश्चेति। उपदेशानर्थक्यादभेदपक्षात्तु पपत्तिरिति शेषः। ननु तावत्संसारपर इति जगत्कर्त्राद्य ईश्वरो विवक्ष्यते। प्रकृते च सुषुप्तिविशिष्टो जीवात्मा गतं तन्मोच्यते। न
स्मादीश्वरो जीवादतिरिक्तो नाहं तीत्यर्थः। तदेव प्रपंचयति। नेत्यादिना। प्रकृतेऽपि न जगत्कारणत्वमीश्वरस्य वाचकं तामिति शंक्याह। न चेति। तच्च प्रकरणविरोधहेतुमाह। विज्ञानेति। श्रुत्यंतर
वशादपि जीवस्यैव च जगत्कर्तृत्वमित्याह। समानप्रकरणेति। वाक्यशेषवशादपि जीवस्यैव वेदितव्यमिति दर्शयति। तथा चेति। संसारिणो जीवादसंसारी ईश्वरोऽन्यो वक्तव्यस्तस्मादीश्वर एव असंसारित्वाद

भवतु तावदुपनिषदारम्भे नायोऽत्र ब्राह्मणादयं तस्योपनिषदि सूक्तेन तच्च न जानीमः। किं प्रकृतस्यात्मनो विज्ञानमयस्य प्राणिवर्गाधिष्ठितस्य संसारिणः शब्दादिभुजः सुषुप्तनिष्ठ
दाहोस्विदसंसारिणः कस्यचित्। किं चातः। यदि संसारिणस्तदा संसार्येव विज्ञेयस्तज्ज्ञानादेव सर्वप्राप्तिः। स एव ब्रह्मशब्दवाच्यस्तद्विद्यैव ब्रह्मविद्याप्रामाण्याज्जीव इति। किंत्वस्मिन्पक्षे
आत्मन्येवोपासीनात्मानमेवावेदहं ब्रह्मास्मीति परब्रह्मैकत्वप्रतिपादकश्रुतयः कुप्येरन्। संसारिणश्चान्यस्याभावे उपदेशानर्थक्यात्। यत एवमुभे तानामपक्षे तन्महामोहः
स्यान्नमस्त्वुक्तप्रतिवचनप्रश्नविषयः अतो यथाशक्त्या ब्रह्मविद्याप्रतिपादकवाक्येषु ब्रह्मविजिज्ञासुना तद्विमृत्यादयं विचारयिष्याम। ननु तावदसंसारिपरः पाणिपेषप्रति
बोधितात् ऊर्ध्वादिभुजो वस्थान्तरविशिष्टादुत्पत्तिश्रुतेः। न प्रशासितानाः शयनायादिविवर्जितः पराविद्यते। कस्मात् यस्मात् ब्रह्म ते ज्ञपयिष्यामीति प्रतिज्ञाय सुप्तं पुरुषं पाणिपेषं
बोधयित्वा तं शब्दादिभोक्तृत्वविशिष्टं दर्शयित्वा तस्यैव स्वप्नद्वारेण सुषुप्ताख्यमवस्थान्तरमुन्नीय तस्मादेवात्मनः सुषुप्तावस्थाविशिष्टादग्निविस्फुलिंगानामिव
ष्टांतास्यासुत्पत्तिं दर्शयति श्रुतिः। एवमेवास्मादात्मन इत्यादिना। न चान्यो जगदुत्पत्तिकारणं अंतराले श्रुतोऽस्ति विज्ञानमयस्यैव हि प्रकरणं। समानप्रकरणे च श्रुत्यंतरे कौ
षीतकिनामादित्यादिपुरुषान्ब्रह्मत्वमुक्तवन्तं स होवाच यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्य इति प्रकृतस्यैव विज्ञानमयस्यैव दर्शयितव्यतां दर्शयति।
नार्थांतरस्य। तथा चान्यत्र स्तुकामाय सर्वप्रियं भवतात्मकामाय एवात्मा प्रियः प्रसिद्धस्तस्यैव द्रष्टव्यश्रोतव्यनिदिध्यासितव्यतां दर्शयति। तथा च विद्योपन्यासकाल आत्मेत्ये

आदित्यादिपुरुषान्

जीवातिरिक्त[illegible]
[illegible]
[illegible]
[illegible]

वोपासीत तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्तदात्मानमेवावेदहं ब्रह्मास्मीत्येवमादिवाक्यानामपि हि लोम्यं स्यात्पराभावे। वक्ष्यति चात्मानं चेद्विजानीयादयमस्मीति पूरुष इति। स
र्वेदांतेषु च प्रत्यगात्मवेद्यतेव प्रदर्श्यते। ऽहमिति न वहिर्वेद्यता शब्दादिवत्प्रदर्श्यते सोऽब्रह्मेति। तथा कौषीतकीनामेव न वा च विजिज्ञासीत वक्तारं विद्यादित्यादिना वाग्
दिकरणव्यापृतस्य कर्तुरेव वेदितव्यतां दर्शयति। अवस्थांतरविशिष्टोऽसंसारीति चेत्। अथापि स्यात् यो जागरिते शब्दादिभुग्विज्ञानमयः स एव सुषुप्ताख्यमवस्थांतरं
गतोऽसंसारीति परप्रशासिता नान्यः स्यादिति चेत्। नादृष्टत्वान्नह्येवंधर्मकः पदार्थो दृष्टोऽन्यत्र वैनाशिकसिद्धांतात्। नहि लोके गौस्तिष्ठन् गच्छन्वा गौर्भवति। शयानस्त्वश्वा
दिजात्यंतरमिति। न्यायाच्च यद्धर्मकोयः पदार्थः प्रमाणेनावगतो भवति स देशकालावस्थांतरेष्वपि तद्धर्मक एव भवति। स चेत्तद्धर्मकत्वं व्यभिचरति सर्वप्रमाणव्यवहारो
लुप्येत। तथा च न्यायविदः सांख्यमीमांसकादयोऽसंसारिणोऽभावं युक्तिभिः प्रतिपादयंति। संसारिणोऽपि जगदुत्पत्तिस्थितिलयक्रियाकर्तृत्वविज्ञानस्याभावा
द्युक्तमिति चेत्। यन्महता प्रपंचेन स्थापितं भवता शब्दादिभुक्संसार्येवावस्थांतरविशिष्टो जगतः कर्तेति। तदसद्यतो जगदुत्पत्तिस्थितिलयक्रियाकर्तृत्ववि
ज्ञानशक्तिसाधनाभावः सर्वलोकप्रत्यक्षः संसारिणः स कथमस्मदादिः संसारी मनसापि चिंतयितुमशक्यं पृथिव्यादिविन्यासविशिष्टं जगन्निर्मिनुयात्। अतोऽ
युक्तमिति चेत्। न शास्त्राच्छास्त्रं संसारिण एवमेवास्मादात्मन इति जगदुत्पत्त्यादि दर्शयति तस्मात्त्वं ब्रह्मासीति स्यादयमेकः पक्षः। यः सर्वज्ञः सर्ववित्सोऽशनायापिपासे

अन्येत्वसंगो नहि सज्यते

आदित्यादिलोकाय
[illegible]
[illegible]

इत्यत्र विचार्य कार्यतामवतार्य पूर्वपक्षयति। ननु तावदिति। वक्तव्ये पूर्वपक्षत्वादुच्यते नात्मीयः जीवादतिरिक्त। इतश्च जीवस्यैव वेद्यतेत्याह। सर्वेति। तत्रैव हेत्वंतरमाह। तथेति। श्लाघायाम्

नावस्थाऽदेहादभेदः
[illegible]
[illegible]
[illegible]

[illegible]जीवात्मा।
[illegible]
[illegible]

पंचमपदं

पूर्वपक्षः ईश्वरवादमुत्थापयति
[illegible]

62

[illegible]

तानिति। तावत्पृथिव्याद्यभिमानिनः पुरुषान्निरूह्य उत्पाद्य योगीति क्रांतवान्। श्रुतयः स्मृतयश्चोदाहृताः। न्यायस्तु विचित्रं कार्यं विशिष्टज्ञानवत्पूर्वकं। प्रासादादौ तथोपलंभादित्यादिः। प्रकृतमनुसृत्य जीवस्य प्राणादिकरणानां सृष्टं स्मारयति। नन्विति। इतश्चाकाशशब्दस्य परमात्मविषयत्वे न्यायो हृदरोस्मिन्निति। अस्तीश्वरो जगत्कारणं ब्रह्म। तदेव जीवस्य स्वरूपं। तस्य यन्मुपनिषदीति सिद्धांतमाशंक्य दूषयति। अत्र चेति। आशंकां दूषयति। आशंकोत्थापनपूर्वकं दूषयतीत्यर्थः। नचेति। ब्रह्मविद्यायां प्रस्तुतायामिति यावत्। इदानीं नशस्लीयादिति संबंधः। मिथो विरुद्धत्वप्रतीत्यवस्थायामित्येतत्॥

एतस्य वा अक्षरस्य प्रशासने यः सर्वभूतेषु तिष्ठन्नंतर्यामी अमृतः स यत्नानुरूपाणि सृत्वा त्यक्काम तवा एष महानज आत्मा एष सेतुर्विधरणः सर्वस्य वशी सर्वस्येशानो य आत्मा अपहतपाप्मा विजरो विमृत्युः स तेजो असृजत आत्मा वा इदमेक अग्र आसीन्न लिप्यते लोकदुःखेन बाह्य इत्यादिश्रुतिशतेभ्यः स्मृतेश्च अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इति परात्परस्य संसारी श्रुतिन्यायेभ्यश्च श्रुतिकारणं जगतः। नन्वेवमेवास्मादात्मन इति संसारिण एवोत्पत्तिं दर्शयतीत्युक्तं। न एषोंतर्हृदय आकाश इति परस्य प्रकृतत्वात् अस्मादात्मन इति युक्तः परस्यैव परामर्शः। कथं तदा श्रुतिस्त्वस्य प्रश्नस्य प्रतिवचनत्वेनाकाशशब्दवाच्यः पर आत्मोक्तः एषोंतर्हृदय आकाशस्तस्मिन् शेत इति स नामास्य तदा संपन्नो भवत्यहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंति प्राज्ञेनात्मना संपरिष्वक्तः। पोऽयात्मनि संप्रतिष्ठित इत्यादिश्रुतिभ्यः आकाशशब्दः पर आत्मेति निश्चीयते दहरोऽस्मिन्नंतराकाश इति प्रस्तुत्य तस्मिन्नेवात्मशब्दप्रयोगाच्च प्रकृत एव परमात्मा। तस्माद्युक्तमेवास्मादात्मन इति परमात्मन एव सृष्टिरिति। संसारिणः सृष्टिस्थितिसंहारज्ञानसामर्थ्याभावं चावोचाम। अत्र चात्मेत्येवोपासीत तमात्मानमेवावेदहं ब्रह्मास्मीति ब्रह्मविद्या प्रस्तुता। ब्रह्मविषयं च ब्रह्मज्ञानमिति ब्रह्मते प्रवासि ब्रह्म प्रपत्स्यामीति प्रारब्धं। तत्रेदानीं असंसारब्रह्म जगतः कारणमज्ञानाद्याद्यतीति नित्यमुक्तं शुद्धबुद्धस्वभावं तद्विपरीत संसारी न स्मारहं ब्रह्मास्मीति न गृह्णीयात्। यो हि देवमीशानं न कुत्र संसार्यात्मत्वेन स्मरन् कथं न दोषभाक् स्यात्। तस्मान्नाहं ब्रह्मास्मीति युक्तं। तस्मात्तु व्याप्तकांजलिरिति नमस्कारं बल्युपहारं स्वाध्याय

याध्ययन योगादिभिराराधयिष्यत। आराधनेन विदित्वा सर्वेशितृ ब्रह्म भवति॥ न पुनर संसारि ब्रह्म संसार्यात्मत्वेन चिंतयेदग्निमिव शीतत्वेन आकाशमिव मूर्तिमत्वेन। ब्रह्मात्मत्वप्रतिपादकमपि शास्त्रमर्थवादो भविष्यति। सर्वतर्कशास्त्रलोकन्यायैश्चैवमविरोधः स्यात्। नमेव ब्राह्मणावादेभ्यस्तस्यैव प्रवेशश्रवणात्। पुरश्चक्रे इति प्रकृत्य पुरः पुरुष आविशदिति रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते इति सर्वशाखासु सहस्रशो मंत्रवादाः स्रष्टुरेव संसारिणः शरीरप्रवेशं दर्शयंति। तथा ब्राह्मणवादाः तत्सृष्ट्वा तदेवानुप्राविशत्। स एवमेव सीमानं विदार्यैतया द्वारा प्रापद्यत सेयं देवतैक्षत हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते सर्वं श्रुतिषु च ब्राह्मणपात्मशब्दप्रयोगादात्मशब्दस्य च प्रत्यगात्माभिधायकत्वात् एष सर्वभूतांतरात्मेति च श्रुतेः। परमात्मनव्यतिरेकेण संसारिणोऽभावादेकमेवाद्वितीयं ब्रह्मैवेदमात्मैवेदमित्यादिश्रुतिभ्यः युक्तमेवाहं ब्रह्मास्मीत्यवधारयितुं। यद्येवं स्थितः शास्त्रार्थः तदा परमात्मनः संसारित्वं। तथा च सति शास्त्रानर्थक्यं असंसारित्वे चोपदेशानर्थक्यमित्येतौ दोषौ प्रापत। यदि तावत्परमात्मा सर्वभूतांतरात्मा सर्वशरीरसंपर्कजनितदुःखान्यनुभवतीति स्यात् परस्य संसारित्वं प्राप्तं तथा च परस्यासंसारित्वप्रतिपादकाः श्रुतयः कुप्येरन् स्मृतयश्च सर्वे च न्यायाः। अथ कथंचित्प्राणशरीरसंबंधजैर्दुःखैर्न संबध्यत इति शक्यं प्रतिपादयितुं परमात्मनः साध्यपरिहार्याभावात् उपदेशानर्थक्यं तेन निवारयितुं। अत्र केचित्परिहारमाचक्षते। परमात्मानं साक्षाद्भूतेष्वनुप्रविष्टः स्वेन रूपेण किं तर्हि विकारभावमापन्नो विज्ञानात्मत्वं प्रतिपेदे। स च

किंतर्हि एकात्मा शास्त्रगतिमत्त आह। ब्रह्मात्मत्वेति। मुख्यार्थसंभवे किमित्यर्थवाद इत्यत्राशंक्याह। सर्वेति। संसारित्वाऽसंसारित्वादिना मिथो विरुद्धयोर्जीवेश्वरयोः शीतोष्णवदैक्यानुपपत्तिर्न्यायः। यस्त्वहं ब्रह्मेति न गृह्णीयादिति तत्राह। सर्वश्रुतिषु चेति। शास्त्रार्थमर्थे कार्यं अनिष्टप्रसंगान्न स्वरकत्वमिति शंकते यदीति। परस्य संसारित्वे तदसंसारित्वशास्त्रानर्थक्यं फलितमित्याह। तथा चेति। संसारिणोऽन्यस्यापि परस्यासंसारित्वे संसारित्वात् असंसारी त्वुपदेशानर्थक्यं तं विनैव मुक्तिसिद्धेरिति दोषांतरमाह। असंसारित्वे चेति। तत्राग्रविद्वरणोमि। यदि तावदिति। द्वितीयं दोष-

[illegible]

एकदेशस्यैकदेशिनोतिरेकाभावात्तद्विस्फुलिंगादिकृतमनुपपत्तिः
अन्यथापरस्यापिस्यात् नहि एकस्यावयवस्यचलनेपुनस्तेनचलतीत्याह परस्यचेति

तदीयावयवसंसरणाद्वपरमात्मनः प्रदेशांतरावयवानां मूहेमन्नूपचयः स्यान्न
थाचपरस्यावयवायतनोलिंगच्छातितमन्नखिद्रताप्राप्तिः यत्रचतेनगच्छंतितन
ह्रोपचयः स्यादित्यर्थः॥

वृ·भा·
६३

तत्रायमनुपपद्यपति। तत्रेति। नानाद्रव्याणांसमवायोवात्तानिवाःस्वोन्यसापेक्षारिपरश्चेन्नतत्स्यैक्यंस्यान्नहिबहूनांमुख्यमैक्यंनानांतर्हिब्रह्मणोमैक्यंभग्नत्राह। नचावेति। नहितन्नानात्मकस्यापिसं
सर्गमितिभावः। द्वितीयमनुपपत्तिनिराकरोति। अथेति। सर्वथैवापृथगवस्थितेषुअवयवेषुनीवेषुभग्नस्मृतत्वेननावयवीपरश्चेन्नर्हि यथाप्रत्यवपर्वमलसंसर्गेदेहस्यमलिनत्वंतथापरस्यजीवग
तदुःखेमहदुःखंस्यादितिप्रथमकल्पनावद्द्वितीयापिकल्पनानयुक्तेत्यर्थः। पक्षत्रयस्याधारस्यांद्वयमाह। निष्कलमित्यादिना। एकदेशीमतंनिराकर्तुंविकल्पयति। नचेति। एतागतयः
इति। एते पक्षावस्यमायाःसंभवतिनगत्यंतरमित्यर्थः॥शास्त्रार्थौयुक्तिविरुद्धानात्मिपद्यतीतिदूषयति। नोकृतेरिति। कूटस्थस्यनिरवयवस्यकार्येकदेशाभ्यापरिणामासंभवोन्यायः॥य
थाकाशादिकीलः कुंभस्यअवांतरावयवस्यनोदनंभूहनंचकृत्वासमध्येस्वयंनिस्तुतितथाःवय०प्नि। यथापृथिवीशादितंद्रव्यमनेकावयवसमुदायस्तथातभौतिकात्मकानेकद्रव्यसमुदायः

मृतेनसंसारित्वसंबंधीयेनाम्यस्तेनाहंब्रह्मेतिधारणाई॥एवंसर्वमविरुद्धंभविष्यतीति। तत्रविज्ञानात्मनोविकारपक्षएतागतयः पृथिवीद्रव्यवदनेकद्रव्यसमाहारस्यसावय
वस्यपरमात्मनःएकदेशविपरीणामोविज्ञानात्माघटादिवत्पूर्वसंस्थानावस्थस्यवापरस्यैकदेशोविक्रियतेकेशलोमादिवत्। सर्वएववापरःपरिणामक्षीरादिवत्। तत्रसमा
नजातीयानेकद्रव्यसमुदायस्यकश्चित्द्रव्यविशेषोविज्ञानात्मत्वंप्रतिपद्यतेयदातदासमानजातीयत्वादेकत्वमुपचरितमेवनतुपरमार्थतःतथाचसतिसिद्धांतवि
रोधः। अथनित्यात्वप्रसिद्धावयवानुगतोवयवीपरमात्मातस्यतदवस्थस्यैकदेशोविज्ञानात्मासंसारीतथापिसर्वावयवानुगतत्वादवयविनएवावयवगतोदोषः प्रसज्येत
तिविज्ञानात्मवत्ससंसारित्वेदोषपरस्यैवात्मासंबध्यतइतीयमप्यनिष्टाकल्पना। क्षीरवत्सर्वपरिणामपक्षेसर्वश्रुतिस्मृतिकोपसचानिष्टः। निष्कलंनिष्क्रियंशांतमित्याद्यस्म
तंप्रस्थःसबाह्याभ्यंतरोह्यजःआकाशवत्सर्वगतश्चनित्यःसवाएषमहानजआत्माजरोमृतोनजायतेम्रियतेवाकदाचिदव्यक्तोयमित्यादिश्रुतिस्मृतिन्यायविरुद्धाएतेसर्वप
क्षाः। अचलस्यपरमात्मनएकदेशपक्षेविज्ञानात्मनःकर्मदेशफलसंसारणानुपपत्तिःपरस्यवासंसारित्वमित्युक्तं। परस्यैकदेशोग्निविस्फुलिंगवत्स्फुटितोविज्ञानात्मासंसर
तीतिचेत्। तथापिपरस्यावयवस्फुटनेनक्षतप्राप्तिःतस्मिन्संसरणेचपरमात्मप्रदेशांतरावयवभूतहिछिद्रताप्राप्तिः। अव्रणत्ववाक्यविरोधश्च। आत्मावयवभूतस्यविज्ञानात्मनः

संसरणेचपरमात्मशून्यप्रदेशाभावादवयवांतरनोदनव्यूहनाभ्यांहृदयशूलेनेवपरमात्मनोदुःखित्वप्राप्तिः। अग्निविस्फुलिंगादिदृष्टांतश्रुतेर्नदोषइतिचेत्। नश्रुतेर्ज्ञाप
कत्वानशास्त्रंपदार्थानन्यथाकर्तुंप्रवृत्तं। किंतर्हियथाभूतानामज्ञातानांज्ञापनेकिंचातः। भूतश्रुतायद्भवति। यथाभूतामूर्ताःमूर्ताइत्यर्थधर्मालोकेप्रसिद्धास्तदृष्टांतोपा
दानेनतदविरोधवस्तंतरंज्ञापयितुंप्रवृत्तंशास्त्रंनलौकिकवस्तुविरोधज्ञापनायलौकिकमेवदृष्टांतमुपादत्ते। उपादीयमानोपिदृष्टांतोनर्थकःस्यात्। दार्ष्टांतिकासंगतेः। न
ह्यग्निःशीतआदित्योनतपतीतिवादृष्टांतशतेनापिप्रतिपादयितुंशक्यंप्रमाणांतरेणान्यथाधिगतत्वाद्वस्तुनः। नचप्रमाणांतरेणविरुध्यतेप्रमाणांतरविषयमेवाविरुद्ध
माणंतरंज्ञापयति। नचलौकिकपदपदार्थाश्रयएवव्यतिरेकेणागमेनशक्यमज्ञातंवस्त्वंतरमवगमयितुं। तस्मात्प्रसिद्धन्यायमनुसरतानशक्यापरमात्मनःसावयवांशां
शित्वकल्पनापरमार्थतःप्रतिपादयितुं। क्षुद्राविस्फुलिंगाइत्यत्रचांशांशित्वश्रुत्येन्सर्वतेवतिचेत्। नैकत्वप्रत्ययार्थपरत्वाद्वेनाहिविस्फुलिंगाग्निविवेकत्वप्रत्ययार्हो
दृष्टोलोकेःतथांशांशिनेकत्वप्रत्ययार्हःतत्रैवंसतिविज्ञानात्मनःपरमात्मविकारांशत्ववाचकाःशब्दाःपरमात्मैकत्वप्रत्ययाधित्सवः। उपक्रमोपसंहाराभ्यांचसर्वासुउप
निषत्सुपूर्वमेकत्वंप्रतिज्ञायदृष्टांतैर्हेतुभिश्चपरमात्मनोविकारांशादित्वंजगतःप्रतिपाद्यपुनरेकत्वमुपसंहरति। तद्यथेहैवतावदिदंसर्वंयदयमात्मेतिप्रतिज्ञायोत्पत्तिस्थिति
लयहेतुदृष्टांतैर्विकारविकारित्वाद्येकत्वप्रत्ययहेतुप्रतिपाद्यानंतरमबाह्यमपमात्माब्रह्मेत्युपसंहरिष्यति। तस्मादुपक्रमोपसंहाराभ्यामयमर्थोनिश्चीयतेपरमात्मैकत्वप्रत्य
यदृढीकरणायोत्पत्तिस्थितिलयप्रतिपादकानिवाक्यानीति। अन्यथावाक्यभेदप्रसंगाच्च। सर्वोपनिषत्सुविज्ञानात्मनःपरमात्मनैकत्वप्रत्ययोविधीयतइत्यविप्रतिपत्तिःसर्वेषामु

पनिषद्दर्शितंतन्मैकवाक्ययोगेचसंभवत्येवादिवाक्यानांवा
कांतरत्वकल्पनायांनप्रमाणाभ

तथाभूतभौतिकात्मकानेकद्रव्यसमुदायःसावयवःपरमात्मातस्यैकदेशांशेनस्वलक्षणःतद्विकारान्नाव्रःपृथिव्येकदेशामृद्विकारघटशरावादिवत्। इत्येकःकल्पयथाभूमेरूषरादिदेशोनखकेशादिर्वापुरुषस्यविकारस्तथावयवीनःप
रस्यैकदेशविकारोजीवइतिद्वितीयःकल्पः। यस्याक्षीरस्यसर्वात्मनादधिरूपचकादिरूपेणपरिणामतेतथाकृत्स्नएवपरोजीवभावपरिणामेदितितृतीयःकल्पोस्तत्। मृत्त्वाहिविस्फुलिंगदृष्टांतश्रुतेःनिवशात्मरस्यावयवाजीवाःसिध्यंतीअतोत|

उक्तपक्षत्रयाक्रतेबलवत्वादितिशंकतेअग्निविस्फुलिंगादीति·

याज्ञवल्क्यमैत्रेयीसंवादेआत्मानउ
त्पत्तिस्थितिलयहेतुत्वदर्शनं।

शास्त्रेणसावयवत्वेनांशांशित्वकल्पना।

निर्विडीकरणाय·

लोकप्रसिद्धपदार्थाविरो
धि·लोकेचप्रसिद्धनिरव
यवनिर्विकारंस्वप्र
सिद्धाय·

लोकप्रसिद्धिविरुद्ध
त्वात्·

परमात्मनद्रव्यत्वरूपा
स्वजातीयातिरिक्तत्वेनसमा
नजातीयेति·
जीवस्यपरमात्मैकदेशत्वे
दोषांतरमाह अचलस्ये
ति·

पदार्थविषयोक्त्या
नत्वाज्ञातशब्द·
प्रमा०पनेवपदार्थप्रमा०
रंज्ञापयति·

वाक्यैरेकदेशान्वितोदेशोनवनयति

63

शिवः
६३

प्रविष्ट इति स एवं संबोधितस्त्यक्त्वा व्याधजातिप्रत्ययकर्माणि पितृपैतामहीमात्मनः

ननु लौकिकं प्रमाणं लौकिकपदार्थाविरुद्धमेव स्वार्थं समर्पयति वैदिकं पुनरपौरुषेयं तद्विरुद्धमपि स्वार्थं प्रमापयेदतो लौकिकविषयत्वादनाह । न चेति । ननु श्रुतेरज्ञातज्ञापकत्वे लोकानपेक्षत्वात्तद्विरोधे धिकाहानिस्तत्राह । न च लौकिकेति । तेषां स्वार्थनिष्ठत्वे दोषं वदन्नेकत्वं प्रत्ययार्थत्वे हेत्वन्तरमाह । अन्यथेति । संभवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते इति न्यायेनोक्तं प्रपंचयति । सर्वोपनिषदिति ॥ ॥ तेषां स्वार्थनिष्ठत्वे श्रुतफलाभावाद् । फलान्तरं कल्पनीयं तत्त्वमस्यादिवाक्यैकवाक्यतया तु सत्यं स्वस्यादिवाक्यमित्युक्तेऽर्थे द्रविडाचार्यसंमतिमाह । अत्र चेति । अज्ञातस्य परस्माद्विभागो निमज्जनमज्ञानान्तं कार्यं च प्रसिद्धमिति । श्रोतापि तु किलेत्युक्तं । तज्जातिस्तत्त्वभावः यत्कर्णोपरम्यं नैति यावत् । गहनं गंभीरं वनं । राजपुत्रस्य राजास्मीति प्रत्ययवदज्ञानाद्धिकारिणो ब्रह्मास्मीति प्रत्ययश्चेत्तत्कृतो विस्फुलिंगादिश्रुतेन्यायशंकयाह । अत्रेति । तथापिक

लिफलान्तरं च कल्पयितव्यं स्यात् । तस्मादुत्पत्त्यादिश्रुतय आत्मैकत्वप्रतिपादनपराः ॥ अत्र च संप्रदायविद आख्यायिकां संप्रचक्षते । कश्चित्किल राजपुत्रो जातमात्र एव मातापितृभ्यामपविद्धो व्याधगृहे संवर्द्धितः सोऽमुष्य वंश्यतामजानन् व्याधजातिप्रत्ययो व्याधजातिकर्माण्येवानुवर्त्तते न राजास्मीति राजजातिकर्माण्यनुवर्त्तते यदा पुनः कश्चित्परमकारुणिको राजपुत्रस्य राजश्रीप्राप्तियोग्यतां जानन्नमुष्य पुत्रतां बोधयति न त्वं व्याधः अमुष्य राज्ञः पुत्रः कथंचिद्व्याधगृहमनुवर्त्तते राजाहमस्मीति । तथा किलायं परस्मादग्निविस्फुलिंगादिवत्तज्जातिरेव विभक्तः इह देहेन्द्रियादिगहने प्रविष्टोऽसंसारी सन् देहेन्द्रियादिसंसारमनुवर्त्तते देहेन्द्रियसंघातोऽस्मि कृशः स्थूलः सुखी दुःखीति परमात्मतामजानन्नात्मनः । न त्वमेतदात्मकः परमेव ब्रह्मासि असंसारीति प्रतिबोधित आचार्येण हित्वैषणात्रयानुवृत्तिं ब्रह्मास्मीति प्रतिपद्यते । अत्र राजपुत्रस्य राजप्रत्ययवद्ब्रह्मप्रत्ययो दृढो भवति । विस्फुलिंगवदेव त्वं परस्माद्ब्रह्मणो भ्रष्ट इत्युक्ते विस्फुलिंगस्य प्राग्विभागादेकत्वदर्शनात् । तस्मादेकत्वप्रत्ययदार्ढ्याय सुवर्णमणिलोहाग्निविस्फुलिंगदृष्टान्ता नोत्पत्त्यादिभेदप्रतिपादनपराः । सैंधवघनवदनन्तरमबाह्यमेकरसं नेति नेत्यवधारणादेकधैवानुद्रष्टव्यमिति च । यदि च ब्रह्मणश्चित्रभेदवद्वृक्षसमुद्रादिवदुत्पत्त्याद्यनेकधर्मविचित्रता विजिज्ञापयिषिता एकरसं सैंधवघनवदनन्तरमबाह्यमिति नोपसमहरिष्यदेकधैवानुद्रष्टव्यमिति च प्रायोक्षत य इह नानेव पश्यतीति निंदावचनं च । तस्मादेकरूपैकत्वप्रत्ययदार्ढ्यायैव

सर्ववेदान्तेषूत्पत्तिस्थितिलयादिकल्पना न तत्प्रत्ययकरणाय । न च निरवयवस्य परमात्मनोऽसंसारिणः संसार्येकदेशकल्पना न्याय्या स्वतोऽदेशत्वात्परमात्मनः । अदेशस्य परस्यैकदेशसंसारित्वकल्पनायां पर एव संसारीति कल्पितं भवेत् । अथ परोपाधिकृत एकदेशः परस्य घटकरकाद्याकाशवत् । न तदा तत्र विवेकिनां परमात्मैकदेशः पृथक् संव्यवहारभागिति बुद्धिरुत्पद्यते । अविवेकिनां विवेकिनां चोपचरिता बुद्धिर्दृष्टेति चेत् । नाविवेकिनां मिथ्याबुद्धित्वात् । विवेकिनां च संव्यवहारमात्रालंबनार्थत्वात् । यथा कृष्णो रक्तश्चाकाश इति विवेकिनामपि कदाचित्कृष्णता रक्तता चाकाशस्य संव्यवहारमात्रालंबनार्थत्वं प्रतिपद्यत इति न परमार्थतः कृष्णो रक्तो वाकाशो भवितुमर्हति । अतो न पण्डितैर्ब्रह्मस्वरूपप्रतिपत्तिविषये ब्रह्मणोंऽशांश्येकदेशैकदेशिविकारविकारित्वकल्पना कार्या । सर्वकल्पनापनयनार्थसारपरत्वात्सर्वोपनिषदां । अतो हित्वा सर्वकल्पनामाकाशस्येव निर्विशेषतां प्रतिपद्यस्व आकाशवत्सर्वगतश्च नित्यो न लिप्यते लोकदुःखेन बाह्य इत्यादिश्रुतिशतेभ्यः । नात्मानं ब्रह्मविलक्षणं कल्पयेदुष्णात्मकस्याग्नेर्नाशीतैकदेशं प्रकाशात्मन एवासवितुस्तमएकदेशं तत्कल्पनापनयनार्थसारपरत्वात्सर्वोपनिषदां । तस्मान्नामरूपोपाधिनिमित्ता एवात्मन्यसंसारधर्मिणि सर्वव्यवहाराः । रूपं रूपं प्रतिरूपो बभूव सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते इत्येवमादिमंत्रवर्णेभ्यः न स्वत आत्मनः संसारित्वमलक्तकाद्युपाधिसंयोगजनितरक्तस्फटिकादिबुद्धिवद्भ्रान्तमेव भ्रान्त्यात्यादिनं न परमार्थतः ध्यायतीव लेलायतीव न कर्मणा वर्द्धते नो कनीयान् कर्मणा लिप्य

[illegible]

ब्रह्मप्रत्ययदार्ढ्यं तत्राह । किं च परस्यैकदेशो कल्पितो नाम त्वत्तदेकदेशः स्वाभाविको वा स्यादौपाधिको वेति विकल्प्याद्यं दूषयति । स्वत इति । विपक्षे दोषमाह । अदेशस्येति । ननु जीवोऽकर्त्ताहं भोक्ताहमिति परिच्छिन्नधीः सर्वथानुपलभ्यते । सा च तस्य ब्रह्मणोऽपरिच्छिन्नब्रह्ममात्रत्वान्नावकल्पते उपचरिता । तस्मादुभयथा मुक्ता सा बुद्धिरदर्शनात्परमात्मैकदेशत्वं जीवस्य दुर्वारमिति । चोदयन्ति विवेकिनामिति । द्वितीयमुत्थापयति । अथेति । एकदेशस्यौपाधिकत्वे परस्मिन्विवेकिनां तदेकदेशत्वबुद्धिभाजां तदेकदेशो वस्तुतः पृथग्भूत्वा व्यवहारावलंबनमिति बुद्धिर्जायते । औपाधिकस्य स्फटिकलौहित्यवन्मिथ्यात्वादित्युत्तरमाह । न तदेति । ॥

सः आत्मनः राजवंशजत्वम् अजानन्

यदि च ब्रह्मणः विचित्राः आह विजिज्ञापयिषिताः अभिविप्सिततदा एकरसं स्यात्

अंशांशिनौ अंशी करणोप एकदेशैकदेशीति

आत्मनि सर्वो व्यवहारो नामरूपोपाधिप्रयुक्तः

एकत्वस्य भेदसहत्वं वार यितुं एकरूपविशेषणम् आदिपदेन जडेत्यादि ग्रहणं

अनवयवत्वात्

आश्रयेण कालिमा रक्तसंव्यवहारमात्रं तदालंबनार्थत्वात्

स्वाभाविकानामौत्पत्तिकानां सर्वात्मनि परिच्छिन्नधीः सामान्यदृष्टमूलानां ...

यथा ... अविवेकिनामेव ...

६४

बोधस्याप्यविहतत्वात् बोधेनेति · सप्रमाणं · भेदस्य दुर्निरूपत्वात्कथं कर्मकाण्डस्य प्रामाण्यमेव चायात इत्यत्राह · किमर्थमिति यत्प्रमाणमित्याद्यन्तानां मनसुत्थाप्यनीति · कर्मकाण्डेति ·

भेदस्य दुर्निरूपत्वात्कथं कर्मकाण्डं प्रमाणमिति पक्षस्य वादिना कर्मवादी चोदयेत तद्ब्रह्मवादस्य कर्मवादे न तुल्यं । ब्रह्मवादेऽपि शिष्यशास्त्रादिभेदाभावे कथमुपनिषत्प्रामाण्यमित्याक्षेपस्य तुल्यत्वात् । यथोपनिषदा प्रतीयमानं शिष्यशास्त्रादिभेदमाश्रित्य प्रामाण्यमिति परिहारः स कर्मकाण्डस्यापि समानः न च भेदस्य तात्त्विकत्वाभावादित्यभिप्रेत्याह । एवं न हीति । स्वार्थेति । स्वार्थः स्वरूपं प्रतिपाद्यमानः स भ्रान्त्यादिभेदः कर्मकाण्डस्य व्यावहारिकं प्रामाण्यं न तात्त्विकं तात्त्विकं तु काण्डान्तरस्येति तत्राह । नहीति । न्यायागमाभ्यां जीवेश्वरयोरंशांशित्वादिकल्पनां निराकुर्म वेदान्तानामेकपर

एकदेशो विकारः शक्तिर्वा विज्ञानात्मान्यो वेति कल्पयितुं तिरवयवत्वाभ्युपगमे विशेषतो न शक्यते । अंशादिश्रुतिस्मृतिवादाश्चैकत्वार्पणं न तु भेदप्रतिपादकाः विवक्षितार्थैकवाक्ययोगादित्यवोचाम । सर्वोपनिषदां परमात्मैकत्वज्ञापनपरत्वे अथ किमर्थं तत्रतत्र निकृतो ऽर्थो विज्ञानात्मभेदः परिकल्पत इति । कर्मकाण्डप्रामाण्यविरोधपरिहारायेत्येके । कर्मप्रतिपादकानि हि वाक्यान्यनेकक्रियाकारकफलोपभोक्तृकर्तृत्वाश्रयाणि विज्ञानात्मभेदाभावे हि संसारिण एव परमात्मनः एकस्मिन्नुद्देशे कर्मकाण्डस्य प्रामाण्यविरोधः कर्मणां फलाभावात्तु क्रियासु प्रवर्तयेयुरनिष्टफलाभ्यो वा क्रियाभ्यो निवर्तयेयुः । कस्य वा बद्धस्य मोक्षायोपनिषदारम्भेत । अपि च परमात्मैकत्ववादिपक्षे कथं परमात्मैकत्वोपदेशः कथं वा तदुपदेशग्रहणफलं । बद्धस्य हि बन्धनाशफलायोपदेशस्तदभावे उपनिषच्छास्त्रं निर्विषयमेव । एवं तर्ह्युपनिषद्वादिपक्षस्य कर्मकाण्डस्य यथा दोषपरिहारयोः समानः पन्थाः ॥ येन भेदाभावे । कर्मकाण्डं निरालंबनमात्मानं न लभते प्रामाण्यं प्रति तथोपनिषदिप्येवं तर्हि यस्य प्रामाण्ये स्वार्थविघातो नास्ति तस्यैव कर्मकाण्डस्यास्तु प्रामाण्यमुपनिषदां तु प्रामाण्यकल्पनायां स्वार्थविघातो भवेदिति मा भूत्प्रामाण्यं नहि कर्मकाण्डं प्रमाणं सदप्रमाणं

64

कस्य वा बद्धस्य तस्य विवरणं

सिद्धान्तपातिनेत्यादिना ·

भवितुमर्हतीति । नहि प्रदीपः प्रकाशयं प्रकाशयति न प्रकाशयति चेति । प्रत्यक्षादिप्रमाणविप्रतिषेधाच्च । न केवलमुपनिषदो ब्रह्मैकत्वं प्रतिपादयन्त्यः स्वार्थविघातं कर्मकाण्डप्रामाण्यविघातं च कुर्वन्ति । प्रत्यक्षादिभिर्निश्चितभेदप्रतिपत्त्यर्थे प्रमाणैश्च विरुध्यन्ते । तस्मादप्रामाण्यमेवोपनिषदां । अन्यार्थता वास्तु न त्वेवं ब्रह्मैकत्वप्रतिपत्त्यर्थता । न उक्तोत्तरत्वात् । प्रमाणस्य हि प्रमाणत्वमप्रमाणत्वं वा प्रमोत्पादनानुत्पादननिमित्तं । अन्यथा स्थाणुरादीनां प्रामाण्यप्रसंगात्प्रशब्दादिप्रमेये । किं चातो यदि तावदुपनिषदो ब्रह्मैकत्वप्रतिपत्तिप्रमां कुर्वन्ति कथमप्रमाणं भवेयुः । न कुर्वन्त्येवेति चेत् । यथाग्निः शीत इति स भवानेवं वदन्वक्तव्यः उपनिषत्प्रामाण्यप्रतिषेधार्थं भवतोक्तवाक्यमुपनिषत्प्रामाण्यप्रतिषेधं किं न करोत्यग्निर्वा रूपप्रकाशं । अथ करोति यदि करोति भवतु तदा प्रतिषेधार्थं च प्रमाणं च भवद्वाक्यमग्निश्च रूपप्रकाशको भवत्प्रतिषेधवाक्ये प्रामाण्ये भवत्येवोपनिषदां प्रामाण्यमत्र भवतो ऽनुवक्तुकः परिहारः इति । नन्वत्र प्रत्यक्षमहावाक्यउपनिषत्प्रामाण्यप्रतिषेधार्थाप्रतिपत्तिरग्नेर्वा रूपप्रकाशनप्रतिपत्तिः प्रमाः । का तर्हि भवतः प्रद्वेषो ब्रह्मैकत्वप्रमायां प्रमां प्रत्यक्षं कुर्वतीषूप

निषत्सु सति द्वैतासिद्धिः फलतीत्याह । सर्वोपनिषदां परमात्मैकत्वेति । केवलाद्वैतपक्षे कर्मकाण्डविरोधस्तत्कालं तेनैव ज्ञानिकाण्डविरोधमाह । कस्य वा बद्धस्येति । उपनि० षेधं कस्मान्न करोति अग्निश्च रूपप्रकाशनकस्मान्न करोतीति प्रश्ने प्रतिवाक्यमथ करोतीति करोतीत्यर्थः । भवत्प्रतिषेधवाक्यविषयप्रामाण्ये स्थिते सति भव० माण्यं । का तर्हि तयोः समयत्वमाह अथैकत्वादिति । एकस्य वाक्यनेकस्यार्थत्वं लोके दृष्टमित्याशंक्याह । यत्त्विति । तदेकदेशस्येत्यादिवाक्यं विद्दृशोति अग्निरिति । अनुवादकत्वाधकभागयोरेकत्वाभावफलितमाह । अत इति । एकस्य वा

तदेवस्फुटयितुं सामान्यन्यायमाह प्रमाणस्येति ।
स्वार्थं प्रमितिजनकत्वात्मकं तात्त्विकप्रामाण्यं स्यादित्याशंक्याह भवत्प्रतिषेधेति । ३ ॥

अभ्युपगम्येति । तत्त्वांशीकारवादेऽपि हेतुमाह नन्विति ।
उपनिषत्प्रामाण्ये भवता वाक्यप्रामाण्येन प्रामाण्यपतत्पनि
षत्प्रामाण्यं दुर्वारमिति प्रासंगिकप्राप्तमवस्थापकः समाधिवक्तव्य इत्याह अत्रेति

वस्पातेकाचैत्वमंगीकृत्वेवैयर्थ्यनोदाहरणमनुक्रमित्याह

।विरुद्धानेकार्थत्वं

वाक्य०नांमतएकमनेकवाक्यानिरुद्धम
विरुद्धार्थप्रति०पत्तः।

ननूपनिषद्वाक्यंप्रत्यात्मैकत्वंसाक्षात्प्रतिपादयत्कर्मकांडप्रामाण्यविघातकमितिचेन्नतत्प्रामाण्यमनुन्मिलक्षणंविपर्यासलक्षणंवेतिविकल्प्याद्यंदूषयति।नचेति।द्वितीयंप्रत्याह।अपिचेति।प्रामाण्यप्रवर्तनामन।तथापिदुःखप्रसंतोनेप्रवर्तिष्यते।वेदांतस्यफलनिष्ठत्वात्वाक्यमात्रेत्याशंक्याह।नचप्रवृत्त्याद्यति।श्रुतिः।शोकिरोमितित्येनबोधकमेवचवाक्यंकथंतर्हितत्रलोकस्यविरुद्धार्थधीरित्याशंक्याह।यन्त्विति।ननुकर्मकांडस्यमिथ्यार्थत्वेमिथ्याज्ञानप्रभवत्वादनर्थनिष्ठत्वेनाऽप्रवर्तकत्वादप्रामाण्यमतआह।यथाकाम्येष्विति।अविद्यावन्तःपुरुषाःनप्रवर्तेरन्नितिसंगतः।ततः

निवृत्तुउपलभ्यमानासुप्रतिषेधानुपपत्तेः।शोकमोहादिनिवृत्तिश्चप्रत्यक्षंफलंब्रह्मैकत्वप्रतिपत्तिपारंपर्यजनितमित्यवोचाम।एवमुक्तेनात्यत्वाउपनिषदंप्रत्यप्रामाण्यशंकातावन्नास्ति।यत्तोक्तंस्वार्थविघातकत्वादप्रामाण्यमिति।तदपिनतदर्थप्रतिपत्तेर्बाधकाभावात्।नह्युपनिषज्जाब्रह्मैकमेवाद्वितीयंनैवचेतिप्रतिपत्तिरस्ति।यथाग्निरुष्णःशीतश्चेतिएतस्माद्वाक्याद्विरुद्धार्थद्वयप्रतिपत्तिः।अभ्युपगम्यचेतदवोचाम।ननुवाक्यप्रामाण्यंसमयएषन्यायोयदुतैकस्यवाक्यस्यानेकार्थत्वं।सतिचानेकार्थत्वेस्वार्थश्चस्यान्नविघातकश्चविरुद्धोन्यार्थः।नत्वेतद्वाक्यप्रमाणानांविरुद्धमविरुद्धंचैकंवाक्यमनेकार्थंप्रतिपादयतीत्येषसमयोर्थैकत्वाद्ध्येकवाक्यता।नचकानिचिदुपनिषद्वाक्यानिब्रह्मैकत्वप्रतिषेधंकुर्वंति।यत्तुलौकिकंवाक्यं।अग्निरुष्णःशीतश्चेति।नतत्रैकवाक्यतातदेकदेशस्यप्रमाणांतरविषयानुवादित्वात्।अग्निःशीतइत्येतदेकंवाक्यमग्निरुष्णइतितुप्रमाणांतरानुभवस्मारकंनतुस्वयमर्थावबोधकं॥अतोनाग्निःशीतइत्यनेनैकवाक्यताप्रमाणांतरानुभवस्मारणेनैवोपक्षीणत्वात्।यत्तुविरुद्धार्थप्रतिपादकमिदंवाक्यमितिमन्यतेतच्छीतोष्णपदाभ्यामग्निपदसामानाधिकरण्यप्रयोगनिमित्ताभ्रांतिःनत्वेकस्यवाक्यस्यानेकार्थत्वंलौकिकस्यवैदिकस्यवा।यत्तोक्तंकर्मकांडप्रामाण्यविघातकृदुपनिषद्वाक्यमिति।तन्नान्यार्थत्वाद्ब्रह्मैकत्वप्रतिपादनपराह्युपनिषदोनेष्टार्थप्राप्तौसाधनोपदेशंतन्निवृत्तौवापुरुषनियोगंवारयंत्यनेकार्थत्वानुपपत्तेरेव।नचकर्मकांडवाक्यानांस्वार्थेप्रमाणोत्पद्यते।असाधारणेचस्वार्थेप्रमामुत्पादयतिवाक्यंकुतोन्येनविरोधःस्याद्ब्रह्मैकत्वेनिर्विषयत्वात्प्रमाणोत्पद्यतएवेतिचेत्।नप्रत्यक्षत्वात्प्रमायाः।दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतब्राह्मणोनहंतव्यइत्येवमादिवाक्येभ्यःप्रत्यक्षाप्रमाजायमानासानैवभविष्यतियद्युपनिषदोब्रह्मैकत्वंबोधयिष्यंतीत्यनुमानेनचानुमानंप्रत्यक्षविरोधेप्रामाण्यंलभते।तस्मादसदेवैतज्जायतेप्रमैवनोत्पद्यतइति।अपिचयथाप्राप्तस्यैवाविद्याप्रत्युपस्थापितस्यक्रियाकारकफलस्याश्रयणेनेष्टानिष्टप्राप्तिपरिहारोपायसामान्येप्रवृत्तस्यतद्विशेषमजानतस्तदाचक्षाणाश्रुतिःक्रियाकारकफलभेदस्यलोकप्रसिद्धस्यसत्यतामसत्यतांवानाचष्टे।नचवारयतीष्टानिष्टफलप्राप्तिपरिहारोपायविधिपरत्वात्।यथाकाम्येषुप्रवृत्ताश्रुतिःकामानांमिथ्याज्ञानप्रभवत्वादनर्थरूपत्वंचेतिविदधाति॥तथानित्याग्निहोत्रादिशास्त्रमपिमिथ्याज्ञानप्रभवंक्रियाकारकभेदंयथाप्राप्तमेवादायेष्ट

दृष्टा०नतत्पुरुषःयत्नतर
पति।

प्रत्यक्षविषयत्वात्

एकार्थप्रतिपादनात्

यथाप्राप्तस्यैवव्या
ख्यानमविद्याप्रत्युपस्थापि
तस्येति।साध्यसाधनसंबंध
बोधकस्यकर्मकांडस्यनावि
षयतामिथ्यार्थत्वेऽपिस्वा
र्थक्रियासामर्थ्यान्नपरिहारात्
प्रामाण्यापत्तिरितिभावः

दृष्टत्वात्।यथाकामिनोमलिनाधियःप्रवर्तन्तेतथाअविद्यावन्तःपुरुषाःप्रवर्तेरन्नेव॥ ॥यथाधिकारमज्ञानिनांस्वर्गादिप्राप्त्ययेकर्मकांडोपदेशस्यावश्यकत्वात्।क्षीणरागादीनांतुमुमुक्षूणामशेषाज्ञाननिवृत्तयेज्ञानशास्त्रोपदेशस्यापिसार्थकत्वंज्ञेयं।अविद्यावतांकर्मसुप्रवृत्तिमाक्षिपति।विद्यावतोमेति।पुरुषेच्छेति।नप्रवृत्तिनिवृत्तीशास्त्रवशादितिशेषः।प्रत्यंप्रतिकर्मकांडोपदेशस्यसार्थकत्वोपपादनेन।स्वाभिप्रायानुसारेणपुरुषार्थप्रतिपत्तिरित्यत्रगमकमाह।तथाचेति।दकारत्रयेप्रजापतिनाउक्तेदेवादयः

अनर्थरूपतामसत्यताच [illegible] निस्वार्थहितवशास्त्रमनकल्पः यथा०शुकाम्यश्रुतिःप्रवर्तनेन [illegible] उपाय०दशपामितर्थः

इ॰भा॰
६५

स्वाभिप्रायेणाद्यमाशंक्य न यथास्वाभिप्रायवशाद्दत्व पुरुषाणां पुरुषार्थधीः अन्यथावादतोवगतविपर्ययं वेदांतानां स्वार्थे प्रामाण्यमुक्तं। संप्रति ताकिकमतमुत्थापयति तत्र केचिदिति। ग्राह्यग्राहकयोर्भेदे सत्येव संवे
प्रमाणागमवाक्यप्रत्यक्षादिविरोधः कथमैक्यबोधक आगमवाक्यं प्रत्यक्षादिना विरुध्यते तत्राह। तथेति। यथा ब्रह्मैकत्वे प्रवृत्तस्य शास्त्रस्य प्रत्यक्षादिविरोधं मन्यन्ते तथान्ये अस्मान्प्रति वादं पश्यन्तीति या
गमाः तत्र प्रत्यक्षविरोधं स्पष्टयति। शब्दादय इति। अनुमानविरोधमाह। तथेति। स्वदेहसमवेतचेष्टानुरूपचेष्टया देहान्तरे दृष्टा सा च प्रयत्नपूर्विका विशिष्टचेष्टात्वादित्य नुमानविरुद्धमेकत्वशास्त्रमित्यर्थः।

विशेषप्राप्तिमनिच्छ्विशेषपरिहारंवाकिमपिप्रयोजनंपश्यद्भिर्विहिताद्रीनिकर्माणिविधेयानाऽविद्यागोचराणिसवक्तविषयमितिनप्रवर्त्तेरन्यथाकामेष्वनवपु
रुषान्प्रवर्त्तेरन्अविद्यावंतोदृष्ट्वायथाकामिनः।विद्यावतामेवकर्माधिकारइतिचेत्।नब्रह्मैकत्वविद्यायांकर्माधिकारविरोधस्योक्तत्वात्।एतेनब्रह्मैकत्वे
निर्विषयत्वादुपदेशनतद्ग्रहणफलानामभावदोषपरिहारउक्तोवेदितव्यः।पुरुषेच्छारागादिवैचित्र्याच्च॥अनेकाहिपुरुषाणामिच्छारागादयश्चदोषावि
चित्रास्तत्रश्चबाह्यविषयरागापहृतचेतसोनशास्त्रंनिवर्त्तयितुंशक्तं॥नापिस्वभावतोबाह्यविषयविरक्तचेतसोविषयेषुप्रवर्त्तयितुंशक्तं।किंतुशा
स्त्रादेवैतदेवभवतीदमिष्टसाधनमिदमनिष्टसाधनमितिसाध्यसाधनसंबंधविशेषाभिव्यक्तिः।प्रदीपादिवत्तमसिरूपादिज्ञानंनशास्त्रंभृत्यानिवव
लान्निवर्त्तयतिनियोजयतिवादृश्यंतेहिपुरुषाःरागादिगौरवाच्छास्त्रमप्यतिक्रामंतः॥तस्मात्पुरुषमतिवैचित्र्यमपेक्ष्यसाध्यसाधनसंबंधविशेषानने
कधोपदिशति।तत्रपुरुषाःस्वयमेवयथारुचिसाधनविशेषेषुप्रवर्त्तंतेशास्त्रंतुसवितृप्रदीपादिवदुदास्तएव।तथाकस्यचित्परोपिपुरुषार्थोऽपुरुषा
र्थवदवभासते।यस्ययथावभासःसयथारूपंपुरुषार्थंपश्यति॥तदनुरूपाणिसाधनान्युपादित्सते॥तथार्थवादोपि।त्रयाःप्राजापत्याःप्रजापतौपित
रिब्रह्मचर्यमूषुरित्यादि॥तस्मान्नब्रह्मैकत्वंज्ञापयिष्यंतोवेदांताविधिशास्त्रस्यबाधकाः।नचविधिशास्त्रमेतावतानिर्विषयंस्यात्।नाप्युक्तकार
कादिभेदंविधिशास्त्रमुपनिषदांब्रह्मैकत्वंप्रतिप्रामाण्यंनिवर्त्तयति॥स्वविषयशूराणिहिप्रमाणानिश्रोत्रादिवत्।तत्रपंडितंमन्याःकेचित्स्वचित्त
वशात्सर्वंप्रमाणमितरेतरविरुद्धंमन्यंते॥तथाप्रत्यक्षादिविरोधमपिचोदयंतिब्रह्मैकत्वे॥शब्दादयःकिलश्रोत्रादिविषयाभिन्नाःप्रत्यक्षतउपल
भ्यंते॥ब्रह्मैकत्वंब्रुवतांप्रत्यक्षविरोधःस्यात्॥तथाश्रोत्रादिभिःशब्दाद्युपलब्धारःकर्त्तारश्चधर्माधर्मयोःप्रतिशरीरंभिन्नाःअनुयंतेसंसारिणः
तत्रब्रह्मैकत्वंब्रुवतामनुमानविरोधश्च।तथागमविरोधंचवदंतिग्रामकामोयजेतपशुकामोयजेतइत्येवमादिवाक्येभ्योग्रामपश्वादिस्वर्गादिकामासत्
त्साधनाद्यनुष्ठातारोभिन्नाश्चावगम्यंते।अत्रोच्यते।तेतुकुतर्कदूषितांतःकरणाःब्राह्मणादिवर्णापसदाअनुकंपनीयाआगमार्थविच्छिन्नसंप्रदाय
त्वादिति।कथंश्रोत्रादिद्वारैःशब्दादिभिःप्रत्यक्षतउपलभ्यमानैर्ब्रह्मणएकत्वंविरुध्यतइतिवदंतोवक्तव्याःकिंशब्दानांभेदेनाकाशैकत्वंविरुध्यतइ

कथंश्रोत्रादितिदृष्टानि।कथमितित्व संसारिणां सर्वेषामेकत्वे एकेन एकस्मिन् शब्दे श्रुते सर्वैः श्रवणप्रसंगः स्यात् इति प्रतिशरीरं भिन्नाः संसारिण इत्यनुमानम्॥

यथारुचि पुरुषाणां प्रवृत्तिरित्यत्र
स्वपुरुषार्थकिंवस्तुप्रतिपादयत्व
स्वगतज्ञानसिद्धये तदुपाश्रयणा
दिपुरुषाभ्यासपूर्विका प्रवृत्तिरि
द्रिपूर्वकारित्वाद्दोषितन्मात्राश्रया
हेतुस्तथेति॰

द्वैतग्राहिप्रमाणविरुद्धमद्वैतमिवमतः अस्मदर्थं दृष्टान्तेनैकत्वमिति। यदि स्थूलदेहो वा कारणाज्ञानं वा देहद्वयादन्यो वा नात्मा। तयोरचेतनत्वात्परिमाणवत्त्वात्संयोगात्। नन्वतीयतस्याविकारित्वादितिभावः॥यत्न॰

65

शिवः
६५

पृथिव्यादिशरीरेति। आत्मादेहादिवदनुमानविशिष्टानुमता। किं पायामनेककारकसाध्यत्वादेवंविशिष्टात्मकर्तृकानुमानात् प्रतिदेहमात्मभेदसिद्धिरित्यर्थः। विशिष्टस्यात्म
नोऽनुमाणकर्तृत्व क्रियाणामनेककारकसाध्यत्वादिति हेतुस्थेनहातनदेहादन्यत्वे कर्तृत्वमनेकत्वस्यापि हेतुत्वमाह। अनेकेति। आत्मनो देहादीनां चानुमाणकाः

[illegible]

ति। अथ न विरुध्यते न तर्हि प्रत्यक्षविरोधः। यच्चोक्तं प्रतिशरीरं शब्दाद्यफलस्थारोधर्माधर्मयोश्च कर्तारो भिन्नाश्चानुमीयन्ते तथा च ब्रह्मैकत्वे
नुमानविरोध इति। भिन्नाः के रनुमीयन्त इति प्रष्टव्यम्। अथ यदि ब्रूयुः सर्वैरस्माभिरनुमानकुशलैरिति। के यूयमनुमानकुशला इ
त्येवं पृष्टानां किन्तु तावच्छरीरेन्द्रियमनआत्मसु प्रत्येकमनुमानकौशलप्रत्याख्याने शरीरेन्द्रियमनःसाधनाश्चात्मानो वयमनुमा
नकुशला अनेककारकसाध्यत्वात् क्रियाणामिति चेत्। एवं तर्ह्यनुमानकौशले भवतामनेकत्वप्रसङ्गः॥ अनेककारकसाध्या
हि क्रियेति भवद्भिरेवाभ्युपगतं न चानुमानं च क्रिया सा शरीरेन्द्रियमनआत्मसाधनैः कारकैरात्मकर्तृका निर्वर्त्यत इत्येतत्त्व
मिष्टत्वात्। तत्र वयमनुमानकुशला इत्येवं वदद्भिः शरीरेन्द्रियमनःसाधना आत्मानः प्रत्येकं वयमनेके इत्यभ्युपगतं स्यादहोनु
मानकौशलं प्रदर्शितमपुच्छशृङ्गैस्तार्किकबलीवर्दैः। यो ह्यात्मानमेव न जानाति स कथं मूढस्तत्कृतं भेदमभेदं वा जानीया
त्। तत्र किमनुमिनोति। केन वा लिङ्गेन न ह्यात्मनः स्वतो भेदप्रतिपादकं किञ्चिल्लिङ्गमस्ति येन लिङ्गेनात्मभेदं साधयेत्। या
नि लिङ्गान्यात्मभेदसाधनाय नामरूपवत्त्वरूपन्यस्यन्ति तानि नामरूपगतान्युपाधय एव आत्मनो घटकरकापवरभूच्छि
द्राणीवाकाशस्य। यदाकाशस्य भेदलिङ्गं पश्यति। तदात्मनोपि भेदलिङ्गं लभेत सः। न ह्यात्मनः परतो विशेषमन
भ्युपगच्छद्भिस्तार्किकशतैरपि भेदलिङ्गमात्मनो दर्शयितुं शक्यते। स्वतस्तु दूरापनीतमेवाविषयत्वादात्मनः यद्यत्प
रस्यात्मधर्मत्वेनाभ्युपगच्छति तस्य तस्य नामरूपात्मकत्वाभ्युपगमात्। नामरूपाभ्यां चात्मनोऽन्यत्वाभ्युपगमादाकाशो
वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मेति श्रुतेः नामरूपे व्याकरवाणीति च॥ उत्पत्तिप्रलयात्मके हि नामरूपे न हि लक्षणे

कार्यत्वे कथं अवान्तरक्रियाणामात्मादिवत् अदर्शनात्। तथा चात्मनोऽतं न क्रियाकिमनेककारकसाध्यां किं चान न्याये आत्मातिरिक्तानेककारकसाध्या वा
नाद्यः अनवस्थानात्। द्वितीये त्वात्मनो कर्तृत्वापत्तेरन्यस्य चावान्तरक्रियाणामनेककारकसाध्याः अप्रधानक्रिया आत्मभिन्न [illegible] प्रसङ्गात्। इतेन देहादिवद्विक
परकृतमित्यर्थः। आकाशस्य यथा परकृतो विशेषो

[illegible]

नाद्धितधाम्नो यौतिश्चाकः।

एतत्तत्त्वं

अनुमानक्रिया

शरीरादीति

स्वतस्तु विशेषवत्त्वं दूरापास्त
मित्यर्थः

अथ [illegible] विषये उपदे शानर्थक्यं [illegible] [illegible] उपदेशानर्थक्य
[illegible] क्रियाणामनेककारकसाध्यत्वं स्वीकृतमस्माभिरिति भावः।
पूर्वं [illegible] विषयमात्मनोऽनुमानं [illegible]
अत्वादात्मनोऽनुमानाविषयत्वम्।

यदुक्तमिति। उपदेशो यस्मै क्रियते यस्य चोपदेशग्रहणप्रयुक्तं फलं तयोरभावात् ब्रह्मैकत्वे सति उपदेशानर्थक्यमित्यनुवादार्थः। किं क्रियाणामनेककारकसाध्यत्वादेवं चोद्यते किं वा ब्रह्मणो नित्यमुक्तत्वादिति कल्पाद्यं दूषयति। तदपीति। तासामनेककारकसाध्यत्वस्य प्रत्युदस्तत्वादिति भावः। यदि ब्रह्मणो नित्यमुक्तत्वाभिप्रायेण उपदेशानर्थक्यं चोद्यते तत्र नित्यमुक्ते ब्रह्मणि अज्ञाते अज्ञातत्वात् तदानर्थक्यचोद नैतिविकल्पाद्यं अंगीकरोति। एकस्मिन्निति। द्वितीयमनुत्थापयति। अथेति। अज्ञाने नित्यमुक्ते ब्रह्मणि उपदेशानर्थक्य चोद्यते चेदित्यर्थः। सर्वैरात्मवादिभिरुपदेशस्य ज्ञानार्थमिष्टत्वान्न विरोधादस्म

च ब्रह्म॥ अतोऽनुमानस्यैवाविषयत्वात् ज्ञातोऽनुमानविरोधः॥ एतेनागमविरोधः प्रत्युक्तः॥ यदुक्तं ब्रह्मैकत्वे यस्मा उपदेशो यस्य चोपदेशग्रहणफलं तदभावादेकत्वोपदेशानर्थक्यमिति तदपि नानेककारकसाध्यत्वात् क्रियाणां कश्चिद्दोषो भवति। एकस्मिन्ब्रह्मणि निरूपाधिके नोपदेष्टा नोपदेशो न चोपदेशग्रहणफलं तस्मादुपनिषदां चानर्थक्यमित्येतदभ्युपगतमेव॥ अथानेककारकविषयानर्थक्यं चोद्यते। न स्वतोऽभ्युपगमविरोधादात्मवादिनां। तस्मात्तार्किकचाटभटराजाऽप्रवेश्यमभयं दुर्गमिदमल्पबुद्ध्यगम्यं शास्त्रगुरुप्रसादरहितैश्च। कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति देवैरत्रापि विचिकित्सितं पुरा नैषा तर्केण मतिरापनेया॥ वरप्रसादलभ्यत्वं श्रुतिस्मृतिवादेभ्यश्च॥ तदेजति तन्नैजति तद्दूरे तद्वन्तिक इत्यादिविरुद्धधर्मसमवायित्वप्रकाशकमंत्रवर्णेभ्यश्च। गीतासु च मत्स्थानि सर्वभूतानीत्यादि। तस्मात्परब्रह्मव्यतिरेकेण संसारी नान्यः वस्त्वंतरमस्ति तस्मात्सुष्ठूच्यते। ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति नान्योऽतोऽस्ति द्रष्टा नान्यदतोऽस्ति श्रोतेत्यादिश्रुतिशतेभ्यः॥ तस्मात्परस्यैव ब्रह्मणः सत्यस्य सत्यं नाम उपनिषत्परा॥ ॥चतुर्थस्याध्यायस्य प्रथमं ब्राह्मणम्॥ १ ॥ ब्रह्म ते ब्रवाणीति प्रकृतं तत्र यतो जगज्जातं यन्मयं यस्मिंश्च लीयते तदेकं ब्रह्मेति ज्ञापितं॥ किमात्मकं पुनस्तज्जगज्जायते लीयते च। पंचभूतात्मकं भूतानि च नामरूपात्मकानि नामरूपे सत्यमिति॥ मूर्तामूर्तब्राह्मणम्॥

आत्मा [illegible] [illegible] [illegible] [illegible] [illegible]

[illegible] तस्य सत्यस्य पंचभूतात्मक

यो ह वै शिशुꣳ साधानꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि।

मूर्तामूर्तभूतात्मकत्वात् कार्यकरणात्मकानि भूतानि प्राणाश्च अपि सत्यं। तेषां कार्यकरणात्मकानां भूतानां सतत्त्वनिर्दिधारयिषया ब्राह्मणद्वयमारभ्यते। सैवोपनिषद्व्याख्या कार्यकरणसतत्त्वावधारणद्वारेण हि सत्यस्य सत्यं ब्रह्मावधार्यते। अत्रोक्तं प्राणा वै सत्यं तेषामेष सत्यमिति तत्र के प्राणाः। कियन्तो वा प्राणा विषया उपनिषदः का इत्त्व ब्रह्मोपनिषत्प्रसंगेन करणानां प्राणानां स्वरूपमवधारयति। पथिगतकूपारामाद्यवधारणवत्॥ ॥यो ह वै शिशुं साधानं सप्रत्याधानं सस्थूणं सदामं वेद तस्येदं फलं किं तत्सप्त ह सप्तसंख्याकान्हि द्विषतो द्वेषकर्तॄन्भ्रातृव्यान्भ्रातृव्या हि द्विविधा भवंति द्विषंतो ये भ्रातृव्यास्तान् द्विषतो भ्रातृव्यानवरुणद्धि। सप्त ये शीर्षण्याः प्राणाः विषयोपलब्धिद्वाराणि तत्प्रभवा विषयरागाः सहजत्वात् भ्रातृव्याः ते ह्यस्य स्वाभाविक्यां दृष्टिं विषयविषयां कुर्वंति तेन ते द्वेषणाद्भ्रातृव्याः प्रत्यगात्मेक्षणप्रतिषेधकरत्वात्। काठके चोक्तं। पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्मन्नित्यादि। तत्र यः शिश्वादीन्वेद तेषां याथात्म्यमवधारयति स एतान्भ्रातृव्यानवरुण द्धि। [illegible]

विषयोपलब्धिद्वाराणि [illegible]
[illegible] तज्जत्वात् [illegible]
[illegible] भ्रातृव्यत्वम्।

इत्यत्र [illegible]
[illegible]

ते ब्रह्मणि तदानर्थक्यचोद्यमनुपपन्नमित्याह। न स्वत इति। औपाधिकभेदाश्रयत्वेन व्यवहारस्योपपन्नत्वोपदर्शनेन। चाटेति। आर्यमर्यादाभिंदानाश्चाटा। भटास्तु सेवका मिथ्याभाषिणस्तेषां राजानस्तार्किकास्तैरप्रवेश्यं। इदं ब्रह्मात्मकत्वं शास्त्राद्धि प्रसादशून्यैरगम्यत्वे प्रमाणमाह। कस्तमिति। शास्त्रगुरुत्वेनादिप्रसादयुक्तान्मत्तोऽन्यः कश्चिद्ब्रह्मविदो वचनमिदं॥ ॥ तदेजतीत्यत्र विरुद्धधर्मा णयोः संगतिद्योतनं च केचिदीतयन्ति। ब्रह्मेति। आत्मैव ब्रह्म न तु सत्यत्वादित्यादि इति शंकयित्वा समाधत्ते कथमित्यादिना। सत्यस्य सत्यमिति। भूतत्वाभूतानि सत्यशब्दवाच्यानि वक्ष्यंते चेत् कथं कार्यकरणसंघातस्य प्राणानां च सत्यत्वमुक्तं तत्राह। मूर्तेति। यथोक्तभूतरूपत्वात्कार्यकरणानां तदात्मकानि भूतानि सत्यानीत्यंगीकारात् कार्यकरणानां सत्यत्वं प्राणा अपि तदात्मकाः सत्यशब्दवाच्या भवतीति प्राणा वै सत्यमित्यविरुद्धमित्यर्थः। उत्तरब्राह्मणद्वयस्याविषयमाह। तेषामिति। प्राणानां स्वरूपनिर्धारणेन। यथाग्नेर्विस्फुलिंगा इत्यादिना। मूर्तामूर्तब्राह्मणोक्ताः॥ ॥

मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च
ब्रह्मणो [illegible] निर्धारणं करिष्यति।

करणानां प्राणोपासकत्वं पूर्वमेवोक्तं
अतः प्राणाभिन्नानि करणानि अत उच्यते करणानां प्राणानामिति

शरीरस्याधिष्ठानत्वं स्फुटयति। अस्मिन्निति। प्राणमात्रे विषक्तानि करणानि नीयन्ते [illegible] इत्याहेति।

प्राणापानादिरूपेण शरीरमाविष्टः। स इति। सोऽयं मुमूर्षोरन्त्यकाले देहबलमावं नीत्वा संमोहमिव प्रतिपद्यते ततो क्रामतीति प्रत्यक्षदर्शनात्। नैतद्बलं स्थूलात्प्राणस्य बलाबलत्वं मोऽत्र देहे प्राण इत्यत्र दृष्टान्तमाह। त्वगसृङ्मांसमेदोमज्जास्थिशुक्रेभ्यः सप्तभ्यो धातुभ्यो जातं साप्तधातुकं यथेति। मतं प्रपञ्चयन्पक्षं दर्शयति। शरीरेति। प्राण उच्छ्वासनिश्वासकर्मा वायुः स शरीरपक्षपाती गृह्यते। एतस्यास्थूणायां शिशुः प्राणः करणदेवतालिंगपक्षपाती गृह्यते स देवः प्राणः एतस्मिन्वासे प्राणो बद्ध इति। यः स्थूलः परिणामः स मूत्रपुरीषं च स्तनद्वयं भूत्वा मातरमप्येतित्यजति। अन्नमिति अन्नजलयोरुपलक्षणम्

पंचधाहीति प्राणवायुरानन्तः

लिंगशरीरात्मा

तस्मै फलश्रवणोन्मुखीभूतायाह। अयं वाव शिशुः कोऽसौ योऽयं मध्यमः प्राणः शरीरमध्येयः प्राणो लिंगात्मा यः पंचधा शरीरमाविष्टो बृहन्पाण्डरवासः सोमराजन्नित्युक्तो यस्मिन्वाङ्मनःप्रभृतीनि करणानि विषक्तानि। पड्वीशशंकुनिदर्शनात्तस्यास्य शिशोरिव विषयेष्वितरकरणवदप्रवृत्तत्वात् शिशुत्वं साधानमित्युक्तं किंपुनस्तस्य शिशोर्वत्सस्थानीयस्य करणात्मन आधानं तस्येदमेव शरीरमाधानं कार्यात्मकमाधारमाधीयतेऽस्मिन्निति आधानं तस्य हि शिशोः प्राणस्येदं शरीरमधिष्ठानं। अस्मिन्हि करणान्यधिष्ठितानि लब्धात्मकान्युपलब्धिद्वाराणि भवन्ति न तु प्राणमात्रे विषक्तानि। तथा हि दर्शितमजातशत्रुणा यस्य संहृतेषु विज्ञानमयो नोपलभ्यते शरीरदेशव्यूढेषु तु करणेषु विज्ञानमय उपलभ्यमान उपलभ्यते। तच्च प्रदर्शितं पाणिपेषप्रतिबोधनेन। इदं प्रत्याधानं॥ शिरःप्रदेशविशेषेषु प्रत्याधीयत इति प्रत्याधानं। प्राणः स्थूणा अन्नपानजनिता शक्तिः प्राणो बलमिति पर्याया। बलावष्टम्भो हि प्राणोऽस्मिन् शरीरे स यत्रायमात्माबल्यन्न्येत्य संमोहमिवैति दर्शनात्। यथा वत्सः स्थूणावष्टम्भ एवं शरीरपक्षपाती वायुः प्राणः स्थूणेति केचित्। अन्नं दामान्नं हि भुक्तं त्रेधा विपरिणमते यः स्थूलः परिणामः

कपोतु

यंवाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाधानमिदं प्रत्याधानं प्राणः स्थूणान्नं दाम॥ २१॥ तमेताः सप्ताक्षितय उपति

स एतद्द्वयं भूत्वेमामप्येति मूत्रं च पुरीषं च यो मध्यमो रसः स रसो लोहितादिक्रमेण स्वकार्यं शरीरं साप्तधातुकमुपचिनोति स्वयोन्यन्नागमे हि शरीरमुपचीयतेऽन्नमयत्वात् विपर्यये पक्षीयते पतति यस्त्वणिष्ठो रसोऽमृतमूर्जप्रभाव इति च कथ्यते स नाभेरूर्ध्वं हृदयदेशमागत्य हृदयाद्विप्रसृतेषु द्वासप्ततिनाडीसहस्रेष्वनुप्रविश्य यत्तत्करणसंघातरूपं लिंगं शिशुसंज्ञकं तस्य शरीरे स्थितिकारणं भवति बलमुपजनयत्स्थूणाख्यं। तेनान्नमुभयतः पाशवत्सदामवत्प्राणशरीरयोर्निबंधनं भवति॥ २१॥ इदानीं तस्यैव शिशोः प्रत्याधानगतस्य चक्षुषि काश्चनोपनिषद उच्यंते॥ तमेताः सप्ताक्षितय उपतिष्ठंते। ताः करणात्मकं प्राणं शरीरेऽन्नबंधनं चक्षुर्व्यूढमेता वक्ष्यमाणाः सप्तसंख्याका अक्षितयोऽक्षितिहेतुत्वादुपतिष्ठंते। यद्यपि मंत्रकरणे तिष्ठतिरूपपूर्वः आत्मनेपदी भवति। इहापि सप्तदेवताभिधानानि मंत्रस्थानीयानि करणानि तिष्ठतेरतोऽत्राप्यात्मनेपदं नविरुद्धं। काश्चा अक्षितय इत्युच्यंते॥ तत्र याः इमाः प्रसिद्धाः अक्षन्नक्षणि लोहिन्यो लोहिता राजयो रेखास्ताभिर्द्वारभूताभिरेनं मध्यमं प्राणं रुद्रोऽन्वायत्तः अनुगतः अक्षण्यास्तन्नक्षणि आपो धूमादिसंयोगेनाभिव्यज्यमानास्ताभिर्द्वारभूताभिः पर्जन्यो देवतात्मान्वायत्तोऽनुगतः उपतिष्ठत इत्यर्थः

अंतःकरणे आत्मा स्वरूपं यस्य तं। तथाप्यत्र सप्तदेवं [illegible]। लोहितराजिप्रभृतिभिः सप्ताक्षितय उपतिष्ठंते एनं प्राणास्यान्नाक्षयहेतुत्वात्सप्ताऽक्षितयः इति॥ ॥एम एम एम॥

एवाशब्दहेतुत्वाद्वितीयात्मसंग्रहरूपाः

वागष्टमीत्युक्तं तस्यास सप्तमत्वेनोक्तत्वात्। नवैकस्या द्वितीयत्वमित्याशंक्याह। ब्रह्मणेति तत्र राशिब्रह्मणेन संवादः संसर्गस्तं गच्छती शब्दराशिमुच्चारयंती वागष्टमी स्यादिति यावत्। तथापि सप्तमत्वं विप्रयकथमष्टमत्वं तत्राह। तद्धनुमिति। वक्तृभाव वक्तृत्वभेदेन द्विधा वागिष्टा तत्र वक्तृत्वेनेत्यविरोधः रसनान्नयत्न द्विहेतुरिति भावः। श्रोत्रादयः सप्तधा संति। तत्स्था वायुनामानो मरुतो तिसप्त

धाता विश्वरूपमित्यनेन परश्चेनं तच्छ्रोत्रादिषु प्राणा सर्वयशो विसत्व इत्येतदाह मंत्रः। न केवलं सप्तिनिर्वचनविज्ञानफलं तत्फलं। किंतु प्राणाया यात्म्यवेदनप्रयुक्तमित्याह। स एवाभिमाने। सेनैडपालनसोऽस्थाने·

मचान्नभूतोऽक्षिति प्राणास्य पर्जन्येन वर्षत्यान्नं दिवः प्राणा भवंतीति श्रुत्यंतरात्। याकनीनकाः कृष्णा कनीनिका तया कनीनकया द्वारेणादित्यो मध्यमं प्राणमुपतिष्ठते यत्कृष्णं चक्षुषि तेनेनमग्निरूपतिष्ठते यच्छुक्लं चक्षुषि तेनेंद्रोऽधरयोऽवर्त्तन्या पक्ष्मणा पृथिव्यन्वायत्ता धरत्वसामान्यात्। द्यौरुत्तरयोत्तरत्वसामान्यात्। एता सप्तान्नभूताः प्राणास्य सततमुपतिष्ठंत इति एवंरूपो वेद तस्यैतत्फलं नास्यान्नं क्षीयते य एवं वेद॥ २२॥ तत्रैतस्मिन्नर्थे एष श्लोको मंत्रो भवत्यर्वाग्बिलश्चमस इत्यादि। तत्र मंत्रार्थमाचष्टे श्रुतिरर्वाग्बिलश्चमस ऊर्ध्वबुध्नः इति कः पुनरसावर्वाग्बिलश्चमस ऊर्ध्वबुध्नः॥ इदं तच्छिरश्चमसाकारं हि तत्॥ कथमेष ह्यर्वाग्बिलो मुखस्य बिलरूपत्वाच्छिरसो बुध्नाकारत्वादूर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति यथा सोमश्चमसे एवं तस्मिञ्छिरसि विश्वरूपं नानारूपं निहितं स्थितं भवति। किं पुनस्तद्यशः प्राणा वै यशो विश्वरूपं प्राणाः श्रोत्रादयो वायवश्च मरुतः सप्तधा तेषु

यंते तद्या इमा अक्षन्लोहिन्यो राजयस्ताभिरेनं रुद्रोऽन्वायत्तोऽथ या अक्षन्नापस्ताभिः पर्जन्यो या कनीनका तयादित्यो यत्कृष्णं तेनाग्निर्यच्छुक्लं तेनेंद्रोऽधरयैनं वर्त्तन्या पृथिव्यन्वायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य एवं वेद॥ २२॥ तदेष श्लोको भवत्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपं तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेत्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति प्राणा वै यशो विश्वरूपं प्राणानेतदाह तस्यासत ऋषयः सप्त तीर इति प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वागष्टमी ब्रह्मणा संवित्ते॥ २३॥ इमावेव गोतमभरद्वाजावयमेव गोतमोऽयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठकश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्नं भवति य एवं वेद। द्वितीयं ब्राह्मणं॥

कथं तर्हि आत्रिरिति वचन इत्य तत्राह अत्तिरेवेति·

अत्तिरेव हेतु भरनः क्रियायोगात् रसना

प्राणस्य परा आत्मनः सत्ता भवति अत्रि निर्वचनविज्ञानादिति पंच नामायन्ते

विप्रसृतं यश इत्येतदाह मंत्रः शब्दादिज्ञानहेतुत्वात् तस्यासत ऋषयः सप्त तीर इति प्राणाः परिस्पंदात्मकाः त एव ऋषयः प्राणानेतदाह मंत्रः वागष्टमी ब्रह्मणा संविदानेति। ब्रह्मणा संवादं कुर्वंत्यष्टमी भवति। तं तु सुमाह। वागष्टमी ब्रह्मणा संवित्त इति॥ २३॥ के पुनस्त एव चमसस्य तीरे आसत ऋषय इति। इमावेव गोतमभरद्वाजौ कर्णौ अयमेव गोतमोऽयं भरद्वाजो दक्षिणश्चोत्तरश्च विपर्ययेण वा तथा चक्षुषी उपदिशन्नुवाच। इमावेव विश्वामित्रजमदग्नी दक्षिणं विश्वामित्र उत्तरं जमदग्निर्विपर्ययेण वा। इमावेव वसिष्ठकश्यपौ नासिके उपदिशन्नुवाच दक्षिणः पुटो भवति वसिष्ठ उत्तरः कश्यपः पूर्ववद्वा। वागेवात्रिरदनक्रिया योगात्सप्तमी वाचा ह्यन्नमद्यते। तस्मादत्तिर्ह वै प्रसिद्धं नामैतदत्तृत्वादत्रिरिति। अत्रिर्वसन् यदत्रिरित्युच्यते परोक्षेण सर्वस्यैवान्नजातस्य प्राणस्यात्ति निर्वचनविज्ञानदत्ता भवत्यन्तेव भवति। नान्येषु भिन्न्ने पुनः प्रतिपद्यत इत्येतदुक्तं भवति सर्वमस्यान्नं भवतीति य एवं मस्यैतो प्राणो भूत्वा धानप्रत्याधानगतो भोक्तैव भवति न भोज्यं भोज्यावत्तन्द्वयथ॥ ४॥

सतीह प्राणो शब्दादिज्ञानं सातत्तनत्वयशो भवतीति श्रद्धादितदात्मत्वात् तत्ता परिस्पंदात्मवान् प्राणान् एतत् कृष्णा चमसस्य तीरे ऋषयः कर्णाद्यः आसतेति सुतीयर्थः।

एतत् अत्तिरिति नामधेयं प्रसिद्धं

श्रीवः

वक्तास्त्रिरिति तत्रिताप्राणानां

यद्युपाधीति। तेषामुपाधिभूतानां स्वरूपावधारणार्थं ब्राह्मणमिति संबंधः। शब्दप्रत्ययविषयत्वं सोपाख्यत्वं। सविशेषमेव ब्रह्मणा निर्विशेषमपीति केचित्। तान्निराकर्त्तुं विभजते। तच्चेति। संबंधं वक्तुं द्व·
न्नं कीर्त्तयति। तच्चेति। अजातशत्रुब्राह्मणावसानसमन्यर्थः। इति चेति। चकार उक्तमित्यनुसंगः। सोपाधिकं ब्रह्मरूपं विवृणोति। पंचभूतेति। निरूपाधिकं ब्रह्मरूपं दर्शयति। तद्द्वेति। ते प्रा·
णाः एते सत्यरूपा इति च व्याख्यातं भूर्त्तामूर्त्तभेदेनेत्यर्थः। मूर्त्तं पृथिव्यादित्रयं अमूर्त्तं शेषं। पृथिव्यादीनि त्रीणि भूतानि सच्छब्दवाच्यानि आकाशवायू त्यच्छब्दवाच्यौ। सत भूतसमुदाय·

ननु प्राणा वै सत्यमित्युक्तं। याः प्राणानामुपनिषद्रहस्यं ब्रह्मोपनिषन्नामसंगेन व्याख्याता एते ते प्राणा इति च किमात्मकाः कथं वा तेषां सत्यत्वमिति च वक्त·
व्यमिति पंचभूतानां सत्यानां कार्यकरणात्मकानां स्वरूपावधारणार्थमिदं ब्राह्मणमारभ्यते यदुपाधिविशेषापनयनद्वारेण नेति नेतीति ब्रह्मणः
सतत्वं निर्दिधारयिषितं। तत्र द्विरूपं ब्रह्मरूपं पंचभूतजनितकार्यकरणसंबंधं मूर्त्तामूर्त्ताख्यं मर्त्यामृतस्वभावं तज्जनितवासनारूपं च सर्वज्ञं
सर्वशक्ति सोपाख्यं भवति क्रियाकारकफलात्मकं च सर्वव्यवहारास्पदं। तदेव ब्रह्म विगतसर्वोपाधिविशेषं सम्यग्दर्शनविषयमजरमज·
रममृतमभयं वाङ्मनसयोरप्यविषयमद्वैतत्वान्नेति नेतीति निर्दिश्यते। तत्र यदपोहद्वारेण नेति नेतीति निर्दिश्यते। ब्रह्म तत एते द्वे वाव
वावशब्दोवधारणार्थो द्वे एवेत्यर्थः। ब्रह्मणः परमात्मनो रूपे रूप्यते याभ्याम रूपं परं ब्रह्म ऽविद्याध्यारोप्यमाणाभ्यां के ते द्वे मूर्त्तं च एव मूर्त्त·
मेव च तथा ऽमूर्त्तं च एवामूर्त्तमेवेत्यर्थः। अंतर्णीतत्वात्मविशेषणे मूर्त्तामूर्त्ते द्वे एवेत्यवधार्यते। कानि पुनस्तानि विशेषणानि मूर्त्तामूर्त्त·
योरित्युच्यते। मर्त्यं च मर्त्यं मरणधर्म्यमृतं च तद्विपरीतं स्थितं परिछिन्नं गतिपूर्वकं यत्स्थास्नु यद्व यातीति यत्व्याप्यऽपरिछिन्नं स्थि·

द्वे वाव ब्रह्मणो रूपे मूर्त्तं चैवामूर्त्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च॥ २५॥ तदेतन्मूर्त्तं यदन्यद्वायोश्चा·
न्तरिक्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्य मूर्त्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष·
तपति सतो ह्येष रसः॥ २६॥ ॥

तद्विपरीतं सच्च सदित्योन्येभ्यो विशेष्यमाणमसाधारणधर्मविशेषवत्। त्यच्च तद्विपरीतं त्यदित्येव सर्वदा परोक्षाभिधानार्हं॥ २५॥ तत्र चतुष्ट·
यविशेषणविशिष्टं मूर्त्तं च तथामूर्त्तं च तत्र कानि मूर्त्तविशेषणानि कानि चेतराणीति विभज्यंते। तदेतन्मूर्त्तं मूर्छितावयवमितरेतरानुप्रवि·
ष्टावयवघनसंहतमित्यर्थः। किं तद्यदन्यत्कस्मादन्यद्वायोश्चांतरिक्षाच्च भूतद्वयात्परिशेषात् पृथिव्यादिभूतत्रयमेतन्मर्त्यं यदेतन्मूर्त्ताख्यं भूतत्र·
यमिदं मर्त्यं मरणधर्मि कस्मात् यस्मात्स्थितमेतत्परिछिन्नं ह्यर्थांतरेण संप्रयुज्यमानं विरुध्यते यथा घटस्तंभकुड्यादिना तथामूर्त्तं स्थितं परिछिन्नमर्थांत·
रसंबंधि तत्तोऽर्थांतरविरोधान्मर्त्यमेतत् सद्विशेष्यमाणमसाधारणधर्मवत्। तस्माद्धि परिछिन्नं परिछिन्नत्वान्मर्त्यं अतो मूर्त्तं मूर्त्तत्वाद्धि मर्त्यं म·
र्त्यत्वात्स्थितं स्थितत्वात्सत्। अतोन्योन्याव्यभिचाराच्चतुर्णां धर्माणां यथेष्टं विशेषणविशेष्यभावो हेतुहेतुमद्भावश्च दर्शयितव्यः। सर्वथा·
पि भूतत्रयं चतुष्टयविशेषणविशिष्टं मूर्त्तरूपं ब्रह्मणः। तच्च चतुर्णामेकस्मिन् गृहीते विशेषणे इतरद्गृहीतमेव विशेषणमित्याह। तस्यैतस्य मूर्त्त·

सच्छब्दवाच्यानि तत्समुदायरूपा संहताऽवयवानपेक्ष्य भवतीति अन्ये केपंचानां भूतानां सत्यवाच्यत्वं यातीति यत् व्यापकं इत्यर्थः। गतिपूर्वकं यत्स्थास्नु तत्परिछिन्नं स्थिति योजना। विशेष्यमा·
णत्वं प्रत्यक्षेणोपलभ्यमानत्वं। कथं स्थितस्यापि मर्त्यत्वं तत्राह। परिछिन्नं हीति। मूर्त्तरूपस्य विशेषणभेदकानि कानि। यत्वा ॰ दैहिकं वाय्वाकाशमारभूतकरणं लिंगशरीरम्·

यत एतेन सवितृमंडलेन कृतानि विभज्यमानानि असंकीर्णानि कृष्णंशुक्लंलोहितमित्येतानि रूपविशेषणानि पृथिव्यप्तेजोसु भवंति। ततो भूतत्रयकार्यमध्ये सवितृमंडलस्य प्राधान्यमित्यर्थः। मंडलं चेदाधिदैविकं कार्यं किं पुनस्तथाविधं करणमिति। तत्राह। यत्त्विति। यदेतद्यदेतत्यस्यार्थमाहाधिदैविकस्येति भूतत्रयकार्यस्थूलशरीरस्य रसः रसकरणमिति न रसहीनत्वादीत्यस्य शब्देन मूर्तत्रयकारणमुक्तं। न च तच्चेतनादन्यत्। नवनीतवत्। तथा सामर्थ्याभावात्। नापि पर-कोटिः स्यात्। तत्राचेतन। मन्त्रे क्षेत्रज्ञस्य लक्षणत्वे तात्पर्यं। सोपि कथं मूर्तत्रयकारणमत आह। तत्रेति परकीयपक्षः समग्रस्यार्थः। यथाहुः। यो ह्येतस्मिन्मंडले विज्ञानात्मा एष खल्वविद्याकर्मपूर्वप्रज्ञापीड्कृतो विज्ञानात्मत्वं। प्रतिपद्यते तदेतत्कर्मरूपं विज्ञानात्मनः तद्वाय्वंतरिक्षयोः प्रयोक्तृ भवतीति। ननु हिरण्यगर्भदेहस्य पंचभूतात्मकत्वान्मूर्तद्वयोत्पत्त्यावपि इतरभूतानामपि विनाकृतोस्य भोगः सिध्यत्यत आह। तत्कर्मेति वाय्वस्येति ॥

स्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एतस्य चतुष्टयविशेषणस्य भूतत्रयस्येत्यर्थः। एष रसः सार इत्यर्थः। त्रयाणां हि भूतानां सारिष्ठः सविता। एतत्सारणि भूतानि यत एतत्कृतविभज्यमानरूपविशेषणानि भवंति। आधिदैविकस्य कार्यस्यैतद्रूपं यत्सविता यदेतन्मंडलं तपति। मर्त्यो भूतत्रयस्य हि यस्मादेष रस इत्येतदुच्यते। मूर्तो ह्येष सविता तपति सारिष्ठश्च यत्त्वाधिदैविककरणं मंडलस्यांतरं तद्वक्ष्यामः॥ २६॥ अथामूर्तमधुनोच्यते॥ वायुश्चांतरिक्षं च यत्परिशेषितं भूतद्वयमेतदमृतम् अमूर्तत्वादस्थितमतो विरुध्यमानं केनचिदमृतममरणधर्मेतद्यत्स्थितविपरीतं व्याप्यपरिच्छिन्नं यस्मादेतदन्येभ्यः प्रविभज्यमानविशेषमतस्त्यमिति परोक्षाभिधानार्हमेव पूर्ववत्। तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्य चतुष्टयविशेषणस्यामूर्तस्यैष रसः पूर्ववत्। कोसौ य एष एतस्मिन्मंडले पुरुषः करणात्मको हिरण्यगर्भः प्राण इत्यभिधीयते यः स एष रसः अमूर्तस्य भूतद्वयस्य रसः पूर्ववत्सारिष्ठः एतत्पुरुषसारं चामूर्तं भूतद्वयं। हिरण्यगर्भलिंगारंभाय हि भूतद्वयाभिव्यक्तिरव्याकृतात्तस्मा-

अथामूर्तं वायुश्चांतरिक्षं चैतदमृतमेतद्यदेतत्त्यं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मंडले पुरुषस्त्यस्य ह्येष रस इत्यधिदैवतं॥ २॥ अथाध्यात्ममिदमेव मूर्तं यदन्यत्प्राणाच्च यश्चायमंतरात्मन्नाकाश एतन्मर्त्यमेतत्स्थि

त्तादर्थ्यात्तत्सारं भूतद्वयं। त्यस्य ह्येष रसो यस्माद्यो मंडलस्थः पुरुषो मंडलवन्न गृह्यते सारश्च भूतद्वयस्य तस्मादस्ति मंडलस्थस्य पुरुषस्य भूतद्वयस्य च साधर्म्यं। तस्माद्युक्तं प्रसिद्धवद्धेतूपादानं त्यस्य ह्येष रस इति रसः कारणं हिरण्यगर्भविज्ञानात्मा चेतन इति केचित्। तत्र च किल हिरण्यगर्भविज्ञानात्मनः कर्म वाय्वंतरिक्षयोः प्रयोक्तृ तत्कर्म वाय्वंतरिक्षाधानं सदितरेषां भूतानां प्रयोक्तृ भवति। तेन स्वकर्मणा वाय्वंतरिक्षयोः प्रयोक्तेति योऽसौ रसः कारणमुच्यत इति। तन्न मूर्तरसेनातुल्यत्वात्। अमूर्तस्य तु भूतत्रयस्य रसो मूर्तमेव मंडलं दृष्टं भूतत्रयस्य समानजातीयं न चेतनस्य तथामूर्तयोरपि भूतयोः समानजातीयेनैवामूर्तेन रसेन युक्तं भवितुं वाक्यप्रवृत्तेस्तुल्यत्वात्। यथा हि मूर्तामूर्ते चतुष्टयधर्मवती विभज्येते। तथा रसरसवतोरपि मूर्तामूर्तयोस्तुल्यत्वेनैव न्यायेन युक्तो विभागो न त्वर्धवैशसं। मूर्तरसोपि मंडलोपाधिश्चेतनो विवक्ष्यत इति चेत्। अत्यल्पमिदमुच्यते सर्वत्रैव तु मूर्तामूर्तयोर्ब्रह्मरूपेण विवक्षितत्वात्। पुरुषशब्दोऽचेतनेनुपपन्न इति चेत्। न पक्षपुच्छादिविशि

वाय्वंतरिक्षाधानं तद्रूपपरिलंभनिमित्तं यावत्। वाय्वंतरिक्षयोर्भूतत्रयोपसर्जनयोरिति शेषः। प्रयोक्ता हिरण्यगर्भविज्ञानात्मा निराकरोति। तन्नेति। कथं मूर्तरसेनामूर्तस्य यथोक्तस्यातुल्यत्वं तत्राशंक्याह। मूर्तस्येति। अमूर्तरसस्य चेतनत्वं तु तस्य रसतया वैजात्यं स्यादिति भावः। अस्तु वैजात्यं तत्राह। यथा हीति। तथा च मूर्तवदमूर्तमपि अचेतनस्यैव कारणशरीरस्य हेतुभूतमिति सिद्धोर्थः अचेतनेन।

नन्वमूर्तरसश्चेतनो मूर्तरसस्त्वचेतन इति युक्तो विभागः। अर्धजरतीयस्याप्रामाणिकत्वादित्याशंक्य तत्राह। अर्धवैशसं परिहर्तुं शंकते मूर्तरसस्येति। अमूर्तरसवन्मूर्तरसशब्देनापि चेतनस्यैव ग्रहणो मंडलमापन्नस्य ग्रहणमित्येतद्भय परमतमिति।

आनन्दगीरि·
अमूर्तस्य मूर्तत्रयहेतुत्वेन संबध्यते
[illegible]

विशेषणविशेष्यभावो हेतुहेतुमद्भावश्च पर्यवसितः इत्याह पूर्ववदिति।

भूतत्रयोपसर्जनस्य भूतद्वयस्य

त्यस्य हि रसेति श्रुतौ वैशम्यप्रसंगात्

मंडलस्याचेतनकार्यतया चेतनत्वे सर्वस्य तत्कार्यतयान्नमाचत्वाद्रसयोश्चेतनत्वेति विशेषणानर्थक्यमित्यर्थः। मंडलाधारस्य चेतनत्वं पुरुषस्याद्वक्ष्यतिश्रुत्यादेष्टव्यमिति शंकते। पुरुषइति। अनुपपत्तिं परिहरति नेत्यादिना। तद्व्याकरोति। नवाइति। इत्थं विभक्ताः शांता नैव शक्ष्यामो व्यवहारं प्रजनयितुमित्यालोच्य तत्र चक्षुः श्रोत्रं जिह्वा प्राणा वाक्मनो रूपाद्रसोन्नसमष्टिपुरुषा एकं पुरुषं संहतलिंगं करवामेति चानिश्चित्यासी प्राणाः समष्टिपुरुषा व्यक्तात्मका एकं पुरुषं लिंगात्मानं स्तनवंतइति श्रुत्यर्थः। आदिपदेन लौकिकमपि दर्शनं गृह्यते। श्रुत्यंतरं तैत्तिरीयकं पुरुषशब्दप्रयोगः सवाएषपुरुषोन्नरसमय इत्यादि। चक्षुषः सारत्वे शरीरावयवेष्वप्राथम्यं हेत्वंतरमाह। प्राथम्याच्चेति। तत्र प्रमाणमाह। चक्षुर्वीएवेति। मंडलवतो। एतस्मिन्मंडले पुरुषशब्दः। ॥

तत्रायं तन्यायपुरुषत्वं पुरुषा
दिशब्देनेति पुरुषदर्शा
नात्

ह्यस्यैव लिंगस्य पुरुषशब्ददर्शनात्। नवाइत्थं संतः शक्ष्यामः प्रजाः प्रजनयितुमिमांसप्तपुरुषानेकं पुरुषं करवामेति त एतान्सप्तपुरुषानेकं पुरुषमकुर्वन्निः दावन्नरसमयादिषु च श्रुत्यंतरे पुरुषशब्दप्रयोगात्। इत्यधिदैवतमित्युक्तोपसंहारः स्वाध्यात्मविभागोक्त्यर्थः॥ २७ ॥ अधुनाध्यात्मं मूर्तामूर्तयोर्विभाग उच्यते। किं तन्मूर्तमिदमेव किंचेदं यदन्यत्प्राणाच्च यश्चायमंतरात्मन्नाकाशः स्वशरीरस्थश्चयः प्राणः एतत्त्रयं वर्जयित्वा यदन्यच्छरीरारंभकं भूतत्रयमेतन्मर्त्यमित्यादि समानमन्यत् पूर्वेण एतस्य सतो ह्येष रसो यच्चक्षुरित्याध्यात्मिकस्य शरीरारंभकस्य कार्यस्यैष रसः सारस्तेन हि सारेणासारवदिदं शरीरं समस्तं यथाधिदैवमादित्यमंडलेन। प्राथम्याच्च। चक्षुषी एव प्रथमे संभवत इति। तेजोरसो निवर्तताग्निरिति लिंगात्। तैजसं हि चक्षुः। ए

तमेतत्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः सतो ह्येष रसः॥ २८ ॥ अथामूर्तं प्राणाश्च यश्चायमंतरात्मन्नाकाश एतदमृतमेतद्यदेतत्त्यं तस्यैतस्यामूर्तस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो योऽयं दक्षिणोक्षन्पुरुषस्त्यस्य ह्येष रसः॥ २९ ॥ ॥रामरामरामरामराम॥ ॥राम॥ ॥रामरामरामराम॥

तत्सारमाध्यात्मिकं भूतत्रयं सतो ह्येष रस इति मूर्तत्वसारत्वे हेत्वर्थः॥ २८ ॥ अधुनाऽमूर्तमुच्यते। यत्परिशेषितं भूतद्वयं प्राणश्च यश्चायमंतरात्मन्नाकाश एतदमूर्तममृतं पूर्ववत्। एतस्य त्यस्यैष रसः सारो योऽयं दक्षिणेऽक्षन्पुरुषो दक्षिणेऽक्षन्निति विशेषणग्रहणं शास्त्रप्रत्यक्षत्वात्। लिंगस्य हि दक्षिणोऽक्षिणि विशेषतोऽधिष्ठातृत्वं शास्त्रस्य प्रत्यक्षं सर्वश्रुतिषु तथा प्रयोगदर्शनात्। त्यस्य ह्येष रस इति पूर्ववत् विशेषणाऽग्रहणादमूर्तत्वसारत्व एव हेत्वर्थः॥ २९ ॥ ब्रह्मण उपाधिरूपयोर्मूर्तामूर्तयोः कार्यकरणविभागेनाध्यात्माधिदैवतयोर्विभागो व्याख्यातः सत्यत्यशब्दवाच्ययोः। अथेदानीं तस्य हैतस्य पुरुषस्य करणात्मनो लिंगस्य रूपं वक्ष्यामः वासनामयं मूर्तामूर्तवासनाविज्ञानमयसंयोगजनितं विचित्रपटभित्तिचित्रवन्मायेंद्रजालमृगतृष्णिको

सत्यत्यावृक्षणेति
शब्दसंयोगेन

चक्षुषसारत्वे हेत्वंतरमाह। तेजइति। शरीरमात्रस्य विशेषणनिष्पादकं तत्र सर्वत्र संनिहितमपि तेजो विशेषतश्चक्षुषि स्थितं। आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशदिति श्रुतेः अतस्तेजशब्दपर्यायरसः शब्दस्य चक्षुष्युपपत्तिरविरुद्धेति भावः। इतश्च तेजः शब्दपर्यायो रसशब्दश्चक्षुष्येव संभवतीत्याह। तेजसं हीति। अनेन रसशब्दस्य तेजसि वृत्तिर्दर्शितेति भावः। हि यस्मात्। एष चक्षूरूपः पदार्थांतरे रसः। अतः एतत्सारः त्रयं मूर्तत्वसारत्वोक्तौ हेत्वर्थो हिशब्दः। कुतो विशेषोक्तिरित्याशंक्याह। दक्षिणइति। शास्त्रस्यनेन

तस्य-इत्यत्र पूर्ववद्धेत्वर्थः हिशब्दः अमूर्तत्वसारत्वोक्तौ कुतो मूर्तसारत्वं तत्राह विशेषणोऽग्रहणात्

वा दक्षिणोऽक्षिणि विशेषणप्रापकत्वादितिहेत्वर्थः।

यत्रेति विचारविपाश्ता भ्रांतिरितरेतरः कारणं तस्य हेतोर्व्याप्तेनात्म
निरूपणस्यानुकाभावप्रपंचपक्षमुत्थापयति· औपनिषदंमन्या इति·

वादसिरोः क्षणिकविज्ञानस्य प्रत्यक्षत्वादिति हेत्वर्थः। मूर्त्तेति। मूर्त्तामूर्त्तवासनाभिर्विज्ञानमयसंयोगेन च जनितं तद्बुद्धेः रूपमिति यावत्। नेदमात्मनो रूपं न स्यात्सस्यानेकरूपवत्त्वानुपपत्तेरि
तिमत्वा निशिनष्टि। विचित्रमिति। वास्तवशंकां वारयति· मायेति। तार्किकाणां चोद्भवत् भ्रांतिमनुभवयति। एतदेवेति। करणमेवाहं धीज्ञानं रागादिधर्मकमात्मा। तस्य वासनामयं रूपं
पटस्य शौक्ल्यवद्गुणः। स च संसार इति यत्र तार्किकाद्या भ्रांतास्तस्य रूपं वक्ष्याम इति पूर्ववत्। सांख्यानां भ्रांतिमाह। इदमिति। केनाप्रकारेणांतःकरणमात्मार्थमिष्यते तत्राह। पुरुषे
ति। कथं त्रिगुणत्वादिकं तत्राह। प्रधानाश्रयमिति। नांतःकरणमेवात्मा किंत्वन्यः सर्वगतः स्वप्रकाशः। तस्य भोगापवर्गानुगुणत्वेन प्रधानात्मकमंतःकरणं तस्य धर्मं कं प्र
वर्त्तत इति कापिला यत्र भ्राम्यंति· तस्य रूपं वक्ष्यामः। तस्य हेत्वादेशानुवादपूर्वकं संबंधमाह· अथात इति· सर्वव्यामोहास्पदत्वमेव व्याकुर्वन् विज्ञानवादिनां भ्रांतिमाह·

पमेसर्वव्यामोहास्पदं। एतावन्मात्रमेवात्मेति विज्ञानवादिनो वैनाशिकाश्च भ्रांता। एतदेव वासनामयं पटरूपवदात्मनो द्रव्यस्य गुण इति नैयायिकाः वै
शेषिकाश्च संप्रतिपन्नाः इदमात्मार्थं त्रिगुणं स्वतंत्रं प्रधानाश्रयं पुरुषार्थेन हेतुना प्रवर्त्तत इति सांख्याः। उपनिषदम्मन्या अपि केचित्प्रक्रियां र
यंति मूर्त्तामूर्त्तराशिरेकः परमात्मराशिरुत्तमस्ताभ्यामन्योयं मध्यमः किल तृतीयः कर्त्ता भोक्ता विज्ञानमयेनाजातशत्रुप्रतिबोधितेन सह वि
द्याकर्मपूर्वप्रज्ञासमुदायः प्रयोक्ता कर्मराशिः प्रयोक्तोः पूर्वोक्तो मूर्त्तामूर्त्तभूतराशिः साधनं चेति। तत्र च तार्किकैः सह संधिं कुर्वंति लिंगाश्रय·
श्चैव कर्मराशिरिष्कृत्वा पुनस्तत्रस्यंतः सांख्यभयात् सर्वकर्मराशिः पुष्पाश्रय इव गंधः पुष्पवियोगेपि पुटतैलाश्रयो भवति तद्वल्लिंग

भूतराशेश्चमा
तमाः कर्मसंबंधिज्ञानं·

मध्यमो राशिर्विज्ञानमय
प्रयोक्ता कर्मराशिः साधन
भूता मूर्त्तामूर्त्तभूतराशि
श्चत्रयोन्यः

तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वासो यथा पांड्वाविकं यथेंद्रगोपो यथाग्न्यर्चिर्यथा पुंडरीकं यथा सकृद्वि
द्युत्तꣳ सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेदाथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ
नामधेयꣳ सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्॥ ३०॥ ॥ तृतीयं ब्राह्मणम्॥ ॥राम॥

वियोगेपि परमात्मैकदेशमाश्रयति स परमात्मैकदेशः किलान्यत आगतेन गुणेन कर्मणा सगुणो भवति निर्गुणोपि कर्त्ता भोक्ता बध्यते च वि·
ज्ञानात्मेति वैशेषिकाश्चित्तमनुच्यतेष्यनुसरंति स च कर्मराशिर्भूतराशेरागंतुकः स्वतो निर्गुण एव परमात्मैकदेशत्वात्। स्वत उत्थिता अविद्याऽ
नागंतुका ऊषरवदनात्मधर्म इति अनया कल्पनया सांख्यचित्तमनुवर्त्तंते· सर्वमेतत्तार्किकैः सह सामंजस्यकल्पना रमणीयत्वं पश्यंति
नोपनिषत्सिद्धांतं सर्वन्यायविरोधं च पश्यंति। कथमुक्ता एवतावत्सावयवत्वे परमात्मनः संसारित्वसंबंधात्वं कर्मफलदेशसंचरणानु·

उपनि॰ आनंदं यज्ञेतिनज्ञानंती
त्यर्थः

एतावन्मात्रमिति बुद्धिमात्रमेवाहंवृत्तिविशिष्टं स्वरसभंगुरं रागादिकलुषितमात्मा· नान्यः स्थायी क्षणिको वेति यत्र ते भ्रांतास्तस्य रूपं वक्ष्याम इति संबंधः। कीदृशीं प्रक्रिये
स्तु के राशित्रयकल्पनां वदंतां दोषमधराशिं रचयंति· मूर्त्तामूर्त्तेति· परकीयं कल्पनांतरमाह· नत्वेति· राशित्रये कल्पिते सति। संधिकरणमेव स्फोरयति· लिंगाश्रयश्चे
ति तत इति उक्तपरामर्शः। सांख्यत्वभयात्त्रस्यंतो वैशेषिकांश्चित्तमप्यनुसरंतीति संबंधः। कथं तर्हि। तानुदाहरणं तदुपपादयति· सर्वकर्मराशिरिति। कथं निर्गुणा

69

कतयःस्तामादिवासमादिशिशंजीवात्मानंनास्पृशन्ति

मानं कर्मरागिराश्रयतीत्याशंक्याह। परमात्मैकदेश इति। अन्यत इति। कार्यकरणात्मकाभूतराशेरित्तियावत्। तान्ध्यामिति। महाराजादिरूपमात्मतत्त्वमित्याभिन्यराशित्रयकल्पनामुक्त्वा
नध्यमाधमरणेविशेषमाह। त्रयोकेति। उपादकत्वं प्रयोक्तृत्वं। कर्मयुक्तविद्यापूर्वप्रज्ञयोः उपलक्षणं। साधनं ज्ञानं कर्मकारणकार्यकरणज्ञानं तदपिप्रयोज्यमित्याह। साधनं
चेति। पत्रप्रभूतराशिनिष्ठकर्मादितद्द्वारा आत्मन्यागच्छतीतितदासौ कर्त्रात्मादिसंसारमनुभवतीत्याह। सकर्मेति। स्वतन्त्रस्यात्मैकदेशस्य कर्मादिसंबंधेन संसारित्वस्यादिति चेत्
त्याह। उपरवादिति। यथापृथिव्याञ्जाता प्यूषरदेशस्तदेकदेशमाश्रयत्येवमविद्यापरस्माज्जातापि तदेकदेशमाश्रयिष्यतीत्यर्थः। तदेतद्दूषयितुमुपक्रमते। सर्वमेतदिति। देवेति
की देशो सिद्धांतेनवा वशब्दादिसामंजस्यं तत्राह। यदेति। वास्यवासनाविशिष्टः पदुक्तंपरस्यैकदेशो विज्ञानात्मा। तत्र तदेकदेशत्वं वास्तवमवास्तवं वा प्रथमे सपरस्मादभिन्नोभिन्नोवे

कादिभूछिद्राकाशादिवत्। तथालिंगवियोगेपि
पपन्नादयोदोषाः। नित्यभेदे च विज्ञानात्मनः परेणैकत्वानुपपत्तिः। लिंगमेव चेत्परमात्मनउपचारिचदेशत्वेन परिकल्प्येत घटकाशं स्वतन्त्रउत्थापयतुघरव
दित्यादिकल्पनानुपपन्नैव। नचवासदेशाव्यतिरेकेणावासनायाः वस्त्वंतरसंचरणं मनसापि कल्पयितुं शक्यं। नच श्रुतयोगच्छंति कामः संकल्पो
विचिकित्सा हृदये ह्येव रूपाणि ध्यायतीव लेलायतीव कामा येऽस्य हृदि श्रिताः तेर्गाहितदा सर्वाग्रन्थिकान्हृदयस्येत्याद्याः न चासां श्रुती
नां श्रुतादन्यार्थांतरकल्पनान्याय्या। आत्मनः परब्रह्मत्वोपपादनार्थपरत्वादासां। मेतावन्मात्रार्थउपक्षयत्वाच्च सर्वोपनिषदां॥ तस्माच्छ्रु
त्यर्थकल्पनाः कुशलाः सर्वोपनिषदर्थमन्यथाकुर्वंति। तथापि वेदार्थश्चेत्स्यात्। कामं भवतु न मे द्वेषः। नं च द्वे वाव ब्रह्मणोरूपइति राशित्रय
पक्षे समंजसं यदा तु मूर्त्तामूर्त्तेन तज्ज्ञानितवासनाश्चमूर्त्तामूर्त्ते द्वे रूपे ब्रह्मचरूपन्तृतीयं तवान्यच्चतुर्थं मंतराले तदेतदनुकूलमवधारणं द्वे
व ब्रह्मणो रूपे इति। अन्यथा ब्रह्मैकदेशस्य विज्ञानात्मनो रूपे इति कल्प्यं॥ परमात्मनो वा विज्ञानात्मद्वारेणेति॥ तदा च रूपे एवेति द्विवच
नमसमंजसं रूपाणीति वासनाभिः सह बहुवचनं युक्ततरं स्यात्॥ द्वेच मूर्त्तामूर्त्ते वासनाश्च तृतीयमिति। अथ मूर्त्तामूर्त्ते एव परमात्मनो वा
सनास्तु विज्ञानात्मनइतिचेत्। तदा विज्ञानात्मद्वारेण विक्रियमाणस्य परमात्मन इतीयं वाच्योयुक्तिरनर्थिका स्यात्॥ वासनाया अपि विज्ञानात्मद्वा
रेण रूपत्वस्याविशिष्टत्वात्॥ नचवस्तुवस्त्वंतरद्वारेणाविक्रियत इति मुख्यया वृत्त्याशक्यं कल्पयितुं॥ नच विज्ञानात्मा परमात्मनोवस्त्वंतरं तथा क
ल्पनायां सिद्धांतहानात्। तस्माद्वेदार्थभूतानां स्वचित्तप्रभवाश्चवमादिकल्पना अक्षरबाह्या। न ह्यक्षरबाह्यो वेदार्थो वेदार्थोपकारी वा॥ निरपेक्षत्वा

परमात्मदेशाश्रय
णांवासनायाः अ
विद्यायाश्च १

वासनांमूर्त्तामूर्त्तेपरत्वभावः

[illegible]
[illegible]
[illegible]

अर्थ

निदिकल्पायांदूषयति उक्तार्थेवेति। कल्पांतरं प्रत्याह। नित्यभेदेचेति। लिंगमेवेति। लिंगोपाधिनाकल्पितपरांशो जीवात्मैवमुक्तेस्यात्प्रतोलिंगध्वंसे वासिनानात्मस्यात्। लिंगाभा
वे तदधीनजीवाभावात्। तत्रश्च तद्वियोगेपि लिंगस्याविवासनाजीवेति तिष्ठतीति प्रक्रियानुपपन्नेति दूषयति। तथेति। यत्तु परस्मादविद्यायाः समुत्थानं तन्निराकरोति। अविद्यायाश्चेति। प
रस्मादविद्योत्पत्तौ तस्यैव संसारः स्यात्। तयोः संसारविद्ययोरेकाधिकरणपातात्। अतश्चाविद्यायां सत्यां न मुक्तिः। नच तस्यां नश्यायां तन्निवृत्तिः। कारणमेवानुवृत्तेरिति भावः। इतश्च वास
नायाश्चाश्रयत्वामसंगतमित्याह। नचेति। भेदाभेदयोर्विरुद्धत्वात्। लिंगोपाधिरात्मा परस्यांश इति कल्पना॥ राशित्रयपक्षेजीवस्यरूपमध्ये श्रुतार्भावे निक्षिप्यकोटिनिवेशस्यापि समंजसं
नभो वक्तीति शिक्षणीयास्यादित्याह। अन्यथेति। भवत्ववक्तेति शिक्षेति तत्राह। तदिति। रूपमध्ये जीवान्तर्भावकल्पनायामित्तियावत्। विषयभेदेनोपपत्त्यविरोधं चोदयति। अथेति॥

इत्थंव्यवस्थायांजीवद्वाराविक्रियमाणस्यपरस्यरूपेमूर्त्तामूर्त्तेइत्युक्तिर्युक्ता। वासनाकर्मादेरपितद्द्वारातत्रसंबंधाविशेषादितिद्रष्टव्यं। नेदेति। विज्ञानात्मद्वारापरस्यविक्रियमाणत्वसंग।
तु कौकंनदेवनात्क्रीत्याह। नचेति। किंचजीवस्यब्रह्मणोवस्त्वंतरत्वमात्यंतिकमनात्मत्वंकिंवान्यथेत्याह। नचेति। नद्वितीयः भेदाभेदयोःनिरसनादितिद्रष्टव्यं। परकीयप्रक्रियांप्रत्याख्या
यस्वमतेनतच्छब्दार्थमाह। योयमिति। प्रकृतत्वाल्लिंगात्मगृहीजीवस्यापिप्राणेष्वेवाक्येप्रकृतत्वभावात्तस्यैवात्रतच्छब्दग्रहःस्यादितिशंकते। नन्विति। प्रकृतत्वेपितस्यनिर्वि
शेषब्रह्मत्वेनज्ञापयितुमिष्टत्वात्तद्वासनामयःसंसाररूपतत्वतोऽयुक्तमितिपरिहरति। नैवमिति। यच्छांतइति। अस्याध्यायावसानेविज्ञातारमरेकेनेत्यात्मनस्तूपसंहारस्यश्रवणादितिनतो

लिंगशरीरं

हृदस्थप्राणस्यंप्रति। तस्मात्तद्विषयकल्पनाऽसमंजसा योयंदक्षिणेऽक्षन्पुरुषः इतिलिंगात्मा प्रकृतः अध्यात्मेऽधिदैवेचयएषएतस्मिन्मंडलेपुरुषइति
तस्येतिप्रकृतोपादानात्सएवोपादीयते योऽसौत्यस्यामूर्त्तस्यरसोनतुविज्ञानमयः॥ ननुविज्ञानमयस्यैतानिरूपाणिकस्मान्नभवंति। विज्ञानमयस्या
पिप्रकृतत्वात्तस्येतिचप्रकृतस्योपादानात्। नैवंविज्ञानमयस्यारूपत्वेनविजिज्ञापयिषितत्वात्यदिहि। तस्यैवविज्ञानमयस्यैतानिमहारजना
दीनिरूपाणिस्युस्तस्यैवनेतिनेतीत्यनाख्येयरूपतयादेशोनस्यात्। नन्वस्यैवाभावादेशोनतुविज्ञानमयस्येति। नस्यांतउपसंहारात्· विज्ञाता
रमरेकेनविजानीयादितिविज्ञानमयंप्रत्युपसंहरिष्यतिनेतिनेतीति। ज्ञपयिष्यामीतिचप्रतिज्ञायाअर्थवत्त्वात्। यदिचविज्ञानमयस्यैवासंव्यवहा
र्यमात्मस्वरूपंविज्ञापयितुमिष्टंस्यात्प्रश्नसमयेनोपाधिविशेषवत्ततइयंप्रतिज्ञार्थवतीस्यात्। येनासौज्ञापितोजानात्यात्मानमेवाहंब्रह्मा
स्मीति। शांतिंप्राप्नोतिनबिभेतिकुतश्चन। अथपुनरन्यएवविज्ञानमयोऽन्योनेतिनेतीतिव्यपदिश्यतेतदान्यदसौब्रह्मान्योहमस्मीति·
विपर्ययोगृहीतःस्यात्। नात्मानमेवावेदहंब्रह्मास्मीतितस्मात्तस्यहैतस्येतिलिंगपुरुषस्यैवैतानिरूपाणिवासनात्मकाभिमानिरूपाण्युच्यंते·
एतस्यपुरुषस्यप्रकृतस्यलिंगात्मनएतानिरूपाणिकानितानीत्युच्यंते। यथालोकेमहारजनंहरिद्रातयारक्तंमाहारजनंयथावासोलोके। एवं
स्त्र्यादिविषयसंयोगेतादृशंवासनारूपंरंजनाकारमुत्पद्यतेचित्तस्ययेनासौपुरुषोरक्तइत्युच्यते। वस्त्रादिवायथाचलोकेपांड्वाविकमवेरिद
माविकं। ऊर्णादियथाचैतत्पांडुरंभवति। तथान्यद्वासनारूपंयथाचलोकेइंद्रगोपोऽत्यंतरक्तोभवत्येवमस्यवासनारूपं॥ क्वचिद्विषयवि
शेषापेक्षयारागस्यतारतम्यंकस्यचित्पुरुषस्यचतत्तदपेक्षयायथाचलोकेऽग्न्यर्चिर्भास्वरंभवतितथाक्वचित्कस्यचिद्वासनारूपंभवति। यथापुं
डरीकंशुक्लंतद्वदपिवासनारूपंकस्यचिद्भवति। यथासकृद्विद्युत्तंयथालोकेसकृद्विद्योतनंसर्वतःप्रकाशकंभवति। तथाज्ञानप्रकाशवि
वृद्ध्यपेक्षयाकस्यचिद्वासनारूपंउपजायते। नैषांवासनारूपाणामादिरंतोमध्यंसंख्यावादेशःकालोनिमित्तंवावधार्यतेऽसंख्येयत्वाद्वास·

रूपत्वे सति अनाख्येयरू
पत्वं विज्ञानमयस्य कथमि
त्यभावः

विज्ञानमयस्य·

परमात्मनः

निर्विशेषमिति ष्टं सत्यस्य [illegible]
रूपाणि वार्यः

सत्यस्य च सत्यपरमात्मस्वरू
पवक्तव्ये निरवशेषमत्वं वक्त
व्यं सत्यस्य चाविशेषरूपाणि

नात्मशक्यत्वात्तस्यैवादेशोपसंहारादितिज्ञापितस्यैवादेशोनतुतटस्थस्येत्यर्थः। इतश्चप्रत्यगर्थस्यैवायमादेशइत्याह। ज्ञपयिष्यामीतिचेति। तदेवसमर्थयतेयदिचेति॥ ननुलिंगस्यचेदेता
निरूपाणितर्हिकिमितिरूप्यंतेपरमात्मस्वरूपस्यैववक्तव्यत्वादित्याह। सत्यस्यचेति। इंद्रगोपोपमानेनकौसुंभस्यगतत्वान्महारजनंहरिद्रेतिव्याख्यातं। मनसःवासनावैचित्र
किंकारणमिति। तदाह। क्वचिदिति। चित्तवृत्तशब्देनसत्त्वादिगुणपरिणामोविवक्षितः। परिमितदृष्टांतोक्त्यावासनानामपिपरिमितत्वमित्याशंक्याह। नैषामिति। तत्रवाक्यशेषंसंवादयति·

प्रश्नः कानि तानि रूपाणीत्यतः लिंगस्य रूपाण्युपन्यस्यंते इति भा
कानि सत्यस्य रूपाणीत्याह· वासनाः मासा० अंते। तथा च वा
सनात्मतत्वस्यैतानि विशेषरूपाणीत्यभिप्रायः

नामादीनां विशेषः नामादिसंबंधविशेष इत्यर्थः

नथा चेति अंत्यवासनाविशिष्टसूत्रोपास्तिफलं तीतत्प्रकर्षाभिधानपूर्वकमभिदधाति। यस्त्वित्यादिना। यथोक्तदिशस्याभावपर्यवसायित्वं मन्वानः शंकते नन्विति। निरवधिकनिषेधासिद्धेस्त-
दवधित्वेन सत्यस्य सत्यं ब्रह्म निर्दिष्टमिष्टमिति परिहरति। उच्यत इति। किमिति निषेधमुखेन तन्निर्दिश्यते तत्राह। यस्मिन्निति। तद्विधित्सुखेनानिर्देश्यमशक्यमिति शेषः। नामरूपाद्य-
भावेपि ब्रह्मणि शब्दप्रवृत्तिमाशंक्याह। तद्द्वारेणेति। जात्यादीनामन्यतमस्य ब्रह्मण्यपि संभवात् तद्द्वारा शब्दप्रवृत्तिः स्यादिति चेन्नेत्याह। न चैषामिति। उक्तमर्थं वैधर्म्यदृष्टांतेन स्पष्टय-

नायाः वासनाहेतूनां चानंत्यात्। तथा च वक्ष्यति स एष इदंमयो ऽदोमय इत्यादि॥ तस्मान्न स्वरूपसंख्यावधारणार्था दृष्टांताः यथा महारजनं वास इत्या-
दयः किं तर्हि प्रकारप्रदर्शनार्थाः॥ एवंप्रकाराणि हि वासनारूपाणीति। यत्तु वासनारूपमभिहितमंते सकृद्विद्योतनमिवेति तत्किल हि-
रण्यगर्भस्याव्याकृतात्प्रादुर्भवतः तडिद्वत्सकृदेव व्यक्तिर्भवतीति तत्तदीयं वासनारूपं हिरण्यगर्भस्य यो वेद तस्य सकृद्विद्युत्तेव ह वै इत्य-
वधारणार्था॥ विवमेवास्य श्रीः ख्यातिर्भवतीत्यर्थः। यथा हिरण्यगर्भस्यैवमेतद्यथोक्तं वासनारूपमंत्यं यो वेद। एवं निर्विशेषं सत्यस्वरूपमभिधा-
य यत्तत्सत्यस्य सत्यमवाच्यमतस्यैव स्वरूपावधारणार्थं ब्रह्मण इदमारभ्यते। अथानंतरं सत्यस्वरूपनिर्देशानंतरं यत्सत्यस्य सत्यं निर्दिदि-
क्षितमिति। उच्यते सर्वोपाधिविशेषापोहेन यस्मिन्न कश्चिद्विशेषोऽस्ति नाम वा रूपं वा कर्म वा भेदो वा जातिर्वा गुणो वा तद्द्वारेण हि शब्दप्रवृ-
त्तिर्भवति। न चैषां कश्चिद्विशेषो ब्रह्मण्यस्ति अतो न निर्देष्टुं शक्यते॥ इदं तदिति। गौरसौ स्पंदते शुक्लो विषाणीति यथा लोके निर्दिश्यते तथा-
ध्यारोपितनामरूपकर्मद्वारेण ब्रह्म निर्दिश्यते विज्ञानमानंदं ब्रह्म विज्ञानघन एव ब्रह्मात्मेत्येवमादिशब्दैः। यदा पुनः स्वरूपमेव निर्दि-
दिक्षितं भवति निरस्तसर्वोपाधिविशेषं तदा न शक्यते केनचिदपि प्रकारेण निर्देष्टुं॥ तदायमेवाभ्युपायो यदुत प्राप्तनिर्देशप्रतिषेध-
द्वारेण नेति नेतीति निर्देशः॥ इदं च नकारद्वयं वीप्साव्याप्त्यर्थं यत्प्राप्तं तत्तन्निषिध्यते। तथा च सत्य ऽनिर्देश्याशंका ब्रह्मणः परिहृता

अन्यथाशंकानिवृत्यर्थं

भवति। अन्यथा हि नकारद्वयेन प्रकृतद्वयप्रतिषेधे यदन्यत्प्रकृतात्प्रतिषिद्धद्वयाद्ब्रह्म तन्न निर्दिष्टं कीदृशं नु खल्वित्याशंका न निव-
र्त्यते। तथा चानर्थकश्च स निर्देशः पुरुषस्य विविदिषाया अनिवर्तकत्वात्॥ ब्रह्म ज्ञपयिष्यामीति च वाक्यमपरिसमाप्तार्थं स्या-
त्। यदा तु सर्वदिक्का विविदिषा निवर्तिता स्यात् सर्वोपाधिनिराकरणद्वारेण तदा सैंधवघनवदेकरसं प्रज्ञानघनमनंतरमबाह्यं स-
त्यस्य सत्यमहं ब्रह्मास्मीति सर्वतो निवर्तते विविदिषात्मन्येवावस्थिता प्रज्ञा भवति। तस्माद्वीप्सार्थं नेति नेतीति नकारद्वयं। ननु मह-

[illegible]

तदेवावशिष्यते यस्मादतत्तस्मा-
त्सत्यस्य सत्यस्वरूपं निर्देक्ष्यामः।
आदेशो निर्देशो ब्रह्मणः कथं पुनर-
सौ निर्देश इत्यत्र उच्यते। नेति नेतीति
एवं निर्देशः। ननु कथमाभ्यां नेति
नेति शब्दाभ्यां सत्यस्य सत्यमनं ५

ति। गौरिति। तथा जात्याद्यभावान्न ब्रह्मणि शब्दप्रवृत्तिरिति शेषः। कथं तर्हि क्वचिद्विधिमुखेन ब्रह्मोपदिश्यते तत्राह। अध्यारोपितेति। वीप्सया व्याप्तिः सर्वविषयसंग्रहस्तदर्थं। विषयत्वेन प्रा-
प्तं सर्वं न ब्रह्मेत्युक्ते सति अविषयः प्रत्यगात्मा ब्रह्मेत्येकत्वे शास्त्रपर्यवसानान्निराकांक्षं श्रोतुः सिध्यतीत्याह। तथा चेति। इतिशब्दस्य प्रकृतपरामर्शित्वात्प्रकृतमूर्तादिद्वयगोचरत्वे
नकारद्वयपर्यवसानं किमिति नेष्यते तत्राह। अन्यथेति। अजातशत्रुणा उक्तस्यैव ब्रह्म ज्ञपयिष्यामीत्युक्तवाक्यमपरिसमाप्तार्थं स्यात्। नहीति प्रतिज्ञोपादानं। यस्मादित्यस्य-
हि शब्दार्थस्य तस्मादित्यनेन संबंधः॥ संबंधाभिदित्सया हेतुं कीर्तयति। आत्मन्येवेति। किमित्यात्मतत्त्वमेव ज्ञातव्यं तत्राह। तदेवेति। आम्नायाः संख्याताः विषयीकर्तुमायेप्रका

एवंप्रकारः

णैतेन कारद्वयस्य विषयासंनो निर्देष्टव्यं न इति नेत्येन स्मादित्यनेन भागेनेति योजना। इति भ्यां व्याप्तस्य सर्वप्रकारसंग्रहहेत्वंतमाह। यथेति। ग्रामो ग्रामो रमणीय इत्युक्तेरात्मनि विषुरम
णीयसर्वग्रामसंग्रहवत्प्रवृत्तेपीतिशब्दाभ्यां विषयभूतसर्वप्रकारसंग्रहेन काराभ्यां तन्निषेधसिद्धिरित्यर्थः। इत्थं सूचितस्य विद्याविषयस्य वाक्यस्य व्याख्यानमेव विषयस्तत्र वि
द्यासाधनं मुक्तिसाध्या इति संबंधः। मुक्तिश्च फलमेव। तदात्मानमेवावेदित्यादिना दर्शितमित्याह। इत्युपन्यस्तस्येति। अविद्यायाश्चेति। अमोऽसावित्याद्यारभ्याऽविद्याया विषय
श्च संसार उपसंहृतः यथा मन्यादिनेति संबंधः। संसारे विशिनष्टि। चातुर्वर्ण्येति। चातुर्वर्ण्यं चातुराश्रम्यमिति प्रविभागादिनिमित्तं यस्य पांक्तस्य कर्मणः न स्य साध्यसाधनमित्येव सा·

इति आभ्यां शब्दाभ्यां व्याप्यंते·

तापत्तेन पीकरबंधं कृत्वा किंपुनरेवं निर्देष्टुं ब्रह्म। वाढं कस्मात् न हि यस्मादिति नेति नेत्यस्मादितीति व्याप्तव्यप्रकारेण नकारद्वयविषयाणि नि
र्दिश्यंते। यथा ग्रामो ग्रामो रमणीय इत्यन्यतरानिर्देशानंतात्तस्मादयमेव निर्देशो ब्रह्मणः। यदुक्तं तस्योपनिषत् सत्यस्य सत्यमित्येवं प्र
कारणात्सत्यस्य सत्यं तत्परं ब्रह्मेत्यतो प्रकृतं तु कं नामधेयं ब्रह्मणो नामैव नामधेयं किं तत्सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यमिति
॥ २० ॥ चतुर्थस्य तृतीयं ब्राह्मणम् ॥ ॥ आत्मेत्येवोपासीत। तदेतत् स्मिन् सर्वस्मिन् पदनीयमात्मतत्त्वं यस्मात् प्रेयः पुत्रादेरित्युपन्यस्तस्य
व्याख्यानविषये संबंधप्रयोजने अभिहिते। तदात्मानमेवावेदहं ब्रह्मास्मीति। तस्मात्तत्सर्वमभवदित्येवं प्रत्यगात्मब्रह्मविद्याया वि·
षय इत्येतदुपन्यस्तं। अविद्यायाश्च विषयो न्योसावन्योहमस्मीति न स वेदेत्यारभ्य चातुर्वर्ण्य प्रविभागादिनिमित्तपांक्तकर्मसाध्यसाधन
लक्षणो बीजांकुरवद्व्याकृताव्याकृतस्वभावो नामरूपकर्मात्मकः संसारस्त्रयं वा इदं नाम रूपं कर्मेत्युपसंहृतः। शास्त्रीय उत्कर्षलक्षणो
ब्रह्मलोकान्तः। अधोभावश्च स्थावरान्तोऽशास्त्रीयः पूर्वमेव प्रदर्शितः। द्वया हेत्यादिना। एतस्मादविद्याविषयाद्विरक्तस्य प्रत्यगात्मविष

संसारवर्णनाभावे कथं नाम स्यात्

यब्रह्मविद्यायामधिकारः कथं नाम स्यादिति तृतीये ध्याय उपसंहृतः समस्तो विद्याविषयः। चतुर्थे तु ब्रह्मविद्याविषयं प्रत्यगात्मा·
नं ब्रह्म ते ब्रवाणि ब्रह्म ज्ञपयिष्यामीति च प्रकृतं तद्ब्रह्मैकमद्वयं सर्वविशेषशून्यं क्रियाकारकफलस्वभावसत्यवाच्याऽशेषभूत

एवं ब्रह्मस्वरूपोत्तरब्राह्मणेनात्ययेम
हृः अत्याहेति

धर्मप्रतिषेधद्वारेण नेति नेतीति ज्ञापितं। अस्यां ब्रह्मविद्यायामंगत्वेन संन्यासो विधित्सितः। जायात्पुत्रवित्तादिलक्षणं पांक्तं क
र्माविद्याविषयं यस्मात्तन्नात्मप्राप्तिसाधनं। अन्यसाधनं ह्यन्यस्मै फलसाधनाय प्रयुज्यमानं प्रतिकूलं भवति न हि क्षुत्पिपासानि
वृत्त्यर्थं धावनं गमनं वा साधनं। मनुष्यलोकपितृलोकदेवलोकसाधनत्वेन हि पुत्रादिसाधनानि श्रुतानि नात्मप्राप्तिसाधनत्वेन वि·

त्मकः। तस्यानादित्वं दर्शयति। बीजांकुरवदिति। शास्त्रीय इति। उत्कर्षलक्षणो हि संसारः शास्त्रीयज्ञानकर्मलभ्यः द्वितीयं कथयति। अधोभावश्चेति। निकृष्टः संसारः स्वाभाविकज्ञान·
कर्मसाध्य इत्यर्थः। स च संसारो द्विधा तत्राद्यमाह। किमित्यविद्याविषयो व्याख्यातो न हि स पुरुषस्योपयुज्यते तत्राह। एतस्मादिति। सोयं मनुष्यलोकः पुत्रेणैव जय्यः कर्मणा पि
तृलोको विद्यया देवलोक इति विशेषितत्वं। कर्मणां काम्यत्वेपि ब्रह्मविदस्तानि किं न स्युरित्याशंक्याह। ब्रह्मविदश्चेति। मनुष्यत्रयपक्षं मनुभाष्यकृति विरोधेन दूषयति। केचित्त्विति· ॥

अतः उत्तरब्राह्मणमारभ्यते।

केचित्तु ब्रह्मविदोपि आश्रमसंबंधं वर्णयंति। तथा च ब्रह्मविद्भिरपि आश्रमापत्तुन्नयेष्वाश्रमकर्णाकार्या। कर्मं च अनुष्ठेयं मुक्तिसिद्धये ज्ञानमप्यभ्यसनीयमिति शेषामभिप्रायः। तन्मतं निराक

संसारांतर्गतकाम्य
वस्तुसाधनीभूतः पुत्रादिसाधन
समूहः

शेषितत्वात्। न च ब्रह्मविदो विहितानि काम्यत्वश्रवणादेतावान्वै काम इति। ब्रह्मविदश्चाप्तकामत्वादाप्तकामस्य कामानुपपत्तेः। येषां नोऽयमात्मायं लोक इति च श्रुतेः केचित्तु ब्रह्मविदोप्याश्रमसंबंधं वर्णयंति। तैर्बृहदारण्यकेन श्रुतं पुत्राद्येषणानामविद्याविषयत्वं विद्याविषये च येषां नोऽयमात्मायं लोक इत्यतः किं प्रजया करिष्याम इत्येवं विभागस्तैर्न श्रुतः। श्रुत्या कृतः सर्वक्रियाकारकफलोपमर्दस्वरूपायां च विद्यायां सहकार्यत्वाऽ विद्यायाः अनुष्ठानलक्षणायाश्च विरोधस्तैर्न विज्ञात। व्यासवाक्यं च न श्रुतं कर्मविद्यास्वरूपयोर्विद्याऽविद्यात्मकयोः प्रतिकूलवर्त्तनं विरोधः यदिदं वेदवचनं कुरु कर्म त्यजेति च कां गतिं विद्यया यांति कां च गच्छंति कर्मणा। एतद्वै श्रोतुमिच्छामि तद्भवान्प्रब्रवीतु मे॥ एतावन्योन्यवैरूप्ये वर्त्तेते प्रतिकूलत इत्येवं पुत्रस्य प्रतिवचनेन कर्मणा बध्यते जंतुर्विद्यया तु विमुच्यते॥ तस्मात्कर्म न कुर्वंति यतयः पारदर्शिन इत्येवमादिना विरोधः प्रदर्शितः। तस्मात्साधनांतररहिता ब्रह्मविद्या पुरुषार्थसाधनं। सर्वविरोधात्तु साधननिरपेक्षैव पुरुषार्थसाधनमिति पारिव्राज्यं सर्वसाधनसंन्यासलक्षणमंगत्वेन विधित्स्यते। एतावदेवामृतत्वसाधनमित्यवधारणात्। ब्रह्मसमाप्तौ लिंगाच्च कर्मासन् याज्ञवल्क्यः प्रवव्राजेति। मैत्रेय्ये च कर्मरहितायै साधनत्वेनामृतत्वस्य ब्रह्मविद्योपदेशात्। वित्तनिंदावचनाच्च। यदि ह्यमृतत्वसाधनं कर्म स्याद्वित्तसाध्यं पांक्तं कर्मेति तन्निंदावचनमनर्थं स्यात्। यदि तु पारिव्राज्यपि विहितं कर्म ततो गुणान्तत्साधननिंदाकर्माधिकारनिमित्तवर्णाश्रमादिप्रत्ययोपमर्दाच्च। ब्रह्मतं परादात्क्षत्रं तं परादादित्यादिः। नहि ब्रह्मक्षत्राद्यात्मप्रत्ययोपमर्दे ब्राह्मणोऽनेनेदं कर्त्तव्यं क्षत्रियेनेदं कर्त्तव्यमिति विषयाभावादात्मानं लभते विधिः। यस्यैव पुरुषस्योपमर्दितः प्रत्ययो ब्रह्मक्षत्राद्यात्मविषयस्तस्यैव तत्प्रत्ययसंन्यासात्तत्कार्याणां कर्मणां कर्मसाधनानां चार्थप्राप्तश्च संन्यासः। तस्मादात्मज्ञानांगत्वेन संन्यासविधित्सयैवाख्यायिकेयमारभ्यते। मैत्रेयीति होवाच याज्ञवल्क्यः। मैत्रेयीं स्वभार्यामामंत्रितवान् याज्ञवल्क्यो नाम ऋषिः। उद्यास्यन्नूर्ध्वं यास्यन्पारिव्राज्याख्यमाश्रमांतरं वै अरे इति संबोधनमहमस्माज्ज्ञाहं स्थात्स्थानादाश्रमादूर्ध्वं गंतुमिच्छन्नस्मि भवामि अतोहं तेनुमतिं प्रार्थयामि इति तव किं चान्यत् ते तवानया द्वितीयया भार्यया कात्यायन्या अंतं

येषां नः अयं लोकः। ...
अयमात्मेति

कर्मणा बध्यते

निवर्त्यनिवर्त्तकभावः

अत्र श्रुतिं कुरु क
र्मेति वेदवचनं प्रति यत्सत्र
तदपि तैर्न श्रुतं
विरोधप्रदर्शितमित्यनेन अन्वयः
लक्षणा

स्वरूपविषयरूपम्

साधनांतरभावः

तेतिनैर्बृहदारण्यकमित्यादिना। विद्याकामाख्योउपायौ परस्परविरुद्धत्वेव वर्त्तेते। साभिमानत्वनिरभिमानत्वपुरस्कारेण प्रातिकूल्यात्समुच्चयानुपपत्तेः। कर्मापेक्षारहिता केवलब्रह्मविद्या पुरुषार्थ

स वां मधु प्रावोचदृतायन्त्वाष्ट्रं यद्दस्रावपि कक्ष्यं वामिति॥ १७॥ इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत् पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किंचनानावृतं नैनेन किंचनासंवृतम्॥ १८॥
इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचद्रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म

शरीराणि। पुरः पुरस्तात्स ईश्वरः पक्षी लिंगशरीरं भूत्वा पुरः शरीराणि पुरुष आविशदित्यस्यार्थमाचष्टे श्रुतिः। स वा अयं पुरुषः सर्वासु पूर्षु सर्वशरीरेषु पुरिशयः पुरि शेत इति पुरिशयः सन् पुरुष इत्युच्यते नैतेनानेन किंचन किंचिदपि अनावृतं अनाच्छादितं। तथा नैनेन किंचनासंवृतम्। एवं स एव नामरूपात्मनान्तर्बहिर्भावेन कार्यकरणरूपेणाव्यवस्थितः पुरश्चक्रे इत्यादिमन्त्रः संक्षेपतः आत्मैकत्वमाचष्ट इत्यर्थः॥ १८॥ इदं तन्मध्वित्यादि पूर्ववत् रूपंरूपं प्रतिरूपो बभूव। रूपं प्रतिरूपं प्रतिप्रति रूपो रूपान्तरं बभूवेत्यर्थः। प्रतिरूपोऽनुरूपो वा यादृक्संस्थानौ मातापितरौ तत्संस्थानस्तद्रूप एव पुत्रो जायते। न हि चतुष्पदो द्विपाज्जायते द्विपदो वा चतुष्पात्स एव हि परमेश्वरो नामरूपे व्याकुर्वाणो रूपं रूपं प्रतिरूपो बभूव। किमर्थं पुनः प्रतिरूपमागमनं तस्येत्युच्यते। तदस्यात्मनो रूपं प्रतिचक्षणाय प्रतिख्यापनाय यदि हि नामरूपे न व्याक्रियेते तदाऽस्यात्मनो निरूपाधिकं रूपं प्रज्ञानघनाख्यं न प्रतिख्यायेत। यदा पुनः कार्यकरणात्मना नामरूपे व्याकृते भवतस्तदास्य रूपं प्रतिख्यायेत॥ इन्द्रः परमेश्वरो मायाभिः प्रज्ञाभिर्नामरूपभूतकृतमिथ्याभिमानैर्वा न तु परमार्थतः पुरुरूपो बहुरूप ईयते गम्यते एकरूप एव प्रज्ञानघनः सन्नविद्याप्रज्ञाभिः कस्मात्पुनः कारणात् युक्ता रथ इव वाजिनः स्वविषयप्रकाशनाय हि यस्मादस्य हरयो हरणादिन्द्रियाणि। शता शतानि दश च प्राणिभेदबाहुल्याच्छतानि दश च भवन्ति।

तस्मादिन्द्रियविषयवाहुल्यात्तत्प्रकाशनायैव च युक्तानि तानि नात्मप्रकाशनाय । पराञ्चि खानि व्यतृणत्स्वयंभूरिति काठके । तस्मात्तैरेव विषयस्वरूपैरीयते न प्रज्ञानघनैकरसेन स्वरूपेण । तर्ह्यय-
मन्यः परमेश्वरोऽन्ये हरय इत्येवं प्राप्ते उच्यते अयं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च प्राणिभेदस्यानन्त्यात् । किं बहुना तदेतद्ब्रह्म य आत्माऽपूर्वं नास्य कारणं पूर्वं विद्यत इति अपूर्वं
नास्यापरं कार्यं विद्यत इत्यनपरम् । नास्य जात्यन्तरमन्तराले विद्यत इत्यनन्तरम् । अवाह्यं वहिरस्य न विद्यत इत्यवाह्यम् । किं पुनस्तन्निरन्तरं ब्रह्म अयमात्मा कोऽसौ यः प्रत्यगात्मा द्रष्टा श्रोता मन्ता
वोद्धा विज्ञाता सर्वानुभूरित्येतदनुशासनं सर्ववेदान्तोपदेशः । एष सर्ववेदान्तानामुपसंहृतोऽर्थः । एतदमृतमभयं परिसमाप्तश्च शास्त्रार्थः ॥ १९ ॥ चतुर्थाध्यायस्य पंचमं ब्राह्मणं ॥ ॥
अथेदानीं ब्रह्मविद्यार्थस्य मधुकाण्डस्य वंशः स्तुत्यर्थो ब्रह्मविद्यायाः मंत्रश्चायं स्वाध्यायार्थो जपार्थस्तत्र वंश इव वंशो यथा वेणुवंशः पर्वणः पर्वणो हि भिद्यते तद्वदग्रात्प्रभृत्यामूलप्राप्तेर-
यं वंशोऽध्यायचतुष्टयस्याचार्यपरम्पराक्रमो वंश इत्युच्यते । तत्र प्रथमान्तः शिष्यः पंचम्यन्त आचार्यः । परमेष्ठी विराट् ब्रह्मणो हिरण्यगर्भात्ततः परमाचार्यपरम्परा नास्ति । यत्पुनर्ब्रह्म तन्नि-

सर्वानुभूरित्यनुशासनं ॥ १९ ॥ इति पंचमं ब्राह्मणं ॥ ॥ अथ वंशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौ-
ण्डिन्यात्कौण्डिन्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥ आग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चानभिम्लात आनभिम्लातादान-
भिम्लातः आनभिम्लातादानभिम्लातो गौतमाद्गौतमः सैतवप्राचीनयोग्याभ्यां सैतवप्राचीनयोग्यौ पाराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौतमा-
च्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात्पाराशर्यो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥ घृतकौशिकाद्घृतकौशिकः पाराशर्याय-
णात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भा-
रद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्-
गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्य आङ्गिरस आभूतेस्त्वाष्ट्रा-
दाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्रा-
ध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्र-
ह्मणो ब्रह्म स्वयंभु ब्रह्मणे न-
मः ॥ इति षष्ठं ब्राह्मणं ॥ इति च-
तुर्थोऽध्यायः ॥ ॥

त्यं स्वयंभु तस्मै ब्रह्मणे स्वयंभुवे नमः ॥ २ ॥ इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवतः कृतायां बृहदारण्यवृत्तौ चतुर्थोऽध्यायः समा-
प्तः ॥ ४ ॥ जनको ह वैदेह इत्यादि याज्ञवल्कीयं काण्डमारभ्यते । उपपत्तिप्रधानत्वादिति काण्डेन मधुकाण्डेन समानार्थत्वेऽपि सति न पुनरुक्तता । मधुकाण्डं ह्यागमप्रधानं । आग-
मोपपत्तिभ्यामात्मैकत्वप्रकाशनाय प्रवृत्ते शकुनः करतलगतबिल्वमिव दर्शयितुम् । श्रोतव्यो मन्तव्य इति ह्युक्तम् । तस्मादागमार्थस्यैव परीक्षापूर्वकं निर्धारणाय याज्ञवल्कीयं काण्ड-
मुपपत्तिप्रधानमारभते । आख्यायिका तु विज्ञानकृतयोपायविधिपरा वा प्रसिद्धो ह्युपायो विद्वद्भिः शास्त्रेषु च दृष्टो दानम् । दानेन ह्युपनमन्ते प्राणिनः प्रभूतं हि राज्ञो गोसहस्र-
दानं चेह उपलभ्यते तस्मादन्यपरेणापि शास्त्रेणाविद्याप्राप्त्युपायदानप्रदर्शनार्थाख्यायिकारब्धा ॥ अपि च तद्विद्यासंयोगः ते श्वसहवादकरणं विद्याप्राप्त्युपायो न्यायविद्या-

यांदृष्टः।तस्मिन्नध्याये प्राबल्येनप्रदर्श्यते।प्रत्यक्षापवित्तत्संयोगेप्रज्ञाहेतुः।तस्माद्विद्याप्राप्त्युपायप्रदर्शनार्थैवाख्यायिका।जनकोनामहकिलसम्राड्राजाबभूवविदेहानांतत्रभवोऽयंसवैदेहः स च बहुदक्षिणेनयज्ञेनशाखान्तरप्रसिद्धोवाबहुदक्षिणोनामयज्ञोऽश्वमेधोवादक्षिणाबाहुल्याद्बहुदक्षिणइहोच्यतेतेनेजेऽयजत।तत्रतस्मिन्यज्ञेनिमन्त्रितादर्शनकामावाकुरूणांदेशानांपंचालानांचब्राह्मणास्तेषुहिविदुषांबाहुल्यंप्रसिद्धंअभिसमेताअभिसंगताबभूवुः।तत्रमहान्तंविद्वत्समुदायंदृष्ट्वाऽथतस्यहकिलजनकस्ययजमानस्यकोनुखल्वत्रब्रह्मिष्ठइतिविशेषेणज्ञातुमिच्छाविजिज्ञासाबभूव।कथंकः स्विन्नुखल्वेषांब्राह्मणानांअनूचानतमः सर्वइमेऽनूचानाः कः स्विदेषांअतिशयेनानूचानतमइति।सहानूचानतमोविषयोत्पन्नजिज्ञासुः सन्तद्वित्तानोपायार्थंगवांसहस्रंप्रथमवयसामवरुरोधगोष्ठेऽवरोधंकारयामास।किंविशिष्टास्तागावोऽवरुद्धाइत्युच्यते।पलचतुर्भागः पादःसुवर्णस्यदशदशपादाएकैकस्याः गोःशृंगयोराबद्धाबभूवुः।पंचपंचपादाएकैकस्मिन्शृंगे॥१॥ताएवमवरुध्यब्राह्मणांस्तान्होवाच।हेब्राह्मणाभवन्तइत्यामन्त्र्ययोवोयुष्माकंब्रह्मिष्ठः सर्वेयूयंब्रह्माणोऽतिशयेनयुष्माकंब्रह्मिष्ठः सएतागाउदजतांउत्कालयतुस्वगृहंप्रति।तेहब्राह्मणानदधृषुः तेहकिलेवमुक्ताब्राह्मणाः ब्रह्मिष्ठतामात्मनः प्रतिज्ञातुंनदधृषुः नप्रगल्भाः संवृत्ताः।अप्रगल्भभूतेष्वथयाज्ञवल्क्यः स्वमात्मीयमेवब्रह्मचारिणमन्तेवासिनंउवाच।एतागाहेसोम्यउदजउद्गमयास्मद्गृहान्प्रति।हिसामश्रवः सामविधिंहिशृणोत्यतोऽर्थाच्चतुर्वेदोयाज्ञवल्क्यः

जनकोवैदेहोबहुदक्षिणेनयज्ञेनेजेतत्रहकुरुपंचालानांब्राह्मणाअभिसमेताबभूवुस्तस्यहजनकस्यवैदेहस्यविजिज्ञासाबभूवकः स्विदेषांब्राह्मणानामनूचानतमइति सहगवाꣳसहस्रमवरुरोधदशदशपादाएकैकस्याः शृंगयोराबद्धाबभूवुः॥१॥तान्होवाचब्राह्मणाभगवन्तोयोवोब्रह्मिष्ठः सएतागाउदजतामिति।तेहब्राह्मणानदधृषुरथहयाज्ञवल्क्यः स्वमेवब्रह्मचारिणमुवाचैताः सोम्योदजसामश्रवा३इतिताहोदाचकारतेहब्राह्मणाश्चुक्रुधुः कथंनोब्रह्मिष्ठोब्रुवीतेत्यथहजनकस्यवैदेहस्यहोताश्वलोबभूवसहैनंपप्रच्छत्वंनुखलुनोयाज्ञवल्क्यब्रह्मिष्ठोऽसी३इतिसहोवाचनमोवयंब्रह्मिष्ठायकुर्मोगोकामाएववयꣳस्मइतितꣳहततएवप्रष्टुंदध्रेहोताश्वलः॥२॥याज्ञवल्क्येतिहोवाचयदिदꣳसर्वंमृत्युनाप्तꣳसर्वंमृत्युनाभिपन्नंकेनयजमानोमृत्योराप्तिमतिमुच्यतइतिहोत्रर्त्विजाग्निनावाचात्राभ्यामाप्तꣳस

तागाहउदाचकारउत्कालितवानाचार्यगृहंप्रतियाज्ञवल्क्येनब्रह्मिष्ठपणस्वीकरणेनात्मनोब्रह्मिष्ठताप्रतिज्ञातेतितेहचुक्रुधुः क्रुद्धवन्तः ब्राह्मणाः तेषांक्रोधाभिप्रायमाचष्टे।कथंनोऽस्माकमेकैकप्रधानानांब्रह्मिष्ठोऽस्मीतिब्रुवीतेतिअथहैवंक्रुद्धेषुब्राह्मणेषुजनकस्ययजमानस्यहोतर्त्विक्अश्वलोनामबभूवआसीत्।सएवंयाज्ञवल्क्यंब्रह्मिष्ठाभिमानीराजाश्रयत्वाच्चधृष्टोयाज्ञवल्क्यंपप्रच्छपृष्टवान्।कथंयाज्ञवल्क्येतिहोवाचत्वंनुखलुनोयाज्ञवल्क्यब्रह्मिष्ठोऽसीतिप्लुतिर्भर्त्सनार्था।सहोवाचयाज्ञवल्क्योनमस्कुर्मोवयंब्रह्मिष्ठाय।इदानींगोकामाःस्मोवयमिति।तंब्रह्मिष्ठप्रतिज्ञंसन्तंततएवब्रह्मिष्ठपणस्वीकरणात्प्रष्टुंदध्रेधृतवान्मनोहोताश्वलः॥१॥याज्ञवल्क्येतिहोवाच तत्रमधुकाण्डेपाङ्क्तेनकर्मणादर्शनसमुच्चितेनयजमानस्यमृत्योरत्ययोव्याख्यातः उद्गीथप्रकरणेसंक्षेपतस्तस्यैवपरीक्षाविषयोऽयमितितत्कृतदर्शनविशेषार्थोऽयंविशेषआरभ्यते।यदिदंसाधनजातंनरस्यकर्मणाऋत्विगग्न्यादिमृत्युनाकर्मलक्षणेनस्वाभाविकासंगसहितेनाप्तंनकेवलंव्याप्तमभिपन्नंचमृत्युनावशीकृतंच।केनदर्शनलक्षणेनसाधनेनयजमानोमृत्योराप्तिमतीत्यमृत्युगोचरत्वमतिक्रम्यमुच्यते।स्वतन्त्रोमृत्योरवश्योभवतीत्यर्थः।ननूद्गीथएवाभिहितंयेनातिमुच्यतेमुख्यप्राणात्मदर्शनेनेति।बाढम्।उक्तोयोऽनुक्तोविशेषस्तत्रतदर्थोऽयमारम्भइत्यदोषः होत्रर्त्विजाग्निनावाचेत्याहयाज्ञवल्क्यः एतस्यार्थंव्याचष्टे।कः पुनर्होतायेनमृत्युमतिक्रामतीत्युच्यते।वाग्वैयज्ञस्ययजमानस्ययज्ञोवैयजमानइतिश्रुतेः।यज्ञस्ययजमानस्ययावाक्सैवहोताऽधियज्ञेकथंतत्रयाइयंवाग्यज्ञस्ययजमानस्यसोऽयंप्रसिद्धोऽग्निरधिदैवतम्।तदेतदन्नप्रकरणेआख्यातम्।सचाग्निर्होताअग्निर्वैहोतेतिश्रुतेः।तदेतद्यज्ञस्यसाधनद्वयम्होताचर्त्वि

गधियज्ञमध्यात्मंचवागेतदुभयंसाधनद्वयंपरिच्छिन्नंमृत्युनाऽऽप्तंस्वाभाविकाज्ञानासंगप्रयुक्तेनकर्मणामृत्युना।प्रतिक्षणमन्यथात्वमापाद्यमानंवशीकृतम्।तद्येनाधिदैवतरूपेणाग्निना
दृश्यमानेनयजमानस्यमृत्योरतिमुक्तयेभवति।तदेतदाहसमुक्तिः।सहोताग्निःसमुक्तिरग्निस्वरूपदर्शनमेवमुक्तिः।यदैवसाधनद्वयमुक्तिरूपेणापश्यत्तदानीमेवहिस्वाभाविकादासंगान्मृत्योर्वि
मुच्यते।आध्यात्मिकात्परिच्छिन्नरूपादाधिभौतिकाच्च।तस्मात्सहोताग्निरूपेणदृष्टोमुक्तिर्मुक्तिसाधनंयजमानस्यसाऽतिमुक्तिः।यैवचमुक्तिःसातिमुक्तिरितिमुक्तिसाधनमित्यर्थः।साध
नद्वयस्यपरिच्छिन्नस्ययाऽधिदेवतारूपेणापरिच्छिन्नेनाग्निरूपेणायादृष्टिःसातिमुक्तिः।यासौमुक्तिरधिक्रमस्यमृत्योराश्रयभूतानांदर्शपूर्णमासादिकर्मसाधनानांयोपरिणामहेतुःका
लस्तस्मात्कालात्पृथगतिमुक्तिर्वक्तव्येतीदमारभ्यते।क्रियानुष्ठानव्यतिरेकेणापिप्रागूर्ध्वंचक्रियायाःसाधनविपरिणामहेतुत्वेनव्यापारदर्शनात्कालस्यतस्मात्पृथक्कालादति
मुक्तिर्वक्तव्येत्यतआह।यदिदं।सर्वमहोरात्राभ्यामाप्तंसचकालोद्विरूपोहोरात्रादिलक्षणस्तिथ्यादिलक्षणश्चतत्राहोरात्रादिलक्षणात्तावदतिमुक्तिमाह।अहोरात्राभ्यांहिसर्वंजा
यतेवर्द्धतेविनश्यतिच।तथायज्ञसाधनंचयज्ञस्ययजमानस्यचक्षुरध्वर्युश्चादित्यस्वरूपेणपूर्ववद्दृष्टिःसैवाध्यात्माधिभूतपरिच्छेदविषयासङ्गास्पदंमृत्युमतिक्रम्याधिदेव
तात्वस्याग्निभावस्यप्राप्तिर्याफलभूतासाऽतिमुक्तिरित्युच्यते।तस्याश्चातिमुक्तेर्मुक्तिरेवसाधनमितिकृत्वासाऽतिमुक्तिरित्याह।यजमानस्यह्यतिमुक्तिर्वागादीनामग्न्यादिभावइत्यु

र्वमहोरात्राभ्यामभिपन्नंकेनयजमानोऽहोरात्रयोराप्तिमतिमुच्यतइत्यध्वर्युणर्त्विजाचक्षुषादित्येनचक्षुर्वैयज्ञस्याध्वर्युस्तद्यवाग्वैयज्ञस्यहोतातद्योऽयंवाक्सोऽयम
ग्निःसहोतासामुक्तिःसातिमुक्तिः॥ ३ ॥याज्ञवल्क्येतिहोवाचयदिदꣳसर्वमहोरात्रादिदंचक्षुःसोऽसावादित्यःसोऽध्वर्युःसामुक्तिःसातिमुक्तिः॥ ४ ॥याज्ञवल्क्येति
होवाचयदिदꣳसर्वंपूर्वपक्षापरपक्षाभ्यामाप्तꣳसर्वंपूर्वपक्षापरपक्षाभ्यामभिपन्नंकेनयजमानःपूर्वपक्षापरपक्षयोराप्तिमतिमुच्यतइत्युद्गात्रर्त्विजावा
युनाप्राणेनप्राणोवैयज्ञस्योद्गातातद्योऽयंप्राणःसवायुःसउद्गातासामुक्तिःसातिमुक्तिः॥ ५ ॥याज्ञवल्क्येतिहोवाचयदिदमन्तरिक्षमनारम्बणमिवकेनाक्रमेण

द्गीथप्रकरणेव्याख्यातम्।तत्रसामान्येनमुख्यप्राणदर्शनमात्रंमुक्तिसाधनमुक्तम्।तद्विशेषोवागादीनामग्न्यादिदर्शनम्।इहविशेषोवर्ण्यते।मृत्युप्राप्त्यतिमुक्तिस्तुसैवफलभूतायो
द्गीथप्राणेनव्याख्याता।मृत्युमतिक्रान्तोदीप्यतइत्याद्या॥ ३ ॥याज्ञवल्क्येतिहोवाच।स्वाभाविकादज्ञानासंगप्रयुक्तात्कर्मलक्षणान्मृत्योरतिमुक्तिर्व्याख्याता।तस्यकर्मणःसाध
र्ववन्यानियजमानस्यचक्षुरध्वर्युश्चसाधनद्वयमध्यात्माधिभूतपरिच्छेदंहित्वाधिदैवतात्मनादृष्टंयत्सामुक्तिःसोऽध्वर्युरादित्यभावेनदृष्टोमुक्तिःसैवमुक्तिरेवातिमुक्तिरि
तिपूर्ववदादित्यात्मभावमापन्नस्यहिनाहोरात्रेसंभवतः॥ ४ ॥इदानींतिथ्यादिलक्षणादतिमुक्तिरुच्यते।यदिदंसर्वमहोरात्रयोरविशिष्टयोरादित्यःकर्त्तानप्रतिपदादीनां
तिथीनाम्।तासांतुवृद्धिक्षयोपगमनेनप्रतिपत्प्रभृतीनांचन्द्रमाःकर्त्ता।अतस्तदापन्नाःपूर्वपक्षापरपक्षात्ययः।आदित्यापन्नाऽहोरात्रात्ययवत्।तत्रयजमानस्यप्राणोवायुः
सएवोद्गातेत्युद्गीथब्राह्मणेऽवगतंवाचाचह्येवसप्राणेनचोदगायदितिचनिर्धारितम्।अथैतस्यप्राणस्यापःशरीरंज्योतीरूपमसौचन्द्रइतिचप्राणवायुचन्द्रमसामेकत्वाच्चं
द्रमसावायुनाचोपसंहारणकश्चिद्विशेषइत्येवमध्यमानाश्रुतिर्वायुनाधिदैवतरूपेणोपसंहरति।अपिचवायुनिमित्तौहिवृद्धिक्षयौचन्द्रमसः।तेनतिथ्यादिलक्षणस्यका
लस्यकर्त्तुरपिकारयितावायुः।अतोवायुरूपापन्नस्तिथ्यादिकालादतीतोभवतीत्युपपन्नंतरंभवति।तेनश्रुत्यन्तरेचंद्ररूपेणदृष्टिर्मुक्तिरतिमुक्तिश्च।इहतुकारणात्मनासाधनद्व
यस्यतत्कारणरूपेणवाय्वात्मनादृष्टिर्मुक्तिरतिमुक्तिश्चेतिनश्रुत्योर्विरोधः॥ ५ ॥मृत्योःकालादतिमुक्तिर्व्याख्यातायजमानस्यसोऽतिमुच्यमानःकेनावष्टम्भेनपरिच्छेदविषयंमृत्यु

मनीत्य फलं प्राप्नोत्यतिमुच्यत इत्युच्यते। यदिदं प्रसिद्धमंतरिक्षमाकाशोनारम्बणमनालंबनमिवशब्दादस्त्येवतदालंबनंतत्तुनज्ञायत इत्यभिप्रायः। यत्तुतदज्ञायमानमालम्बनंतत्सर्वं नाम्नाकेनेति पृच्छ्यते अन्यथा फलप्राप्त्यसंभवात्। येनावष्टंभेनाक्रमेणयजमानः कर्मफलं प्रतिपद्यमानोऽतिमुच्यते किं तदिति प्रश्नविषयः केनाक्रमेणयजमानः स्वर्गंलोकमाक्रमत इति स्वर्गलोकं फलं प्राप्नोत्यतिमुच्यत इत्यर्थः। ब्रह्मणर्त्विजा मनसा चंद्रेणेत्यस्याक्षरन्यास पूर्ववत्। तत्राध्यात्मं यज्ञस्य यजमानस्य यदिदं प्रसिद्धं मनः सोऽसौ चंद्रोऽधिदैवं मनोऽध्यात्मं चंद्रमाधिदैवतमिति हि प्रसिद्धम्। स एव चंद्रमा ब्रह्मर्त्विक् तेनाधिभूतं ब्रह्मणः परिच्छिन्नं रूपमध्यात्मं च मनस एतद्द्वयमपरिच्छिन्नेन चंद्रमसो रूपेण पश्यति तेन चन्द्रमसा मनसावलम्बनेन कर्मफलं स्वर्गंलोकं प्राप्नोति अतिमुच्यत इत्यभिप्रायः। इतीत्युपसंहारार्थं वचनमित्येवं प्रकारा मृत्योरतिमोक्षाः सर्वाणि हि दर्शनप्रकाराणि यज्ञांगविषयाण्यस्मिन्नवसर उक्तानीति कृत्वोपसंहार इत्यतिमोक्षाः। एवं प्रकारा अतिमोक्षा इत्यर्थः। अथ सम्पदः। अथाधुना सम्पद उच्यंते। सम्पन्नाम केनचित्सामान्येनाग्निहोत्रादीनां कर्मणां फलवतां तत्फलाय तस्मादनं मम्पत्फलस्यैव वा सर्वोत्साहेन फलसाधनानुष्ठाने प्रयततां केनचिद्वैगुण्येनासंभवः। तदिदानीं आहिताग्निः सन्यत्किंचित्कर्माग्निहोत्रादीनां यथासंभवमादायालम्बनीकृत्य कर्मफलविद्वान्यां सम्पत्तां यत्कर्मफलकामो भवति तदेव सम्पादयति। अन्यथा राजसूयाश्वमेधनरमेधसर्वमेधलक्षणानामनधिकृ

यजमानः स्वर्गंलोकमाक्रमत इति ब्रह्मणर्त्विजा मनसा चंद्रेण मनो वै यज्ञस्य ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः साऽतिमुक्तिरित्यतिमोक्षा अथ सम्पदः॥ ६॥ याज्ञवल्क्येति होवाच कतिभिरयमद्यर्ग्भिर्होतास्मिन्यज्ञे करिष्यतीति तिसृभिरिति कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीया किं ताभिर्जयतीति यत्किंचेदं प्राणभृदिति॥ ७॥ याज्ञवल्क्येति होवाच कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति तिस्र इति कतमास्तास्तिस्र इति या हुता उज्वलन्ति या हुता अतिनेदन्ते या हुता अधिशेरते किं ताभिर्जयतीति या हुता उज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको या हुता अति

तानां त्रैवर्णिकानामप्यसंभवस्तेषां मत्पाठः स्वाध्यायार्थ एव केवलस्यात् यदि तत्फलप्राप्त्युपायः कश्चन न स्यात्तस्मात्तेषां सम्पदैव तत्फलप्राप्तिस्तस्मात्सम्पदामपि फलवत्त्वमतः सम्पद आरभ्यन्ते॥ ६॥ याज्ञवल्क्येति होवाच अभिमुखीकरणाय कतिभिरयमद्यास्मिन्यज्ञे कतिभिर्ऋग्भिः कतिसंख्याभिर्ऋग्जातिभिरयं होतर्त्विगस्मिन्यज्ञे करिष्यति शस्त्रं शंसत्याहेतरस्तिसृभिर्ऋग्जातिभिरित्युक्तवंतं प्रत्याहेतरः कतमास्तास्तिस्र इति संख्येयविषयोऽयं प्रश्नः। पूर्वस्तु संख्याविषयः पुरोऽनुवाक्या च। प्राक्प्रयोगकालाद्याः प्रयुज्यन्ते ऋचः सा ऋग्जातिः पुरोऽनुवाक्येत्युच्यते। यागार्थं याः प्रयुज्यन्ते ऋचः सा ऋग्जातिर्याज्या। शस्त्रार्थं याः प्रयुज्यन्ते ऋचः सा ऋग्जातिः शस्या सर्वा ऋचः याः काश्चन स्तोत्रिया वा अन्या वा सर्वा एतास्वेव तिसृष्वृग्जातिष्वन्तर्भवन्ति। किं ताभिर्जयतीति यत्किंचेदं प्राणभृदिति। अतश्च संख्यासामान्याद्यत्किंचित्प्राणभृज्जातं तत्सर्वं जयति तत्सर्वं फलजातं सम्पादयति संख्यादिसामान्येन॥ ७॥ याज्ञवल्क्येति होवाचेति पूर्ववत् कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति कत्याहुतिप्रकारास्तिस्र इति। कतमास्तास्तिस्र इति। पूर्ववदितर आह या हुता उज्वलन्ति समिदाज्याहुतयः या हुता अतिनेदन्ते अतीव शब्दं कुर्वन्ति मांसाद्याहुतयः। या हुता अधिशेरते अधि अधोगत्वा भूमेः अधिशेरते पयः सोमाहुतयः। किं ताभिर्जयतीति ताभिरेवं निर्वर्तिताभिराहुतिभिः किं जयतीति या आहुतयो हुता उज्वलन्ति उज्वलनयुक्ता आहुतयो निर्वर्तिताः फलं च देवलोकाख्यमुज्वलमेव तेन सामान्येन यामया एता उज्वलन्त्य आहुतयो निर्वर्त्यमानास्ता एताः साक्षाद्देवलोकस्य कर्मफलस्य रूपं देवलोकाख्यं फलमेव मया निर्वर्त्यत इत्येवं सम्पादयति। या हुता अतिनेदन्ते आहुतयः पितृलोकमेव ताभिर्जयति कुत्सितशब्दकर्तृत्वसामान्येन पितृलोकसंबद्धायां हि संयमिन्यां वैवस्वतेन पात्यमानानां हाहा

ताःस्मसुंचमुंचेतिशब्दो भवति। तयाः स्वानाहुतयस्तेन पितृलोकसामान्यात्पितृलोक एवमयानिर्वर्त्यत इति सम्पादयति। या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयति भूम्युपरिसंबन्धसामान्यादधः इव हि अध एव मनुष्यलोक उपरितनान्साध्यान्लोकानपेक्ष्याथवाधोगमनमपेक्ष्यातो मनुष्यलोकः एवमयानिर्वर्त्यत इति सम्पादयति पयःसोमाहुतीनिवर्त्तनकाले॥ ८ ॥ याज्ञवल्क्येति होवाचेति पूर्ववत्। अयमृत्विग्ब्रह्मा दक्षिणतो ब्रह्मासने स्थित्वा यज्ञं गोपायति। कतिभिर्देवताभिर्गोपायतीति प्रासंगिकमेतद्बहुवचनम्। एकया हि देवतया गोपायत्यसौ एवं ज्ञाते बहुवचनेन प्रश्नो नोपपद्यते स्वयं जानतस्तस्मात्पूर्वयोः कण्डिकयोः प्रश्नप्रतिवचनेषु कतिभिः कतिभिस्तिसृभिस्तिस्र इति प्रसंगं दृष्ट्वेहापि बहुवचनेनैव प्रश्नोपक्रमः क्रियते। अथवा प्रतिवादिव्यामोहार्थं बहुवचनमितरस्त्वाह। एकयेत्येका सा देवता यया दक्षिणतः स्थित्वा ब्रह्मासने यज्ञं गोपायति कतमा सैकेति। मन एवेति मनः सा देवता मनसा हि ब्रह्मा व्याप्रियते ध्यानेनैव तस्य यज्ञस्य मनश्च वाक्च वर्त्तनी तयोरन्यतरां मनसा संस्करोति ब्रह्मेति श्रुत्यन्तरात्तेन मन एव देवता तया मनसा हि गोपायति ब्रह्मा यज्ञम्। तच्च मनो वृत्तिभेदेनानन्तं तदेव शब्दः प्रसिद्धावद्योतकः। प्रसिद्धं मनस आनन्त्यं तदानन्त्याभिमानिनो देवा अनन्ता वै विश्वेदेवाः। सर्वे देवा यत्रैकं भवन्तीति श्रुत्यन्तरात्तेनानन्त्यसामान्यादनन्तमेव स तेन लोकं जयति॥ ९ ॥ याज्ञवल्क्येति होवाचेति पूर्ववत्। कति स्तोत्रियाः स्तोष्यतीत्ययमुद्गाताद्य स्तोत्रिया नाम ऋक्सामसमुदायः कतिपयानामृचाम्। स्तोत्रिया वा शस्या वा याः काश्चनर्चश्च ताः सर्वाः स्तोत्रिया एवेत्याह। ताश्च

नेदन्ते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यध इव हि मनुष्यलोकः॥ ८ ॥ याज्ञवल्क्येति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीत्येकयेति कतमा सैकेति मन एवेत्यनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति॥ ९ ॥ याज्ञवल्क्येति होवाच कत्ययमद्योद्गातास्मिन्यज्ञे स्तोत्रियाः स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोऽनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोऽनुवाक्याऽपानो याज्या व्यानः शस्या किं ताभिर्जयतीति पृथिवीलोकमेव पुरोऽनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया द्युलोकं शस्यया ततो ह होताश्वल उपरराम॥ १० ॥ पंचमे प्रथमं ब्राह्मणम्॥

॥ व्याख्याता पुरोऽनुवाक्या च याज्या च शस्यैव तृतीयेति। तत्र पूर्वमुक्तं यत्किंचेदं प्राणभृत्सर्वं जयतीति तत्केन सामान्येनेत्युच्यते कतमास्तास्तिस्र ऋचो या अध्यात्मं भवन्तीति प्राण एव पुरोऽनुवाक्या। अपशब्दसामान्यादपानो याज्या। आनतर्य्यादपानेन हि प्रत्तं हविर्देवता अश्नन्ति। यागश्च प्रदानम्। व्यानः शस्या अप्राणन्ननपानन्नृचमभिव्याहरतीति श्रुत्यन्तरात्किं ताभिर्जयतीति व्याख्यातम्। तत्र विशेषसम्बन्धसामान्यमनुक्तमिहोच्यते सर्वमन्यद्व्याख्यातम्। लोकसंबंधसामान्येन पृथिवीलोकमेव पुरोऽनुवाक्यया जयत्यन्तरिक्षलोकं याज्यया मध्यत्वसामान्यात् द्युलोकं शस्यया ऊर्ध्वत्वसामान्यात्तो ह तस्मादात्मनः प्रश्ननिर्णयादसौ होताश्वल उपरराम नायमस्मद्गोचर इति॥ १०॥ ॥ इति श्रीमद्बृहदारण्यके पंचमपाठके प्रथमब्राह्मणभाष्यम्॥ ॥ आख्यायिकासंबंधः प्रसिद्ध एव। मृत्योरतिमुक्तिर्व्याख्याता काललक्षणात्कर्मलक्षणाच्च। कः पुनरसौ मृत्युर्यस्मादतिमुक्तिर्व्याख्याता स च स्वाभाविकाज्ञानासंगास्पदोऽध्याधिभूतविषयपरिच्छिन्नो ग्रहातिग्रहलक्षणो मृत्युः। तस्मात्परिच्छिन्नरूपान्मृत्योरतिमुक्तस्य रूपप्रणगन्यादित्यादिरनुक्रान्तप्रकरणो व्याख्यातानि अश्वलप्रश्ने च तत्कृतो विशेषकश्चित्तवै तत्कर्मणां ज्ञानसहितानां फलमेतत्। तस्मात्साध्यसाधनरूपात्संसारान्मोक्षः मोक्षकर्त्तव्य इत्यतो बन्धनरूपस्य मृत्योः स्वरूपमुच्यते॥

वद्धस्य हि मोक्षः कर्त्तव्यः। यदप्यतिमुक्तस्य स्वरूपमुक्तं तत्रापि ग्रहातिग्राहाभ्यामविनिर्मुक्त एव मृत्युरूपाभ्याम्। तथा चोक्तमशनाया मृत्युरेष एव मृत्युरित्यादित्यस्थं पुरुषमङ्गीकृत्याह एको मृत्युर्वहव इति च तदात्मभावापन्नो हि मृत्योराप्निमतिमुच्यत इत्युच्यते। न च तत्र ग्रहातिग्रहौ मृत्युरूपौ नस्तः। अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यः मनश्च ग्रहः। स कामेनातिग्रहेण गृहीत इति वक्ष्यति। प्राणो वै ग्रहः। सोऽपानेनातिग्राहेणेति वाग्वै सनाम्नातिग्राहेणेति च तथाऽन्नविभागे व्याख्यातमस्माभिः सुविचारितं चैतत् यदेव प्रवृत्तिकारणानि तदेव निवृत्तिकारणानि भवन्तीति। केचित्तु सर्वमेव निवृत्तिकारणं मन्यन्ते। अतः कारणात् पूर्वस्मात् पूर्वस्मान्मृत्योर्मुच्यते। उत्तरमुत्तरस्थातिपद्यमानो व्याहृत्यर्थमेव प्रतिपद्यते न तु तादर्थ्यमित्यत आह। द्वैतक्षयात्सर्वं मृत्युर्द्वैतक्षये तु परमार्थतो मृत्योराप्निमतिमुच्यते। अत एवापेक्षिको गौणो मुक्तिरन्तराले सर्वमेतदेव मत्वाहदारापकर्षः। ननु सर्वं कर्त्तव्यं मोक्षस्तस्मात्तत्सर्वमभवदिति श्रुतेः॥ वाढम्। भवत्येतदपि न तु ग्रामकामो यजेत पशुकामो यजेतेत्यादिश्रुतीनां तादर्थ्यं स्यद्यदि ह्यद्वैतार्थत्वमेवासां ग्रामपशुस्वर्गाद्यर्थत्वं नास्तीति ग्रामपशुस्वर्गादयो न गृह्येरन् गृह्यन्ते तु कर्मफलवैचित्र्यविशेषाः। यदि च वैदिकानां कर्मणां तादर्थ्यमेव संसार एव नाभविष्यदथ तादर्थ्येऽप्यनुनिष्पादितपदार्थः स्वभावः संसार इति चेद्यथा च रूपदर्शनार्थ आलोके सर्वोऽपि तत्रस्थः प्रकाश्यत एव न प्रमाणानुपपत्तेः। अद्वैतार्थत्वे वैदिकानां कर्मणां विद्यासहितानामन्यस्यानुनिष्पादितत्वे प्रमाणानुपपत्तिः। न प्रत्यक्षं नानुमानमत एव चनायम उभयमेकेन वाक्येन प्रदर्श्यत इति चेत्कुल्याप्रणयनालोकादिवत् तन्नैवं वाक्यधर्मानुपपत्तेः। न चैकवाक्यगतस्यार्थस्य प्रवृत्तिनिवृत्तिसाधनत्वमवगन्तुं शक्यते। कुल्याप्रणयनालोकादावर्थस्य प्रत्यक्षत्वाददोषः। यदप्युच्यते मन्त्रा अस्मिन्नर्थे दृष्टा इत्ययमेव तु तावदर्थः। प्रमाणमस्यामन्त्रापुनः किमस्मिन्नर्थ आहोस्विदन्यस्मिन्नर्थ इति मृग्यमेतत्। तस्माद्ग्रहातिग्रहलक्षणो मृत्युर्वन्धस्तस्मान्मोक्षो वक्तव्य इत्यत इदमारभ्यते। न च जानीमो विषयसन्धौ विवादान्तरालेऽवस्थानमर्द्धजरतीयं कौशलं। यत्तु मृत्योरतिमुच्यत इत्युक्तं ग्रहातिग्रहावुच्येते तत्त्वार्थसंवन्धात्सर्वोऽयं साध्यसाधनलक्षणो वन्धो ग्रहातिग्रहाविनिर्मोकान्निगडे हि निर्गते निगडितस्य मोक्षाय यत्नः कर्त्तव्यो भवति। तस्मात्तादर्थ्येनारम्भः। अथ हैनमिति हशब्द ऐतिह्यार्थः। अथानन्तरमश्वले उपरते प्रकृतं याज्ञवल्क्यं जरत्कारुगोत्रो जारत्कारवः ऋतभागस्यापत्यमार्त्तभागः पप्रच्छ याज्ञवल्क्येति होवाचेति अभिमुखीकरणाय पूर्ववत्प्रश्नः कति ग्रहाः कत्यतिग्रहा इति। इतिशब्दो वाक्यपरिसमाप्त्यर्थः। तत्र निर्ज्ञातेषु वा ग्रहातिग्रहेषु प्रश्नः स्यादनिर्ज्ञातेषु वा। यदि तावद्ग्रहा अतिग्रहाश्च निर्ज्ञातास्तदा तद्गतस्यापि गुणस्य संख्याया निर्ज्ञातत्वात्कति ग्रहाः कत्यतिग्रहा इति संख्याविषयः प्रश्नो नोपपद्यते। अथानिर्ज्ञातास्तथा संख्येयविषयप्रश्न इति के ग्रहाः कतिग्रहाः इति प्रष्टव्यं न तु कति ग्रहाः कत्यतिग्रहा इति प्रश्नः। अपि च निर्ज्ञातसामान्यके तु विशेषविज्ञानाय प्रश्नो भवति। यथा कतमेऽत्र कठाः

कतमेऽत्र कलापा इति। न चात्र ग्रहातिग्रहा नाम पदार्थाः केचन लोके प्रसिद्धाः येन विशेषार्थः प्रश्नः स्यान्ननु चातिमुच्यत इत्युक्तम्। ग्रहगृहीतस्य हि मोक्षः समुक्तिः सातिमुक्तिरिति हि द्विरुक्तम्। तस्मात्सन्ति ग्रहातिग्रहाश्च। ननु तत्रापि चत्वारो ग्रहा अतिग्रहाश्च। निर्ज्ञाता वाक् चक्षुः प्राणो मनोसि। तत्र कतीति प्रश्नो नोपपद्यते निर्ज्ञातत्वान्नानवधारणार्थत्वात्। नहि चतुष्ट्वं तत्र विवक्षितमिह तु ग्रहातिग्रहदर्शिनोऽष्टत्वगुणविवक्षया कतीति प्रश्न उपपद्यत एव तस्मात्सम्मुक्तिरिति मुक्त्यतिमुक्तौ हि द्विरुक्ते ग्रहातिग्रहा अपि सिद्धाः। अतः कति संख्याका ग्रहाः कति वा अतिग्रहा इति पृच्छति। इतर आह। अष्टौ ग्रहा अष्टावतिग्रहा इति। येतेऽष्टौ ग्रहा अभिहिताः कतमे ते नियमेन ग्रहीतव्या इति तत्राह॥ १॥ प्राणो वै ग्रहः प्राण इति प्राण उच्यते। प्रकरणाद्वायुसहितः सोऽपानेनेति गन्धेनेत्येतदपानसचिवत्वादपानो गंध उच्यते। अपानेन हि गन्धम्। घ्राणेन सर्वो लोको जिघ्रतीति तदेतदुच्यते अपानेन हि गंधानाजिघ्रतीति॥ २॥ वाग्वै ग्रहो वाचा ह्यात्मपरिच्छिन्नया आसंगविषयास्पदया ऽसत्याऽनृताऽसभ्यबीभत्सादिवचनेषु व्यापृतया गृहीतो लोकोऽपहृतः तेन वाक्यग्रहः स नाम्नातिग्राहेण गृहीतः स वागाख्यो ग्रहो नाम्ना वक्तव्येन विषयेनातिग्रहेणाति-

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहा इति अष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे त इति॥ १॥ प्राणो वै ग्रहः सोऽपानेनातिग्रहेण गृहीतोऽपानेन हि गंधं जिघ्रति॥ २॥ वाग्वै ग्रहः स नाम्नातिग्राहेण गृहीतो वाचा हि नामान्यभिवदति॥ ३॥ जिह्वा वै ग्रहः स रसेनातिग्राहेण गृहीतो जिह्वया हि रसान्विजानाति॥ ४॥ चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति॥ ५॥ श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः श्रोत्रेण हि शब्दाञ्छृणोति॥ ६॥ मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान्कामयते॥ ७॥ हस्तौ वै ग्रहः स कर्मणातिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति॥ ८॥ त्वग्वै ग्रहः स स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः॥ ९॥ याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्योरन्नं का स्वित्सा देवता यस्या मृत्युरन्नमित्यग्निर्वै मृत्युः सो

द्वितीयं ब्राह्मणम् २

ग्राहेणेति दैर्घ्यं छान्दसं नाम वक्तव्यार्था हि वाक्। तेन वक्तव्येनार्थेन प्रयुक्ता वाक् तेन वशीकृता तेन न तत्कार्यमकृत्वा नैव तस्या मोक्षः। अतो नाम्नातिग्रहेण गृहीता वागित्युच्यते वक्तव्यासंगेन हि प्रवृत्ता सर्वानर्थैर्युज्यते। समानमन्यदित्येते। त्वक्पर्यन्ता अष्टौ ग्रहाः स्पर्शपर्यन्ताश्च एतेऽष्टावतिग्रहा इति॥ ३॥ ४॥ ५॥ ६॥ ७॥ ८॥ ९॥ उपसंहृतेषु ग्रहातिग्रहेष्वथाह। पुनर्याज्ञवल्क्येति होवाच यदिदं सर्वं मृत्योरन्नं सर्वं जायते विपद्यते च ग्रहातिग्रहलक्षणेन मृत्युना ग्रस्तम्। का स्वित्का नु सा स्या देवता यस्या देवताया मृत्युरप्यन्नं भवेन्मृत्युर्यस्योपसेचनमिति श्रुत्यन्तरात्। अयमभिप्रायः प्रष्टुर्यदि मृत्योर्मृत्युं वक्ष्यत्यनवस्था स्यात्। अथ न वक्ष्यत्यस्माद्ग्रहातिग्रहलक्षणान्मृत्योर्मोक्षो नोपपद्यते। ग्रहातिग्रहमृत्युविनाशे हि मोक्षः स्यात्। स यदि मृत्योरपि मृत्युः स्याद्ग्रहातिग्रहलक्षणस्य मृत्योर्विनाशः। अतो दुर्वचनं प्रश्नं मन्वानः पृच्छति। का स्वित्सा देवतेति। अस्ति तावन्मृत्योर्मृत्युः नन्वेवमनवस्था स्यात्। तस्याप्यन्यो मृत्युरिति नानवस्था सर्वस्य मृत्योर्मृत्य्वन्तरानुपपत्तेः। कथं पुनरवगम्यतेऽस्ति मृत्योर्मृत्युरिति। दृष्टत्वाद्दृश्निस्तावत्सर्वस्य दृष्टो मृत्युः सर्वविनाशकत्वात् सोऽग्निर्भक्ष्यते सोऽग्निरपामन्नम्। प्रहाणात ह्यस्ति मृत्योर्मृत्युरिति। तेन

82

सर्वं ग्रहातिग्रहजातं भक्ष्यते मृत्योर्मृत्युना तस्मिन्बंधनेनाशिते मृत्युना भक्षिते संसारान्मोक्ष उपपन्नो भवति· वंधनं हि ग्रहातिग्रहलक्षणमुक्तम्। तस्मान्मोक्ष उपपद्यत इत्येतत्प्रसाधितं· अतो वंधमोक्षाय पुरुषप्रयासः सफलो भवत्यतोऽपजयति पुनर्मृत्युम्॥ १०॥ येन मृत्युना मृत्यो परमात्मदर्शनेन योऽसौ मुक्तो विद्वान्सोऽयं पुरुषो यत्र यस्मिन्काले म्रियते उदूर्ध्वमस्माद्ब्रह्मविदो म्रियमाणात्प्राणा वागादयो ग्रहाः नामादयोऽतिग्रहा वासनारूपाश्चान्तस्थाः सप्रयोजकाः क्रामन्त्यूर्ध्वं उत्क्रामंति। आहोस्विन्नेति नेतीति होवाच याज्ञवल्क्यो नोत्क्रामन्त्यत्रैवास्मिन्नेव परेणात्मनाविभागं गच्छन्ति विदुषि करणानि स्वयोनौ परब्रह्मसत्त्वे समवनीयन्ते एकीभावेन समवसृज्यन्ते प्रलीयन्त इत्यर्थः। ऊर्मय इव समुद्रे तथा च श्रुत्यन्तरं· कलाशब्दवाच्यानां प्राणानां परस्मिन्नात्मनि प्रलयं दर्शयति· एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्तीति। इति परेणात्मनाऽविभागं गच्छन्तीति दर्शितं न तर्हि मृतो न हि मृतश्चायं यस्मात्स उच्छ्वयत्युच्छूनतां प्रतिपद्यते आ

याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो ३ नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते·॥ ११॥ याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति नामेत्यनन्तं वै नामानन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति·॥ १२ याज्ञवल्क्येति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीꣳ शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्तभागावामेवैतस्य वेदिष्यावो न नावेतत्सजन इति· तौ होत्क्रम्य मन्त्रयांचक्राते तौ ह यदूचतुः कर्म हैव तदूचतुरथ यत्प्रशशꣳसतुः कर्म हैव तत्प्रशशꣳसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम॥ १३॥ ॥इति बृहदारण्यके पंचमप्रपाठके द्वितीयं ब्राह्मणम्॥ ॥२॥

ध्मायति वाह्येन वायुना पूर्यते दृतिवदाध्मातो मृतः शेते निश्चेष्टः। वंधननाशे मुक्तस्य न कुचिद्गमनमिति वाक्यार्थः॥ ११॥ मुक्तस्य किं प्राणा एव समवनीयन्ते आहोस्वित्तत्प्रयोजकमपि सर्वं अथ प्राणा एव न तत्प्रयोजकं सर्वं प्रयोजके विद्यमाने पुनः प्राणानां प्रसंगः। अथ सर्वमेव कामकर्मादि ततो मोक्ष उपपद्यत इत्येवमर्थ उत्तरः प्रश्नः· याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते किमनेन न जहातीति आह तत्र नामेति। सर्वं समवनीयत इत्यर्थः। नाममात्रं तु न लीयते आकृतिसंबंधान्नित्यं हि नाम अनन्तं वै नाम नित्यत्वमेवानन्त्यं नाम्नस्तदानन्त्याधिकृता अनन्ता वै विश्वेदेवा अनंतमेव स तेन लोकं जयति तन्नामानन्त्याधिकृता अनंता वै विश्वेदेवा अनन्तमेव स तेन लोकं जयति तन्नामानन्त्याधिकृतान्विश्वान्देवानात्मत्वेनोपेत्य तेनानन्त्यदर्शनेनानन्तमेव लोकं जयति॥ १२॥ ग्रहातिग्रहरूपं वंधनमुक्तं मृत्युरूपं। तस्य च मृत्योर्मृत्युसद्भावान्मोक्षश्चोपपद्यते। स च मोक्षो ग्रहातिग्रहरूपाणामिहैव प्रलयः प्रदीपनिर्वाणवत्·। यत्तद्ग्रहातिग्रहाख्यं वंधनं मृत्युरूपं तस्य यत्प्रयोजकं यत्तत्स्वरूपनिर्द्धारणार्थमिदमारभ्यते· याज्ञवल्क्येति होवाच·। अत्र केचिद्वर्णयन्ति ग्रहातिग्रहस्य सप्रयोजकस्य विनाशेऽपि किल न मुच्यते न·

मावशिष्टोविषयोपस्थानीययास्वात्मप्रभवयापरमात्मनःपरिछिन्नोभोग्याच्चजगतोव्यावृत्तउच्छिन्नकामकर्मान्तरालेव्यवतिष्ठतेतस्यपरमात्मैकत्वदर्शनेनद्वैतदर्शनमपनेतव्यमिति·
अतःपरंपरमात्मदर्शनमारब्धव्यमित्येवमपवर्गाख्यामंतरालावस्थांपरिकल्प्योत्तरग्रंथसंबंधंकुर्वन्ति।तत्रवक्तव्यंविशीर्णेषुकरणेषुविदेहस्यपरमात्मदर्शनश्रवणमनननिदि
ध्यासनानिकथमिति।समवनीतप्राणस्यहिनाममात्रावशिष्टस्येतितैरुच्यतेमृतःशेतइतिह्युक्तंनमनोरथेनाप्येतदुपपादयितुंशक्यते।अथजीवन्नेवाविद्यामात्रावशिष्टोभोग्या
दपावृत्तइतिपरिकल्प्यतेतत्तर्हिकिंनिमित्तमितिवक्तव्यं।समस्तद्वैतैकत्वात्मप्राप्तिनिमित्तमितियद्युच्यतेतत्पूर्वमेवनिराकृतंकर्मसहितेनद्वैतैकत्वात्मदर्शनेन।सम्पत्त्यावि
द्वान्मृतःसमवनीतप्राणोजगदात्मत्वंहिरण्यगर्भस्वरूपंवाप्राप्नुयाद्यसमवनीतप्राणोभोग्याज्जीवन्नेववाव्यावृत्तोविरक्तःपरमात्मदर्शनाभिमुखःस्यात्।नचाभयमे
कप्रयत्ननिष्पाद्येनसाधनेनलभ्यंहिरण्यगर्भप्राप्तिसाधनंचेन्न।ततोव्यावृत्तिसाधनंपरमात्माभिमुखीकरणस्यभोग्याद्व्यावृत्ते।साधनंचेन्नहिरण्यगर्भप्राप्तिसाध
नस्य।नहियत्कृतिसाधनंतत्कृतिनिवृत्तेरपि।अथमृत्वाहिरण्यगर्भंप्राप्यततःसमवनीतप्राणोनामवशिष्टःपरमात्मज्ञानेऽधिक्रियते।ततोऽस्मदाद्यर्थंपरमात्मज्ञा
नोपदेशोऽनर्थकःस्यात्।सर्वेषांहिब्रह्मविद्यापुरुषार्थायोपदिश्यतेतद्योयोदेवानामित्याद्ययाश्रुत्या।तस्मादत्यन्तनिकृष्टाशास्त्रबाह्यैवेयंकल्पना।प्रकृतंव
र्णयिष्यामः।तत्रकेनप्रयुक्तंग्रहातिग्रहलक्षणंबंधनमित्येतन्निर्दिधारयिषयाह।यत्रास्यपुरुषस्यअसम्यग्दर्शिनःशिरःपाण्यादिमतोमृतस्यवागग्निमप्येति।वा
तंप्राणोऽप्येतिचक्षुरादित्यमप्येति।इतिसर्वत्रसम्बध्यतेमनश्चन्द्रंदिशःश्रोत्रंपृथिवींशरीरमाकाशमात्मेत्यत्रात्माधिष्ठानंहृदयाकाशमुच्यतेसत्राकाशमप्येति
ओषधीरपियंतिलोमानिवनस्पतीनपियंतिकेशाअप्सुलोहितंरेतश्चनिधीयतइति।पुनरादानलिंगंसर्वत्रहिवागादिशब्देनदेवतापरिगृह्यन्तेनतुकरणान्य
वापक्रामंतिप्राङ्मोक्षात्।तत्रदेवताभिरनधिष्ठितानिकरणानिन्यस्तदात्राद्युपमानानिविदेहस्यकर्तापुरुषोऽस्वतंत्रःकिमाश्रितोभवतीतिपृच्छ्यते।क्वायंतदापुरुषोभवतीति
किमाश्रितस्तदापुरुषोभवतीति।यमाश्रयमाश्रित्यपुनःकार्यकरणसंघातमुपादत्तेयेनग्रहातिग्रहलक्षणंबंधनंप्रयुज्यते।तत्किमितिप्रश्नः।अत्रोच्यते।स्वभावयदृ
च्छाकालकर्मदैवविज्ञानमात्रशून्यानिवादिभिःपरिकल्पितानि।अतोऽनेकविप्रतिपत्तिस्थानत्वान्नैवजल्पन्यायेनवस्तुनिर्णयः।अत्रवस्तुनिर्णयंचेदिच्छसिआ
हरसौम्यहस्तमार्त्तभागहेआवामेवैतस्यत्वत्पृष्टस्यवेदितव्यस्ययत्तद्वेदिष्यावोनिरूपयिष्यावः।कस्मान्ननावावयोरेतद्वस्तुसजनेजनसमुदायेनिर्णेतुंनशक्यते
अतएकान्तंगमिष्यावोविचारणाय।तौहेत्यादिश्रुतिवचनं।तौयाज्ञवल्क्यार्त्तभागावेकान्तंगत्वाकिंचक्रतुरित्युच्यते।तौहउत्क्रम्यसजनाद्देशान्मन्त्रयांचक्राते।
आदौलौकिकवादिपक्षाणामेकैकंपरिगृह्यविचारितवन्तौ।तौहविचार्ययदूचतुरपोह्यपूर्वपक्षान्सर्वानेतदूचतुः।कर्महैवाश्रयंपुनःपुनःकार्यकरणोपाद
नहेतुंतत्तत्रोचतुरुक्तवन्तौ।नकेवलंकालकर्मदैवेश्वरेष्वभ्युपगतेषुहेतुषुयत्प्रशशंसतुस्तौकर्महैवतत्प्रशशंसतुः।यस्मान्निर्धारितमेतत्कर्मप्रयुक्तंग्र
हातिग्रहादिकार्यकरणोपादानंपुनःपुनः।तस्मात्पुण्योवैशास्त्रविहितेनपुण्येनकर्मणाभवति।तद्विपरीतेनविपरीतोभवति।पापःपापेनेत्येवंयाज्ञवल्क्येनप्रश्नेषु·

निर्णीतेसुनतोऽशक्यप्रकंम्प्यत्वाद्याज्ञवल्क्यस्यजारत्कारवआर्त्तभागउपरराम॥ १२ ॥इतिश्रीमद्बृहदारण्यकेपंचमेप्रपाठकेद्वितीयंब्राह्मणभा
ष्यं॥ २ ॥अथहैनंभुज्युर्लाह्यायनिःपप्रच्छ।ग्रहातिग्रहलक्षणंबंधनमुक्तं।यस्मात्सप्रयोजकान्मुक्तोमुच्यते।येनवाबद्धःसंसरतिसमृत्युः।तस्मा
च्चमोक्षउपपद्यतेयस्मान्मृत्योर्मृत्युरस्ति।मुक्तस्यचनगतिःक्वचित्।सर्वोत्सादोनाममात्रावशेषःप्रदीपनिर्वाणवदितिचावधृतम्।तत्रसं
सरतांमुच्यमानानांचकार्यकरणानांस्वकारणसंसर्गेसमानेमुक्तानामत्यन्तमेवपुनरनुपादानम्।संसरतांतुपुनःपुनरुपादानंयेन
प्रयुक्तानांभवतितत्कर्मेत्यवधारितंविचारणापूर्वकं।तत्क्षयेचनामावशेषेणसर्वोत्सादोमोक्षस्तच्चपुण्यपापाख्यंकर्म।पुण्योवैपुण्ये
नकर्मणाभवतिपापःपापेनेत्यवधारितत्वात्तत्कृतःसंसारः।तत्रापुण्येनस्थावरजंगमेषुस्वभावदुःखबहुलेषुनरकतिर्यक्प्रेतादि
षुदुःखमनुभवति।पुनःपुनर्जायमानोम्रियमाणश्चेत्येतदाजवर्त्मवत्सर्वलोकप्रसिद्धं।यस्तुशास्त्रीयःपुण्योवैपुण्येनकर्मणाभ
वतितत्रैवादरःक्रियते।इहश्रुत्यापुण्यमेवचकर्मसर्वपुरुषार्थसाधनमितिसर्वश्रुतिस्मृतिवादाः।मोक्षस्यापिपुरुषार्थत्वात्तत्साध्यता
प्राप्ता।यावद्यावत्पुण्योत्कर्षस्तावत्तावत्फलोत्कर्षप्राप्तिः।तस्मादुत्तमेनपुण्योत्कर्षेणमोक्षोभविष्यतीत्याशंकास्यात्।सानिवर्त्तयितव्या
ज्ञानसहितस्यचप्रकृष्टस्यकर्मणएतावतीगतिः।व्याकृतनामरूपास्पदत्वात्कर्मणस्तत्फलस्यच।नत्वकार्येनित्येऽव्याकृतधर्मिण्यना
मरूपात्मकेक्रियाकारकफलस्वभाववर्जितेकर्मणोव्यापारोऽस्ति।यत्रचव्यापारःसंसारएवेत्यस्यार्थस्यप्रदर्शनायब्राह्मणमारभ्यते।यत्तु
केश्चिदुच्यतेविद्यासहितंकर्मनिरभिसंधिविषदध्यादिवत्कार्यान्तरमारभतइति।तन्न।अनारभ्यत्वान्मोक्षस्य।बन्धननाशएवहिमोक्षो
नकार्यभूतः।बंधनंचाविद्येत्यवोचाम।अविद्यायाश्चनकर्मणानाशउपपद्यते।दृष्टविषयत्वाच्चकर्मसामर्थ्यस्य।उत्पत्त्याप्तिविकारसंस्का
राहिकर्मसामर्थ्यस्यविषयउत्पादयितुंविकर्त्तुंसंस्कर्त्तुंचसामर्थ्यंकर्मणोनातोव्यतिरिक्तविषयोऽस्तिकर्मसामर्थ्यस्य।लोकेऽप्रसिद्ध
त्वात्।नचमोक्षएषांपदार्थानामन्यतमोऽविद्यामात्रव्यवहितइत्यवोचाम।बाढं।भवतुकेवलस्यैवकर्मणएवंस्वभावः।अतोविद्यासं
युक्तस्यतुनिरभिसंधेर्भवत्यन्यथास्वभावः।दृष्टंह्यन्यशक्तित्वेननिर्ज्ञातानामपिपदार्थानांविषदध्यादीनांविद्यामंत्रशर्करादिसंयुक्ताना
मन्यविषयेसामर्थ्यम्।तथाकर्मणोऽप्यस्त्वितिचेन्नप्रमाणाभावात्।नत्रहिकर्मणउक्तविषयव्यतिरेकेणविषयान्तरेसामर्थ्यास्ति
त्वेप्रमाणंनप्रत्यक्षंनानुमानंनोपमानंनार्थापत्तिर्नशब्दोऽस्ति।ननुफलान्तराभावेचोदनान्यथानुपपत्तिःप्रमाणमिति।नहिनित्यानांकर्

मणांविश्वजिन्न्यायेनफलंकल्प्यते।नापिश्रुतंफलमस्ति।चोदनेवतानिपरिशेष्यान्मोक्षस्तेषांफलमितिगम्यते।अन्यथाहिपुरुषानप्रवर्त्तेरन्।ननुविश्वजिन्न्यायस्यैवायातोमोक्षस्य
फलस्यकल्पितत्वान्मोक्षेचान्यस्मिन्वाफलेकल्पितेपुरुषानप्रवर्त्तेरन्नितिमोक्षःफलंकल्प्यते।श्रुतार्थापत्त्यायथाविश्वजिति।नन्वेवंसतिकथमुच्यतेविश्वजिन्न्यायेनभव
तीति।फलंकल्प्यतेच।विश्वजिन्न्यायश्चनभवतीतिविप्रतिषिद्धमभिधीयते।मोक्षफलमेवनभवतीतिचेन्न।प्रतिज्ञाहानात्कर्मकार्यान्तरंविषदध्यादिवदारभतइतिहिप्र
तिज्ञातम्।सचेन्मोक्षःकर्मणांकार्यंफलमेवनभवतिसाप्रतिज्ञाहीयेत।कर्मकार्यत्वेचमोक्षस्यस्वर्गादिफलेभ्योविशेषोवक्तव्यः।अथकर्मकार्यंनभवतिनित्यानां
कर्मणांफलंमोक्षइत्यस्यावचनस्यकोऽर्थइतिवक्तव्यम्।नचकार्यफलशब्दभेदमात्रेणविशेषःशक्यःकल्पयितुं।फलंचमोक्षोनित्यैश्चकर्मभिःक्रियते।नित्यानां
कर्मणांफलंनकार्यमितिचेद्योऽर्थोविप्रतिषिद्धोभिधीयतेयथाग्निःशीतइति।विज्ञानवदितिचेद्यथाज्ञानस्यकार्यंमोक्षोज्ञानेनाक्रियमाणोऽप्युच्यते।तद्वत्कर्मका
र्यत्वमितिचेन्न।अज्ञाननिवर्त्तकत्वात्ज्ञानस्य।अज्ञानव्यवधाननिवर्त्तकत्वाज्ज्ञानस्य।मोक्षोज्ञानस्यकार्यमित्युपचर्यते।नतुकर्मणानिवर्त्तयितव्यमज्ञानम्।नचाज्ञा
नव्यतिरेकेणमोक्षस्यव्यवधानान्तरंकल्पयितुंशक्यम्।नित्यत्वान्मोक्षस्यसाधकस्वरूपाव्यतिरेकाच्च।यत्कर्मणानिवर्त्त्येत।अज्ञानमेवनिवर्त्तयतीतिचेन्न।विलक्ष
णत्वात्।अनभिव्यक्तिरज्ञानमभिव्यक्तिलक्षणेनज्ञानेनविरुध्यते।कर्मतुनाज्ञानेनविरुध्यते।तेनज्ञानविलक्षणंकर्म।यद्विज्ञानाभावोयदिसंशयज्ञानंयदिवि
परीतज्ञानंवोच्यतेऽज्ञानमितिसर्वंहितज्ज्ञानेनैवनिवर्त्त्येत।नतुकर्मणान्यतमेनापिविरोधाभावात्।यथादृष्टंकर्मणामज्ञाननिवर्त्तकत्वंकल्प्यमितिचेन्न।ज्ञा
नेनाज्ञाननिवृत्तौगम्यमानायामदृष्टनिवृत्तिकल्पनानुपपत्तेः।यथावघातेनव्रीहीणान्तुषनिवृत्तौगम्यमानायामग्निहोत्रादिनित्यकर्मकार्योऽदृष्टोनकल्प्यतेतु
निवृत्तिः।तद्वदज्ञाननिवृत्तिरपिनित्यकर्मकार्यानकल्प्यते।ज्ञानेनविरुद्धत्वंचासकृत्कर्मणामवोचाम।यदविरुद्धंज्ञानंकर्मभिस्तद्देवलोकप्राप्तिनिमित्तमित्यु
क्तंविद्ययादेवलोकइतिश्रुतेः।किंचान्यकल्प्येचफलेनित्यानांकर्मणांश्रुतानांयत्कर्मभिर्विरुध्यतेऽव्यगुणाकर्मणांकार्यमेवनभवतिकिंतत्कल्प्यताम्।यस्मिन्
कर्मणांसामर्थ्यमेवनदृष्टंकिंवायस्मिन्दृष्टंसामर्थ्यंयच्चकर्मणांफलमविरुद्धंतत्कल्प्यतामितिपुरुषप्रवृत्तिजननायावश्यंचेत्कर्मफलंकल्पयितव्यम्।कर्माविरु
द्धविषयएवश्रुतार्थापत्तेःक्षीणत्वान्नित्योमोक्षःफलंकल्पयितुंनशक्यः।तद्व्यवधानाज्ञाननिवृत्तिर्वा।अविरुद्धत्वाद्दृष्टसामर्थ्यविषयत्वाच्चेतिपरिशेष्यन्याया
न्मोक्षएवकल्पयितव्यइतिचेत्।सर्वेषांहिकर्मणांसर्वंफलं।चान्यदितरकर्मफलव्यतिरेकेणफलंकल्पनायोग्यमस्ति।परिशिष्टश्चमोक्षः।सचेष्टोऽवेदविदांफलं।
तस्मात्सएवकल्पयितव्यइतिचेन्न।कर्मफलव्यक्तीनामानन्त्यात्परिशेषन्यायानुपपत्तेः।नहिपुरुषेच्छाविषयाणांकर्मफलानामेतावत्त्वंनामकेनचिदसर्वज्ञेनावधृ
तंतत्साधनानांवा।पुरुषेच्छानामनियतदेशकालनिमित्तत्वात्पुरुषेच्छाविषयसाधनानांचपुरुषेष्टफलप्रयुक्तत्वात्।प्रतिप्राणिचेच्छावैचित्र्यात्फलानांतत्साध
नानांचानन्त्यसिद्धिस्तदानन्त्याच्चाशक्यमेतावत्त्वंपुरुषैर्ज्ञातुं।अज्ञातेचसाधनफलेतावत्त्वेकथंमोक्षस्यपरिशेषसिद्धिरिति।कर्मफलजातिपरिशेष्यमितिचेत्।सत्यपीच्छावि
षयाणांतत्साधनानांचानन्त्येकर्मफलजातित्वंनामसर्वेषांतुल्यं।मोक्षस्त्वकर्मफलत्वात्परिशिष्टःस्यात्तस्मात्परिशेषात्सएवयुक्तःकल्पयितुमितिचेन्न।तस्यापिनित्यकर्मफलत्वाभ्यु

पगोमेकर्मफलसमानजातीयत्वोपपत्तेपरिशेषानुपपत्तिः। तस्मादन्यथानुपपत्तिस्तस्मात्सैषाश्रुतार्थापत्तिः। उत्पत्त्याप्तिविकारसंस्काराणामन्यतमदपिनित्यानांकर्मणांफलमुपपद्यतइतिसैषाश्रुतार्थापत्तिः चतुर्णामन्यतमएवमोक्षइतिचेन्नतावदुत्पाद्योनित्यत्वात्। अतएवाविकार्योऽसंस्कार्यश्चातएवासाधनद्रव्यकत्वाच्च। साधनात्मकंहिद्रव्यंसंस्क्रियते। यथापात्राज्यादिप्रोक्षणादिना। नचसंस्क्रियमाणःसंस्कारनिर्वर्त्योवायूपादिवत्पारिशेष्यादाप्यःस्यात्प्राप्योऽप्यात्मस्वभावत्वादेकत्वाच्च। इतरैःकर्मभिर्वैलक्षण्यान्नित्यानांकर्मणांतत्फलेनापिविलक्षणेनभवितव्यमितिचेन्न। कर्मत्वसालक्षण्यात्सलक्षणंकस्मात्फलंनभवति। इतरकर्मफलैर्निमित्तवैलक्षण्यादितिचेन्न। सामवत्यादिभिःसमानत्वात्। यथाहिगृहदाहादौनिमित्तेसामवत्यादौष्टिर्यथाभिन्नेजुहोतिस्कन्नेजुहोतीत्येवमादौनैमित्तिकेषुकर्मसुनमोक्षःफलंकल्प्यते। तैश्चाविशेषान्नैमित्तिकत्वेनजीवनादिनिमित्तेचश्रवणात्। तथानित्यानामपिनमोक्षःफलं। आलोकस्यसर्वोरूपदर्शनसाधनत्वेउलूकादयआलोकेनरूपंनपश्यन्तीति। उलूकादिचक्षुषोवैलक्षण्यादितरलोकचक्षुर्भिर्नरसादिविषयत्वंपरिकल्प्यते। रसादिविषयेसामर्थ्यस्यादृष्टत्वात्तद्रसमपिगत्वायद्विषयेदृष्टंसामर्थ्यंतत्रैवकश्चिद्विशेषःकल्पयितव्य। यत्तुतत्रोक्तंविद्यामंत्रशर्करादिसंयुक्तविषदध्यादिवन्नित्यानिकार्यान्तरमारभन्तइति। आरभ्यतांविशिष्टंकार्यम्। तदिष्टत्वादविरोधोनिरभिसंधेःकर्मणोविद्यासंयुक्तस्यविशिष्टकार्यारंभेणकश्चिद्विशेषः। देवयाज्यात्मयाजिनोरात्मयाजिनोविशेषश्रवणाद्देवयाजिनः। श्रेयानात्मयाजीत्यादौयद्देवविद्ययाकरोतीत्यादौच। यत्परमार्थदर्शनविषयेमनुनोक्तआत्मयाजिशब्दःसमंपश्यन्नात्मयाजीत्यत्रसमंपश्यन्नात्मयाजीभवतीत्यर्थः। अथवाभूतपूर्वगत्याआत्मयाज्यात्मसंस्कारार्थंनित्यानिकर्माणिकरोतिइदंमेनेनाङ्गंसंस्क्रियतइतिश्रुतेः। तथागार्भैर्होमैरित्यादिप्रकरणेकार्यकरणसंस्कारार्थत्वंनित्यानांकर्मणांदर्शयति। संस्कृतश्चयआत्मयाजीतैःकर्मभिःसमंद्रष्टुंसमर्थोभवति। समंपश्यन्स्वाराज्यमधिगच्छतीत्ययमर्थः आत्मयाजीशब्दस्तभूतपूर्वगत्याप्रयुज्यते। ज्ञानयुक्तानांनित्यानांकर्मणांज्ञानोत्पत्तिसाधनत्वप्रदर्शनार्थं। किंचान्यत्। ब्रह्माविश्वसृजोधर्मोमहानव्यक्तमेवच। उत्तमांसात्विकीमेतांगतिमाहुर्मनीषिणइतिच॥ देवसार्ष्टिव्यतिरेकेणभूतान्ययंदर्शयति। भूतान्यप्येतियेचवैभूतान्यत्येनीतिपाठंयेकुर्वन्तितेषांचेदविषयेपरिखिन्नबुद्धित्वाद्दोषः। नचार्थवादत्वमध्यायस्यब्रह्मणाकर्मविपाकार्थस्यतद्व्यतिरिक्तार्थज्ञानार्थस्यचकर्मकारणोयनियम्यांतुल्यार्थत्वदर्शनात्। विहिताकरणप्रतिषिद्धकर्मणांचस्थावरश्वशूकरादिफलदर्शनात्वान्तास्यादिप्रेतदर्शनाच्च। नचश्रुतिस्मृतिविहितप्रतिषिद्धव्यतिरेकेणविहितानिवाप्रतिषिद्धानिवाकर्माणिकेनचिदवगन्तुंशक्यन्ते। येषामकरणादनुष्ठानाच्चप्रेतश्वशूकरस्थावरादिकर्मफलानिप्रत्यक्षानुमानाभ्यानाभ्यामुपलभ्यन्ते। नचैषामकर्मफलत्वंकेनचिदभ्युपगम्यते। तस्माद्विहिताकरणप्रतिषिद्धसेवानांयथैतेकर्मविपाकाःप्रेततिर्यक्स्थावरादयस्तथोत्कृष्टेष्वपिब्रह्मान्तेषुकर्मविपाकत्वंविहितम्। तस्मात्सआत्मनोवपामुदखिदत्सोऽरोदीद्यदरोदीदित्यादिवन्नाभूतार्थवादत्वम्। तत्राप्यभूतार्थवादत्वमाभूदितिचेद्भवत्वेवं। नचैतावतास्यन्यायस्यबाधोभवति। नचास्मत्पक्षोवादुष्यति। नचब्रह्माविश्वसृजइत्यादीनांकाम्यकर्मफलत्वंशक्यंवक्तुंतेषांदेवसार्ष्टितायाःफलस्योक्तत्वात्। तस्मात्साभिसंधीनांनित्यानांकर्मणांसर्वमेधाश्वमेधादीनांचब्रह्मत्वादीनिफलानि। येषांपुनर्नित्यानिनिरभिसंधीन्यात्मसंस्कारार्थानिक्रियन्तेतेषांज्ञानोत्पत्त्यर्थानितानिब्राह्मीयंक्रियतेतनुरित्यादिस्मरणात्तेषामारादुपकारकत्वान्मोक्षसाधनान्यपिकर्माणिभवन्तीतिनविरुध्यते। यथाचायमर्थःप्रष्टजनकाख्यायिकासमाप्तावक्ष्यामः। यत्तुविषदध्यादिवदित्युक्तम्। तत्रप्रत्यक्षानुमानविषयत्वादविरोधः। यत्त्वत्यन्तशब्दगम्योऽर्थस्तत्रवाक्यस्याभावेतदर्थप्रतिपादकस्यनशक्यंकल्पयितुंविषदध्यादिसाधर्म्यम्। नचप्रमाणान्तरविरुद्धार्थविषयेश्रुतेःप्रामाण्यंकल्प्यते। यथाशीतोऽग्निःक्लेदयतीतिश्रुतेनुतादर्थ्येवाक्यस्यप्रमाणान्तरस्याभासत्वम्। यथाखद्योतोऽग्निरितितलमलिनमन्तरिक्षमितिबालानांप्रत्यक्षसमर्पितविषयप्रमाणान्तरस्यातथार्थत्वेनिश्चितेनिश्चितार्थमपिबालप्रत्यक्षमाभासीभवति।

तस्माद्वेदप्रामाण्यस्याव्यभिचारात् नादृष्टेर्थे सति वाक्यस्य तथात्वं स्यात् तत्तु पुरुषमतिकौशलं। नहि पुरुषमतिकौशलात् सविता रूपं न प्रकाशयति। तथा वेदवाक्यान्यपि नान्यार्थानि भवंति। तस्मान्मोक्षार्थानि कर्माणीति सिद्धम्। अत्र कर्मफलानां संसारत्वप्रदर्शनायैव ब्राह्मणमारभ्यते। अथानंतरमुपरते जारत्कारवे भुज्युरिति नामतो लह्यस्यापत्यं लाह्यस्तदपत्यं लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच। आदावुक्तमश्वमेधदर्शनम्। समस्तव्यस्तिफलश्चाश्वमेधक्रतुज्ञानसमुच्चितो वा केवलज्ञानसम्पादितो वा सर्वकर्मणां परा काष्ठा। ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोरिति हि स्मरंति। तेन हि समष्टिं व्यष्टीश्च प्राप्नोति। तत्र व्यष्टयो निर्ज्ञाता आरण्यान्तरविषया अश्वमेधयागफलभूताः। समष्टिरस्यात्मा भवत्येतासां देवतानामेको भवतीत्युक्तं। सतु अशनायालक्षणोव आत्मा समष्टिः प्रथमजो वायुः सूत्रं सत्यं हिरण्यगर्भः। तस्य व्याकृतो विषयो यदात्मकं सर्वं द्वैतैकत्वं यः सर्वभूतांतरात्मा लिंगममूर्त्तरसो यदाश्रितानि सर्वभूतकर्माणि यः कर्मणां कर्मसम्बद्धानां च विज्ञानानां परा गतिः परं फलं।

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेषु चरकाः पर्यव्रजाम ते पतञ्चलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गंधर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्सुधन्वाऽऽङ्गिरस इति तं यदा लोकानामन्तानपृच्छामाथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन्स त्वा पृच्छामि याज्ञवल्क्य क्व पारिक्षिता अभवन्निति॥ ॥ १ ॥ ॥

तस्य क्रियानुगोचरः कियती व्याप्तिः सर्वतः परिमण्डलीभूता सा वक्तव्या। तस्यामुक्तायां सर्वः संसारो बंधगोचर उक्तो भवति। तस्य च समष्टिव्यष्ट्यात्मदर्शनस्यालौकिकत्वप्रदर्शनार्थमाख्यायिकामात्मनो वृत्तां प्रकुरुते। तेन प्रतिवादिबुद्धिं व्यामोहयिष्यामीति मन्यते। मद्रेषु मद्रा नाम जनपदास्तेषु चरकाः अध्ययनार्थं व्रतचरणाच्चरकाः अध्वर्यवो वा पर्यव्रजाम पर्यटितवंतस्ते पतंचलस्य ते वयं पर्यटंतः पतंचलस्य नामतः काप्यस्य कपिगोत्रस्य गृहानैम गतवन्तः। तस्यासीद्दुहिता गंधर्वगृहीता गंधर्वेणामानुषेण सत्त्वेन केनचिदाविष्टा। गंधर्वो वा धिष्ण्योऽग्निर्ऋत्विग्देवताविशिष्टविज्ञानत्वादवसीयते। नहि सत्त्वमात्रस्येदृशं विज्ञानमुपपद्यते। तं सर्वे वयं परिवारिताः संतोऽपृच्छाम कोऽसीति कस्त्वमसि किंनामा किंसतत्त्व इति। सोऽब्रवीद्गंधर्वः सुधन्वा नामतः आङ्गिरसो गोत्रतः। तं यदा यस्मिन्काले लोकानामंतान्पर्यवसानान्यपृच्छाम अथैनं गंधर्वमब्रूम भुवनकोशपरिमाणज्ञानाय प्रवृत्तेषु सर्वेष्वात्मानं श्लाघयंतः पृष्टवंतो वयं कथं क्व पारिक्षिता अभवन्निति। स च गंधर्वः सर्वमस्मभ्यमब्रवीत्॥ तेन दिव्येभ्यो मया लब्धं ज्ञानं। तत्तव नास्त्यतो निगृहीतोऽसीत्यभिप्रायः। सोऽहं विद्यासम्पन्नो लब्धागमो गंधर्वात्त्वां पृच्छामि याज्ञवल्क्य। क्व पारिक्षिता अभवन् तत्त्वं किं जानासि। हे याज्ञवल्क्य कथय पृच्छामि। क्व पारिक्षिता अभवन्निति॥ ॥ १ ॥ ॥राम।

85

अहोरात्रेणादित्यस्यरथगत्यायावान्पंथामितस्तावन्देशोद्वात्रिंशद्गुणितस्तत्किरणव्याप्तःसचचंद्ररश्मिव्याप्तेनदेशेनसाकंपृथिवीत्युच्यते।रविचंद्रमसोयावन्मयूखैरवभाष्यते।ससमुद्रसरिच्छैलातावतीपृथिवीस्मृते

सहोवाचयाज्ञवल्क्यःउवाचवैसः।वैशब्दःस्मरणार्थःउवाचवैसगंधर्वस्तुभ्यं।अगच्छन्वैतेपारिक्षिताःतत्रक्वयत्रयस्मिन्नश्वमेधयाजिनोगच्छंतीतिनिर्णीतेप्रश्नआह क्वनुकस्मिन्नश्वमेधयाजिनोगच्छंतीतितेषांगतिंविवक्षयाभुवनकोशपरिमाणमाह।द्वात्रिंशतंवैद्वेअधिकेत्रिंशत्द्वात्रिंशतंवैदेवरथाह्न्यानिदेवआदित्यस्तस्यरथोदेवरथस्तस्यगत्याह्नायावत्परिछिद्यतेदेशपरिमाणं।तद्देवरथाह्न्यंतत्द्वात्रिंशत्गुणितंदेवरथाह्न्यानि।तावत्परिमाणोयंलोकोलोकालोकगिरिणापरिक्षिप्तःयत्रवैराजशरीरंयत्रचकर्मफलोपभोगःप्राणिनां।सएषलोकःएतावान्लोकोतःपरमलोकस्तंह्लोकंसमंतंसमंततोलोकविस्तारात्द्विगुणपरिमाणविस्तारेणपरिमाणेनतंलोकंपरिक्षिप्यपर्येतिपृथिवीतांपृथिवींतथैवद्विस्तावत्द्विगुणेनपरिमाणेनसमुद्रःपर्येति।यंघनोदमाचक्षतेपौराणिकाःतत्राण्डकपालयोर्विवरपरिमाणमुच्यते।येनविवरेणमार्गेणबहिर्निर्गच्छंतोव्याप्नुवंत्यश्वमेधयाजिनस्तत्रयावतीयावत्परिमाणाक्षुरस्यधाराग्रंयावद्वामक्षिकेनयुक्तं

सहोवाचोवाचवैसोऽगच्छन्वैतेतद्यत्राश्वमेधयाजिनोगच्छंतीतिक्वन्वश्वमेधयाजिनोगच्छंतीतिद्वात्रिꣳशतंवैदेवरथाह्न्यान्ययंलोकस्तꣳसमंतंपृथिवीद्विस्तावत्पर्येतिताꣳसमंतंपृथिवींद्विस्तावत्समुद्रःपर्येतितनंतरेणाकाशस्तायावतीक्षुरस्यधारायावद्वामक्षिकायाःपत्रंतावानिंद्रःसुपर्णोभूत्वावायवेप्रायच्छत्तान्वायुरात्मनिधित्वातत्रागमयद्यत्राश्वमेधयाजिनोभवन्नित्येवमिववैसवायुमेवप्रशशꣳसतस्माद्वायुरेवव्यष्टिर्वायुःसमष्टिरपपुनर्मृत्युंजय

मक्षिकायाःपत्रंतावान्तावत्परिमाणोंतरेणमध्येकपालयोराकाशःछिद्रंतेनकाशेनत्येतन्तान्पारिक्षितानश्वमेधयाजिनःप्राप्तान्।इंद्रःपरमेश्वरोयोश्वमेधेग्निश्चितःसुपर्णोयद्विषयंदर्शनमुक्तंतस्यप्राचीदिक्शिरइत्यादिनासुपर्णःपक्षीभूत्वापक्षपुच्छात्मकःसुपर्णोभूत्वावायवेप्रायच्छत्मूर्त्तत्वान्नास्त्यात्मनोगतिःतत्रेति।तान्पारिक्षितान्।वायुरात्मनिधित्वास्थापयित्वास्वात्मभूतान्कृत्वातत्रतस्मिन्अगमयत्।क्वयत्रपूर्वेतिक्रांताःपारिक्षिताःअश्वमेधयाजिनोभवन्निति।एवमिववैएवमेवसगंधर्वोवायुमेवप्रशशंसपारिक्षितानांगतिं।समाप्ताख्यायिकातोपमृत्युस्वेनश्रुतिःरूपेणाचष्टेस्मभ्यं।यस्माद्वायुःस्थावरजंगमानांभूतानामंतरात्माबहिश्चसएवतस्मादध्यात्माधिभूताधिदैवभावेनविविधायाअष्टिर्व्याप्तिःसवायुरेवतथासमष्टिःकेवलेनसूत्रात्मनावायुरेवएवं

तिपित्याह।द्वात्रिंशतमित्यादिना।परमात्मानं--वर्णयति।योश्वमेधइतितनुचित्योग्निरंडाद्बहिरश्वमेधयाजिनोगृहीत्वास्वयमेवगच्छतुकिमितितान्वायवेप्रयच्छतितत्राह।मूर्त्तत्वादिति।आत्मनस्थित्यसाम

तत्रांग्रहाग्रहेशो। पीतोपापं व्रजिनं क्षीयते येन स परीक्षिदश्वमेधस्तद्याजिनः परीक्षिताः तेषां गतिर्वायुमिति संबंधः। वायुप्रशंसायां हेतुमाह। यस्मादिति। संप्रतिप्रात्मनः स्वविषयं दर्शयति। पत्निति। साध्यमिकाना-
मन्येषां चायं विवादः। किंलक्षणो देहादीनामन्यतमस्तेभ्यो विलक्षणो वेति यावत्। इत्येवं विमृश्यात्मनो देहादिभ्यो विवेकेनाधिगमायेदं ब्राह्मणमित्याह। इत्यात्मन इति। विधास्तुत्यर्थो। सुखावबोधार्थं वाख्या

वायुमात्मानं समष्टिव्यष्टिरूपात्मकत्वेनोपगच्छति। य एवं वेद तस्य किं फलमित्याह। अप पुनर्मृत्युं जयति। सकृन्मृत्वा न पुनर्म्रियते ततः आत्मनः प्रश्ननिर्णयाद्भुज्युर्लौ-
ह्यायनिरुपरराम ॥ २५ ॥ ॥ पंचमस्य तृतीयं ब्राह्मणम् ॥ ॥ अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ। पुण्यपापप्रयुक्तैर्ग्रहातिग्रहैर्गृहीतः पुनः पुनर्ग्रहातिग्रहांस्त्यज-
न्नुपाददत्संसरतीत्युक्तं। पुण्यस्य च परउत्कर्षो व्याख्यातो व्याकृतविषयः। समष्टिव्यष्टिरूपः द्वैतैकत्वात्मप्राप्तिः। यस्तु ग्रहातिग्रहैर्ग्रस्तः स संसरति। सोऽस्ति वा ना-
स्त्यस्तित्वे च किंलक्षण इत्यात्मन एव विवेकाधिगमायोषस्तप्रश्न आरभ्यते। तस्य च स्वरूपाधिनिरूपाधिस्वरूपस्य क्रियाकारकविनिर्मुक्तस्वभावस्याधिगमाय थो-
कोद्वंधनाद्विप्रमुक्तेन सप्रयोजनकाख्यायिकासंबंधस्तु प्रसिद्धः। अथ हैनं प्रकृतं याज्ञवल्क्यमुषस्तो नामतश्चक्रस्यापत्यं चाक्रायणः पप्रच्छ यद्ब्रह्म साक्षादव्यवहि-
तं केनचिद्द्वारपरोक्षाद्गौणं न श्रोत्रब्रह्मादिवत्। किं तद्य आत्मा। आत्मशब्देन प्रत्यगात्मोच्यते। तत्रात्मशब्दस्य प्रसिद्धत्वात्। सर्वस्याभ्यंतरः सर्वांतरो यद्यः शब्दाभ्यां

ति य एवं वेद ततो ह भुज्युर्लाह्यायनिरुपरराम ॥ २५ ॥ अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षादपरोक्षा-
द्ब्रह्म य आत्मा सर्वांतरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वांतरः कतमो याज्ञवल्क्य सर्वांतरो यः प्राणेन प्राणिति स त आत्मा सर्वां-
तरो योऽपानेनापानीति स त आत्मा सर्वांतरो यो व्यानेन व्यानिति स त आत्मा सर्वांतरो य उदानेनोदानिति स त आत्मा सर्वांतर एष त आ-
त्मा सर्वांतरः ॥ २६ ॥ ॥

प्रसिद्ध आत्मा ब्रह्मेति तमात्मानं मे मह्यं व्याचक्ष्वेति विस्पष्टं शृंगे गृहीत्वा यथा गां दर्शयति तथाचक्ष्व। सोऽयमित्येवं कथयस्वेत्यर्थः। एवमुक्तः प्रत्याह याज्ञव-
ल्क्यः। एष ते तव चात्मा सर्वांतरः सर्वस्याभ्यंतरः सर्वविशेषणोपलक्षणार्थं सर्वांतरग्रहणं यत्साक्षादव्यवहितमपरोक्षाद्गौणं ब्रह्म बृहत्तममात्मा सर्वस्य स-
र्वस्याभ्यंतर एतैर्गुणैः समस्तैर्युक्तः। एष कोऽसौ तव योऽयं कार्यकरणसंघातस्तव स येनात्मनात्मवान् स एष तव आत्मा तव कार्यकरणसंघातस्येत्यर्थः। तत्रापि
उक्तस्याभ्यंतरे लिंगात्मा करणसंघातस्तृतीयो यश्च संदिह्यमानस्तं पृच्छति कतमो मम आत्मा सर्वांतरस्त्वया विवक्षित इत्युक्त इतर आह। यः प्राणेन मुखनासिका-
संचारिणा प्राणिति प्राणचेष्टां करोति येन प्राणः प्रणीयत इत्यर्थः। स ते तव कार्यकरणसंघातस्यात्मा विज्ञानमयः समानमन्यद्योऽपानेनापानीति छांदसं दैर्घ्यं
सर्वाः कार्यकरणसंघातगताः प्राणनादिचेष्टा दारुयंत्रस्येव येन क्रियंते नहि चेतनावदनधिष्ठितस्य दारुयंत्रस्य प्राणनादिचेष्टा विद्यते। तस्माद्विज्ञानमयेनाधिष्ठितं वि-
लक्षणेन दारुयंत्रवत्प्राणनादिचेष्टां प्रतिपद्यते। तस्मादस्ति का-
र्यकरणसंघातविलक्षणो यश्चेष्टयति ॥ २६ ॥

शिवः

यिका। द्वारव्यवहितमित्युक्ते चक्षुरादिवद्व्यवधानं गौणमिति शंकते। तन्निराकर्तुं यदपरोक्षादित्युक्तं। द्वारद्वारव्यवहितं द्वारेण व्यवहितं स्वरूपं ब्रह्म। तथा च द्रष्टृधीनसिद्धत्वाभावात्त्वतोऽपरोक्षमित्यर्थः। श्रोत्रं
ब्रह्म मनो ब्रह्मेत्यादिवद्यथा गौणं। न तथा द्वारव्यवहितं ब्रह्म अद्वितीयत्वादित्याह। न श्रोत्रेति। सर्वनाम्नोर्यद्यः शब्दयोः प्रत्यग्ब्रह्मविशेष्यं समर्प्यते इति। प्राणेन विशिष्टक्रियते। कथमेतावता सदेहोप-
हृत इत्याशंक्याह विवक्षितमनुमानं वक्तुं व्याप्तिमाह। सर्वा इति। यावत्स्वचेतनप्रवृत्तिः सा चेतनाधिष्ठानपूर्विका यथा रथादिप्रवृत्तिरित्यर्थः। येन क्रियंते सोऽस्तीति संबंधः ॥

प्रश्नप्रतिवचनयोरनुरूपत्वमाशंकते।सहोवाचेति।दृष्टांतमेवस्पष्टयति।असावित्यादिना।प्रत्यक्षंगामश्वंवादर्शयामीतिपूर्वंप्रतिज्ञायपश्चाद्यश्चलत्यसौगौर्योवाधावतिसोऽश्वइतिचलनादिलिंगै
यथागवादिव्यपदिश्यतएवमेवब्रह्मप्रत्यक्षंदर्शयामीतिप्रश्नानुसारेणप्रतिज्ञायप्राणनादिलिंगकंव्यपदिशतस्तेप्रतिज्ञाहानिरनवधेयवचनताचस्यादित्यर्थः।प्रत्युक्तितात्पर्यमाह।यथेति।प्रति
ज्ञानुवर्त्तनमेवाभिनयतितत्रथेति।घटादेरपितर्हिवस्तुस्वाभाव्यान्नास्पष्टविषयीकरणमितिमन्वानःशंकते।किंपुनरिति।दृश्यादिसाक्षित्वंवस्तुस्वाभाव्यंतन्तथाविषमत्वंनचैवंवस्तुभाव्यं

सहोवाचउषस्तश्चाक्रायणोयथाकश्चिदन्यथाप्रतिज्ञायपूर्वंपुनर्विप्रतिपन्नोब्रूयादन्यथाऽसौगौरसावश्वोयश्चलतिधावतीतिवापूर्वंप्रत्यक्षंदर्शयामीतिप्रतिज्ञा
पश्चाच्चलनादिलिंगैर्व्यपदिशत्येवमेवैतद्ब्रह्मप्राणनादिलिंगैर्व्यपदिष्टंभवति।किंबहुनात्यक्त्वागोत्वाद्युपाधिव्याजंयदेवसाक्षादपरोक्षाद्ब्रह्मयआत्मासर्वं
तरस्तंमे।व्याचक्ष्वेतीतरआह।यथामयाप्रथमंप्रतिज्ञातस्तथैवआत्माएवंलक्षणइतितांप्रतिज्ञामनुवर्त्ततएवतत्तथैवयथोक्तंमया।यत्पुनरे
कंतमात्मानंघटादिवद्विषयीकुर्वितितदशक्यत्वान्नक्रियते।कस्मात्पुनस्तदशक्यमित्याह।वस्तुस्वाभाव्यात्।किंपुनस्तद्वस्तुस्वाभाव्यं।दृष्ट्यादिद्र
ष्टृत्वंदृष्टेर्द्रष्टाह्यात्मा।दृष्टिरितिद्विविधाभवतिलौकिकीपारमार्थिकीच।तत्रलौकिकीचक्षुःसंयुक्तान्तःकरणवृत्तिःसाक्रियतइतिजायतेविनश्य
तिच।यात्वात्मनोदृष्टिरग्न्युष्णप्रकाशादिवत्साचद्रष्टुःस्वरूपत्वान्नजायतेनविनश्यतिच।साक्रियमाणायोपाधिभूतयासंसृष्टेवेतिव्यपदिश्यते।

सहोवाचउषस्तश्चाक्रायणोयथाविब्रूयादसौगौरसावश्वइत्येवमेवैतद्व्यपदिष्टंभवतियदेवसाक्षादपरोक्षाद्ब्रह्मयआत्मासर्वान्तर
स्तंमेव्याचक्ष्वेत्येषतआत्मासर्वांतरःकतमोयाज्ञवल्क्यसर्वांतरोनदृष्टेर्द्रष्टारंपश्येर्नश्रुतेःश्रोतारंशृणुयान्नमतेर्मन्तारंमन्वीथाः

द्रष्टेतिभेदवद्द्रष्टादृष्टिरितिच।यासौलौकिकीदृष्टिश्चक्षुर्द्वारारूपोपरक्ताजायमानैवनित्ययात्मदृष्ट्यासंसृष्टेवतत्प्रतिच्छायातयाव्याप्तैवजायतेतथा
विनश्यतिचतेनोपचर्यतेद्रष्टासदापश्यन्नपिपश्यतिनपश्यतिचेति।नतुपुनर्द्रष्टुर्दृष्टेःकदाचिदप्यन्यथात्वं।तथाचवक्ष्यतिध्यायतीवलेलायती
वानहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइतिच।तमिमंमर्थमाह।लौकिक्याःदृष्टेःकर्मभूतायाःद्रष्टारंस्वकीययानित्ययादृष्ट्याव्याप्तारंनपश्येः।यासौलौकि
कीदृष्टिःकर्मभूतासारूपाभिव्यंजिकानात्मानंस्वात्मनोव्याप्तारंप्रत्यंचंव्याप्नोति।तस्मात्तंप्रत्यगात्मानंदृष्टेर्द्रष्टारंनपश्येः।तथाश्रुतेःश्रोतारंनशृ
णुयाः।तथामतेःमनोवृत्तेःकेवलायाःव्याप्तारंनमन्वीथाः॥ ॥तथाविज्ञातेःकेवलायाबुद्धिवृत्तेःव्याप्तारंनविजानीयाःएषवस्तुनःस्वभावोऽतोनैवद
र्शयितुंशक्यतेगवादिवत्।नदृष्टेर्द्रष्टारमित्यत्राक्षराणिअन्यथाव्याचक्षतेकेचित्।दृष्टेर्द्रष्टारंदृष्टेःकर्त्तारंदृष्टिभेदमकृत्वादृष्टिमात्रस्यकर्त्तारंन

घयदेरस्तात्युत्तरमाह।दृष्ट्यादीति।दृष्ट्यादिसाक्षिणोपिदृष्टिविषयत्वंतस्यादित्याशंक्याह।दृष्टिरिति।लौकिकींव्याचष्टे।तत्रेति।पारमार्थिकदृष्टिंव्याकरोति।यथाग्नेर्योलौकिकस्तानप्रकाशोनभवप्र
काशार्कस्तानप्रकाशयति।तथादृष्टिसाक्षीदृष्ट्यानप्रकाश्यतइत्यर्थः।दृष्टेर्द्रष्टानास्तीतिसौगतास्तान्प्रत्याह।दृष्टिरितीति।प्राप्त्वेति।नन्वात्मानित्यदृष्टिस्वभावश्चेत्कथंद्रष्टेत्यादिव्यपदेशाःसिध्य
न्तीत्याह।साक्रियमाणेति।सापेक्षत्वप्रतिहतिनिगमकर्तृत्वंक्रियात्वंचाध्यासिकंनित्यदृग्रूपेव्यवह्रियतइत्यर्थः।आत्मनोनित्यदृष्टिस्वभावत्वेकथंपश्यतिदृष्टिस्तानंचेतिकदाचित्तद्व्यवहार
इत्याशंक्याह।योऽसाविितियावद्विशेषणाल्लौकिकीदृष्टिरसौतत्प्रतिच्छाययाव्याप्ते
वजायतेनश्यतिचतेनोपचर्यते।

नदृष्टेरित्यत्रस्वपक्षमुक्त्वाभर्तृप्रपंचपक्षमाहनदृष्टेरिति। इतिशब्दोव्याचष्टइत्यनेनसंबध्यते· एवंव्याकुर्वतामभिप्रायमाह। दृष्टेरिति। उक्तांपरकीयव्याख्यांदूषयति। नेति। दृष्टिकर्तृत्वविवक्षायांतृजंते नैवतत्सिद्धेःषष्ठीनिरर्थकेत्यर्थः। कथंपुनर्व्याख्यातारोयथोक्तदोषंनपश्यंतितत्राह। पश्यंतांवेति। प्रागुक्तंषष्ठीनैरर्थक्यमाकांक्षाद्वारासमर्थयतेकथमित्यादिना। अर्थवादत्वेनतर्हीदमुपात्तमि त्याशंक्याह· नचेतिविधिविशेषत्वाभावादस्मदुक्तरीत्याचार्थवत्त्वसंभवादित्यर्थः· अथपरपक्षेनिरर्थकमेवेदंपरंप्रमादात्पठितमितिचेन्नेत्याह। नचेति। कथंपुनर्भवतांमतेऽस्यापिदृष्टेः द्विरुपादानमुपपद्यतेतत्राह। यथात्विति प्रदर्शितव्यपदादुपरिष्टात्शतिशब्दोद्रष्टव्यः॥ कर्मकर्तृविशेषणत्वेनसाक्षात्साक्षिसमर्पकत्वेनेतियावत्। तत्समर्पणमपिकुतउपयुज्यतेत

पश्येरिति· दृष्टेरितिकर्मणिषष्ठीस्याद्दृष्टिःक्रियमाणाघटवत्कर्मभवति· द्रष्टारमितितृजंतेनद्रष्टुर्दृष्टिकर्तृत्वश्रुतिमाचष्टे। तेनासौदृष्टेर्द्रष्टादृष्टेःकर्त्तेति व्याख्यातॄणामभिप्रायः। तत्रदृष्टेरितिषष्ठ्यंतेनदृष्टिग्रहणंनिरर्थकमितिदोषंनपश्यंतिपश्यतांवापुनरुक्तमसारः। प्रमादपाठइतिवा[illegible]ः। कथंपुनरा धिक्यंतृजंतेनैवदृष्टिकर्तृत्वस्यसिद्धत्वात्दृष्टेरितिनिरर्थकं। तदाद्रष्टारंनपश्येरित्येतावदेववक्तव्यं। यस्माद्धातोःपरस्तृच्क्रियतेतद्धात्वर्थकर्तरिहितृच् स्मर्यते। गंतारंभेत्तारंवानपश्येतावानेवहिशब्दःप्रयुज्यतेनतुगतेर्गंतारंभिदेर्भेत्तारमित्यस्त्यर्थविशेषप्रयोजकत्वो· नचार्थवादत्वेनहातव्यंसत्यां गतौ। नचप्रमादपाठःसर्वेषामविगानात्· तस्माद्व्याख्यातॄणामेवबुद्धिदौर्बल्यंनाध्येतृप्रमादः। यथात्वस्माभिर्व्याख्यातंलौकिकदृष्टेर्विविच्यनित्यदृ

नविज्ञातेर्विज्ञातारंविजानीयाएषतआत्मासर्वांतरोऽतोन्यदार्त्तंततोहोषस्तश्चाक्रायणउपरराम॥ २॥ चतुर्थंब्राह्मणं॥ ॥

ष्टिविशिष्टआत्माप्रदर्शयितव्यः। तथाकर्मकर्तृविशेषणत्वेनदृष्टिशब्दस्यद्विःप्रयोगउपपद्यते। आत्मस्वरूपनिर्द्धारणाय· नहिद्रष्टुर्दृष्टेरितिचप्रदेशां तरवाक्येनैकवाक्यतोपपन्नाभवति। तथाचक्षुषिपश्यतिश्रोत्रमिदंश्रुतमितिश्रुत्यंतरेणैकवाक्यतोपपन्नान्याय्याचैवमेवह्यात्मनोनित्यत्वमुपपद्यते। विक्रियाभावेविक्रियावत्त्वंनित्यमितिचविप्रतिषिद्धं· ध्यायतीवलेलायतीवनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यते· एषनित्योमहिमाब्राह्मणस्येतिचश्रुत्य क्षराण्यन्यथानगच्छंति। नन्वद्रष्टाश्रोतामंताविज्ञातेत्येवमादीन्यक्षराण्यात्मनोऽविक्रियत्वेनगच्छंतीतिन। यथाप्राप्तलौकिकवाक्यानुवादित्वान्नेषां नात्मतत्त्वनिर्द्धारणार्थानितानि। नदृष्टेर्द्रष्टारमित्येवमादीनामन्यार्थाऽसंभवाद्यथोक्तार्थोपपत्त्यमवगम्यते। तस्मादनवबोधादेवहिविशेषणंपरित्यक्तं दृष्टेरिति· एषतेतवआत्मासर्वैरुक्तैर्विशेषणैर्विशिष्टोऽतएतस्मादात्मनः अन्यदार्त्तंकार्यंवाशारीरंकारणात्मकंवालिंगमेतदेवैकमनार्त्तमविना· शिकूटस्थंततोहोषस्तश्चाक्रायणउपरराम॥ २॥ ॥पंचमस्याऽध्यायस्यचतुर्थंब्राह्मणम्॥ ॥ ॥ ॥

तत्राह। आत्मेति। दृष्ट्यादिसाक्षीआत्मनात्मविषयइतिस्वरूपनिश्चयार्थंसाक्ष्यादिसमर्पणमित्यर्थः। आत्मानित्यदृष्टिस्वभावोनदृष्ट्यादेर्विषयइतिनदृष्टेरित्यादिवाक्यस्यार्थःक्रियतेयत्तदानहि त्यादिनाऽस्यएकवाक्यत्वसिद्धमितितस्माद्यथोक्तार्थत्वमेवनदृष्टेरित्यादिवाक्यस्येत्याह। नहीति। आत्माकूटस्थदृष्टिरित्यत्रनवलकारश्रुतिंसंवादयतितथाचेति। तस्यकूटस्थदृष्टित्वेहेत्वंतरमाह॥ न्यायाच्चेति। तमेवन्यायंविशदयति· एवमेवेति। विपक्षेदोषमाह। विक्रियाश्चेति। इतश्चात्मनोनास्तिविक्रियावत्त्वमित्याह। ध्यायतीवेति। अविक्रियत्वेपि। श्रुत्यक्षराण्यनुपपन्नानीति। शंकतेनन्वि

[illegible]

विनाशि·

८४

देहव्यतिरिक्त। बद्धस्य

ब्राह्मणद्वयार्थसंगतिंवक्तुमनुवदति। बंधनमिति। चतुर्थब्राह्मणार्थंसंक्षिपति। यश्चेति। उत्तरब्राह्मणतात्पर्यमाह। तस्येति। पूर्वपक्षंगृह्णाति। भिन्नाविति। अथैकंवाक्यंवस्तुपरंतस्यार्थवादो
द्वितीयंवाक्यमित्याह। नचेति। द्वयोर्वाक्ययोरैकरूप्यलक्षणत्वेफलितमाह। तस्मादिति। तत्राद्यंवाक्यंक्षेत्रज्ञमधिकरोतिद्वितीयंपरमात्मानमित्यभिप्रेत्याह। क्षेत्रज्ञेति। ब्राह्मणद्वयेनार्थद्वयंविवक्षितं

कर्मव्यतिरिक्त
[illegible]
[illegible]

बंधनंसप्रयोजनमुक्तंयश्चबद्धस्तस्याप्यस्तित्वमधिगतंव्यतिरिक्तत्वंच। तस्येदानींबंधमोक्षसाधनंससंन्यासमात्मज्ञानंवक्तव्यमितिकहोलप्र
श्नआरभ्यते। अथहैनंकहोलोनामतःकुषीतकस्यापत्यंकौषीतकेयःपप्रच्छयाज्ञवल्क्येतिहोवाचेतिपूर्ववत्। यदेवसाक्षादपरोक्षाद्ब्र
ह्मयआत्मासर्वांतरस्तंमेव्याचक्ष्वेति। यंविदित्वाबंधनात्प्रमुच्यतेयाज्ञवल्क्यआहएषतआत्मा। किमुषस्तकहोलाभ्यामेकआत्मा
पृष्टःकिंवाभिन्नावात्मानौतुल्यलक्षणाविति। भिन्नावितियुक्तं। प्रश्नयोःपुनरुक्तत्वोपपत्तेः। यदिह्येकआत्माउषस्तकहोलप्रश्न

अथहैनंकहोलःकौषीतकेयःपप्रच्छयाज्ञवल्क्येतिहोवाचयदेवसाक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरस्तं
मेव्याचक्ष्वेतिएषतआत्मासर्वांतरःकतमोयाज्ञवल्क्यसर्वांतरोयोशनायापिपासेशोकंमोहंजरामृत्युमः
त्येत्यतंवैतमात्मानंविदित्वाब्राह्मणाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभि
क्षाचर्यंचरंतियाह्येवपुत्रैषणायावित्तैषणायावित्तैषणासालोकैषणोभेह्येतेएषणेएवभवत
स्तस्माद्ब्राह्मणःपांडित्यंनिर्विद्यबाल्येनतिष्ठासेद्बाल्यंचपांडित्यंचनिर्विद्याथमुनिरमौनंचमौनंचनि
र्विद्याथब्राह्मणःसब्राह्मणःकेनस्याद्येनस्यात्तेनेदृशएवातोन्यदार्त्तंततोहकहोलःकौषीतकेयउपरराम॥२॥ पंचमंब्राह्मणम्

योर्विवक्षितत्वेचैकेनैवप्रश्नेनाधिगतत्वात्तद्विषयोद्वितीयःप्रश्नोनर्थकःस्यात्। नचार्थवादरूपत्वंवाक्यस्यतस्माद्भिन्नावेतावात्मानौ
क्षेत्रज्ञपरमात्माख्याविति केचिद्व्याचक्षते। तन्नतइतिप्रतिज्ञानादेषतआत्मेतिहिप्रतिवचनेप्रतिज्ञातं। नचैकस्यकार्यकरणसंघा
तस्यद्वावात्मानावुपपद्यतेएकोहिकार्यकरणसंघातएकेनात्मनात्मवान्। नचोषस्तस्यान्यःकहोलस्यान्योजातितोभिन्नआत्मा
भवति। द्वयोर्गौणत्वेसर्वांतरत्वानुपपत्तेः। यद्येकमगौणंवस्तुद्वयोरितरेणावश्यंगौणेनभवितव्यं। तथात्मत्वेसर्वांतरत्वं

र्थभेदैकानुपपत्ति
तन्नाहनचैकस्येति। त
देवोपपादयतिएकोहीति। —२

मितिभर्तृप्रपंचस्थानंप्रत्याह। तन्नेति। प्रश्नप्रतिवचनयोरेकरूपत्वान्नार्थभेदोस्तीत्युक्तमुपपादयति। एषतइति। कार्यकरणसंघातभेदादात्मभेदमाशंक्याह। नचेति। जातितःस्वभा
वतइत्यर्थः अहमहमित्येकाकारस्फुरणादित्यर्थः। इतश्चनतत्वभेदइत्याह। द्वयोरिति। तथात्वंवादि। यदेकस्यात्मत्वादिद्वस्तुतदाइतरस्याप्यनात्मत्वादिकंतःस्यादितिचेन्नत्याह॥ ॥

विरुद्धत्वात् इति। प्रवेशकत्वप्रवेश्यत्वयोरेकत्रासंभवादित्यर्थः। न तथात्मत्वानात्मत्वयोरप्येकत्रासंभवः। तर्हि स एव विशेषो दर्शयितव्यो येन पुनरुक्तिरर्थवती स्यादित्याशंक्याह। यत्त्विति॥ अशनायादिवत्त्वं। किंच सविशेषत्वनिर्विशेषत्वकृतो विषयविभागोऽपि प्रसंगेन संसारित्वस्य मिथ्यात्वं मधुब्राह्मणान्तेऽवोचामेत्याह। विरुद्धश्रुतीति। नामरूपयोः विकारकार्यकरणलक्षणः संघातः स एवोपाधिभेदस्तेन संपर्कस्तस्मिन्नहं ममाध्यासस्तेन जनिता भ्रान्तिरहं कर्त्ता भोक्तेत्याद्या तावन्मात्रं संसारित्वमित्यनेकशो ह्युत्पादितम्। तस्मान्नास्ति वस्तुतो विरुद्धधर्मवत्त्वमित्यर्थः। कथं तर्हि विरुद्धधर्मवत्त्वप्रतीतिरित्याशंक्याह। यथेति। सलिलातिरेकेणान संति फेनादयो विकारा नापि मृद्व्यतिरेकेणान्ये विकाराः शरावादयः संति। इति दृष्टान्तात्स्वयुक्तिबलादविद्यानाम-

व। विरुद्धत्वात्पदार्थानां। यो ह्येकः सर्वान्तरः स आत्मा मुख्य इतरो गौणः सर्वान्तरो प्रश्नान्तरप्रकरणेनात्मनाऽमुख्येनावश्यं भवितव्यं। तस्मादेकस्यैव द्विः श्रवणं विशेषविवक्षया। यत्तु पूर्वोक्तेन समानं द्वितीयप्रश्नान्तर उक्तं। तावन्मात्रं पूर्वस्यैवानुवादस्तस्यैवानुक्तः कश्चिद्विशेषो वक्तव्य इति। कः पुनरसौ विशेष इत्युच्यते। पूर्वस्मिन्प्रश्नेऽस्ति व्यतिरिक्त आत्मा यस्यायं संप्रयोजकाबंध उक्त इति। द्वितीये तु तस्यैवात्मनोऽशनायादिसंसारधर्मातीतत्वं विशेष उच्यते। यद्विशेषपरिज्ञानात्सन्न्याससहितात्पूर्वोक्ताद्बंधनाद्विमुच्यते। तस्मात्प्रश्नप्रतिवचनयोरेष त आत्मेत्येवमंतयोस्तुल्यार्थतैव। ननु कथमेकस्यैवात्मनोऽशनायाद्यतीतत्वं तद्वत्त्वं चेति विरुद्धधर्मसमवायित्वमिति। न परिहृतत्वात्नामरूपविकारकार्यकरणलक्षणसंघातोपाधिभेदसंपर्कजनितभ्रान्तिमात्रं हि संसारित्वमित्यसकृदवोचाम। विरुद्धश्रुतिव्याख्यानप्रसंगेन च यथा रज्जुशुक्तिकागगनादयः सर्परजतमलिना भवन्ति परार्ध्यारोपितधर्मविशिष्टाः स्वतस्तु केवला एव रज्जुशुक्तिकागगनादयः। न चैवं विरुद्धधर्मसमवायित्वे पदार्थानां कश्चन विरोधः। नामरूपोपाध्यस्तित्वे एकमेवाद्वितीयं नेह नानास्ति किंचनेति श्रुतयो विरुध्येरन्निति चेत्। न सलिलफेनदृष्टान्तेन परिहृतत्वात्। मृदादिदृष्टान्तैश्च। यदा तु परमार्थदृष्ट्या परमात्मतत्त्वात् श्रुत्यनुसारिभिरन्यत्वेन निरूप्यमाणे नामरूपे मृदादिविकारवद्वस्त्वन्तरे तत्त्वतो न स्तः। सलिलफेनघटादिविकारवदेव तदा तदपेक्ष्यैकमेवाद्वितीयं नेह नानास्ति किंचनेत्यादिपरमार्थदर्शनगोचरत्वं प्रतिपद्यते। यदा तु स्वाभाविक्याऽविद्यया ब्रह्मस्वरूपं रज्जुशुक्तिकागगनस्वरूपवदेव स्वेन रूपेणावगम्यमानं केनचिदस्पृष्टस्वभावमपि सन्नामरूपकृतकार्यकरणोपाधिभ्यो विवेकेन नावधार्यते नामरूपोपाधिदृष्टिरेव च भवति स्वाभाविकी। तदा सर्वोऽयं वस्त्वन्तरास्तित्वव्यवहारोऽस्ति चायं भेदकृतो मिथ्याव्यवहारः येषां ब्रह्मतत्त्वादन्यत्वेन वस्तु विद्यते येषां च ना-

रूपरचितकार्यकरणसंघातस्याऽविद्यामात्रत्वात्तस्याश्च विद्ययापि निरासान्नैवमिति परिहरति नेत्यादिना। तदा लौकिकव्यवहारश्चेत्तर्हि विवेकिनां नासौ स्यादित्याशंक्याह। अस्ति चेति। भेदभावप्रयुक्तो व्यवहारो विवेकिनां च तुल्य एव। वस्त्वन्तरास्तित्वाभिनिवेशस्त्वविवेकिनां नास्तीति विशेषः। ननु यथाप्रतिभासं स्वतन्त्रं पारमार्थिकमेव किं न स्यात्तत्राह। परमार्थेति। किं द्वितीयं वस्तु तत्त्वतो विद्यते किं वा नास्तीति वस्तुनि निरूप्यमाणे सति श्रुत्यनुसारेण तत्त्वदर्शिभिरेकमेवाद्वितीयं ब्रह्माव्यवहार्यमिति निर्धार्यते तेन व्यवहारदृष्ट्याश्रयणेन भेदकृतो मिथ्याव्यवहारः तत्त्वदृष्ट्याश्रयणेन च तदभावविषयः शास्त्रीयो व्यवहार इत्युभयविधव्यवहारसिद्धिरित्यर्थः। नहि परमार्थेति। तथा चाविद्यावस्थायां शास्त्रीयोऽभेदव्यवहारः तदितरभेदव्यवहारस्त्वाभासमात्र [illegible]

नास्तीतिनयाविरुध्यते   तथा सति ॥

अविद्यावस्थायांलौकिकव्यवहारोपपत्तिर्विद्वद्गोणेति। नचनामेति॥ परेणाज्ञानेनेत्यर्थः॥ स्वतस्त्वाध्यारोपेणविनेत्यर्थः॥ ज्ञानाज्ञानेपुरस्कृत्यव्यवहारःशास्त्रीयोलौकिकश्चेतिनास्माभिरेवोच्यते किंतु। सर्वेषा
मपिपरीक्षकाणामेतन्मतमित्याह। सर्ववादिनामिति। अशनायापिपासयोःसमस्योपादानहेतुमाह। प्राणैकधर्मत्वादिति। संसाराद्विरक्तस्यपारिव्राज्यंवक्तुमुत्तरवाक्यमित्यभिप्रेत्यसंक्षेपतःसंसार
स्वरूपमाह। येतइत्यादिना। तेषामात्मधर्मत्वंव्यावर्त्तयितुंविशिनष्टि। प्राणेति। अरतिवाचीशोकशब्दोनकामविषयइत्याशंक्याह। इष्टमिति। कामबीजत्वमरतेरनुभवेनव्यनक्ति। तेनहीति। काम
स्यशोकोबीजमितिशोकःकामयतयाव्याख्यात। अनित्याशुचिदुःखानात्मस्वनित्यशुचिसुखात्मख्यातिर्विपरीतप्रत्ययः। तस्मात्मनसिप्रभवतिकर्त्तव्याकर्त्तव्यः। विवेकःसम्यग्ज्ञानविरोधात्भ्र

परमार्थसंव्यवहारश्चलौकि
कव्यवहारतोभ्यांकृतः

तलमलाभ्यांसंस्पृष्टमितिगगनसंस्पृष्ट

मूलग्रंथेयोऽशनायापिपासेइ
तिसमास

स्ति। परमार्थवादिभिस्त्वकृत्स्नमारोपणनिरूप्यमाणेवस्तुनि किंतत्वतोस्तिवस्तुनास्तीतिब्रह्मैकमेवाद्वितीयंसर्वसंव्यवहारशून्यमितिनिर्द्धार्यतेतेन
नकश्चिद्विरोधः। नहिपरमार्थावधारणनिष्ठायांवस्त्वंतरास्तित्वंप्रतिपद्यामहे। एकमेवाद्वितीयमनंतरमबाह्यमितिश्रुतेः। नचनामरूपव्यवहार
कालेत्वविवेकिनांक्रियाकालफलादिसंव्यवहारोनास्तीतिप्रतिषिध्यते। तस्माज्ज्ञानाज्ञानेअपेक्ष्यसर्वःसंव्यवहारःशास्त्रीयलौकिकश्च। अ
तोनकाचनविरोधशंका। सर्ववादिनामप्यपरिहार्यःपरमार्थसंव्यवहारकृतोव्यवहारः। तत्रपरमार्थात्मस्वरूपमपेक्ष्यप्रश्नःपुनःकतमोयाज्ञ
वल्क्यसर्वांतरइति। प्रत्याहेतरः। यःअशनायापिपासेअसितुमिच्छाअशनायापातुमिच्छापिपासा॥ तेअशनायापिपासेअसितुमिच्छापि
पासेयोऽत्येतीतिवक्ष्यमाणेनसंबंधः। अविवेकिभिस्तलमलवद्दिवगगनंगम्यमानमेवतलमलेअत्येतीतिपरमार्थतस्ताभ्यामसंसृष्टस्वभावः
त्वात्। तथामूढैरशनायापिपासादिमद्ब्रह्मगम्यमानमपिक्षुधितोहंपिपासितोहमितितेअत्येत्येवपरमार्थतस्ताभ्यामसंसृष्टस्वभावत्वात्
नलिप्यतेलोकदुःखेनबाह्यइतिश्रुतेः। अविद्वल्लोकाध्यारोपितदुःखेनेत्यर्थः। प्राणैकधर्मत्वात्समासकरणंअशनायापिपासयोः। शोकंमोः
हंशोकइतिकामः। इष्टंवस्तूद्दिश्यचिंतयतोयदरमणंतत्तृष्णाभिभूतस्यकामबीजं। तेनहिकामोदीप्यते। मोहस्तुविपरीतप्रत्ययप्रभवोऽवि
वेकोभ्रमः। सचाविद्यासर्वस्यानर्थस्यप्रभवबीजं। भिन्नकार्यत्वात्तयोःशोकमोहयोःसमासकरणं। तौमनोधिकरणौ। तथाशरीराधिकरणौ
जरामृत्यू। जरेतिकार्यकरणसंघातविपरिणामोवलीपलितादिलिंगोमृत्युरितितद्विच्छेदोविपरिणामावसानः। तौजरामृत्युशरीरा
धिकरणावत्येति। एतेह्यशनायादयःप्राणमनःशरीराधिकरणाःप्राणिष्वनवरतंवर्त्तमानाःअहोरात्रादिवत्समुद्रोर्मिवच्चप्राणिषुसंसारइत्यु
च्यते। योसौदृष्टेर्द्रष्टेत्यादिलक्षणःसाक्षादव्यवहितोऽपरोक्षाद्गौणःसर्वांतरआत्माब्रह्मादिस्तंबपर्यंतानांभूतानामशनायापिपासादि
भिःसंसारधर्मैःसदानस्पृश्यतेआकाशइवघनादिमलैः। तमेतंवैआत्मानंस्वंतत्वंविदित्वाज्ञात्वाऽयमहमस्मिपरंब्रह्मसदासर्वसंसारविः

तलमलाभ्यामह

शोकस्यकामबीजत्वात्शो
कइतिकामइत्युक्तं
यदरमणंतदरमणत्तृष्णाभि
भूतस्यतत्तःकामस्यबीजं

मोविपर्युच्यते। तस्याःसर्वानर्थोत्पत्तौनिमित्तत्वंमूलाविद्यायास्तूपादानत्वंतदेतदाह। मोहस्त्विति। शोकःकामस्यहेतुः। मोहोदुःखस्यहेतुरितिभिन्नकार्यत्वं। तद्विच्छेदः। इत्यत्रकार्यकरणसंघातस्तच्छब्दार्थः॥
ब्राह्मणाव्युत्थायभिक्षाचर्यंचरंतीतिसंबंधः। तन्यासविधायकोवायंअधिकारिणःकिमितिब्राह्मणपदंतत्राह। ब्राह्मणानामिति। कर्म्मसाधनस्येति। एतेनलोकेषणायाश्चव्युत्थानमुक्तंवेदितव्यं। हिरण्यगर्भ
विद्याहिरण्यगर्भोपासना। देवलोकप्राप्तिहेतुत्वंब्रह्मविद्यायामपितुल्यमितिचेन्नेत्याह। नहीति। तेषांस्वरसतोविच्छेदशंकांवारयति। प्राणिष्विति। प्रवाहरूपेणानवरतंतत्रदृष्टांतमाह। अहोरात्रादिवदिति।

वपनेत्यदृष्टांत।समुद्रोर्मिवदिति।तेषां हेयत्वं द्योतयति·प्राणीति।येयथोक्ताः प्राणाद्यशनायाद्यः।तेते ध्रुवं संसार इत्युच्यते।इतियोजना।व्युत्थानस्वरूपप्रदर्शनार्थमेवमादपमाह।एतमिति।किमेतावतेत्या
शंक्य व्युत्थानस्वरूपमाह।एतस्मिन्निति।योसौ०स्वं तत्त्वमसाधनफलस्वभावं श्रुतितो विदित्वा०तन्त्रमिति साक्षात्कारार्थं ब्राह्मणाः व्युत्थायैषणाभ्यः भिक्षाचर्यं चरंतीत्यर्थः।व्युत्थाय भिक्षाचर्यं चरंतीति सं
बंधः।श्रुतेस्तदेव व्युत्थानकत्वं प्रश्नपूर्वकं व्युत्पादयति।कथमित्यादिना।साधनैषणायाः फलैषणायामंतर्भावं समर्थयते।सवे इति·साध्यसाधनरूपात्संसाराद्विरक्तस्य कर्मतत्साधनयोरसंभवे साक्षात्कार
मुद्दिश्य फलितं संन्यासं दर्शयति·अत इति।अतिक्रांता ब्राह्मणाः किं प्रजयेत्यादिना प्रकाशितास्तेषां कर्माकर्मसाधनं च यज्ञोपवीतादिना लिंगेति पूर्वेण संबंधः·देवपितृमानुषनिमित्तमिति विशेषणं विश्रा
यनि·तेनहीति·प्राचीनावीतं पितॄणामुपवीतं देवानामित्यादिशब्दार्थः।तर्हि द्विविधः संन्यासः स्मृतिकारैर्निबद्ध इति चेन्नेत्याह।विद्वानिति।प्रत्यक्षश्रुतिविरोधात्स्मार्तसंन्यासो मुख्यो न भवतीत्याह

निर्मुक्तं नित्यतृप्तमिति ब्राह्मणाः।ब्राह्मणानामेवाधिकारो व्युत्थानेऽतो ब्राह्मणग्रहणं व्युत्थायवैपरीत्येनोत्थानं कृत्वा कृत इत्याह।पुत्रैषणायाः
पुत्रार्था एषणा पुत्रैषणा पुत्रेणामुं लोकं जयेयमिति लोकजयसाधनं पुत्रं प्रतीच्छा एषणा दारसंग्रहो दारसंग्रहमकृत्वेत्यर्थः।वित्तैषणायाश्च कर्म
साधनस्य गवादेरुपादानमनेन कर्म कृत्वा पितृलोकं जेष्यामीति विद्यासंयुक्तेन वा देवलोकं केवलया वा हिरण्यगर्भविद्यया दैवेन वित्तेन देव
लोकं।दैवाद्वित्ताद्व्युत्थानमेव नास्तीति केचित् यस्मात्तत्फलेन्नहि किल व्युत्थानमिति।तदसत् एतावान्वै काम इति पठितत्वादेषणामध्ये दै
वस्य वित्तस्य हिरण्यगर्भादिदेवताविषयैव विद्या वित्तमिहोच्यते·देवलोकहेतुत्वात् नहि निरुपाधिकपरब्रह्मविषया ब्रह्मविद्या देवलोकप्रति
पत्तिहेतुः।तस्मात्तत्सर्वमभवदात्मा ह्येषां स भवतीति श्रुतेः।तत्फले नहि व्युत्थानमेतं वै तमात्मानं विदित्वेति विशेषवचनात्·तस्मात्त्रिभ्योप्येतेभ्यो
नात्मलोकप्राप्तिसाधनेभ्यः एषणाविषयेभ्यो व्युत्थाय एषणाकामः।एतावान्वै काम इति श्रुतेः।एतस्मिन्त्रिविधे नात्मलोकप्राप्तिसाधने तृष्णामकृ
त्वेत्यर्थः।सर्वा हि साधनेच्छा फलेच्छैवाऽतावाचष्टे श्रुतिरेकैवैषणेति।कथं या ह्येव पुत्रैषणा सा वित्तैषणा दृष्टफलसाधनत्वतुल्यत्वात्।या वित्तैषणा लोकै
षणा फलार्थैव सा सर्वः फलार्थं प्रयुक्त एव हि सर्वं साधनमंतरेणासंपादयितुं न शक्यत इति साध्यसाधनभेदेनोभे हि यस्मादेते एषणा एव भवतः।तस्मा
द्ब्रह्मविदो नास्ति कर्म कर्मसाधनं वा।अतो येऽतिक्रांता ब्राह्मणाः सर्वं कर्म कर्मसाधनं च सर्वं देवपितृमानुषनिमित्तं यज्ञोपवीतादि।तेन हि दैवं पित्र्यं मानुषं
च कर्म क्रियते निवीतं मनुष्याणामित्यादिश्रुतेः।तस्मात्पूर्वे ब्राह्मणाः ब्रह्मविदो व्युत्थाय कर्मभ्यः कर्मसाधनेभ्यश्च यज्ञोपवीतादिभ्यः परमहंसपारिव्राज्यं
प्रतिपद्य भिक्षाचर्यं चरंति भिक्षार्थं चरणं भिक्षाचर्यं चरंति॥ त्यक्त्वा स्मार्तं लिंगं केवलाश्रममात्रशरणाजीवनसाधनं पारिव्राज्यव्यंजकं विद्वान्लिंग
वर्जितः तस्मादलिंगो धर्मज्ञोऽव्यक्तलिंगोऽव्यक्ताचार इत्यादिस्मृतिभ्यः।अथ परिव्राड्विवर्णवासा मुंडोऽपरिग्रह इत्यादिश्रुतेः॥ सशिखान्केशान्निकृ
त्य विसृज्य यज्ञोपवीतमिति च·ननु व्युत्थायाथ भिक्षाचर्यं चरंतीति वर्तमानापदेशादर्थवादोयं न विधायकः कश्चित्प्रत्ययः श्रूयते लिङ्लोट्

हिरण्यगर्भोपासनात्·

व्युत्थाय भिक्षाचर्यं चरंतीति
संबंधः।

तस्यापि कादन्त्वात्ततोपि व्युत्था
तव्यमिति परिहरति·तदसदिति·

साध्येषणाया साधनैषणान्व
दिवादेः धातोः कर्तरि रूपं कर्तृत्वसर्वं

विद्वान्लिंगः कर्णलग्नस्वकालिं
गोऽव्यक्ताचारः स्मार्तलिंगं त्रिदंड
धारणादि·

एतं वै तमित्यादिवाक्यस्य विधायकत्व
मुपगम्य सर्वकर्मतत्साधनपरित्यागस्त्व
त्वमुक्तमाक्षिपति नन्विति।

अथेति।वित्तेरणेन यतिश्चैवेत्यादिस्मृतेर्न परमहंसपारिव्राज्यमात्रं विवक्षितमित्याशंक्याह।त्यक्त्वा स्मार्तमिति।तस्य दृष्टार्थत्वान्मुमुक्षुमित्याज्यत्वं सूचयति·केवलेति अमुख्यत्वात्तस्य त्याज्यत्वेत्याह·
पारिव्राज्येति·याजनादिसममभिव्याहारादसंन्यासिविषयमेतदित्याशंक्याह।पारिव्राज्यमिताद्विदिति·उभे हि पुत्रैषणा वित्तैषणयो दृष्टफलसाधनत्वेनातस्तुल्यइत्यभेदं कृत्वा ह्याह ह्येवेति·। ।रामरामराम

भिक्षाचरणं·

इत्थं ब्रह्मविद्या देवलोकहेतुत्वाभावं दर्शयत्याह।तत्फलेनेति·तत्फले न ब्रह्मविद्याफलेन·तेभ्यस्त्रिवेषणामकृत्वेत्यर्थः
त्रिदंडधारणादि·त्रिदंडधारणादिवान्·

ब्रह्मचर्यादेवप्रव्रजेदित्यादिविध्युपलंभेपिप्रोक्तवादेनात्मज्ञानविधिवलादेवसंन्यासंसाधयितुंआत्मज्ञानपरत्वंतावदुपनिषदामुपन्यस्यति· अपिचेति· इतश्चास्तिसंन्यासविधिरितियावत्· नवलादेवसंन्यास·
विधिरितिशंक्य· नचात्मज्ञानस्यकर्तव्यत्वेपिकथंकर्मतत्साधनत्यागसिद्धिरतआह· आत्माचेति। अविद्याविषयत्वेपिविद्यावतःएवसाधनादिभविष्यतीतिविद्याविद्ययोरस्मदादिषुसाहित्योपलंभादित्याशंक्याह। नचेति।
तद्विषयत्वादित्यन्तसम्बन्धो विद्याविषयः एवणात्वाच्चयज्ञोपवीतादीनांत्याज्यतेत्याह· तस्मादिति· ज्ञेयत्वेष्यति· विद्याविद्ययोरस्मदादिषुसाहित्योपलंभादित्याशंक्याह· नचेति· ज्ञेयत्वेनप्रस्तुतादितियावत्। साध्य
साधनविषयानद्वात्मिकाःएवणात्याज्या· तत्रहेतुमाह· विलक्षणानिपुरुषार्थरूपात् विपरीतास्वाहेयेत्यर्थः। साध्यसाधनयोरेवणात्वंसाधयति· उभेहीति। तथापियज्ञोपवीतादीनांकर्मणांचकथमेवणात्व
मित्याशंक्यसाधनानर्थवादित्याह· यज्ञोपवीतादेरिति· तयोरेवणात्वंकथंप्रतिज्ञामात्रेणासेत्स्यतीत्याशंक्याह· उभेहीति। तयोरेवणात्वसिद्धंफलितमाह। यज्ञोपवीतादीति। मुमुक्षायेत्यस्यतात्तीविधित्वमा·

स्वाध्यायकालेस्ववाचयु
शयन् २

तथ्यादीनामन्यतमेपितस्यादर्थवादमात्रेणाश्रुतिस्मृतिविहितानांयज्ञोपवीतादीनांनशक्यतेपरित्यागःकारयितुंयज्ञोपवीत्यवाधीयीतयाजयेद्यजेतवा।। परिव्राज्येताव·
द्ध्ययनंविहितंवेदसन्न्यसनाच्छूद्रस्तस्माद्वेदंनसन्न्यसेदितिस्वाध्यायएवोत्सृजमानोवाचमितिचापस्तंवः। ब्रह्मोज्झंवेदनिंदाचकौटसाक्ष्यंसुहृद्वधः। गर्हितान्नाद्य
योर्जग्धिःसुरापानसमानिषडितिवेदपरित्यागेदोषश्रवणात्। उपासनेगुरूणांवृद्धानामतिथीनांहोमेजप्यकर्मणिभोजनआचमनेस्वाध्यायेचयज्ञोपवीती
स्यादिति। परिव्राजकधर्मेषुचगुरूपासनस्वाध्यायभोजनाचमनादीनांकर्मणांश्रुतिस्मृतिषुकर्तव्यतयाचोदितत्वात्गुर्वाद्युपासनांगत्वेनयज्ञो
पवीतस्यविहितत्वात्तत्परित्यागोनैवावगन्तुंशक्यते· यद्यप्येवणाभ्यांव्युत्थानंविधीयतेएवंतथापिपुत्राद्येषणाभ्यांकिमप्येवव्युत्थानंनतुसर्वस्मा
त्कर्मणःकर्मसाधनाच्चव्युत्थानं। सर्वपरित्यागेचाश्रुतंकृतंस्यात्श्रुतंचयज्ञोपवीतादिहापितंस्यात्। तथाचमहानपराधोविहिताकरणप्रतिषि·
द्धाचरणनिमित्तःस्यात्। तस्माद्यज्ञोपवीतादिलिंगपरित्यागोधपरंयदेवनयज्ञोपवीतंवेदांश्चसर्वंतद्वर्जयेद्यतिरितिश्रुतेः अपिचात्मज्ञानपरत्वात्स
र्वस्याउपनिषदःआत्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्यइतिप्रस्तुतंसचात्मैवंसाक्षादपरोक्षात्सर्वान्तरोशनायादिसंसारधर्मवर्जितइत्येवंविज्ञेयइतिसि
द्धं। सर्वाहीयमुपनिषदेवंपरेतिविध्यंतरशेषत्वंतावन्नास्यतोनार्थवादः। आत्मज्ञानस्यकर्तव्यत्वात्। आत्माचाशनायादिधर्मवान्नभवतीतिसा
धनफलविलक्षणोज्ञातव्यः। अतोव्यतिरेकेणात्मनोज्ञानमविद्याः अन्योसावन्योहमस्मीतिनसवेदाथयेन्यथातोविदुरित्यादिवाक्यशतेभ्यः नच
विद्याविद्येएकस्यपुरुषस्यसहभवतोविरोधात्तमःप्रकाशाविव। तस्मादात्मविदोविद्याविषयोधिकारोनदृष्टःक्रियाकारकफलभेदरूप
मृत्योःसमृत्युमाप्नोतीत्यादिनानिंदितत्वात्।। सर्वक्रियासाधनफलानांचाविद्याविषयाणांतद्विपरीतात्मविद्ययाहातव्यत्वेनेष्टत्वात्। यज्ञोपवीतादिसाधना
नांचतद्विषयत्वात्। तस्मादसाधनफलस्वभावादात्मनोन्यविषयाविलक्षणाएषणाउभेह्येतेसाधनफलेएषणेएवभवतोयज्ञोपवीतादेःतत्सा
ध्यकर्मणांचसाधनत्वात्उभेह्येतेएषणेएवेतिहेतुवचनेनावधारणात्यज्ञोपवीतादिसाधनात्तत्साध्येभ्यश्चकर्मभ्योविद्याविषयत्वादेषणारूपत्वाज्जिहासि

नवानिशाकिमाणकोपु
त्यानविविनिम्नाकापनव
यानि यज्ञोपवीतादिना ५

अग्रंभक्ष्यं

भेदेन

१०इहमृत्योःसमृत्युमाप्नोतियइहना
नेवपश्यत्येकधैवानुद्रष्टव्यमेक
मेवाद्वितीयंतत्त्वमसीत्यादिश्रु
तिभ्यः। क्रियाकारकफलंसाधनं
वाऽशनायादिसंसारधर्मातीता
दात्मनोन्यदविद्याविषयंयत्रहि
द्वैतमिवभवत्यन्योसावन्योहम
स्मीतिनसवे १०

त्मज्ञानविधिरेवसंन्यासविधिरित्युक्तत्वादितिशंकतेनन्विति। कंडनंसिद्धांतयति। नेत्यादिना· कृत्वासमादायेत्यर्थः श्रवणंयथाक्तितद्व०भवेत्। मुमुक्षायाविदित्वेतिपाठेक्रममतिकम्यव्याख्यानेभवत्येवायंविधिः
दिषोविधिरितिपरिहरति। नाविधित्वितति। पाठक्रमेपिप्रयोजकज्ञानवतोविरक्तस्यभवत्येवायंविधिरित्यभिप्रेत्याह· नहीति। ज्ञानवतोविरक्तस्यात्मज्ञानविधिसामर्थ्यलब्धस्ययज्ञोपवीतादित्यागस्यक
र्त्तव्यात्मज्ञानेनसमासकर्तृत्वश्रवणादितिशयेनावश्यकत्वमितिरित्युत्तरमाह। नन्विति· हेतुत्वपंचमी१ ।। ।। । ।।रामरामराम।।

व्युत्थानादिवाक्यस्यार्थवादत्वमुक्तमनुभाषयति यस्मादिति। औदुंबरो यूपो भवतीत्यादौ लेडुपरिग्रहेणापि विधिस्वीकारवदत्रापि पंचमलकारेण विधिः सिध्येदित्यर्थवादत्वाशंकेत्यर्थः। संप्रति प्रकृते वाक्ये पारिव्राज्यविधिमंगीकृत्यतत्रसूत्राशंकाके व्युत्थाय भिक्षाचर्यमिति कानीहि विप्रतिपत्तिस्तत्राह। पारिव्राज्येति। लिंगं त्रिदंडत्वादि पुराणे यज्ञोपवीतं विसृज्य पनवमाद्यायाश्रमं प्रविशेत् त्रिदण्डकमण्डलुमानित्याद्याः श्रुतयः स्मृतयश्च एषणा वा यज्ञोपवीतादीनामपि त्याज्यत्वमुक्तमित्याशंक्य श्रुतिस्मृतिवशाद्व्युत्थाने संकोचमभिप्रेत्याह अत इति। उदाहृतश्रुतिस्मृतीनां विषयांतरं दर्शयन्नुत्तरमाह। नेत्यादिना। एककालं चरेद्भैक्ष्यमित्यादिनियमवशाददृष्टसिद्ध्युपवीतादिकमप्याक्षिपतीति चेत्तत्राह। नियमादृष्टस्यापि ब्रह्मविद इति। विविदिषोस्तु तददृष्टमपि नोपवीताद्याक्षेपकं ज्ञानोत्पादकश्रवणाद्युपयोगिदेहस्थित्यर्थत्वेनैव चरितार्थत्वादिति भावः। नहि यथाकथंचिदुपनतेनान्नेन शरीरस्थितिसंभवानर्थक्यमित्युत्तरमाह। न श्रुत्येति। निवृत्त्युपदेशेन वाक्यस्यार्थवत्त्वेपि तदुपदेशस्य नार्थवत्त्वं। कूटस्थात्म

तद्रूपत्वाच्च व्युत्थानं विधित्सितमेव तदुपनिषदात्मज्ञानपरत्वाद्वाक्यस्यात श्रुतिसामर्थ्यान्न विधिः। न विधित्सितविज्ञानेन समानकर्तृत्वश्रवणात्। न ह्यकर्तव्येन कर्तव्यस्य समानकर्तृकत्वेन वेदे कदाचिदपि श्रवणं संभवति। कर्तव्यानामेव ह्यभिषवहोमभक्षणानां यथा श्रवणमभिषुत्य हुत्वा भक्षयंतीति तद्वदात्मज्ञानैषणाव्युत्थानभिक्षाचर्याणां कर्तव्यानामेव समानकर्तृत्वश्रवणं भवेत्। अविद्याविषयत्वादेषणात्वाद्यार्थप्राप्तत्वादात्मज्ञानविधेरेव यज्ञोपवीतादिपरित्यागोनुविधातव्य इति चेत्। न सुतरामात्मज्ञानविधिनैव विहितस्य समानकर्तृत्वश्रवणेन तदर्थोपपत्तिस्तथा भिक्षाचर्यस्य पुनरुक्तवत्त्वमतोपरैतादर्थवादमात्रमिति न औदुम्बरयूपादिविधिसमानत्वाद्दोषः। व्युत्थाय भिक्षाचर्यं चरंतीत्यनेन पारिव्राज्यं विधीयते। पारिव्राज्याश्रमे च यज्ञोपवीतादिसाधनानि विहितानि लिंगं च श्रुतिभिः स्मृतिभिश्च। अतस्तद्वर्जयित्वान्यस्माद्व्युत्थानमेषणात्वेपीति चेत्। न विज्ञानसमानकर्तृकात्पारिव्राज्यादेषणाव्युत्थानलक्षणात्पारिव्राज्यांतरोपपत्तेः। यद्धि तदेषणाभ्यो व्युत्थानलक्षणं पारिव्राज्यं तदात्मज्ञानांगं आत्मज्ञानविरोध्येषणापरित्यागरूपत्वात्। अविद्याविषयत्वाच्चेषणायाः। तद्व्यतिरेकेण चाश्रमरूपं पारिव्राज्यं ब्रह्मलोकादिफलप्राप्तिसाधनं। यद्विषयं यज्ञोपवीतादिसाधनविधानं लिंगविधानं च। न चैषणारूपसाधनोपादानस्याश्रमधर्ममात्रे पारिव्राज्यांतरे विषये संभवति सति सर्वोपनिषद्विहितस्यात्मज्ञानस्य बाधनं युक्तं। यज्ञोपवीतादिविद्याविषयैषणारूपसाधनोपादित्सा याचावश्यमसाधनफलरूपस्याशनायादिसंसारधर्मवर्जितस्याहं ब्रह्मास्मीति विज्ञानं बाधते। न च तद्बाधनं युक्तं सर्वोपनिषदां तदर्थपरत्वात्। भिक्षाचर्यं चरंतीत्येषणां ग्राहयंती श्रुतिः स्वयमेव बाधत इति चेत्। अथाप्येषणाव्युत्थानं विधाय पुनरेषणैकदेशं भिक्षाचर्यं ग्राहयंती तत्संबद्धमन्यदपि ग्राहयतीति चेत्। न भिक्षा

भिक्षाचरणं भिक्षाचर्यं चरंतीति वाक्यस्यार्थ इति शंकते विधानात् व्युत्थानिष्ठत्वं इति भिक्षाचर्यानुवादेन प्राप्तिरूपहादि निवृत्त्यर्थत्वाद्वाक्यस्यानापरमेहं स पारिव्राज्यम्

भिक्षाचर्यं चरंतीत्यायुक्तस्यैव श्रवणात् आत्मज्ञानं बाधते

विधातव्यात्मज्ञानेन सह विधातव्येनात्मस्यैषणाव्युत्थानरूपयज्ञोपवीतादिपरित्यागस्य समानकर्तृकत्वश्रवणेन सुतरां तदर्थोपपत्तिः। ४ स्वपूर्वस्य दूषणस्य दोषः

अनर्थकत्वं

ज्ञानेनैव सर्वनिवृत्तेः सिद्धिरिति शंकते। तथापीति। यदि नैष्क्रियात्मज्ञानादशेषनिवृत्तिः स्यात्तर्हि तदस्माभिरपि स्वीक्रियत इत्यंगीकरोति। यदि स्यादिति। यदि तु क्षुधादिदोषप्राबल्यादात्मानं निष्क्रियमपि विस्मृत्य प्रार्थनादिपरो भवति तदा निवृत्त्युपदेशोपि भवत्यर्थवानिति भावः। भिक्षाचर्यं नाम विहितं विहिताद्व्युत्थानं च यज्ञोपवीतादि विना न संभवतीति श्रुत्यैवात्मज्ञानं यज्ञोपवीतादिविरोधि बाधतमिति शंकते। भिक्षाचर्यमिति। यथा हुत्वा शेषस्य भक्षणं विहितमपि नक्याक्षेपकं परिशिष्टद्रव्योपादानेन प्रवृत्तेः। तत्तथा सर्वस्वत्यागे विहिते परिशिष्टे भिक्षोपादानेन विहितमपि भिक्षाचरणमुपवीताद्यनाक्षेपकमित्याह। नेत्यादिना।

हविःशेषभक्षणास्यसंस्कारकत्वं न तु भिक्षाचर्यस्य· तेन भिक्षाचर्यं विहितमित्यर्थः यज्ञोपवीतादेरनाक्षेपकत्वात्· राद्धांतिकं स्फुटयति· शेषेति· सर्वस्यत्यागे विहिते शेषस्य कालस्य शरीरपातांतस्य प्रतिपत्तिकर्ममात्रं भि;
क्षाचर्यं न तु यज्ञोपवीतादिप्रापकमित्यर्थः किंच भिक्षाचर्यस्य शरीरस्थित्यैवाक्षेपान्न तत्रापि विधिः एतेन इव शास्त्रे ह्युपवीतादिसिद्धिरित्याह· असंस्कारत्वाच्चेति· उपवीतधारणादिवचनानां का गतिस्तत्राह· यतीति· निष्टत्तु
पदेशानुग्राहकत्वेन स्मृतीरुदाहरति निराशिषमित्यादिना· यज्ञोपवीतत्युक्तः २ आयकत्वेन २ इति शेषो व्युत्थानवाक्यव्याख्यानसमानार्थः। तस्मादित्यादिवाक्यमवतार्य व्याचष्टे। यस्मादित्यादिना। आत्मा·
गोचरस्त्वयत्वात् इति विधिवाक्येन· तथेति· यथा ज्ञानबलेन विषमाभिमुखी दृष्टिस्तिरस्क्रियते तथेति यावत्। आत्मनात्मविज्ञानातिशयेनेत्यर्थः वीर्यं विषयदृष्टितिरस्करणसामर्थ्यमित्येतत्· तिरस्कारभावेन। ॥

चर्यस्याप्रयोजकत्वात् कृत्वोत्तरकालभक्षणवत् शेषप्रतिपत्तिकर्मत्वादप्रयोजकं हि तत्· असंस्कारत्वाच्च· भक्षणाङ्गरूपसंस्कार्थमपि स्यान्न भिक्षाचर्यं नियमादृ
ष्टस्यापि ब्रह्मविद्याङ्गनिष्ठत्वात्· नियमादृष्टस्यानिष्टत्वे किं भिक्षाचर्येणेति चेत् नान्यसाधनानुष्ठानस्य विहितत्वात् तथापि किं तेनेति चेत्· यदि स्याद
दृष्टमभ्युपगम्यते हि तत् यानि पारिव्राज्ये ऽभिहितानि वचनानि यज्ञोपवीतीत्येवाधीयीतेत्यादीनि तान्यविरुद्धानि पारिव्राज्यमात्रविषयाणीति परिहृतानि इतर
थात्मज्ञानबाधः स्यादित्युक्तं। निराशिषमनारम्भं निर्नमस्कारमस्तुतिं। अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुरिति सर्वकर्माभावं दर्शयति स्मृतिर्विदुषः
विद्वाल्लिंगवर्जितस्तस्मादलिंगो धर्मज्ञ इति च तस्मात् परमहंसपारिव्राज्यमेव व्युत्थानलक्षणां प्रतिपद्येतात्मवित्सर्वकर्मसाधनपरित्यागरूपमिति यस्
मात्पूर्वे ब्राह्मणा एतमात्मानमसाधनफलस्वभावं विदित्वा सर्वस्मात्साधनफलस्वरूपादेषणालक्षणाद्व्युत्थाय भिक्षाचर्यं चरन्ति स्म· दृष्टादृष्टार्थं
कर्म तत्साधनं च विहितत्वात्तस्माद्यतोपि ब्रह्मविद् ब्राह्मणः पाण्डित्यं पण्डितभावमेतदात्मज्ञानं पाण्डित्यं निर्विद्यति· शेषं विदित्वात्मज्ञानं निरवशेषं कृत्वे
त्यर्थः आचार्यत आगमतश्च एषणाभ्यो व्युत्थाय एषणाव्युत्थानावसानमेव हि तत् पाण्डित्यमेषणातिरस्कारोद्भवत्वात्। एषणाविरुद्धत्वादेषणाम
तिरस्कृत्य न ह्यात्मविषयपाण्डित्यस्योद्भव इत्यात्मज्ञानेनैव विहितमेषणाव्युत्थानं। आत्मज्ञानसमानकर्तृकप्रत्ययोपादानलिंगश्रुत्या[illegible]
तं तस्मादेषणाभ्यो व्युत्थाय ज्ञानबलभावेन बाल्येन तिष्ठासेत् स्थातुमिच्छेत्। साधनफलाश्रयणं हि बलमितरेषामनात्मविदां तद्बलं हित्वा विद्वानसा
धनफलस्वरूपात्मविज्ञानमेव बलं तद्भावमेव केवलमाश्रयेत् तदाश्रयणे हि करणान्येषणाविषय एनं हर्तुं स्थापयितुं नोत्सहन्ते· ज्ञानबलहीनं हि
मूढं दृष्टादृष्टविषयायामेषणायामेवैनं करणानि नियोजयन्ति बलं नामात्मविद्ययाऽन्यविषयदृष्टितिरस्करणमतस्तद्भावेन बाल्येनेति·
ष्ठासेत् तथात्मानं विदित्वा नैव वीर्यमिति श्रुत्यन्तरान्नायमात्मा बलहीनेन लभ्यत इति च। बाल्यं च पाण्डित्यं च निर्विद्य निःशेषं कृत्वा· अथ मननान्मुनिर्योगी भ
वति एतावद्धि ब्राह्मणेन कर्त्तव्यं यदुत सर्वानात्मप्रत्ययतिरस्कारः एतत्कृत्वा कृतकृत्यो योगी भवति· अमौनं चात्मज्ञानानात्मप्रत्ययतिरस्कारौ पाण्डित्यबाल्य
संज्ञकौ निःशेषं कृत्वा मौनं नामानात्मप्रत्ययतिरस्करणस्य· पर्यवसानं फलं तच्च निर्विद्य अथ ब्राह्मणः कृतकृत्यो भवत्यात्मैव सर्वमिति प्रत्यय उपजा·

कर्मसाधनात्प्रतिग्रहादेर्व्युत्थानत्वात्
निरतानि

आत्मातानं चानात्म·कारथतौ· आत्मज्ञानसंज्ञं मौनं तं निःशेषं कृत्वा· आचार्यपरिचर्यापूर्वकं वेदान्तानां तात्पर्यावधारणं पाण्डित्यं प्रकीर्तितः· नात्मदृष्टितिरस्कारो बाल्यं॥ ॥रामरामरामरामरामरामराम।

बृ॰भा॰
९१

अहमात्मा परं ब्रह्म न ममान्योऽस्ति किंचनेति मननं तस्यैव तत्संधानं मौनं महावाक्यार्थावगतिर्बाल्यपाण्डित्यमिति भागः प्रागपि प्रसिद्धं ब्राह्मण्यमिति चेत्तत्राह । निरूपचरितमिति । ब्रह्मविदः समाचारं पृच्छति । स ब्राह्मण इति । अनियतं तस्य चरणमित्युत्तरमाह । येनेति । यद्यदाचरति श्रेष्ठ इति स्मृतेः इतरेषामप्याचारे अनादरः स्यादित्याशंक्याह । येन केनचिदिति । ब्रह्मैव ब्राह्मणो भवति केनाचारेण वर्तेत ब्रह्मरूपेण वाह्यं वाह्यमिति ति- वीक्षामीशानकोद्रष्टव्यः । यत्तदोर्नित्यसंबंधात् निराकर्तव्यं यथा मुमुक्षुः सर्वानात्मानं प्रतिपद्यते तथास्य यथोक्तविशेषणो दर्शयितव्य इति उत्तरग्रन्थारम्भ इति योजना । पार्थिवं धातुजातं तदिदं सर्वमप्स्वित्यादि योजनीयं । किमत्र गार्ग्या विवक्षितमिति तत्राह । इदं तावदिति । तदेव दर्शयितुं व्याप्तिमाह । यत्कार्यमिति । कारणेन व्यापकेनेति शेषः । यत्कार्यं तत्कारणेन व्याप्तं यत्परिच्छिन्नं तद्व्यापकेन व्याप्तं

यदैवं कृतकृत्यो ब्राह्मणो निरूपचरितं हि तदा तस्य ब्राह्मण्यं प्राप्तमत आह । स ब्राह्मणः केन स्यात् केन चरणेन भवेद्येन स्यात् येन चरणेन भवेत्तेनेदृश एवायं येन केनचिच्चरणेन स्यात्तेनेदृश एव उक्तलक्षण एव ब्राह्मणो भवति । येन केनचिच्चरणेनेति स्तुत्यर्थं येयं ब्राह्मण्यावस्था सा इत्थंभूतेन तु चरणेनानादरो न तु तस्मा ब्राह्मण्यावस्थानादशनायाद्यतीतात्मस्वरूपान्नित्यतृप्तादन्यदविद्याविषयमेवार्तलक्षणं वस्त्वन्तरं मार्गं विनाश्यनित्यं परिगृहीतं स्वप्नमायामरीच्युदकसममसारं आत्मैवैकः केवलो नित्यमुक्त इति ततो ह कहोलः कौषीतकेय उपरराम ॥ २८ ॥ ॥पंचमस्य पञ्चमं ब्राह्मणं॥ ॥यत्साक्षादपरोक्षाद्ब्रह्म सर्वान्तर आत्मेत्युक्तं तस्य सर्वान्तरस्य स्वरूपाधिगमाया शाकल्यब्राह्मणात् ग्रन्थ आरभ्यते पृथिव्यादीन्याकाशान्तानि भूतान्यन्तर्बहिर्भावेन व्यवस्थितानि तेषां यद्बाह्यं बाह्यमधि

आ शाकल्यब्राह्मणादि
त्यत्र मर्यादायामाङ्

अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाच यदिदꣳ सर्वमप्स्वोतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति

गम्याभ्यन्तरस्य निराकरणेन द्रष्टुः साक्षात्सर्वान्तरेण आत्मा सर्वसंसारधर्मविनिर्मुक्तो दर्शयितव्य इत्यारंभः । अथ ह एनं गार्गी नामतो वाचक्नवी वचक्नोर्दुहिता पप्रच्छ याज्ञवल्क्येति होवाच यदिदं सर्वं पार्थिवं धातुजातमप्सूदके ओतं च प्रोतं च ओतं दीर्घपटतन्तुवत् प्रोतं तिर्यक्तन्तुवत् विपरीतं वा अद्भिः सर्वतोऽन्तर्बहिर्भूताभि व्याप्तमित्यर्थः । अन्यथा सक्तुमुष्टिवद्विशीर्येत इदं तावदनुमानमुपन्यस्तं यत्कार्यं परिच्छिन्नं स्थूलं कारणेनापरिच्छिन्नेन सूक्ष्मेण व्याप्तमिति दृष्टं यथा पृथिव्यद्भिस्तथा पूर्वं पूर्वमुत्तरेणोत्तरेण व्यापिना भवितव्यं इत्येष आ सर्वान्तरादात्मनः प्रश्नार्थः । तत्र भूतानि पञ्च संहतान्येवोत्तरमुत्तरं सूक्ष्मभावेन व्यापकेन कारणरूपेण च व्यवतिष्ठन्ते न च परमात्मनोऽर्वाक् तद्व्यतिरेकेण वस्त्वन्तरमस्ति सत्यस्य सत्यमिति श्रुतेः । सत्यं च भूतपंचकं सत्यस्य सत्यं च परमात्मा । कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति तासामपि कार्यत्वात् स्थूलत्वात्परिच्छिन्नत्वाच्च क्वचिदोतप्रोतभावेन भवितव्यं क्व तासामोतप्रोतभाव इति ।

पूर्वपूर्वकार्यव्यापिना उ
त्तरेणोत्तरेण कारणेन
भवितव्यम् २

यद्यत्स्थूलं तत्तत्सूक्ष्मेण व्याप्तमिति त्रिप्रकारा व्याप्तिः । तथेति व्याप्तिप्रकारेण तत्र व्यापकेन सूक्ष्मेण व्याप्तं कार्यत्वात्पृथिव्यादीत्यर्थः ७ ननु पंचभूतव्यतिरिक्तानां गंधर्वलोकादीनामप्यांतरत्वेनोपदेशात्कथं भूतपंचकमुदासे न सर्वान्तरप्रतिपत्तिर्विवक्षितेति तत्राह । तत्रेति । उक्तरीत्या प्रश्नार्थे स्थिते सतीति यावत् । अथ परमात्मानं भूतानि वहित्वा पृथगेव गंधर्वलोकादीनि वस्त्वंतराणि भविष्यंतीनेत्याह । न चेति । गंधर्वलोकादीन्यपि भूतानामेवावस्थाविशेषास्ततः सत्यं भूतपंचकं तस्य सत्यं परं ब्रह्म । नान्यदंतरालप्रतिपत्तव्यमिति तात्पर्यं लब्ध्वा प्रश्नमुत्थाप्य तत्सरणिं व्याकरोति । कस्मिन्निति । पूर्वब्राह्मणयोरात्मनः सर्वान्तरत्वमुक्तं तन्निर्णयार्थमुत्तरब्राह्मणा मिति संगतिमाह यत्साक्षादिति ।

पंचभूतैः स्वं पंचीकृतानि ॥ सूक्ष्माणाम् ॥

राम॰
९१
91

कस्मिन्नुखलुवायुरित्यादौ ऊर्णनाभमतिदिशति। एवमिति। चानेनतदकव्यापकत्वेपिकाष्ठविद्युदादिपारतंत्र्यात्स्वतंत्रेणाकेनचिदपांव्याप्तिवक्तव्येति अग्निं हि चात्तत्कारणोवायावितिसुक्तं वायोश्चस्वकारणात्
नैपिनोदकत्वं चेतितिव्यापकत्वसिद्धिरित्युत्तरमाह। नैषदोषइत्यादिना १ अंतरिक्षलोकशब्दार्थमाह तान्येवेति तान्येवप्रसिद्धान्येवसंहतानिभूतानिलोकारंभकत्वादंतरिक्षशब्देनकथ्यंते स्वमर्थापि

एवमुत्तरोत्तरप्रश्नप्रसंगोयोजयितव्यः। वायौगार्गीति। नन्वग्नावितिवक्तव्यं नैषदोषः। अग्नेःपार्थिवंवायव्यंवाधातुमनाश्रित्यस्वात्मलाभो
नास्तीतितस्मिन्नोतप्रोतभावोनोपदिश्यते कस्मिन्नुखलुवायुरोतश्चप्रोतश्चेत्यंतरिक्षलोकेषुगार्गीति। तान्येवभूतानिसंहतान्यंतरिक्षलोकाः। तान्यपिगंध
र्वलोकेषुगंधर्वलोकाः आदित्यलोकेष्वादित्यलोकाः चंद्रलोकेषुचंद्रलोकाः नक्षत्रलोकेषुनक्षत्रलोकाः देवलोकेषुदेवलोकाः इंद्रलोकेष्विंद्रलोकाः वि

संहतानिभूतानिगंधर्वलो
कारंभकत्वात्गंधर्वलोक
शब्देन्त इति गंधर्वलोकश
ब्दतात्पर्यं एवं बहुवचनं
भूतानां पंचसंख्यत्वात्

वायौगार्गीतिकस्मिन्नुखलुवायुरोतश्चप्रोतश्चेत्यंतरिक्षलोकेषुगार्गीतिकस्मिन्नुखल्वंतरिक्षलोकाओताश्चप्रोताश्चे
तिगंधर्वलोकेषुगार्गीतिकस्मिन्नुखलुगंधर्वलोकाओताश्चप्रोताश्चेत्यादित्यलोकेषुगार्गीतिकस्मिन्नुखल्वादित्य
लोकाओताश्चप्रोताश्चेतिचंद्रलोकेषुगार्गीतिकस्मिन्नुखलुचंद्रलोकाओताश्चप्रोताश्चेतिनक्षत्रलोकेषुगार्गी
तिकस्मिन्नुखलुनक्षत्रलोकाओताश्चप्रोताश्चेतिदेवलोकेषुगार्गीतिकस्मिन्नुखलुदेवलोकाओताश्चप्रोताश्चे
तींद्रलोकेषुगार्गीतिकस्मिन्नुखल्विंद्रलोकाओताश्चप्रोताश्चेतिप्रजापतिलोकेषुगार्गीतिकस्मिन्नुखलुप्रजाप
तिलोकाओताश्चप्रोताश्चेतिब्रह्मलोकेषुगार्गीतिकस्मिन्नुखलुब्रह्मलोकाओताश्चप्रोताश्चेतिसहोवाचगार्गीमा
तिप्राक्षीर्माते मूर्धाव्यपप्तद्नतिप्रश्न्यांवैदेवतामतिपृच्छसिगार्गिमातिप्राक्षीरितिततोहगार्गीवाचक्नवीउपरराम॥ ६ ॥

॥ षष्ठं ब्राह्मणम् ॥

ब्रह्मलोकानामब्रह्मांडारंभ
कानिभूतानि
प्रजापतिलोकशब्दार्था
इत्यर्थः

राट्शरीरारंभकेषुभूतेषु प्रजापतिलोकेषु प्रजापतिलोकाः ब्रह्मलोकेषुब्रह्मलोकानामांडारंभकानिभूतानिसर्वत्रहिसूक्ष्मतारतम्यक्रमेणव्याप्तृपभोगाश्रया
कारपरिणतानिभूतानिसंहतानितान्येवपंचेतिबहुवचनभांजि कस्मिन्नुखलुब्रह्मलोकाओताश्चप्रोताश्चेति। सहोवाचयाज्ञवल्क्योहगार्गीमातिप्राक्षीः स्व
यप्रश्नन्यायप्रकारमतीत्यागमेनप्रष्टव्यांदेवतामनुमानेनमाप्राक्षीरित्यर्थः। पृच्छंत्याश्चमातेतवमूर्धाव्यपप्तद्धिस्पष्टंपतेत्। देवतायास्वप्रश्नआगमविष
यःतत्प्रश्नमतिक्रांतोगार्ग्याः प्रश्नः आनुमानिकत्वात्तेयस्यादेवतायाः प्रश्नःसातिप्रश्न्यानतिप्रश्न्याअनतिप्रश्न्यास्वप्रश्नविषयैवकेवलागमगम्येत्यर्थःता
मनतिप्रश्न्यांदेवतामतिपृच्छसिगार्गिमातिप्राक्षीर्नचेन्मूर्धापतिष्यतीतिततोहगार्गीवाचक्नवीउपरराम॥ २९ ॥ ॥ पंचमस्यषष्ठंब्राह्मणम् ॥ ॥

अंतरिक्षलोकादीनांब्रह्मेक
मेकत्वात् ज्ञातिबहुवचनान्
ताशब्दाद्यत्वबहुलिति।
प्रजापतिलोकशब्दार्थं कथ
यति। विराडिति।

आगमादेव प्रष्टव्यामतिक्रान्तप्रष्टव्यादेवतायाः प्रश्नः सा देवता अतिप्रश्न्या २

शंपकः देशपंचीकृतेषु अंतरिक्षारंभकभूतेषुतिष्ठतीतुच्यतेवायुरंतरिक्षलोकेषुओतश्चप्रोतश्चेति गंधर्वलोकारंभकभूतानामंतरिक्षारंभकभूतेभ्योह्रस्वत्वात् अंतरिक्षलोकागंधर्वलोकेषुओताश्चप्रोताश्चेत्युक्तम्॥

प्रश्नप्रकारमतिक्रान्तप्रश्नमिति १

पूर्ववदनुमानेन प्रष्टव्यानीतिगार्गीवाचोदिना ४
केवलालिंगशरीरसमष्टि ४ आचार्योपदेशोत्र आगमः ३

ग्रंजरंभकाणि पंचीकृतानि भूतानि कार्याणि ।१ तच्चागमेनैवेति आचार्योपदेशोपेतागमशब्दार्थः ।१ गंधर्व ४ इति शब्दार्थमाह । एवमिति । येनायं च लोक इत्यादिः मूलेऽक्तः प्रकारः तेन प्रकारेण सलोका भवंतीति संबंधः

इदानीं ब्रह्मलोकानामंतरतमं सूत्रं वक्तव्यमिति तदर्थमारंभः । तच्चागमेनैव प्रष्टव्यमितीतिहासेनागमोपन्यासः क्रियते । अथ हैनमुद्दालको नामतोऽरुणस्यापत्यमा
रुणिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेषु देशेष्ववसाम उषितवंतः पतंजलस्य पतंजलो नामतस्तस्यैव कपिगोत्रस्य काप्यस्य गृहेषु यज्ञमधीयानाः यज्ञशा
स्त्राध्ययनं कुर्वाणाः तस्यासीद्भार्या गंधर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबंधो नामतोऽथर्वणोऽपत्यमाथर्वण इति । सोऽब्रवीद्गंधर्वः पतंचलं
काप्यं याज्ञिकांश्च तान्किं ब्रूयात् वेत्थ नु त्वं हे काप्य जानीषे तत्सूत्रं किं तद्येनायं लोकः इदं जन्म परश्च लोकः परं च प्रतिपत्तव्यं जन्म सर्वाणि च भूतानि

अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतंचलस्य काप्यस्य गृहेषु यज्ञमधीयाना
स्तस्यासीद्भार्या गंधर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबंध आथर्वण इति सोऽब्रवीत्पतंचलं काप्यं याज्ञिका
ꣳश्च वेत्थ नु त्वं काप्य तत्सूत्रं येनायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंतीति सोऽब्रवीत्पतं
चलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्पतंचलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य तमंतर्यामिणं य इमं च लो
कं परं च लोकꣳ सर्वाणि च भूतानि योंऽतरो यमयतीति

ब्रह्मादिस्तंबपर्यंतानि संदृब्धानि संग्रथितानि स्रगिव सूत्रेण विस्रस्तानि भवंति । तत्किं सूत्रं वेत्थ । सोऽब्रवीदेवं पृष्टः काप्यो नाहं तद्भगवन्वेदेति तत्सूत्रं नाहं
जाने हे भगवन्निति संपूजयन्नाह ॥ सोऽब्रवीत्पुनर्गंधर्वः उपाध्यायमस्मांश्च वेत्थ नु त्वं काप्य तमंतर्यामिणमंतर्यामीति विशेष्यते । य इमं च लोकं परं च
लोकं सर्वाणि च भूतानि योंऽतरोऽभ्यंतरः सन् यमयति दारुयंत्रमिव भ्रामयति स्वं स्वमुचितं व्यापारं कारयतीति ॥ ॥ ॥ रामरामराम

रामरामरामरामराम॥ ॥रामरामरामरामराम॥ ॥रामरामरामराम॥ ॥रामरामराम॥ ॥रामरामरामराम॥ ॥रामरामरामराम॥ ॥रामराम

स ब्रह्मविदित्यादि चोक्तं संक्षिपति सर्वं चेति । तथाभूतं सूत्रेणाविद्धं तमन्तर्यामिणं च नियम्यमानानिति यावत् । सोऽब्रवीत्पुनर्गन्धर्व इत्यादिग्रंथेन सूत्र॰न्नूप्यते ॥ ॥रामरामरामरामरामरामराम॥

सोऽब्रवीदेवमुक्तः पतंचलः काप्यो नाहं तं जाने भगवन्निति संपूजयन्नाह ॥ सोऽब्रवीत्पुनर्गन्धर्वः सूत्रान्तर्गतं अन्तर्यामिणो विज्ञानं स्तूयते यः कश्चिद्धे तत्सूत्रं हे काप्य विद्यात् विजानीयात्तं चान्तर्यामिणं सूत्रान्तर्गतं तस्यैव सूत्रस्य नियन्तारं विद्याद्यः इत्येवमुक्तेन प्रकारेण स हि ब्रह्मवित् स लोकांश्च भूरादीनन्तर्यामिणा नियम्यमानान् लोकान् वेत्ति देवांश्चाग्न्यादीन् लोकिनो जानाति । वेदांश्च सर्वप्रमाणभूतान् वेत्ति भूतानि च ब्रह्मादीनि सूत्रेणाधियम्माणानि तदन्तर्गतेनान्तर्यामिणा नियम्यमानानि वेत्ति स आत्मानं च कर्तृभोक्तृत्वविशिष्टं तेनैवान्तर्यामिणा नियम्यमानं वेत्ति सर्वं च जगत्तथा

सोऽब्रवीत्पतंचलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्पतंचलं काप्यं याज्ञिकाꣳश्च यो वै तत्काप्य सूत्रं विद्यात्तं चान्तर्यामिणमिति स ब्रह्मवित्स लोकवित्स देववित्स वेदवित्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्त्वं याज्ञवल्क्य सूत्रमविद्वाꣳस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम तत्सूत्रं तं चान्तर्यामिणमिति यो वा इदं कश्चिद्ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति ॥ २ ॥ ॥ ३० ॥ ॥रामरामराम॥ ॥रामराम॥

भूतं वेत्ति एवं स्तुते सूत्रान्तर्यामिविज्ञाने प्रलुब्धः काप्योऽभिमुखीभूतो वयं च तेभ्यश्चास्मभ्यमभिमुखीभूतेभ्योऽब्रवीद्गंधर्वः सूत्रमन्तर्यामिणं च तदहं सूत्रान्तर्यामिविज्ञानं वेद । गंधर्वात् लब्धागमः सन् । तच्चेद्याज्ञवल्क्य सूत्रं तं चान्तर्यामिणमविद्वांश्चेद्ब्रह्मवित्त्वन्यदि ब्रह्मगवीरुदजसे ब्रह्मविदां स्वभूता गाः उदजसे उन्नयसि तत् अन्यायेन ततो मध्यापदेशस्य मूर्धा शिरस्ते तव विस्पष्टं पतिष्यति । एवमुक्तो याज्ञवल्क्य आह । वेद जानाम्यहं हे गौतम इति गौतमः ततः तत्सूत्रं यत्सूत्रं गंधर्वस्तेभ्यमुक्तवान् यं चान्तर्यामिणं गंधर्वाद्विदितवन्तो यूयं तं चान्तर्यामिणं वेदाहमित्युक्ते प्रत्याह गौतमः यः कश्चित्प्राकृतः इदं यत्त्वयोक्तं ब्रूयात्कथं वेद वेदेत्यात्मानं श्लाघयन् किं तेन गर्जितेन कार्येण दर्शय यथा वेत्थ तथा ब्रूहीति ॥ ॥ ३० ॥ ॥राम॥

राम

वायुमेवविशिनष्टि।यस्यस्वरूपमित्यर्थः।यदात्मकमिति।पंचभूतानि ५ दशेन्द्रियाणि १० पंचवृत्तिःप्राणाः।चतुर्विधमंतः १ करणमितिसप्तदशविधत्वं ७।कर्मणांवासनानांचोपरक्तसहिहेतूनांप्राणिभिरर्जितानामाश्रयत्वादेप
सितमेवलिंगमित्याह।कर्मेति।प्रश्नांतरंसूत्रविषयंगौतमवाक्यं।स्वार्थेस्यन्।वायुशब्देनपंचभूतानिदशेन्द्रियाणिपंचवृत्तिःप्राणाश्चतुर्विधमंतःकरणमितिसप्तदशविधंसमष्टिव्यष्ट्यात्मकलिंगशरीरमात्रमुच्यते·

सहोवाचयाज्ञवल्क्योब्रह्मलोकायस्मिन्नोताश्चप्रोताश्चवर्तमानेकालेयथापृथिव्यप्सुतत्सूत्रमागमगम्यंवक्तव्यमितितदर्थंप्रश्नांतरमुत्थापितमतस्तन्निर्णया
याह॥वायुर्वैगौतमतत्सूत्रंनान्यत्।वायुरितिसूक्ष्ममाकाशवद्विष्टंभकंपृथिव्यादीनां।यदात्मकंसप्तदशविधंलिंगंकर्मवासनासमवायिप्राणिनां।
यत्तत्समष्टिव्यष्ट्यात्मकंयस्यवाह्याभेदाःसप्तसप्तमरुद्गणाःसमुद्रस्येवोर्मयस्तदेतद्वायव्यंतत्त्वंसूत्रमित्यभिधीयतेवायुनावैगौतमसूत्रेणायंचलो
कःपरश्चलोकःसर्वाणिचभूतानिसंदृब्धानिभवंतिसंग्रथितानिभवंतीतिप्रसिद्धमेतदस्तिचलोकेप्रसिद्धिःकथंयस्माद्वायुःसूत्रंवायुनाविधृतं
सर्वंतस्माद्वैगौतमपुरुषंप्रेतमाहुःकथयंतिव्यस्रंसिषतविस्रस्तान्यस्यपुरुषस्यांगानीतिसूत्रापगमेहिमणयादीनांप्रोतानामवस्रंसनंदृष्ट
मेवंवायुःसूत्रंतस्मिन्मणिवत्प्रोतानियद्यस्यांगानिस्युस्ततोयुक्तमेतत्तदपगमेऽवस्रंसनमंगानां।अतोवायुनाहिगौतमसूत्रेणसंदृब्धा
निभवंतीतिनिगमयति।एवमेवैतद्याज्ञवल्क्यसम्यगुक्तंसूत्रंतदंतर्गतंत्विदानींतस्यैवसूत्रस्यानियंतारमंतर्यामिणंब्रूहीत्युक्तआह॥ ३१ ॥

सहोवाचवायुर्वैगौतमतत्सूत्रंवायुनावैगौतमसूत्रेणायंचलोकःपरश्चलोकःसर्वाणिचभूतानिसंदृब्धानिभवंतितस्माद्वैगौतम
पुरुषंप्रेतमाहुर्व्यस्रंसिषतास्यांगानीतिवायुनाहिगौतमसूत्रेणसंदृब्धानिभवंतीत्येवमेवैतद्याज्ञवल्क्यांतर्यामिणंब्रूही
ति॥ ३१ ॥यःपृथिव्यांतिष्ठन्पृथिव्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिवीमंतरोयमयत्येषतआत्मांतर्याम्यमृतः ॥ ३२ ॥

इत्येतत्समानमन्यत्॥ ३२ ॥

यःपृथिव्यांतिष्ठन्भवतिसोंतर्यामीसर्वःपृथिव्यांतिष्ठतीतिसर्वत्रप्रसंगोमाभूदितिविशिनष्टि।पृथिव्याअंतरोऽभ्यंतरस्तत्रैतत्स्यात्पृथिवीदेवतै
वांतर्यामीत्यतआह।यमंतर्यामिणंपृथिवीदेवतापिनवेदमय्यन्यःकश्चिद्वर्ततइतियस्यपृथिवीशरीरंयस्यपृथिव्येवशरीरंनान्यत्।पृथिवी
देवतायायच्छरीरंतदेवशरीरंयस्यशरीरग्रहणंचोपलक्षणार्थं।करणंचपृथिव्यास्तस्याःस्वकर्मप्रयुक्तंहिकार्यकरणंचपृथिवीदेवता·
याःतदस्यस्वकर्माभावादंतर्यामिणोनित्यमुक्तत्वात्।परार्थकर्तव्यतास्वभावत्वात्तस्यकार्यकरणंचतदेवास्यनस्वतस्तदाहयस्यपृ
थिवीशरीरमिति।तद्देवताकार्यकरणस्येश्वरसाक्षिमात्रसान्निध्येनहिनियमेनप्रवृत्तिनिवृत्तीस्यातां।यईदृशईश्वरःनारायणाख्यःपृथिवी
देवतांयमयतिस्वव्यापारेंतरोऽभ्यंतरस्तिष्ठन्नेषतआत्मातेतवममचसर्वभूतानांचेत्युपलक्षणार्थमेतदंतर्यामीयस्त्वयापृष्टोऽमृतःसर्वसंसारधर्मवर्जित

पृथिवीदेवताया
पत्कार्यकरणंचतद्दे
पास्यांतर्यामिणःका
र्यकरणंनाभ्यंतर्यामि
णःस्वकर्माभावान्नि
त्यमुक्तत्वात्·

अन्यस्य
प्रेरयंति·
ईश्वरइतिनिं·
[illegible]
[illegible]
शिवः

यःपृथिवीमित्यादिवाक्यस्यतात्पर्यमाह।देवेति।तथात्वेतिःदर्शितन्यायांपर्यायांतरेष्वतिदिशति।समानमिति।अन्यद्वक्ष्यमाणंपूर्वोक्तेनसमानार्थमित्यर्थः।नियम्यपृथिवीदेवताकार्यकरणाभ्यामेवका
र्यकरणवत्त्वमीदृशत्वं·कार्यकरणरहितत्वं·

[illegible]पंचमी। योप्सुतिष्ठन्नग्नावंतरिक्षेवायौदिव्यादित्येदिक्षुचंद्रतारकाकाशेतमसिआवरणात्मकेवाह्येतमसितेजसितद्विपरीतेप्रकाशसामान्यइत्येवमधिदैवतमंतर्यामिविषयंदर्शनंदेवताख्य॥ ॥

योप्सुतिष्ठन्नद्भ्योंतरोयमापोनविदुर्यस्यापःशरीरंयोपोंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ३३॥योग्नौतिष्ठन्नग्नेरंतरोयमग्निर्नवेदयस्याग्निःशरीरंयोग्निमंत
रोयमयत्येषतआत्मांतर्याम्यमृतः॥ ३४॥योंतरिक्षेतिष्ठन्नंतरिक्षादंतरोयमंतरिक्षंनवेदयस्यांतरिक्षंशरीरंयोंतरिक्षमंतरोयमयत्येषतआत्मांतर्या
म्यमृतः॥ ३५॥योवायौतिष्ठन्वायोरंतरोयंवायुर्नवेदयस्यवायुःशरीरंयोवायुमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ३६॥योदिवितिष्ठन्दिवोंतरोयं
द्यौर्नवेदयस्यद्यौःशरीरंयोदिवमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ३७॥यआदित्येतिष्ठन्नादित्यादंतरोयमादित्योनवेदयस्यादित्यःशरीरंयआदित्यमं
तरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ३८॥योदिक्षुतिष्ठन्दिग्भ्योंतरोयंदिशोनविदुर्यस्यदिशःशरीरंयोदिशोंतरोयमयत्येषतआत्मांतर्याम्यमृतः।
॥ ३९॥यश्चंद्रतारकेतिष्ठंश्चंद्रतारकादंतरोयंचंद्रतारकंनवेदयस्यचंद्रतारकंशरीरंयश्चंद्रतारकमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ४०॥
यआकाशेतिष्ठन्नाकाशादंतरोयमाकाशोनवेदयस्याकाशःशरीरंयआकाशमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ४१॥यस्तमसितिष्ठंस्तम
सोंतरोयंतमोनवेदयस्यतमःशरीरंयस्तमोंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ४२॥यस्तेजसितिष्ठंस्तेजसोंतरोयंतेजोनवेदयस्यतेजःशरी
रंयस्तेजोंतरोयमयत्येषतआत्मांतर्याम्यमृतइत्यधिदैवतमथाधिभूतं॥ ४३॥यःसर्वेषुभूतेषुतिष्ठन्सर्वेभ्योभूतेभ्योंतरोयंसर्वाणिभूतानिन
विदुर्यस्यसर्वाणिभूतानिशरीरंयःसर्वाणिभूतान्यंतरोयमयत्येषतआत्मांतर्याम्यमृतइत्यधिभूतमथाध्यात्मं॥ ४४॥यःप्राणेतिष्ठन्प्राणादंतरोयं
प्राणोनवेदयस्यप्राणःशरीरंयःप्राणमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ४५॥योवाचितिष्ठन्वाचोंतरोयंवाङ्नवेदयस्यवाक्शरीरंयोवाचमंतरोय
मयत्येषतआत्मांतर्याम्यमृतः॥ ४६॥यश्चक्षुषितिष्ठंश्चक्षुषोंतरोयंचक्षुर्नवेदयस्यचक्षुःशरीरंयश्चक्षुरंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ४७॥
यःश्रोत्रेतिष्ठन्श्रोत्रादंतरोयंश्रोत्रंनवेदयस्यश्रोत्रंशरीरंयःश्रोत्रमंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ४८॥योमनसितिष्ठन्मनसोंतरो
यंमनोनवेदयस्यमनःशरीरंयोमनसोंतरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ४९॥यस्त्वचितिष्ठंस्त्वचोंतरोयंत्वङ्नवेदयस्यत्वक्शरीरंयस्त्वचमं
तरोयमयत्येषतआत्मांतर्याम्यमृतः॥ ५०॥योविज्ञानेतिष्ठन्विज्ञानादंतरोयंविज्ञानंनवेदयस्यविज्ञानंशरीरंयोविज्ञानमंतरोयमयत्येषतआ
त्मांतर्याम्यमृतः॥ ५१॥योरेतसितिष्ठन्रेतसोंतरोयंरेतोनवेदयस्यरेतःशरीरंयोरेतोंतरोयमयत्येषतआत्मांतर्याम्यमृतऽ

अथाधिभूतंभूतेषुब्रह्मादिस्तंबपर्यंतेष्वंतर्यामिदर्शनमधिभूतमथाध्यात्मं॥३३।३४।३५।३६।३७।३८।३९।४०।४१।४२।४३।४४।यःप्राणवायुसहितेप्राणेयोवाचिचक्षुषिश्रोत्रेम
नसित्वचिविज्ञाने[illegible]रेतसिप्रजननेकस्मात्पुनःकारणात्पृथिव्यादिदेवतामहाभागाःसत्योमनुष्यादिवत्आत्मनिनितिष्ठतमात्मनोनियंतारमंतर्यामिणंनविदुरिति॥४५।४६।४७।४८।४९।५०।५१॥

अलुप्तदर्शनशक्तित्वाच्चक्षुषि संनिधानाच्च द्रष्टा येन नैतन्मेन दर्शनं भवति तद्दर्शनशक्तिः चक्षुर्द्वारा दर्शनकर्तृत्वमिति भावः स्वतः २ साक्षिरूपचैतन्यरूपः इत्यावत् । १ द्वितीयादिवचनं ३ तेषां नियंता आत्मा ४ अव्यवहितं मुख्यं

अतस्त्वाह ॥ दृष्टो न दृष्टेन विषयीभूतः चक्षुर्दर्शनस्य कस्यचित् स्वयं तु चक्षुषि संनिहितत्वाद् दृशिस्वरूप इति द्रष्टा तथा ऽश्रुतः श्रोत्रगोचरमनापन्नः कस्यचित् स्वयं त्वलुप्तश्रवणशक्तिः सर्वश्रोत्रेषु सन्निहितत्वात् श्रोता तथा मतो मनः संकल्पविषयमनापन्नः दृष्टश्रुतेष्वेव सर्वः संकल्पयत्यदृष्टत्वात् अश्रुतत्वादेवाऽमतो ऽलुप्तमननशक्तित्वात् सर्वमनःसु संनिहितत्वाच्च मता । तथा विज्ञातो निश्चयगोचरतामनापन्नो रूपादिवत् सुखादिवत् स्वयं त्वलुप्तविज्ञानशक्तित्वात् तत्संनिधानाच्च विज्ञाता तत्र यं पृथिवी न वेद यं सर्वाणि भूतानि न विदुरिति चात्मनियंतव्या अविज्ञातो ऽन्यो नियंता ऽन्तर्यामीति प्राप्तं तदन्यत्वाशंकानिवृत्त्यर्थमुच्यते ॥ नान्यो ऽत अन्य अतः अस्मादंतर्यामिनो नास्ति द्रष्टा । तथा नान्यो ऽतो ऽस्ति श्रोता नान्यो ऽतो ऽस्ति मंता नान्यो ऽतो ऽस्ति विज्ञाता यस्मात्परो नास्ति द्रष्टा श्रोता मंता विज्ञाता यो ऽदृष्टो द्रष्टा ऽश्रुतः

दृष्टो द्रष्टा ऽश्रुतः श्रोता ऽमतो मंता ऽविज्ञातो विज्ञाता नान्यो ऽतो ऽस्ति द्रष्टा नान्यो ऽतो ऽस्ति श्रोता नान्यो ऽतो ऽस्ति मंता नान्यो ऽतो ऽस्ति विज्ञातैष =
त आत्मांतर्याम्यमृतो ऽतो ऽन्यदार्त्तं ततो होद्दालक आरुणिरुपरराम ॥ ५२ ॥ ॥ सप्तमं ब्राह्मणम् ॥ ॥ अथ ह वाचक
क्नुवाच ब्राह्मणा भगवंतो हंताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद् ब्रह्मोद्यं जेतेति पृच्छ गार्गीति =

श्रोता ऽमतो मंता ऽविज्ञातो विज्ञाता ऽमृतः सर्वसंसारधर्मवर्जितः सर्वसंसारिणां कर्मफलविभागकर्त्तैष त आत्मांतर्याम्यमृतो ऽस्मादीश्वरादात्मनो ऽन्यदार्त्तं ततो होद्दालक आरुणिरुपरराम ॥ ५२ ॥ ॥ पंचमस्य सप्तमं ब्राह्मणम् ॥ ॥ अतः परमशनायादिविनिर्मुक्तं निरुपाधिकं साक्षादपरोक्षात् सर्वांतरं ब्रह्म वक्तव्यमित्यत आरंभः अथ ह वाचक्नवाच पूर्वं याज्ञवल्क्येन निषिद्धा मूर्द्धपातभयादुपरता सा पुनः प्रष्टुं ब्राह्मणानुज्ञां प्रार्थयते । ब्राह्मणा भगवंतः पूज्यावंतः शृणुत मम वचो ऽहं तस्मा इममिमं याज्ञवल्क्यं पुनर्द्वौ प्रश्नौ प्रक्ष्यामि यद्यनुमतिर्भवतामस्ति तौ प्रश्नौ चेद् यदि वक्ष्यति कथयिष्यति कथंचित्तर्हि न वै जातु कदाचित् युष्माकं मध्ये इमं याज्ञवल्क्यं कश्चिद् ब्रह्मोद्यं ब्रह्मवदनं प्रतिजेता कश्चिदित्यर्थः इत्येवमुक्ता ब्राह्मणा अनुज्ञां प्रददुः पृच्छ गार्गीति ५२ लब्धानुज्ञाह याज्ञवल्क्यम् ॥ ५२ ॥ राम।

पूर्वस्मिन् ब्राह्मणे सूत्रांतर्यामिणौ प्रश्नप्रसंगतश्च निर्द्धारितौ । संप्रत्यन्तरं ब्राह्मणं तात्पर्यमाह । अतःपरमिति । सोपाधिकवस्तुनिर्द्धारणानंतर्यमथशब्दार्थः ॥ ॥ रामरामरामरामरामरामरामराम

संधीयते। स उच्यते इति शेषः। यत् द्यावापृथिव्योर्मध्ये इत्यर्थः सूत्रसंज्ञं समष्टि द्वाविधं। तत्सर्वमिति। पूर्वोक्तं सर्वं जगद्यदात्मकमिति यावत्। आकाशे आकाशवत्सूक्ष्मायाः परपर्याये प्रधाने। आकाशापेक्षया

साहं वै त्वा याज्ञवल्क्य यथा लोके काश्यो वा काश्यः काशिषु भवः काश्यः प्रसिद्धं शौर्यं काश्ये विदेहो वा विदेहानां वा राजा उग्रपुत्रः शूरान्वय इत्यर्थः। उज्ज्यमवतारितज्याकं धनुः पुनरधि
ज्यमारोपितज्याकं कृत्वा द्वौ बाणवन्तौ बाणशब्देन शरा गृह्यन्ते संधीयन्ते तेन विनापि शरो भवतीत्यतो विशिनष्टि बाणवन्ताविति द्वौ बाणवन्तौ शरौ तयोरेव विशेषणं सपत्ना
तिव्याधिनौ शत्रोः पीडाकरावतिशयेन हस्ते कृत्वा उपोत्तिष्ठेत् समीपत आत्मानं दर्शयेदेवमेवाहं त्वा त्वां शरस्थानीयाभ्यां प्रश्नाभ्यां द्वाभ्यामुपोदस्थामुपस्थितवत्यस्मि
त्वत्समीपे तौ मे ब्रूहीत्यत्र विशेषत्। आहेतरः पृच्छ गार्गीति॥ ५४ ॥ सा होवाच यदूर्ध्वं सपरि दिवोऽण्डकपालाद्यदवागधः पृथिव्या अधोऽण्डकपालाद्यदन्तरा मध्ये द्यावापृथिवी
द्यावापृथिव्योरण्डकपालयोरिमे च द्यावापृथिवी यद्भूतं यदतीतं भवच्च वर्त्तमानं स्वव्यापारस्थं भविष्यच्च वर्त्तमानादूर्ध्वं कालभावि लिङ्गगम्यं यत्सर्वमेतदाचक्षते कथयन्त्या

साहोवाचाहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठे
देवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति॥ ५४ ॥ सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या
यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिꣳस्तदोतं च प्रोतं चेति॥ ५५ ॥ स होवाच यदूर्ध्वं गार्गि दिवो
यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं चेति॥ ५६ ॥ साहो
वाच नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति॥ ५७ ॥ ॥रामरामरामरामरामराम॥

गम्यतः सर्वं द्वैतजातं यस्मिन्नेकं भवतीत्यर्थः। तत्सूत्रसंज्ञं पूर्वोक्तं कस्मिन्नोतं प्रोतं च पृथिवीधातुरिवाप्सु॥ ५५ ॥ स होवाचेतरो हे गार्गि यत्त्वयोक्तमूर्ध्वं दिव इत्यादि तत्सर्वं
यत्सूत्रमाचक्षते तत्सूत्रमाकाशे तदोतं च प्रोतं च यदेतद्व्याकृतं सूत्रात्मकं जगदव्याकृताकाशे पृथिवीधातुरिव त्रिष्वपि कालेषु वर्त्तते। उत्पत्तौ स्थितौ लये च पुनः
॥ ५६ ॥ सा होवाच नमस्तेऽस्त्वित्यादि प्रश्नस्य दुर्वचत्वप्रदर्शनार्थं यो मे ममैतं प्रश्नं व्यवोचो विशेषेणापाकृतवानसि। तस्य दुर्वचत्वे कारणं। सूत्रमेव तावदग
म्यमितरैर्दुर्वाच्यं किमुत तद्यस्मिन्नोतं प्रोतं चेत्यतो नमोऽस्तु तुभ्यमपरस्मै द्वितीयाय प्रश्नाय धारयस्व दृढीकुर्वात्मानमित्यर्थः॥ पृच्छ गार्गीति॥ ॥५७॥ ॥

कृतत्वं वर्त्तत इति संबंधः। उच्यते। तत्र० प्रोतं च तत्तु दुर्वाच्यं अतः किमुत वक्तव्यं इतर आह पृच्छ गार्गीति॥ ॥रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम॥

वक्ष्यमाणंवाक्यमन्यदित्युच्यते।सर्वंयथोक्तंगार्ग्यायदूर्ध्वंगार्गीत्यादिनातथाप्रत्युच्चार्य॰याज्ञवल्क्यइत्यर्थः।२प्रश्नाभिप्रायंप्रकटयति।आकाशएवेति।अप्रतिपत्तिर्विप्रतिपत्तिश्चेतिदोषद्वयं।५आकाशेस्वेतिवचनेनतसहोवाचेत्यस्यैवविवरणंगार्ग्याह।अक्षरंनक्षरति।कालत्रयंतुभूतमर्यंचप्रतिक्रमेणाकाशस्यकालत्रयातीतत्वं॰अज्ञानस्य।मन्यतेइतिपूर्वोक्तेनान्वयः।सामान्येनोक्तंविशेषतोज्ञातुंपृच्छति।किंतदिति।स्थविष्ठमर्थमाह।सर्वेति।तदुपपादयति।एकमिति।अथयथोक्तपरीत्याक्रमेणैवाऽस्याःस्मित्वेज्ञापितेवक्तव्याभावादुत्तरोग्रंथोवृथेतितत्राह।अनेकेति।नमस्कुर्वंति।ननुकथयंत्यत्तेनाहमपिवक्ष्यामीतिविधित्सुखेनेतिभावः

तीतरआह।व्याख्यातमन्यत्।साहोवाचयदूर्ध्वंयाज्ञवल्क्यइत्यादिप्रश्नःप्रतिवचनंचोक्तस्यैवार्थस्यावधारणार्थंपुनरुच्यतेनकिंचिदपूर्वमर्थांतरमुच्यते।सर्वंयथोक्तंगा१र्ग्याप्रत्युच्चार्यतमेवपूर्वोक्तमर्थमवधारितवानाकाशएवेतियाज्ञवल्क्यः॥५८॥गार्ग्याह।साहोवाचकस्मिन्नुखल्वाकाशओतश्चप्रोतश्चेत्याकाशमेवतावत्कालत्रयातीतत्वाद्दुर्वाच्यंततोपिकष्टतरमक्षरंयस्मिन्नाकाशमोतंचप्रोतंच।अतोऽवाच्यमितिकृत्वानप्रतिपद्यतेसाऽप्रतिपत्तिर्नामनिग्रहस्थानंतार्किकसमयेऽथावाच्यमपिवक्ष्यतितथापिविप्रतिपत्तिर्नामनिग्रहस्थानंविरुद्धाप्रतिपत्तिर्हिसायदवाच्यस्यवदनमतोदुर्वचनंप्रश्नंमन्यते॥५९॥गार्गीतद्दोषद्वयमपिपरिजिहीर्षन्नाह।सहोवाचयाज्ञवल्क्यएतद्वैतद्यत्पृष्टवत्यसिकस्मिन्नुखल्वाकाशओतश्चप्रोतश्चेति।किंतदक्षरंतन्नक्षीयतेनक्षरतीतिवाऽक्षरंतदक्षरंहेगार्गिब्राह्मणाअभिवदंति·ब्राह्मणाभिवदनकथनेननाहमवाच्यंवक्ष्यामिनचप्रतिपद्येयमित्येवंदोषद्वयंपरिहरत्येवमपाकृतेप्रश्नेपुनर्गार्ग्याःप्रतिवचनंद्रष्टव्यं।ब्रूहिकिंतदक्षरंयद्ब्राह्मणाअभिवदंतीत्युक्तआह।अस्थूलंतत्स्थूलादन्यदेवंतर्ह्यणुअनणुअस्तितर्हिह्रस्वमह्रस्वमेवंतर्हिदीर्घंनापिदीर्घमदीर्घं।एवं·

नाहमवाच्यंवक्ष्यामीनेनाहं
नचप्रतिपद्ये·

यदिदं०श्नोतितद्वैतत्तदितियोजना:

साहोवाचयदूर्ध्वंयाज्ञवल्क्यदिवोयदवाक्पृथिव्यायदंतराद्यावापृथिवीइमेयद्भूतंचभवच्चभविष्यच्चेत्याचक्षतेतस्मिंस्तदोतंचप्रोतंचेति॥५८॥सहोवाचयदूर्ध्वंगार्गिदिवोयदवाक्पृथिव्यायदंतराद्यावापृथिवीइमेयद्भूतंचभवच्चभविष्यच्चेत्याचक्षतआकाशएवतदोतंचप्रोतंचेतिकस्मिन्नुखल्वाकाशओतश्चप्रोतश्चेति॥५९॥सहोवाचैतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोवाय्वनाकाशमसंगम·रसमगंधमचक्षुष्कमश्रोत्रमवागमनोतेजस्कमप्राणममुखममात्रमनंतरमबाह्यंनतदश्नातिकिंचननतदश्नातिकश्चन॥६०॥ ॥

कानि·

यदि चेदेवं वदथ रेतसः प्ररोहतीति मा वोचत नैवं वक्तुमर्हथ कस्माद्यस्माज्जीवतः पुरुषाद्रेतः प्रजायते न मृतात्· अपि च धानारोहो धाना बीजं बीजरुहोपि वृक्षो भवति न केवलं कांडरुह एव· इवशब्दोऽनर्थकः। वृक्षोऽञ्जसा साक्षात्प्रेत्य मृत्वा संभवो धानातोपि प्रेत्य संभवो दंजसा पुनर्वनस्पतिः। यद्यदि सह मूलेन धानया वा सह रुहेयुरुद्यच्छेयुरुत्पाटयेयुर्वृक्षं न पुनराभवेत्पुनरागत्य न भवेत्। तस्माद्वः पृच्छामि सर्वस्यैव जगतो मूलं मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहतीति॥ जात एवेति मन्यध्वं यदि किमत्र प्रष्टव्यमिति। जनिष्यतो हि संभवः प्रष्टव्यो न जातस्य· अयं तु जात एव· अतोऽस्मिन्विषये प्रश्न एव नोपपद्यत इति चेत्। न किं तर्हि मृतः पुनरपि जायत एवान्यथाऽकृताभ्यागमकृतनाशप्रसंगादतो वः पृच्छामि को न्वेनं मृतं पुनर्जनये-

रेतस इति मा वोचत जीवतस्तत्प्रजायते। धानारुह इव वै वृक्षोंजसा प्रेत्यसंभवः। यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत्। मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति। जात एव न जायते को न्वेनं जनयेत्पुनः विज्ञानमानंदं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विद इति॥ ९२॥ ॥नवमं ब्राह्मणं॥ ॥पंचमोऽध्यायः॥ ॥

यत्। तन्न विजज्ञुर्ब्राह्मणाः यतो मृतः पुनः प्ररोहति जगतो मूलं विज्ञानं ब्राह्मणैः। अतो ब्रह्मिष्ठत्वाद्युक्ता गावो याज्ञवल्क्येन जिताः ब्राह्मणाः समासाख्यायिका॥ यज्जगतो मूलं येन च शब्देन साक्षाद्व्यपदिश्यते ब्रह्म यद्याज्ञवल्क्यो ब्राह्मणान् पृष्टवान् तत्स्वेन रूपेण श्रुतिरस्मभ्यमाह विज्ञानं विज्ञप्तिर्विज्ञानं तच्चानंदं न विषयज्ञानवद्दुःखानुविद्धं किं तर्हि प्रसन्नं शिवं अतुलमनायासं नित्यतृप्तमेकरसमित्यर्थः किं तद्ब्रह्मोभयविशेषणवद्रातिः रातेः षष्ठ्यर्थे प्रथमा धनस्य दातुः कर्मकृतो यजमानस्य परमयनं परागतिः कर्मफलस्य प्रदातृ· किं च व्युत्थायैषणाभ्यस्तस्मिन्नेव ब्रह्मणि तिष्ठत्यकर्मकृत्तत्ब्रह्म वेत्तीति तद्विद्तस्य तिष्ठमानस्य च तद्विदो ब्रह्मविद इत्यर्थः परायणमिति।

103

लोभवेत्पाटनं शंकितुमिति वक्तुमशक्यत्वात्· विज्ञानमानंदं ब्रह्म मायाद्वारा जगतो मूलमिति निर्णीतं। एवं सति अज्ञानसमस्त्युपहितं ईश्वराख्यं चैतन्यं जगतो मूलमिति सिद्धं। संभव इत्यर्थस्यार्थकथनं भवेदिति। एतच्छिन्नस्य वृक्षस्य पुनः प्ररोहणं दृश्यते· जगन्मूलं विज्ञानं ब्रह्म ब्राह्मणैर्न ज्ञातं। मत्वं कें। मायाद्वारेति भावः आख्यायिकेति अब्राह्मणाश्च सर्वे यथायथं जग्मुरित्यर्थः। तात्कालवयोवचन इति चानद्य· ब्रह्मणीति· तिष्ठमानस्यात एव तद्विदः ब्रह्मविदः परायणं परमाश्रयः प्रसन्नमिति प्रसन्नं दुःखहेतुना कामक्रोधादिना संबंधरहितं। शिवं कामादिकारणेनाऽज्ञानेनापि संबंधशून्यं। सातिशयत्वप्रयुक्तदुःखराहित्यमाह। अतुलमिति। साध्यसाधनत्वाधीनदुःखवैधुर्यमाह। अनायासमिति। दुःखविनिर्मुक्तमात्रं सुखमिति पक्षं प्रतिक्षिपति नित्यतृप्तमिति। आनंदो ज्ञानमिति ब्रह्मणोऽपाकारभेदमाशंक्याह। एकरसमिति। श्रुतेन प्राप्यत्वं कथयति।

ब्रह्मसंबंधोऽमृतत्वमतीति क्रान्तरस्याभिव्यक्तस्यैवमुक्तोपसस्य
त्वमुपदिशति·। किंचेति। परागतिरित्यस्यैव विवरणं कर्मफलस्य दातृः २

अस्मिन्पक्षे स्वीकृते सति दुःखाभाव एव आत्मनः स्वरूपं स्यात्· तथा च सति आ-
त्मनः अभावत्वप्रसंगः स्यात् इति नित्यतृप्तमित्यनेन पक्षं निराकरोति। २

इदानीं ब्रह्मानंदे विचारमवतारयन्नवे गीतमर्थमाह। तत्रेति। तथापि प्रकृते वापि वाक्ये किं मायानामिति नदाह। अत्रेति। एवमाद्याः श्रुतय इति शेषः। तथापि कथं विचारसिद्धिरत आह। संवेद्येवेति। लोकप्रसिद्धेरयैव श्रुतेश्च ब्रह्मणाप्या:
नंदः संवेद्यो वेति विचारः कर्तव्य इत्यर्थः। उभयत्र फलं दर्शयति। ब्रह्मानंदश्चेति। अन्यथा लोकवेदयोः शब्दार्थभेदाद्विशिष्टस्तु पाक्यार्थ इति न्यायविरोधः। असंवेद्यत्वे पुनरर्थेन श्रुतिरविरुद्धेति भावः। विचारमाक्षिपति। नन्विति। विरुद्ध
श्रुत्यर्थनिर्णयार्थं विचारस्य कर्तव्यतां दर्शयति। नविरुद्धेति। संग्रहवाक्यं विवृणोति। सत्यमित्यादिना। विचारः कर्तव्यतायां हेत्वंतरमाह। मोक्षेति। सुखज्ञानस्य गुणत्वांगीकारात् क्रियावानिराकरणमिच्छमेवेतिमत्वाह। अनु
भूयते त्विति। अनुभवमेवाभिनयति। सुखीति। तथापि श्रुतिविरोधः स्यादित्याशंक्य प्रत्यक्षानुसारेण सापितत्वेत्याशयेनाह। तस्मादिति। आत्मज्ञानेद्यानस्य क्रियात्वानंगीकारात् कारकभेदापेक्षाऽभावादित्यर्थः।
प्रत्यक्षस्य प्रत्यक्षस्याप्युपजीव्यत्वात् आगमस्यापि विरोधिनस्तु [illegible] यत्वादिति आगमस्य [illegible] अथनाविज्ञानादि श्रुतेरिति शेषः। गुणगुणिभावं विना ज्ञानश्रुतिः [illegible] श्रुति। श्राव्यानुमितस्य:

अथेदं विचार्यते ॥ आनंदशब्दो लोके सुखवाचीति प्रसिद्धः। अत्र च ब्रह्मणो विशेषणत्वेनानंदशब्दः श्रूयते आनंदं ब्रह्मेति श्रुत्यंतरे चानंदो ब्रह्मेति व्यजानादानंदं ब्रह्म
णो विद्वान्। यदेष आकाश आनंदो न स्यात् यो वै भूमा तत्सुखमिति च समस्त एष परम आनंद इत्येवमाद्याः। संवेद्ये च सुखे आनंदशब्दः प्रसिद्धः। ब्रह्मानंदश्च यदि संवेद्यः॰
स्याद्युक्ता एते ब्रह्मण्यानंदशब्दाः। ननु च श्रुतिप्रामाण्यात्संवेद्यानंदस्वरूपमेव ब्रह्म किं मत्र विचार्यमिति। न विरुद्धश्रुतिवाक्यदर्शनात्। सत्यमा
नंदशब्दो ब्रह्मणि श्रूयते विज्ञानप्रतिषेधश्चैकत्वे। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येद्विजानीयात्, यत्र नान्यत्पश्यति नान्यद्विजानाति प्राज्ञेनात्मना
संपरिष्वक्तो न बाह्यं किंचन वेदेत्यादिविरुद्धश्रुतिवाक्यदर्शनान्नेन कर्तव्यो विचारस्तस्माद्युक्तं वेदवाक्यार्थनिर्णयाय विचारयितुं। मोक्षवादिविप्र
तिपन्नेश्च सांख्यावैशेषिकाश्च मोक्षवादिनो नास्ति मोक्षसुखं संवेद्यमित्येवं प्रतिपन्नाः। अन्ये निरतिशयं सुखं स्वसंवेद्यमिति। किं तावद्युक्तमानं
दादिश्रवणात् जक्षत्क्रीडन्रममाणः स यदि पितृलोककामो भवति सर्वज्ञः सर्ववित् सर्वान्कामान्समश्नुत इत्यादिश्रुतिभ्यो मोक्षे सुखं संवेद्यमि
ति। नन्वेकत्वे कारकविभागाभावाद्विज्ञानानुपपत्तिः क्रियायाश्चानेककारकसाध्यत्वाद्विज्ञानस्य च क्रियात्वात्। नैष दोषः। शब्दप्रामाण्याद्वे
त्। विज्ञानमानंदविषये विज्ञानमानंदमित्यादीन्यानंदस्वरूपस्यासंवेद्यत्वेऽनुपपन्नानि वचनानीत्यवोचाम। ननु वचनेनाप्यग्नेः शैत्यमुदकस्य
वौष्ण्यं न क्रियत एव ज्ञापकत्वाद्वचनानां। न च देशांतरेऽग्निः शीत इति शक्यते ज्ञापयितुमग्नेर्वा देशांतरेऽस्मदुदकमिति। न प्रत्यगात्मन्यानन्दवि
ज्ञानदर्शनात् विज्ञानमानंदमित्येवमादीनां वचनानां शीतोऽग्निरित्यादिवाक्यवत् प्रत्यक्षादिविरुद्धार्थप्रतिपादकं च। अनुभूयते त्वविरुद्धार्थता
सुख्यहमिति सुखात्मकमात्मानं स्वयमेव वेदयते। तस्मात् श्रुतयः प्रत्यक्षाऽविरुद्धार्थताः। तस्मादानंदं ब्रह्म विज्ञानात्मकं सत् स्वयमेव वेदयते
तथानन्दप्रतिपादकाः श्रुतयः समंजसाः। जक्षत्क्रीडन्रममाण इत्येवमाद्याः पूर्वोक्ताः। न कार्यकरणाभावे तूपपन्ने विज्ञानस्य। शरीरवियोगो हि मो
क्ष आत्यंतिकः। शरीराभावे च करणानुपपत्तिराश्रयाभावात्ततश्च विज्ञानानुपपत्तिरकार्यकरणत्वात्। देहाद्यभावे च विज्ञानोत्पत्तौ सर्वेषां कार्यकरणोपादा॰

[illegible] तस्मादानंदमिति। श्रुतिप्रामाण्यमाश्रित्य पूर्ववादी परिहरति। नैष दोष इति। न दृश्यते स्फुरति विज्ञानमिति। अन्येद्य [illegible] श्रुतिप्रामाण्यादानंदस्य ज्ञानस्य [illegible] क्षिपति। ननु वचनेनेति। नैवेन
तीतिश्रुतीनां विज्ञानक्रियाकारकविभागापेक्षत्वेनोपपद्यते। नहि विज्ञानमानंदमित्यादिवचनानि मानांतरविरोधेन विज्ञानक्रियां ब्रह्मरूपत्वाद्दर्शयंति। तेषां विज्ञापकत्वात्। ज्ञापकस्य चाविरोधापेक्षत्वात्। अन्यथा विसंवादित्यर्थः।
एकमेवाद्वितीयमिति श्रुत्वा संवेद्य व्रतिरेषोऽज्ञायते। परमात्मना संवेद्यः एकमेवाद्वितीयमिति। पिन्नरस्वं। पूर्वपक्षं गृह्णाति। किं तावदित्यादि। आनंदादिश्रवणात्। विज्ञानमानंद ब्रह्मेति श्रुतेर्मोक्षसुखं संवेद्यमिति युक्त
मिति संबंधः। तमेव सुखहेतुत्वेन भोग्यत्वाल्लोका उच्यंते इति शांकरे छांदोग्यभाष्ये। पूर्वपक्षमाक्षिपति। नन्वेकत्व इति। आनंदादिश्रवणात् इत्यारभ्यानंदस्य संवेद्यत्वं यत्तन्निर्णीतं तन्निराकरोति। नेत्यादिना। पूर्वोक्तान् हेतू
तेन ग्रंथेन आनंदस्य। आनंदो ब्रह्मणो विद्वान् इति चोदिते सिद्धांतमाह। नेति। आगंतुकमनागंतुकं वा ज्ञानं मुक्तो आनंदं गोचरयति। नाम इत्याह। कार्येति। अन्यथेति। अर्थं वेद्य वेत्त्वी [illegible] लोके आनंदशब्दः संवेद्या।

नंदवाचकः वेदेतु आनंदशब्दः असंवेद्यानंदवाचः इति कल्पनायां सत्यां शब्दार्थभेदात् ० विरो
धः ओली ७ हानि अविनाशि

द्वितीयं दूषयति । एकत्वविरोधाद्वेति । नहि ब्रह्मस्वरूपज्ञानेनैव वेद्यानंदरूपं भवितुमुत्सहते । विषयविषयिणोरेकत्वविरोधात् । ननु तस्यानागंतुकमपि ज्ञानं मुक्तौ नानंदमक्षि करोतीत्यर्थः । किंच ब्रह्म वा मुक्तो वा संसारी वा ब्रह्मानंदं गोच
रयेत् तत्राद्यमनुवदति । परं चेदिति । एतस्मिन्पक्षे ब्रह्मस्वरूपानंदं न वेत्ति । तेनैक्यात् । एकत्र विषयविषयित्वानुपपत्तेरेकत्वादिति दूषयति । नन्वेति । नापि संसारी ब्रह्मानंदं गोचरयति । स खलु अनिष्टं न संसा
रिणमात्मानमभिमन्यमानो न ब्रह्मानन्दं कलयितुमलं संसारे निहते तु ततः विनिर्मुक्तः । ब्रह्मस्वाभाव्यं प्रतिपद्यमानस्तदानंदं न द्रष्टुं च विषयीकर्तुं नार्हतीति तृतीयं प्रत्याह । संसार्यपीति । तत्त्वमस्यादिश्रुतिविरो
धेन निराकरोति । न चेति । मुक्तोऽपि ब्रह्मणोऽभिन्नो भिन्नो वेति विकल्प्य ब्रह्मणाऽभिन्नस्य मुक्तस्य तदानन्दविषयीकरणासम्भवान्न्यायेन निरस्यति । तदेति । भेदपक्षमनुवदत्यथेति । ब्रह्मानंदं प्रत्यगात्मानमिति संबंधः
विज्ञानस्यात्मविज्ञानेनेति । आत्मनो विज्ञानस्य छिद्रस्य विज्ञानस्यांतरालसत्त्वावस्थानदपि विज्ञानमस्ति चेत् तस्यान्यविषयत्वप्रसंग । तथा च यत्रान्यत्पश्यतीत्यादिश्रुतेरात्मनोऽमर्त्यत्वात्पीडा न चेत् तदा विज्ञा
नं तदा पाषाणवदचेतनत्वं विज्ञप्तिरूपत्वानंगीकारादित्यर्थः । मुक्तो ब्रह्मणः सकाशादभिन्नोऽभिन्नो वा माभूत् भिन्नाभिन्नात्मकस्यादित्याशंक्याह । तृतीयाकल्पनेति । सर्वत्र भेदाभेदवादस्य दूषितत्वादित्यर्थः । आ
ख्यानं स्वानन्दस्यावेद्यत्वे हेत्वंतरमाह । किंचान्यदिति । तदेवोपपादयति निरंतरं चेति । आख्यातप्रयोगस्य तर्हि कुत्रार्थवत्त्वं तत्राह । अतद्विज्ञानेति देवदत्तो हि बुद्धिपूर्वकारित्वावस्थायां स्वात्मानमन्यं चाविधिं

नापि संसारीत्यादिना
अलं इत्युक्तेन [illegible] ब्रह्मा
नन्दस्य संसारिवेद्य
त्वं प्रत्याख्यातं ।
संसारे निहत इत्यादिग्र
न्थेन आनन्दस्य मुक्तसं
वेद्यत्वं प्र[illegible]त्याख्यातं
यदा मुक्त ब्रह्माभिन्न

नानर्थक्यप्रसंगः । तन्न संसार्यपि संसारविनिर्मुक्तः स्वाभाव्यं प्रतिपद्यते जलाशय इवो· एकत्वविरोधात् । परं चेद्ब्रह्मानन्दात्मकमात्मानं नित्यविज्ञानत्वान्नित्यमे
व विजानीया उदकांजलिप्रक्षिप्तो न पृथक्त्वेन अवतिष्ठते आनंदात्मकब्रह्मविज्ञानाय तदा मुक्त आनंदात्मकमात्मानं वेदयत इत्येतदनर्थकं वाक्यं । अथ ब्र
ह्मानंदमन्यः सन्मुक्तो वेदयते प्रत्यगात्मानं चाहमस्म्यानन्दस्वरूप इति तदेकत्वविरोधस्तथा च सति सर्वश्रुतिविरोधः । तृतीया च कल्पना नोपपद्यते । किं
चान्यद्ब्रह्मणश्च निरंतरात्मानंदविज्ञाने विज्ञानाविज्ञानकल्पनानर्थक्यं । निरंतरं चेदात्मानंदविषयं ब्रह्मणो विज्ञानं तदेव तस्य स्वभाव इत्यात्मानंदं
विजानातीति कल्पनानुपपन्ना । अतद्विज्ञानप्रसंगो हि कल्पनाया अर्थवत्त्वं यथात्मानं परं च वेत्तीति । नहि द्व्याद्यासक्तमनसो नैरंतर्येण विज्ञानाज्ञान
कल्पनायामर्थवत्त्वं । अथ विच्छिन्नमात्मानं विजानातीति विज्ञानस्यात्मविज्ञानच्छिद्रेऽन्यविषयत्वप्रसंगः । आत्मनश्च विक्रियावत्त्वं ततश्चानि
त्यत्वप्रसंगः । तस्माद्विज्ञानमानन्दमिति स्वरूपाख्यानपरैव श्रुतिर्नात्मानंदसंवेद्यत्वार्था । जक्षत्क्रीडन्नित्यादिश्रुतिविरोधोऽसंवेद्यत्वे इति चेत्
न सर्वात्मैकत्वे यथाप्राप्तानुवादित्वात् । मुक्तस्य सर्वात्मभावे सति यत्र क्वचिद्योगिषु देवेषु वा जक्षणादि प्राप्तमेवानूद्यते तत्तस्यैव सर्वात्मभावादिति ।
सर्वात्मभावमोक्षस्तुतेयोः यथाप्राप्तानुवादित्वे दुःखित्वमपीति चेत् । यो यदि ह्यत्र यथाप्राप्तं जक्षणादि तत्स्थावरादिषु यथाप्राप्तं दुःखित्वमिति
चेत् । न नामरूपकृतकार्यकरणोपाधिसंपर्कजनितभ्रान्त्यध्यारोपितत्वात् । सुखदुःखित्वादिविशेषस्येति परिहृतः मन्तव्यं विरुद्धश्रुतीनां च
विषयमवोचाम ॥ तस्मादेषोऽस्य परमानंद इति वत्सर्वोपानंदवाक्यानि व्याख्यानि ॥ ॥२८॥ ॥ श्रीगोविंदभगवत्पूज्यपादशिष्यस्य परम
हंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ बृहदारण्यकटीकायां पंचमोऽध्यायः समाप्तः ॥ ॥ श्रीमते रामानुजाय नमः ॥ ॥

विज्ञानस्यात्मानीति
विषयत्वप्रसंगः

एकस्यैव वेद्यत्ववेदितृत्ववि
रोधात् · देवदत्तो न कर्त्ता:

विजानातीति तद्रूपं यद्दत्वं
न मन्तव्यं ·

एषोऽस्य परमानंदः
मात्मैवानन्दः

ब्रह्मणो ज्ञानिनः

104

विजानातीति । नात्र हेतुरुभयथादर्शनात्तत्राख्यातप्रसंगो ह्युभयनेवं ब्रह्मणो ज्ञानप्रसंगोऽस्ति । नित्यज्ञानस्वभावत्वात्तथा च तत्राख्यातप्रयोगो नार्थवानित्यर्थः । ब्रह्मण्याख्यातप्रयोगानर्थक्यं दृष्टांतेन स्पष्टयति
नहीति । अभिन्नः सन्परमात्मानं वेदयत इति कल्पना स्यात् पक्षान्तरे अन्यः सन्परमात्मानं वेदयत इति कल्पना स्यात् । तृतीयकल्पना प्रत्यगात्मनि नित्यज्ञानासिद्धिं शंकयति । अथेति । विच्छिन्नमिति क्रियाविशेषणं । प
रिहरति । विज्ञानस्येति । ब्रह्मण्यानंदस्यावेद्यत्वे श्रुतिविरोधमुक्तं । तृतीयकल्पनानोपपद्यते । [illegible] एवेति जक्षदिति । सर्वत्रात्मनो मुक्तस्य पश्यन्ति योगयादिषु यथा जक्षणादि प्राप्तं तथैव तत्स्तुवादित्वादस्याः श्रुतेर्न
विरोधोऽस्तीति परिहरति । नेत्यादिना । वक्ष्यविरुद्ध । तदेव प्रपंचयति । मुक्तस्येति । मिथ्याज्ञानाधीनत्वादात्मदुःखित्वादि प्रतीतेन तत्त्वतस्तदुःखित्वं न च जक्षणाद्यपि वास्तवं । अविद्यस्यैव मुक्तिस्तुतयेनुवादादिति परिहरति
श्रुतिहृत्तु दीमत्यार्थो निरोधो नाभवतीति तत्राह । सर्वविरुद्धेति । वेद्यावेद्यत्वश्रुतीनां समाधिकानिरूपाधिकविषयत्वेन मधुकांडे व्यवस्थापितत्वादित्यर्थः । प्रासंगिकार्थमुपसंहरति । तस्मादिति । ब्रह्मण्यानंदस्य वेद्यतायाः पुनिरूप
त्वं तेन विवक्षितसर्वात्मभावस्य प्रकृतत्वात्तथा विज्ञानादिवाक्ये व्याख्यानं स्यैव यत्तानाविवक्षिता । उक्तरीत्यान दवेद्यताया प्रतिपादनात्तस्मादतिशयानंदं चिदेव सानंदस्त्वसिद्धमित्यर्थः ॥

पूर्वस्मिन्नध्याये ऽस्यान्याये न सविंत्त ब्रह्माणि निर्द्धारितानि । तस्मादन्यायेन तदेव निर्द्धारयितुमध्यायान्तरमवतारयति । जनक इति । न च वाक्यान्तराद्यस्यावान्तरसंबंधं प्रतिजानीते । अस्येति । तमेव वक्तुं हृत्तं कीर्त्तयति । शारीराद्यानि निरूप्य हृ
हृतिवित्तार्थं व्यवहारिताप्राप्त्यर्थः । प्रत्युह्य हृदयं पुनरुपसंहरिष्यति यावत् । अनन्तरं ज्ञानराक्षमात्यर्थमाह । तस्येवेति । वागाद्यधिष्ठात्र्यग्न्यादिदेवतासु ब्रह्मदृष्टिकारणमर्थः आचार्यस्य तत्र ज्ञानादिसंपन्नविद्यालक्षे
अन्याचारः यथा [illegible] राजानं प्रति आह किंस्विदिति । आयतनप्रतिष्ठयोरेकत्वानुक्तिमाह [illegible] आयतनं नामेति । न च राजानं प्रति ब्रह्म अनुज्ञापयति । कीत्विति । स्वयं वा प्रश्नयायेन

जनको ह वैदेह आसांचक्रे । अस्य संबंधः शारीरब्राह्मणे ऽपि कृतमान्निरूप्य ब्रह्म स पुनर्हृदये यदि हृदभेदेन च पुनः पंचधा [illegible] हृदये प्रत्युह्य हृदयं शारीरं च पुनरन्योन्यप्रतिष्ठित
आसाते दृष्टं च हृत्यात्मके समानाख्ये जगदात्मनि सूत्रे उपसंहृत्य जगदात्मानं शरीरहृदयस्थं ज्ञानस्य सति ज्ञानेनानुपयो औपनिषदः पुरुषो नेति नेतीति व्यपदिष्टः
साक्षाद्योपादानकारणस्वरूपेण च निर्दिष्टं विज्ञानमानन्दमिति । तस्येव वागादिदेवताद्वारेण पुनरधिगमः कर्त्तव्य इत्यधिगमस्योपायान्तरार्थो ऽयमारंभो
ऽसम्भवाव्यस्याः स्थापिकान्वाचारप्रदर्शनार्थाः । जनको ह वैदेह आसांचक्रे आसनं कृतवान् । स्थापिकादसनवानित्यर्थः दर्शनकामेभ्यो राज्ञो ऽथ ह तस्मिन्न
वसरे याज्ञवल्क्य आवव्राजागतवान् नाम [illegible] योगक्षेमार्थं [illegible] आवाविविदिषाद्दृष्ट्वानुग्रहार्थं तमागतं याज्ञवल्क्यं यथावत्पूजां कृत्वोवाच होक्तवान् जनको
हे याज्ञवल्क्य किमर्थमचारीः [illegible] पशूनिच्छन् [illegible] आहोस्वित् [illegible] सूक्ष्मवस्तुनिर्णयान्तान् प्रश्नानुमन्त्र्यः श्रोतुमिच्छन्निति उभयमेव पशू
न् प्रश्नांश्च सहत्वा हृत्सहस्त्वा ऽत्तिवाजपेययाजिनो लिंगाः समस्तस्य वाभाऽतवर्षस्य राजा ॥ १ ॥ किंतु यत्ते तुभ्यं कश्चिदब्रवीत् तवाचार्यो ऽनेकाचार्यसेवी हि भगा

ॐ जनको ह वैदेह आसांचक्रे ऽथ याज्ञवल्क्य आवव्राज तं होवाच याज्ञवल्क्य किमर्थमचारीः पशूनिच्छन्नण्वन्तानिति उभयमेव सम्राडिति
होवाच ॥ १ ॥ यत्ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तत्
शैलिनिरब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मे ऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि या
ज्ञवल्क्य वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत का प्रज्ञता याज्ञवल्क्य

वान्त [illegible] एवामइति · इतर आह । अब्रवीदुक्तवान्मे जित्वाना
म नामतः शैलिनस्यापत्यं शैलिनिः वाग्ब्रह्मेति वाग्देवता ब्रह्मेति [illegible] आहेतरो यथा मातृमान्माता यस्य विद्यते पुत्रस्य सम्यगनुशासनकर्त्री स मातृमान् तत उर्ध्वं
पिता यस्यानुशास्ता स पितृमानुपनयनादूर्ध्वमासमावर्त्तनादाचार्यो यस्यानुशास्ता स त्वाचार्यवानेवं शुद्धित्रयहेतुसंयुक्तः स साक्षादाचार्यः स्वयं न कदाचिदपि प्रामाण्यमभि
चरतीति स यथा ब्रूयात्कि [illegible] तथा ऽसौ जित्वा शैलिनिरुक्तवान् वाग्वै ब्रह्मेत्यवदतो हि किं स्यादिति । न हि मूकस्येहार्थममुत्रार्थं वा किंचन स्यात् · किंत्वब्रवीदुक्तवान् ते तुभ्यं तस्य
ब्रह्मण आयतनं प्रतिष्ठां वायतनं नाम शरीरं प्रतिष्ठा त्रिष्वपि कालेष्वाश्रयः · आहेतरो न मे ऽब्रवीदिति इतर आह यद्येकमेकया द्वारा नैकः पादो ऽस्य ब्रह्मण एतदिदमेकपात् ब्रह्म त्रि
भिः पादैर्भूत्यमुपास्यमानमपि न फलाय भवतीत्यर्थः यद्येवं स त्वं विद्वान्सन्नो ऽस्मभ्यं ब्रूहि हे याज्ञवल्क्य इति स होवाच वागेवायतनं वाग्देवस्य ब्रह्मणो वागेव करणमायत
नं शरीरमाकाशो ऽव्याकृताख्यः प्रतिष्ठा उत्पत्तिस्थितिलयकालेषु प्रज्ञेत्येनदुपासीत · प्रज्ञेतीयमुपनिषद्ब्रह्मणश्चतुर्थपादः प्रज्ञेति कृत्वा ऽस्य तद्ब्रह्मोपासीत का प्रज्ञता याज्ञव
किं वाग्ब्रह्मैव प्रज्ञा ल्क्य · किं स्वयमेव प्रज्ञेति प्रज्ञानिमित्तं · । यथायतनप्रतिष्ठे ब्रह्मणो ऽव्यतिरिक्ते तद्वत् किं न · रहस्यं

ब्रह्मचर्यसमावर्त्तपर्यंतं
उक्तवान् किं इति रकृति ·
वागिंद्रियं ·

पशूनन्नभ्रश्रवणानि चेच्छन् : वागधिष्ठात्री अग्निरूपा देवता [illegible] उपासनं · परं त्वित्यर्थः ॥ ।
अतिक्रमणांत गुणदोषास्वरक्षन् · सत्यवस्तुनिर्णय अंते येषां तान् । औपनिषदस्य पुरुषस्य · आसनं भवान [illegible] प्रियोगम्या [illegible] रक्षणाक्षमः भरतखंडस्यः भारतस्य वर्षस्याहिमवत्सेतुपर्यंतस्य देशस्येति यावत् । ।

नहि किंचनत्यर्थः

वागधिष्ठात्र्या देवतायाः ·

बृ॰ भा॰
१०५

मुपहारवलिदानसमर्पणं। आदिशब्देन स्रक्चंदनवस्त्रालंकारादिग्रहः। यथावाग्नेर्देवतांतःच्छिदित्याह। पूर्ववदिति। प्राण एवायतनमित्यत्र प्राणशब्दः करविषयः। उभयो जातिविशेष। आदिशब्देन श्लेष्मगणो गृह्य
ते। वैश्या ब्राह्मणस्तु राजन्या माहिषो गोसुतोऽस्मृतो॥ काण्व्यो इन्द्रियविषयः। रजोगुणप्रधाना छाया परिगणिं इय रमिति वेदासारे। यागो हुतं २ धर्मजातं ३ वायोः प्राणस्य चैकत्वं प्रसिद्धम् स्तीनिस्यार्थयेत्यादिकस्य अ संगत्वं नैव शंक्यं

कथं तर्हि वागेव सम्राडिति होवाच। वागेव प्रज्ञेति ह उवाच उक्तवान् न अतिरिक्ता प्रज्ञेति कथं पुनर्वागेव प्रज्ञेत्युच्यते वाचा वै सम्राड् बंधुः प्रज्ञायतेऽस्माकं बंधुरित्युक्ते प्रज्ञायते बंधुः तथा ऋग्वेदादि इष्टं यागनिमित्तं धर्मजातं हुतं होमनिमित्तं चाशितमन्नदाननिमित्तं चापिपानदाननिमित्तमयं लोकः इदं च जन्म परश्च लोकः प्रतिपत्तव्यं जन्म सर्वाणि च भूतानि वाचा वै सम्राट् प्रज्ञायंते। अतो वाग्वै सम्राट् परमं ब्रह्म नैनं यथोक्तब्रह्मविदं वाग्जहाति। सर्वाण्येनं भूतान्यभिक्षरंति बलिदानादिभिरिहदेवो भूत्वा पुनः शरीरपातोत्तरकालं देवानप्येति य एवं विद्वानेतदुपास्ते। विद्यानिष्क्रियार्थं हस्तितुल्यः ऋषभो हस्त्यृषभः यस्मिन् गोसहस्रे तत्सहस्रं हस्त्यृषभं सहस्रं ददामीति होवाच जनको ह वैदेहः स होवाच याज्ञवल्क्यः अननुशिष्य शिष्यं कृतार्थमकृत्वा शिष्याद्धनं न हरेतेति मम पिताऽमन्यत। ममाप्य

वागेव सम्राडिति होवाच वाचा वै सम्राड् बंधुः प्रज्ञायत ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायंते वाग्वै सम्राट् परमं ब्रह्म नैनं वाग्जहाति सर्वाण्येनं भूतान्यभिक्षरंति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति॥ २ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्म उदंकः शौल्बायनः प्राणो वै ब्रह्मेति यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेति प्राणतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य प्राण एवायतनमाकाशः प्रतिष्ठा प्रियमित्येनदुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राडिति होवाच प्राणस्य वै सम्राट् कामाया प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहाति सर्वाण्येनं भूतान्यभिक्षरंति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति॥ ३॥

यमेवाऽभिप्रायः॥ २॥ यदेव ते कश्चिदब्रवीदुदंको नामनामतः शुल्बस्यापत्यं शौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेति प्राणो वायुर्देवता पूर्ववत् प्राण एवायतनमाकाशः प्रतिष्ठा उपनिषत् प्रियं इत्येतदुपासीत कथं पुनः प्रियत्वं प्राणस्य वैदेह सम्राट् प्राणस्य कामायाऽर्थाय अयाज्यं याजयति पतितादिं अप्रतिगृह्यस्याप्युग्रादेः प्रतिगृह्णात्यपि तत्र तस्यां दिशि वधनिमित्तमाशंकं वधाशंके इत्यर्थः। यां दिशमेति तस्कराद्याकीर्णामपि तस्यां दिशि वधाशंकं तत्सर्वं प्राणस्य प्रियत्वे भवति। प्राणस्य वै सम्राट् कामाय तस्मात्प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहाति समानमन्यत्॥ ॥३॥ ॥

105

शिवः
१०५

पतितादीनित्यर्थः अविशेषणं ३ हे सम्राट् प्राणस्य कामाय तस्कराद्याकीर्णायां दिशि यां एति तत्र तस्यां दिशि वधनिमित्त आशंकं
वधाशंकेत्यर्थः। तस्यां दिशि वधाशंका भवति। तत्सर्वं प्राणस्य प्रियत्वे भवति। २

२०१

दिशामानंत्यपि श्रोत्रस्य किमायातं तत्राह । श्रोत्रस्यानंत्यं यदुक्तं तत्र दिश एव । गर्द्दशब्देन गर्दनं गर्दः गर्द्देन शब्देन भीः विपीता । नाशिता यस्य सः यस्माच्चक्षुषा दृष्टं सत्यं भवति तस्मात् १ चक्षुःशब्देन चक्षुरधिष्ठात्री आदित्यो

यदेव ते कश्चिदब्रवीदिति नामतः वृष्णस्यापत्यं वार्ष्णश्चक्षुर्वै ब्रह्मेति चक्षुरादित्यो देवता चक्षुषि उपनिषत्सत्यं यस्माच्छ्रोत्रेण श्रुतमनृतमपि स्यान्नतु चक्षुषा दृष्टं तस्माद्वै सम्राट् पश्यंतमाहुरद्राक्षीस्त्वं हस्तिनमिति स चेद्द्राक्षमित्याह तत्सत्यं यस्त्वन्यो ब्रूयादहमश्रौषमिति तद्व्यभिचरति यत्तु चक्षुषा दृष्टं तदव्यभिचारित्वात्सत्यमेव भवति ॥ ४ ॥ यदेव ते गर्दभीविपीत इति नामतः भारद्वाजो गोत्रतः श्रोत्रं वै ब्रह्मेति श्रोत्रे दिग्देवतानंतमित्येतदुपासीत कानंतता श्रोत्रस्य दि·

यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे वर्कुर्वार्ष्णश्चक्षुर्वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्वार्ष्णोऽब्रवीच्चक्षुर्वै ब्रह्मेत्यपश्यतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य चक्षुरेवायतनमाकाशः प्रतिष्ठा सत्यमित्येतदुपासीत का सत्यता याज्ञवल्क्य चक्षुरेव सम्राडिति होवाच चक्षुषा वै सम्राट् पश्यंतमाहुरद्राक्षीरिति स आहाद्राक्षमिति तत्सत्यं भवति चक्षुर्वै सम्राट् परमं ब्रह्म नैनं चक्षुर्जहाति सर्वाण्येनं भूतान्यभिक्षरंति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४ ॥ यदेव ते कश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मे गर्दभीविपीतो भारद्वाजः श्रोत्रं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य श्रोत्रमेवायतनमाकाशः प्रतिष्ठाऽनंत इत्येतदुपासीत कानंतता याज्ञवल्क्य दिश एव सम्राडिति होवाच तस्माद्वै सम्राडपि यां कांच दिशं गच्छति नैवास्या अंतं गच्छत्यनंता हि दिशो दिशो वै सम्राट् श्रोत्रꣳ श्रोत्रं वै सम्राट् परमं ब्रह्म नैनꣳ श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरंति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ५ ॥ ॥ ॥

दिश एव श्रोत्रस्यानंत्यं यस्मात्तस्माद्वै सम्राट् प्राचीमुदीचीं वा यां कांचिदपि दिशं गच्छति नैव तस्या अंतं गच्छति कश्चिदप्यतोऽनंता दिशः दिशो वै सम्राट् श्रोत्रं तस्माद्दिगानंत्यमेव श्रोत्रस्यानंत्यं ॥ ५ ॥ ॥ देवतेत्यर्थः प्रथमा बहुवचनं । कथं दिशामानंत्यं तत्राह । यस्माद्दिश आनंत्यं तस्मादनंता दिशः ॥ ॥ रामरामरामरामरामरामराम ॥

कथंहृदयस्यसर्वभूतायतनत्वंतत्प्रतिष्ठात्वंचतदाह।नामरूपेति।हृदयमाश्रयोऽवलंबनंयेषांतानि।हृदयंप्रतिष्ठानिवासस्थानंयेषांतानि।शाकल्यब्राह्मणोक्तस्मिन्प्रतिष्ठितमित्यस्यकिमाश्रित्य

सत्यकामइतिनामतोजबालायाअपत्यंजाबालःश्रुतंमामनस्त्विदेवतानंदहेतुरुपनिषत्।यस्मान्मनएवानंदस्तस्मान्मनसावैसम्राट्स्त्रियमभिकामयमानोभिहार्यते
प्रार्थयतइत्यर्थः।तस्माद्यांस्त्रियमभिकामयानोभिहार्यतेतस्यांप्रतिरूपोनुरूपःपुत्रोजायते।सआनंदहेतुःपुत्रःसयेनमनसानिर्वर्त्यतेतन्मनःआनंदः।६॥

यदेवतेकश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मेसत्यकामोजाबालोमनोवैब्रह्मेतियथामातृमान्पितृमानाचार्यवान्ब्रूयात्तथातज्जाबालोब्रवी
न्मनोवैब्रह्मेत्यमनसोहिकिꣳस्यादित्यब्रवीत्तुतेतस्यायतनंप्रतिष्ठांनमेब्रवीदित्येकपाद्वाएतत्सम्राळितिसवैनोब्रूहियाज्ञवल्क्यमनए
वायतनमाकाशःप्रतिष्ठानंदइत्येनदुपासीतकानंदतायाज्ञवल्क्यमनएवसम्राळितिहोवाचमनसावैसम्राट्स्त्रियमभिहार्यतेतस्यांप्र
तिरूपःपुत्रोजायतेसआनंदोमनोवैसम्राट्परमंब्रह्मनैनंमनोजहातिसर्वाण्येनंभूतान्यभिक्षरंतिदेवोभूत्वादेवानप्येतियएवं
विद्वानेतदुपास्तेहस्त्यृषभꣳसहस्रंददामीतिहोवाचजनकोवैदेहःसहोवाचयाज्ञवल्क्यःपितामेमन्यतनाननुशिष्यहरेतेति॥ =
६॥यदेवतेकश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मेविदग्धःशाकल्योहृदयंवैब्रह्मेतियथामातृमान्पितृमानाचार्यवान्ब्रूयात्तथातच्छा
कल्योब्रवीद्धृदयंवैब्रह्मेत्यहृदयस्यहिकिꣳस्यादित्यब्रवीत्तुतेतस्यायतनंप्रतिष्ठांनमेब्रवीदित्येकपाद्वाएतत्सम्राळितिसवैनोब्रूहि
याज्ञवल्क्यहृदयमेवायतनमाकाशःप्रतिष्ठास्थितिरित्येनदुपासीतकास्थितितायाज्ञवल्क्यहृदयमेवसम्राळितिहोवाचहृद
यंवैसम्राट्सर्वेषांभूतानामायतनꣳहृदयंसम्राट्सर्वेषांभूतानांप्रतिष्ठाहृदयेह्येवसम्राट्सर्वाणिभूतानिप्रतिष्ठितानि
भवंतिहृदयंवैसम्राट्परमंब्रह्मनैनꣳहृदयंजहातिसर्वाण्येनंभूतान्यभिक्षरंतिदेवोभूत्वादेवानप्येतियएवंविद्वानेतदुपा
स्तेहस्त्यृषभꣳसहस्रंददामीतिहोवाचजनकोवैदेहःसहोवाचयाज्ञवल्क्यःपितामेमन्यतनाननुशिष्यहरेतेति॥७॥ ॥

प्रथमंब्राह्मणम्॥

आयतनमाश्रयः

विदग्धःशाकल्योहृदयंवैब्रह्मेतिहृदयंवैसम्राट्सर्वेषांभूतानामायतनं।नामरूपकर्मात्मकानिहिभूतानिहृदयाश्रयाणीत्यवोचामशाकल्यब्राह्मणेहृदय
प्रतिष्ठानिचेति।तस्माद्धृदयेह्येवसम्राट्सर्वाणिभूतानिप्रतिष्ठितानिभवंति।तस्माद्धृदयंस्थितिरित्युपासीत।हृदयेचप्रजापतिर्देवता॥७॥प्रथमंब्राह्मणम्। ॥

प्रजापतिर्ब्रह्मा:

कस्थितमित्यर्थः।मनसआनंदत्वंसाधयति।मनसावैइत्यादिना।तथापिकथंमानन्दत्वंमनसःसंभवतीत्यताह।सयेनेति।मनसआनंदहेतुरुपनिषद्।येनहृदयस्यसर्वभूतायतनत्वंतेनतदधिष्ठात्र्याः

देवतायाःप्रजापतिरूपायाःअपिसर्वभूतायतनत्वंबोध्यं

चंद्रचतुर्मुखशंकराच्युतैःक्रमान्नियंत्रितेनमनोबुद्ध्यहंकारचित्ताख्येनांतरिंद्रियचतुष्केणक्रमात्संकल्पनिश्चयाहंकार्यचैत्यांश्चानुभवनइतिवेदांतसारः १

परि२

पूर्वस्मिन्ब्राह्मणोक्तानि चिदुपासनानि ज्ञानसाधनान्युक्तानि। इदानीं तैः साधनैर्ज्ञेयस्य ब्रह्मणो जागरादि द्वारा ज्ञानार्थं प्राप्तमन्तरमवतारयति। जनको हेति। जागराद्यभिमानि विश्वादि द्वारा। अभिसमनुशासनं कर्तुं आत्मज्ञानस्य फलाभासहेतुत्वोक्तद्वारा परमफलहेतुरात्मज्ञानमेवेति विवक्षितत्वात्तद्राज्ञो जिज्ञासामापादयति। स हेत्यादिना। यथोक्तगुणसंपन्नश्चेदहं तर्हि कृतार्थत्वान्नैमेकर्त्तव्यमस्तीत्याशंक्याह। एवमिति। अपेक्षितमथशब्दसूचितं पूरयति। यद्येवमिति। ब्रह्मतां अथ यद्येवं न जानीषे तर्हि अहं वे० ष्यसीति। यत्र गतः अहं कृतार्थः स्यां भविष्यामीत्यर्थः तद्ब्रवीतु भवानिति।

जनको ह वैदेहः यस्मात्त्वं विशेषणानि सर्वाणि ब्रह्मणि ज्ञातानि याज्ञवल्क्य तस्मादाचार्यत्वं हित्वा जनकः कूर्चादासनविशेषादुत्थायोपसमीपमवसर्पन्पादयोर्निपतन्नित्यर्थः॥ उवाच उक्तवान्नमस्तेऽस्तु हे याज्ञवल्क्यानु मा शाधि अनुशाधि मामित्यर्थः। इति शेषो वाक्यसमाप्त्यर्थः। स होवाच याज्ञवल्क्यो यथा वै लोके हे सम्राट् महान्तं दीर्घमध्वानमेष्यन् गमिष्यन् रथं वा स्थलेन गमिष्यन्नावं वा जलेन समाददीत एवमेतानि ब्रह्मणोपेताभिरुपनिषद्भिर्युक्तानुपासीनः एतेषामुपासनां कुर्वन् समाहितात्मासि। अत्यन्तमेताभिरुपनिषद्भिः संयुक्तात्मासि। न केवलं तूपनिषत्समाहित एव वृन्दारकः पूज्यश्चाढ्यश्चेश्वरो न दरिद्र इत्यर्थः। अधीतवेदः अधीतो वेदो यस्य सोऽयमधीतवेदः। उक्ताश्चोपनिषदः आचार्यैस्तुभ्यं सन्नवमुक्तोपनिषत्कः एवं सर्वविभूतिसंपन्नोऽपि सन्भयमध्यस्थ एव परमात्मज्ञानेन विना कृतार्थ एव तावदित्यर्थः। इतोऽस्माद्देहाद्विमुच्यमानस्त्वमेताभिर्नौरथस्थानीयाभिः समाहितः क्व कस्मिन्गमिष्यसि किं वस्तु प्राप्स्यसीति। नाहं तद्वस्तु भगवन्वेद जाने इत्यर्थः यत्र गमिष्यामीति। अथ यद्येवं न जानीषे यत्र गतः कृतार्थः स्यां अहं वै ते तुभ्यं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति॥ १ ॥ परि

जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच। नमस्तेऽस्तु याज्ञवल्क्यानु मा शाधीति स होवाच यथा वै सम्राण्महान्तमध्वानमेष्यन्रथं वा नावं वा समाददीतैवमेवैताभिरुपनिषद्भिः समाहितात्मास्येवं वृन्दारक आढ्यः सन्नधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति नाहं तद्भगवन्वेद यत्र गमिष्यामीत्यथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति॥ १ ॥ इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा एतमिन्धꣳ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः॥ २ ॥ अथैतद्वामेऽक्षणि पुरुषरूपमेषास्य पत्नी विराट्तयोरेष सꣳस्तावो य एषोऽन्तर्हृदय आकाशोऽथैनयोरेतदन्नं

यदि प्रसन्नो मां प्रति भवान् इन्धो ह वै नामैष इन्ध इत्येवंनामा यः चक्षुर्ब्रह्मेति पुरोक्त आदित्यान्तर्गतः पुरुषः स एव योऽयं दक्षिणेऽक्षन्नक्षणि विषयान्प्रेक्षमाणोऽवस्थितः सत्त्वसत्त्वनामा तं वा एतं पुरुषं दीप्तिगुणत्वादिन्ध इत्येवंनामानं सन्तमिन्द्र इत्याचक्षते परोक्षेण यस्मात्परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः प्रत्यक्षनामग्रहणं द्विषन्ति एवं त्वं वैश्वानरमात्मानं संपन्नोऽसि॥ २ ॥ अथैतद्वामेऽक्षणि पुरुषरूपमेषास्य पत्नी यं त्वं वैश्वानरमात्मानं संपन्नोऽसि तस्यास्येन्द्रस्य भोक्तुर्भोग्या एषास्य पत्नी विराडन्नं भोग्यत्वादेव। तदेवदन्नं चात्मा चैकं मिथुनं स्वप्ने। कथं तयोरेष इन्द्राण्योरिन्द्रस्य चैष संस्तावः संभूय यत्र संस्तवं कुर्वाते अन्योन्यं यस्य स संस्तावो कोऽसौ य एषोऽन्तर्हृदय आकाशोऽन्तर्हृदये हृदयस्य मांसपिण्डस्य मध्ये। अथ य एनयोरे

विश्वतैजसप्राज्ञानुवादेन तुरीयं ब्रह्म दर्शयितुमादौ विश्वमनुवदति इन्धः इति। एकस्यैव वैश्वानरस्योपासनार्थं प्रासंगिकमिदं इन्द्रश्चेन्द्राणी चेति मिथुनं कल्पयति। अथेत्यादिना। प्रासंगिकध्यानाधिकारार्थोऽथशब्दः। यदेतन्मिथुनं जाग्रति विश्वशब्दितं तदेवैकं स्वप्ने तैजसशब्दवाच्यमित्याह। तदेतदिति। तेन समाधिकृत्य पृच्छति कथमिति। किं तस्य स्थानं पृच्छ्यते अन्नं वा प्रावरणं वा मार्गो वेति विकल्प्य आद्यं प्रति आह तयोरिति। द्वितीयं प्रति आह। अथेति। प्रावरणं पृच्छ्यते तत्राह किं चान्यदिति। चक्षुर्ब्रह्मेत्युपासकः एवं त्वं वैश्वानरमादित्यान्तर्गतं [illegible] आत्मानं संपन्नोऽसि प्राप्तोऽसि कोऽसौ इन्धनामेति चेत्तत्राह चक्षुरिति। अधिदैवतं पुरुषमुक्त्वा अध्यात्मं दर्शयति। योऽयमिति। तस्य पूर्वस्मिन्नपि ब्राह्मणे उक्तत्वमाह। सर्वेति। प्रकृतं पुरुषं विद्वांसं मतिमाह। तं वा एतमिति।

[illegible] स्थितिः लोहितादिरसाख्यं वस्तु अभ्यमाः

२२ तस्मात्त्वमपि सर्वात्मानं प्रत्यगात्मानमुपसंहृत्य तुरीयमात्मानमनुप्रवेश्य माश्रयन्प्राप्स्यसीत्यर्थः प्रत्यगात्मनि परमात्मनीत्यर्थः २३

उपाध्युपहितयोरेकत्वमाश्रित्योच्यते यथैतत्समिति । इहेति । इंद्रेंद्राण्योर्मतिः । आचक्षते व इत्यपास्थितिर्हेतुर्भवति · सः लोहितपिंडविवसितं तस्यैव तद्भावात् । हृदयजालकयोराधाराधेयत्वम् ॥ ॥ मार्गश्चे
लक्ष्यते तत्राह · । अथेति । उक्तमर्थं संक्षिप्य उपसंहरति । आत्मनइति · आत्मनस्य । तस्य प्राचीदिगित्याद्यवतारयितुं भूमिकां करोति · स एष इति । प्राणानिति । प्राणशब्देन · ज्ञातः प्रत्यगात्मा प्राः
णोच्यते · एवं भूमिकां कृत्वा वाक्यमादाय व्याकरोति · तस्येत्यादिना · । तैजसं प्राज्ञस्येत्यस्य व्याख्यानं हृदयात्मानमापन्नस्येति । उक्तमर्थं संक्षिप्याह । एवं विद्वांसमिति । विश्वस्य जागरिताभि·

तद्वक्ष्यमाणमन्नं भोज्यं स्थितिहेतुः । किं तद्य एषोऽन्तर्हृदये लोहितपिंडो लोहित एव पिंडाकारापन्नो लोहितपिंडः अन्नं जग्धं द्वेधा परिणमते यत्स्थूलं तदधो गच्छति
यदन्यत्सत्तु नवग्निना पच्यमानं द्वेधा परिणमते यो मध्यमो रसः स लोहितादिक्रमेण पांचभौतिकं पिंडं शरीरमुपचिनोति योणिष्ठो रसः स एष लोहि
तपिंडः इंद्रस्य लिंगात्मनो हृदये मिथुनीभूतस्य तैजसस्य समाचक्षते । सतयोरिंद्रेंद्राण्योः हृदये मिथुनीभूतयोः सूक्ष्मा तु नाडीष्वनुप्रविष्टः स्थितिहेतुर्भ
वति तदेतदुच्यते · अथैनयोरेतदन्नमित्यादि · । किंचान्यदथैनयोरेतत्प्रावरणं भुक्तवतोः स्वपतोश्च प्रावरणं भवति लोके तत्सामान्यं हि कल्पयति श्रु
तिः । किं तदिह प्रावरणं यदेतदंतर्हृदये जालकमिवानेकनाडीच्छिद्रबहुलत्वाज्जालकमिव ॥ अथैनयोरेषा सृतिर्मार्गः संचरतोऽनयेति संचरणी स्वप्न
जागरितदेशागमनमार्गः का सा सृतिः यैषा हृदयात् हृदयदेशादूर्ध्वाभिमुखा सत्युच्चरति नाडी तस्याः परिमाणमिदमुच्यते । यथा लोके केशः सहस्र
धाभिन्नोत्यन्तसूक्ष्मो भवत्येवं सूक्ष्मा अस्य देहस्य संबंधिन्यो हिता नाम हिता इत्येवं ख्याता नाड्यः ताश्चांतर्हृदये मांसपिंडे प्रतिष्ठिता भवंति । हृदयाद्विप्रसृ
ताः सर्वत्र कदंबकेशरवदेवताभिर्नाडीभिरत्यंतसूक्ष्माभिरेतदन्नमास्रवदास्रवति गच्छति । तदेतद्देवताशरीरमनेनान्नेन दाम्भृतेनोपचीयमानं तिष्ठ·
त हृदय आकाशोऽथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिंडोऽथैनयोरेतत्प्रावरणं यदेतदन्तर्हृदये जालकमिवाथैनयोरेषा सृतिः संचरणी यैषा
हृदयादूर्ध्वा नाड्युच्चरति यथा केशः सहस्रधा भिन्न एवमस्यैता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्त्येताभिर्वा एतदास्रवदास्रवति तस्मा
देष प्रविविक्ताहारतर इवैव भवत्यस्माच्छरीरादात्मनः ॥ ३ ॥ तस्य प्राची दिक्प्रांचः प्राणा दक्षिणा दिग्दक्षिणे प्राणाः प्रतीची दिक्प्रत्यंचः प्रा
णा उदीची दिगुदंचः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवांचः प्राणाः सर्वा दिशः सर्वे प्राणाः स एष नेति नेत्यात्मा गृह्यो न हि गृह्य
तेऽशीर्यो न हि शीर्यतेऽसंगो न हि सज्यतेऽसितो न व्यथते न रिष्यत्यभयं वै जनक प्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको वैदेहोऽ
भयं त्वा गच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे नमस्तेऽस्त्विमे विदेहा अयमहमस्मि ॥ ॥ ४ ॥ ॥ द्वितीयं ब्राह्मणम् ॥ ॥
तित स्मात्तस्मात्स्थूलेनान्नेनोपचितः पिंडः इदं तु देवताशरीरं लिंगं सूक्ष्मेणान्नेनोपचितं पिंडोपचयकरमप्यन्नं प्रविविक्तमेव मूत्रपुरीषादिस्थूलमपेक्ष्य लिं·
गस्थितिकरं त्वन्नं ततोऽपि सूक्ष्मतरमतः प्रविविक्ताहारः पिंडः तस्मात्प्रविविक्ताहारादपि प्रविविक्ताहारतर एष लिंगात्मा इव एव भवत्यतस्माच्छारीराच्छरीरे
भवाच्छारीरादात्मनो वैश्वानरात्तैजसः सूक्ष्मान्नोपचितो भवति तस्य एष हृदयभूतस्तैजसः सूक्ष्मभूतेन प्राणेन विधृयमाणः प्राण एव भवति · ॥ १० ॥ तस्या
स्य विदुषः क्रमेण वैश्वानरात्तैजसं प्राप्तस्य हृदयात्मानमापन्नस्य हृदयात्मनश्च प्राणात्मानमापन्नस्य प्राची दिक्प्रांचः प्राङ्गताः प्राणास्तथा दक्षिणादि
क् दक्षिणे प्राणाः तथा प्रतीची दिक्प्रत्यंचः प्राणाः उदीची दिगुदंचः प्राणाः ऊर्ध्वा दिगूर्ध्वाः प्राणाः अवाची दिगवांचः प्राणाः सर्वा दिशः सर्वे प्राणाः एवं
विद्वान्क्रमेण सर्वात्मकं प्राणमात्मत्वेनोपगतो भवति । तं सर्वात्मानं प्रत्यगात्मन्युपसंहृत्य द्रष्टुर्हि द्रष्टृभावं नेति नेत्यात्मानं तुरीयं प्रतिपद्यते । यमेवं धीर
मानिनस्तैजसस्य च स्वप्नाभिमानिनः सुषुप्ताभिमानिनि प्राज्ञे क्रमेणांतर्भावं जानन्नित्यर्थः । स एष नेति नेत्यादेर्भूमिकां करोति । तं सर्वात्मानमिति । तुरीयादपि प्राप्तव्यमन्यदभयमस्तीत्याशंक्याह । अभयमिति · ॥
गीतवक्ष्यामीति उपक्रम्यावस्थात्रयातीतं तुरीयमुपदिष्टवानात्मानं · एष एव स विस्तरो नाम इतिसंख्याय नालिवन्तानइत्याशंक्याह · ॥ सूक्ष्मदिशः ६ तदेतदुक्तमिति · लिंगाख्यं सूक्ष्म शरीरं कारणाद्

भौतिकस्थूलपिंडेत्यर्थः

स्थूलसूक्ष्मशरीरयोः स्व
तन्त्रत्वात् नामचिंतितवं वि
क्षिताभ्यां शरीराभ्यां सह
तदभिमानिनः अध्यक्ष
त्वाद्व्यवनेस्मृतिं दाम्भ्रं
त्याह · २

उपचितं अत उच्यते तत्र
देवताशरीरादि का हारतरइत्या
दि उक्तमेव उपपादयति ·
पिंडोपचयकारि मन्त्रादिना
प्राणादिति प्राणशब्दोनिज
स्वरूपं रसरीरपिरपन्न
उद्गच्छ भोगाय स्यात्

नाडीभिः सर्वत्र संचरतीत्याश
यानस्य प्रयोजनमाह । त
देतदिति · देवताशरीरं लिं
गशरीरं · १

प्राच्यादयः सूक्ष्मदिशः प्रा
णात्मनो जातत्वात् प्रांचः
प्राणा इत्यादि शब्देन कथ्यंते
प्राग्देशवर्तिन इत्यर्थः · २

अहं वै तेन॰ सति प्रतिज्ञातं तदेतदुक्तमित्यर्थः। विज्ञानमय इति। पंचमाध्याये यद्ब्रह्म साक्षादपरोक्षात्सर्वांतर आत्मा स एष जीवात्मा विज्ञानमय आत्मा। अत्र हेतुमाह। नान्य इति। विज्ञानमयः पर एवेत्यत्र वाक्यां तरं पठति। स एष इहेति। चतुर्थाध्याये। नातीयमर्थं मदृष्य चानुर्थिकमनुवदति। अस्तीति २। यदिमधुकाण्डे गार्ग्यकाश्यसंवादे प्राणादीनां कर्तृत्वादिनिराकरणेन तेभ्यो व्यतिरिक्तो विज्ञानात्मे तिसोऽधिगतस्तर्हि किमिति पंचमे तत्सद्भावो भुत्पाद्यते तत्राह। स पुनरिति। यद्यपि विज्ञानमयसद्भावश्चतुर्थे स्थितस्तथापि पुनरीषस्य प्रश्नेयः प्राणेन प्राणितीत्यादिना प्राणनादिलिंगप्र त्यस्य तल्लिंगगम्यः सामान्येनाधिगतः स हद्रेडुश्येत्यादिना कूटस्थदृष्टिस्वभावो विशेषतो निश्चितः। तथा च पंचमेपि तदुत्पादनमुचितमित्यर्थः। आत्मा कूटस्थदृष्टिस्वभावश्चेत्कथं तस्य संसारस्तत्राह। तस्य चेति। अज्ञानं तत्कार्यं चान्तःकरणादि परोपाधिशब्दार्थः। दार्ष्टान्तिकमाह। तथेति। यथोक्तदृष्टान्तानुसारेणात्मन्यपि परोपाधिः संसार इति यावत्। सोपाधिकस्यात्मनः सं

हानेनतत्क्रमेण प्रतिपद्यते। स एष नेति नेत्यात्मेत्यादि व्याख्यातमेतत्॥ अभयं वै जन्ममरणादिनिमित्तभयशून्यं हे जनक प्राप्तोसीति ह एवं किल उवाच उक्तवान् याज्ञवल्क्यः तदेतदुक्तं अहं वै तत्त एष्यामि यत्र गमिष्यसीति। स होवाच जनको वैदेहः अभयमेव त्वामपि गच्छतात्। यस्त्वं नोस्मान्हे भगवन् पूजावन् अभयं ब्रह्म वेदयसे ज्ञापयसि प्रापितवान् उपाधिकृताज्ञानव्यवधानापनयनेनेत्यर्थः। किमन्यदहं विद्यानिःक्रियार्थं प्रयच्छामि साक्षादात्मानमेव दत्तवते। तेन नमस्तेस्तु इमे विदेहास्तव यथेष्टं भुज्यंतामयं चाहमस्मि दासभावे स्थित इति यथेष्टं मां राज्यं च प्रतिपद्यस्वेत्यर्थः॥११॥ ॥षष्ठस्य द्वितीयं ब्राह्मणं॥ ॥जनकं ह वैदेहं याज्ञवल्क्यो जगामेत्यस्याभिसंबंधः। विज्ञानमय आत्मा साक्षादपरोक्षाद्ब्रह्म सर्वांतरः पर एव। नान्योतोस्ति द्रष्टा नान्यदतोस्ति द्रष्टृ इत्यादिश्रुतिभ्यः॥ स एष इह प्रविष्टः वदनादिलिंगोऽस्य व्यतिरिक्त इति मधुकांडे अजातशत्रुसंवादे प्राणादिकर्तृत्वभोक्तृत्वप्रत्याख्यानेनाधिगतोऽस पुनः प्राणादिलिंगप्रत्यस्योषस्य प्रश्ने प्राणनादिलिंगो हष्टेर्द्रष्टा इत्यादिना लुप्तशक्तिसद्भावोधिगतः तस्य च परोपाधिनिमित्तः संसारो यथा रज्जूषरशुक्तिकागगनादिषु सर्पोदकरजतमलिनत्वादिः परोपाध्या रोपराग निमित्त एव न स्वतः। तथा निरुपाधिको निरुपाख्यो नेति नेतीति व्यपदेश्यः। साक्षादपरोक्षात्सर्वांतर आत्मा ब्रह्माक्षरमंतर्यामी प्रशास्तौपनिषदः पुरुषो विज्ञानमानन्दं ब्रह्मेत्यधिगतं। तदेव पुनरिंधः प्रविक्ताहारस्ततोंतर्हृदये लिंगात्मा प्रविविक्ताहारतरः ततः परे राज्जगदात्मा प्राणोपाधिस्ततोपि प्रविलाप्य जगदात्मानमुपाधिभूतं रज्ज्वादाविव सर्पादिकिं विद्ययास एष नेति नेतीति साक्षात्सर्वांतरं ब्रह्माधिगतं। एवमभयं परि प्रापितो जनको याज्ञवल्क्येनागमतः। संक्षेपतः। अथेव च जाग्रत्स्वप्नसुषुप्ततुरीयान्युपन्यस्तान्यन्यप्रसंगेनेंधः प्रविविक्ताहारतरः सर्वे प्राणाः स एष नेति नेतीति। इदानीं जाग्रत्स्वप्नादिद्वारेणैवमहता वितर्केण विस्तरतोऽधिगमः कर्तव्यः। अभयं प्रापयितव्यः सद्भावश्चात्मनो विप्रतिपत्त्याशंकानिराकरणद्वारेण व्यतिरिक्तत्वं शुद्धत्वं स्वयंज्योतिष्ट्वमनुप्रश कै स्वरूपत्वं निरतिशयानंदस्वाभाव्यमद्वैतत्वं चाधिगंतव्यमिति॥

सारित्वमुक्तं निरुपाधिकस्य नित्यमुक्तत्वमाह। निरुपाधिक इति। निरुपाख्यत्वं वाचामनसां चागोचरत्वं। पाचमिकमर्थमनूद्येत्थं अतीतेन ब्राह्मणेनायं हृत्पन्नमनुभाषते। तदेवेति। यत्साक्षादपरोक्षात्सर्वांतरं ब्रह्म तदेवाधिगमनोपायविशेषोपदर्शनपुरःसरं पुनरधिगतमिति संबंधः। आचार्यप्रसादात्परमात्माधिगत इत्यर्थः। जीवादभिन्नमया द्वारा देहादिभ्यो व्यतिरिक्तत्वं सुषुप्तसौक्षिष्यबोधनं। गतब्राह्मणार्थं संक्षेपेण कथयति। इंध इत्यादिना। इंधस्य विशेषणं प्रविविक्ताहार इति। हृदयांतर्यो लिंगात्मा स ततो वैश्वानरादिभ्यः प्रविविक्ताहारतर इति योजना। विश्वतैजससौ क्माप्रकृतत्तुपदर्शयति नेत्रपरेणेति। ततः जगदात्मा प्राणोपाधिरव्याकृताख्यः प्राज्ञः। ततोपि तत्सर्वं प्रविलाप्येत्यर्थः। उपाधिभूतजगदात्मानं केवलं प्रतीचि विद्यया प्रविलाप्य सर मनेतिनेतीति यत्तुरीयं ब्रह्म तदधिगतं इति संबंधः। विषये पादयो विलापनं दृष्टांतमाह। रज्ज्वादाविवेति। कुर्वं ब्राह्मणेन कर्मथं मनुभावितं संक्षिप्याह। अत्र चेति। अन्यप्रसंगेनेत्युपासनाकर्मभुक्तिफलत्व प्रदर्शनेनेति यावत्। उक्ता ब्राह्मणसमाप्ताविदमाह। इदानीमिति। आदिशब्दात् उन्मादप्रतुरीयसंग्रहार्थः। सद्भावतत्व्यः इति हेतो इंधनादिना बोधजाग्रत्स्वप्नसुषुप्ततुरीयाणि कथितानि। विश्वतैजसप्राज्ञा स्त्वानाय॰गेन॥

विद्यायाः संप्रदाने शिष्यस्तस्य ग्रहणविधिः शुश्रूषादिप्रकारः तस्य प्रकाशनार्थेयमाख्यायिका। प्रयोजनांतरं तस्या दर्शयति। विद्येति। कथं कर्मभ्यो विशेष्यते विद्या स्तुतिरत्र लक्ष्यते तत्राह। वरेति। कामप्रश्नाख्यस्य वरः

इदमारभ्यते। आख्यायिका तु विद्यासंप्रदानग्रहणविधिसंप्रकाशनार्था· विद्यास्तुतये च विशेषतः वरदानादिसूचनात् जनकं वैदेहं याज्ञवल्क्यो जगाम। स च
गच्छन्नेवं मेने चिंतितवान् न वदिष्ये किंचिदपि राज्ञ गमनप्रयोजनं तु योगक्षेमार्थं न वदिष्य इत्येवं संकल्पोपि याज्ञवल्क्यो यद्यज्जनकः पृष्टवांस्त·
त्प्रतिपेदे तत्र को हेतुः संकल्पितस्यान्यथाकरण इत्यत्राख्यायिकामाचष्टे पूर्वत्र किल जनकयाज्ञवल्क्ययोः संवादोयमासीदग्निहोत्रे निमित्ते

जनकꣳहवैदेहंयाज्ञवल्क्योजगामसमेनेनवदिष्यइत्यथहय
ज्जनकश्चवैदेहोयाज्ञवल्क्यश्चाग्निहोत्रेसमूदातेतस्मैहयाज्ञ
वल्क्योवरंददौसहकामप्रश्नमेववव्रेतꣳहास्मैददौतꣳहस
म्रालेवपूर्वःपप्रच्छ॥ ॥१२॥ ॥रामरामराम॥

तत्र जनकस्याग्निहोत्रविषयं विज्ञानमुपलभ्य परितुष्टो याज्ञवल्क्यस्तेन वरप्रदानसामर्थेनानाचिख्यासुस्तस्मै जनकाय ह किल वरं ददौ। स च जनको
ह कामप्रश्नमेव वरं वव्रे वृतवान् तं च वरं हास्मै ददौ याज्ञवल्क्यस्तेन वरप्रदानसामर्थेनानाचिख्यासुमपि याज्ञवल्क्यं तूष्णींस्थितमपि सम्राडेव जन
कः पूर्वं पप्रच्छ तत्रैवानुक्तिर्ब्रह्मविद्यायाः कर्मणा विरुद्धत्वाद्विद्यायाश्च स्वातंत्र्यात्। स्वतंत्रा हि ब्रह्मविद्या सहकारिसाधनांतरनिरपेक्षपुरुषार्थसाधना इति॥१२॥

अग्निहोत्रप्रकरणा·

मोक्षफलस्वातंत्र्यात्·
उपकारकः·

स्य याज्ञवल्क्येन राज्ञे दत्तत्वात्तेन चावसरे ब्रह्मज्ञानस्यैव पृष्टत्वादनेन विधिना विद्यास्तुतिः सूचना साध्यत्वं विवक्षितेत्यर्थः वद व्यक्तायां वाचि· उपग्रव्यत्ययः लिटि क्वसौ संप्रसारणे द्वित्वं सवर्णदीर्घः। ॥

सहकारिसाधनांतरस्य निर्गता अपेक्षा यस्याः सा चासौ पुरुषार्थसाधना च·१

अदृश्येति। करणाभूतं ज्योतिर्न दृश्यते। न कार्यं तु आसनाद्युपलभ्यं तेन चापि विषयेऽस्य प्रादेश इति यावत्। अनुमानमेवाभिनयति। व्यतिरिक्तेति। विमतं व्यतिरिक्तज्योतिरधीनं व्यवहारत्वात्संमतवदित्यर्थः। आस्ते पल्यय
ते कर्म कुरुते विपल्येतीति विवक्षिते। पक्षान्तरमनूद्य लोकायतपक्षसिद्धिफलमाह। अथेति। दशावरेति। त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा। ऋग्वेदविद्यजुर्विच्च सामवे
दविदेव च। त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णये। एकोवत्वा आत्मविदुच्यते। व्यतिरिक्तेन देहादेः भिन्नेन ज्योतिषा०मस्य पुरुषस्य ०पुरुषः। अन्यज्ज्योतिरिति ज्योतिरन्तरं केनचिदवयवेन ३ व्यवहारं आ
सनादिकर्म ज्योतिषा अन्यज्योतिर्वा विशेषणस्य सम्बन्ध इत्यर्थः। व्याप्यव्यापकयोस्तत्सम्बन्धस्य चातिसूक्ष्मत्वादेकेन दुर्ज्ञानत्वान् ज्ञाने याज्ञवल्क्योऽप्यपेक्षित इत्यर्थः। वक्ष्यमाणं चण्डादि। यः कश्चिद्व्यापारः

हे याज्ञवल्क्येत्येवं संबोध्याभिमुखीकरणाय किंज्योतिरयं पुरुष इति किमस्य ज्योतिर्येन ज्योतिषा व्यवहरति सोऽयं प्राकृतः कार्यकरणसंघातरूपः शिरःपाण्यादिमान्पु
रुषः पृच्छ्यते। किमयं स्वावयवसंघातबाह्येन ज्योतिरन्तरेण व्यवहरत्याहोस्वित्स्वावयवसंघातमध्यपातिना ज्योतिषा ज्योतिःकार्यमयं पुरुषो निर्वर्तय
तीत्येतदभिप्रेत्य पृच्छति किं चातः यदि व्यतिरिक्तेन यदि वाव्यतिरिक्तेन ज्योतिषा ज्योतिःकार्यं निर्वर्तयति। शृणु अतः कारणं यदि व्यतिरिक्तेन ज्योतिषा का
र्यनिर्वर्तकत्वमस्य स्वभावो निर्धारितो भवति। ततोऽदृष्टे ज्योतिःकार्यविषयेऽप्यनुमास्यामहे व्यतिरिक्तज्योतिर्निमित्तमेवेदं कार्यमिति। अथाऽव्यति
रिक्तेनैव स्वात्मना ज्योतिषा व्यवहरति ततोऽप्रत्यक्षेऽपि ज्योतिषि ज्योतिःकार्यदर्शनेऽव्यतिरिक्तमेव ज्योतिरनुमेयं। अथानियम एव व्यतिरिक्तमव्य
तिरिक्तं वा ज्योतिः पुरुषस्य व्यवहारहेतुस्ततोऽनध्यवसाय एव ज्योतिर्विषय इत्येवं मन्वानः पृच्छति जनको याज्ञवल्क्यं किंज्योतिरयं पुरुष इति। नन्वे

याज्ञवल्क्य किंज्योतिरयं पुरुष इत्यादित्यज्योतिः सम्राडिति होवाचादित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य २

वमनुमानकौशले जनकस्य किं प्रश्नेन स्वयमेव कस्मान्न प्रतिपद्यत इति। सत्यमेवमेतत्। तथापि लिङ्गलिङ्गिविशेषाणामत्यन्तसौक्ष्म्यात् दुरवबोध्यतां
मन्यते बहूनामपि पण्डितानां किमुतैकस्य। अत एव हि धर्मसूक्ष्मनिर्णये परिषद्व्यापार इष्यते। पुरुषविशेषश्चापेक्ष्यते। दशावरा परिषत्त्रयो वै
केति। तस्माद्यद्यप्यनुमानकौशलं राज्ञस्तथापि तु एकोऽयाज्ञवल्क्यः प्रष्टुं विज्ञानकौशलतारतम्योपपत्तेः पुरुषाणां। अथवा श्रुतिः स्वयमेवाख्यायिका
व्याजेनानुमानमार्गमुपन्यस्यास्मान्बोधयति पुरुषमतिमनुसरन्ती। याज्ञवल्क्योऽपि जनकाभिप्रायाभिज्ञतया व्यतिरिक्तमात्मज्योतिर्बोधयिष्य
न्जनकं प्रति व्यतिरिक्तप्रतिपादकमेव लिङ्गं प्रतिपेदे यथाप्रसिद्धम् आदित्यज्योतिः सम्राडिति होवाच कथमादित्येनैव स्वावयवसंघातव्यतिरि
क्तेन चक्षुषोऽनुग्राहकेन ज्योतिषायं प्राकृतः पुरुष आस्ते उपविशति। पल्ययते पर्येति क्षेत्रमरण्यं वा तत्र गत्वा वा कर्म कुरुते। विपल्येति विपर्ये
ति च यथागतमत्यन्तव्यतिरिक्तज्योतिष्प्रसिद्धतां प्रदर्शनार्थमनेकविशेषणं व्याख्यानकं ज्योतिःप्रदर्शनं च लिङ्गस्याव्यभिचारित्वप्रदर्शनार्थमेवमे

आसनाद्यन्यतमव्यापारव्यपदेशो व्याप्तिसिद्धं यथाविशेषणबहुत्वमित्याशंक्याह। अत्यन्तेति। आसनादीनामेकैकव्यभिचारे देहस्यान्यथाभावेऽपि तावदनुग्राहकं ज्योतिरनन्यथा भवति। अतस्तदनुग्राह्य
दत्यन्तविलक्षणमिति विवक्षित्वा व्यापारचतुष्टयमुपदिष्टमित्यर्थः। तथापि किमर्थमादित्याद्यनेकपर्यायोपादानमेकेनैव व्याप्तिग्रहसंभवादित्याशंक्याह। बाह्येति। देहेन्द्रियमनोव्यापाररूपं कर्म लिङ्गं। त
स्य व्यतिरिक्तज्योतिरव्यभिचारसाधनार्थमनेकपर्यायोपन्यासः। राज्ञो याज्ञवल्क्योपेक्षामुपपाद्य पक्षान्तरमाह। अथवेति। न चावाच्यराज्ञो मुनेर्वा विवक्षितत्वाभावात्किमिति राजा मुनिमनुसरतीति चोद्यं नि
रवकाशमिति शेषः। व्यापाररूपस्य कर्मणः

शब्दस्य ज्योतिष्ट्वं स्पष्टयितुं पातनिकां करोति। शब्देनेति। परकृतः। नत्रेत्यर्थः। एवं पातनिकां कृत्वा वाचो ज्योतिष्ट्वसाधनार्थं पृच्छति। कथमिति। प्रसिद्धिमेवाकांक्षापूर्वकं स्फुटयति। कथमित्यादिना। ज्योतिकार्यत्वं तज्जनना

तथास्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति। चंद्रमा एवास्य ज्योतिरस्तमित आदित्ये चंद्रमस्यस्तमितेऽग्निर्ज्योतिः शांतेऽग्नौ वाग्ज्योतिः। वागिति शब्दः परिगृह्यते शब्देन विषयेन श्रोत्रमिंद्रियं दीप्यते श्रोत्रेंद्रिये संदीप्ते मनसि विवेक उपजायते। तेन मनसा बाह्यां चेष्टां प्रतिपद्यते। मनसा ह्येव पश्यति मनसा शृणोति इति ब्राह्मणं॥ कथं पुनर्वाक्‌ज्योतिरिति वाचो ज्योतिष्ट्वमप्रतिसिद्धमित्यत आह। तस्माद्वै सम्राड् यस्माद्वाचा ज्योतिषानुगृहीतोयं पुरुषो व्यवहरति। तस्मात्प्रसिद्धमेतत्‌ वाचो ज्योतिष्ट्वं कथमपि यत्र यस्मिन् काले प्रावृषि प्रायेण मेघांधकारे सर्वज्योतिः प्रत्य

अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरुष इति चंद्रमा एवास्य ज्योतिर्भवतीति चंद्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य॥ १४॥ अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य॥ १५॥ अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते शांतेऽग्नौ किंज्योतिरेवायं पुरुष इति वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य॥ १६॥ अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते शांतेऽग्नौ शांतायां वाचि किंज्योतिरेवायं पुरुष इत्यात्मैवास्य ज्योतिर्भवतीत्यात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति॥ ७ ॥

क्षमये स्वोपि पाणिर्हस्तो न विस्पष्टं निर्ज्ञायतेऽथ तस्मिन्काले सर्वचेष्टानिरोधे प्राप्ते बाह्यज्योतिषोऽभावात्‌ यत्र वागुच्चरति श्वा भषति गर्दभो वारौति उपैव तत्र न्येति। तेन शब्देन ज्योतिषा श्रोत्रमनसोः नैरंतर्यं भवति तेन ज्योतिःकार्यत्वं वाक्‌ प्रतिपद्यते तेन वाचा ज्योतिषा उपन्येत्येव तत्र च कर्म कुरुते विपल्येति। तत्र वाग्ज्योतिषो ग्रहणं गंधादीनामुपलक्षणार्थं। गंधादिभिरपि हि घ्राणादिष्वनुगृहीतेषु प्रवृत्तिनिवृत्त्यादयो भवंति॥

व्यवहाररूपकार्यत्वमिति यावत्। तत्र चतुर्थे पर्याये। किंपुनरिति। सार्वज्योतिरूपसमेऽदृश्यमानस्य व्यवहारस्य कारणतयाऽनुमानतो ज्योतिर्मात्रं सिद्धं बाधितविशेषमनुत्तरया प्रश्नोपपत्तिरित्यर्थः॥ ॥

व्यतिरिक्तत्वं साधयति । कार्येति अनुग्राहकत्वादादित्यादिवदिति शेषः । तत्रांतःस्थं पारिशेष्यादित्युक्तमुपपादयति । यद्येति । प्राणेति प्रतीकं । तस्य स्वशब्देन अन्वयः अग्रे स्फुटः । उपैवतत्रन्येतीत्यस्य
विवरणं । पुरुषस्येति । तथापि स्वप्नादौ तस्य प्रवृत्तिदर्शनात्तत्कारणीभूतं ज्योतिर्वक्तव्यमिति शेषः । कथं पुनरन्तर्ज्योतिरंतरं लक्ष्यत इत्याशंक्य प्रष्टुरभिप्रायमाह । एतदुक्तमिति । आत्मा इति
शब्देन एतादृशं ज्योतिरभिधीयते । कीदृशं इति योजना । बहिःस्थितत्वात् तत् अंतस्थं ज्योतिः । आत्माख्यं ज्योतिः । अभौतिकत्वे सत्स्वहेतु यच्चक्षुरादिभिरादित्यादिर्दृश्यते न तथात्माख्यं ज्योति

तेनतेनैरप्यगंधादिभिरनुग्राहकैश्चसर्वत्रप्रवृत्तिनिरोधश्चानुग्रहोभवतिकार्यकरणसंघातस्यएवमेवैतद्याज्ञवल्क्य ॥ शांतायांपुनर्वाचिगंधादिष्वपिच
शांतेषुवाह्येष्वनुग्राहकेषुसर्वत्रप्रवृत्तिनिरोधःप्राप्तोस्यपुरुषस्यएतदुक्तंभवतिजाग्रद्विषयेबहिर्मुखानिकरणानिचक्षुरादीन्यादित्यादि
ज्योतिर्भिरनुगृह्यमाणानियदातदास्फुटतरः ॥ संव्यवहारोस्यपुरुषस्यभवति । एवंतावज्जागरितेस्वावयवसंघातव्यतिरिक्तेनैवज्योति
षाज्योतिःकार्यसिद्धिरस्यपुरुषस्यदृष्टा ॥ तस्मान्नवयंमन्यामहेसर्वबाह्यज्योतिःप्रत्यस्तमयेपिस्वप्नसुषुप्तकालेजागरितेचतादृगव
स्थायांस्वावयवसंघातव्यतिरिक्तेनैवज्योतिषाज्योतिःकार्यसिद्धिरस्येति । दृश्यतेचस्वप्नेज्योतिःकार्यसिद्धिर्बंधुसंगमनविगमदर्शन
देशांतरगमनादिच । सुषुप्ताच्चोत्थानं । तस्माद्दस्तिव्यतिरिक्तंकिमपिज्योतिःकिंपुनस्तच्छांतायांवाचिज्योतिर्भवतीतिउच्यते । आत्मै
वास्यज्योतिर्भवतीत्यात्मेतिकार्यकरणस्वावयवसंघातव्यतिरिक्तंकार्यकरणावभासकंआदित्यादिवाह्यज्योतिर्वत्स्वयमन्येना
नवभास्यमानमभिधीयतेज्योतिरंतरस्थंचतत्पारिशेष्यात्कार्यकरणव्यतिरिक्तंतदितितावत्सिद्धं । यच्चकार्यकरणसंघातव्यतिरिक्तंका
र्यकरणसंघातानुग्राहकंचज्योतिस्तद्बाह्यैश्चक्षुरादिकरणैरुपलभ्यमानंदृष्टंनतुतथातच्चक्षुरादिभिरुपलभ्यतेआदित्यादिज्योतिःषू
परतेषुकार्यंतुज्योतिषोदृश्यतेयस्मादात्मनैवायंज्योतिषास्तेपल्ययतेकर्मकुरुतेविपल्येतीतितस्मान्नूनमंतःस्थंज्योतिरवगम्यते
किंचादित्यादिज्योतिर्विलक्षणंतदभौतिकंचसएवहेतुर्यच्चक्षुराद्यग्राह्यत्वमादित्यादिवत् । नः समानजातीयेनैवोपकरणदर्शनाद्यदादित्यादि
विलक्षणंज्योतिरांतरमसिद्धमित्येतदसत् । कस्मात् उपक्रियमाणसमानजातीयेनैवादित्यादिज्योतिषाकार्यकरणसंघातस्यभौतिकस्यभौतिकेन
यथादित्यादिच्चक्षुरादिभिर्गृह्यतेनतथात्माख्यंज्योतिस्तेनादित्यादिविलक्षणम् ।

संप्रतिलोकायतश्चोदयति नेत्यादिना । व्यतिरेकांतरमाह । किंचेति । तादृगवस्थायांज्योतिःप्रत्यस्तमयदशायामितियावत् । आदित्यादिज्योति ॥ यद्यपिदेहादेरुपकार्यादुपकारकमादित्यादि ॥ रामराम ॥

सजातीयंदृष्टंतथापिनात्मज्योतिरुपकार्यसजातीयमनुमेयमित्याशंक्याह।नेति।अनुपेनस्थितं।यथादृष्टंचेदमिति।तदेवस्पष्टयति।यदिनामेति।किंचचैतन्यंशरीरधर्मस्तद्भावभावित्वाद्रूपादिवदित्याह।का
र्यकरणेति।विमतंसंघाताद्भिन्नंतदाभासकत्वादादित्यवदित्यनुमानान्तरंसंघातधर्मत्वसिद्धंचैतन्यस्येत्याशंक्याह।सामान्यतोदृष्टस्येति।लोकायतस्यापिदेहावभासकमपिभूतंततोनभिद्यते
तथाचव्यभिचारान्नेदमनुमानंप्रमाणमित्यर्थः।मनुष्योहंजानामीति।प्रत्यक्षत्वविरोधाच्चत्वदनुमानंनप्रमाणंइत्याह।सामान्यदृष्टेति।इतश्चदेहस्यैवचैतन्यत्वमित्याह।अयमेवेति।ज्योतिषोदेह
व्यतिरेकमंगीकृत्यापिदूषयति।यदिनामेति।विमतंज्योतिरंतरंनात्मादेहोपकारकत्वादादित्यादिवदित्यर्थः।आत्मन्येतदिति।कस्मैत्याशंक्याह।यस्त्वेवमिति।देहस्यात्मत्वेकादाचित्कंद्रष्टृत्वमित्याद्युक्तमिति
शंकते।नन्वयमेवेति।स्वभाववादीपरिहरति।नैषदोषइति।कदाचित्केदर्शनादर्शनेसंभवतःदेहस्वाभाव्यादित्यत्रदृष्टांतमाह।नहीति।विमतंकारणांतरपूर्वकंकादाचित्कत्वात्घटवदित्यनु

नैवोपकारःक्रियमाणोदृश्यते।यथादृष्टंचेदमनुमेयंयदिनामकार्यकरणादर्थांतरंतदुपकारमादित्यादिवज्ज्योतिस्तथापिकार्यकरणसंघात
समानजातीयमेवानुमेयंकार्यकरणसंघातोपकारकत्वात्।आदित्यादिज्योतिर्वत्।यत्पुनरंतरस्थत्वात्प्रत्यक्षत्वाद्वैलक्षण्यमुच्यतेतच्चक्षुरा
दिज्योतिर्भिरनैकांतिकं।यतःप्रत्यक्षाण्यंतस्थानिचचक्षुरादिज्योतींषिभौतिकान्येव।तस्मात्तवमनोरथमात्रंविलक्षणमात्मज्योति
सिद्धमिति।कार्यकरणसंघातभावभावित्वाच्चसंघातधर्मत्वमनुमीयतेज्योतिषः।सामान्यतोदृष्टस्यचानुमानस्यव्यभिचारित्वा
दप्रामाण्यं।सामान्यतोदृष्टबलेनहिभवानादित्यादिवत्व्यतिरिक्तंज्योतिःसाधयतिकार्यकरणेभ्योनचप्रत्यक्षमनुमानेनबाधितुंशक्यते
अयमेवकार्यकरणसंघातःप्रत्यक्षंपश्यतिशृणोतिमनुतेविजानातिच।यदिनामज्योतिरंतरमस्योपकारकंस्यादादित्यादिवत्।नासा
वात्मास्यात्ज्योतिरंतरमादित्यादिवदेव।यएवतुप्रत्यक्षंदर्शनादिक्रियांकरोतिसएवात्मास्यात्कार्यकरणसंघातोनान्यःप्रत्यक्षविरोधेऽनु
मानस्याप्रामाण्यात्।नन्वयमेवचेद्दर्शनादिक्रियायाःकर्तासंघातःकथमविकलस्यैवास्यदर्शनादिक्रियाकर्तृत्वंकदाचिद्भवतिक
दाचिन्नेति।नैषदोषःदृष्टत्वात्।नहिदृष्टेनुपपन्नंनामनहिखद्योतेप्रकाशाप्रकाशकत्वेनदृश्यमानेकारणांतरमनुमेयं।अनुमेयत्वे
चकेनचित्सामान्यात्सर्वंसर्वत्रानुमेयंस्यात्तच्चानिष्टं।नचपदार्थस्वभावोनास्ति।नह्यग्नेरुष्णस्वाभाव्यमन्यनिमित्तमुदकस्यवाशैत्यं।प्रा
णिधर्माधर्माद्यपेक्षमितिचेत्धर्माधर्मादेर्निमित्तांतरापेक्षस्वभावप्रसंगः।अस्त्वितिचेत्।नतदनवस्थाप्रसंगःसचानिष्टः।नस्वप्नं
स्मृत्योर्दृष्टस्यैवदर्शनात्।यदुक्तंस्वभाववादिनादेहस्यैवदर्शनादिक्रियानव्यतिरिक्तस्येतितन्न।यदिहिदेहस्यैवदर्शनादिक्रियास्व
प्नेदृष्टस्यैवदर्शनंनस्यात्येंधःस्वप्नंपश्यन्दृष्टमेवपश्यतिनशाकद्वीपादिगतमदृष्टरूपं।ननश्रुतंतस्मिन्भवतियःस्वप्नंपश्यति ॥

अभावात्तस्य·

उक्तंपूर्वपक्षंनिराकरो
तिनत्यादिना·
देहस्यविशेषणं·

शक्यत्वमाहयेन·शरीरसम
वायसत्तावत्वात्·

ज्योतिरंतरंइत्यस्यविशेषणं

अवयवस्यकार्यकरण
संघातस्य

अकारणांतरपूर्वकत्वेननतंदर्श
नादिक्रियास्यवस्तुकारणांतरपू
र्वकं।कदाचित्कत्वात्घटवत्·

मानंदृष्टांतेभविष्यतीत्याशंक्याऽग्निरुष्णइतितदुष्णमुदकमित्यपिद्रव्यत्वादित्यनुमीयतेत्यतिप्रसंगमाह।अनुमेयत्वेचेति।ननुयद्भवतितत्सनिमित्तमेव।नस्वभावाद्भवेत्किंचिदयस्माकंप्रसिद्धंतत्रा
ह।नचेति।अग्नेरौष्ण्यमुदकस्यशैत्यमित्याद्यपिननिमित्तं।किंतुप्राणिदृष्टापेक्षमितिशंकते।प्राणीति।आदिशब्देनईश्वरादिर्गृह्यतेस्वभाववाद्याह।धर्मेति।सिद्धांतीस्वप्नादिसिद्ध्यनुपपत्त्यादेहातिरि
क्तमात्मानमभ्युपगमयन्नुत्तरमाह।नेत्यादिना।यदिहीति।जाग्रद्देहस्यचक्षुःस्वप्नेनचलतीतिक्रियस्यचसंस्कारस्यचानिष्ठत्वाद्देन्यदृष्टंचान्यस्यस्वप्नायोगान्नस्वप्नेदृष्टस्यैवदर्शनंदेहात्मवादेसंभव
तीत्यर्थः।माभूद्दृष्टस्यैवस्वप्नेदृष्टिःअंधस्यापिस्वप्नेदृष्टिरित्याशंक्याह।अंधइति।अपिशब्दोध्याहर्तव्यः।स्वीकृतेसति।विमतमितिआनंदगिरिरित्यस्यार्थमाह।विमतम्।देहव्यतिरिक्तं·

तथा स्मृतौ द्रष्टृस्यैव दर्शनात्
आत्मैव द्रष्टा न देहः

यन्निमीलितं चक्षुरित्यर्थः
केनाहि यन्निमीलितं गम्यते

स्मृतिश्चेति। कथं तव मते जातस्य नामीदृष्टदर्शनमिति चेज्जन्मान्तरानुभववशादिति भावः। अनुस्मर्तो। कर्तृत्वस्योक्तत्वात् देहातिरिक्तः स्मर्ता चेत् द्रष्टापि देहातिरिक्तः सिध्यतीति भावः। देहस्याद्रष्टृत्वे हेत्वंतरमाह। भेत्तेति। ननु स्वद्रष्टृत्वेनिवायः तदेवोपपादयति। देहस्यैवेति। आभ्रे देहस्यात्मत्वे इंद्रियाणामनुस्यादिति शंकते। चक्षुरादिति। ज्ञानं ज्ञानसाधनोपपन्नेः संज्ञाभेदमात्रमिति। नमनसोपीति। प्रयोभयपन्ने देहस्यैव द्रष्टृत्वे कहानिरिति चेदत आह। देहश्चेद्द्रष्टेति। अंधस्य देहस्याऽद्रष्टृत्वेपि च स्मरणं तत्तस्यास्यात् देवद्रष्टृत्वमित्याशंक्याह तस्मादिति। स्वप्ने दृष्टस्यैव दर्शनादिति हेतुं व्याख्याय स्मृतो दृष्टस्यैव दर्शनादिति हेतुं व्याचष्टे। तथेति। य एव द्रष्टा स एव स्मर्ता एव। स्वप्ने दृष्टस्यैव दर्शनात्। निमीलिताक्षोपि स्मरन् दृष्टपूर्वं यद्रूपं तद्दृष्टवदेव पश्यतीति तस्माद्यन्निमीलितं तन्न दृष्टयति आत्मवस्तु

उद्धृतेपि

दृष्टपूर्वं वस्तु स एव पूर्वं विद्यमाने चक्षुषि अद्राक्षीन्न देहः। यदि देहश्चेत् द्रष्टा स्याद् येनाद्राक्षीत् तस्मिन्नुद्धृते चक्षुषि स्वप्ने तद्वद् दृष्टपूर्वं न पश्येत्। अस्ति च लोके प्रसिद्धिः पूर्वं दृष्टं मया हिमवतः शृंगमद्याहं स्वप्ने द्राक्षमिति उद्धृतचक्षुषामंधानामपि। तस्मादुद्धृतेपि चक्षुषि यः स्वप्नद्रष्टा स एव द्रष्टा न देह इत्यवगम्यते। तथा स्मृतौ द्रष्टृस्मर्त्रोरेकत्वे सति य एव द्रष्टा स एव स्मर्ता। यदा चैवं तदा निमीलिताक्षोऽपि स्मरन् दृष्टपूर्वं यद्रूपं तद्दृष्टवदेव पश्यतीति। तस्माद्यन्निमीलितं तन्न द्रष्टृ। यन्निमीलिते चक्षुषि स्मरद्रूपं पश्यति तदेवानिमीलिते चक्षुषि द्रष्टासीत्यवगम्यते। मृते च देहे विकल्पस्यैव च रूपादिदर्शनाऽभावात्। देहस्यैव द्रष्टृत्वे मृतेपि दर्शनादिक्रिया स्यात्। तस्माद्यदपाये देहे दर्शनं न भवति यद्भावे च भवति तद्दर्शनक्रियादिकर्तृ न देह इत्यवगम्यते। चक्षुरादीन्येव दर्शनादिक्रियाकर्तॄणीति चेन्न। यदहमद्राक्षं तत्स्पृशामीति भिन्नकर्तृकत्वप्रतिसंधानानुपपत्तेः। मनस्तर्हीति चेन्न मनसोपि विषयत्वाद्रूपादिवद्द्रष्टृत्वानुपपत्तेः। तस्मादन्तरस्थं व्यतिरिक्तमादित्यादिवदिति सिद्धं। यदुक्तं कार्यकरणसंघातसमानजातीयमेव ज्योतिरन्तरमनुमेयं। आदित्यादिभिस्तत्समानजातीयैरेवोपक्रियमाणत्वादिति। तदसत् उपकार्योपकारकभावस्यानियमदर्शनात्। कथं पार्थिवैरिंधनैः पार्थिवत्वसमानजातीयैस्तृणोलपादिभिरग्नेः प्रज्वलनोपकारः क्रियमाणो दृश्यते। न च तावता तत्समानजातीयैरेवाग्नेः प्रज्वलनोपकारः सर्वत्रानुमेयः स्यात्। येनोदकेनापि प्रज्वलनोपकारो भिन्नजातीयेन वैद्युतस्याग्नेर्जाठरस्य च क्रियमाणो दृश्यते। तस्मादुपकार्योपकारकभावे समानजातीया समानजातीयनियमो नास्ति। कदाचित्समानजातीया मनुष्या मनुष्यैरेवोपक्रियन्ते। कदाचित्स्थावरपश्वादिभिश्च भिन्नजातीयैः। तस्माद्धेतुः कार्यकरणसंघातसमानजातीयैरेवादित्यादिज्योतिर्भिरुपक्रियमाणत्वादि। यस्तु नरस्य चक्षुरादिभिरादित्यादिज्योतिर्वद्दृश्यत्वादित्ययं हेतुर्ज्योतिरन्तरस्यान्तःस्थत्वं वैलक्षण्यं च न साधयति चक्षुरादिभिरनैकान्तिकत्वादिति। तदसद्बुद्ध्यादिकरणेभ्योऽन्यत्वे सतीति हेतोर्विशेषणानुपपत्तेः।

[illegible]

अपि शब्दात् अनुद्धृत
चक्षुषामपि स्वप्ने दृष्टस्य
यस्य तस्य वस्तुनः द्रष्टा
एव तस्य वस्तुनः स्मर्ता
इति प्रसिद्धिः स्यात् ना
स्यया।

कात्तुर्ज्ञानसाधनोपप
न्नेः संज्ञाभेदमात्रमिति
निन्यायेन परिहरति
नमनसोपीति

आदित्यवदंतरस्थमिति

आत्माख्यं वस्तु। तस्मादिति। जाग्रते दृष्टस्यैव स्वप्ने दर्शनादित्यर्थः। यद्यात्मा जागरिते द्रष्टा न स्यात्तर्हि जागरिते आत्मदृष्टस्य वस्तुनः अभावात् अभावात् स्वप्ने कस्यापि वस्तुनः दर्शनं न स्यादित्यभिप्रायः। तस्मात् यदंतरस्थं आदित्यादिवत् देहव्यतिरिक्तं द्रष्टृ इति सिद्धं। चक्षुरादिकरणेभ्योऽन्यत्वे सतीत्यंशं हेतोर्विशेषणेनोक्तमिति भिन्नत्वोपपत्तेः। नावतेति। पार्थिवेनाग्नेरुपक्रियमाणत्वदर्शनादिति यावत्। परोक्षमनुभाव्यमुपपादयति। अथवा इति। का पुनरित्यादि। आत्मनः पांचभौतिकत्वनिश्चयस्य आत्मा न पांचभौतिकः चक्षुरादिवत्। आत्मा न पांचभौतिकः ज्ञातः चक्षुरादिकरणेभ्योऽन्यत्वे सति चक्षुरादिवत् भिन्नत्वादिति वद्दृश्यत्वात्।

विमलं ज्योति । संघातधर्मः तद्भावभावित्वा रूपादिवदित्युक्तमनूद्य निराकरोति । कार्येति । सामान्यतो दृष्टं चेत्याशङ्क्य दूषयति । सामान्यतो दृष्टस्येति । विशेषतो दृष्टस्याप्यपि ऽव्यथ्यं । ज्योतिरंतरमा
दित्यादिवदनात्मेत्युक्तं प्रत्याह । अन्तरेति । संघातो देहस्तद्व्यतिरेकं न निराकरोतीति यावत् । देहस्य कादाचित्कं दर्शनादिमत्त्वं स्वाभाविकमित्यत्र परोक्तं दृष्टान्तमनुभाष्य निराचष्टे । यत्तु नरित्यादिना । सिद्धान्तिनामपि स्व
भाववादस्य क्वचिदभ्युपगमात्तत्त्वमुपादेयमनूद्य दूषयति । यत्तु नतत्कमित्यादिना । उक्तमनवस्थादोषं प्रत्याह । एतेनेति । सिद्धान्तविरोधप्रसंजनेन । धर्माधर्मयोः फलदातृत्वस्वभावोऽङ्गीकारसिद्धान्तवि
रोधप्रसंजनेनेत्यर्थः । चैतन्यस्य १ भवत्सिद्धान्त० त्यर्थः २ नास्तिकमतं १ कथं तर्हि तद्भावभावित्वं इतिचेत्तत्राह तद्भावभावित्वमिति २ अस्माभिः सिद्धान्तयत्युक्तं । ननु निमित्तान्तरं सर्वानिमित्तान्तरापेक्षायामन

कार्यकरणसंघातधर्मत्वं ज्योतिष इति यदुक्तं तन्नानुमानं । कार्यकरणसंघातधर्मत्वं ज्योतिर्न कार्यकरणसंघातादर्थान्तरं ज्योतिरिति त्वनुमानमुक्तं तेन वि
रुध्यते इयं प्रतिज्ञा कार्यकरणसंघातधर्मत्वं ज्योतिष इति तद्भावभावित्वं ज्योतिष इति तद्भावभावित्वं त्वसिद्धं मृते देहे ज्योतिषोऽदर्शनात् । सामान्य
तो दृष्टस्यानुमानस्याप्रामाण्ये पानभोजनादिसर्वव्यवहारलोपप्रसंगः । स चानिष्टः पानभोजनादिषु हि क्षुत्पिपासानिवृत्त्युपलब्धवत
स्तत्सामान्यात्पानभोजनाद्युपादानं दृश्यमानं लोकेन प्राप्नोति । दृश्यन्ते ह्युपलब्धपानभोजनाः सामान्यतः पुनः पानभोजनान्तरैः क्षुत्पिपा
सादिनिवृत्तिमनुमिन्वन्तस्तादर्थ्येन प्रवर्तमानाः । यदुक्तमयमेव तु देहो दर्शनादिक्रियाकर्तेति तत्स्वयमेव परिहृतं स्वप्नस्मृत्योर्देहादर्थान्त
रभूतोऽस्तीति । अनेनैव ज्योतिरन्तरस्यानात्मत्वमपि प्रत्युक्तं । यत्तु नः खद्योतादेः कादाचित्कं प्रकाशाप्रकाशकत्वं तदसत्तस्यावयवसंको
चविकाशनिमित्तत्वात्प्रकाशाप्रकाशकत्वस्य । यत्तु नतत्कं धर्माधर्मयोरेवास्य फलदातृत्वं स्वभावोऽभ्युपगन्तव्य इति तदभ्युपगमे भवतः सिद्धा
न्तहानात् । एतेनानवस्थादोषः प्रत्युक्तः तस्मात् अस्ति व्यतिरिक्तमन्तरस्थं च ज्योतिरात्मेत्येषोऽपि व्यतिरिक्तत्वादिसिद्धं । तथापि समानजाती
यानुग्राहकत्वदर्शननिमित्तभ्रान्त्या करणानामेवान्यतमो व्यतिरिक्तो वेत्यविवेकतः पृच्छति कतम इति । न्यायसूक्ष्मताया दुर्विज्ञेयत्वादुपपद्यते
भ्रान्ति । अथवा शरीरव्यतिरिक्ते सिद्धेऽपि करणानि सर्वाणि विज्ञानवन्तीत्यविवेकत आत्मनोऽनुपलब्धत्वात् ॥१४॥१५।१६।१७। अतोऽहं पृच्छामि क
तम आत्मेति । कतमोऽसौ देहेन्द्रियप्राणमनःसु यस्त्वयोक्त आत्मा येन ज्योतिषास्त इत्युक्तं । अथवा योऽयमात्मा त्वयाभिप्रेतो विज्ञानमयः सर्व
इमे प्राणाः विज्ञानमया इवैषु प्राणेषु कतमः । यथा समुदितेषु ब्राह्मणेषु सर्वे इमे तेजस्विनः कतम एषु षडङ्गविदिति पूर्वस्मिन्व्याख्याने
कतम आत्मेत्येतावदेव प्रश्नवाक्यं योऽयं विज्ञानमय इति प्रतिवचनं द्वितीये तु व्याख्याने प्राणेष्वित्येवमन्तं प्रश्नवाक्यं अथवा सर्वमेव प्रश्नवाक्यं विज्ञान

पृच्छति

वस्थाप्रसज्येत । नास्तिकैर्धर्माधर्मयोः फलदातृत्वं नाङ्गीक्रियते । धर्माधर्मयोः फलदातृत्वस्वभावाङ्गीकरणेनेत्यर्थः । देहस्येन्द्रियप्राणमनःसु । जनकेनेत्यर्थः । दृश्यन्तः मांसपिण्डस्यमध्ये । नन्वात्मज्योतिः संघाताद्य
तिरिक्तं अन्तःस्थं चेति साधितं । तथा च कथं कतम आत्मेति पृच्छ्यते तत्राह । यद्यपीति । व्यतिरेकसाधकस्य न्यायस्य दर्शितत्वात्कुतो भ्रान्तिरित्याशङ्क्याह । न्यायेति । प्रकारान्तरेण प्रश्नमुत्थापयति । अथवे
ति । व्याख्यानयोरवान्तरविभागमाह । पूर्वस्मिन्नित्यादिना । कृ इत्यादि प्रतिवचनमिति शेषः । पक्षान्तरमाह । अथवेति । सर्वस्य प्रश्नत्वे वाक्यं योजयति । विज्ञानेति । समानः सन्नित्यादि प्रतिवचनं इ
ति शेषः । द्वितीयतृतीययोः पक्षयोररुचिं सूचयन्नाद्यं पक्षमङ्गीकरोति । योऽयमिति । प्रकारान्तरेण प्रश्नं व्याकरोति । अथवा योऽर्थगतिः । योऽयमात्मा त्वयाभिप्रेतो विज्ञानमयः स प्राणेषु मध्ये कतमः स्यात्तेऽपि विज्ञानम
या इव भान्तीति योजना । हीति यस्मादित्यर्थः । अग्रिमपद्यस्य अनेकप्रथयतो । यदहमद्राक्षं तत्स्पृशामीति भिन्नकर्तृकत्वे प्रतिसंधानानुपपत्तिः इति न्यायस्य ॥ ॥

परागग्रः सोऽयमात्मा न श्रुतिश्रितः स्वेन प्रत्यक्षत्वात्र यनिर्देशः। विज्ञानमयो मनोमयः प्राणमय इत्यादि ग्रंथे। विज्ञानशब्दार्थमाचक्षाणस्तन्मयत्वं प्रकटयति। बुद्धीति। बुद्धिरेव विज्ञानं विज्ञायतेऽनेनेति व्युत्पत्तेः तेनो पाधिना संपर्कस्याविवेकस्तस्मा [illegible] विज्ञानमयः। सति विकारेऽनित्यत्वं परब्रह्मविकार इत्यर्थः। नन्वेषपक्षे प्रमाणमाह। बुद्धिविज्ञानेति। ननु चक्षुर्मयः श्रोत्रमय इत्यादि हित्वा विज्ञानमय इत्येव कस्मादुपदिश्यते तत्राह। बुद्धीति। विज्ञानं परं ब्रह्म तन्मयः [illegible] विज्ञानमय श्रुतिः [illegible] ग्रंथे [illegible] मनुवदति। येषामिति। विज्ञानमयादिग्रंथे संघटनाविकारार्थेति तेनैवोच्यते। न च मनः समभिव्याहाराद्विज्ञानं बुद्धिः न त्वात्मा बुद्धिविकारः तस्मादस्मिन्ग्रंथे मयटो विकारार्थत्वं वदतां स्वोक्तिविरोधः स्यादिति दूषयति। तेषामिति। कथं विज्ञानमयपदार्थनिर्णयार्थं प्रयोगांतरमनुश्रियते तत्राह। संदिग्धश्चेति। यथाक्षरोऽक्षाश्चतुरः कृत्वा वरहिर्व्यकरोतीति अक्षरोडाशमात्रचतुष्करणवाक्यं एकार्थसंबंधिना शाखांतरीयेणाग्नेयं चतुर्धा करोतीत्यनेन विशेषविषयतया निश्चितार्थेनाग्नेय एव पुरोडाशो व्यवस्थाप्यते। तथेहापीत्यर्थः। वाक्यशेषादिति। य

ज्योतिः पुरुष इति कतम इत्येतद्वितं योऽयं विज्ञानमय इत्येतस्य शब्दस्य निर्धारितार्थविशेषविषयत्वं कतम आत्मेति शब्दस्य प्रश्नवाक्यपरिसमाप्त्यर्थत्वं व्यवहितसंबंधमन्तरेण युक्तमिति कृत्वा कतम आत्मेत्येवमंतं प्रश्नवाक्यं योऽयमित्यादि परं सर्वमेव प्रतिवचनमिति निश्चीयते। योऽयमित्यात्मनः प्रत्यक्षत्वान्निर्देशः। विज्ञानमयशब्दस्य निर्धारितार्थविशेषविषयत्वमुक्तं। विज्ञानमयो विज्ञानप्रायो बुद्धिविज्ञानोपाधिसंपर्काविवेकाद्विज्ञानमय इत्युच्यते। बुद्धिविज्ञानसंपृक्त एव हि यस्मादुपलभ्यते राहुरिव चन्द्रादित्यसंपृक्तो बुद्धिर्हि सर्वार्थकरणं तमसीव प्रदीपः पुरोऽवस्थितः। मनसा ह्येव पश्यति मनसा शृणोतीति ह्युक्तं। बुद्धिविज्ञानालोकविशिष्टमेव हि सर्वं विषयजातमुपलभ्यते। पुरोऽवस्थितः प्रदीपालोकविशिष्टमिव तमसि द्वारमात्राणि त्वन्यानि करणानि बुद्धेः तस्मात्तेनैव विशेष्यते विज्ञानमय इति। येषां परमात्मविज्ञप्तिविकार इति व्याख्यानं तेषां विज्ञानमयो मनोमय इत्यादौ विज्ञानमयशब्दस्यान्यार्थदर्शनादश्रोतार्थतावसीयते। संदिग्धश्च पदार्थो न निश्चितप्रयोगदर्शनान्निर्धारितुं शक्यो वाक्यशेषात् निश्चितन्यायबलाद्वा। सधीरिति चोत्तरत्र पाठात्। हृद्यन्तरिति च वचनात् उक्तं विज्ञानप्रायत्वमे

प्रश्नवाक्यं समस्तम् इत्यादि प्रतिवचन [illegible]

ज्योतिःशब्दः

बुद्ध्यादित्यसंपृक्तो [illegible]

[illegible]

हृद्यन्तर्ज्योतिरर्थविशिष्ट विज्ञानमयशब्दस्येति

ननु विज्ञानाख्यपरब्रह्म विकारः [illegible]

[illegible] विज्ञानमयस्यापि [illegible]

[illegible]

प्राणसमीपे

कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनु
संचरति ध्यायतीव लेलायतीव स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि॥७॥

व। प्राणेष्विति व्यतिरेकप्रदर्शनार्था सप्तमी। यथा वृक्षेषु पाषाण इति सामीप्यलक्षणा। प्राणेषु हि व्यतिरेकाव्यतिरेकता संदिह्यत आत्मनः प्राणेषु प्राणेभ्यो व्यतिरिक्त इत्यर्थः। यो हि येषु भवति स तद्व्यतिरिक्तो भवत्येव यथा पाषाणेषु वृक्षः। हृदीति वैनस्यात्प्राणेषु प्राणजातीयैव बुद्धिः स्यादित्यत आह हृद्यन्तरिति हृत्पुण्डरीकाकारो मांसपिंडः तात्स्थ्याद्बुद्धिर्हृत् तस्यां हृदि बुद्धौ। अन्तरिति बुद्धिव्यतिरेकप्रदर्शनार्थं ज्योतिरवभासात्मकत्वादात्मोच्यते। तेन ह्यवभासकेनात्मना ज्योतिषास्ते पल्ययते कर्म कुरुते चेतनावदिव चायं कार्यकरणपिंडः। यथादित्यप्रकाशस्थो घटः। यथा वा मरकतादिर्मणिः क्षीरादिद्रव्ये प्रक्षिप्तः परीक्षणायात्मच्छायमेव तत् क्षीरादिद्रव्यं करोति तादृगेतदात्मज्योतिर्बुद्धेरपि हृदयात्सूक्ष्मत्वात् हृद्यन्तःस्थमपि हृदयादिकं कार्यकरणसंघातं चैकीकृत्य ज्योतिश्छायं करोति पारंपर्येण सूक्ष्मस्थूलतारतम्यात्सर्वांतरतमत्वात्। बुद्धिस्तावत्स्वच्छत्वादानंतर्याच्चात्मचैतन्यज्योतिःप्रतिच्छाया भवति। तेन हि विवेकिनामपि तत्रात्माभिमानबु

इति [illegible] उच्यते प्राणेषु [illegible] इत्यादि [illegible] आत्मा [illegible]

आत्मज्योतिः कथं सर्वमात्मच्छायं करोतीति तत्राह। पारंपर्येण

यथा घटः [illegible]

बाधात्मा। शङ्कोपदप्रदर्शनार्थमित्यत्र। केनोक्तेत्यपेक्षायां तेजोवै [illegible] तमिति वाक्यशेषान्निर्णयः तथेहापीत्यर्थः। आत्मविकारत्वे मोक्षानुपपत्त्या वा विज्ञानमयपदार्थनिश्चय इत्याह। निश्चितन्यायेति। यदुक्तं निर्णायक वाक्यशेषादिति तद्दर्शयति। सधीरिति। सधीः हृद्यन्तरिति वचनाभ्यां बुद्धिसादृश्यं गम्यते तेन विज्ञानप्राय इत्यर्थः [illegible] मेयं। आधारार्था सप्तमी [illegible] कथं व्यतिरेकप्रदर्शनार्थेत्याशंक्याह। यथा वृक्षेष्विति। तथा सप्तमी पस्थापि कथं व्यतिरिक्त तेन आह। यो हीति। भवतोऽपि सामीप्यलक्षणा सप्तमी। तथापि कथं व्यतिरेकप्रदर्शनमित्याशंक्याह। प्राणेषु हीति। फलितं सप्तम्यर्थमभिनयति। प्राणेष्विति। आत्मज्योतिषा आत्मस्य कार्यकरणसंघातस्य व्यवहारक्षमत्वे दृष्टांतमाह। यथादित्येति। चेतनावानिवेत्युक्तं दृष्टांतेनोपपादयति। यथा वेति। प्रतीव सर्वस्मादंतरतमत्वात्। आत्मज्योतिर्विशेषणं

कोऽसौ तत्पर्यः कर्ता

ज्योतिषः सर्वावभासकत्वे लोकप्रसिद्धिरेव न प्रमाणं किंतु भगवद्वाक्यमपीत्याह । तथा चेति । चेतनाः ब्रह्मादयः तेषामयमेव चेतनः । ज्योतिः शब्दव्याख्यानमुपसंहरति । तेनेति । हृद्यंतेस्थितोऽयमात्मा सर्वावभासकत्वेन ज्योतिर्भवतीति योजना । पदांतरमादाय व्याचष्टे । पुरुष इति । किंच चेतनानां कार्यकरणानां चेतनत्वप्रसिद्धिरनुपपन्ना सदा चिदात्मव्याप्तिरेवैषा । हेतुभमानो हीति । उक्तं वाक्यमवतारयति व्यवपीति । यथोक्तमपि प्रत्यग्ज्योतिः शरीरे दर्शयितुमशक्यमिति श्रुतिः स्वप्नं प्रस्तौतीत्यर्थः । अशक्यत्वे हेतुद्वयमाह । सर्वेति । जाग्रद्विषये स्थूलदेहाच्चक्षुरादिभ्य इंद्रियेभ्यश्च पृथक्कर्तुं त्वं ज्योतिरात्मा स्वयं न शक्यते दर्शयितुं अतः स्वप्नादि दर्शयिषुः श्रुतिः प्रक्रमत इत्यर्थः । आत्मैवानुग्राहकः सर्वेषामित्यर्थः स्वप्रकाशः चैतन्यस्य अवभासो यस्मिन्न ननु तस्य भावः चैतन्यावभासता भवति । ततः अनंतरं मनोमयकोशस्य बुद्धेः आनंतर्यात् मनश्च तदेनिश्चयविधानेक्षमं यदेतत् हृदयं बुद्धिः संकल्पविधानेक्षमं यदेतदुभयं एतत्संज्ञानं । एतेन आत्मकृतप्रकाशेन संज्ञानं यस्य तत् ॥

द्धिः प्रथमा ततोऽप्यानंतर्यात् मनसि चैतन्यावभासता बुद्धिसंपर्कात् ततः इंद्रियेषु मनःसंयोगात् ततोऽनंतरं शरीरे इंद्रियसंपर्कात् । एवं पारंपर्येण कृत्स्नं कार्यकरणसंघातमात्मा चैतन्यस्वरूपज्योतिषावभासयति । तेन हि सर्वस्य लोकस्य कार्यकरणसंघाते इत्थं अनियतात्माभिमानबुद्धिर्यथाविवेकं जायते । तथा च भगवतोक्तं गीतासु । यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः । क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत । यदादित्यगतं तेज इत्यादि च । नित्यो नित्यानां चेतनश्चेतनानामिति च काठके । तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति च येन सूर्यस्तपति तेजसेद्ध इति च मंत्रवर्णाः । तेनायं हृद्यंतर्ज्योतिः पुरुषः आकाशवत्सर्वगतत्वात् पूर्ण इति पुरुषः । निरतिशयं चास्य स्वयंज्योतिष्ट्वं । सर्वावभासात्मकत्वात् स्वयमन्यानवभास्यत्वाच्च स एष पुरुषः स्वयमेव ज्योतिःस्वभावो यं त्वं पृष्टवानसि कतम आत्मेति । बाह्यानां ज्योतिषां सर्वकरणानुग्राहकाणां प्रत्यस्तमये यतः करणद्वारेण हृद्यंतर्ज्योतिः पुरुषः आत्मानुग्राहकः करणानामित्युक्तं । यदापि बाह्यकरणानुग्राहकाणामादिपपन्नेः स्वार्थज्योतिष आत्मनोऽनुग्राहाभावे अयं कार्यकरणसंघातो न व्यवहाराय कल्पते । आत्मज्योतिः ज्योतिषां सद्भावस्तथापि आदित्यादिज्योतिषां परार्थत्वात् कार्यकरणसंघातस्याचैतन्ये स्वार्थानुपपत्तेः आत्मज्योतिरनुग्रहेणैव सर्वदा सर्वः संव्यवहारः । यदेतत् हृदयं मनश्चैतत् संज्ञानमित्यादिश्रुत्यंतरात् । साभिमानो हि सर्वप्राणिसंव्यवहारः । अभिमानहेतुं च मरकतदृष्टांतेनावोचाम । यद्यप्येवमेतत्तथापि जाग्रद्विषये सर्वकरणागोचरत्वात् आत्मज्योतिषो बुद्ध्यादिबाह्याभ्यंतरकार्यकरणव्यवहारसन्निपातव्याकुलः । त्वात् हृद्यंतर्ज्योतिरात्मा मुंजेषीकावन्निष्कृष्य दर्शयितुमित्यः स्वप्नादि दर्शयिषुः प्रक्रमते । स समानः सन्नुभौ लोकावनुसंचरति यः स पुरुषः स्वयमेव ज्योतिरात्मा स समानः सदृशः सन् केन प्रकृतत्वात् संनिहितत्वाच्च हृदयेन हृदीति हि उक्तत्वात् बुद्धिरवभासकं तदात्मज्योतिरालोकवत् अवभास्यावभासकयोर्विवेकतोऽनुपलब्धिप्रसिद्धाः विशुद्धत्वात् आलोको अवभास्येन सदृशो भवति । यथा रक्तं अवभासयन् रक्तसदृशो रक्ताकारो भवति यथा हरितं नीलं लोहितं च विभासयन् आलोकस्तत्सदृशस्तत्समानो भवति । तथा बुद्धिमवभासयन् बुद्धिद्वारेण कृत्स्नं क्षेत्रमवभासयतीत्युक्तं मरकतमणिनिदर्शनेन तेन सर्वेण समानः बुद्धिसामान्यद्वारेण सर्वमय इति चात एव वक्ष्यति । तेनासौ कुतश्चित्प्रविभज्य मुंजेषीकावत् स्वेन ज्योतीरूपेण दर्शयितुं न शक्यत इति सर्वधर्माध्यारोपणानामरूपमनं ज्योतिर्धर्मं च नामरूपयोर्नामरूपे चात्मज्योतिषि सर्वो लोको मुह्यते । अयमात्मा नायमात्मा एवंधर्मा नैवंधर्मा कर्ता अकर्ता शुद्धोऽशुद्धो बद्धो मुक्तः स्थितो गतः आगतोऽस्ति नास्तीत्यादिविकल्पैः । अतः समानः सन्नुभौ लोकौ प्रतिपन्नोऽप्रतिपन्नश्चायं इहलोकं परलोकं चोपात्तदेहेंद्रियादिसंघातत्यागोपादानप्रबंधसन्निपातैरनुक्रमेण संचरति । धीसादृश्यमेवोभयलोकसंचर । ।

एतत्संज्ञानं आत्मकृतप्रकाशेन निश्चयसंकल्पं च करोतीति । प्राणिशब्देन कार्यकरणसंघातः बुद्धिमेतिश्रौतस्वरूपमाह । अभावस्येति । ज्वलत्वात् केन सदृश उपागच्छन्नो दानं वतयोः प्रबंधः इति वक्ष्यमाणः हेतुर्नतीयः । तद्रूपो विद्धि मामकं इत्युक्त आत्मेति । पत्वं॰ सिसत्व भावः इति योजना । परप्रकाश्यत्वात् । आत्मज्योतिर्बुद्ध्या॰ करणद्वारा व्यवहारसंनिपातोऽयं तेन व्याकुलत्वात् इत्यर्थः । न ज्ञायते किंनिमित्तोऽयं व्यवहारः बुद्धिनिमित्तो वा आत्मज्योतिर्निमित्तो वेति भावः । तथा बुद्धिमवभासयन्नात्मज्योतिर्बुद्धिसदृशो भवति बुद्धेः प्रत्यमनः प्रकृतिपदार्थे इंद्रियाणां पर्यायसमानं बुद्ध्यात्मादिपाठः । तेनेति सर्वावभासकत्वेन तच्छब्दार्थः । कथं तर्हि बुद्धिसामान्यमुक्तमित्याशंक्य द्वारत्वेनेत्याह । बुद्धीति । आत्मनः सर्वेण समानत्वेन व्यवहारमनुकूलयति । सर्वमय इति चेति । तेनेति सर्वमयत्वेनेति यावत् धर्मविषयमोहमभिनयति । अयमिति । धर्मविषयं मोहं दर्शयति । एवंधर्मेति । तदेव स्फुटयति कर्मत्वादिना । समानसंनित्ये स्वार्थं मुक्तो न शिष्टं भागं व्याकरोति नन्विति इत्यादिना । विकल्पैः सर्वो लोको मुह्यत इति संबंधः । बुद्ध्यादीनि च कार्यकरणानि च कार्यकरणानि व्यवहारसंनिपातसमूहः । देहबाह्यकार्यं इंद्रियाणि बुद्धिश्च । आदिशब्देन देहेंद्रियाणां ग्रहणं । आभ्यंतरकरणानि । शुद्धाशुद्ध एवं वक्ष्यमाणत्वादिंद्रियारोपयेनैव लौल्यकालुष्यभानि संसारी विलक्षणानीव भवंति अत इत्यत इत्याद्यत्र॰रंते । तेन व्याकुलत्वात् जाग्रति । नामरूपे सर्वं आरंच्य तयोरात्मभिः मर्त्यः अंतर्ज्योतिषः धर्मं नामरूपयोः आरोप्य॰

स्यात्मनः स्वाभाविकमुभयलोकसंचरणमित्याशंक्याह। नवेति प्रत्यगात्मनस्सप्रमेयोत्यर्थः। तन्नु धर्म्यात्मनि ध्रौव्या कृतं यन्नामरूपोपाधिसमानत्वं न देवदुभयलोकसंचरणे हेतुर्न स्वतः यस्मादेवं तस्मादिति तदुच्यते समानस्सन्नुभौ लोकावनुक्रमेणासंचरतीति योजना। आलोकवदेवेति। यथा खल्वालोको नीलं पीतं वा विषयं व्याप्नुवानस्तदाकारो दृश्यते तथायमपि ध्यानवतीं बुद्धिं अवभासयन् ध्यानवानिव भवतीत्यर्थः। स्वप्नो भूत्वा इमं लोकमतिक्रामतीति संबंधः। कथमात्मा स्वप्नो भवतीति तत्राह। समयेति। कार्यकरणातीतत्वाच्च प्रत्यगात्मनो न स्वतः संसारित्वमित्याह। मृत्योरिति। रूपाण्यतिक्रामतीति पूर्वेण संबंधः। बुद्ध्यवभासकं ज्योतिरात्मेति उक्तं श्रुत्वा शाक्यः शंकते। नन्विति। ज्योतिरंतरं नास्ति चित्कथं ग्राह्यग्राहकसंविभिन्नं तत्राह। धीरेवेति। अतो आत्मानं को ग्राहको भविष्यतीत्याशयेन पृच्छति। प्राणादिषु। तस्य समानत्वस्य। निष्ठानं। घटादेरन्यत्वेन नियोजना॥ कार्यकरणानीत्यस्य विशेषणमिदं। उक्ते अन्यत्। दार्ष्टांतिके। ग्राहकाकारस्वरूपं। ननु चिदवभास्येति। शाक्याभिप्रायः

णो हेतुर्न स्वत इति तच्च तावन्नामरूपोपाधिसादृश्यं भ्रांतिनिमित्तं यन्न देव च हेतुर्न स्वत इत्येतदुच्यते यस्मात्समानः सन्नुभौ लोकावनुक्रमेणासंचरति तदेतत्प्रत्यक्षमिति एतद्दर्शयति। यतो ध्यायतीव ध्यानव्यापारं करोतीव चिंतयतीव ध्यानव्यापारवतीं बुद्धिं तत्स्थेन चित्स्वभावज्योतीरूपेणावभासयंस्तत्सादृश्यात्तत्समानः सन् ध्यायतीवालोकवदेव। अतो भवति चिंतयतीति भ्रांतिर्लोकस्य न तु परमार्थतो ध्यायति। तथा लेलायतीव अत्यर्थं चलतीव। तेष्वेव करणेषु बुद्ध्यादिषु वायुषु च चलत्सु तदवभासकत्वात्तत्सादृश्यादिति लेलायतीव। न तु परमार्थतश्चलनधर्मकं तदात्मज्योतिः। कथं पुनरेतदवगम्यते तत्समानभ्रांतिरेवोभयलोकसंचरणादिहेतुर्न स्वत इत्यस्यार्थस्य प्रदर्शनाय हेतुरुपदिश्यते। स आत्मा हि यस्मात्स्वप्नो भूत्वा स यया धिया संप्रपद्यते। स यया धिया समानः सा धीर्यदा स्वप्नो भवति तदासावपि भवति तस्माद्यदासौ स्वप्नो भवति स्वापवृत्तिं प्रतिपद्यते धीस्तदासावपि स्वप्नवृत्तिं प्रपद्यते। यदा धीर्जिजागरिषति तदासावप्यत आह। स्वप्नो भूत्वा स्वप्नवृत्तिमवभासयन् धियः स्वापवृत्त्याकारो भूत्वा इमं लोकं जागरितव्यवहारलक्षणं कार्यकरणसंघातं लौकिकशास्त्रीयव्यवहारास्पदमतिक्रामत्यतिक्रामति विविक्तेन स्वेनात्मना ज्योतिषा स्वप्नात्मिकां धीवृत्तिमवभासयन्नवतिष्ठते यस्मात्तस्मात्स्वयंज्योतिः स्वभावः सौ विभुः सकर्तृक्रियाकारकफलशून्यः पारमार्थतो धीसादृश्यमेव तूभयलोकसंचरणादिसंव्यवहारभ्रांतिहेतुः। मृत्यो रूपाणि मृत्युः कर्माविद्यादिर्न तस्यान्यद्रूपं स्वतः कार्यकरणान्येवास्य रूपाण्यतस्तानि मृत्यो रूपाण्यतिक्रामति क्रियाफलाश्रयाणि। ननु नास्त्येव धिया समानमन्यत् धियोवभासकमात्मज्योतिः। धीव्यतिरेकेण प्रत्यक्षेण वानुमानेन वानुपलंभात्। यथान्या तत्काल एव द्वितीया धीः। यत्त्ववभास्यावभासकयोरन्यत्वेपि विवेकानुपलंभात्सादृश्यमिति घटाद्यालोकयोः। तत्र भवत्वन्यत्वेनालोकस्योपलंभात्। घटादेः संश्लिष्टयोः सादृश्यं भिन्नयोरेव न तथेह घटादेरिव धियोवभासकं ज्योतिरंतरं प्रत्यक्षेण वानुमानेन वोपलभामहे। धीरेव हि चित्स्वरूपावभासकत्वेन स्वाकारा विषयाकारा च। तस्मान्नानुमानतो नापि प्रत्यक्षतो धियोवभासकं ज्योतिः शक्यते प्रतिपादयितुं व्यतिरिक्तं यदपि। दृष्टांतरूपमभिहितमवभास्यावभासकयोर्भिन्नयोरेव घटाद्यालोकयोः संयुक्तयोः सादृश्यमिति। तत्राभ्युपगममात्रमस्माभिरुक्तं। न तु तत्र घटाद्यवभास्यावभासको भिन्नो। परमार्थतस्तु घटादिरेवाभास्यात्मकसालोकोन्यान्यो हि घटादिरुत्पद्यते। विज्ञानमात्रमेव सालोकघटादिविषयाकारमवभासते। यदेवं तदा न बाह्यो दृष्टांतोस्ति विज्ञानलक्षणमात्रत्वात्सर्वस्य। एवं तस्यैव विज्ञानस्य ग्राह्यग्राहकाकारतामलं परिकल्प्य तस्यैव पुनर्बुद्धिं परिकल्पयंति। तन्न ग्राह्यग्राहकविनिर्मुक्तं विज्ञानं स्वच्छीभूतं क्षणिकं व्यवतिष्ठत॥

दृष्टांते। ग्राह्यघटाद्याकाराकारितत्वाच्च। बाह्यं आभ्यंतरं च सर्वं क्षणिकं अस्ति इति यमन्यते ते बाह्यार्थवादिनः। परमार्थः सालोको घटादिः आभासात्मकः। विज्ञानात्मक एवेत्यर्थः। बाह्यार्थवादिनोः श्रौत्रांतिकवैभाषिकयोरभिप्रायमुपसंहरति। तस्मान्नेति। इदानीं विज्ञानवादी बाह्यार्थवादिभ्यामभ्युपगतं दृष्टांतमनुः॥ वदति। यदपीति। बाह्यार्थवादप्रक्रियामनुगताभिप्रेतेति दर्शयति। तत्रेति। विज्ञानवादियथाकदृष्टांतराहित्यं फलतीत्याह। यदेवं तदेति। घटादेस्स्यापि ग्राह्यत्वं व्यावर्तयति। अन्यान्य इति। विज्ञानवादे कथं बंधमोक्षसिद्धिरत्त आह। तस्यैवेति। ग्राह्य०रता एवमलः ते। यथा तत्काले प्रथमद्वितीयक्षणादिकाले अन्या द्वितीया धीः नोपलभ्यते तथा धियोवभासकं ज्योतिरंतरं नोपलभ्यते। अतः धियः अन्यवस्तु नास्तीत्यर्थः। क्षणिकविज्ञानवादिपक्षसंग्रहः। विज्ञो। यत्त्व०कयोर्घटाद्यालोकयोः सादृश्यं। अन्य०आन् इति

वृ·भा·
११३

नन्यवादिमतमाह। तस्यापीति। तदेव स्फुटयति। तदपीति·। पक्षत्रयेपि दोषं संभावयति। सर्वाइति। प्रथमं वाह्यार्थवादिनं प्रत्याह। तत्रेति·। संश्लेषावगमान्नास्ति घटस्य व्यतिरिक्तावभास्यत्वमित्याशंक्याह। संश्लिष्टयोरपीति। धीरेवावभासकत्वेन स्वाकारान्नग्राह। न। यदवभास्यं तत्स्वातिरिक्तेनावभास्यं भास्यत्वात् यथा घटादि। अवभास्या चेयं बुद्धिः इत्यनुमानात् धीव्यतिरिक्तः साक्षी सिद्ध इतीत्यर्थः। दृष्टांतं साधयति· तमसीति·। यदि प्रदीपस्य स्वावभासनात्पूर्वमसत्व विशेषः समनंतरकालस्यात्तदा स्वात्मानं भासयतीति वक्तुं युक्तं न च सोऽस्तीति दूषयति·। नेत्यादिना। तदेवाविष्करोति यथेति·। प्रदीपस्येति· कं विशेषमुद्भावयति· पश्यतीति। विशेषाभावेपि दीपस्य स्वेनैवावभास्यत्वं किं न स्यादिति चेत्तत्राह। सहीति। तथापि कुतो विवक्षितात्मज्योतिःसिद्धिरित्याह। यश्चेति। विज्ञानस्य ग्राहकांतरग्राह्यत्वे तस्यापि ग्राहकांतरापेक्षायामनवस्थाप्रसक्तिरिति शंकते। न तावदनवस्थेति। दीपः प्रकाशात्मकः प्रकाशकात्मकश्च स्वयं बुद्धिरेव ग्राह्यात्मिका ग्राहकात्मिका चेति प्रतिवादिनामभिप्रायः· घटवदेव स्वात्मनः अग्राहकत्वात्। अतो तिरिक्तग्राहकः २। यदग्राह्यं तदव्यतिरिक्तचैतन्यग्राह्यं तदा बुद्धेः व्यति०भाविग्राह्यं ३ रूपादिग्राहकस्य गृह्यमानो जने ३ विज्ञानवादिना। अतः प्रमाणीभूता २ गृह्यते ३ ग्राहकत्व ४ साधितं व्यतिरिक्तावभास·

इति केचित्। तस्यापि शांतिं केचिदिच्छंति अंतदपि विज्ञानमनाद्यनंतग्राह्यग्राहकांशविनिर्मुक्तं शून्यमेव घटादिवाह्यवस्तुवदित्यपरे माध्यमिका आचक्षते। सर्वा एताः कल्पना बुद्धिविज्ञानावभासकस्य व्यतिरिक्तस्यात्मज्योतिषः प्रकृतवादस्य श्रेयोमार्गस्य प्रतिपक्षभूता वैदिकस्य। तत्र वाह्यार्थवादिनस्तावदनुवदते तावन्न स्वात्मानमवभासकत्वात् घटादेस्तमस्यवस्थितो घटादिस्तावन्न कदाचिदपि स्वात्मनावभास्यते प्रदीपाद्यालोकसंयोगं तु नित्यं प्राप्तेनैवावभास्यमानो दृष्ट आलोको घटश्चेति संश्लिष्टयोरपि घटालोकयोरन्यत्वमेव पुनः संश्लेषविश्लेषे च विशदर्शनाद्रज्जुघटयोरिवान्यत्वे च व्यतिरिक्तावभासकत्वं न स्वात्मनैव स्वमात्मानमवभासयति। ननु प्रदीपः स्वात्मानमेवावभासयन् दृष्ट इति। नहि घटादिवत्। प्रदीपदर्शनाय यत्प्रकाशांतरमुपाददते लौकिकाः। तस्मात्प्रदीपः स्वात्मानं प्रकाशयति·नावभास्यत्वाविशेषत्वात्। यद्यपि प्रदीपोऽन्यस्यावभासकः स्वयमवभासात्मकत्वात्तथापि व्यतिरिक्तचैतन्यावभास्यत्वं न व्यभिचरति घटादिवदेव यदा चैवं तदा व्यतिरिक्तावभास्यत्वं तावदवश्यंभावि। ननु यथा घटः चैतन्यस्यावभास्यत्वेपि व्यतिरिक्तमालोकांतरमपेक्षते नत्वेवं प्रदीपोऽन्यमालोकांतरमपेक्षते·। तस्मात्प्रदीपोऽन्यावभास्योपि सन्नात्मानं घटं चावभासयति। नत्वतः परतो वा विशेषाभावात्। यथा चैतन्यावभास्यत्वं घटस्य तथा प्रदीपस्यापि चैतन्यावभास्यत्वमविशिष्टं यत्तूच्यते प्रदीप आत्मानं घटं चावभासयतीति· तदसत्कस्माद्यदात्मानं नावभासयति तदा कीदृशः स्यात्। नहि तदा प्रदीपस्य स्वतो वा परतो वा विशेषः कश्चिदुपलभ्यते। स ह्यवभासो भवति। यस्यावभासकसन्निधावसंनिधौ च विशेष उपलभ्येत। नहि प्रदीपस्य स्वात्मनः संनिधिरसंनिधिर्वा शक्यः कल्पयितुं असति च कदाचित्को विशेष आत्मा प्रदीपः प्रकाशयतीति मृषैवोच्यते। चैतन्यग्राह्यत्वं च विज्ञानस्य वाह्यविषयैरविशिष्टं। चैतन्यग्राह्यत्वे च विज्ञानस्य वाह्यविषयैरविशिष्टे चैतन्यविज्ञानस्य ग्राह्यत्वे च किं ग्राह्यं विज्ञानं ग्राह्यते तु किं वा ग्राहकं विज्ञानं ग्राह्यतेति। तत्र संदिह्यमाने वस्तुनि यथान्यत्र दृष्टो न्यायः संकल्पयितुं युक्तो न तु दृष्टविपरीतः तथा च सति यथा व्यतिरिक्तेनैव ग्राहकेणावभास्यानां प्रदीपादीनां ग्राह्यत्वं दृष्टं तथा विज्ञानस्यापि चैतन्यग्राह्यत्वात्मकाशकत्वे सत्यपि प्रदीपवद्व्यतिरिक्तचैतन्यग्राह्यत्वं युक्तं कल्पयितुं न त्वनन्यग्राह्यत्वं। यश्चात्मा विज्ञानस्य ग्रहीता स आत्मा ज्योतिरंतरं विज्ञानात्तत्राप्यनवस्थेति चेत् न ग्राह्यत्वमात्रं हि तद्ग्राहकस्य ग्रहीत्रंतरस्य लिंगमुक्तं न्यायतः। नत्वेकांतेन ग्राहकांतरास्तित्वे वा कदाचिदपि लिंगं भवति। तस्मान्न तदनवस्थाप्रसंगो विज्ञानस्य व्यतिरिक्तग्राहकत्वकरणे तत्रापि ह्यवश्यमनवस्थेति चेत् नानियमाभावात्· नहि सर्वत्रायं नियमो भवति यत्र वस्त्वंतरेण गृह्यते वस्त्वंतरं तत्र ग्राह्यग्राहकव्यतिरिक्तं करणांतरं स्यादिति नैकांतेन नियंतुं शक्यते वैचित्र्यदर्शनात् कथं घटस्तावदन्यव्यतिरिक्तेनात्मनो ग्राह्यते तेन च प्रदीपादिनालोको ग्राह्यग्राहकयो

रन्तं दीपदृष्टांतेनैव निराकरोतीति नन्विति। ननु चैतन्यस्य दीपस्याव०पि यथा घटः व्यति०क्षते·। चैतन्यग्राह्यत्वात्सर्वोस्मिन्काले विशेषात्। सति चैतन्ये दीपोयमिति ज्ञानं नान्यथा ६ चैतन्येन ग्राह्यत्वं। स्वरूनस्य परतः स्वतो वा विशेषस्याभावात्। यस्य संनिधावसंनिधौ चावभासकविशेषो लभ्यते स अवभासकः। किं ग्राह्यविज्ञानसंबंधिनि ग्राह्यता ग्राह्यविज्ञाने बुद्धेः। किं त्वेनैव स्वस्य ग्राह्यता संभवति सति ग्राहकविज्ञानं चैतन्यं ज्योतिः। ननु अनन्यग्राह्यत्वस्य ग्राह्यत्वमुक्तं। विज्ञानाद्बुद्धेः अन्यत् ज्योतिरित्यर्थः। चैतन्यमपि च स्वस्य ग्राह्यः घटव्यतिरिक्तेन। चैतन्यग्राह्यता। विज्ञानस्यापि व्यति० ग्राह्यत्वं प्रदीपवत्। विज्ञानं प्रकाशकत्वसत्यपि चैतन्यग्राह्यत्वात् प्रकृतोपकारकः। कूटस्थो वा यस्य विज्ञानसाक्षी सोऽविद्यमानत्वान्नानवस्थेति परिहरति। नेति। यत्ग्राह्यं तत्स्वातिरिक्तग्राह्यं यथा घटादिरिति ग्राह्यत्वमात्रं उद्बुद्धिग्राहकत्वमावस्त्वंतरत्वं प्रदीपस्य स्वावभास्यत्वन्यायेनैव लिंगमुक्तं न च बुद्धिसाक्षिणो ग्राह्यत्वमस्तीति। कूटस्थदृष्टेः क्वाचाभाव्यात्तत्कृतानवस्था नुपपादयति ग्राह्यत्वमात्रं हीति। साक्षी स्वातिरिक्तग्राह्यो ग्राहकत्वात् बुद्धिवदित्याशंक्याह। नान्विति। ग्राहकत्वं हि ग्रहणकर्तृत्वं वा न तत्साक्षित्वं वा आद्ये बुद्धिसाक्षिणो नुपपत्तिः ग्रहणकर्तृत्वेन कोचिल्लिंगं संभवति। द्वितीये तस्य ग्राहकांतरास्तित्वे न कदाचिदपि प्रमाणमस्ति। तत्कृतानवस्थेत्यर्थः। करणांतरस्याभावं शंकते विज्ञानस्येति। उक्तमुद्ग्राहकत्वमर्थः चैतन्यग्राह्यत्वं तु घटादिभिरविशिष्टं प्रदीपस्य। तस्माद्विज्ञानस्यात्मग्राह्यग्राहकत्वं न प्रदी

व्यतिरिक्तकरणे· नहि प्रदीपाद्यालोको घटांशश्च अंशो वा घटवद्ग्राहकत्वेपि·
पोयं दृष्टांतः साध्यं तत्र नास्ति वि· बुद्धेः स्वेनैव ग्राह्यग्राहकत्वे समर्मी·

शिवः
११३

113

२८

वाह्यार्थवादिनिर्विघ्नस्तेविज्ञानवादीचोदयति। नन्विति। सर्वस्यविज्ञानमात्रत्वेसति घटादेर्द्विवेसुक्तदृष्टांताभावात् वाह्यार्थपलापवादिनंदूषयति। नेत्यादिना। हेतुंविशदयति। नन्विति। विज्ञानमात्रवादित्वादेकांते
नवाह्यार्थानभ्युपगतिरितिशंकते। नन्विति। विज्ञानज्ञेययोः ऽस्थेदोषान्तरमाह। नचेति। अनर्थकंशास्त्रमुपदिशतोऽप्यस्यस्वद्धत्वनस्यादित्याह। नकर्तृरिति। वाह्यइत्यर्थः। इतश्चसर्वस्यनास्तिविज्ञ
नमात्रत्वमित्याह। किंचात्मेति। स्वकीयनिषेधेस्वनिषेधेवा। निरूप्यमित्याचेत्। तथाचेति। त्वदंगीकारालोचनायामपिप्रतिवादीनांविज्ञानव्यतिरेकः सेत्स्यतीत्याह। नचेति। अन्यथाविवादाभावापाता
दितिभावः। प्रतिवादीनांनिराकर्तव्यत्वेपिविज्ञानमात्रत्वंकिंनस्यादित्याशंक्य। आत्मीयज्ञानत्वमात्मत्वंवातेप्याश्यामितिविकल्पकमेणदूषयति। नस्वात्मीयमित्यादिना। सर्वविज्ञानमात्रमभ्युपग
म्यअस्माभिःप्रतिवाद्यादयःनिराक्रियंतइत्याशंक्य आत्मीयंदूषयति। स्वनिषेधइति। स्वनिषेधेऽधिकरणाभावात्तद्व्यतिरेकेकर्तृत्वादिदूषितवादित्वंचकथंसिध्येदित्यर्थः। स्वकीयज्ञाननिषेधेस्वव
द्धिनिवृत्त्यर्थं प्रतिवादिनो निराकर्तव्यं। स्वकीयज्ञानस्वरूपे। स्वप्नविज्ञानमात्रं। स्वप्नावस्थबुद्धिमात्रग्राह्यत्वात्। यत्तत्त्वावत्साकल्पे विज्ञानभिन्नत्वेनवादिप्रतिवादिनो स्वेनाभ्युपगतेविज्ञानम्। ।

प्रदीपस्यचक्षुःप्रदीपव्यतिरेकेणानवाह्यमालोकस्थानीयंकिंचित्करणांतरमपेक्षते। तस्मान्नैवनियंतुंशक्यतेयत्रयत्रव्यतिरिक्तग्राह्यत्वंतत्रतत्रकरणांतरसा
पेक्षमिति। तस्माद्विज्ञानस्यव्यतिरिक्तग्राह्यत्वेनकरणाद्याश्रयत्वमपिग्राहकान्तरकदाचिदप्युपपादयितुंशक्यते। तस्मात्सिद्धंविज्ञानव्यतिरिक्तमात्मास्तीति
रमितिं। ननुनास्त्येववाह्योर्थोघटादिःप्रदीपोवाविज्ञानव्यतिरिक्तोयद्व्यतिरेकेणानोपलभ्यतेतत्तावन्मात्रंवस्तुदृष्टंयथास्वप्नविज्ञानग्राह्यघटपटादिवस्तु
स्वप्नविज्ञानव्यतिरेकेणानुपलंभात्। स्वप्नघटप्रदीपादेःस्वप्नविज्ञानमात्रतावगम्यते। तथाजागरितेपिघटप्रदीपादेर्जाग्रद्विज्ञानव्यतिरेकेणानुपलंभात्
जाग्रद्विज्ञानमात्रतैवयुक्ताभवितुं। तस्मान्नास्तिवाह्योर्थोघटप्रदीपादिर्विज्ञानमात्रमेवतुसर्वं। तत्रयदुक्तंविज्ञानस्यव्यतिरिक्तावभास्यत्वाद्विज्ञानव्यतिरिक्त
मस्तिज्योतिरंतरंघटादेरिवेतितन्मिथ्या। सर्वस्यविज्ञानमात्रत्वेदृष्टांताभावात्। नयावत्तावत्स्वभ्युपगमान्ननुवाह्योर्थोभवत्येकांतेनैवनाभ्युपगम्यते। ननुमया
नाभ्युपगम्यतएवनविज्ञानंघटःप्रदीपइतिचशब्दार्थःपृथक्त्वात्तावदपिवाह्यार्थांतरमवश्यमभ्युपगंतव्यंविज्ञानादर्थांतरंवक्तुं। नचेदभ्युपगम्यतेविज्ञानम्
घटःपटइत्येवमादीनांशब्दानामेकार्थत्वेपर्यायशब्दत्वंप्राप्नोति। तथासाधनानांफलस्यचैकत्वेसाध्यसाधनभेदोपदेशशास्त्रानर्थक्यप्रसंगः। तत्कर्तुश्चाज्ञानप्र
संगोवा। किंचान्यद्विज्ञानव्यतिरेकेणवादिप्रतिवादिवादस्तद्दोषोवाभ्युपगमात्तन्निराकर्तव्यत्वात्प्र
तिवाद्यादीनां। नह्यात्मीयंविज्ञानंनिराकर्तव्यमभ्युपगम्यतेस्वयंवात्मकस्यचित्। तथाचसतिसर्वसंव्यवहारलोपप्रसंगः। नचप्रतिवाद्यादयःस्वात्मनैवग्राह्या
तइत्यभ्युपगमःव्यतिरिक्तग्राह्याहितेभ्युपगम्यंते। तस्मान्नह्यस्वंवेवावाव्यतिरिक्तग्राह्यमस्तुजाग्रद्विषयत्वाज्जाग्रद्वस्तुप्रतिवाद्यादिवदितिसुलभोदृष्टांतः।
संतत्यंतरवद्विज्ञानांतरवच्चेतितस्माद्विज्ञानवादिनापिनशक्यंविज्ञानव्यतिरिक्तंज्योतिरंतरंनिराकर्तुं। स्वप्नेविज्ञानव्यतिरेकाभावाद्युक्तमितिचेत्
नाभावादपिभावस्यवस्तुत्वेनरत्वोपपत्तेर्भवनेवतावत्स्वप्नघटादेर्विज्ञानस्यभावत्वमभ्युपगतंतदभ्युपगम्यतव्यतिरेकेणघटाद्यभावउच्यतेसविज्ञान
विषयोघटादिर्यदभावोयद्भिभावःस्यादुभयथापिघटादिर्विज्ञानस्यभावभूतत्वमभ्युपगतमेवनतुतन्निवर्तयितुंशक्यतेतन्निवर्तकन्यायाभावा
त्। एतेनसर्वस्यभून्यताप्रत्युक्ता। प्रत्यगात्मग्राह्यताचात्मनोऽहमितिमीमांसकपक्षप्रत्युक्तः यत्तूक्तंसोलोकोऽन्यश्चान्यश्चघटोजायतइति। तदसत्। स्मरणात

स्तैनवज्ञात्मना कथंनाशितेसामंगीकारस्तत्राह। व्यतिरिक्तेति। घटादिविज्ञानभेदाभावात्। अन्यग्राह्यत्वात्। सर्वइत्यस्यादिशेषणं। जाग्रत्नः जाग्रत्तवस्थायाः वस्तुजाग्रद्वस्तु। वादस्यतद्दोषस्यचाभ्युपगमात्। जाग्रत्तवस्थावि
षयत्वात् प्रतिवाद्यादयः घटादिपदार्थस्य विज्ञानवस्त्वंतरोपपत्तेः पुरुषस्यसर्वज्ञस्यज्ञानेबुद्धिः घटादिविज्ञानस्वभावभूतस्याभ्युपगतस्यघटादेर्भावादभावाद्वाविषयादर्थांतरत्वात्यस्यकस्यचिद्वा
स्यार्थस्योपगमः। किंचयेत्रसंतानेनमेत्रसंतानोव्यवहारादनुमायते। सर्वज्ञज्ञानेनवा। सर्वज्ञज्ञानानिनिश्चयंते। तत्रभेदस्यस्तोपिसिद्धस्तद्दृष्टान्नीलादेस्तद्विषयभेदःशक्योनुमातुमित्याह। संतत्यंतरवदि
ज्ञानांतरवच्चेति। माध्यमिकमतप्रतिदेशेननिराकरोति। एतेनेति। ज्ञानतत्त्वेपयोर्निराकर्तुमशक्यत्वंवर्ततेतियावत्। आत्मनोग्राह्यस्यअहमितिप्रत्यगात्मनैवग्राह्यतेतिमीमांसकमतमपिप्रत्युक्तं। एकस्यैव

प्रत्यगात्मेति। क्षणभंगवादिनोऽक्षमनूद्यप्रत्यभिज्ञाविरोधेननिराकरोति। यत्तूक्तमित्यादिना। ग्राह्यान्नीलादिपदार्थात्बुद्धिभिन्नाग्राहकत्वात्। संतत्यंतरवद्विज्ञानांतरवच्चसर्वज्ञस्य पुरुषस्यघटपटादिविषयाणिज्ञानानि।

ग्राह्यग्राहकतायानिरस्तत्वादित्याह।

तथाघटःज्ञातःमयापटःज्ञातइत्यादिइत्यादिप्रकारेणज्ञायंते विज्ञानवादिना नमतेपि घटविशेषणानि।

ऽपिसएवायंघटइतिप्रत्यभिज्ञानात्।

जात्यकत्वाच्चेति। तन्निमित्तात्तेषु प्रत्यभिज्ञेति शेषः। किमिति जातिनिमित्तैषा धीर्व्यक्तिनिमित्ता किं न स्यादत आह। न हीति। न मया दृष्ट एव ज्ञातव्यक्तिमेव विषयीकुर्वत्प्रत्यभिज्ञानं केशादिषु किं न स्यात्तत्राह। कस्यचिदिति। ज्ञानस्य तस्य क्षणिकत्वे पि किमिति सादृश्यप्रत्ययो नास्ति इत्याशंक्याह। अभ्रान्तस्येति यावत्। तत्सन्ततं क्षणिकं यथा प्रदीपादिसन्तत्यामभावो अतः क्षणिका इत्यनुमानाद्विरोधाद्भ्रान्तं तत्प्रत्यभिज्ञानमित्याशंक्याह। स एवायं घट इति तु भ्याके प्रत्यभिज्ञात्वं भ्रान्तं प्रत्यक्षेणेति। ज्ञानस्य क्षणिकत्वादिति। एकस्येति। क्षणिकत्वहानिपरिहारं शंकित्वा परिहरति। अथेत्यादिना। तत्र हेतुमाह। अनेकदर्शिन इति। परपक्षे दोषान्तरमाह। व्यपदेशो नितान्तदेव विहन्यतेति। प्रत्यक्षेत्यादिना। अन्योन्यव्यपदेशादिशंकां परिहरति। अथेत्यादिना। शास्त्रप्रणयनादीति आदिशब्देन शास्त्रीयसाध्यसाधनादिग्रहः तेन क्षणिकपक्षे दूषणान्तरमाह। अकृतेति। उक्तव्यपदेशानुपपत्तिं समादधानः शंकते। दृष्टेति। सा दृश्यप्रत्ययश्च शृंखलास्थानीयेन प्रत्ययेनैव संस्मृतीत्याह। तेनेदमिति। अपसिद्धान्तप्रसक्त्या प्रत्याचष्टे। नेत्यादिना। तावेव उभौ प्रत्ययौ विषयौ तदवगाही चेन्मध्यवर्ती शृंखलावयवस्थानीयः प्रत्यय इति यावत्। कथं तर्हि लूनोत्थितनखादिषु

सादृश्यात्प्रत्यभिज्ञानं लूनोत्थितकेशनखादिष्विवेति चेत्॥ ननु तत्रापि क्षणिकस्याभिज्ञत्वात्। जात्येकत्वाच्च लूनेषु पुनरुत्थितेषु च केशनखादिषु केशनखत्वजातेरेकत्वात्केशनखप्रत्ययस्तन्निमित्तोऽभ्रान्त एव। न हि दृश्यमानलूनोत्थितकेशनखादिषु व्यक्तिनिमित्तः स एवेति प्रत्ययो भवति कस्यचिद्दीर्घकालव्यवहितदृष्टेषु तुल्यपरिमाणेषु तत्कालीनवालादिषु तुल्या इमे केशनखा इति प्रत्ययो भवति न तु त एवेति। घटादिषु पुनर्भवति स एवेति प्रत्ययः॥ तस्मान्न समो दृष्टान्तः। प्रत्यक्षेण हि प्रत्यभिज्ञायमाने वस्तुनि तदेवेति न चान्यत्वमनुमातुं युक्तं। प्रत्यक्षविरोधि लिंगस्याभासत्वोपपत्तेः। सादृश्यप्रत्ययानुपपत्तेश्च ज्ञानस्य क्षणिकत्वादेकस्य वस्तुदर्शिनो वस्त्वन्तरदर्शने सादृश्यप्रत्ययः स्यात् न तु वस्तुदर्श्येको वस्त्वन्तरदर्शनाय क्षणान्तरमवतिष्ठते विज्ञानस्य क्षणिकत्वात्। सकृद्वस्तुदर्शनेनैव क्षयोपपत्तेस्तेनेदं सदृशमिति सादृश्यप्रत्ययो भवति। तेनेति दृष्टस्मरणामिदमिति वर्त्तनप्रत्ययेनेति दृष्टं स्मृत्वा यावदिदमिति वर्त्तमानक्षणकालमवतिष्ठते ततः क्षणवादहानिः। अथ तेनेत्येवापक्षीणः स्मार्त्तः प्रत्ययः इदमिति चान्य एव वार्त्तमानिकः प्रत्ययः क्षीयते ततः तेनेदं सदृशमिति अनेकदर्शिन एकस्याभावात् व्यपदेशानुपपत्तिश्च दृष्टव्यदर्शनेनैवापक्षयाद्विज्ञानस्येदंरूपस्यप्रदेशाज्ञसामिति व्यपदेशानुपपत्तिर्दृष्टवतो व्यपदेशक्षणानवस्थानात्। अथावतिष्ठते तत्क्षणवादहानिरथादृष्टवतो व्यपदेशः सादृश्यप्रत्ययश्च तदानीं जात्यन्धस्येव रूपविशेषव्यपदेशः तत्सादृश्यप्रत्ययश्चेत्सर्वमेवपरंपरेति प्रसज्येत सर्वज्ञः शास्त्रप्रणयनादि। न च तदिष्यते। कृताभ्यागमकृतप्रणाशसदोषो तु प्रसिद्धतरो क्षणवादे दृष्टव्यपदेशहेतुः पूर्वोत्तरसहित एक एव हि शृंखलावत् प्रत्ययो जायत इति चेत्तेनेदं सदृशमिति च न वर्त्तमानातीतयोर्भिन्नकालत्वात्तत्र वर्त्तमानप्रत्यय एकः शृंखलावयवस्थानीयोऽतीतश्चापरः तौ प्रत्ययौ भिन्नकालौ तदुभयप्रत्ययविषयस्त्वेकस्तत् शृंखलाप्रत्ययस्तत्क्षणद्वयव्यापित्वादेकस्य विज्ञानस्य पुनः क्षणवादहानिः। समनवत्तादिविशेषानुपपत्तेश्च सर्वसंव्यवहारलोपप्रसंगः। सर्वस्य च स्वसंवेद्यविज्ञानमात्रत्वे विज्ञानस्य च स्वच्छावबोधावभासमात्रभावात्प्रभुगमात्रदर्शिन

यथा शृंखलायाः मध्यमोऽवयवः पूर्वोत्तरौ अवयवौ गृह्णाति तद्वत्सादृश्यप्रत्ययः तेन इदं इति च प्रत्ययद्वयं गृहीष्यन्नाभिभावः। ३

क्षणत्वाभिमानिनं

स एवायं नखः स एवायं केशः इति उच्यते इत्याशंक्याह। जात्येकत्वाच्चेति। जातिनिमित्तात्तेषु केशादिषु त एव इति प्रत्यभिज्ञा। ननु सापीति सादृश्यांगीकारे क्षणिकवादः असिद्धिमग्रे स्फुटीकरिष्यति। कथं तत्र प्रत्यभिज्ञेत्याशंक्याह। जातीति। तन्निमित्तात्तेषु प्रत्यभिज्ञा। जातिनिमित्तः। व्यक्तिनिमित्त। अनुमानस्य तदेव प्रपंचयति। लूनेत्यादि। अभ्रान्त इति हेतुः। उक्तमेवार्थं प्रपंचयति। तेनेति। सादृश्येनयः प्रत्ययः तस्यानुपपत्तेः क्षणिकत्वे परस्परानामिथ संबंधस्तर्हि मा भूदिति चेत्तत्राह। व्यपदेशः सादृश्यप्रत्ययानुपपत्तिस्तु स्थितेति चकारार्थः। यत्तु विज्ञानस्य दुःखाद्युपलब्धत्वं तद्दूषयति। सर्वस्येति। शुद्धत्वात्तत्संसर्गे दुःखाभावाद्दुःखादिसंभवः। नाप्यस्ति एकविज्ञानस्य सरागहृदयव्यापित्वमिति चेत्तत्राह। मनसीति विज्ञानमात्रत्वे दुःखमात्रत्वे तेनेदं सदृशमिति दृष्टव्यपदेशहेतुः सादृश्यप्रत्ययः पूर्वोत्तरसहितः एक एव शृंखलावत्। स्थितः स पुनः प्रत्ययः यावत्तदर्शनं प्रत्ययो जायते तावत् अवतिष्ठते ततः क्षणवादहानिः जायते इति चेत्तन्न॥ रामरामराम

अनित्यदुःखादीनां विज्ञानधर्मत्वे ततोऽतिरिक्तत्वं स्यात् । धर्माणां धर्मिमात्रत्वाभावात् । धर्मा भिन्नाः धर्मिभिन्ना । अनित्यदुःखादिर्विज्ञानस्य धर्मो न भवति । किंतु स्वरूपमेवेति शंकामनुभाष्य दोषमाह । अथेत्यादिना । ज्ञानस्य शुद्धवोधैकस्वाभाव्यमसिद्धं । दाडिमादिवत्संतानविधदुःखाद्यंशवत्त्वाश्रयणादित्याशंक्याह । नचेति । अनुमानानुगुणं प्रत्यक्षं दर्शयति । वीजेति । कार्पासादिवीजे द्रव्यविशेषसंपर्कात् तन्तुष्वादीनां रक्तादिगुणोदयोपलंभात्तत्संयोगाद्व्यापगमादेव तन्तुष्वादिषु रक्तत्वाद्यपगतिरित्यर्थः । कल्पनांतरमनूद्य दूषयति । विषयविषयीति । कथं पुनर्ज्ञानस्यान्येन संसर्गाभावः तस्य विषयेणासंसर्गादित्याशंक्याह नहीति । अनित्यश्चासौ संसर्गश्चेति तेन । इयं कल्पनेति । विज्ञानवादिनाश्रितेयं कल्पना । धर्मरूपं । सः पदार्थः । नचैव हेत्वंतरमाह । अनितेति । विषयस्य विषयिरूपेण आभासत्वं भानमित्यर्थः । विषय अनित्यदुःखं विषयी बुद्धिरूपः पदार्थः । सर्वनिर्वाणे इति विज्ञानस्यैव सर्वरूपत्वांगीकरणात् विज्ञाननाशे स

दुःखशून्यानात्मत्वाद्यनेकल्पनानुपपत्तिः । नच दाडिमादेरिव विरुद्धानेकांशवत्त्वं विज्ञानस्य स्वच्छावभासस्वाभाव्याद्विज्ञानस्य अनित्यदुःखादीनां विज्ञानांशत्वे च सत्यनुभूयमानत्वात् व्यतिरिक्तविषयत्वप्रसंगः । अथानित्यदुःखाद्यात्मकत्वमेव विज्ञानस्य तदा तद्वियोगाद्विशुद्धिकल्पनानुपपत्तिः । संयोगिमलवियोगाद्विशुद्धिर्भवति । यथादर्शनप्रभृतीनां नतु स्वाभाविकेन धर्मेण कस्यचिद्वियोगो दृष्टो नह्यग्नेः स्वाभाविकेन प्रकाशेनौष्ण्येन वा वियोगो दृष्टः । यदपि पुष्पगुणांतररक्तत्वादीनां द्रव्यांतरयोगेन वियोजनं दृश्यते । तत्रापि संयोगपूर्वत्वमनुमीयते । वीजभावनया पुष्पफलादीनां गुणांतरोत्पत्तिदर्शनात् अतो विज्ञानस्य विशुद्धिकल्पनानुपपत्तिः । विषयविषय्याभासत्वंच यन्मलं परिकल्प्यते विज्ञानस्य तदप्यन्यसंसर्गाभावादनुपपन्नम् ॥ नह्यविद्यमानेन विद्यमानस्य संसर्गः स्यात् ॥ असति वान्यसंसर्गे यो धर्मो यस्य दृष्टः ॥ सततत्वभावत्वान्नैनेन वियोगमर्हतीति यथाग्नेरौष्ण्यं सवितुर्वा प्रभाः ॥ तस्मादनित्यसंसर्गेण पुरुषार्थं कल्पयंति । तत्रापि फलाश्रयानुपपत्तिः ॥ कंटकविद्धस्य हि कंटकवेधजनितदुःखनिवृत्तिः फलं ननु कंटकविद्धमरणे तत् दुःखनिवृत्तिफलस्याश्रय उपपद्यते । तद्वत्सर्वनिर्वाणेऽसति च फलाश्रये पुरुषार्थकल्पना व्यर्थैव यस्य हि पुरुषशब्दवाच्यस्य सर्वस्यात्मनो विज्ञानस्य वाऽर्थं परिकल्प्यते तस्य पुनः पुरुषस्य निर्वाणे कस्याऽर्थः पुरुषार्थ इति स्यात् । यस्य पुनरस्त्यनेककार्यदर्शी विज्ञानव्यतिरिक्त आत्मा तस्य दृष्टस्मरणाद्दुःखसंयोगवियोगादि सर्वमेवोपपन्नः मन्यसंयोगनिमित्तं कालुष्यं तद्वियोगनिमित्ता च विशुद्धिरिति । शून्यवादिपक्षस्तु सर्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नादरः क्रियते ॥ ॥ १८ ॥ ॥रामरामरामरामरामरामरामा॥

मलिनत्वं तद्विशुद्धिश्च विज्ञानस्येतीयं कल्पनांधपरंपरैव प्रमाणशून्येत्यवगम्यते ॥ यदपि तस्य विज्ञानस्य निर्वाण ४ ५

तिसर्वविनाशः स्यादित्याशयेनाह । सर्वनिर्वाणे इति । सर्वनिर्वाणे नाशे सति सर्वाणि विज्ञानविशेषणानि । यस्यवेदांतिनमेतर । व्यवहारदशायां । पूर्वपक्षवादी संकेतेपि । कल्पनांतरमुत्थापयति । यदपीति । उपशांतिर्निर्वाणशब्दार्थः । हृदयतितत्रापीति कल्पभावेपि फलं स्यादिति चेन्नेत्याह । कंटकेति । ननु त्वन्मते वस्तुनोऽद्वयस्य ज्ञानस्यासंगस्य केनचिदपि संयोगविभागयोरयोगात् फलित्वासंभवेनोभासंभवादितुल्यमित्याशंक्याह । यस्य पुनरिति यद्यपि पूर्वावस्थातोऽसंगमंगीक्रियते तथापि क्रियाकारकफलभेदस्याविद्यामात्रकृतत्वादस्मन्मते सर्वव्यवहारसंभवान्न साम्यमिति भावः ननु वाह्यार्थवादिविज्ञानवादश्च निराकृतौ । शून्यवादो निराकर्तव्योपि कस्मान्न निराक्रियते । तत्राह । शून्यवादीति । समस्तस्य वस्तुनः सत्वेन भातानमानानां च सर्वेषां सद्विषयत्वात् शून्यस्य चाऽविषयतया प्राप्त्यभावेन निराकरणानर्हत्वान्नास्माभिस्तद्वादनिरासायादरः क्रियते । तत्तिद्वैतभावव्यतिरिक्तं नित्यसिद्धमनंतशुद्धरूपस्य सद्वयमात्मज्योतिरिति भावः । शून्यवादः प्रसंगादतिदेशेन निराकृतोपि प्राधान्येन न निराकृत इत्याह । उपपन्न ॥ ॥

बृ०भा०
११५

यन्निमित्तपरपक्षनिराकरणाय श्रुतिव्याख्यानप्रवाहानुवर्त्तयन्नुत्तरवाक्यतात्पर्यमाह।यथेति।स्वप्नजागरितसंचाराद्देहाद्यतिरेकवदिहलोकसंचारोन्यायपित्तदतिरेकस्तस्योच्यतेऽनन्तरवाक्येनेत्यर्थः।देहातिरेकआत्मनःसंप्रत्यनवाक्यंगृहीत्वाव्याकरोति।सवाइत्यादिना।वेदनासुखदुःखादिलक्षणा।आगमस्यपरलोकसाधकत्वमभिप्रेत्याह।नन्विति।स्वप्नेस्वप्नात्मिकांधीवृत्तिमवभासयन्स्वप्नो०भूत्वेति।जाग्रदवस्थाविशिष्टंदेहादिविहायर्स्वप्नसंचारात्स्वप्नावस्थाविशिष्टवासनामयंदेहादिविहायजाग्रतिसंचारात्देहादेःसकाशात्आत्मभिन्नत्वंअस्तीतिभावः।इहलोकविशिष्टंदेहादिकंविहायपरलोकसंचारात्परलोकविशिष्टंचदेहादिकंविहायइहलोकसंचारादपिदेहादेर्भिन्नत्वंआत्मनःअस्तीत्यर्थः।पाप्मभिः।एवंसपुरुषःपरलोकस्यदेहंविहायजायमानइहलोकस्यदेहेन्द्रियसंघातंअभिसंपद्यमानःस्वप्नवृत्तिंजाग्रद्वृत्तिंचउभेप्रति

यथैवेहैकस्मिन्देहेस्वप्नोभूत्वामृत्योरूपाणिकार्यकरणान्यतिक्रामतिस्वप्नेस्वेआत्मज्योतिष्यास्तेएवंसवैप्रकृतःपुरुषोयंजायमानःकथंजायमानइत्युच्यते।शरीरंदेहेन्द्रियसंघातमभिसंपद्यमानः।शरीरआत्मभावमापद्यमानइत्यर्थः।पाप्मभिःपाप्मसमवायिभिःधर्माधर्माश्रयैःकार्यकरणैरित्यर्थः।संसृज्यतेसंयुज्यते।सएवोत्क्रामन्शरीरान्तरमूर्ध्वंक्रामन्गच्छन्म्रियमाणइत्येतस्यव्याख्यानमुत्क्रामन्निति।तानेवसंसृष्टान्पाप्मरूपान्कार्यकरणलक्षणान्विजहातितैर्वियुज्यतेतान्परित्यजति।यथायंस्वप्नजागरितयोर्वर्त्तमानएकस्मिन्देहेपाप्मरूपकार्यकरणोपादानपरित्यागाभ्यामनवरतंसंचरतिधियासमानःसन्तथासौपुरुषःउभाविहलोकपरलोकौजन्ममरणाभ्यांकार्यकरणोपादानपरित्यागाभ्यामनवरतंप्रतिपद्यमानःआसंसारमोक्षात्संचरतितस्मात्सिद्धमस्यात्मज्योतिषोन्यत्वंकार्यकरणरूपेभ्यःपाप्मभ्यःसंयोगवियोगाभ्यां।नहितद्धर्मत्वेसतितैरेवसंयोगोवियोगोवायुक्तः।ननुनस्तोद्वौलोकौयौजन्ममरणाभ्यामनुक्रमेणसंचरतिस्वप्नजागरितेइवस्वप्नजागरितेतुप्रत्यक्षमवगम्यते।नत्विहलोकपरलोकौकेनचित्प्रमाणेन।तस्मादेते

सवाअयंपुरुषोजायमानःशरीरमभिसंपद्यमानःपाप्मभिःसꣳसृज्यतेसउत्क्रामन्म्रियमाणःपाप्मनोविजहाति॥१८॥तस्यवाएतस्यपुरुषस्य
द्वेएवस्थानेभवतइदंचपरलोकस्थानंचसंध्यंतृतीयꣳस्वप्नस्थानंतस्मिन्संध्येस्थानेतिष्ठन्नेतेउभेस्थानेपश्यतीदंचपरलोकस्थानंचाथयथाक्रमो
यंपरलोकस्थानेभवति·

एवस्वप्नजागरितेइहलोकपरलोकाविति उच्यते॥१८॥तस्यैतस्यपुरुषस्यद्वेएवस्थानेभवतःनतृतीयंचतुर्थंवाकेतइदंचयत्प्रतिपन्नंवर्त्तमानंजन्मशरीरेन्द्रियविषयवेदनाविशिष्टंस्थानंप्रत्यक्षतोनुभूयमानंपरलोकएवस्थानंपरलोकस्थानं।तच्चशरीरादिवियोगोत्तरकालानुभाव्यं।ननुस्वप्नोपिपरलोकस्तथाचसतिद्वेएवेत्यवधारणमयुक्तं।नकथंतर्हिसंध्यंतदिहलोकपरलोकयोःसंधौभवंसंध्यंयत्तृतीयंतत्स्वप्नस्थानं।तेनस्थानद्वित्वावधारणं।नहिग्रामयोःसंधिस्तावेवग्रामावपेक्ष्यतृतीयत्वपरिगणनमर्हति।कथंपुनस्तस्यपरलोकस्थानस्यास्तित्वमवगम्यतेयदपेक्ष्यस्वप्नस्थानंसंध्यंभवेत्।यतस्तस्मिन्संध्येस्वप्नस्थानेतिष्ठन्भवन्वर्त्तमानएवतेउभेस्थानेपश्यतिकेतेउभेइदंचपरलोकस्थानंचतस्मात्स्तःस्वप्नजागरितव्यतिरेकेणोभौलोकौयौधियासमानःसन्ननुसंचरतिजन्ममरणसंतानप्रबंधेन।कथंपुनःस्वप्नेस्थितःसन्नुभौलोकौपश्यति।किमाश्रयःकेनविधिनेत्युच्यते।अथकथंपश्यतीतिशृणु।यथाक्रमोयमाक्रमत्यनेनेत्याक्रमःआश्रयोवष्टम्भइत्यर्थः।यादृशआक्रमोस्यसोयंयथाक्रमःअयंपुरुषःपरलोकस्थानेप्रतिपत्तव्येनिमित्तेयथाक्रमोभवति।यादृशेनपरलोकप्रतिपत्तिसाधनेनविद्याकर्मपूर्वप्रज्ञालक्षणेनयुक्तोभवतीत्यर्थः॥ ॥रामरामरामराम॥

शिवः
११५

115

पद्यमानायास्त्वयमपिआत्माद्वैतिन्नियमाज्ञोतितत्स्थत्वात्।उभौइहलोकगामित्वंपरलोकगामित्वंचस्वयमप्यात्मालोकद्वयगामीभवतीत्यर्थः।भूयः।प्रतिवाक्यं।अथकथं०इतिकथंपुनः।धियेतियो।पदार्थात्यथास्वप्नजागरितंवसंचरतितथायौजन्म०संचरति।अवगम्यते।पूर्वोक्तस्यप्रतिवचनमुच्यतेइत्यर्थः।एवंतर्हिउभयलोकवत्स्वप्नजागरितेअपिनस्तः।इत्याशंक्याह।स्वप्नेति।स्वप्नप्रत्यक्षंपरलोकास्तित्वेप्रमाणमित्युक्तं।तदेवोत्तरवाक्येनस्फुटयितुंपृच्छति।कथमिमि।कथंशब्दार्थंप्रकटयति।किमित्यादिना।यत्तृतीयंस्वप्नस्थानंतत्इहलोकसंध्ये॥ ॥

यद्यपि मध्यमेव यासिकरणपाटवादैहिकवासनया स्वप्नो दृश्यते तथापि कथमंतिमे वयसि स्वप्नदर्शनं तदाह। यानि चेति। फलानि दुःखत्वमनित्यत्वात्। ऐहिकवासनावशादैहिकानामेव पाप्मनामानंदानां च स्वप्ने द-
र्शनसंभवान्न स्वप्नप्रत्यक्षं परलोकसाधकमिति निःशंकते। तत्कथमिति। परिहरति। उच्यत इति। यद्यपि स्वप्ने मनुष्याणामिंद्रियाभावेऽनुभूतो विभाति तथापि तदपूर्वमेव दर्शनमित्याशंक्याह। न चेति। भाविजन्मना विनापि स्वप्ने दृ-
नात्वप्रमेयो नुक्तम्। तदेवेति। आदित्यादिज्योतिरभावविशिष्टं स्थानमित्यर्थः। संसृष्ट इति। बाह्यैर्ज्योतिर्भिरिति शेषः। परलोकभाविनः पाप्मन आनंदांश्च। प्राप्तांकुरीभावो येन तत्तत्तादृशं बीजं सदृशं। दुःखदुःखानां वर्तमा-
नकालेननुभूयमानानीमिति। आदायेति। उक्तलक्षणस्य कार्यकरणसंघातस्य सर्ववासनाधारभूतामंतःकरणभूतिमादायेत्यर्थः। तन्न कुतः यतस्तदेव नास्ति। जाता एकवचनं विशोक सपूर्वप्रज्ञालक्षणं साधनं। उपलक्षितः
विषयविज्ञानसंयुक्तजाग्रदवस्थाविशिष्टकार्यकरणसंघातस्य भूतभौतिकवासना। दृष्टेरादित्वात्। सर्ववानित्यस्य सर्वावान् आदेशः। अमना। सर्ववासनाधारभूतामंतःकरणवृत्तिं जाग्रति एव आदित्यादीनां अनुग्रहे
सति रवव्यवहार्यमिति। सर्वं वसति स्वप्ने आदित्यादिज्योतिषां चक्षुरादिष्वनुग्रहाभावे आत्मैव ज्योतिरिति तात्पर्यं। प्रयुक्तस्तद्धर्माधर्मकर्मलोपः। सयत्रेत्यादिवाक्यस्य व्यवहितेन संबंधं वक्तुं वृत्तमनूद्याक्षिपति। यदित्या-

तमाक्रमं परलोकस्थानायोन्मुखीभूतं प्राप्तांकुरीभाववीजं तमाक्रमम् आक्रम्यावष्टभ्याश्रित्योभयान्पश्यतीति। बहुवचनं धर्माधर्मफलादेकत्वात्। उभयानुभयप्रका-
राणीत्यर्थः। कान्तान्पाप्मनः पापफलानि। ननु पुनः पाप्मसादेव पाप्मनां दर्शनं संभवति तस्मात्पापफलानि दुःखानीत्यर्थः। आनंदांश्च धर्मफलानि सुखानि तां-
स्तानुभयान्पाप्मनः आनंदांश्चेति। जन्मान्तरदृष्टवासनामयान्यानि च प्रतिपत्तव्यजन्मविषयाणि क्षुद्रधर्माधर्मफलानि धर्माधर्मप्रयुक्तो देवतानुग्रहात् वा पश्य-
ति। तत्कथमवगम्यते। परलोकस्थानभाविनां पाप्मनां दर्शनं स्वप्ने इत्युच्यते। यस्मादिह जन्मन्यननुभाव्यमपि पश्यति बहुः। न च स्वप्नो नामापूर्वदर्शनं पूर्वदृष्टस्मृति-
र्हि स्वप्नः प्रायेणातेन स्वप्नः जागरितस्थानव्यतिरेकेण तृतीयो लोकः। यदादित्यादिबाह्यज्योतिषामभावेऽयं कार्यकरणसंघातः पुरुषो यतो व्यतिरिक्तेनात्मना
ज्योतिषा व्यवहरतीत्युक्तं तदेव नास्ति यदादित्यादिज्योतिषामभावगमनं यत्रेदं विविक्तं स्वयंज्योतिरुपलभ्येत। येन स देवायं कार्यकरणसंघातः संसृष्ट-
एवोपलभ्यते। तस्मादसन्नमोऽसन्नेव वा स्वेन विविक्तस्वभावेन ज्योतीरूपेणात्मेति। अयं कश्चिद्विविक्तः स्वेन ज्योतीरूपेणोपलभ्येत वा ह्याध्यात्मिकभूत-

तमाक्रममाक्रम्योभयान्पाप्मन आनंदांश्च पश्यति स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य

भौतिकसंसर्गशून्यस्ततो यथोक्तं सर्वं भविष्यतीत्येतदर्थमाह। स यः प्रकृत आत्मा यत्र यस्मिन्काले प्रस्वपितीति प्रकर्षेण स्वापमनुभवति। तदा कि-
मुपादानः केन विधिना स्वपिति संध्यं स्थानं प्रतिपद्यत इत्युच्यते। अस्य दृष्टस्य लोकस्य जागरितलक्षणस्य सर्वावतः सर्वमवतीति सर्वावत् अयं लोकः
कार्यकरणसंघातो विषयवेदनासंयुक्तः। सर्वावत्त्वमस्य व्याख्यातमन्नत्रयप्रकरणे अथो अयं वा आत्मेत्यादिना सर्वावतः सर्वावाभूतभौतिकमात्रा अस्य सं-
संसर्गकारणभूता विद्यते इति सर्वावान् सर्ववानेव सर्वावान् तस्य सर्वावतो मात्रामेकदेशमवयवमपादायापच्छिद्यादाय गृहीत्वा दृष्टजन्मवासनावासितः स-
न्नित्यर्थः स्वयमात्मनैव विहत्य देहं पातयित्वा निःसंबोधमापाद्य जागरिते ह्यादित्यादीनां च चक्षुरादिष्वनुग्रहो देहव्यवहारार्थः। देहव्यवहारश्चात्मनो ध-
र्माधर्मफलोपभोगप्रयुक्तस्तद्धर्माधर्मफलोपभोगोपरमणमस्मिन्देह आत्मकर्मोपरमकृतमिति आत्मास्य विहंतेत्युच्यते। स्वयं निर्माय निर्माणं कृत्वा वासना-

दित्याद्याह्यज्योतिरभावे सति अयं पुरुषः कार्यकरणसंघातो येन संघातातिरिक्तेनात्मज्योतिषा गमनादि निर्वर्त्तयति तदात्मा ज्योतिरस्तीति यदुक्तमित्यनुवादार्थः। तन्न संभवति कुतः यतः आदित्यादिज्योतिषामभावगमन-
विशिष्टं यत्स्थानं तत्स्थानं नास्त्येवं यत्रेदं विविक्तं स्वयंज्योतिरुपलभ्येत। येन स देवायं करणसंघातः वाह्यज्योतिर्भिः संसृष्ट एवोपलभ्यते। करणादौ आदित्यादिज्योतिषां सद्भावादिति भावः। उपादानशब्दः
परिग्रहविषयः। अथो अयं वा आत्मा सर्वेषां भूतानां लोक इत्येकान्नपंचाशत्तमे पञ्चे। किमुपादान इत्यस्योत्तरमुक्त्वा केन विधिनेत्यस्योत्तरमाह। स्वयमित्यादिना आपाद्य स्वपितीत्युत्तरेण संबंधः। कथं पुन-
रात्मनो देहविहंतृत्वं जाग्रत्प्रयुक्तकर्मफलोपभोगोपरमणादिति सांचक्षते इत्येतदाह। जागरिते हीति। हेतुना। आदायेति। उक्तलक्षणस्य कार्यकरणसंघातस्य सर्ववासनाधारभूतामंतःकरणवृत्तिमादायेत्यर्थः। जाग्रत

[illegible]

यथामायावीमायामयंदेहंनिर्मिमीतेतद्वदित्याह।मायामयमिवेति।निर्माणक्रियाकर्मीभूतस्यस्वप्नस्यसाचलविशिष्टकर्तृसापेक्षत्वात्स्वयंकर्तृत्वमुच्यतेस्वयंनिर्मायेति।स्वेनभासेत्यत्रइत्थंभावेतृतीयाकर
णेतृतीयांव्यावर्त्तयति।१तत्रेतिस्वप्नोक्तिः।स्वप्नेस्वयंज्योतिरात्माइत्युक्तेआक्षिपति।नन्वस्येति।वासनापरिग्रहस्यमनोवृत्तिमत्त्वस्यविषयतयाविषयित्वाभावाद्विरुद्धमात्मनःस्वप्नेस्वयंज्योतिष्ट्वमितिसमाधे
त्ते।नैषदोषइति।कुतोवासनोपादानस्यविषयत्वमित्याशंक्यस्वयंज्योतिष्ट्वश्रुतिसामर्थ्यादित्याह।तेनेति।मात्रोपादानस्यविषयत्वेन।विषयीप्रकाशकविषयप्रकाशप।तत्वासनोपादानं।स्वेनज्योति

स्वयं स्वप्नदेहं मायामयमिव निर्माणमपि तत्कर्मसापेक्षत्वात्स्वयंकर्तृकमुच्यते स्वेनात्मीयेन भासा स्वेनात्मीयेन मात्रोपादानलक्षणेन भासा दीप्त्या प्रकाशेन स
र्ववासनात्मकेनान्तःकरणवृत्तेः प्रकाशेनेत्यर्थः।सा हि तत्र विषयभूता सर्ववासनामयी प्रकाशते।सा तत्र स्वयमात्मा उच्यते।तेन स्वेन भासा विषयभूतेन स्वेन
च ज्योतिषा तद्विषयिणा विविक्तरूपेणालुप्तदृक्स्वभावेन तद्भारूपं वासनात्मकं विषयीकुर्वन्प्रस्वपिति यदेवं वर्तनं तत्स्वपितीत्युच्यते।अत्रैतस्मिन्नवस्था
विशेषे एतस्मिन्काले अयं पुरुष आत्मा स्वयमेव विविक्तज्योतिर्भवति।बाह्याध्यात्मिकभूतभौतिकसंसर्गरहितं ज्योतिर्भवति।नन्वस्य लोकस्य मात्रोपादानं
कृतं कथं तस्मिन्सत्यत्रायं पुरुषः स्वयंज्योतिर्भवतीत्युच्यते।नैष दोषो विषयभूतमेव हि तत्।तेनैव चात्रायं पुरुषः स्वयंज्योतिर्दर्शयितुं शक्यः न त्वन्य

स्वयंनिर्मायस्वेनभासास्वेनज्योतिषाप्रस्वपित्यत्रायंपुरुषःस्वयंज्योतिर्भवति॥२०॥

था।असति विषये कस्मिंश्चित्सुषुप्तकाल इव।यदा पुनः सा भा वासनात्मिका विषयभूता उपलभ्यमाना भवति।तदाऽसिः कोशादिव निष्कृष्टं सर्व
संसर्गरहितं चक्षुरादिकार्यकरणव्यावृत्तस्वरूपमलुप्तदृगात्मज्योतिः स्वेन रूपेणावभासयद्गृह्यते।तेनात्रायं पुरुषः स्वयंज्योतिर्भवतीति सि
द्धं।नन्वत्र कथं पुरुषः स्वयंज्योतिर्येन जागरित इव ग्राह्यग्राहकादिलक्षणः सर्वो व्यवहारो दृश्यते चक्षुराद्यनुग्राहकाश्चादित्यालोकास्तथैव दृश्यन्ते य
था जागरिते तत्र कथं विशेषावधारणं क्रियतेऽत्रायं पुरुषः स्वयंज्योतिर्भवतीत्युच्यते वैलक्षण्यात्स्वप्नदर्शनस्य जागरिते हीन्द्रियबुद्धिमनआलोकादिव्या
पारसंकीर्णमात्मज्योतिरिह तु स्वप्न इन्द्रियाभावात्तदनुग्राहकादित्याद्यालोकाभावाच्च विविक्तं केवलं भवति तस्माद्विलक्षणम्॥ ॥२०॥ ॥

येतिकर्त्तरितृतीयास्वशब्दोत्रात्मविषयः।स्वाप्नदेहः।सचकर्मचतस्यकर्तृसापेक्ष०ते।स्वान्तःकरणवृत्तिः।अंतःकरणवृत्तिस्थेनप्रकाशेन।वासनोपादानेसति।दर्शयितुंशक्यः।उपादीयतेइतिउपादानंमात्रै
ववासनाविशिष्टंतःकरणवृत्तिरेवउपादानंतत्तल्लक्षणांस्वरूपक।रूपयहेतुना।रुपतेन।तेनस्वेनभासाऽविषयभूतेनज्ञापितःआत्मातद्विषयिणाउत्क्रियाहकेणविविक्तरूपेणाअलुप्तदृक्स्वभावेन।स्वेन
ज्योतिषाकृतोयःउक्तःप्रकाशःतेनतद्भारूपंप्रकाशेनकृत्वावासनादिकंघटपटात्मकंविषयीकुर्वन्स्वपीति।स्वप्नाख्यंवस्तुजागरितादिलक्षणम्१ ॥

उक्तं वैलक्षण्यं प्रतीतिमाश्रित्याक्षिपति। नन्विति। १ प्रतीतिं घटयति। अथेति। १ उक्तमेव प्रपंचयति २ आदित्यादिभिरनुगृहीतं स्वव्यापारक्षमं करणानां नास्ति आदित्याद्यगृहीतं चक्षुरादि जाग्रद्विषयमेवग्र तानि तु स्वप्ने। तद्ग्रहणसामर्थ्याभावात्। अतः स्वप्नावस्थायां आदित्यादये न करणमनुगृह्णाति। तदुपलब्धिनिमित्तं यत्कर्म तेन चोदिता। अतर एवोद्भूता चासौ अंतःकरणवृत्तिश्चेति तदाश्रयं। १ वासनामयरथादयो न हीन्द्रियाणां गोचरा इति ग्राहकेन्द्रियाभावाद्वैलक्षण्यं जागरितात्स्वप्नस्येति भावः। कथं तर्हि स्वप्ने दृश्यंते इत्याशंक्याह। तदिति। ६ वासनामयी सृष्टिः [illegible] स्पष्टमुत्तरमाह। उच्यत इति। २ तस्य स्वप्नविषयपदार्थस्य या उपलब्धिस्तः

ननु तथैव विषया उपलभ्यंते स्वप्नेपि यथा जागरिते तत्र कथमिंद्रियाभावाद्वैलक्षण्यमुच्यत इति। शृणु। न तत्र विषयाः स्वप्ने रथादिलक्षणाः तथा न रथयोगाः रथे युज्यंत इति रथयोगा अश्वादयः तत्र न विद्यंते न च पंथानो रथमार्गा भवंत्यथ रथान्रथयोगान्पथश्च सृजते स्वयं। कथं पुनः सृजते रथादिसाधनानां वृक्षादीनामभावे। उच्यते। ननूक्तमस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्मायेत्यंतःकरणवृत्तिरस्य लोकस्य वासना मात्रा तामपादाय। रथादिवासनारूपांतःकरणवृत्तिः तदुपलब्धिनिमित्तेन कर्मणा चोद्यमाना दृश्यत्वेन व्यवतिष्ठते तदुच्यते स्वयं निर्मायेति तदेवाह रथादीन्सृजत इति। न तु तत्र करणानि वा करणानुग्राहकानि आदित्यादिज्योतींषि तदवभास्या वा रथादयो विषया विद्यंते तद्वासनामात्रं तु केवलं तदुपलब्धिनिमित्तकर्मचोदितोद्भूतांतःकरणवृत्त्याश्रयं दृश्यते। तद्यस्य ज्योतिषो दृश्यतेऽनुभदृशास्तदात्मज्योतिरत्र केवलं। असिरिव कोशाद्विविक्तं तथा न तत्रानंदाः सुखविशेषाः मुदो हर्षोत्कर्षाः पुत्रादिलाभनिमित्ताः। प्रमुदस्त ए-

न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजते न तत्रानंदा मुदः प्रमुदो भवंत्यथानंदान्मुदः प्रमुदः
सृजते न तत्र वेशांताः पुष्करिण्यः स्रवंत्यो भवंत्यथ वेशांताः पुष्करिण्यः स्रवंत्यः सृजते स हि कर्ता॥ २१ ॥

व प्रकर्षोपेताः। अथ चानंदादीन्सृजते। तथा न तत्र वेशांताः पल्वलाः पुष्करिण्यस्तडागाः स्रवंत्यो नद्यो भवंति। अथ वेशांतादीन्सृजते वासना[illegible]मात्ररूपान्यस्मात्स हि कर्ता। तद्वासनाश्रयचित्तवृत्त्युद्भवनिमित्तकर्महेतुत्वेनेत्यवोचाम तस्य कर्तृत्वं। न तु साक्षादेव तत्र क्रिया संभवति साधनाऽभावात्। न हि कारकमंतरेण क्रिया संभवति। न च तत्र हस्तपादादीनि क्रियाकारकानि भवंति। यत्र तु तानि विद्यंते जागरिते तत्रात्मज्योतिरवभासितैः कार्यकरणैः रथादिवासनाश्रयांतःकरणवृत्त्युद्भवनिमित्तं कर्म निर्वर्त्यते तेनोच्यते स हि कर्तेति। तदुक्तमात्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुत इति। तत्रापि न परमार्थतः॥ स्वतः कर्तृत्वं चैतन्यज्योतिषोऽवभासकत्वव्यतिरेकेण। यदेतत्यात्मज्योतिषांतःकरणद्वारेणाभासयति कार्यकरणानि तदभासितानि कर्मसु व्याप्रियंते कार्यकरणानि तदभासितानि कार्यकरणानि तत्र कर्तृत्वमुपचर्यत आत्मनः। यदुक्तं ध्यायतीव लेलायतीवेति तदेवानूद्यते स हि कर्तेति हि हेत्वर्थः॥ ॥ २१ ॥

यस्मिन्निमित्तभूतेन· प्रेर्यमाणवासनात्मकेन· सघटपटादिरूपेण· कर्मैव हेतुः कर्तृभिः कारितं· तर्हि जागरिते कर्ता स्यात् इत्याशंक्याह। यत्रेति। तस्मात्। कुतोऽस्य कर्तृत्वं सहकार्यभावादित्याशंक्याह। तद्वासनेति। तच्छब्देन वेशांतादिग्रहणं। १ मुख्यं कर्तृत्वं वारयति। नत्विति। तत्रेति स्वप्नोक्तिः। तत्रापि जागरितेपि। स हि कर्तेत्यौपचारिकं कर्तृत्वमुच्यते चेत्तस्य ध्यायतीवेत्यादिनाऽऽक्तत्वात्पुनरुक्तिरित्याशंक्याह। यदुक्तमिति १ अनुवादप्रयोजनमाह। हेत्वर्थमिति। स्वप्ने रथादिसृष्टौ इति शेषः। औपचारिककर्तृत्वकथनार्थमित्यर्थः। यत्र यस्मात्कारणाच्चैतन्यमेवात्मज्योतिः यत्नेन अंतःकरणद्वारेणात्मा कार्यकरणानि अवभासयति तद० सत्त्वात्मनः। ॥

तथास्वप्नगतंविशेषांतरंउच्यते१वासनामयान्घटपटादीन्नेत्रकरणादींश्च१प्रकाशात्मकबुद्धियोगात्२जाग्रदवस्थायुक्तेनस्वेनरूपेणावर्त्तमानात्१अंतःकरणाश्रयवासनारूपंवस्तु२शरीरं।यत्रयत्र।भवति॥ ॥

तदेतस्मिन्नुक्तेर्थेएतेश्लोकामंत्राभवंति।स्वप्नेनस्वप्नभावेनशारीरंशरीरमभिप्रहत्यनिश्चेष्टमापाद्यऽसुप्तःस्वयमलुप्तदृगादिशक्तिस्वाभाव्यात्।सुप्तान्वासना
कारोद्भूतानंतःकरणवृत्त्याश्रयान्बाह्याध्यात्मिकान्सर्वानेवभावान्स्वेनरूपेणप्रत्यस्तमितान्सुप्तानभिचाकशीति।अलुप्तयादृष्ट्यापश्यत्यवभासयती
त्यर्थः।शुक्रंशुभ्रंज्योतिष्मदिंद्रियमात्रारूपमादायगृहीत्वापुनःकर्मणेजागरितस्थानमेत्यागच्छतिहिरण्मयोहिरण्मयइवचैतन्यज्योतिःस्वभावः
पुरुषःएकहंसः।एकएवहंतीत्येकहंसः॥एकोजाग्रत्स्वप्नेहलोकपरलोकादीन्गच्छतीत्येकहंसः॥ २२ ॥तथाप्राणेनपंचवृत्तिनारक्षन्परिपालयन्नन्य

तदेतेश्लोकाभवंतिस्वप्नेनशारीरमभिप्रहत्यासुप्तःसुप्तानभिचाकशीति।शुक्रमादाय
पुनरैतिस्थानꣳहिरण्मयःपुरुषएकहंसः॥ २२॥ प्राणेनरक्षन्नवरंकुलायंबहिःकुलायादमृ
तश्चरित्वा।सईयतेऽमृतोयत्रकामꣳहिरण्मयःपुरुषएकहंसः॥ २३॥ स्वप्नांतउच्चावचमीयमा
नोरूपाणिदेवःकुरुतेबहूनि।उतेवस्त्रीभिःसहमोदमानोजक्षदुतेवापिभयानिपश्यन्।२४।

थामृतभ्रांतिःस्यादवरंनिकृष्टमनेकाशुचिसंघातत्वादत्यंतबीभत्संकुलायंनीडंस्वयंतुबहिस्तस्मात्कुलायाच्चरित्वा।यद्यपिशरीरस्थएवस्वप्नंपश्यतितथा
पितत्संबंधाभावात्तत्स्थइवाकाशोबहिश्चरित्वेत्युच्यते।अमृतःस्वयममरणधर्माईयतेगच्छति।यत्रकामंयत्रयत्रकामोविषयेषूद्भूतवृत्तिर्भवतितं।का
मंवासनारूपेणोद्भूतंगच्छति॥ २३॥ किंचस्वप्नांतेस्वप्नस्थानेउच्चावचंउच्चंदेवादिभावमवचंतिर्यगादिभावंनिकृष्टंतदुच्चावचमीयमानोगम्यमा
नोगच्छन्रूपाणिदेवोद्योतनवान्कुरुतेनिर्वर्त्तयतिवासनारूपाणिबहून्यसंख्येयानिउतअपिस्त्रीभिःसहमोदमानइवजक्षदिवहसन्निववयस्यैः
उतइवअपिभयानिबिभेत्येभ्यःइतिभयानिसिंहव्याघ्रादीनिपश्यन्निव॥ २४॥ ॥रामरामरामरामरामरामरामरामरामरामरामरामराम

शरीरस्थस्यसंबंधाभावात्कथंइत्याशंक्यदृष्टांतमाह॥तत्स्थइतियथादेहस्थःआकाशःदेहसंबंधरहितस्तथापि॥ ॥रामरामरामरामरामराम॥ ॥रामरामराम॥ ॥रामरामरामराम।

117

इन्द्रियाण्येव वारायस्येति इन्द्रियद्वारो जाग्रद्देहः तस्मात् । सहसा बोध्यमान इन्द्रियद्वाराणि न प्रतिपद्यते किमत्र प्रमाणमित्याशंक्यानंतरवाक्यमवतार्य व्याचष्टे । तदेतदाहुरित्यादिना । वाक्यांतरमादाय तात्पर्यमु-
क्त्वाऽऽकांक्षापूर्वकमक्षराणि व्याकरोति । तं नेत्यादिना । किमर्थं वदंतीत्याशंक्याह । नूनमिति । कथं ज्ञायते तेन पश्यंतीत्याशंक्याह । यत इति । देहाद्बहिर्वर्तमानत्वेऽपि किमर्थं बोधनप्रतिषेध इत्याशंक्याह ।

ध

आराममारमणमाक्रीडमनेन निर्मितं वासनारूपमस्यात्मनः पश्यंति सर्वे जनाः ग्रामं नगरं स्त्रियमन्नाद्यमित्यादिवासनानिर्मितमाक्रीडनरूपं न तं पश्यति कश्चन कष्टं वर्तते अत्यंतविविक्तदृष्टिगोचरापन्नमप्यहो भाग्यहीनता लोकस्य यच्छक्यदर्शनमप्यात्मानं न पश्यतीति लोकं प्रत्यनुक्रोशं दर्शयति श्रुतिरत्यंतविविक्तः स्वयंज्योतिरात्मा स्वप्ने भवतीत्यभिप्रायस्तं नायतं बोधयेदित्याहुः प्रसिद्धिरपि लोके विद्यते स्वप्न आत्मज्योतिषो व्यतिरिक्तत्वे कथं तमात्मानं सुप्तमायतं सहसा भृशं न बोधयेदित्याहुरेवं कथयंति चिकित्सकादयो जना लोके नूनं ते पश्यंति जाग्रद्देहादिन्द्रियद्वारतोऽपसृत्य केवलो बहिर्वर्तत इति । यत आहुस्तं नायतं बोधयेदिति तत्र च दोषं पश्यंति भृशं ह्यसौ बोध्यमानस्तानीन्द्रियद्वाराणि सहसा प्रतिबोध्यमानो न प्रतिपद्यत इति । तदेतदाहुर्दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते । यदीन्द्रियद्वारदेशं यस्माच्छुक्लमादायोपसृतस्तस्मिन्निन्द्रियदेशमेष आत्मा पुनर्न प्रतिपद्यते । कदाचिद्व्यत्यासेनेन्द्रियमात्राः प्रवेशयति । ततः आंध्यबाधिर्यादिदोषप्राप्तौ दुर्भिषज्यं दुःखभिषक्कर्मतां हास्मै देहाय भवति । दुःखेन चिकित्सनीयो देहो भवतीत्यर्थः । तस्मात्प्रसिद्ध्यापि स्वप्ने स्वयंज्योतिष्ट्वमस्य गम्यते । यस्मात्स्वप्ने भ्राम्यति क्रांतो मृत्यो रूपाणीति ।

आराममस्य पश्यंति न तं पश्यति कश्चनेति तं नायतं बोधयेदित्याहुः दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते अथो खल्वाहुर्जागरित-
देश एवास्यैष इति यानि ह्येव जाग्रत्पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयंज्योतिर्भवति सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ २५

तस्मात्स्वप्ने स्वयंज्योतिरात्मा । अथो अपि खल्वन्य आहुर्जागरितदेश एवास्यैषः यः स्वप्नो न संध्यं स्थानांतरं इहलोकपरलोकाभ्यां व्यतिरिक्तं किं तर्हि इहलोक एव जागरितदेशः पर्यायेण किं चातो यद्येवं भवति यदा जागरितदेश एवायं स्वप्नस्तदायमात्मा कार्यकरणेभ्यो न व्यावृत्तस्तैर्मिश्रीभूतो नात्र स्वयंज्योतिरात्मेत्यतः स्वयंज्योतिष्ट्वबाधनायान्य आहुर्जागरितदेश एवास्यैष इति तत्र च हेतुमाचक्षते । जागरितदेशत्वे यानि हि यस्माद्धस्त्यादीनि पदार्थजातानि जाग्रज्जागरितदेशे पश्यति लौकिकस्तान्येव सुप्तोऽपि पश्यतीति । तदसत् इन्द्रियोपरमादुपरतेषु हीन्द्रियेषु स्वप्नान्पश्यति तस्मान्नान्यस्य ज्योतिषस्तत्र संभवोऽस्ति तदुक्तं न तत्र रथा न रथयोगा इत्यादि तस्मादत्रायं पुरुषः स्वयंज्योतिर्भवत्येव स्वयंज्योतिरात्मास्तीति स्वप्नदर्शनेन प्रदर्शितमतिक्रामति मृत्यो रूपाणीति च क्रमेण संचरन्निहलोकपरलोकादीनिहलोकपरलोकादिव्यतिरिक्तस्तथा जाग्रत्स्वप्नकुलायाभ्यां व्यतिरिक्तस्तत्र च क्रमसंचारान्नित्यश्चेत्येतत्प्रतिपादितं याज्ञवल्क्येन । अतो विद्यानिःक्रयार्थं सहस्रं ददामीत्याह जनकः । सोऽहमेवं बोधितस्त्वया भगवते तुभ्यं सहस्रं ददामि मोक्षस्य कामप्रश्नो मयाभिप्रेतस्तदुपयोगपर्यंतोऽर्थो न तदेकदेश एवा-
त्त्वां नियोक्ष्यामि समस्तकामप्रश्ननिर्णयश्रवणेन विमोक्षायात ऊर्ध्वं ब्रूहि । येन संसाराद्विमुच्येयं त्वत्प्रसादाद्विमोक्षपदार्थैकदेशनिर्णयहेतो ॥

स्थानांतरं । हितं दृष्ट्वा

तत्र चेति । न पश्यतीत्यर्थः । नेत्रकरणादीनि । स्वप्ने आत्म० नात्वे सप्रमी लोके प्रसिद्धिरपि भवति । देहाद्व्यतिरिक्तत्वे । येनैवेन्द्रियावभासेनेन्द्रियाणि कार्यक्षमाणि तेनैवेन्द्रियावभासयुक्तांतःकरणाश्रितां वासनामादाय । उक्तवि-
शेषणविशिष्टं सवासनमंतःकरणमादायेत्यर्थः । शुक्लाद् इन्द्रियैः संश्लिष्टाः वासना । कार्यकरणान्येवमन्यो रूपाणि । इह० देशाद्धि जागरितदेश एवास्य स्वप्न इत्यर्थः । इह० भ्रांत्या व्यतिरिक्तत्वेन स्वीकृतं संध्यं जागरितान् ।

बृ॰ भा॰
११८

मृत्युं नातिक्रामतीत्यत्र हेतुमाह। अन्यस्येति। उक्तमुपपादयति। कर्मणो हीति। अतः स्वप्नगतो मृत्युरूपं कर्मारब्धं नातिक्रामतीति शेषः। य एष शब्दमनूद्य व्याकरोति। एष इति। संप्रसादे स्थित्वा मृत्युमतिक्रामतीति शेषः। सुषुप्तस्य संप्रसादत्वं साधयति। जागरित इत्यादिना। सलिल इति। सलिलः सलिलवत्स्वच्छः। आकांक्षापूर्वकमाह। कथमिति। रत्वेत्यादिमाकृष्य वर्तन् परिहरति। स्वप्नादिति। तस्मादिति। तस्मात्स्वप्नावस्थायाः ऊर्ध्वं स्वप्नः सुषुप्तावस्थाविशिष्टः भूत्वा मृत्युमतिक्रामतीत्यर्थः। स्वप्ने मृत्योः स्वभावत्वाभावेऽपि जाग्रदवस्थायां कर्तृत्वमात्मनः स्वभावस्तथा च नियमेन तस्य मृत्योरतिक्रमो न सिध्यतीति शंकते। नन्विति। औपाधिकत्वात्कर्तृत्वस्य स्वाभाविकत्वान्सुषुप्ते दात्मनो मृत्योरतिक्रमः संभवतीति परिहरति। नेति। नागतमिति। स्वप्नान्तमुत्थाय सुषुप्तिमनुभूयोत्तरकालमिति यावत्। स्थानात्स्थानान्तरप्राप्त्यवस्थासंवलनं पुनः

४

सहस्रदानं। यत्प्रस्तुतमात्मनैवायं ज्योतिषास्त इत्येतत्प्रत्यक्षतः प्रतिपादितमत्रायं पुरुषः स्वयंज्योतिर्भवतीति स्वप्ने। यत्तूक्तं स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणीति तन्नैव तदाशंक्यते। मृत्यो रूपाण्यवातिक्रामति न मृत्युं प्रत्यक्षं ह्येतत्स्वप्ने कार्यकरणव्यावृत्तस्यापि भीहर्षासादिदर्शनम्। तस्मान्नूनं नैवायं मृत्युमतिक्रामति। कर्मणो हि स्वत्वो कार्यं भीहर्षासादि दृश्यते। यदि ह्येवममुना बद्ध एवायं स्वभावतस्ततो विमोक्षो नोपपद्यते। न हि स्वभावात्कश्चिद्विमुच्यते। अथ स्वभावो न भवति मृत्युस्ततस्तस्य मोक्ष उपपत्स्यते। यथासौ मृत्युरात्मीयो धर्मो न भवति तथा प्रदर्शनायाह। अत ऊर्ध्वं विमोक्षायैव ब्रूहीत्येवं जनकेन पर्यनुयुक्तो याज्ञवल्क्यस्तद्दिदर्शयिषया प्रवृत्ते। स वै प्रकृतः स्वयंज्योतिः पुरुषः स एष यः स्वप्ने प्रदर्शितः। एतस्मिन् संप्रसादे सम्यक्प्रसीदत्यस्मिन्निति संप्रसादे जागरिते देहेन्द्रियव्यापारशतसन्निपातजं हित्वा कालुष्यं तेभ्यो विप्रमुक्त ईषत्प्रसीदति स्वप्ने॥ २५ ॥ इह तु सुषुप्ते सम्यक्प्रसीदत्यतः सुषुप्तः संप्रसाद उच्यते। तीर्णो हि तदा सर्वांश्शोकान्हृदयस्य भवतीति हि वक्ष्यति सुषुप्तस्थमात्मानं। स वा एष एतस्मिन्संप्रसादे क्रमेण संप्रसन्नः सन्सुषुप्ते स्थि-

स वा एष एतस्मिन्संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव

त्वा कथं संप्रसन्नः स्वप्नात्सुषुप्तं प्रविविक्षुः स्वप्नावस्थायां रत्वा रतिमनुभूय मित्रबन्धुजनदर्शनादिना चरित्वा विहृत्यानेकधा चरणफलं श्रममुपलभ्येत्यर्थः। पुण्यं च पुण्यफलं पापं च पापफलं न तु पुण्यपापयोः साक्षाद्दर्शनमस्तीत्यवोचाम तस्मान्न पुण्यपापानुबद्धो यो हि करोति पुण्यपापे स ताभ्यामनुबध्यते। न हि दर्शनमात्रेणानुबंधः स्यात्तस्मात्स्वप्नो भूत्वा मृत्युमतिक्रामत्येव न मृत्यू रूपाण्येव केवलमतो न मृत्योरात्मस्वभावत्वाशंका मृत्युश्चेत्स्वभावोऽस्य स्वप्नेऽपि कुर्यान्न तु करोति स्वभावश्चेत्क्रिया स्यादनिर्मोक्षतैव स्यान्न तु स्वभावः स्वप्नेऽभावादतो विमोक्षोऽस्योपपद्यते मृत्योः पुण्यपापाभ्यां न तु जागरिते स्वस्वभाव एव। नन्वात्मोपाधिकृतं हि तत्तत्र प्रतिपादितं ध्यायतीव लेलायतीवेति तस्मादेकान्तेनैव स्वप्ने मृत्युरूपातिक्रमणान्न स्वाभाविकत्वाशंकाऽनिर्मोक्षता वा। तत्र चरित्वेति च र[illegible]त्यर्थः। ततः संप्रसादानुभवोत्तरकालं पुनः प्रतिन्यायं यथान्यायं यथागतं नि आयो न्यायः अयनमायो निगमं पुनः पूर्वगमनवैपरीत्येन यदागमनं स प्रतिन्यायो यथागतं पुनरागच्छतीत्यर्थः॥ प्रतियोनि यथास्था ॥

ष्टः। भावा स्वप्ने मित्रबंधुजनदर्शनादिना रत्यनुभव एव संप्रसन्नत्वं स्वप्ने क्रमेण संप्रसन्नः सन्। कार्यकरणानीत्यर्थः। कार्यकरणाभ्यां व्यावृत्तस्य। आत्मीयधर्मेण। जागरिते देहेन्द्रियैः। सुषुप्तावस्था। तीर्णो हि तदा सर्वान्शोकान्हृदयस्य भवति। स्वरूपत्वाशंका। मृत्युरात्मकर्मा स्यात्स्वभावश्चेत्स्यात्तर्हि अनिर्मोक्षतैव स्यात्। सुषुप्तो। जीवक्रमेण संप्रसन्नः सन्। यस्य कर्मणा पुण्यं फलमस्ति तत्कर्म दृष्ट्वैव नकृत्वेत्यर्थः। प्रतियोनि यथास्थानं स्वप्नस्थानं नयोऽपि पर्यायः। जागरितात्स्वप्नं ततः सुषुप्तं गच्छतीति पूर्वगमनं तद्वैपरीत्येन सुषुप्तात्स्वप्नं जागरितं वा गच्छतीति यदागमनं स प्रतिन्यायः। उक्तमप्यनुसंधानार्थं पुनर्वदति। तत्र चरित्वेत्यादि। तत्र स्वप्ने चरित्वा विहृत्य श्रममुपलभ्य पुण्यं पापं च दृष्ट्वा तत्स्वप्नादुत्थाय सुषुप्तिमनुभूय उत्तरकालं यथातथा आगच्छतीत्यर्थः। स वा इति। स एव स्वप्ने दर्शितः स वा एष पुरुषः क्रमेण

प्रतिन्यायं यथास्थानं तथा प्रतियोनिं स्वप्नस्थानं आद्रवति प्राप्नोति स्वप्नायैव स्वप्नावस्थानुभवार्थमित्यर्थः॥

सर्वानुशोका
भवति

संप्रसन्नः सन्नेतस्मिन्संप्रसादे सुषुप्ते स्थित्वा मृत्युं अतिक्रामतीति योजनाः ॥

शिवः
११८
118

३२

स्वप्नदृष्टस्य। तदा सत्त्वे लोक इति सिद्धिमनुकूलयति। व्याख्यातारश्चेति। सन्न मूर्त्तस्य मूर्त्तान्तरेण संयोगे क्रियोपलंभादमूर्त्तस्यात्मनस्तदभावादमूर्त्तत्वेनासंगात्क्रियाऽयोगादकर्तृत्वसिद्धिरित्याह। कार्यकरणौरित्यादिना। किं यावन्त्वाभावे जन्ममरणादिराहित्यं कोऽस्य फलतीत्याह स्मादीति। आत्मैव एको मूर्त्त अन्यन व्यतिरिक्ताः सर्वपदार्थास्तु मूर्त्ता एव आगच्छन्ति। पुण्यपापफलहेतुं स्वकृतं पुण्यं पापं वेत्यर्थः

नस्वप्नस्थानं स्वप्नस्थानात्प्रसुप्तं प्रतिपन्नः स यथास्थानमेव पुनरागच्छति प्रतियोन्याद्रवति स्वप्नायैव स्वप्नस्थानायैव। ।ननु स्वप्ने न करोति पुण्यपापे तयोः फलमेव पश्यतीति। कथमवगम्यते। यथा जागरिते तथा करोत्येव स्वप्नेपि तुल्यत्वाद्दर्शनस्येति। अत आह। स आत्मा यत्किंचित्तत्र स्वप्ने पश्यति पुण्यपापफलमनन्वागतोऽननुबद्धस्तेन दृष्टेन भवति। यदि हि स्वप्ने कृतमेव तेन स्यात्तेनावबद्धः स्वप्नादुत्थितोपि समन्वागतः स्यात्। न च तल्लोके स्वप्नकृतः कर्मणान्वागतत्वप्रसिद्धिः। नहि स्वप्नकृतेनागसागस्कारिणमात्मानं मन्यते कश्चित्। न च स्वप्नदृष्टागः श्रुत्वा लोकस्तं गर्हति परिहरति वा। अतोऽनन्वागत एव तेन भवति। तस्मात्स्वप्ने कुर्वन्निवोपलभ्यते न तु क्रियास्ति परमार्थतः। उतेव स्त्रीभिः सह मोदमान इति हि श्लोक उक्तः। व्याख्यातारश्च स्वप्नस्य सहेवशब्देनावसते हस्तिनो घटीकृता धावंतीव मया दृष्टा इति। अतो न तस्य कर्तृत्वं। कथं पुनरस्याकर्तृत्वमिति कार्यकरणैर्मूर्त्तैः संश्लेषो यो मूर्त्तस्य स तु क्रिया

नैवानुबद्धो
भवति

स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति॥ ॥२६॥ ॥स वा एष एतस्मिन्स्वप्ने रत्वा चरित्वा दृ ॥

हेतुर्दृष्टेन। न ह्यमूर्त्तः कश्चित्क्रियावान्दृश्यते मूर्त्तश्चात्मातोऽसंगः। यस्माच्चासंगोयं पुरुषस्तस्मादनन्वागतस्तेन स्वप्नदृष्टेन भवत्यत एव न क्रियाकर्तृत्वमस्य कथंचिदुपपद्यते। कार्यकरणसंश्लेषे कर्तृत्वं स्यात्स च संश्लेषः संगोस्य नास्ति यतोऽसंगो ह्ययं पुरुषस्तस्मादमृत एवमेवैतद्याज्ञवल्क्य सोहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहि मोक्षपदार्थैकदेशस्य कर्मविवेकस्य सम्यग्दर्शितत्वादत ऊर्ध्वं विमोक्षायैव ब्रूहीति तत्रासंगो ह्ययं पुरुष इत्यसंगता कर्तृत्वे हेतुरुक्ता उक्तं च पूर्वं कर्मवशात्स ईयते यत्र काममिति कामश्च संगः अतोऽसिद्धो हेतुरुक्तोऽसंगो ह्ययं पुरुष इति। न त्वेतदस्ति॥ २६ ॥ कथं तर्ह्यसंग एवेति तदुच्यते स वा एष एतस्मिन्स्वप्ने स वै एष पुरुषः संप्रसादात्प्रत्यागतः स्वप्ने रत्वा चरित्वा यथाकामं दृष्ट्वैव पुण्यं च पापं चेति सर्वं पूर्ववत्। बुद्धान्तायैव जागरितस्थानायतस्मादसंग एवायं पुरुषः यदि स्वप्ने संगवान्स्यात्कामी न तत्संयोगजैर्दोषैर्बुद्धान्ताय प्रत्यागतो लिप्येत यथासौ स्वप्नेऽसंगत्वात्स्वप्नसंगजैर्दोषैर्जागरिते प्रत्यागते जागरितेन लिप्यते एवं जागरितसंगजैर्दोषैः

आगस्कारिणं। स्वप्नस्य व्याख्यातारश्च शब्देन सहेवशब्दसाहित्येन स्वप्नमाचक्षते। प्रकारान्तरेण समाधातुं पूर्वपक्षयति कथं पुनरीति। कार्यकरणैः सह संश्लेषोस्तीति। पूर्वपक्षपूर्वग्रंथेन जागरितस्थानं प्राप्नुसि र्थः। [illegible] पदादेः क्रियाया हेतुः। स्वप्नहेतुकर्मसामर्थ्यात्। अत उच्यते। अत ऊर्ध्वं विमोक्षायैव ब्रूहीति। न च लिप्यते अतः स्वप्ने चिन्तमेव कामिनत्वात्मेतिभावः। जागरिते। स्वप्ने क्रियाया अकरणात्। फ

[illegible]

नन्वौपाधिकंकर्तृत्वंपूर्वमुक्तं।तन्निराकरणेपूर्वापरविरोधःस्यादित्याह।ऊहन्निवेति।उपाधिनिरपेक्षःकर्तृत्वाभावइतिशेषः।नचेति।यथामोक्षैकदेशस्यकर्मविवेकस्यदर्शितत्वात्पूर्वंत्रसहस्रदानमुक्तंतथात्रापि
तदेकदेशस्यकामविवेकस्यदर्शितत्वात्तद्दानंननुकामप्रश्नस्यनिर्णीतत्वादित्यर्थः।द्वितीयतृतीयकंडिकयोस्तात्पर्यंसंगृह्णाति।नचेत्यादिना।यथाप्रथमकंडिकयाकर्मविवेकःप्रतिपादितस्तथेतिया
वत्।कथंपुनस्तस्यसुषुप्तविषयत्वमतआह।दर्शनवृत्तेरिति।दर्शनंवासनामयंतस्यवृत्तिर्यस्मिन्नितिव्युत्पत्त्यास्वप्नोदर्शनवृत्तिः।तत्रैववाक्यशेषानुगुणमाह।एतस्मादिति।अग्रिमपद्येइदं।इंद्रियाणि
कर्तृत्वमितिशेषः।ननुआत्मज्ञाननिश्चयः।सुषुप्तंगतःजागरितेदोषैर्नकथंलिप्यतेतत्राह।प्रतियोन्याद्रवतिस्वप्नायैवेतिस्वप्नशब्देनाभिधानं।एवंकथमुच्यतेतत्राह।स्वप्नांतेइति।भेदोपपत्ते·

र्नलिप्यतएवबुद्धांते॥१७॥तदेतदुच्यते।सवाएषएतस्मिन्बुद्धांतेजागरितेरत्वाचरित्वाइत्यादिपूर्ववत्।सयत्तत्रबुद्धांतेकिंचित्पश्यत्यनन्वागतस्ते·
नभवत्यसंगोह्ययंपुरुषइति।ननुदृष्ट्वैवेतिकथमवधार्यतेकरोतिचतत्रपुण्यपापेतत्फलंचपश्यति।नकारकावभासत्वेनकर्तृत्वोपपत्तेरात्मनेवा
यंज्योतिषास्तइत्यादिनाह्यात्मज्योतिषावभासितःकार्यकरणसंघातोव्यवहरतितेनास्यकर्तृत्वमुपचर्यतेनस्वतःकर्तृत्वं।तथाचोक्तंध्यायतीवलेला
यतीवेतिबुद्ध्याद्युपाधिकृतमेवनस्वतः।इहतुपरमार्थापेक्षयाउपाधिनिरपेक्षउच्यतेदृष्ट्वैवपुण्यंचपापंचनकृत्वेतितेननपूर्वापरव्याघाताशंकात
स्मान्निरुपाधिकःपरमार्थतोनकरोतिनलिप्यतेक्रियाफलेनतथाचव्यासेनभगवतोक्तं।अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः।शरीरस्थोपिकौ
तेयनकरोतिनलिप्यतेइति।तथासहस्रदानंतुकामप्रविवेकस्यदर्शितत्वात्।तथासवाएषएतस्मिन्स्वप्नेसवाएषएतस्मिन्बुद्धांतेइत्येताभ्यांकंडि·
काभ्यांअसंगत्वंप्रतिपादितं।यस्माद्बुद्धांतेकृतेनस्वप्नांतगतःसंप्रसन्नोऽसंबद्धोभवतिस्तेन्यादिकार्यादर्शनात्तस्मात्त्रिष्वपिस्थानेषुस्वतोऽसंगएवाय

दृष्ट्वैवपुण्यंचपापंचपुनःप्रतिन्यायंप्रतियोन्याद्रवतिबुद्धांतायैवसयत्तत्रकिंचित्पश्यत्यनन्वागतस्तेनभवत्यसंगोह्ययंपुरुषइत्येवमेवैतद्याज्ञ
वल्क्यसोऽहंभगवतेसहस्रंददाम्यतऊर्ध्वंविमोक्षायैवब्रूहीति॥१७॥सवाएषएतस्मिन्बुद्धांतेरत्वाचरित्वादृष्ट्वैवपुण्यंचपापंचपुनःप्रति·
न्यायंप्रतियोन्याद्रवतिस्वप्नांतायैव॥१८॥ मतोऽमृतःस्थानत्रयधर्मविलक्षणःप्रतियोन्याद्रवतिस्वप्नांतायैवसंप्रसादायेत्यर्थः।दर्शनवृत्तेः

स्वप्नस्थःस्वप्नशब्देनाभिधानदर्शनादंतशब्देनचाविशेषणोपपत्तेः।एतस्मान्वेतायधावतीतिचसुषुप्तंदर्शयिष्यति।यदिपुनरेवमुच्यते।स्वप्नांतेरत्वा
चरित्वाएताउभावंतावनुसंचरतिस्वप्नांतंबुद्धांतंचेतिदर्शनात्स्वप्नांतायैवेत्यत्रापिदर्शनवृत्तिरेवस्वप्नउच्यतेइति।तथापिनकिंचिद्दुष्यत्यसंगताहि
सिसाधयिषितासिध्यत्येवयस्माज्जागरितेदृष्ट्वैवपुण्यंचपापंचरत्वाचरित्वचस्वप्नांतमागतोनजागरितदोषेणानुगतोभवति।एवमयंपुरुषःआ
त्मास्वयंज्योतिःकार्यकरणतत्प्रयोजकाभ्यांकामकर्मभ्यांविलक्षणोयस्मादसंगोह्ययंपुरुषोऽसंगत्वादित्ययमर्थःसवाएषएतस्मिन्संप्रसाद
इत्याद्याभिस्तिसृभिःप्रतिपादितः।तत्राऽसंगतैवात्मनःकुतोऽयस्माज्जागरितात्स्वप्नंस्वप्नाच्चसंप्रसादंसंप्रसादात्पुनःस्वप्नक्रमेणबुद्धांतंजागरितं
बुद्धांताच्चपुनःस्वप्नांतमित्येवमनुक्रमसंचारेणस्थानत्रयस्यव्यतिरेकःसाधितः॥१८॥ स्वप्नांतशब्दस्यसुषुप्तविषयत्वंसुषुप्तंप्रतिन्याद्रवतिसुषुप्तंप्राप्तुं।नवरमत्यधिकस्या
नंतरमेपद्येइदं।स्वप्नस्थःस्वप्नांतशब्देन।स्वप्नांतशब्दस्यस्वप्नेप्रयोगदर्शनाद्विज्ञापितस्यैवतेनग्रहणमितिपक्षांतरमुपन्यस्यांगीकरोति।यदीत्यादिना।सिसाधयिषितार्थसिद्धौहेतुमाह।यस्मादिति।कंडि
कात्रयेणासिद्धमर्थमनुवदति।एवमिति।आत्मनःस्थानत्रयसंचारादसिद्धोऽसंगत्वेहेतुरितिशंकते।तत्रेति।सप्रयोजककार्यकरणाद्वैलक्षण्यंतुद्वयेनिरस्तमित्येवशब्दार्थः।यस्मा०धिनोनतुसमसंगत्वं
प्रतिपादितं।अतःआत्मनोसंगतैवस्थानत्रयसंचारोयश्चात्मनःभातिसतुअविद्यया।मिथ्याभूतयाकृतइत्यात्मनअसंगतानिर्वाधैवेत्यर्थः।प्रतिवचनंतथापीति।स्वप्नांतशब्देनस्वप्नस्वीकारेपि॥

कात्मनिलिखितं।

संबंधकथनेन। प्रत्यवस्थाभिन्नं·

वृत्तमनूद्योत्तरग्रंथमवतारयन्भूमिकामाह।तत्रेति·पूर्वग्रंथे।जाग्रत्स्वप्नसुषुप्तस्थानानां त्रयाणां संबंधित्वेन विकीर्णं विविक्तं रूपमस्येतिताद्दशोऽपि आत्मोक्तः।नपुंजीकृत्य सर्वविशेषणाभावादयेत्यर्थः।एकत्रैकस्मिन्वाक्ये।जाग्रद्वाक्ये विवक्षितात्मोक्तिर्नेत्याह।यस्मादिति।स्वप्नविवक्षितात्मसिद्धिमाशंक्याह।स्वप्नेत्विति।शेषवाक्यमवतारयितुं वृत्तं कीर्तयति।अत्रचेति।पूर्वसंदर्भः सप्तम्यर्थः।तर्हि सुषुप्तिवाक्येन तत्सिद्धिर्नेत्याह।सुप्तेषु पुनरिति।तत्रापिविधानिर्मोकान्धतिभातीभावः।एकवाक्यतयेति।पूर्ववाक्यानामितिशेषः।स्थानद्वयं हित्वा कथं सुषुप्तं प्रवेष्टुमिच्छतीति पृच्छति।तत्कथमितिमहाकायोमंदवेग।श्येनः सुपर्णोक्तवेगवानल्पविग्रहः।स्वप्नादेः खलुभवानस्यागेन सुषुप्तं प्राप्नोतीत्याह।आहेति।अथोत्तराक्रांतिस्थानांतरप्राप्तिमभिधत्तां तथापि किंदृष्टांतवचनेनेत्याशंक्याह।दृष्टांतेनेति।

पूर्वं चोपन्यस्तोऽयमर्थः स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणीति तं विस्तरेण प्रतिपाद्य केवलं दृष्टांतमात्रमवशिष्टं तद्दर्शयामीत्यारभ्यते। तत्रैतस्मिन्यथाप्रदर्शितेऽर्थे दृष्टांतोऽयमुपादीयते। यथा लोके महामत्स्यो महांश्चासौ मत्स्यश्च नादेयेन स्रोतसाऽहार्य इत्यर्थः। स्रोतश्च विष्टंभयति। स्वच्छंदचारी उभे कूले नद्याः पूर्वं चाऽपरं चानुक्रमेणानुसंचरति संचरन्नपि कूलद्वयं तन्मध्यवर्तिनोदकस्रोतोवेगेन न परवशीक्रियते। एवमेवायं पुरुष एतावुभावन्तावनुसंचरति कौ तौ स्वप्नांतं च बुद्धांतं च। दृष्टांतप्रदर्शनफलं तु मृत्युरूपः कार्यकरणसंघातः सह तत्प्रयोजकाभ्यां कामकर्मभ्यामनात्मधर्मोऽयं चात्मैतस्माद्विलक्षण इति विस्तरतो व्याख्यातं। अत्र च स्थानत्रयानुसंचारेण स्वयंज्योतिष्ट्वं आत्मनः कार्यकरणसंघातव्यतिरिक्तस्य कामकर्मभ्यां विविक्तता चोक्ता अतो नायं संसारधर्मवानुपाधिनिमित्तमेव त्वस्य संसारित्वमविद्याध्यारोपितमित्येष समुदायार्थ उक्तः। तत्र च जाग्रत्स्वप्नसुषुप्तस्थानानां त्रयाणां विप्रकीर्णरूप उक्तः अपुंजीकृत्यैकत्र प्रदर्शितः यस्माज्जागरिते ससंगः समृत्युः सकार्यकरणसंघात उपलभ्यते अविद्यया। स्वप्ने तु कामसंयु

तद्यथा महामत्स्य उभे कूले अनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च ॥ १९ ॥ तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति ॥ २० ॥

॥ क्तो मृत्युरूपविनिर्मुक्त उपलभ्यते पुनर्बुद्धान्तमागतो बुद्धान्ताच्च ॥ १९ ॥ सुषुप्ते पुनः संप्रसन्नो असंगो भवतीत्यसंगतापि दृश्यते। एकवाक्यतया तूपसंहृतिर्मोक्षफलं नित्यमुक्तबुद्धशुद्धस्वभावताऽस्य नैकत्र पुंजीकृत्य प्रदर्शितेति तत्प्रदर्शनाय कंडिका आरभ्यते सुषुप्ते ह्यस्य स्वरूपता वक्ष्यमाणा। तद्वा अस्यैतदतिच्छंदा अपहतपाप्माऽभयं रूपमिति यस्मादेवंरूपं भयादिलक्षणः सुषुप्तं प्रविविक्षति। तत्कथमित्याह दृष्टांतेनास्यार्थस्य प्रकटीभावो भवतीति तत्र दृष्टांत उपादीयते। तद्यथास्मिन्नाकाशे भौतिके श्येनो वा सुपर्णो वा सुपर्णशब्देन क्षिप्रः श्येन उच्यते। यथाकाशेऽस्मिन्विहत्य विपरिपत्य श्रान्तो नानापरिपतनलक्षणेन कर्मणा परिखिन्नः संहत्य पक्षौ संगमय्य संप्रसार्य पक्षौ सम्यग्लीयतेऽस्मिन्निति संलयो नीडो नीडायैव ध्रियते। स्वात्मनैव धार्यते स्वयमेव यथायं दृष्टांत एवमेवायं पुरुष एतस्मा एतस्मै अंताय धावति। अंतशब्दवाच्यस्य विशेषणं यत्र यस्मिन्नंते सुप्तो न कंचन कंचिदपि कामं कामयते तथा न कंचन स्वप्नं पश्यति न कंचन कामं कामयत इति स्वप्नबुद्धांतयोरविशेषेण सर्वः कामः प्रतिषिद्धः कंचनेत्यविशेषिताभिधानात्। तथा न कंचन स्वप्नमिति जागरितेऽपि यद्दर्शनं तदपि स्वप्नं मन्यते श्रुतिरत आह। न कंचन स्वप्नं पश्यतीति ॥ २० ॥ अस्यार्थस्य सुषुप्तिप्राप्तिरूपस्येतित्येतत्तस्यैवार्थस्तत्रेति सप्तम्यर्थः। कार्यकरणसंघातो मृत्यो रूपं। शाखीक्रियमाणं स्वरूपं। ज्वानिभेकरूपोऽर्थः। सुषुप्तं स्वप्ने न सक्तीकृत्याह। उभावंतावनुसंचरति स्वप्नांतं बुद्धांतं चेति। प्रत्यवस्थं भिन्नरूप आत्मा उक्तः। तदित्यस्यार्थकथनं तत्र दृष्टांत उपादीयते इति। नितरां गत्वा स्थानाय। कुत्र तर्हि यथोक्तमात्मरूपं पुंजीकृत्य प्रदर्शनेनेत्राह। सुषुप्ते हीति। तत्राभयमित्यविद्यारहितमुच्यते। सा चाऽविद्या सुषुप्ते स्वरूपेणासती। अपि नाभिव्यक्तास्तीति द्रष्टव्यं। यस्मात्सुषुप्ते यथोक्तमात्मरूपं वक्ष्यते तस्मादितियावत्। यस्मादेवरूपं। भयादिलक्षणं सुषुप्ते वक्ष्यते तस्माज्जीवः सुषुप्तं प्रविविक्षति। धार्यते गमनकार्यं तेन तु प्रयोजकेन खेदेन। लोकयथोतनार्थमिदं। स्वात्मनाऽस्वस्य स्वरूपेणाकाशे स्वगमे आत्मैव। अंतशब्दवाच्यस्य स्थानस्य विशे

१ षद्वदुपादि। ध्रियते गच्छतीत्यर्थः

अस्य आत्मनः तत् एतत्
रूपं अतिछंदाः कामवर्जितं
तथा अपहतपाप्म धर्माधर्म
वर्जितं। अभयं अविद्यावर्जितं १

प्रतां· भेदकं उच्यते।

वातेति। शुक्लस्यान्नस्य परिणामविशेषो वातबाहुल्ये नीलो भवति। पित्ताधिक्ये पिंगलो जायते। श्लेष्मातिशये शुक्लो भवति। पित्ताल्पत्वे शीत। साम्ये च धातूनां लोहितमिति। कदा स्वप्नो भवति इत्यत एवं संति। नाडीस्वरूपं निरूप्य तत्र जागरिते लिंगशरीरस्य वृत्तिं दर्शयति। स्थितिं। तास्विति। क्षेत्रज्ञस्येति शेषः। पंचभूतानि दशेंद्रियाणि प्राणोंऽतःकरणमिति सप्तदशकं। जागरिते लिंगशरीरस्य स्थितिमुक्त्वा स्वप्नेऽपि स्थितिमाह। तर्हिं गमिति। जागरितस्यापि स्वप्नत्वं अत्यंतरं संवादयति। तथा चेति। अत्यंतरगां योजयति। अथेत्यादिना। स्वप्ने धर्मादिनिमित्तवशान्मिथ्यैवालिंगं नानाकारमवभासते। तन्मिथ्याज्ञानं लिंगानुगतमूलाविद्याकार्यत्वादविद्या। इति स्थिते सति। इति अथशब्दार्थ इत्याह। एवं सतीति। तस्मिन्काले स्वप्नदर्शनं विशेषयति शेषः। एवं क्षेत्रज्ञस्यान्तोपसर्पणं। तदेव कथयति। निजं स्वरूपं। तर्हि इत्याने। नाडीषु। अविद्यामूलस्य स्वप्नस्य

तथाच अत्यंततरां तस्य त्रय आवसथास्त्रयः स्वप्ना इति। यथा च दृष्टांते पक्षिणः परिपतनजश्रमापनुत्तये स्वनीडोपसर्पणमेवं जाग्रत्स्वप्नयोः कार्यकरणसंयोगजक्रियाफलैः संयुज्यमानस्य पक्षिणः परिपतनज इव श्रमो भवति। तच्छ्रमापनुत्तये स्वात्मनो नीडमायतनं सर्वसंसारधर्मविलक्षणं सर्वक्रियाकारकफलायासशून्यं स्वमात्मानं प्रविशति। यद्यस्यायं स्वभावः संसारधर्मशून्यता परोपाधिनिमित्तं चास्य परोपाधिकृतं संसारधर्मित्वं सा चाविद्यातस्या अविद्यायाः किं स्वाभाविकत्वमाहोस्वित्कामकर्मवदागंतुकत्वं। यद्यागंतुकत्वं ततो विमोक्ष उपपद्यते। तस्याश्चागंतुकत्वे कोपपत्तिः कथं वा नात्मधर्मोऽविद्येति सर्वानर्थबीजभूताया अविद्यायाः सतत्त्वावधारणार्थं परा कंडिकाऽरभ्यते। ता वा अस्य शिरःपाण्यादिलक्षणस्य पुरुषस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावत्परिमाणेनाणिम्नाऽणुत्वेन तिष्ठंति ताश्च शुक्लस्य रसस्य नीलस्य पिंगलस्य हरितस्य लोहितस्य पूर्णा एतैः शुक्लत्वादिभी रसविशेषैः पूर्णा इत्यर्थः। एते च रसानां वर्णविशेषा वातपित्तश्लेष्मणामितरेतरसंयोगवैषम्यविशेषाद्विचित्रा बहवश्च भवंति। तास्वेवंविधासु नाडीषु सूक्ष्मासु वालाग्रसहस्रभेदपरिमाणासु शुक्लादिरस

तावा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठंति शुक्लस्य नीलस्य पिंगलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नंतीव हस्तीव विच्छाययति गर्त्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राऽविद्यया मन्यते।

पूर्णासु सकलदेहव्यापिनीषु सप्तदशकं लिंगं वर्त्तते। तदाश्रिताः सर्वा वासना उच्चावचसंसारधर्मानुभवजनिता तल्लिंगं वासनाश्रयं सूक्ष्मत्वात्स्वच्छं स्फटिकमणिकल्पं नाडीगतरसोपाधिसंसर्गवशाद्धर्माधर्मप्रेरितोद्भूतवृत्तिविशेषं स्त्रीरथहस्त्याद्याकारविशेषैर्वासनाभिः प्रत्यवभासते अथैवं सति। यत्र यस्मिन्काले केचन शत्रवोऽन्ये वा तस्करा मामागत्य घ्नंतीति मृषैव वासनानिमित्तः प्रत्ययोऽविद्याख्यो जायते। तदेतदुच्यते। एनं स्वप्नदृशं घ्नंतीवेति तथा जिनंतीव वशीकुर्वंति। केवलं त्वविद्यावासनादिकमिव पतंतमात्मानमुपलक्षयति। तादृशी ह्यस्य मृषावासना उद्भवति अत्यंतनिकृष्टाऽधर्मोद्भासितांतःकरणवृत्त्याश्रयाऽस्वरूपत्वात्किंबहुना यदेव जाग्रद्भयं पश्यति हस्त्यादिलक्षणं तदेव भयरूपमात्रास्मिन्स्वप्नेऽविनैव हस्त्यादिरूपभयमविद्यावासनया मृषैवोद्भूतया मन्यते। इह। अथ पुनर्यत्र अविद्याऽपकृष्यमाणा विद्या चोत्कृष्यमाणा किंविषया किंलक्षणा चेत्युच्यते। अथ पुनर्यत्र यस्मिन्काले देव इव स्वयं भवति देवताविषया विद्या यदोद्भूता जागरितकाले तदोद्भूतया वासनया देवमिवात्मानं मन्यते स्वप्नेऽपि तदुच्यते देव इव राजेव राज्यस्थोऽभिषिक्तः स्वप्नेऽपि राजाहं मितिमन्यते राज

नश्यानित्यत्वान्मूलाभूताया अविद्याया अपि आगंतुकत्वं बोध्यमिति भावः। स्वप्नपेक्षकष्ठतान्कंदनादिदर्शनादेनं स्वप्नदृशं घ्नंतीवेति तद्दर्शकस्य जाग्रतो यत्तद्बुद्धिर्जायते तदा स्वप्नदर्शनं ज्ञेयमित्यर्थः। नानावर्त्तेः तल्लिंगं वासनाभिः स्त्र्याद्याकाररूपादिरूपेणाभासते स्वप्नावस्थायामित्यर्थः। स्थूलदेहसंबंधकत्वा अधर्मोद्भासितत्वे हेतूक्तिः। वर्त्तत इति। अतस्य सकलदेहव्यापि त्वगिंद्रियमनसां संयोगमुपगाशीतादिस्पर्शं देहस्यैकदेशे जातं जानाति। जागरिते नाडीष्वनुप्रविश्य स्थूलशरीरमभिव्याप्य लिंगशरीरस्य स्थितिः स्वप्ने तु नाड्यनुप्रवेशपूर्वकस्थूलशरीरव्याप्त्यभाववती लिंगशरीरस्य स्थितिरित्यर्थः। प्रत्यवभासत इति। विद्यायाः विषयस्वरूपे प्रश्नपूर्वकं वदन्नथ यत्रेत्यादेरर्थमाह। किंविषयेति। इवशब्दप्रयोगात्स्वप्नः एवोक्त इति शंकां वारयति विद्येयमनुपाति रूक्ता। द्वितीया देवतेति। जाग्रदुभमात्रं तद्भयं प

120

३५

समस्तत्वंपूर्णत्वं·अनंतरत्वमेकरसत्वं।अबाह्यत्वंप्रत्यक्त्वं।वाक्यार्थमुपसंहरति।तस्मादिति।मोक्षोविद्याफलमित्युत्तरत्रसंबंधः।तस्यप्रत्यक्षत्वंदृष्टांतेनस्पष्टयतियथेति।भेददर्शननिदानमविद्येत्यविद्या

वासनावासितस्वमन्यंतप्रक्षीयमाणाऽविद्योद्भूताचविद्यासर्वात्मविषयायदातदास्वप्नेऽपितद्भावभावितोऽहमेवसर्वोऽस्मीतिमन्यतेसयःसर्वात्मभावःसोऽस्यात्मनःपरमोलोकःपरमश्चात्मभावःस्वाभाविकः।यत्तुसर्वात्मभावादर्वाग्बालाग्रमात्रमप्यन्यत्वेनदृश्यतेनाहमस्मीतितदवस्थाऽविद्यातयाऽविद्ययाप्रत्युपस्थापिताअनात्मभावालोकास्तेऽपरमाःस्थावरांतास्तान्संव्यवहारविषयान्लोकानपेक्ष्यायंसर्वात्मभावःसमस्तोऽनंतरोऽबाह्यःस्वस्यपरमोलोकःतस्मादपकृष्यमाणायामविद्यायांविद्यायांचकाष्ठागतायांसर्वात्मभावोमोक्षोयथास्वयंज्योतिष्ट्वंस्वप्नेप्रत्यक्षतउपलभ्यते·तद्वद्विद्याफलमुपलभ्यतइत्यर्थः।तथाऽविद्यायामप्युत्कृष्यमाणायांतिरोधीयमानायांचविद्यायामविद्यायाःफलंप्रत्यक्षतउपलभ्यते·अथयत्रैनंघ्नंतीवजिनंतीवेतितएतेविद्याविद्याकार्येसर्वात्मभावःपरिच्छिन्नात्मभावश्चविद्ययाशुद्धसर्वात्माभवत्यविद्ययाचासर्वोभवत्यन्यतःकुतश्चित्प्रविभक्तोभवतियतोविभक्तोभवतितेनविरुध्यतेविरुद्धत्वाद्धन्यतेजीयतेवि

थयत्रदेवइवराजेवाऽहमेवेदꣳसर्वोऽस्मीतिमन्यतेसोऽस्यपरमोलोकः॥ ॥२१॥ ॥

च्छाद्यतेचाऽसर्वविषयत्वेचभिन्नत्वादेतद्भवति।समस्तस्तुसन्कुतोभिद्यतेयेनविरुध्येत·विरोधाभावेकेनहन्यतेजीयतेविच्छाद्यतेच।अतोऽविद्यायाःसतत्वमुक्तंभवतिसर्वात्मानंसंतमसर्वात्मत्वेनग्राहयतिआत्मनोन्यद्वस्त्वंतरमविद्यमानंप्रत्युपस्थापयत्यात्मानमसर्वमिदमापादयति।ततस्तद्विषय।कामोभवतियतोभिद्यतेकामतःक्रियामुपादत्तेऽतःफलंतदुक्तंभवतिवक्ष्यमाणंचयत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादिइदमविद्यायाःसतत्वंसहकार्येणप्रदर्शितंविद्यायाश्चकार्यंसर्वात्मभावःप्रदर्शितोविद्यायाविपर्ययेणसाचाविद्यानात्मनःस्वाभाविकोधर्मोयस्माद्विद्यायामुत्कृष्यमाणायांस्वयमपचीयमानासतीकाष्ठागतायांविद्यायांपरिनिष्ठितेसर्वात्मभावेसर्वात्मनानिवर्ततेरज्ज्वामिवसर्पज्ञानंरज्जुनिश्चयेतच्चोक्तंयत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादि।तस्मान्नात्मधर्मोऽविद्यान्नहिस्वाभाविकस्योच्छित्तिःकदाचिदप्युपपद्यते।सवितुरिवौष्ण्यप्रकाशयोः।तस्मात्तस्यामोक्षउपपद्यते·इदानींयोऽसौसर्वभावोमोक्षोविद्याफलंक्रियाकारकफलशून्यंसप्रत्यक्षतोनिर्दिश्यतेयत्राविद्याकामकर्माणिनसंतितदेतत्स्मर्यतेयत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यतीति॥ ॥२१॥ ॥

सर्वंतमित्याह।तदेतदिति।तत्रैववाक्यशेषमनुकूलयति।वक्ष्यमाणंचेति।अध्यायांतेइत्यर्थः।यस्यांअवस्थायां।स्वस्वरूपं।अवलीनमुखः।परमइत्यस्यार्थकथनमिदंदेहादयोःपदार्थाःयस्यांअवस्थायांन

स्यांअवस्थायां·तदेत·सर्वप्रकारेण·अविद्या। ।

अस्य०क्तः।पु॰सर्वात्मभावःतत्सर्वात्मभावाख्यंअस्यरूपंअतिच्छंदार्थः।छंदशब्दस्यगायत्र्यादिच्छंदोविषयस्यकथंकामविषयत्वमित्याशंक्याह।अन्योसाविति।ऊर्ध्वमास्वयांतेपीदंरूपमुक्तमित्याह।इदंचेति।आमवशात्तत्रोक्तंचेत्किमित्यत्रपुनरुच्यतेतत्राह।इहत्विति।स्त्रीवाक्यस्यसंगतिंवक्तुंवृत्तमनुभवति।अयमात्मेति।वृत्तमनूद्यसंबंधवक्तुंकामश्चोदयति।सयदीति।अनन्वागतवाक्येचात्मनश्चैतन्यत्वमुक्तमित्याह।सयदिति।चैतन्याभावेरतिंनजानीयादितिभावः।चैतन्यस्वभावस्यैवसुषुप्तेविशेषविज्ञानाभावंसाधयति।उच्यतइति।सुषुप्तिःसप्तम्यर्थः।अज्ञानंविशेषविज्ञानाभावःकोसौअज्ञानहे

तदेतद्वैअस्यरूपंयःसर्वात्मभावःसोऽस्यपरमोलोकइत्युक्तःतदतिच्छंदाअतिच्छंदमित्यर्थःरूपपरत्वात्।छंदःकामोऽतिगतःछंदोऽस्मिन्रूपेतदतिच्छंदंरूपमन्योऽसावंतःछंदःशब्दोगायत्र्यादिच्छंदोवाचीअयंतुकामवचनोऽतःस्वरांतएवतथाप्यतिच्छंदाइतिपाठःस्वाध्यायधर्मोद्रष्टव्योऽस्तिचलोकेकामवचनेप्रयुक्तःछंदःशब्दःस्वच्छंदःपरच्छंदइत्यादावतोऽतिच्छंदमित्येवमुपनेयंकामवर्जितमेतद्रूपमित्यस्मिन्नर्थेतथापहतःपाप्मपाप्मशब्देनधर्माधर्मावुच्येतेपाप्मभिःसंसृज्यतेपाप्मनोविजहातीत्युक्तत्वात्।अपहतपाप्मधर्माधर्मवर्जितमित्येतत्किंचाऽभयंभयंहिनामाविद्याकार्यमविद्ययाभयंमन्यतइत्युक्तंतत्कार्यद्वारेणकारणप्रतिषेधोऽयमभयंरूपमितिअविद्यावर्जितमित्येतत्यदेतद्विद्याफलंसर्वात्मभावस्तदेतदतिच्छंदापहतपाप्माऽभयंरूपंसर्वसंरधर्मवर्जितमतोऽभयंरूपमेतदिदंचपूर्वमेवोपन्यस्तमतीतानंतरब्राह्मणसमाप्तावभयंवैजनकप्राप्तोसीतिआगमतःइहतुतर्कतःप्रपंचितंदर्शि

तद्वाअस्यैतदतिच्छंदाअपहतपाप्माऽभयꣳरूपंतद्यथाप्रिययास्त्रियासंपरिष्वक्तोनबाह्यं
किंचनवेदनांतरमेवमेवायंपुरुषःप्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरं ।

तापरमार्थप्रत्ययदार्ढ्यायअयमात्मास्वयंचैतन्यज्योतिःस्वभावःसर्वंस्वेनचैतन्यज्योतिषावभासयति।सयत्तत्रकिंचित्सुषुप्तेरमतेयरतिंजानातिचेदुक्तं।अतःस्थितंचैतन्यायतोनित्यस्वरूपचैतन्यज्योतिष्ट्वमात्मनः।सयथात्माऽविनष्टःसुषुप्तावस्थायांस्वेनैवरूपेणावर्त्ततेःकस्मादयमहमस्मीत्यात्मानंवाबहिर्वेमानिभूतानीतिजाग्रत्स्वप्नयोरिवनजानातीति।उच्यतेऽज्ञानहेतुमेकत्वमेवाज्ञानहेतुःतत्कथमित्युच्यतेदृष्टांतेनहिप्रत्यक्षीभवतिविवक्षितोऽर्थइत्याह।तत्रचयथालोकेप्रियस्त्रियाप्रियासंपरिष्वक्तःसम्यक्परिष्वक्तःकामयंत्याकामुकःसन्नबाह्यमात्मनःकिंचनकिंचिदपिवेदमत्तोऽन्यद्वस्त्वितिनचांतरंमयमहमस्मिन्सुखीदुःखीचेति।अपरिष्वक्तस्तुतयाप्रविभक्तोजानातिसर्वमेवबाह्यमांतरंचपरिष्वंगोत्तरकालंतुकत्वापत्तेर्नजानाति।एवमयथादृष्टांतोऽयंपुरुषःक्षेत्रज्ञोभूतमात्रासंसर्गतःसैंधवखिल्यवत्प्रविभक्तोजलादौचंद्रादिप्रतिबिंबवत्कार्यकरणेष्विहप्रविष्टःसोऽयंपुरुषःप्राज्ञेनपरमार्थस्वाभाविकेनस्वेनात्मनापरेणज्योतिषासंपरिष्वक्तःएकीभूतोऽनंतरःसर्वात्मानबाह्यंकिंचनवस्त्वंतरंनाप्यांतरमात्मनिसुखीवादुःखीवेति।२१।

तुत्वमोहैकार्थमिति।रूपविशेषणत्वात्क्लीबत्वेननिर्देशःअतिच्छंदमिति।अविद्याआत्मधर्मोनज्ञानोत्पत्तौमत्यांसत्यामपिआत्मनियतःक्षीयतेयद्यात्मधर्मःस्यात्तर्हिआत्मनोनित्यत्वान्नकदापिक्षीयतेतितर्कः।देहेन्द्रियैःदेहेन्द्रियाणांकारणानांपाप्मशब्दवाच्यत्वात्तत्कार्ययोर्धर्माधर्मयोरपिपाप्मशब्दवाच्यत्वंयुक्तमित्यर्थः।दृष्टांतउच्यते।मत्तोऽन्यःअस्तीति।देहेन्द्रियोपाधिवशात्परमात्मनोभिन्नः।भूतमात्राःशरीरेंद्रियलक्षणाःजीवस्यपरेणात्मनायदेकत्वंतत्कथंसुषुप्तेविशेषज्ञानाभावेकारणंतस्मिन्सत्यपिचैतन्यस्वभावोऽनिष्टज्ञेतिशंकते।तत्कथमिति॥ ॥

श्रिवः
१२१

121

परेणात्मना सुषुप्ते जीवस्यैकत्वं विशेषविज्ञानाभावकारणमुक्तमित्यर्थः। यथा जाग्रत्स्वप्नयोः आत्मनः सकाशात् अन्यत्वेन प्रतीयमानाः अत एव प्रविभक्ता इव कामाः काम्यमाना भवंति। नैवं सुषुप्तावस्थायामात्मनस्ते भिद्यंते। किंतु सुषुप्तस्यात्मैव कामः स आत्मकामः तद्रूपमित्यर्थः। शोकमध्यं शोकस्यांतरं प्रमध्यगम्भूतमिति यावत्। तर्हि शोकवत्त्वप्राप्तं नेत्याह। सर्वथेति पक्षद्वयेपि शोकशून्यमात्मरूपं शोको येनात्मवांस्तस्य नहि शोकवत्त्वं भवति। शोकस्यात्माधीनसत्तास्फूर्तेरात्मातिरेकेणाभावादित्यर्थः। यथा परिष्वक्तयोः स्त्रीपुंसयोरेकत्वं सविशेषविज्ञानाभावकारणं तथा सुषुप्ते जीवस्यैकत्वं विशेषविज्ञानाभावकारणमित्यर्थः। किं पुनर्नानात्वकारणमिति तदाह। नानात्वं चेति। उक्तमिति अथ यो मां देवतामित्यादावित्यर्थः। एतावता सुषुप्ते विशेषविज्ञानाभावस्य किमायातं तत्राह। तत्रेति। विशेषविज्ञाननानात्वं तत्र चाविद्याकारणं·

तत्र चैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीस्तत्रायं हेतुर्मयोक्तः एकत्वं यथा स्त्रीपुंसयोः परिष्वक्तयोस्तत्रार्थान्नानात्वं विशेषविज्ञानहेतुरित्युक्तं भवति। नानात्वं च कारणमात्मनो वस्त्वंतरप्रत्युपस्थापिकाऽविद्येत्युक्तं। तत्र चाविद्यायाः यदा प्रविविक्तो भवति तदा सर्वेणैकत्वमेवास्य भवति। ततश्च ज्ञानज्ञेयादिकारकविभागे असति कुतो विशेषविज्ञानप्रादुर्भावः कामो वा संभवति स्वाभाविके स्वरूपस्य आत्मज्योतिर्विषये। यस्मादेवं सर्वैकत्वमेवास्य रूपमतस्तद्वै अस्यात्मनः स्वयंज्योतिःस्वभावस्यैतद्रूपमाप्तकामं यस्मात्समस्तमेतत्तस्मादाप्ताः कामा अस्मिन्रूपे तदिदमाप्तकामं यस्य ह्यन्यत्वेन प्रविभक्तः कामस्तदनाप्तकामं भवति। यथा जागरितावस्थायां देवदत्तादिरूपं न त्विदं तथा कुतश्चित्प्रविभज्यते ततस्तदाप्तकामं भवति। किमन्यस्माद्वस्त्वंतरान्न प्रविभज्यते आहोस्विदात्मैव तद्वस्त्वंतरमत आह। नान्यदस्त्यात्मनः कथं यत आत्मकाममात्मैव कामा यस्मिन्रूपे ऽन्यत्र प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयोस्तस्यात्मैवान्यत्वप्रत्युपस्थापकहेतोरविद्याया अभावादात्मकाममत एवाकाममत एवाकाममेतद्रूपं काम्यविषयाभावादतः।

तद्वा अस्यैतदाप्तकाममात्मकाममकाम७रूप७शोकांतरं॥ २१॥ अत्र पिताऽपिता भवति माताऽमाता लोका अलोका देवा अदेवा वेदा अवेदा·

शोकांतरं शोकच्छिद्रं शोकशून्यमित्येतत् शोकमध्यमिति वा सर्वथाप्यशोकमेतद्रूपं शोकवर्जितमित्यर्थः॥ २१॥ चैतन्यस्वभावत्वे सत्यप्येकीभावान्न जानाति स्त्रीपुंसयोरिव संपरिष्वक्तयोरित्युक्तं। तत्र प्रासंगिकमेतदुक्तं कामकर्मादिवत्स्वयंज्योतिष्ट्वमप्यस्यात्मनो न स्वभावो यस्मात्तत्प्रसादेनोपलभ्यत इत्याशंकायां प्राप्तायां तन्निराकरणाय एवं स्त्रीपुंसयोरिव दृष्टांतोपादानेन विद्यमानस्यैव स्वयंज्योतिष्ट्वस्य सुषुप्ते ऽग्रहणमेकीभावाद्धेतोर्न तु कामकर्मादिवदागंतुकमित्येतत्प्रासंगिकमभिधाय यत्प्रकृतं तदेवानुप्रवर्त्तयति। अत्र चैतत्प्रकृतमविद्याकामकर्मभिर्विनिर्मुक्तमेवैतद्रूपं यत्सुषुप्ते आत्मनो गृह्यते प्रत्यक्षत इति। तदेतद्यथाभूतमेवाभिहितं सर्वसंबंधातीतमेतद्रूपमिति यस्मादत्रास्मिन्सुषुप्तस्थाने तिष्ठंदापहतपाप्मा। अथैतद्रूपं तस्मादत्र पिता जनकस्तस्य जनयितृत्वात् यत्पितृत्वं पुत्रं प्रति तत्कर्मनिमित्तं तेन च कर्मणाऽयमसंबद्धोऽस्मिन्काले तस्मात्पिता पुत्रसंबंधनिमित्तस्य कर्मणो विनिर्मुक्तत्वात्पिताऽपिता भवति तथा पुत्रोऽपि पितुरपुत्रो भवतीति सामर्थ्याद्गम्यते। उभयोर्हि संबंधनिमित्तं कर्म तत्संबंधात्ययाल्लोका अलोकास्तथा देवाः कर्मांगभूताः तत्कर्मसंबंधात्ययाद्देवा अदेवाः अतदयमतिक्रांतो भवति अपहतपाप्मेति ह्युक्तं। तथा माता अमाता लोकाः कर्मणा जेतव्या जिताश्च तत्कर्मतस्तथा वेदाः साध्यसाधनसंबंधाभिधायकाः मंत्रब्राह्मणलक्षणाश्चाभिधायकत्वेन कर्मांगभूताः अधीता अध्येतव्याश्च कर्मनिमित्तमेव संबध्यंते पुरुषेणा तत्कर्मातिक्रमणादेतस्मिन्काले वेदा अप्यवेदाः संपद्यंते।

मिति स्थिते सति। यदा तदेति सुषुप्तिर्विवक्षिता। एकत्वफलमाह। तत इति। आप्तकामत्वं समर्थयते। यस्मात्समस्तमिति। विशेषणांतरमाकांक्षापूर्वकमादाय व्याचष्टे। किमन्यस्मादिति। स्फुरवानस्मि। तत्र प्रत्यगात्मनि। इहेति सुषुप्तिरुच्यते। स्त्रीवाक्ये श्रौतमर्थमभिधायार्थिकमर्थमाह। तत्रेति। अत एव श्रौतं तं। अपिता। अत्र पितेत्यादिवाक्यमवतारयितुं वृत्तमनुवदति। चैतन्येति। स्वयंज्योतिष्ट्वं। पित्वं। अदेवा[illegible]कामनुवदति। तत्रेति। कामादिविमोके दर्शिते सतीति यावत्। प्रकृतमेव दर्शयति। अत्र चेति। तदेव सामर्थ्यं दर्शयति। उभयोरिति। सता सोम्य तदा संपन्नो भवतीत्युक्ते। सर्वोहमस्मीति भावनेयरूपं न देव सौषुप्तं रूपमित्याशयेनोच्यते। यस्मादत्रास्मिन्नित्यादि सुषुप्तस्य· सस्त्रीतपुरुष·

श्रीवाक्यानि

यथा तथा १ सुषुप्तस्य २

मात्राहृदयस्य कृत्यर्थादिश्रिताइतिविशेषणमाश्रित्य शंकते ये कामाइति

स्तेनादिवाक्येन चंडालादिवाक्यस्य गतार्थत्वमाशंक्याह। न केवलमित्यादि। प्रत्युत्पन्नं सागन्तुकं। जातो निषादात् शूद्रायां जात्या भवति पुल्कस इति स्मृतेः शूद्रायां ब्राह्मणाज्जातो निषादः। निषादापरपर्यात् शूद्रायां। सचजा
त्याशूद्रः तस्मात् क्षत्रियायां जातः पुल्कसो भवतीति व्याख्यानमुपेत्याह। शूद्रेणैवेति। परिव्राट्तापसयोरेव ग्रहणान्न कर्मयोगिष्वप्यश्रमवर्णाश्रमान्तरकर्मयोगं शंकित्वाह। सर्वेषामिति। आदिशब्देन वयोऽवं
स्थापरिहितो सौ पुण्ये प्रकृते यत्प्रहितनकं मनन्वागतमिति नपुंसकप्रयोगस्तं चाह। रूपपरत्वादिति। यस्मादिति। अत्रेति सुषुप्तिरुच्यते। अतः सर्वकर्मातितीर्णत्वादिनुत्तरसंबंधः। शोकशब्दस्य कामविषयत्वेपि नद
त्वयमात्रात्कथं कर्मान्त्ययः स्यादित्याशंक्याह। कामश्चेति। ये शोकाइति। न तिक्रान्तो भवतीति शेषः। आत्माश्रयास्ते। न सुषुप्तिमाचनीत्याशंक्याह। अंगेति। हृदयेन करणेनान्यायत्वादात्मविकाराणामपि कामादीनां हृदयेसं·

न केवलं शुभकर्मसंवंधातीतः किं तर्ह्यशुभैरप्यत्यंतघोरैः कर्मभिरसंवंध एवायं वर्त्तत इत्येतमर्थमाह। अत्र स्तेनो ब्राह्मणसुवर्णहर्त्ता भ्रूणहा सहपाठाद्गम्यते स तेन घोरेण कर्मणा
तस्मिन्काले विनिर्मुक्तो भवति येनायं कर्मणा महापातकी स्तेन उच्यते तथा भ्रूणहाऽभ्रूणहा। तथा चांडालो न केवलं प्रत्युत्पन्नेनैव कर्मणा विनिर्मुक्तः किं तर्हि सहजेनाप्य
त्यंतनिकृष्टजातिप्रापकेणापि विनिर्मुक्त एवायं चांडालो नाम शूद्रेण ब्राह्मण्यामुत्पन्नः चंडाल एव चांडालः स जातिनिमित्तेन कर्मणाऽसंवद्धत्वादचांडालो भवति
पौल्कसः पुल्कस एव पौल्कसः शूद्रेणैव क्षत्रियायामुत्पन्नः सोऽप्यपौल्कसो भवति तथा चाश्रमलक्षणैश्च कर्मभिरसंवद्धो भवतीत्युच्यते। श्रम
णः परिव्राट् यत्कर्मनिमित्तो भवति स तेन विनिर्मुक्तत्वादश्रमणः तापसो वानप्रस्थोऽतापसः सर्वेषां वर्णाश्रमादीनामुपलक्षणार्थमुभयोर्ग्रहणं किं बहुना अनन्वा
गतं न अन्वागतमसंवद्धमित्येतत् पुण्येन शास्त्रविहितेन कर्मणा तथा पापेन विहिताकरणप्रतिषिद्धक्रियालक्षणेन रूपपरत्वान्नपुंसकलिंगमभयं रूपमिति ह्य
नुवर्त्तते। किं पुनरसंवद्धत्वे कारणमिति तद्धेतुरुच्यते। तीर्णोऽतिक्रांतो हि यस्मादेवंरूपः तदा तस्मिन्काले सर्वाञ्छोकान् शोकाः कामाः इष्टविषयप्रार्थना हि तद्विष
यवियोगे शोकत्वमापद्यते इष्टं हि विषयमप्राप्तं वियुक्तं चोद्दिश्य चिंतयानस्तद्गुणान् संतप्यते पुरुषः अतः शोको रतिः काम इति पर्यायाः। यस्मात्सर्वकामातीतो ह्

अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चांडालोऽचांडालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापे
न तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति ॥ २२ ॥

आत्मसंश्रयाणां कामानां। हृदि श्रिता इति विशेषणात्। हृदयमनाश्रिता

कथं शोकशब्दस्य कामपरत्वं इत्याशंक्याह। न किंचनेति। विचारः आत्मा

त्रायं भवति न किंचन कामं कामयते इति श्रुतेरिति कृतं तस्मात्क्रियापतितोऽयं शोकशब्दः कामवच
न एव भवितुमर्हति काम एव कर्महेतुर्वक्ष्यति हि स यथाकामो भवति तथा क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुत इति। अतः सर्वकामातितीर्णत्वाद्युक्तमुक्तमनन्वाग
तं पुण्येनेत्यादि। हृदयस्य हृदयमिति पुंडरीकाकारो मांसपिंडस्तत्स्थमन्तःकरणं बुद्धिर्हृदयमित्युच्यते। तात्स्थ्यात् मंचाक्रोशनवत् हृदयस्य ये शोकाः बुद्धिसं
श्रया हि ते कामः संकल्पो विचिकित्सेत्यादि सर्वं मन एवेत्युक्त्वा वक्ष्यति च कामा येऽस्य हृदि श्रिता इति आत्मसंश्रयभ्रान्त्यपनोदाय हीदं वचनं हृदि श्रिता हृदयस्य·
शोका इति च हृदयकरणसंवंधातीतश्चायमस्मिन्कालेऽतिक्रामति मृत्यो रूपाणीति ह्युक्तं हृदयकरणसंवंधातीतत्वात्तत्संवंधातीतो भवतीति युक्ततरं वचः
ये तु वादिनः हृदि श्रिताः कामा वासना हृदयसंवंधिनमात्मानमुपसर्प्योपश्लिष्यंते हृदयवियोगेपि चात्मन्यवतिष्ठंते पुटतैलस्थ इव पुष्पादिगंधा इत्या·
चक्षते तेषां कामः संकल्पो हृदय एवेत्यादीनां वचनानामानर्थक्यमेव हृदयकरणोत्पाद्यत्वादिति चेत् न हृदि श्रिता इति विशेषणात् न हि
हृदयस्य करणमात्रत्वे हृदि श्रिता इति वचनं समंजसं हृदये ह्येव रूपाणि प्रतिष्ठितानीति चात्मा विषयाश्रयविशेषितत्वात् हृदयच्छिद्ररूपपरावचनं यथार्थमेवयुक्तं ध्या
यतीव लेलायतीवेति श्रुतेरन्यार्थासंभवात् ये कामा अस्य हृदि श्रिता इति विशेषणादात्माश्रया अपि संतीति चेत् न नानाश्रितापेक्षत्वात् तत्राश्रयांतरमपेक्षाप्रहदिति·
विशेषणं किं तर्हि ये हृदयमनाश्रिताः कामास्तानपेक्ष्य विशेषणं ये त्वप्रकृतभविष्या भूता अप्रतिपक्षतो निहृतास्ते नैव हृदि श्रिताः संभाव्यंते चेत् नोयुक्तं तानपेक्ष्य विशेषणाः

वेधसंभवान्नानर्थक्यं श्रुतीनामिति शंकते हृदयकरणोत्पाद्यत्वादिना। यदा सर्वे प्रमुच्यंते कामा यस्य हृदि श्रिता। न कामादिसंवंधः किंतु आश्रयाश्रयित्वं। न च करणत्वं नास्ति व। न हि चक्षुरादीनां श्रयंरूपादिज्ञानं दृष्टमिति परिहरति। न हृदीति।

तेन आत्मनि स्थिताः इत्यर्थावगतं तेचोदयति

प्रतिपक्षत्वेन विषयदोष
दर्शनादितियावत्

122

इत्यनाश्रितभूतभविष्यत्कामसंभवोपसर्वकामानिवृत्तेर्विवक्षितत्वाद्वर्तमानविशेषणानर्थक्यमितिशंकते । नथापीति । अतीतानागतकामाभावः स्वतः सिद्धो भवति न तन्निवृत्त्यै यत्नोऽपेक्ष्यते शुद्धात्मदृष्टेरुद्भूतानां वर्तमानकामानिराशे यत्नाधिक्यमाधेयमिति तात्पर्यं वर्तमानग्रहणमिति यदि हतिः न तेन्न विति । यदि यथोक्तमाख्यानमनात्मत्वात्माश्रयत्वमेव कामानामङ्गीयते तदा श्रुतमोक्षासंभवेन निष्कल्पितं स्यादित्याह । इतरथेति । अश्रुतत्वमसिद्धमिति शंकते । नकं चेन्नेति । अथादर्थात्माश्रयत्वं कामानां श्रुतमेवेत्येतद्दृश्यति । नेत्यादिना । निषेधो हि प्राप्तिमपेक्ष्यते न वास्तवकामानामात्मधर्मत्वप्राप्तिस्तु भ्रान्त्यापतन्भवति तस्मादात्मनो वक्तोतानकामाद्याश्रयत्वमित्यर्थः । इच्छादयः । क्वचिदाश्रिताः गुणत्वाद्रूपादिवदित्यनुमानात्परिशेषात्कामाद्याश्रयत्वमात्मनः सेत्स्यतीत्याशंकते । वैशेषिकादीति । श्रुत्यवष्टम्भेन निराचष्टे नेत्यादिना । तदेवविवृणोति । कामादीनामिति । यद्यच्च समवेतं तत्तेन न दृश्यते यथा चक्षुर्गतं कार्ष्ण्यं तेनैव चक्षुषा न दृश्यते न तथा कामादीनामात्मसमवायित्वेन । दृश्यत्वं न स्यात् । न दृश्यत्वबलेन स्वयं

वर्तमानविषयेऽतेन सर्वे प्रमुच्यन्त इति । तथापि विशेषणानर्थक्यमिति चेत् । न तेषु यत्नाधिक्याधानार्थत्वात् । इतरथाऽश्रुतमनिष्टं च कल्पितं स्यादात्माश्रयत्वं कामानां न कंचन कामं कामयत इति प्राप्तप्रतिषेधादात्माश्रयत्वं कामानां श्रुतमेवेति चेत् । न स धीः स्वप्नो भूत्वेति परनिमित्तत्वात्कामाश्रयप्राप्तेरसंगवचनाच्च न हि कामाश्रयत्वे संगवचनमुपपद्यते । संगश्च काम इत्यवोचाम । आत्मकाम इति श्रुतेरात्मविषय एवास्य कामो भवतीति चेत् । न व्यतिरिक्तकामाभावार्थत्वात्तस्याः । वैशेषिकादितन्त्रन्यायोपपन्नः आत्मनः कामाद्याश्रयत्वमिति चेत् । न हृदि श्रिता इत्यादिविशेषश्रुतिविरोधादनपेक्षास्ता वैशेषिकादितन्त्रोपपत्तयः । श्रुतिविरोधे न्यायाभासत्वोपगमात् । स्वयंज्योतिष्ट्वबाधनाच्च । कामादीनां स्वप्ने केवलदृशिमात्रविषयत्वात्स्वयंज्योतिष्ट्वं सिद्धं स्थितं च बाध्येत । आत्मसमवायित्वे दृश्यत्वानुपपत्तेः चक्षुर्गतविशेषवत् द्रष्टुर्हि दृश्यमर्थान्तरभूतमिति द्रष्टुः स्वयंज्योतिष्ट्वं सिद्धं तद्बाधितं स्याद्यदि कामाद्याश्रयत्वं परिकल्प्यते । सर्वशास्त्रविप्रतिषेधाच्च परस्यैकदेशकल्पनायां कामाद्याश्रयत्वे च सर्वशास्त्रार्थजातं कुप्येत । एतच्च विस्तरेण चतुर्थेऽवोचाम महता हि यत्नेन कामाद्याश्रयत्वकल्पनाः प्रतिषेद्धव्या आत्मनः परैकत्वशास्त्रार्थसिद्धये । तत्कल्पनायां पुनः क्रियमाणायां शास्त्रार्थ एव बाधितः स्यात् । यथेच्छादीनामात्मधर्मत्वं कल्पयन्तो वैशेषिका नैयायिकाश्चोपनिषच्छास्त्रार्थेन न संगच्छन्ते तथेयमपि कल्पना उपनिषच्छास्त्रार्थबाधनान्नादरणीया । स्त्रीपुंसयोरिवैकत्वान्न पश्यन्त्युक्तं स्वयं ज्योतिरिति च । स्वयंज्योतिष्ट्वं नाम चैतन्यात्मस्वभावता । यदि हि स्वरूपत्वादेव चैतन्यात्मस्वभावं आत्मा सकथमेकत्वेऽपि हि स्वभावं जह्यात् न जानीयात् ॥ २२ ॥ अथ न जहाति कथमिह सुषुप्ते न पश्यति विप्रतिषिद्धमेतच्चैतन्यमात्मनः स्वभावो न जानाति चेति । न तदिति प्रतिसिद्धमुभयमप्येतदुपपद्यते एव कथं यद्वै सुषुप्ते तन्न पश्यति पश्यन्वै तत्तत्र पश्यन्नेव न पश्यति । यत्तत्र सुषुप्ते न पश्यतीति जानीषे तन्न तथा गृह्णीयाः कस्मात्पश्यन्वै भवति तत्र तन्न येन पश्यतीति सुषुप्ते जानीषे यतो न चक्षुर्वा मनो वा दर्शनकरणं व्यापृतमस्ति । व्यापृते षु हि दर्शनश्रवणादिषु पश्यतीति व्यवहारो भवति शृणोतीति वा न च व्यापृतानि करणानि पश्यामः तस्मान्न पश्यत्येवायं न हि । किं तर्हि पश्यन्नेव भवति कथं तर्हि यस्माद्द्रष्टुर्दृशिकर्तुर्या दृष्टिः तस्मा दृष्टेर्विपरिलोपो विनाशः स न विद्यते । यथाग्नेरौष्ण्यं यावदग्निभावि तथाऽयं चात्माऽविनाशी विनाशित्वात् । आत्मनो दृष्टिरप्यविनाशिनी यावद्द्रष्टृभाविनी हि सा ननु विप्रतिषिद्धमिदमभिधीयते । द्रष्टुः सा दृष्टिर्न विपरिलुप्यत इति च । दृष्टिश्च द्रष्टा क्रियते दृष्टिकर्तृत्वाद्द्रष्टेत्युच्यते । क्रियमाणा च द्रष्टा दृष्टिर्न विपरिलुप्यत इति नित्या शक्यं वक्तुं । ननु न विपरिलुप्यत इति वचनादविनाशिनी स्यात् । न दवचनस्य ज्ञापकत्वात् । न हि न्यायप्राप्तो विनाशः कृतकस्य वचनशतेनापि वारयितुं शक्यते वचनस्य यथाप्राप्तार्थज्ञापकत्वात् । नैष दोषः । आदित्यादिप्रकाशवत्तद्दर्शनोपपत्तेः । यथादित्यादयो नित्यप्रकाशस्वभावा एव संतः स्वाभाविकेन नित्येनैव प्रकाशेन प्रकाशयन्ति । न ह्यप्रकाशात्मानः संतः प्रकाशं कुर्वन्तः प्रकाशयन्तीत्युच्यन्ते किं तर्हि स्वभावेनैव नित्येन प्रकाशेन । तथायमप्यात्माऽविपरिलुप्तस्वभावया दृष्ट्या

ज्योतिष्ट्वं साधितं बाध्येतेत्यर्थः । यत्तु परमात्मैकदर्शी जीवमाश्रित्य तदाश्रितं कामादीति तत्राह । सर्वशास्त्रेति । तदेवस्फुटयति । परस्येति । उभयं चैतन्यस्वभावत्वं विशेषविज्ञानराहित्यं चेत्यर्थः । यद्वैतदित्यादिवाक्यं चोदितार्थानुवादः तत्परिहारस्तु पश्यन्नित्यादिवाक्यं चक्षुरादिषु । यद्वैतत्तन्न पश्यतीत्यस्यार्थमालिख्यते । सुषुप्ते न पश्यतीति यत्तत्तन्न तथा गृह्णीयाः । कस्मात्सुषुप्ते पश्यन्नेव भवति । न पश्यतीति नहि किं तर्हि पश्यन्नेव भवति कथं हि द्रष्टुः दृष्टेर्विपरिलोपो न विद्यते विनाशित्वात् । ननु अन्यत्विकाले न तु द्वितीयं नास्ति यत्पश्येत् । एवमग्रेऽपि । येन ज्ञानेन दर्शनं जायते तज्ज्ञानं न श्यतीत्यर्थः । ज्ञानस्यात्मरूपत्वादिति भावः ।

तथा च आत्मन्यपि कामाः सन्तीति तात्पर्यार्थं दृष्टि नाह स्वप्ने कामानां विशेषणं इति सर्ववादिनोऽभिप्रायः । दृश्यत्वात् ५ अजन्यत्वात्

यद्वैतन्न पश्यतीत्यादि सर्वं वक्तुं हन्त [illegible] वति स्त्रीपुंसयोरिति स्वप्ने स्वमन्यतोऽन्तरः पाकस्याव[illegible]शंका माहा यद्वीत्यादिना ।

इतरथाऽश्रुतं कामानां आत्माश्रयत्वं कल्पितं स्यात् अनिष्टं च दृश्यमह श्रुतं शास्त्रस्य

चतुर्थे चेत्यर्थः । प्रपंचमतं निरस्तं नहि मुनीनैराकाङ्क्षां किंचित्करमिति शंकाह । महतेति । [illegible]पन्यगावमनात्मद्वयदेकत्वं तस्य शास्त्रार्थमित्यर्थ इति

यावत् ७

मात्मना नित्यदृष्टित्वे दोषमाशंकते। गौणमिति। गौणस्य मुख्यापेक्षत्वान्मुख्यस्य चान्यस्य द्रष्टृत्वस्याभावाभेवमित्युत्तरमाह। नेत्यादिना। नित्यदृष्टित्वेमुक्ते प्रत्यक्षविरोधं शंकते। पश्यामीति चक्षुरादिव्यापारापेक्षया पश्यामः
मिन पश्यामि शृणोमीति धियो रात्मसाक्षित्वादित्युत्तरमाह। नकरोमीति। नित्यदृष्टित्वे सर्वं देव पश्यामीति स्यादिति पूर्वपक्षिणोऽभिप्रायः। आत्मदृष्टेर्नित्यत्वेऽहेतुमुत्तरमाह। भावा। दृष्टेनेति। एकीभूत सुषुप्तिकाले करणमात्र
लोपात्तेऽभिव्यक्तेनास्तीत्यर्थः। सुषुप्ते द्वितीयं प्रमातृरूपेणास्तीति न दुपपादयति। आत्मानं परेणेति। प्रमातृरूपं पृथङ्नास्तीति शेषः। तथापि करणव्यापारकृत विषय दर्शनमात्मनः स्यादित्याशंक्याह। दृ
ष्टिरिति। सुषुप्तस्यापि पारिच्छिन्नत्वमाशंक्याह। अयं त्विति। तत्कृता विशेषदर्शनाभावप्रयुक्तेत्यर्थः। उक्तन्याय मुत्तरवाक्येष्वतिदिशति। समानमिति। मनोबुद्ध्योः साधारणकरणत्वात्तच्चक्षुरादीनां व्यापारे

नित्यया द्रष्टेत्युच्यते। गौणं तर्हि द्रष्टृत्वं। नैवमेव मुख्यत्वोपपत्तेः। यदि ह्यन्यथाप्यात्मनो द्रष्टृत्वं दृष्टं तदास्य द्रष्टृत्वस्य गौणत्वं न त्वात्मनोऽन्यो दर्शनप्रकारोऽस्ति। तदेवमेव मुख्यं द्रष्टृत्वमुपपद्यते। नान्यथा यथादित्यादीनां प्रकाशयितृत्वं नित्येनैव स्वाभाविकेनाऽक्रियमाणेन प्रकाशेन। तदेव च प्रकाशयितृत्वं मुख्यं प्रकाशयितृत्वान्तरानुपपत्तेः। तस्मान्न द्रष्टुर्दृष्टेर्विपरिलुप्यत इति न विप्रतिषेधो गंधोऽप्यस्ति। नन्वनित्यक्रियाकर्तृविषय एव तृच्प्रत्ययान्तस्य शब्दस्य प्रयोगो दृष्टः यथा छेत्ता भेत्ता गंतेति तथा द्रष्टेत्यत्रापीति चेत्। न प्रकाशयितेति दृष्टत्वात्। भवतु प्रकाशकेष्वऽन्यथासंभवात्। न त्वात्मनीति चेत्। न दृष्टेर्विपरिलोपश्रुतेः। पश्यामि न पश्यामीत्यनुभवदर्शनान्नेति चेत् न करणव्यापारविशेषापेक्षत्वात्। उद्धृतचक्षुषां च स्वप्न आत्मदृष्टेरविपरिलोपदर्शनात्। तस्मादविपरिलुप्तस्वभावैवात्मनो दृष्टिः। अतस्तयाऽविपरिलुप्तया दृष्ट्या स्वयंज्योतिःस्वभावया पश्यन्नेव भवति सुषुप्ते। कथं तर्हि न पश्यतीत्युच्यते। न तु तदस्ति। किं तद्द्वितीयं विषयभूतं किंविशिष्टं ततोऽन्यत्। अन्यत्वेन विभक्तं यत्पश्येत् उपलभेत।। ३४।। यद्धि तद्विशेषदर्शनकारणमन्तःकरणं चक्षूरूपं च

यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्।। ३४।। यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत्।। ३५।। यद्वै तन्न रसयते रसयन्वै तन्न रसयते न हि रसयितू रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्रसयेत्।। ३६।।

तद्विषयान्यत्वेन प्रत्युपस्थापितमासीत्तदेतस्मिन्काल एकीभूतमात्मनः परेणापरिष्वंगात्। द्रष्टुर्हि द्रष्टव्यस्य विशेषदर्शनाय करणमन्यत्वेन व्यवतिष्ठते।। अयं तु स्वेन सर्वात्मना संपरिष्वक्तः स्वेन परेण प्राज्ञेनात्मना प्रियये व पुरुषः। तेनैनं पृथक्त्वेन व्यवस्थितानि करणानि विषयाश्च। तदभावात् विशेषदर्शनं नास्ति। करणादिकृतं हि न त्वात्मकृतमात्मकृतमिव प्रत्यवभासते। यद्वै तन्न वदति। यद्वै तन्न शृणोति। यद्वै तन्न मनुते। यद्वै तन्न स्पृशति। यद्वै तन्न विजानातीति। मननविज्ञानयोर्दृष्ट्यादिसहकारित्वेऽपि सति चक्षुरादिनिरपेक्षभविद्वर्त्तमानविषये व्यापारो विद्यत इति पृथग्ग्रहणं। किं पुनर्दृष्ट्यादीनामग्नेरौष्ण्यप्रकाशनज्वलनादिवत् धर्मभेदः अहोस्विदभिन्न एव धर्मस्य परोपाधिनिमित्तकं धर्मान्यत्वमित्यत्र केचिदाचक्षते। आत्मवस्तुनः स्वत एकत्वं च यथा गोर्गोत्वद्रव्यत्वैकत्वसास्नादीनां धर्माणां परस्परव्यभिचारदर्शनादात्मनोऽपि तद्वदेव दृष्ट्यादीनां परस्परं भेदः। यथा स्थूलेऽप्येकत्वं नानात्वं तथा निरवयवेऽप्यमूर्त्तत्वेकत्वे नानात्वमनुमेयं सर्वत्राव्यभिचारदर्शनात्तस्मादात्मनोऽपि तद्वदेव दृष्ट्यादीनां परस्परं नानात्वमात्मना चैकत्वमिति। तन्नाऽन्यपरत्वात्।। नहि दृष्ट्यादिधर्मः तस्मात्कृतेयं भ्रांतिरात्मनो दृष्टिः परिलुप्यत इति समानमन्यत्। यद्वै तन्न जिघ्रति। यद्वै तन्न रस।

ग्राहदृष्टव्यापारा कथं पृथङ्निर्देशः स्यादित्याशंक्याह। मननेति। वाक्यानि व्याख्याय स्वसिद्धांतस्फुटीकरणार्थं विचारयति। किं पुनरिति। किं पुनः धर्माणां सतां मिथ्याधर्मभेदः धर्मिणश्च भेदो नास्तीति यावत्।।

भवति। इयका आत्मनो दृष्टिर्विपरिलुप्यत इति।

अविपासंकोचेन जीव परमात्मना परिष्वंगात्। अंतःकरणं चक्षूरूपं च।

भनेतद्रूपं चमनेन पूर्वपक्षं दृष्टान्ति। अत्रेति। गवादीनां सास्नादयपत्वाद्रूपभेदसंभवादेकेन रूपेणाभिन्नत्वं रूपान्तरेणाभिन्नत्वमित्युभयथात्वापि निरवयवेष्वात्मादिषु कथमनेकरसत्वसिद्धिरित्याशंक्याह यथा स्थूलेष्विति। एकरूपत्वे वस्तुनो दृष्टान्तदृष्टेः नानारूपत्वं गवादिदृष्टान्तदर्शनात्तद्वदनुमेयं तद्विमतं भिन्नाभिन्नं व एकत्वानेकत्ववद्धर्मिवदित्यर्थः। दृष्ट्यादि अग्नेरौष्ण्यवत्‌ नानाधर्मत्वं अहोस्विदेक एव धर्मः परोपाधिना नाना भाति। धर्मिधर्मभावेन भाति। अवयवरूपेण। अन्यथा एकस्यैव पर्यायं ब्रूयात्।

अभिन्न एवेत्यर्थः सति। धर्मस्य दृष्ट्यादिपदार्थस्येत्यर्थः। परोपाधिनिमित्तं बुद्ध्याद्युपाधिकृतमित्यर्थः। धर्मान्यत्वं। धर्मत्वधर्मिणोः मिथोऽन्यत्वं चेत्यर्थः। यथापि गवादिषु भिन्नाभिन्नत्वमनुमीयते तथापि कथमात्मनि तदनुमानमित्याशंक्य वस्तुत्वस्य नानारूपत्वेनाव्यभिचारादात्मन्यपि यथोक्तमनुमानं निरंकुशं प्रसरेदित्याह। सर्वत्राव्यभिचारदर्शनादिति। यथोक्तानुमानानुग्राहकत्वं द्रष्टा दृष्ट्यादेर्भिन्नाभिन्नत्वस्योक्तत्वादिति तात्पर्यमिति भावः। भर्तृप्रपंचोक्तवाक्यतात्पर्यं निराकरोति। नेत्यादिना। क्वचित्प्रश्नः।

123

भिन्नमिवदृष्टव्यमानं भवति दृष्ट्यादिधर्मभेदः इतिभवति

चैतन्याविनाशित्वात्तात्पर्यं चेत्कथं तर्हि दृष्ट्यादिभेदवचनमित्याशंक्याह । यदस्येति चैतन्य । तद्धि सुषुप्ते ऽवस्थायामुपाधेरन्तःकरणस्य चक्षुरादिभेदाधीनपरिणामव्यापारस्य निवृत्तौ सत्यामुपाधिभेदस्यानुजास्यमानत्वान्न न हत्त्वा भिन्नमिवानुपलक्ष्यमाणस्वभावं पूर्वोपितपापि चक्षुर्द्वारेणाजायमानायां बुद्धिवृत्तौ व्यक्तं चैतन्यं दृष्टिः । प्राणद्वारेणाजातायां तस्यां व्यक्तं घ्राणाति । इत्युपाधिभेदात प्राप्तभेदानुवादेन चैतन्यस्याविनाशित्ववाक्यतात्पर्यमित्यर्थः । एवं स्थिते फलितमाह तत्रेति । तथा सतीत्यर्थः । विज्ञानमिति । विज्ञानमानन्दमित्यादिश्रुतिभ्य मद्दृष्ट्यादिकल्पनेति शेषः । यथा घटाकाशो महाकाश इत्येकशब्दविषयत्वादुपाधिभेदेप्याकाशस्यैकत्वमिष्टं तथैकशब्दप्रवृत्तेरेकत्वं चितीपि स्वकर्त्तव्यं । तत्कुतो दृष्ट्यादिभेदासिद्धिरित्याह शब्दप्रवृत्तेश्चेति । तामेव विवृणोति । लौकिकी चेति । सिद्धान्ते दृष्टान्तो नास्तीत्यत्राह । दृष्टान्तेति । आत्मन सर्वावभासकत्वे वा [illegible] मं प्रमाणयति । तथा चेति । निरवयवेऽपि नानारूपत्वमनुमेयं तत्राह । नचेति । स्वाभाविकमत्ता । सत्तात्मस्वरूपस्य चैतन्यस्य यथाप्राप्तं उच्यते । दृष्ट्यादिशब्दस्य चैतन्यरूपो योऽर्थः तस्य यो व्यवहारस्तं आपन्नं । रूपज्ञानरसज्ञानादिना ॥

य प्रदर्शनपरमिदं यद्वै तदित्यादि किं तर्हि यदि चैतन्यात्मज्योतिः कथं न जानाति सुषुप्ते न ह्नन्न मतो न चैतन्यात्मज्योतिरित्येवमाशंका प्राप्ता तन्निराकरणायैतदारभ्यं यद्वै तदित्यादि । यदस्य जाग्रत्स्वप्नयोश्चक्षुराद्यनेकोपाधिद्वारं चैतन्यात्मज्योतिःस्वाभाव्यमुपलक्षितं दृष्ट्याद्यभिधेयव्यवहारापन्नं सुषुप्ते उपाधिभेदव्यापारानुत्पत्तावनुभाव्यमानत्वादनुपलक्ष्यमानस्वभावमप्युपाधिभेदेन भिन्नमिव यथाप्राप्तानुवादेनैव विद्यमानत्वमुच्यते । तत्र दृष्ट्यादिधर्मभेदकल्पना विवक्षितार्था न भिन्नतया सैन्धवघनवत्प्रज्ञानैकरसघनश्रुतिविरोधात् । विज्ञानमानन्दं सत्यं ज्ञानं प्रज्ञानघनमित्यादिश्रुतिभ्यश्च प्रवृत्तेश्च लौकिकी च शब्दप्रवृत्तिश्चक्षुषा रूपं विजानाति श्रोत्रेण शब्दं विजानाति वाचान्नरसं विजानातीति च सर्वत्रैव च दृष्ट्यादिक्रियाभिधेयानां विज्ञानशब्दवाच्यतामेव दर्शयति । शब्दप्रवृत्तिश्च प्रमाणं दृष्टान्तोपपत्तेश्च । यथा हि लोके स्वच्छस्वाभाव्यमापन्नव्यतिरेकेण हरितनीललोहितादिलक्षणा धर्मभेदाः स्फटिकस्य कल्पयितुं शक्यन्ते । तथा चक्षुराद्युपाधिभेदसंयोगात्प्रज्ञानघनस्वभावस्यैवात्मज्योतिषो दृष्ट्यादिशक्तिभेद उपलक्ष्यते । प्रज्ञानघनस्य स्वच्छस्वाभाव्यात्स्फटिकस्य स्वच्छ

यद्वै तन्न वदति वदन्वै तन्न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ ३७ ॥ यद्वै तन्न शृणोति शृण्वन्वै तन्न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ ३८ ॥

स्वाभाव्यवदस्यायं ज्योतिः । यथा चादित्यज्योतिरवभास्यभेदैः संयुज्यमानं हरितं नीलं पीतं लोहितादिभेदैर्विभाज्यं तदाकाराभासं भवति तथा च कृत्स्नं जगदवभासयच्चक्षुरादीनि च तदाकारं भवति तथा चोक्तमात्मनैवायं ज्योतिषास्त इत्यादि । न च निरवयवेऽनेकात्मता शक्यते कल्पयितुं दृष्टान्ताभावात् यदप्याकाशस्य सर्वगतत्वादिधर्मभेदः परिकल्प्यते परमाण्वादीनां वा गन्धरसाद्यनेकगुणत्वं तदपि निरूप्यमाणं परोपाधिनिमित्तमेव भवति । आकाशस्य तावत्सर्वगतत्वं नाम न स्वतो धर्मोऽस्ति । सर्वोपाधिसंश्रयात्तु सर्वत्र स्वेन रूपेण सत्त्वमपेक्ष्य सर्वगतत्वव्यवहारः । न त्वाकाशः क्वचिद्गतो वा आगतो वा । स्वतो गमनं हि नाम देशान्तरेण संयोगकारणा सा च क्रियानवयवविशेषे संभवति । एवं धर्मभेदा नैव सन्त्याकाशे । तथा परमाण्वादावपि परमाणुर्नाम पृथिव्या गन्धघनायाः परमसूक्ष्मोऽवयवो गन्धात्मक एव तस्य पुनर्गन्धवत्त्वं नाम न शक्यते कल्पयितुं । अथ तस्यैव रसादिमत्त्वं स्यादिति चेत् । न तत्राप्यवादि

त्वसद्वृत्तिः । लौकिकी शब्दप्रवृत्तिः सर्वत्रैव दर्शयति । दृष्ट्यादिभेद उपलक्ष्यते । तेन ज्ञानभेदो भातीत्यभिप्रायः । विचार्यमाणा पृथिव्या परमाणोः । शब्दप्रवृत्तिकर्त्री । अतो ज्ञानरूपत्वे तत्सर्वत्र सैवात्मनो रूपं । रूपज्ञानरसज्ञानादिना । गुणिगुणानां भेदाद्भेदने अनवस्थाप्रसंगात् । गंधस्पर्शादिमत्त्वे बहुव्रीहि । आकाशादीनां दृष्टान्तत्वमाशंक्य निराचष्टे । यदपीत्यादिना । ननु कुतश्चिद्विभागे च केनचिद्देशेन तत्कारणीक्रिया भूता क्रियासेनादाविवाकाशे भविष्यतीत्याह । सा चेति । सावयवे हि द्रव्ये नादौ क्रियादर्शनं । आकाशे अविशेषे निरवयवत्वं तत्र क्रियेत्यर्थः । तथापि धर्मी तत्रस्था काशे भविष्यतीत्याशंक्य तेषामपि क्रिया पूर्वकारणगुणक्रमन्याय कवलीकृतत्वमाह । यत्स्फटिकस्यान्निमित्तमेव केवलं हरितनीललोहिताद्युपाधिभेदसंयोगात्तदाकारत्वं भजते । न च स्वच्छस्वाभाव्यः । स्वच्छस्वाभाव्यनिमित्तमेव । स्वरूपत्वं जगत्स्वप्नयो चैतन्यात्मज्योतिः स्वाभाव्यं अस्य आत्मना यदुपलक्षितं दृष्टांतत्वे तन्यात्मज्योतिःस्वरूपमत्वं सुषुप्ते उपाधिभेदव्यापारनिवृत्तौ सत्यां उपाधिभेदस्य अनु । एतमिति । तत्रास्य मानन्त्वात् । अनुपलक्ष्यमाणमत्ता कथं यद्यपि भवति । तथापि चक्षुर्द्वारेणाजायमानायां बुद्धिवृत्तौ दृष्टि

अतिपरस्मिन्नात्मनि दृग्यादिशक्तिभेदास्तेषांमध्ये दर्शनशक्तिश्चक्षुरात्मनारूपात्मनाचपृथगेवपरिणमते। घ्राणशक्तिश्चघ्राणात्मनागंधात्मनाचेत्यनेनक्रमेणापरिणमन्ते। परिणामकल्पनाभूर्तप्रपंचर्याकृतासापिपरस्यैकरूपत्वोपपादनेननिरस्तेत्याह। एतेनेति। अत्रेत्याद्युक्तवाक्यव्यावर्त्याकांक्षांदर्शयति। नन्विति। किमस्यविशेषविज्ञानराहित्यस्वरूपं॥ किंवाविशेषविज्ञानवत्त्वं। आद्येनाद्यत्वप्रसंगउपपत्तिः। द्वितीयेसुषुप्तेस्तुयपत्ति द्वितीयेसुषुप्तेरसिद्धिरितिभावः। प्रतीचश्चिन्मात्रज्योतिषोविशेषविज्ञानराहित्यमेवस्वरूपंतत्राप्यपिस्वाविद्याकल्पितविशेषविज्ञानवत्त्वमाश्रित्यावस्थाद्वयंसिद्धमतोसुप्तेरवाक्यमवलंब्योत्तरमाह। उच्यतइत्यादि परस्यैकरूपत्वापपादनेन। आद्यंत्वप्रयोरिवसुषुप्तेऽन्यत्वेनप्रविभक्तंतद्द्वितीयंनास्तियद्विजानीयादित्युक्तेऽर्थे। यत्र०तानव्रतत्रैव०वाक्येनकं०द्वा। इतियोजना। भवतिइतिहैनमनुशशासइत्यस्यआद्गैल्लपडुनेः इतिहैनमनुशशा

स्यानेकधर्मवत्त्वेनदृष्टांतोऽस्त्येतेनदृग्यादिशक्तिभेदानांपृथक्चक्षुरूपादिभेदेनापरिणामाणामभेदकल्पनापरमात्मनिप्रयुक्ताजाग्रत्स्वप्नयोरिवयद्विजानातीयान्नद्वितीयंप्रवि· भक्तमन्यत्वेननास्तीत्युक्तेः। अतःसुषुप्तेनविजानातिविशेषं। ननुयद्यस्यायमेवस्वभावः किंनिमित्तमस्यविशेषविज्ञानंस्वभावपरित्यागेन॥ ३५। ३६। ३७। ३८। ३९। ४०॥ ४१॥ ॥अथविशेषविज्ञानमेवास्यस्वभावः कस्मादेषविशेषंनजानातीति। उच्यते। शृणुयत्रयस्मिन्जागरितेस्वप्नेवान्यदिवात्मनोवस्त्वंतरमिवाविद्ययाप्रत्युपस्थापितंभवतितत्रतस्मादविद्याप्रत्युपस्थापितादन्योन्यमिवात्मानंमन्यमानोऽसत्यात्मनःप्रविभक्तेवस्त्वंतरेऽसतिचात्मनिततःप्रविभक्तेऽन्योन्यत्पश्येदुपलभेत। तच्चदर्शितंस्वप्नेप्रत्यक्षतोघ्नंतीवजिनंतीवेति। तथान्योन्यज्जिघ्रेद्रसयेद्वदेच्छृणुयान्मन्वीतस्पृशेद्विजानीयादिति। यत्रपुनःसाऽविद्यासुषुप्ते वस्त्वंतरप्रत्युपस्थापिकाशांतातेनान्यत्वेनाविद्याप्रविभक्तस्यवस्तुनोऽभावात्तत्केनकंपश्येज्जिघ्रेद्विजानीयाद्वा। अतःस्वेनैवहिप्राज्ञेनात्मनास्वयंज्योतिःस्वभावेनसंपरि

या कृताया·

यद्वैतन्नमनुतेमन्वानोवैतन्नमनुतेनहिमंतुर्मतेर्विपरिलोपोविद्यतेऽविनाशित्वान्नतुतद्द्वितीयोऽमस्तिततोऽन्यद्विभक्तंयन्मन्वीत॥ ३९ ॥ यद्वैतन्नस्पृशतिस्पृशन्वैतन्नस्पृशतिनहिस्प्रष्टुःस्पृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वान्नतुतद्द्वितीयमस्तिततोऽन्यद्विभक्तंयत्स्पृशेत्॥ ४० ॥ यद्वैतन्नविजानातिविजानन्वैतन्नविजानातिनहिविज्ञातुर्विज्ञातेर्विपरिलोपोविद्यतेऽविनाशित्वान्नतुतद्द्वितीयमस्तिततोऽन्यद्विभक्तंयद्विजानीयात्॥ ४१ ॥ यत्रवाअन्यदिवस्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृशेदन्योऽन्यद्विजानीयात्॥ ४२ ॥ सलिलएकोद्रष्टाद्वैतोभवत्येषब्रह्मलोकःसम्राडितिहैनमनुशशासयाज्ञवल्क्यएषास्यपरमागतिरेषास्यपरमागतिरेषास्यपरमागतिरेषपदेषोस्यपरमोलोकएषोस्यपरमआनन्दएतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंति॥ ४३॥

इतिहैनमनुशशासे
त्यस्यावृत्तिर्वेया·

ष्वक्तःसमस्तःसंप्रसन्नःआप्तकामःआत्मकामःसलिलवत्स्वच्छीभूतसलिलइवसलिलएकोऽद्वितीयस्याभावात्· अविद्ययाहिद्वितीयंप्रविभज्यते। साचशांताऽतःएकोऽद्रष्टादृष्टेरपरिलुप्तत्वादात्मज्योतिःस्वभावायाःअद्वैतोद्वितीयस्याभावादेतदमृतमभयमेवब्रह्मलोकोब्रह्मैवलोकोब्रह्मलोकः। परस्त्वायमस्मिन्कालेव्यावृत्तकार्यकरणोपाधिभेदःस्वआत्मज्योतिषिशांतसर्वसंबंधोवर्त्तते। हेसम्राडितिहएवंहैनंजनकमनुशशासअनुशिष्टवान्याज्ञवल्क्यइतिश्रुतिवचनमेतत्कथंवानुशशासएषास्यविज्ञानमयस्यपरमागतिर्यास्त्वन्यादेहग्रहणलक्षणाब्रह्मादिस्तंबपर्यंताअविद्याकल्पितासागतयःअतोपरमाऽविद्याविषयत्वात्। इयंतुदेवत्वात्गतीनांकर्मविद्यासाध्यानांपरमोत्तमायास्समस्तात्मभावोयन्नान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसैषैवचपरमासंपत्सर्वासांसंपदांविभूतीनामियंपरमास्वाभाविकत्वादस्याःकृतकाह्यन्याःसंपदः। तथैषोस्यपरमोलोकः। येत्वन्येकर्मफलाश्रयालोकास्तेऽस्याःपरमाः अयंतुनकेनचनकर्मणामीयतेस्वाभाविकत्वादेषास्यपरमोलोकः तथैषोस्यपरमानंदोयान्यन्यानिविषयेंद्रियसंबंधजनितान्यानंद।

। नाःस्तेनाविद्यायाःशांतत्वेनेतियावत्। सुषुप्तेविशेषविज्ञानाभावप्रयुक्तंफलमाह। अतइति। देवत्वादिगतिनिकृष्टरूपाः अपेक्षया अयं परमाः तीत्युच्यते। प्रकृतंसमस्तात्मभावंविशेषविज्ञानराहित्येनविशिनष्टियत्रेति। किंनिमित्तमसीसमत्तमनुपेक्ष्यकर्मधारयोगृह्यतेतत्राह। परमस्त्वेति। कर्मविद्यासाध्यदेवत्वादिगतिसंबंधिपरमत्वविशिष्टाः तत्रेत्यर्थः। जीवात्मनः। ।

यथा सैंधवावयवैः सैंधवाचलं लोको बोधयेदिति तथानंदस्य मात्रानामावयवास्तत्र दर्शनद्वारेणावयविनं परमानंदं अधिगमयितुमिच्छन्नंतरो ग्रंथः प्रवृत्त इत्यर्थः। अभेदनिर्देशस्यापि प्रामाण्यमाह। तत्रेति। प्रकृतवाक्यं सप्तम्यर्थः। तत्रानंदानंदिनोरभेद निर्देशान्नार्थांतरभूतत्वमात्मनः सकाशादानंदस्येत्यर्थः। एतत्सूचितं। श्रोत्रियवाकितत्वसभेदनिर्देशस्य भविष्यतीत्याशंक्याह। परमानंदस्येति। योयमानंद उक्तः तमेव दृष्ट्वा मनुष्यानंदमादिं कृत्वा शतगुणोत्तरीति। यथाशं यथानन्द शतगुणीकृतकर्मदेवानामेक आनन्दस्तथा कर्मदेवानन्दः शतगुणीकृतः सन्नाजानदेवानामेक आनंदो भवतीत्याह। तथैवेति। कुर्वीत तृष्णत्वं तत्राह। आजानदेवेभ्य इति। प्रजापति। लोकशब्दस्य ब्रह्मलोकशब्दादर्थभेदमाह

जातानि तानि येस्यैषोस्य परमानंदो नित्यत्वात्। यो वै भूमा तत्सुखमिति श्रुत्यंतरात्। यत्रान्यत्पश्यत्यन्यद्विजानाति तदल्पं मर्त्यमसुखं सुखमिदं तु तद्विपरीतमत एवैष ह्योस्य परम आनंदः एतस्यैवानंदस्य मात्रां कलां अविद्याप्रत्युपस्थापितां विषयेंद्रियसंबंधकालाविभाव्यमान्यानि भूतान्युपजीवंति कानि तानि तत स्वानंदादविद्यया प्रविभज्यमानस्वरूपादापन्नत्वं नु तानि अन्यत्र ॥४॥ परिकल्प्यमानान्यन्यानि संत्युपजीवंति भूतानि विषयेंद्रियसंपर्कद्वारेण विभाव्यमानां ॥ ४३ ॥ यस्य परमानंदस्य मात्रा अवयवाः ब्रह्मादिभिर्मनुष्यपर्यंतैर्भूतैरुपजीव्यंते तदानंदमात्रावयवद्वारेण मात्रिणां परमानंदमधिजिगमयिषन्नाह। सैंधवलवणसकलैरिव लवणशैलं। स यः मनुष्याणां मध्ये राद्धः संसिद्धोंगविकलसमग्रावयव इत्यर्थः। समृद्ध उपभोगोपकरणसंपन्नो भवति। किंचान्येषां समानजातीयानामधिपतिः स्वतंत्रः पतिः न मांडलिकः सर्वैः समस्तैर्मानुष्यैर्लोकैरिति दिव्यभोगोपकरणानि व्यावृत्यर्थं मनुष्याणामेव यानि भोगोपकरणानि तैः संपन्नानामप्यतिसंपन्नतमः स मनुष्याणां परम आनंदस्तत्रानंदानंदिनोरभेदनिर्देशान्नार्थांतरभूतत्वमित्येतन्मानानंदस्य वेयं विषयविषयाकारेण मात्रायास्तु तेति ह्युक्तं यत्र वा अन्यदिव स्यादित्यादिवाक्येन। तस्मात्सोयं परमानंद इत्यभेदनिर्देशः। युधिष्ठिरादितुल्यो राजा उदाहरणं दृष्ट्वा मनुष्यानंदमादीं कृत्वा यमानन्दः शतगुणोत्तरक्रमेणानीय परमानंदं यत्र भेदो निवर्तते तमधिगमयति। अथायमानंदः शतगुणोत्तरक्रमेणावक्रमानीय

स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यलोकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनन्दोऽथ ये शतं मनुष्याणामानन्दाः स एकः पितॄणां जितलोकानामानंदोऽथ ये शतं पितॄणां जितलोकानामानंदाः स एको गंधर्वलोक आनन्दोऽथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसंपद्यन्तेऽथ ये शतं कर्मदेवानामानन्दाः

चहृद्धिकाणामनुभवति। यत्र गणितभेदो निवर्तते अन्यदर्शनश्रवणमननाभावात् परमानंदं विवक्षन्नाह। अथ ये मानुष्याः सर्वप्रकाराः शतमानंदाः स एकः पितॄणामिति। तेषां विशेषणं जितलोकानामिति श्राद्धादिकर्मभिः पितॄंस्तोषयित्वा तेन कर्मणा जितो लोको येषां ते जितलोकाः पितरस्तेषां पितॄणां जितलोकानां मनुष्यानंदः शतगुणीकृतपरिमाण एक आनंदो भवति सोपि शतगुणीकृतो गंधर्वलोक एक आनंदो भवति स शतगुणीकृतः कर्मदेवानामेकः आनंदः अग्निहोत्रादिश्रौतकर्मणा ये देवत्वं प्राप्नुवंति ते कर्मदेवाः। तथैवाजानदेवानामेक आनंदः आजानत एवोत्पत्तित एव ये देवास्ते आजानदेवाः। यश्च श्रोत्रियोऽधीतवेदः अवृजिनः वृजिनं पापं तद्रहितो यथोक्तकारीत्यर्थः। अकामहतो वितृष्णः आजानदेवेभ्योऽवाक् यावन्तो विषयास्तेषु तस्य चैवंभूतस्याजानदेवैः समान आनंद इत्येतदन्वाकृष्यते चशब्दात्। तत् शतगुणीकृतपरिमाणः प्रजापतिर्लोके एक आनंदो विराट्शरीरे तथा तद्विज्ञानवान् श्रोत्रियोऽधीतवेदश्चावृजिन इत्यादि पूर्ववत्। तत् शतगुणीकृतपरिमाण एक आनंदो ब्रह्मलोके हिरण्यगर्भे आत्मनि यश्चेत्यादि पूर्ववदेव। अतः परं परिगणितनिवृत्तिरेवापरम आनंद इत्युक्तो यस्य परमानंदस्य ब्रह्मलोकाद्यानंदा मात्रा उदधेरिव विप्रुषः। एवं शतगुणोत्तरोत्तरवृद्धरूपेताः आनंदा यत्रैकतां यांति यश्च श्रोत्रियप्रत्यक्षः। अयमेव एव सप्रसा

विराडिति। यथा विराडात्मनि आजानदेवानंदः शतगुणीकृतः सन्नाजानदेवानां सन्नेक आनंदो भवति। तथा विराडात्मोपासकः श्रोत्रियत्वादिविशेषणः विराजोनुत्पातं दस्यादित्याहुत येति। सूत्रात्मस्वरूपे। सुकृतेप्रकृतेकृतं। हिरण्यगर्भानंदादुपरिष्टाद्ब्रह्मानंदे गणितभेदप्राकरणिके प्राप्ते प्रत्याहांत परमिति। एषोस्य परमानन्द इत्युपक्रम्य द्विमित्यानंदांतरमुपदर्शितमिति आशंक्याह। एष इति। तथापि सोऽपूर्वः सर्वात्ममुपासितमिति चेन्नेत्याह। यस्येति। यस्य परमानन्दस्य० त्वतः स परमानन्दस्य अप्यवाक्योस्योद्दृत्याह। स्थंब्रमादन्यसरणपरम आनन्द इति योजना। प्रकृतस्य ब्रह्मानन्दस्यापरिच्छिन्नत्वमाह। नन्वहोति। श्रोत्रियप्रत्यक्षास्य चाक्षोशत गुणीकृतस्य परिमाणस्य पर्वोक्तप्रपंचयति यत्राविद्यायास्तस्या अल्प० तितस्यात्राय मानयत्सुखत्वे० सैंधवाख्यलवणं सैंधवलवणं तस्य शकलैरिव उद्धृत्य नीत्वा वितृष्णस्यात्म

[illegible]

[illegible]

तप्रत्यगभूतपरमानंदमेवशीतिपरामृशति। सवाएषएतस्मिन्नित्याद्युत्तरग्रंथस्यसंबंधंवक्तुंवृत्तंकीर्त्तयतिअत्रेति। अत्रायंपुरुषःस्वयंज्योतिर्भवतीतिवाक्यंसप्रश्नार्थः। वीर्यप्रदर्शनसामर्थ्याद्विद्यायांसत्त्वनिर्धारितंतत्
किंतदाह। अतऊर्ध्वमिति। मुमुक्षोपिस्वप्नवेदितहीशीतमित्याह। एवमिति। वृत्तानुवादमुपसंहरति। इत्यतदिति। एवमनेनब्रह्मलोकान्तवाक्येनेतियावत्। सोहमित्यादेस्तात्पर्यमनुवदति। तत्रेतियतोराजाइत्थमन्यतेअतस्तस्यसहस्रदाने
स्वकाम्रवृत्तिरित्यर्थः। प्रथममेवंबंधोवर्ण्यतेइतितद्दृष्टान्तंस्मारयति। तन्वेति। अनचेति। अन्नविमुग्धपर्यायेग्रइत्यर्थः। निकृष्टाधिकारिणः। प्रश्नरूपांप्रश्नानियोयावसानानिविश्रयकामप्रश्नशतानिगन्तुकाममांउदरौत्सीत्
बुद्धान्तंप्रति। प्रदर्शिता मुक्तो। पूर्वंगमनविपरीतस्यथानतथा जगत्नेति। यद्यपियथोल्लक्षणोमोदा। अतऊर्ध्वमित्यादेरभिप्रायमवंधनेप्रागेवोपदिष्टेनतथापिपूर्वोक्तंसर्वंदृष्टान्तभूतमेवतयोरितियतोराजाबिभ्यति

[illegible]

तोभूमाभूमत्वादमृतःइतरोतद्विपरीतः। अत्रचश्रोत्रियत्वावृजिनत्वेतुल्येअकामहतत्वकृतोविशेषः। आनंदशतगुणवृद्धिहेतुरेतानिसाधनानिश्रोत्रियत्वावृजिनत्वाकामहत
त्वानितस्यानंदस्यप्राप्तौप्रावर्थ्यादभिहितानि। यथाकर्माण्यग्निहोत्रादीनिदेवानांदेवत्वप्राप्तौ। तत्रचश्रोत्रियत्वावृजिनत्वलक्षणेकर्मणीअधरभूमिष्वपिसमानेइतिनो
त्तरानंदप्राप्तिसाधनत्वेनअभ्युपेयेते। अकामहतत्वंतुवैराग्यतारतम्योपपन्नंउत्तरोत्तरभूमानंदप्राप्तिसाधनमित्यवगम्यते। सएषपरमानंदोवित्तकर्मश्रोत्रियप्रत्यक्षोधि
गतः। तथाचवेदव्यासः। यच्चकामसुखंलोकेयच्चदिव्यंमहत्सुखं। तृष्णाक्षयसुखस्यैतेकलांनार्हन्तिषोडशीमिति। एवंब्रह्मलोकोहेसम्राडितिहोवाचयाज्ञवल्क्यःसो
हमेवमनुशिष्टोभगवतेसहस्रंतुभ्यंसहस्रंददामिगवामतऊर्ध्वंविमोक्षायैवब्रूहीति। व्याख्यातमेतत्। अत्रहविमोक्षायेत्यस्मिन्वाक्येयाज्ञवल्क्योबिभयांचकार
भीतवान्। याज्ञवल्क्यस्यभयकारणमाहनेतिनयाज्ञवल्क्यवक्तृत्वसामर्थ्याभावात्भीतवानज्ञानाद्वाकिंतर्हिमेधावीराजासर्वेभ्यमामामन्तेभ्यःप्रश्ननिर्णयाव

सएकआजानदेवानामानंदोयश्चश्रोत्रियोऽवृजिनोऽकामहतोऽथयेशतमाजानदेवानामानंदाःसएकःप्रजापतिलोकआनंदोयश्चश्रोत्रियो
ऽवृजिनोऽकामहतोऽथयेशतंप्रजापतिलोकआनंदाःसएकोब्रह्मलोकआनंदोयश्चश्रोत्रियोऽवृजिनोऽकामहतोऽथैषएवपरमआनंदए
षब्रह्मलोकःसम्राडितिहोवाचयाज्ञवल्क्यःसोहंभगवतेसहस्रंददाम्यतऊर्ध्वंविमोक्षायैवब्रूहीत्यत्रहयाज्ञवल्क्योबिभयांचकारमेधावी
राजासर्वेभ्योमान्तेभ्यउदरौत्सीदिति ॥ ४४ ॥ सवाएषएतस्मिन्स्वप्नान्तेरत्वाचरित्वादृष्ट्वैवपुण्यंचपापंचपुनःप्रतिन्यायंप्रतियोन्याद्रवतिबुद्धान्ता

सानेभ्यःउदरौत्सीत्आवृणोत्अवरोधंकृतवानित्यर्थः। यद्यन्मयानिर्णीतंविमोक्षार्थंप्रश्नरूपंतत्तदेकदेशत्वेनैवकामप्रश्नस्यगृहीत्वापुनःपुनर्मांपर्यनुयुक्तएवंमेधा
वित्वादित्येतद्भयकारणं। सर्वंमदीयंविज्ञानंकामप्रश्नव्याजेनोपात्तसतीति ॥ ४४ ॥ अत्रविज्ञानमयःस्वयंज्योतिरात्मास्वप्नेप्रदर्शितः। स्वप्नान्तबुद्धान्तसंचारेणकार्यकर
णव्यतिरिक्तताकामकर्मप्रविवेकश्चासंगतयामहामत्स्योदृष्टान्तेनप्रदर्शितः। पुनश्चाविद्याकार्यंस्वप्नएवघ्नन्तीवेत्यादिनाप्रदर्शितमर्थादविद्यायाःसतत्त्वनिर्धारितमत
धर्मात्म्योरोपणारूपत्वमनात्मधर्मत्वंच। तथाविद्यायाश्चकार्यंप्रदर्शितंसर्वात्मभावःस्वप्नएवप्रत्यक्षतःसर्वोस्मीतिमन्यतेसोस्यपरमोलोकइतितच्चसर्वात्मभावस्वभावो
सएवमविद्याकामकर्मादिसर्वसंसारधर्मसंबंधातीतंरूपमस्यसासाक्षात्सुषुप्तेगृह्यतइत्येतद्विज्ञापितंस्वयंज्योतिरात्माएषपरमआनंदःएषविद्यायाविषयःसएषःपरमःसं
प्रसादःसुखस्यैवपराकाष्ठेत्येतदेवमेतेनग्रंथेनव्याख्यातंतन्नचैतत्सर्वंविमोक्षपदार्थस्यदृष्टान्तभूतंबंधनस्यच। तेचएतेमोक्षबंधनेसहेतुकेसप्रपंचेनिर्दिष्टेविद्याविद्या
कार्येतत्सर्वंदृष्टान्तभूतमेवेतितद्दार्ष्टान्तिकस्थानीयेमोक्षबंधनेसहेतुकेकामप्रश्नार्थभूतेत्वयावक्तव्येइतिपुनःपर्यनुयुंक्तेजनकोऽतऊर्ध्वंविमोक्षायैवब्रूहीति। तत्रम

[illegible]

अतोमोक्षबंधनेदार्ष्टान्तिकभूतेवक्तव्येयाज्ञवल्क्येमेतिमन्यमानस्तंप्रेरयतीत्यर्थः। यथासुषुप्तेविशेषज्ञानकामराहित्येनस्वात्मवस्थानंतथाविद्ययासर्वात्मत्वावस्थायांकामविशेषज्ञानवर्जनेनानंदे
स्वस्वरूपेवस्थानंमोक्षइतिअहमेवेदंसर्वोस्मीतिमन्यतेसोस्यपरमोलोकइत्यनेनसूचितं। तथायाज्ञवल्क्ययथैवपुनःपुनःकार्यकरणात्मरूपत्यागोपादानपूर्वकंस्वप्नबुद्धान्तानुसंचरणं। एवमरराज
न्याभ्यांकार्यकरणाभ्यांतत्त्यागोपादानपूर्वकंइहलोकपरलोकसंचरणंबंधनं। सएवसंसारःइतिसवाअयंपुरुषोजायमानःशरीरमभिसंपद्यमानःपाप्मभिःसंसृज्यतेसउत्क्रामन्। एतदस्यमरणंबंधनमपिसूचितं।

125

दृष्टांतमनूद्य दार्ष्टांतिकस्य बंधस्य मन्वितत्वं दर्शयति। यथा चेति। तत्र चेति। स वा एष एतस्मिन्बुद्धांते रत्वेत्युपक्रम्य स्वप्नांतायैवेति वाक्यं सप्तम्यापमामृश्यते। स्वप्नांतशब्दस्य स्वप्नविषयव्यावृत्त्यर्थं विशिनष्टि। संप्रसादेति। ।
कथं पुनः संप्रसन्नस्य संसारोपवर्णनमित्याशंक्याह। तत इति। तद्यथेत्यादि इत्यनुक्रामयमानस्यंतरस्य संदर्भस्य तात्पर्यं तदिदं प्रत्येकमनुवदति। इतश्चारभ्येति। भांडोपस्करेणेति। भांडमुपस्करेण गृहोपकरणेनेतिया
वत्। पितरं पाकार्थं स्थालभांडं। कार्यकरणानि प्राप्यशब्देनोच्यंते। शारीरस्य प्राधान्यं द्योतयति। यस्येति। उत्सर्जन्यातिचेत्तदारोगीकृतमात्मनो गमनमित्याशंक्याह। नचेति लिंगोपाधेरात्मनो गमनप्रतीतिरित्यर्थः।

बुद्धांतावसंगः संचरत्येक आत्मा स्वयंज्योतिरित्युक्तं। यथा वासौ कार्यकरणानि मृत्युरूपाणि पाप्मत्वेन जन्मनोपाददानश्च महामत्स्यवत्स्वप्नांतबुद्धांतावनुसंचरति। तथा जायमानोम्रि
यमाणश्चैतैरेवमनेकस्तैः संयुज्यते वियुज्यते चोभौ लोकावनुसंचरतीति संचरणं स्वप्नबुद्धांतानुसंचारस्य दृष्टांतेन सूचितं तदिह विस्तरेणाजन्ममरणसंचरणं वर्णयित
व्यमिति तदर्थोयमारंभः। तत्र च बुद्धांतात्स्वप्नांतमयमात्मानुप्रवेशितः। तस्मात्स्वप्नसादस्थानं मोक्षदृष्टांतभूतं। ततः प्रच्याव्य बुद्धांते संसारव्यवहारः प्रदर्शयितव्य
इति तेनास्य संबंधः। स वे बुद्धांतं स्वप्नांतक्रमेण संप्रसन्नः एतस्मिन्संप्रसादे स्थित्वा ततः पुनरीयमत्रच्युतः स्वप्ने रत्वा चरित्वेत्यादि पूर्ववद्बुद्धांतायैव द्रवति॥ ३४॥
इत आरभ्यास्य संसारो वर्ण्यते। यथायमात्मा स्वप्नांतात् बुद्धांतमागतः एवमयमस्माद्देहाद्देहांतरं प्रतिपत्स्यत इत्याह। तद्दृष्टांतं तत्तत्र यथा लोके नः शकटं सुस
माहितं सुष्ठु भृशं वा समाहितं भांडोपस्करेणोलूखलमुशलशूर्पपिठरादिनान्नाद्येन च संपन्नं संभारेणाक्रांतमित्यर्थः। तथा भाराक्रांतं सदुत्सर्जच्छब्दं कुर्वद्यथाया
यात्तद्वच्छाकटिकेनाधिष्ठितं सदेवमेव यथोक्तो दृष्टांतोयं शारीरः शरीरे भवः कोसौ आत्मा लिंगोपाधिर्यः स्वप्नांतबुद्धांतौ विव जन्ममरणाभ्यां पाप्मसंसर्गवियो
गलक्षणाभ्यामिहलोकपरलोकावनुसंचरति यस्योत्क्रमणमनु प्राणाद्युत्क्रमणं स प्राज्ञेन परेणात्मनान्वारूढोधिष्ठितः अवभास्यमानः तथा चोक्तमात्मनैवायं

तद्यथानः सुसमाहितमुत्सर्जद्यायादेवमेवायं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति यत्रैतदूर्ध्वोच्छ्वासी भवति॥ ३५॥

ज्योतिषास्ते पल्ययत इति उत्सर्जन्याति। तत्र चैतन्यात्मज्योतिषा भास्यो लिंगे प्राणप्रधानो गच्छतीति उपाधिरात्मा गच्छतीव। तथा च श्रुत्यंतरं कस्मिन्वहमित्यादि
ध्यायतीवेति च। अत एवोक्तं प्राज्ञेनात्मनान्वारूढ इति। अन्यथा प्राज्ञेनैकीभूतः शकटवदुत्सर्जन्याति। तेन लिंगोपाधिरात्मा उत्सर्जन्मर्मसु निकृत्यमानेषु दु
ःखवेदनयार्त्तः शब्दं कुर्वन्याति गच्छतीति तत्कस्मिन्काल इत्युच्यते। यत्रैतद्भवत्येतदिति क्रियाविशेषणं ऊर्ध्वोच्छ्वासी यत्रोर्ध्वोच्छ्वासित्वमस्य भवतीत्यर्थः। दृ
श्यमानस्याप्यनुवदनं वैराग्यहेतोः। ईदृशः कष्टः खल्वयं संसारो येनोत्क्रांतिकाले मर्मसु निकृत्यमानेषु स्मृतिलोपो दुःखवेदनार्त्तस्य पुरुषार्थसाधनप्रतिप
त्तौ चासामर्थ्यं परवशीकृतचित्तस्य। तस्माद्यावदियमवस्था नागमिष्यति तावदेव पुरुषार्थसाधनकर्त्तव्यतायामप्रमत्तो भवेदित्याह कारुण्या श्रुतिः। त
दस्योर्ध्वोच्छ्वासित्वं। ॥ ३६ ॥ कस्मिन्काले किंनिमित्तं वास्यादित्युच्यते। सोयं प्राकृतः शिरः पाण्यादिमान्पिंडो यत्र यस्मिन्काले यमणिमानमणोर्भावमणुत्वं
कार्श्यमित्यर्थः निगच्छति। किंनिमित्तं जरया वा स्वयमेव कालपक्वफलवज्जीर्णः कार्श्यं गच्छति। उपतपतीत्युपतपन् ज्वरादिरोगस्तेनोपतपता वा उ
पतप्यमानो हि रोगेण विषमाग्नितयान्नं भुक्तं न जरयति ततोन्नरसेनानुपचीयमानः पिंडः कार्श्यमापद्यते। तदुच्यते उपतपता वेति अणिमानं निगच्छति यदात्यंतकार्श्यं प्रतिपन्नो

वर्णक्रांतिं प्रमाणयति। तथा चेति। एतदूर्ध्वोच्छ्वासित्वमस्य यथा स्यात्तथा यस्मिन्काले भवति तस्मिन्काले गमनमित्युपपादयति। उच्यत इत्यादिना। औपाधिकमात्मनो गमनमित्यत्र लिंगांतर
माह अत एवेति। कथमेतावन्निरुपाधेरात्मनो गमनं नेष्यते तत्राह। अन्यथेति। कुतः केवलस्य गमनसत्तानिभावः। त्रिसमत्याधिकरणनतमयत्रेदृंदं उत्क्रमेण। तदिदं विस्तरेणात्यचोक्तं। कामादिनानिमित्तेन स
हितं जाग्रद्वस्थामनुभवितुं देहांतरं प्रतिगमने दृष्टांत उच्यते। हेतुना। उत्क्रांते उत्क्रांतो भविष्यामि सप्राणस्योत्क्रमणं। स वा एष एतस्मिन्बुद्धांते इत्यादिना पूर्वोक्तेनान्वयेन सह नवाक्यस्यैतस्मि

सर्वोपि व्यवहारस्तेनावभासनपूर्वक इति प्राज्ञेनान्वारूढ इति विशेषणमन
पूर्वोक्तवाक्यस्वरसं दर्शयति तथा चेत्यादिना

जरादिति

स्वप्नांत इत्यस्य उपमानस्य पंचम्य· शरीरं सप्तमी

बृ॰भा॰
१३६

वायुनाप्राणेनसहकरणजातंसंहृत्यद्रवतीतिसंबंधः।आदिशब्देनपूर्वप्रज्ञागृह्यते।प्राणव्यूहायप्राणानांविशेषाभिव्यक्तिलाभायेतियावत्।प्राणायेतिश्रुतिःकिमर्थमित्थंव्याख्यायतेतत्राह।सप्राणइति॥
नादर्थार्थंप्राणस्यभोक्तृत्वेऽतत्वसिद्ध्यर्थं।तद्यथाराजानमित्यादिवाक्यव्यावर्त्यामाशंकामाह।तन्नेति।धर्मकर्मावस्थासमत्वमित्यर्थः।स्वकर्मणोन्यत्रस्वशब्दः।तत्कर्मफलोपभोगयोग्यमित्यत्रन
स्वरूपप्रकृतभोक्तृविषयो।तत्रप्रमाणमाह।तन्नमिति।उरुवोहिवर्तमानदेहभूतःपंचकादिनानिर्मितमेवदेहांतरमभिव्याप्यजायतइतिश्रुतेरर्थः।उक्तमेवार्थंदृष्टांतेनस्पष्टयति·

मित्तस्तदोर्ध्वोच्छ्वासीभवति।यदोर्ध्वोच्छ्वासीतदाभृशाहितसंभारशकटवदुत्सर्जन्याति।जराभिभवोरोगादिपीडनंकार्श्यापत्तिश्चशरीरवतोवश्यं
भाविनएतेनर्थाइतिवैराग्यायेदमुच्यतेयदासावुत्सर्जन्यातितदाकथंशरीरंमुंचतीतिदृष्टांतउच्यतेतत्रयथाम्रंफलंउदुंबरंवाफलंपिप्पलंवा·
फलंविषमाऽनेकदृष्टांतोपादानंमरणस्यानियतनिमित्तत्वख्यापनार्थमनियतानिहिमरणस्यनिमित्तान्यसंख्यानितदपिवैराग्यार्थमे
वयस्मादयमनेकनिमित्तमरणवांस्तस्मात्सर्वदामृत्योरास्येवर्ततइतिबंधनाद्बध्यतेयेनवृंतेनसंबंधकारणोरसोयस्मिन्वाबध्यतइतिवृंतमेवोच्यतेबं
धनंतस्माद्रसाद्वृंताद्वाबंधनात्प्रमुच्यतेवाताद्यनेकनिमित्तमेवमेवायंपुरुषोलिंगात्मालिंगोपाधिरेभ्योंगेभ्यश्चक्षुरादिदेहावयवेभ्यःसं
प्रमुच्यसम्यङ्निर्लेपेनप्रमुच्यतेनसुषुप्तगमनकालइवप्राणेनरक्षन्।किंतर्हिसहवायुनोपसंहृत्यपुनःप्रतिन्यायंपुनःशब्दात्पूर्वमप्ययं

सयत्राऽयमणिमानंन्येतिजरयावोपतपतावाऽणिमानंनिगच्छतितद्यथाम्रंवोदुम्बरंवापिप्पलंवाबन्धनात्प्रमु
च्यतएवमेवायंपुरुषएभ्योंगेभ्यःसंप्रमुच्यपुनःप्रतिन्यायंप्रतियोन्याद्रवतिप्राणायैव॥ ॥३६॥ ॥

देहाद्देहांतरमसकृद्गतवान्यथास्वप्नबुद्धांतौपुनःपुनर्गच्छतितथापुनःप्रतिन्यायंप्रतिगमनंयथागतमित्यर्थः।प्रतियोनियोनिंप्रतिकर्मश्रुता
दिवशाद्द्रवतिकिमर्थंप्राणायैवप्राणव्यूहायेत्यर्थः।सप्राणएवहिगच्छतितेनःप्राणायैवेतिविशेषणमनर्थकं।प्राणव्यूहायहिगमनंदेहा
द्देहांतरंप्रतितेनह्यस्यकर्मफलोपभोगार्थसिद्धिर्नप्राणसत्तामात्रेणतस्मात्तादर्थ्यार्थंउक्तंव्यूहायेतितदास्यशरीरंपरित्यज्यगच्छतोना
न्यस्यदेहांतरस्योपादानेसामर्थ्यमस्तिदेहेंद्रियासंयोगात्।नचाऽन्यस्यभृत्यपक्षालीयाग्रहमिवत्रैशरीरांतरंकृत्वाप्रतीक्षमाणाविद्यं,
तेथैवंसतिकथमस्यशरीरांतरोपादानमिति।उच्यतेसर्वंह्यस्यजगत्स्वकर्मफलोपभोगसाधनत्वायोपात्तं।स्वकर्मफलोपभोगायचायंप्र
वृत्तोदेहाद्देहान्तरंप्रतिपत्तुंकस्मात्तत्सर्वमेवजगत्स्वकर्मणाप्रयुक्तंतत्कर्मफलोपभोगयोग्यसाधनंकृत्वाप्रतीक्षतएवकृतलोकंपुरु
षोविजायतइतिश्रुतेः।यथास्वप्नाज्जागरितंप्रतिपद्यते॥३६॥ ॥

शिवः
१३६

यथेतिस्वप्नस्थानाज्जागरितस्थानंप्रतिपत्तुमिच्छतःपूर्वमेवशरीरंकृतंनापूर्वंक्रियतेतथादेहाद्देहांतरंप्रतिपित्समानस्यपंचभूतादिनाकृतमेवदेहांतरमित्यर्थः।पूर्ववासनायथान
या।शरीरमोचने।फलंबंधनात्प्रमुच्यतइतिसंबंधः।येनकृत्वावृत्तेनसहबध्यतेतद्बंधनंरसइत्यर्थः।इतिपुनःशब्देनसूचितं।ज्ञानं।कर्म।संबंधमात्रविवक्षायांषष्ठी।उपार्जितं।प्राणस·
हितप्राणायप्राणलाभायगच्छतीतिव्याख्यायतेचेत्तर्हिप्राणायेतिविशेषणमनर्थं

126

४१

सर्वेषां ३ भूतानां देहांतरं कृत्वा २ संसारी १॥ परलोकाय प्रस्थिते। ५ प्रतीक्षणं केन प्रकारेण ४ इति प्रश्नपूर्वकं दृष्टांतवाक्यमुत्थाप्य व्याचष्टे तत्रेत्यादिना। पापकर्मणि नियुक्तत्वमेव व्यनक्ति १। तस्करा
दीति। प्रत्येनसः पापाश्रयाः कृत इति स्मृतिमाश्रित्य सूतशब्दार्थमाह। वर्णसंकरेति। इदं ब्रह्मेति। संसारिणो वक्तृतो ब्रह्माभिन्नत्वात्तस्मिन् ब्रह्मशब्दः। अभ्यासस्तूभयत्रादरार्थः। वागादयस्तमनुगच्छंती
त्याशंक्याह। येचेति। तत्क्रियाप्रगुणास्तस्य गंतुर्वागादिव्यापारेण प्रेरिताः समाहूता इति यावत्। यानि च भूतानि परलोकशब्दितं शरीरं कुर्वंति यानि वा करणानुग्राहीण्यादित्यादीनि तेष्वपि
स्वात्मकप्रवृत्तिप्रश्नं दर्शयति। परलोकेति। नाद्यः परलोकार्थं प्रस्थितस्य वागादिव्यापाराभावादाह्वानानुपपत्तेः। न द्वितीयः। भोक्तृकर्मणापि वागादिष्वचैतन्येषु स्वयं प्रवृत्तेरनुपपत्तेरिति चोदयि

तत्कथमिति लोकप्रसिद्धो दृष्टांत उच्यते। तत्तत्र यथा राजानं राज्याभिषिक्तमायांतं स्वराष्ट्रे उग्रा जातिविशेषाः क्रूरकर्माणो वा वैश्याशूद्र्योः क्षत्रजन्यौ माहिष्यो
ग्रौ सुतौ स्मृतौ। प्रत्येनसः प्रत्येनसि पापकर्मणि नियुक्ताः प्रत्येनसस्तस्करादिदंडनादौ प्रयुक्ताः। सूताश्च ग्रामण्यश्च सूतग्रामण्यः। सूता वर्णसंकरजातिवि
शेषा ग्रामण्यो ग्रामनेतारस्ते पूर्वमेव राज्ञ आगमनं बुद्ध्वान्नैर्भोज्यभक्ष्यादिप्रकारैः पानैर्मदिरादिभिरावसथैश्च प्रासादादिभिः प्रतिकल्पंते निष्पन्नैरेव
प्रतीक्षंतेऽयं राजा आयात्ययमागच्छतीत्येवं वदंतः। यथायं दृष्टांत एवं हैवंविदं कर्मफलस्य वेदितारं संसारिणमित्यर्थः। कर्मफलं हि प्रकृतं तत्त
देवंशब्देन परामृश्यते। सर्वाणि भूतानि शरीरकर्तॄणि करणानुग्राहीणि चादित्यादीनि तत्कर्मप्रयुक्तानि कृतैरेव कर्मफलोपभोगसाधनैः प्रती
क्षंत इदं ब्रह्म भोक्तृ कर्तृ चास्माकमायाति तथेदमागच्छतीत्येवमेव च कृत्वा प्रतीक्षंत इत्यर्थः॥ ४८॥ तमेवं जिगमिषुं के सह गच्छंति ये च गच्छंति तेन

तद्यथा राजानमायांतमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पंतेऽयमायात्ययमागच्छतीत्येवꣳ हैवंविदꣳ सर्वाणि भूतानि
प्रतिकल्पंत इदं ब्रह्मायातीदमागच्छतीति॥ ४८॥ तद्यथा राजानं प्रयियासंतमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायंत्येवमेवेममात्मानमंत
काले सर्वे प्राणा अभिसमायंति यत्रैतदूर्ध्वोच्छ्वासी भवति॥ ॥ ४९ ॥ ॥ तृतीयं ब्राह्मणं॥ ॥ स यत्रायमात्माऽबल्यं न्येत्य संमोहमिव

क्रियाप्रणुन्ना आहोस्वित्तत्कर्मवशात्स्वयमेव गच्छंति परलोकशरीरकर्तॄणि च भूतानीत्यत्रोच्यते दृष्टांते। तद्यथा राजानं प्रयियासंतं प्रकर्षेण यातु
मिच्छंतमुग्राः प्रत्येनसः सूतग्रामण्यस्तं यथाभिसमायंत्याभिमुख्येन समायंत्येकीभावेन तमभिमुखा आयंत्यनाज्ञप्ता एव राज्ञा केवलं तज्जिगमिषा
भिज्ञा एवमेवेममात्मानं भोक्तारं मरणकाले मरणकाले सर्वे प्राणा वागादयोऽभिसमायंति यत्रैतदूर्ध्वोच्छ्वासी भवतीति व्याख्यातं॥ ४९ ॥ षष्ठाऽ
ध्यायस्य तृतीयं ब्राह्मणं॥ ॥ स यत्रायमात्मा संसारोपवर्णनं प्रकृतं। तत्रायं पुरुष एभ्योंऽगेभ्यः संप्रमुच्येत्युक्तं। तत्संप्रमोक्षणं कस्मिन्काले क
थं चेति सविस्तरं वर्णयितव्यमित्यारभ्यते। सोऽयमात्मा आत्मा प्रकृतो यत्र यस्मिन्काले अबल्यमबलभावं निगत्य गत्वा। यद्देहस्य दौर्बल्यं तदात्मन एदौर्बल्य
मित्युपचर्यंते अबल्यं न्येत्येति। न ह्यसौ स्वतोऽमूर्तत्वादबलभावं गच्छति तथा संमोहमिव संमूढतां संमोहो विवेकाभावः संमोहतामिव नियाति

नुरभिमानं। उत्तरवाक्येनोत्तरमाह। अत्रेत्यादिना। मरणकालमेव विशिनष्टि। यत्रेति। अचेतनानामपि रथादीनां चेतनप्रेरितानां प्रवृत्तिदर्शनात्। वागादीनामपि भोक्तृकर्मवशात्तदाकूतत्वम्
नरेणापि प्रवृत्तिसंभवतीति भावः। तत्प्रतीक्षणं कथमिति तत्प्रश्नः। माशंक्य लोकेनोच्यते। एवंविदमित्यस्य कथं कर्मफलस्य वेदिता इत्यर्थः। क्रियते तत्राह कर्मफलमिति। भोक्तृकर्मवशात्। इति वदं
तः। अत्र प्रतिवचनं दृष्टांतपूर्वमुच्यते। गच्छंति। एतदूर्ध्वोच्छ्वासित्वं भवति। यानि परलोकशरीरकर्तॄणि भूतानि यानि च करणानुग्राहीणि आदित्यादीनि तानि भोक्तारमाहूतानि संति गच्छंति आ
होस्वित्तत्कर्मवशात्स्वयमेव गच्छंतीति योजना। कथंभूतां तज्जिगमिषामभिजानंतीति तज्जिगमिषाभिज्ञाः। ब्राह्मणांतरमुत्थापयति। स यत्रेति। तस्य संबंधं वक्तुं कीर्तयति। संसारेति॥ ॥

कथमात्मनः समारोपितोपि संमोहः स्यान्नित्यचैतन्यज्योतिष्ट्वादित्याशंक्याह। उत्क्रांतीति। अथेत्यादिवाक्यमवतार्य व्याकुर्वन्कस्मिन्काले तत्संप्रमोक्षणमित्यस्योत्तरमाह। अथेत्यादिना। कथं चेतु
तः प्रश्नमनूद्य प्रश्नांतरं वक्तीति। कथंपुनरिति। संहरमाणः सन्हृदयमन्ववक्रामतीत्यन्वयः। आदानमात्रमपि स्वप्ने नास्तीति कुतस्तद्ग्राह्यस्यार्थविशेषणमित्याशंक्याह। अस्तीति। कथं
मात्मनो निष्क्रियस्य तेजोमात्रादानकर्तृत्वमित्याशंक्याह। उक्तादीनि। तेषां तद्विक्षेपस्य चोपसंहारे सति आत्मनस्तदादानकर्तृत्वमौपचारिकमित्यर्थः। मुमूर्षोरिव सोप्यतः सर्वा
णि करणानि लिंगात्मनोपसंह्रियंते प्रबुद्धस्यावस्थायां विशेषेण विनानियमेन यथास्थानं प्रादुर्भवंतीत्याह। तथेति। पराङावर्तत इति रूपं चेत्तरत्र चाक्षुषस्यापि विवक्षितं। स यत्रैतस्मिन्नादिवा

निगच्छति न चास्य स्वतः संमोहोऽसंमोहो वास्ति नित्यचैतन्यज्योतिःस्वभावत्वात्तेनैव शब्दः संमोहमिव न्येतीति उत्क्रांतिकाले हि करणोपसंहारनि
मित्तो व्याकुलीभावश्चात्मन इव लक्ष्यते लौकिकैस्तथा च वक्तारो भवंति मूढः संमूढोयमिति। अथवोभयत्रेवशब्दप्रयोगो योज्योऽबल्यमिव न्येत्य सं
मोहमिव न्येतीति उभयस्य परोपाधिनिमित्तत्वाविशेषात्। समानकर्तृकनिर्देशाच्च। अथास्मिन्काल एते प्राणा वागादय एतमात्मानमभिस
मायंति तदास्य शारीरस्यात्मनोऽगैः संप्रमोक्षणं। कथं पुनः संप्रमोक्षणं केन वा प्रकारेणात्मानमभिसमायंतीत्युच्यते। स आत्मा एतास्ते
जोमात्रास्तेजसो मात्रास्तेजोमात्रास्तेजोऽवयवा रूपादिप्रकाशकत्वाच्चक्षुरादीनि करणानीत्यर्थः। ता एताः समभ्याददानः सम्यग्निर्लेपतयाभ्याद
दानश्चात्माभिमुख्येनाददानः संहरमाणः स्वप्नापेक्षया विशेषणं समिति। ननु स्वप्ने निर्लेपेन सम्यगादानं। अस्तित्वादानमात्रं गृहीतावा

न्तेतथैनमेते प्राणा अभिसमायंति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराङ्पर्याव
र्ततेऽथाऽरूपज्ञो भवति। ॥ ५० ॥

करणाहीतं चक्षुरस्य लोकस्य सर्वावतो मात्रामपादाय स्वप्नायेत्यादिवाक्येभ्यः। हृदयमेव पुण्डरीकाकाशमन्ववक्रामत्यन्वागच्छति हृदयेऽभि
व्यक्तविज्ञानो भवतीत्यर्थः। बुद्ध्यादिविक्षेपोपसंहारे सति नहि स्वतश्चलनं विक्षेपोपसंहारादिविक्रिया वा ध्यायतीव लेलायतीवेत्युक्तत्वात्
बुद्ध्याद्युपाधिद्वारैव हि सर्वविक्रिया अध्यारोप्यते तस्मिन्। कदा पुनस्तस्य तेजोमात्राभ्यादानमित्युच्यते। स यत्रैष चाक्षुषश्चक्षुषि भवश्चाक्षुषः आ
दित्यांशो भोक्तुः कर्मणा प्रयुक्तो यावद्देहधारणं तावच्चक्षुषोऽनुग्रहं कुर्वन्वर्तते मरणकाले त्वस्य चक्षुरनुग्रहं परित्यजति। स्वमादित्या
त्मानं प्रतिपद्यते। तदेतदुक्तं यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणाश्चक्षुरादित्यमित्यादि। पुनर्देहग्रहणकाले संश्रयिष्यंति। तथा स्वप्स्य
तः प्रबुध्यतश्चैतदाह। चाक्षुषः पुरुषो यत्र यस्मिन्काले पराङ्पर्यावर्तते परिसमंतात्पराङ् आवर्तत इति। अथात्रास्मिन्कालेऽरूपज्ञो भ
वति। मुमूर्षुरूपं न जानाति तदायमात्मा चक्षुरादितेजोमात्राः समभ्याददानो भवति॥ ॥ ५० ॥ ॥रामरामरामरामरामराम॥

समाकांक्षापूर्वकमवतार्य व्याकरोति। कदा पुनरित्यादिना। जीवात्मा। हृदये अभिव्यक्तज्ञानो भवति। व्याकुलीभावो लिंगस्येति शेषः। नि आङ् पूर्वस्य एतेः ल्यपि रूपं। कथं पुनः संप्रमोक्षण
मिति प्रश्नस्य चक्षुराद्यनुग्राहकतामादित्याद्यंशानामादित्याद्यंशप्राप्त्या संप्रमोक्षणं भवतीति प्रतिवचनं। यथा स्वप्नकालेऽसमायंति प्रतिवचनमुत्तरग्रंथपर्यालोचनया भाति। तथा मरणकाले
पि इंद्रियाणि समायंतीति देहस्य। आदित्याद्यंशराहित्येन वा णावस्थायां चक्षुराद्यनुग्राहकदेवतानामधिदेवतासु नोपसंहारश्च मतरं संवादयति। तदेतदिति। तर्हि देहांतरे वागादिराहित्यं स्यादित्याशंक्या
ह। पुनरिति। आदिशब्देन क्रियाविशेषसर्वोग्रह्यते। सूर्यं प्राप्नोतीति। वागधिष्ठात्री देवता स्वमंशेपि
ग्नि

शिवः
१२२

127

नीहि भाक्त्रोपसंहृतं चक्षुरन्यं ताभावीभूतमित्याशंक्याह। तिरस्कृतये च तत्कृतं। ननु यदनुग्राहकदेवतांशस्येन च तत्त्वानुग्रहनिवृत्त्या न तद्दृशि देवताप्राप्तौ लिंगात्मकं करणमेकीभवतीत्यभिप्रेत्याह। तथेति। मरणे दशायां रूपा
दिदर्शनराहित्यमर्थं च यत्साधकमित्याह। तदेति। केनायं प्रद्योतो भवतीत्यपेक्षायामाह। स्वप्नेति यथा स्वप्नकाले स्वेन भासा स्वेन ज्योतिषा स्वपितीति व्याख्यातं तथात्रापि तेजोमात्राणां दानेन तत्कृतेन वा स्वेन रूपेण प्र
पञ्चफलविषयबुद्धिवृत्तिरूपेण स्वेन भासा स्वेनात्मचैतन्यज्योतिषा हृदयाग्रप्रद्योतनमित्यर्थः। किमिति लिंगोपाधिरात्मनो निर्गमनं प्रतिज्ञायते तत्राह। तथेति। तत्र चेति। समष्टिलिंगमुच्यते। एकादशवि
धं करणमित्यभ्युपगमात् कुतो द्वादशविधत्वमित्याशंक्याह विशिनष्टि बुद्ध्यादीति। एवं सर्वभूतानां तदात्मेति श्रुतिरपि यथोक्तं लिंगं साधयतीत्याह। सोन्तरात्मेति। वायुर्वै गौतम तत्सूत्रमपि श्रुतिरपि यथोक्ते लिं
गे प्रमाणमाह। तज्जीवनमिति। यथोक्तं लिंगशरीरमस्तीत्यत्र वायुर्वै गौतमेति श्रुतिः प्रमाणमित्यर्थः। प्रकाशयन्तीति। तेन हृदयाग्रेणेति तेन प्रद्योतेनेत्यस्य विवरणं हृदयाग्रप्रकाशेनेति प्रकाशवता हृदयाग्रेण नाडी
मुखेनेत्यर्थः। स्थावरस्य·

स्वप्नकाल इवैकीभवति करणजातं स्वेन लिंगात्मना। तदैनं पार्श्वस्था आहुर्न पश्यतीति। तथा घ्राणदेवतानिवृत्तौ घ्राणमेकीभवति लिंगात्मना तदा न जिघ्रतीत्याहुः समानमन्यत्। जिह्वायां सो
मो वरुणो देवता तन्निवृत्त्यपेक्षया न रसयत इत्याहुः तथा न वदति न शृणोति न मनुते न स्पृशति न विजानातीत्याहुः। तदोपलक्ष्यते देवतानिवृत्तिः करणानां च हृदय एकीभावः। तत्र हृद
य उपसंहृतेषु करणेषु योन्तर्व्यापारः स कथ्यते। तस्य हैतस्य हृदयस्य हृदयच्छिद्रस्येत्येतत्। अग्रं नाडीमुखं निर्गमनद्वारं प्रद्योतते स्वप्नकाल इव स्वेन भासा तेजोमात्रादानकृतेन स्व
नैव ज्योतिषात्मनैव। तेनात्मज्योतिषा प्रद्योतेन हृदयाग्रेण एष आत्मा विज्ञानमयो लिंगोपाधिर्निर्गच्छति निःक्रामति। तथाथर्वणे। कस्मिन्न्वहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मि
न्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति। तत्र चात्मचैतन्यज्योतिः सर्वदाभिव्यक्ततरं। तदुपाधिद्वारा ह्यात्मनि जन्ममरणगमनागमनादिः सर्वो विक्रियालक्षणः संव्यवहा
रस्तदात्मकं हि द्वादशविधकरणं बुद्ध्यादि तत्सूत्रं तज्जीवनं सोन्तरात्मा जगतस्तस्थुषश्च। तेन प्रद्योतेन हृदयाग्रप्रकाशेन निःक्रममाणः। केन मार्गेण निःक्रामतीत्युच्यते। चक्षु
ष्टो वा आदित्यलोकप्राप्तिनिमित्तं ज्ञानं कर्म वा यदि स्यात्। मूर्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं चेत्। अन्येभ्यो वा शरीरदेशेभ्यः शरीरावयवेभ्यः यथाकर्म यथाश्रुतं। तं विज्ञानमात्मान
मुत्क्रामन्तं परलोकाय प्रस्थितं परलोकायोद्भूताकूतमित्यर्थः। प्राणः सर्वाधिकारिस्थानीयो राज्ञ इवानूत्क्रामति प्राणमनूत्क्रामंतं वागादयः सर्वे प्राणा अनूत्क्रामति। यथाप्र·

एकीभवति न पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयत इत्याहुरेकीभवति न भवतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत
इत्याहुरेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुस्तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निःक्रामति चक्षुष्टो वा मूर्ध्नो वान्ये
भ्यो वा शरीरदेशेभ्यस्तमुत्क्रामंतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं ७ सर्वे प्राणा अनूत्क्रामंति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति ।

धानान्वाचिख्यासेयं न तु क्रमेणोत्क्रमणमिह विवक्षितं। तदैष आत्मा सविज्ञानो भवति स्वप्न इव विशेषविज्ञानवान्भवति कर्मवशात् न स्वतंत्रः। स्वातंत्र्येण सविज्ञानत्वे सर्वः
कृतकृत्यः स्यात्। नैव तु तल्लभ्यते। अत एवाह व्यासः। सदा तद्भावभावित इति। कर्मणा तूद्भाव्यमानेनांतःकरणवृत्तिविशेषाश्रितवासनात्मकविशेषविज्ञानेन सर्वो लोक
एतस्मिन्काले सविज्ञानो भवति। सविज्ञानमेव च गंतव्यमन्ववक्रामति अन्वागच्छति। विशेषविज्ञानोद्भासितमेवेत्यर्थः। तस्मात्तत्काले स्वातंत्र्यार्थं योगधर्मानुसेवन
परिसंख्यानाभ्यासौ विशिष्टपुण्योपचयश्च श्रद्दधानैः परलोकार्थिभिरप्रमत्तैः कर्त्तव्य इति सर्वशास्त्राणां यत्नतो विधेयोर्थः। दुश्चरितात्त्वोपरमणं। नहि तत्काले शक्यते
किंचित्संपादयितुं। कर्मणा नीयमानस्य स्वातंत्र्याभावात्। पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेत्युक्तं। एतस्य ह्यनर्थस्योपशमोपायविधानाय सर्वशास्त्रोप
निषदः प्रवृत्ताः। नहि तद्विहितोपायानुसेवनमुत्क्रान्त्यंतिकोस्यानर्थस्योपशमोपायोस्ति तस्मादत्रैवोपायने विहितोपाये यत्नपरैर्भवितव्यमित्येव प्रकरणार्थः। श
कटवत्संभृतसंभार उत्सर्जन्यातीत्युक्तं। किं पुनस्तस्य परलोकाय प्रवृत्तस्य पथ्यदनं शाकटिकसंभारस्थानीयं गत्वा वा परलोके यद्भुंक्ते शरीराद्यारंभकं चेत्युच्यते ॥

[illegible]

चक्षुष्टो वेति विकल्पेन निमित्तं सूचयति। आदित्येति। मूर्ध्नो वेति विकल्पे हेतुमाह। ब्रह्मलोकेति। यथाप्रधानेतीति। प्रधानेन मनेति क्रमस्य हीयमन्वाख्यानेच्छा। तथा च जीवादेः प्राधान्याभिप्रायेणानुशब्दप्रयो
गोनुक्रमाभिप्रायेण। एककालाभेदाभावादित्यर्थः। सार्थसम्बन्धं हि कृत्वा क्रमेणागमनं दृश्यते। नन्वयाप्राणादिष्वव्यतिरेकः कर्मवशात्संसारिकविज्ञानवत्त्वं न तु कर्मवशत्वाभावेन स्वतंत्रसंबु
लज्ञानयुतो भवतीत्यर्थः। तस्मादिति। प्रकृतस्य कर्मानुसारित्वं निष्ठार्थः। योगश्चित्तवृत्तिनिरोधः। तस्य धर्मायमनियमादयस्तत्र यत्तदनुसेवनं पुनः पुनरावर्त्तनं। परिसंख्यानाभ्यासो योगानुष्ठानं कर्त्तव्य

ध्मनियुक्ताः

शाकटिकस्य प्रकृतस्य मोदकादिस्थानीयम् १

स्वेनेत्यस्य व्याख्यानं आ
त्मनैवेति स्वप्नस्य
[illegible]
[illegible]
आदानकृतेन प्राप्य
फलविषयबुद्धि
वृत्तिरूपेण स्वेन भासा
हृदयाग्रद्योतनमित्य
र्थः ४

यं यं वापि स्मरन्
भावं त्यजत्यंते
कलेवरं। तं तमेव
ति कौंतेय सदा तद्
भावभावितः २

विहिता विद्याध्यानात्मिका प्रतिषिद्धा नग्नस्त्रीदर्शनादिरूपा अविहिता घटादिविषया प्रतिषिद्धा पथि पतिततृणादिविषया विहितं कर्म यागादि प्रतिषिद्धं ब्राह्मणहननादि अविहितं गमनादि। अप्रतिषिद्धत्वेन चास्याविशे-पादि। तृणजलायुकावाक्यस्य तात्पर्यं तु जन्मनूथ्यवादिविवादानुदर्शयन्नाद्यौ दिगंबरमतमाह। एवमित्यादिना अथवेति देवतात्वेन शरीरेणाविशिष्टं जीवं परलोकं नयतीति तदुक्तिवाहिकं शरीरान्तरं तेनेति यावत्। सांख्यादिमतमाह। किंचेति। सिद्धान्तं सूचयति। आहोस्विदिति वैशेषिकादिपक्षमाह। किंवेति। न्यूनत्वनिवृत्त्यर्थमाह। किंवा कल्पनान्तरमिति। तत्र सिद्धान्तस्य प्रामाणिकत्वेनोपादेयत्वं वदन् कल्पनान्तराणाम-प्रमाणिकत्वेन त्याज्यत्वमभिप्रेत्याह। उच्यत इति। कथं तर्हि करणानां परिच्छिन्नत्वधीरित्याशंक्याह। नेष्यमिति। आधिदैविकेन रूपेण अपरिच्छिन्नानामपि करणानामाध्यात्मिकादिरूपेण परिच्छिन्नतेति स्थि·

तत्किमित्युच्यते। तं परलोकाय गच्छन्तमात्मानं विद्याकर्मणी विद्या च कर्म च विद्याकर्मणी विद्या सर्वप्रकारा विहिता प्रतिषिद्धा च अविहिता अप्रतिषिद्धा च तथा कर्म विहितं प्रतिषिद्धं च अविहितमप्रतिषिद्धं च समन्वारभेते सम्यगन्वारभेते अनुगच्छते पूर्वप्रज्ञा च पूर्वानुभवविषया प्रज्ञाऽतीतकर्मफलानुभववासनेत्यर्थः। सा च वासनाऽपूर्वकर्मारंभे कर्मविपाके चांगं भवति। तेनासावन्वारभते। न हि तया वासनया विना कर्म कर्तुं फलं चोपभोक्तुं शक्यते। न ह्यनभ्यस्ते विषये कौशलमिंद्रियाणां भवति। पूर्वानुभववासनाप्रवृत्तानां त्विंद्रियाणामिहाभ्यासमंतरेण कौशलमुपपद्यते। दृश्यते च केषांचित्कासुचित्क्रियासु चित्रकर्मादिलक्षणासु विनैवेहाभ्यासेन जन्मत एव कौशलं। कासुचिदत्यंतसौकर्ययुक्तास्वप्यकौशलं केषांचित्तथा विषयोपभोगेषु स्वभावत एव केषांचित्कौशलाकौशले दृश्येते। तच्चैतत्सर्वं पूर्वप्रज्ञोद्भवानुद्भवनिमित्तं। तेन पूर्वप्रज्ञया विना कर्मणि वा फलोपभोगे वा न कस्यचित्प्रवृत्तिरुपपद्यते। तस्मादेतत्त्रयं शाकटिकसंभारस्थानीयं परलोकपथ्यदनं विद्याकर्मपूर्वप्रज्ञाख्यं। यस्माद्विद्याकर्मणी पूर्वप्रज्ञा च देहान्तरप्रतिपत्त्युपभोगसाधनं तस्माद्विद्याकर्मादि शुभमेव समाचरेत्। यथेष्टदे-

तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च॥ ५१॥ तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं नि-हत्याविद्यां गमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति॥ ५२॥

हसंयोगोपभोगौ स्यातामिति प्रकरणार्थः॥ ५१॥ किमेवं विद्यादिसंभारसंभृतो देहान्तरं प्रतिपद्यमानो मुक्त्वा पूर्वं देहं पक्षीव वृक्षान्तरं देहान्तरं प्रतिपद्यते। अथवातिवाहिकेन शरीरान्तरेण कर्मफलजन्मदेशं नीयते। किं वात्रस्थस्यैव सर्वगतानां करणानां वृत्तिलाभो भवत्याहोस्विच्छरीरस्थस्य संकुचितानि करणानि मृतस्य भिन्नघटप्रदीपप्रकाशवत्सर्वतो व्याप्य पुनर्देहान्तरारंभे संकोचमुपगच्छन्ति। किं वा मनोमात्रं वैशेषिकसमय इव देहान्तरारंभदेशं प्रतिगच्छति। किं वा कल्पनान्तरमेव परान्तसमय इत्युच्यते। तत्र एते सर्व एव समाः सर्वेऽनन्ता इति श्रुतेः सर्वात्मकानि तावत्करणानि सर्वात्मकप्राणसंश्रयाच्च। तेषामाध्यात्मिकाधिभौतिकपरिच्छेदः प्राणिकर्मज्ञानभावनानिमित्तः। अतस्तद्वशात्स्वभावतः सर्वगतानामपि प्राणानां कर्मज्ञानवासनानुरूप्येणैव देहान्तरवशात्प्राणानां वृत्तिः संकुचति विकसति च। तथा चोक्तं समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणेति। तथा चेदं वचनमनुकूलं स यो हैताननंतानुपास्त इत्यादि तं यथा यथोपासत इति च। तत्र वासना पूर्वप्रज्ञाख्या विद्याकर्मतन्त्रा जलौकावत्सन्ततैव स्वप्नकाल इव कर्मकृतं देहाद्देहान्त·

नेफलितमाह। अत इति। तद्वशादुपार्जितज्ञानादिवशात्। करणानां विचारे सिद्धान्तं। वादिविवादस्फुटत्वनिवृत्त्यर्थं देवतयाकर्ष्या। शरीरस्यैव स॰ नालिंगस्य देहान्तरप्राप्तौ वृत्तिलाभो भवति सर्वगतानि मृतस्य। सर्वगते करणे परिच्छिन्नस्य गमनमिति सिद्धान्ते दर्शितं। इदानीं तृणजलायुकादृष्टान्ता देहान्तरं गृहीत्वा पूर्वदेहं मुंचत्यात्मेति स्थूलदेहविशिष्टस्यैव परलोकगमनमिति पौराणिकप्रक्रियाप्रत्याख्यातुं दृष्टान्तवाक्यतात्पर्यमाह। तद्वेत्यादिना देहनिर्गतात्मागमस्यासत्त्वमर्थः। तदेव यथोक्ता वासनादृश्यस्याविद्याकर्मणी तत्र भावि देहं स्पृशति। जीवोपि तत्राभिमानं करोति। पुनश्च पूर्वदेहं त्यजति। यथा स्वप्ने देवोऽहमित्यभिपद्यमानो देहान्तरस्थ एव भवति तद्वच्छान्तावपि। तस्मान्न पूर्वदेहविशिष्टस्यैव परलोकगमनमित्यर्थः। आत्मोपसंहारः पूर्वस्मिन्देहे अभिमानत्यागः।

प्रसारितया वासनया शरीरान्तरं गृहीत्वेति संबंधः
कर्मज्ञानवासनानुरूप्येणेत्यत्र भोक्तुरिति शेषः·

वासनया देहान्तरं

तथा चोभयदेहाभिमानीति भावः। देवतावादिमतमाह। पथिप-
तिततृणादेः अत्र प्रज्ञानिष्ठाप्रेन प्रतिषिद्धं तेनापूर्वकर्मारंभहे-
तुत्वेनापि वासनायाः अन्वारभेते अनुगच्छति। रज्जुनिर्माणादिहे-
त्यावत्। वासनामंतरेण न ह्युपपद्यते तेन पूर्वानुभवः पर्यवसितं·

वासनाख्यावोनुमीयते इति भावः। आध्यात्मिकरणस्थितजलादौ परिच्छेदः
आधिभौतिकपरिच्छेदः। तथा मनोमात्रं देहान्तरारंभदेशं प्रतीति किं
वाङ्मनः प्राणः प्राणानां वृत्तिः संकुचते। प्राणानां वृत्तिर्विकसते वा देहान्तरप्राप्तौ संकुचते। प्राण-
प्राप्तौ विकसते इत्यर्थः

128

उपसंहारस्वरूपमाह। नवेति। समन्यर्थं विवृणोति। आरभमाण इति। आरब्धे देहांतरे सूक्ष्मदेहस्याभिव्यक्तिमाह। तत्रचेति। ननु लिंगदेहबलाद्देवार्थक्रियासिद्धौ कृतस्थूलशरीरेणेत्याशंक्य तद्व्यतिरेकेण तस्या
र्थक्रियाकारित्वं नास्तीति मत्वाह। वाह्यं चेति। आरब्धे देहद्वये करणेषु देवतानामनुग्राहकत्वेनावस्थानं दर्शयति। तत्रेति। स्थूलदेहसामर्थ्यं। देहविकल्पनियामकमाह। यथाकर्मेति। शरीरारंभे मायात्म
कभूतपंचकमुपादानमिति वदतां भूतावयवानामपि सहैव गमनमित्युक्तं। कर्मग्रहणाद्विद्यापूर्वकप्रज्ञयोरुपलक्षणं। तत्र आरभ्यमाणे देहे एव आत्मभावमभिमानमारभते। करोतीति यथा स्वप्ने आ
रभ्यमाणे देहांतरे चात्मभावमारभते। अपि च यथा स्वप्नांतरारंभे आरंभदेशे आरभ्यमाणे तत्शरीरे तत्र आत्मभावमारभते दृष्टांतः। पित्र्यं वा गांधर्वं वा इति विकल्पे। अनभिव्यक्ताशयवत्तराश्रशान्तिः

स्वप्नकाल इव कर्मकृतदेहाद्देहांतरमारभते हृदयस्थ एव पुनर्देहांतरारंभे पूर्वाश्रयं विमुंचतीत्येतस्मिन्नर्थे दृष्टांत उपादीयते। तत्र चे देहांतरसंचार इदं दर्शनं। यथा ये
न प्रकारेण। तृणजलायुका तृणजलायुका तृणस्यांतमवसानं गत्वा प्राप्य अन्यं तृणांतरमाक्रममाक्रम्यत इत्याक्रमस्तमाक्रममाक्रम्याश्रित्यात्मानमात्मन
पूर्वावयवमुपसंहरत्यंत्यावयवस्थाने। एवमेवायमात्मा यः प्रकृतः संसारी इदं शरीरं पूर्वोपात्तं निहत्य स्वप्नं प्रतिपित्सुरिव पातयित्वा अविद्यां गमयित्वा
अचेतनं कृत्वा स्वात्मोपसंहारेणान्यमाक्रममन्यं तृणांतरमिव तृणजलूका शरीरांतरं गृहीत्वा प्रसारितया वासनयात्मानमुपसंहरति॥ ५२॥ तत्रात्मभाव
मारभते तत्र। यथा स्वप्ने देहांतरमारभते स्वप्नांतरारंभ इव शरीरारंभदेशे आरभ्यमाने देहे जंगमे स्थावरे वा तत्र च कर्मवशात्करणानि लब्धवृत्तीनि
संहन्यंते। बाह्यं च कुसमृत्तिस्थानीयं शरीरमारभ्यते। तत्र च करणव्यूहमपेक्ष्य वागाद्यनुग्राहकाः अग्न्यादिदेवताः संश्रयंते एष देहांतरारंभविधिः। तत्र·

तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नवतरं कल्याणतर७ रूपं तनुत एवमेवायमात्मेद७ शरीरं निहत्याविद्यां गमयि
त्वान्यन्नवतरं कल्याणतर७ रूपं कुरुते पित्र्यं वा गांधर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वान्येषां वा भूतानाम्॥ ॥ ५२॥ ॥

देहांतरारंभे नित्योपात्तमेवोपादानमुपमृद्योपमृद्य देहांतरमारभते। आहोस्विदपूर्वमेव पुनः पुनरादत्त इति। अत्रोच्यते दृष्टांतस्तत्रैतस्मिन्नर्थे। य
था पेशस्कारी पेशः सुवर्णं तत्करोतीति पेशस्कारी सुवर्णकारः। पेशसः सुवर्णस्य मात्रामपादायापच्छिद्य गृहीत्वान्यत्पूर्वस्माद्रचनाविशेषान्न
वतरमभिनवतरं कल्याणात्कल्याणतरं रूपं तनुते निर्मिणोति एवमेवायमात्मेत्यादि पूर्ववत्। नित्योपात्तान्येव पृथिव्यादीन्याकाशांतानि॥ पा
नि देवा वै ब्रह्मणो रूपे इति चतुर्थे व्याख्यातानि पेशःस्थानीयानि तान्येवोपमृद्योपमृद्यान्यदन्यच्च देहांतरं कल्याणतररूपं संस्थानविशेषं देहांतरं
मित्यर्थः। कुरुते पित्र्यं वा पितृभ्यो हितं पितृलोकोपभोगयोग्यमित्यर्थः। गांधर्वं गंधर्वाणामुपभोगयोग्यं तथा देवानां दैवं प्रजापतेः प्राजापत्यं ब्रह्म
ह्मण इदं ब्राह्मं वा। यथाकर्म यथाश्रुतमन्येषां वा भूतानां संबंधि शरीरांतरं कुरुत इत्यभिसंबध्यते॥ ५३॥ येषु बंधनसंज्ञिता उपाधिभूता यैः संयुक्त
क्तस्तन्मयोयमिति विभाव्यते ते पदार्थाः पुंजीकृत्येहैकत्र प्रतिनिर्दिश्यंते। स वै अयं य एवं संसरत्यात्मा ब्रह्मैव पर एव योऽशनायाद्यतीतो विज्ञानमयो विज्ञानं

एवमेवाय० सारी अन्यमाक्रममंतरं प्रसारितया वासनया गृहीत्वा पूर्वोपात्त इदं शरीरं स्वात्मोपसंहारेण निहतं कृत्वा आत्मानमुपसंहरति॰ २। स्थूलव्यतिरेकेण इतरस्य लिंगशरीरस्य १ वासनावि
शिष्ट आत्मा। इदं शरीरं निहत्य अविद्यां गमयित्वा इत्यस्य व्याख्यानं पूर्ववदिति २ इदानीं स वा अयमात्मेत्यादेस्तात्पर्यमाह। यस्येति। १ उपाधिद्वारा संसरति १। वैराज २। यथा वासनायाः
देहांतरप्राप्तिः तथात्मनोपि ज्ञेया। १ वाह्यं० वासनया कर्म्म आरभ्यते। स्थूलदेहमंतरेण लिंगशरीरस्य अर्थक्रियाकारित्वाभावादित्यर्थः। नवीनं उपादानं॥ ॥

मनः सन्निकर्षात्तेन दृश्यत इत्यासंबंधादिति यावत्। न चाकाशस्य परमाण्वभावादाकाशस्य शरीरारंभकत्वं श्रुतिविरुद्धारंभप्रक्रियानभ्युपगमादित्यभिप्रेत्याह। तथेति। पंचकर्मेंद्रियव्यापारः प्राणाधीनः। क्रियाशक्तेः प्राणाश्रयत्वात्। पंचज्ञानेन्द्रियव्यापारः बुद्ध्यधीनः। विज्ञानशक्तेर्बुद्ध्याश्रयत्वात्। इति बुद्धिप्राणमयः सन्। कथं पुनः धर्मादिमयत्वं कामादिमयत्वं चोपयुज्यते तत्राह। नहीति। तदेतदित्यादेरर्थमाह। किं बहुनेति। विषयः शब्दादिः। ततो ऽन्यदपि प्रत्यक्षतः गृह्यमाणम् आदिशब्दार्थः। इदंमयो ऽदोमय इत्येतद्गमकमित्याह। तस्मादिति। विशेषवक्तव्येष्वनेक-योर्ति विना किमिति सामान्योक्तिरित्याशंक्याह। अनंता हीति। इदानीमित्यस्मादुपरिष्टादपि तेनेति संबध्यते। इतिशब्दः सर्वमयत्वोपसंहारार्थः। विज्ञानमयादिवाक्यार्थं संक्षिपति॥

ममीपे

नोपलक्ष्यमाणात्तन्मयः कतम आत्मेति योऽयं विज्ञानमयः प्राणेष्विति ह्युक्तं। विज्ञानमयो विज्ञानप्रायः। यस्मात्तद्धर्मत्वमस्य विभाव्यते। ध्यायतीव लेलायतीवेति तथा मनोमयो मनःसन्निकर्षान्मनोमयः। तथा प्राणमयः प्राणः पंचवृत्तिस्तन्मयो येन चेतनश्चलतीव लक्ष्यते। तथा चक्षुर्मयः रूपदर्शनकाले एवं श्रोत्रमयः शब्दश्रवणकाले एवं तस्य तस्येंद्रियस्य व्यापारोद्भवे तन्मयो भवति। एवं बुद्धिप्राणद्वारेण चक्षुरादिकरणमयः सन् शरीरारंभकपृथिव्यादिभूतमयो भवति। तत्र पार्थिवशरीरारंभे पृथिवीमयो भवति। तथा वरुणादिलोकेष्वाप्यशरीरारंभे आपोमयो भवति। तथा वायव्यशरीरारंभे वायुमयो भवति। तथाकाशशरीरारंभे आकाशमयो भवति। एवमेतानि तैजसानि देवशरीराणि तेष्वारभ्यमाणेषु तन्मयस्तेजोमयो भवत्यतो व्यतिरिक्तानि पश्वादिशरीराणि नरकप्रेतादिशरीराणि चातेजोमयानि तान्यपेक्ष्याह। अतेजोमय इत्येवं कार्यकरणसंघातमयः सन्नात्मा प्राप्तव्यं वस्त्वन्तरं पश्यन्निदं मया प्राप्तव्यमित्येवं विपरीतप्रत्ययः तदभिलाषः काममयो भवति। तस्मिन्कामे दोषं पश्यतस्तद्विषयाभिलाषप्रशमे चित्तं प्रसन्नमकलुषं शांतं भवति तन्मयो ऽकाममयः एवं तस्मिन्वि-

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयो ऽते-
जोमयः काममयो ऽकाममयः क्रोधमयो ऽक्रोधमयो धर्ममयः सर्वमयस्तद्यदेतदिदंमयो ऽदोमय इति यथाकारी यथाचारी तथा
भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन ।

हते कामे केनचित्स कामः क्रोधत्वेन परिणमते तेन तन्मयो भवति क्रोधमयः। क्रोधः केनचिदुपायेन निवर्त्तितो यदा भवति तदा प्रसन्नमनाकुलं चित्तं सदक्रोध उच्यते तेन तन्मयः। एवं कामक्रोधाभ्यामकामक्रोधाभ्यां च तन्मयो भूत्वा धर्ममयो ऽधर्ममयश्च भवति। नहि कामक्रोधादिभिर्विना धर्मादिप्रवृत्तिरुपपद्यते। यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितमिति स्मरणात्। धर्ममयो ऽधर्ममयश्च भूत्वा सर्वमयो भवति। समस्तं धर्माधर्मयोः कार्यं यावत्किंचिद्व्याकृतं तत्सर्वं धर्माधर्मयोः फलं तत्प्रतिपद्यमानस्तन्मयो भवति। किं बहुना तदेतत्सिद्धमस्य यदयमिदंमयो गृह्यमाणविषयादिमयः। तस्मादयमदोमय अदः इति परोक्षकार्यं गृह्यमाणेन निर्दिश्यते। अनंता ह्यन्तःकरणे भावनाविशेषाः। नैव ते विशेषतो निर्देष्टुं शक्यंते। तस्मिंस्तस्मिन्क्षणे कार्यतो ऽवगम्यते। इदमस्य हृदि वर्त्तते। अदो ऽस्येति। तेन गृह्यमाणकार्येणेदमदस्तया निर्दिश्यते। परोक्षांतःस्थो व्यवहाराय मिदानीमदोमय इति। संक्षेपतस्तु यथा कर्तुं यथाचरितुं शीलमस्य सोयं यथाकारी यथाचारी स तथा भवति। करणं नाम नियता क्रिया विधिप्रतिषेधादिगम्या·॥

संक्षेपतस्त्विति। आदिशब्देन शिष्टाचारसंग्रहः। अशोभनविज्ञानमयत्वादिवाक्यसिद्धं। शोभनविज्ञानमयत्वादेरशोभनविज्ञानमयत्वादेश्च को हेतुरित्यपेक्षायां संक्षेपतो हेतुमाह। संक्षेपतस्त्विति। करणचरणयोरैक्येन पौनरुक्त्यमाशंक्याह। करणं नामेति। परोक्षांतःस्थो व्यवहारायेदानीमपि कार्याभिव्यक्तिसमये ऽपि तेन अदोमय इति निर्दिश्यते। यथा शास्त्रं करोति

यथाकारी॰ अनेन स तथा भवति·। ।

शिव॰
११९
४२९

पूर्वपक्षमुपसंहरति। तत्रेत्यादिना। कर्मणः संसारकारणमुपसंहरति। एवं त्वयुक्तो हीति। कथं यथोक्तकर्मविषयत्वं विधिनिषेधयोरित्याशंक्याह। अत्रेति। इति शब्दः पूर्वपक्षसमाप्त्यर्थः। अग्रिम
ग्रंथेन काममय एवायं पुरुषः काम एव संसारस्य मूलमित्यर्थं निर्धारयिष्यमाणत्वात्। विज्ञानमय इत्यादिकस्य पापः पापेनेत्यवसानकस्य ग्रंथस्य पूर्वपक्षत्वोक्तेः। यावगच्छतिसः प्रमा
णादिना सीयेन मनसाऽवगम्यते तन्मनो लिंगमिति पक्षांतरमाह। अथवेति। वंध्याप्रसवत्वं निष्फलत्वं। इहेति जीवद्दशोक्तिः। सिद्धांतमवतारयति। अथेति। संसारकारणस्याप्र

चरणं नामाऽभिधानादिति विशेषः। साधुकारी साधुर्भवतीति यथाकारीत्यस्य विशेषणं पापकारी पापो भवतीति च यथाचारीत्यस्य ताच्छील्यप्रत्ययोपादानादयं तता
त्पर्यं तैव तन्मयत्वं ननु तत्कर्ममात्रेणेत्याशंक्याह। पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति पुण्यपापकर्ममात्रेणैव तन्मयता स्यान्न तु ताच्छील्यमपेक्ष्यते
ताच्छील्यं तु तन्मयत्वातिशय इत्ययं विशेषः। तत्र कामक्रोधादिपूर्वकपुण्यापुण्यकारिता सर्वमयत्वे हेतुः संसारस्य कारणं देहाद्देहांतरसंचारस्य च। एवं त
त्वयुक्तो ह्यन्यदन्यद्देहांतरमुपादत्ते तस्मात्पुण्यापुण्ये संसारस्य कारणं। एतद्विषयौ हि विधिप्रतिषेधौ। अत्र शास्त्रसाफल्यमिति। अथोऽअयमेवं बंधमोक्षकु
शलाः खल्वाहुः सत्यं कामादिपूर्वकैः पुण्यापुण्यैः शरीरग्रहणकारणं। तथापि कामप्रयुक्तो हि पुरुषः पुण्यापुण्ये कर्मणी कामाभूत्वे फलारंभके न भवतस्त
स्मात्काम एव संसारस्य मूलं तथा चोक्तमाथर्वणे। कामान्यः कामयते मन्यमानः स कर्मभिर्जायते तत्र तत्रेति। तस्मात्काममय एवायं पुरुषो यदन्यम
यत्वं तदकारणं विद्यमानमपीत्यतोऽवधारयति काममय एवेति। यस्मात्स च काममयः सन्यादृशेन कामेन यथाकामो भवति तत्क्रतुर्भवति। स काम ईषद

अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते॥
५४॥ तदेष श्लोको भवति तदेव सक्तः सह कर्मणेति लिंगं मनो यत्र नि·

भिलाषमात्रेणाभिव्यक्तो यस्मिन्विषये भवति सो विहन्यमानः स्फुटीभवन्क्रतुत्वमापद्यते। क्रतुर्नामाध्यवसायो निश्चयो यदनंतरा क्रिया प्रवर्तते। यत्क्र
तुर्भवति यादृक्कामकार्येण क्रतुना यथारूपः क्रतुरस्य सोयं क्रतुर्भवति तत्कर्म कुरुते यद्विषयः क्रतुस्तत्फलनिर्वृत्तये यद्योग्यं तत्कर्म कुरुते निर्वर्तयति
यत्कर्म कुरुते तदभिसंपद्यते। तदीयं फलमभिसंपद्यते। तस्मात्सर्वमयत्वेऽस्य संसारित्वे च काममयत्वमेव हेतुरिति॥ ५४॥ तत्तस्मिन्नर्थ एष श्लोको
मंत्रोपि भवति। तदेवेति तदेव गच्छति सक्तः आसक्तः ततो भूताभिलाषः सन्नित्यर्थः। कथमेति सह कर्मणा यत्कर्मफलासक्तः सन्नकरोत्तेन कर्म
णा सहैव तदेति तत्फलमेति। किं तत् लिंगं मनो मनः प्रधानत्वाल्लिंगस्य मनो लिंगमित्युच्यते। अथवा लिंग्यते गम्यतेऽवगच्छति येन तल्लिंगं तन्म
नो यत्र यस्मिन्निषक्तं येन सक्तमुद्भूताभिलाषमस्य संसारिणः। तदभिलाषो हि तत्कर्म कृतवान् तस्मात्तन्मनोऽभिषंगवशादेवास्य तेन कर्मणा तत्फल
प्राप्तिस्तेनैतत्सिद्धं भवति कामो मूलं संसारस्येति। अतः उच्छिन्नकामस्य विद्यमानान्यपि कर्माणि ब्रह्मविदो वंध्यप्रसवानीव भवंति पर्याप्तकामस्य कृता
त्मनश्चेहैव सर्वे प्रविलीयंते कामा इति श्रुतेः। किंच प्राप्यांतं कर्मणः प्राप्य भुक्त्वा

नस्य कामः सहकारीति स्वसिद्धांतं समर्थयते। सत्यमित्यादिना। कामभावेपि कर्मणः सत्वं दृष्टमित्याशंक्याह। कामप्रहाणेनेति। यो हि पशुपुत्रस्वर्गादीन्पुरुषार्थान्मन्यमानः काम
यतेत तद्भोगभूमौ तत्र कामसंयुक्तो भवतीत्याथर्वणश्रुतेरर्थः। धर्मादिमयत्वस्यापि सत्वादवधारणानुपपत्तिमाशंक्याह। यदिति। कामप्रधानः संसृतिश्चेत्कर्मफलभोगानंतरं का
माभावान्मुक्तिः स्यादित्याशंक्याह। किंचेति

५उपचितेति। कामप्र
हाणे तु कर्मविद्यमान
मपि पुण्यापुण्योपच
यकरणं भवति। उप
चितेअपि पुण्यापुण्य
कर्मणी ५

…ताच्छील्यप्र
अतिशयेन पुण्य
मयः … पुण्यो भवति २
पुण्यापुण्ययोः विधिप्रतिषेधयोः ४

इत्येवं पारंपर्येणासंसारणात् इतश्चानान्न मुक्तिरिति शेषः। संसारप्रकरणमुपसंहरति। इति न्विति। अवस्थात्रयस्य दार्ष्टान्तिकं बंधं प्रबंधेन दर्शयित्वा सुषुप्तस्य दार्ष्टान्तिकं मोक्षं वक्तुमथेत्यादि वा
क्यं। तत्राथशब्दार्थमाह। यस्मादिति। कामयितव्याभावं ब्रह्मविदः श्रुत्यवष्टंभेन स्पष्टयति। यस्येति। कथं कामयितव्याभावः। आत्मनः कामयितव्यत्वादित्याशंक्याह। नहीति। सर्वा
त्मत्वमनात्मकामयितृत्वं चेत्याशंक्याह। अनात्मा चेति। कर्मजडानां मतमुत्थाप्य श्रुतिविरोधेन प्रत्याचष्टे। ये त्विति। ब्रह्मविदि प्रत्यवायप्रसंगमंगीकृत्योक्तं। इदानीं तत्प्राप्येति

तमवशानं यावत्कर्मणः फलपरिसमाप्तिं कृत्वेत्यर्थः। कस्य कर्मणोऽन्तं प्राप्येत्युच्यते। तस्य यत्किंचित्कर्म इहास्मिल्लोके करोति निर्वर्त्तयत्ययं तस्य कर्मणः फलं भुक्त्वा
तं प्राप्य तस्माल्लोकात्पुनरैत्यागच्छत्यस्मै लोकाय। अयं हि लोकः कर्मप्रधानस्तेनेह कर्मण इति पुनः कर्मकरणाय पुनः कर्म कृत्वा फलासंगवशात्पुनरमुं लोकं याती
त्येवमिति नु कामयमानः संसरति। यस्मात्कामयमान एवं संसारीति। अथ तस्मादकामयमानो भवति। यः अकामो भवत्यसावकामयमानः। कथमकामतेत्यु
च्यते। योऽनिःकामो यस्मान्निर्गताः कामाः सोऽयं निःकामः। कथं कामा निर्गच्छन्तीत्य आप्तकामो भवत्याप्ताः कामा येन स आप्तकामः। कथमाप्यन्ते कामा आत्म
कामत्वेन। यस्यात्मैव नान्यः कामयितव्यवस्त्वंतरभूतः पदार्थः। आत्मैवानंतरोऽवाह्यः कृत्स्नः प्रज्ञानघन एकरसो नोर्ध्वं न तिर्यङ् नाध आत्मनोऽन्यत्कामयित
व्यं वस्त्वंतरं। यस्य सर्वमात्मैवाभूत्तत्केन कं पश्येच्छृणुयान्मन्वीत विजानीयाद्वा एवं विजानन्कं कामयेत। ज्ञायमानो ह्यन्यत्वेन पदार्थः कामयितव्यो

षक्तमस्य प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययं तस्माल्लोकात्पुनरैत्यस्मै लोकाय कर्मण इति नु का
मयमानोऽथाऽकामयमानो योऽकामो निःकाम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति ५५

भवति न चासावन्योऽब्रह्मविदः आप्तकामस्याप्तिः। य एवाप्तकामस्तया आप्तकामः सन्निःकामोऽकामोऽकामयमानश्चेति मुच्यते। नहि यस्यात्मैव सर्वं भवति तस्
यानात्मा कामयितव्योऽस्ति। अनात्मा चान्यः कामयितव्यः सर्वं चात्मैवाभूदिति विप्रतिषिद्धं। सर्वात्मदर्शिनः कामयितव्याभावात्कर्मानुपपत्तिः। ये तु प्रत्यवाय
परिहारार्थं कर्म कल्पयंति ब्रह्मविदोऽपि तेषां नात्मैव सर्वं भवति प्रत्यवायस्य जिहासितव्यस्यात्मनोऽन्यस्याभिप्रेतत्वात्। येन चाशनायाद्यतीतो नित्यं प्रत्यवा
यासंबद्धो विदित आत्मा तं वयं ब्रह्मविद्ब्रूमो नित्यमेवाशनायाद्यतीतमात्मानं पश्यति परार्थं कर्मेति न विरोधः। अतः कामाभावादकामयमानो न जायते ५
मुच्यत एव। तस्यैवमकामयमानस्य कर्माभावे गमनकारणाभावात्प्राणा वागादयो नोत्क्रामन्ति देहात्। स च विद्वानाप्तकाम आत्मकामतया इहैव ब्रह्म
भूतः सर्वात्मनो हि ब्रह्मणो दृष्टान्तत्वेन प्रदर्शितमेतद्रूपं तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपमिति। तस्य हि दार्ष्टान्तिकभूतोऽयमर्थः उपसंह्रियते
यथाकामयमान इत्यादिना। स कथमेवंभूतो मुच्यत इत्युच्यते। यो हि सुषुप्तावस्थमिव निर्विशेषमद्वैतमलुप्तचिद्रूपज्योतिःस्वभावमात्मानं पश्यति स
इहैव ब्रह्म यद्यपि देहवानिव लक्ष्यते। स ब्रह्मैव सन्ब्रह्माप्येति यस्मान्न हि तस्याब्रह्मत्वपरिच्छेदहेतवः कामाः

५ यस्माच्च जिहासितव्य
मन्यदुपादेयं वा योऽनप
श्यति तस्य कर्म न शक्यं
तस्य वस्त्वेव हु। यस्तत्त्व ब्र
ह्मवित्तस्य भवत्येव प्रत्य
वायपरि ५

यत्तस्मिन्नास्तीत्याह। येन चेति। संबंधुं संस्प्रष्टुमित्यर्थः। न प्राणा उत्क्रामन्तीति। हेतुना। परलोकं। फलाभिनिवेशात्फलाभिलाषवशात्। यस्येति। तस्य युक्तमाप्तकामत्वमिति शेषः। प्रकरणाद्दार्ष्टान्तार्थमुक्तमर्थं प्रपंचयति।
आत्मनि। समुच्यते। विरोधो विधिकांडस्येति शेषः। आत्मकामः। त्यक्तुमिष्टस्य। अत इति। विद्यावस्थायां कामाभावात्कर्माभावाच्चेति सिद्धं। अकामयमानोऽकर्ता चेति शेषः। कथं वर्तमाने देहे तिष्ठन्नेव ब्रह्मभूतो भव
तीत्याह। सर्वात्मनो हीति। दृष्टान्तास्सावन्या दार्ष्टान्तिकेऽपि सदा ब्रह्मत्वं भवतीति भावः। सदा ब्रह्मभूतस्य मुक्तिर्नाम नास्तीति शंकित्वा परिहरति स कथमिति।

संतितस्मादिहैव ब्रह्मैव सन्ब्रह्माप्येति न शरीरपातोत्तरकालं । नहि विदुषो मृतस्य भावांतरापत्तिर्जायते न्योभावो देहांतरप्रतिसंधाना
ऽभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते । भावान्तरापत्तौ हि मोक्षस्य सर्वोपनिषद्विवक्षितोर्थः आत्मैकत्वाख्यः स बाधितो भवेत् । क
र्महेतुश्च मोक्षः प्राप्नोति न ज्ञाननिमित्तः स चानिष्टः अनित्यत्वं च मोक्षस्य प्राप्नोति । नहि क्रियानिर्वृत्तोर्थो नित्यो दृष्टः
नित्यश्च मोक्षोऽभ्युपगम्यते । एष नित्यो महिमेति मंत्रवर्णात् । न च स्वाभाविकात्स्वभावादन्यन्नित्यत्वं कल्पयितुं शक्यं । स्वा
भाविकश्चेदग्न्युष्णवदात्मस्वभावः स न शक्यते पुरुषव्यापारानुभावीति वक्तुं । नह्यग्नेरौष्ण्यं प्रकाशो वाग्निव्यापारान्
तरानुभावी अग्निव्यापारानुभावी स्वाभाविकश्चेति विप्रतिषिद्धं । ज्वलनव्यापारानुभावित्वमुष्णप्रकाशयोरिति चेत् । न अन्योपल
ब्धिव्यवधानापगमाभिव्यक्त्यपेक्षत्वात् । ज्वलनादिपूर्वकमग्निरुष्णप्रकाशगुणाभ्यामभिव्यज्यते तन्नाग्न्यपेक्षया किंतर्ह्यन्य
दृष्टेरग्नेरौष्ण्यप्रकाशौ धर्मौ व्यवहितौ कस्यचिद्दृष्ट्या त्वसंबध्यमानौ ज्वलनापेक्षया व्यवधानापगमे दृष्ट्याभिव्यज्येते । तदपेक्षया या
भ्रांतिरुपजायते ज्वलनपूर्वकावेतावुष्णप्रकाशौ धर्मौ जाताविति । यद्युष्णप्रकाशयोरपि स्वाभाविकत्वं न स्याद्यः स्वाभाविकोग्नेर्ध
र्मस्तमुदाहरिष्यामः । न च स्वाभाविको धर्म एव नास्ति पदार्थानामिति शक्यं वक्तुं । न च निगडभंग इवाऽभावभूतो मोक्षो बंधननिवृत्तिरूप
पद्यते । परमात्मव्यतिरेकेणान्यस्याभावं विस्तरेणावादिष्म । तस्मादविद्यानिवृत्तिमात्रे मोक्षव्यवहार इति चावोचाम । यथा रज्ज्वादौ सर्पादिज्ञान
निवृत्तौ सर्पादिनिवृत्तिः । येप्याचक्षते मोक्षे विज्ञानांतरमानंदांतरं वाभिव्यज्यत इति । तैर्वक्तव्योभिव्यक्तिशब्दार्थः । यदि तावल्लौकिक्येवोप
लब्धिविषयप्राप्तिरभिव्यक्तिशब्दार्थः । ततो वक्तव्यं किं विद्यमानमभिव्यज्यते अथाविद्यमानमिति । विद्यमानं चेद्यस्य मुक्तस्य तत्
दभिव्यज्यते । तस्मात्मभूतमेव तदित्युपलब्धिव्यवधानानुपपत्तेः नित्याभिव्यक्तत्वान्मुक्तस्याभिव्यज्यत इति विशेष
वचनमनर्थकं । अथ कदाचिदेवाभिव्यज्यते । उपलब्धिव्यवधानादनात्मभूतं तदित्यन्यतोभिव्यक्तिप्रसंगः । तथा चा ।

अन्यतोभिव्यक्तौ किं स्यादिति चेत्तत्राह। तथा चेति। तत्साधनानि चेन्मुक्तौ सुः संसारदविशेषः स्यादिति भावः।६ उपलब्धिमवधानमानन्दस्यांगीकृत्योक्तं। इदानीं कृतदेवनास्तीत्याह। उपलब्धिसमानाश्रये इति।१। कदाचिद
भिव्यक्तिरनभिव्यक्तिश्च कदाचिदित्येवं कालभेदेनोभयं किं न स्यादित्याशंक्याह। नचेति। आनंदज्ञानयोर्विषयविषयित्वमभ्युपेमकादाचित्कीतावदभिव्यक्तिभिरस्तासं प्रतितदपि न संभवतीत्याह। नचेति।२मु
क्तौ आनंदज्ञानाभिव्यक्तिपक्षे दोषांतरं वक्तुं भूमिकां करोति। विज्ञानसुखयोश्चेति।३ आत्मनः सदैकरूपत्वं धामुक्तमाक्षिपति। अविद्यावत इति।७। अविद्यस्यापीति समाधत्ते नेति। यथा रज्जवादौ विद्यो त्यसर्प
देशादिमयाध्वंसाध्वंसयोरज्ज्वादेर्न वास्तवो विशेषस्तथात्मनोपि स्वाविद्यामात्रोत्थविद्योत्पत्त्वे पितद्ध्वंसाध्वंसयोर्न वास्तवो विशेषोस्तीत्यर्थः। प्रकारांतरेणास विशेषत्वं शंकते। तिमिरेति। किमिदविद्याकर्तृ
त्वं तज्ज्ञानकर्तृत्वं किंवा तदाश्रयत्वमिति विकल्प्याद्यं दूषयति न ध्यायतीवेति।८ रज्ज्वज्ञानेन भ्रान्त्रिसतो। आश्रयाहं कर्तृत्वं ३ विशेष २ ज्ञानस्य आनंदस्य च समानाश्रयत्वे सति १। अग्र्यस्य प्रकाशवत्त्वस्य वधानाभावः१
विषयेंद्रियसंपर्केण १ विज्ञा० अभिव्यक्तेः प्रागिति योजना २ पूर्वपक्ष ५ अन्यः स्यात् आगंतुकज्ञानानंदवत्त्वात् ३ आत्मनो विशेषणं ७ प्रयत्नस्य अर्थवत्त्वं प्रकटयति। प्रागिति। अविद्यानिवृत्त्यर्थः ७ विशेषस्य।८

भिव्यक्तिसाधनोपेक्षता उपलब्धिसमानाश्रयत्वे तु अवधानकल्पनानुपपत्तिः। सर्वदाभिव्यक्तिरनभिव्यक्तिर्वानन्त्वंतरालकल्पनायां प्रमाणमस्ति। न
च समानाश्रयाणामेकस्यात्मभूतानां धर्माणामितरेतरविषयविषयित्वं संभवति। विज्ञानसुखयोश्च प्रागभिव्यक्तेः संसारित्वमभिव्यक्त्युत्तरका
लं च मुक्तत्वं यस्य सोन्यः परस्मान्नित्याभिव्यक्तज्ञानस्वरूपादत्यंतवैलक्षण्यात्स्यात्पिमिवोष्ण्यात्। परमात्मभेदकल्पनायां च वैदिकः कृतांतः
परित्यक्तः स्यात्। मोक्षस्येदानीमिव निर्विशेषत्वेन तदर्थाधिकयत्नानुपपत्तिः शास्त्रवैयर्थ्यं च प्राप्नोतीति चेत्। नाऽविद्याभ्रमापोहार्थत्वात्। नहि व
स्तुतो मुक्तामुक्तत्वविशेषोऽस्त्यात्मनो नित्यैकरूपत्वात्। किंतु तद्विषया अविद्यापोह्यते शास्त्रोपदेशजनितविज्ञानेन। प्राक्तदुपदेशप्राप्तेस्तदर्थश्च प्रय
त्न उपपद्यत एव। अविद्यावतोऽविद्यानिवृत्त्यनिवृत्तिकृतो विशेष आत्मनः स्यादिति चेत्। नाऽविद्याकल्पनाविषयत्वाभ्युपगमाद्रज्जूषरशुक्ति
कागगनानां सर्पोदकरजततमलिनत्वादिवददोष इत्यवोचाम। तिमिरातिमिरदृष्टिवदविद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेषः स्यादि
ति चेत्। न ध्यायतीव लेलायतीवेति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात्। अनेकव्यापारसन्निपातजनितत्वाद्धि अविद्याभ्रमस्याविद्याविष
यत्वोपपत्तेश्च। यस्य चाविद्याभ्रमो घटादिवद्विविक्तो गृह्यते ज्ञानाविद्याभ्रमवान्। अहं न जाने मुग्धोस्मीति प्रत्ययदर्शनादविद्याभ्रमवत्त्व
मेवेति चेत्। न तस्यापि विवेकग्रहणात्। नहि यो यस्य विवेकेन ग्रहीता स तस्मिन् भ्रांत इत्युच्यते। तस्य च विवेकग्रहणं तस्मिन्नेव च भ्रम इति विप्र
तिषिद्धं। न जाने मुग्धोस्मीति दृश्यत इति ब्रवीषि तद्दर्शिनश्चाज्ञानं मुग्धरूपता दृश्यतः। इति च दर्शनस्य विषयं संभवति कर्मतामापद्यत इति
तत्कथं कर्मभूतं सत्कर्तृस्वरूपं दृशिविशेषणमज्ञानमुग्धते स्यातां। अथ दृशिविशेषणत्वं तयोः कथं कर्म स्यातां। दृशिना आप्येते। कर्म हि
कर्तृक्रियाव्याप्यमन्यद्व्यापकं न तेनैव तदाप्यते वद कथमेवं सत्यज्ञानमुग्धते दृशिविशेषणे स्यातां। न चाज्ञानं विवेकदर्शी अज्ञानमात्मनः कर्मभूतं

तेसति अहं संसारी विद्यात्मकोभ्रमो जायते तस्मात्तत्स्यात्मकार्यनेत्यर्थः ७ आत्मनः स्वतो विद्याकर्तृत्वाभावे हेत्वंतरमाह। अनेकेति। अंतःकरणे चिदाभासोदयश्चात्मनो व्यापारस्तथा च विषयविषय्याकारांतःक
रणस्यानेकव्यापारसंनिपाते सति। कल्पांतरं प्रत्याह। अविद्याविषयत्वेति। अविद्यादेरात्मदृश्यत्वात्तदाश्रयत्वं नहि तत्तत्स्य तज्ज्ञातत्व अशनः स्वग्रहापत्तेरित्यर्थः। तदेव स्फुटयति। यस्य चेति ५ अनुभव
मनुसृत्य शंकते। अहं नेत्यादिना ६ साक्षिसाक्ष्यभावेन भेदाभ्युपगमान्नात्मनोऽविद्याश्रयत्वमित्युत्तरमाह। न तस्यापीति। तदेव स्पष्टयति। नहीति। अज्ञातं मुग्धत्वं चात्मनो न विशेषणमिति विधांतरेण दर्श
यितुं चोद्यवाक्यं अनुवदति। न जाने इति। ५ न घावष्टे। तद्दर्शिनश्चेति। अज्ञानादिस्वरूपार्थः। दृश्यमानतामेव विवृणोति। कर्मतामिति। इति ब्रवीषीति संबंधः। किंच अज्ञानमुपलब्धृधर्मो न भवति उपलभ्य
मानत्वात् देहगतकार्श्यादिवदित्याह। न चाज्ञानमिति। अज्ञानं मुग्धता चेति द्वयं दृश्यत इति या दर्शनक्रिया तस्याः विषयं आप्यमानवस्तु भवति। अतः कर्मतामापद्यते। कर्तृस्वरूपं इत्यस्य च विवरणं दृशिविशेषणं १

अविद्यायाश्रयतान्यर्थः [illegible] अविद्याग्रहणं कृत्यति यथा [illegible]

तथाप्यज्ञानमपि सकर्मभूतग्रहीष्यतीति चेत्तत्राह। अज्ञानोत्थस्येत्यादेरात्मधर्मत्वं निराकरोषत्नीति विरोधः स्यादिति शंकते। दुःखेति। लेशाधात्वमंगीकृत्य परिहरति। तथापीति। आत्मनिस्थत्वे सुखादीनां चेत्तत्प्रवदार्त्मग्राह्यत्वायोगात्तत्राह। ज्ञानानीते। सांनिध्यमात्रेणेति भावः। २। प्रकारान्तरेणानिराकर्तुं निराकृतमेव चोद्यमनुद्रवति। नजानेरिति। किंप्रमातुरज्ञानाद्याश्रयत्वमनुभवादुभिद्धासि। नत्साक्षिणो वा। तत्राद्यं प्रतिलसीकृत्याह। भवत्विति। कल्पनांतरं निराकरोति। यस्त्विति। नहि श्यायनुस्तासीसतत्वाज्ञो मूढो वा तथा च सर्वसाक्षिनो ज्ञानादिमात्रं भवतीत्यर्थः। ३। आत्मनो मोहादिराहित्ये भगवद्वाक्यमवतारयति येति। आत्मनः सर्वविशेषशून्यत्वे वाक्यांतरमुदाहरति। समेमिति। आदिशब्देन ज्योतिषामपि तज्ज्योतिरित्यादिगृह्यते। ४। आत्मनो निर्विशेषत्वे प्रामाणिके स्वमतमुपसंहरति। तस्मान्नेति। ५। पक्षांतरमनुभावते। येत्विति। अतोनिर्विशेषस्वाभाव्यादिति यावत्। अज्ञानाद्बंधो ज्ञानान्मुक्तिरिति शास्त्रमर्थवादः। आदिशब्देन रूढरोदनाद्यर्थवादं दृष्टांतं सूचयंति। सोपहासं दूषयति तेउक्तहंतेति। नहि विशेष

[illegible]

मुपलभमानः उलक्ष्णधर्मत्वेन गृह्णाति शरीरकार्श्यादिरूपवत्। यथा सुखदुःखेच्छाप्रयत्नादीन्सर्वो लोको गृह्णातीति चेत्। तथापि ग्रहीतुर्लोकस्य विविक्तैवाभ्युपगता स्यात्। नजानेऽहं त्वदुक्तं मुग्ध एवास्मीति चेत्। भवत्वज्ञो मुग्धो यस्त्वेवं द्रष्टीतं न वयं मुग्धं प्रतिजानीमहे वयं। तथा व्यासेनोक्तं इच्छादि कृत्स्नं क्षेत्रं क्षेत्री प्रकाशयतीति समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरं। विनश्यत्स्वविनश्यंतमित्यादि शतशः उक्तं तस्मान्नात्मनः स्वतो बद्धमुक्तज्ञानाज्ञानकृता विशेषोऽस्ति सर्वदा समैकरसस्वाभाव्याभ्युपगमात्। ये त्वतोऽन्यथाऽऽत्मवस्तु परिकल्प्य बंधमोक्षशास्त्रं चार्थवादमापादयंति। ते उत्सहंते खेपि शाकुनं पदं द्रष्टुं खं वा मुष्टिना कर्त्तुं चर्मवत्। वयं तु तत्कर्त्तुमशक्ताः सर्वदा समैकरसमद्वैतमविक्रियमजमजरममरममृतमभयमात्मतत्त्वं ब्रह्मैवास्मि इत्येष सर्ववेदांतनिश्चितोऽर्थ इत्येवं प्रतिपद्यामहे। तस्माद्ब्रह्माप्येतीत्युपचारमात्रमेतद्विपरीतग्रहवद्देहसंततेर्विच्छेदमात्रं विज्ञानज्ञानमपेक्ष्यते॥ ५५॥

स्वप्नप्रबुद्धांतगमनदृष्टांतस्य दार्ष्टांतिकः संसारो वर्णितः संसारहेतुश्च विद्याकर्मपूर्वप्रज्ञा वर्णिताः येश्चोपाधिभूतैः कार्यकरणलक्षणैर्भूतैः परिवेष्टितः संसारित्वमनुभवति तानि चोक्तानि तेषां साक्षात्प्रयोजकोऽधर्माधर्माविति पूर्वपक्षं कृत्वा काम एवेत्यवधारितं यथा च ब्राह्मणेनार्थोऽवधारित एवं मंत्रेणापीति बंधं बंधकारणं चोक्त्वोपसंहृतं प्रकरणमिति तु कामयमान इति। अथाकामयमान आरभ्य सुषुप्तदृष्टांतस्य दार्ष्टांतिकभूतः सर्वात्मभावो मोक्ष उक्तो मोक्षकारणं चात्मकामतया यदाप्तकामत्वमुक्तं। नत्तु सामर्थ्यात्तत्रात्मज्ञानमंतरेणात्मकामतया आप्तकामत्वमिति सामर्थ्याद्ब्रह्मविद्यैव मोक्षकारणमित्युक्तमतो यद्यपि कामो मूलमित्युक्तं तथापि मोक्षकारणविपर्ययेणाबंधकारणमविद्येत्येतदप्युक्तमेव भवति अत्रापि मोक्षो मोक्षसाधनं च ब्राह्मणेनोक्तं। तस्यैव दृढीकरणाय मंत्र उदाह्रियते। श्लोकशब्दवाच्यः तस्मिन्नेवार्थे एष श्लोको मंत्रो भवति। यदा यस्मिन्काले सर्वे समस्ताः कामास्तृष्णाप्रभेदाः प्रमुच्यंते। आत्मकामस्य ब्रह्मविदः समूलतो विशीर्यंते प्रसिद्धा लोके इहामुत्रार्थाः पुत्रवित्तलोकैषणालक्षणा अस्य प्रसिद्धस्य पुरुषस्य हृदि बुद्धौ श्रिता आश्रिताः अथ तदा मर्त्यो मरणधर्मा सन्कामवियोगात्समूलतोऽमृतो भवत्यर्थादनात्मविषयाः कामा अविद्यालक्षणा मृत्युरित्येतदुक्तं भवति। अतो मृत्युवियोगे विद्वान्जीवन्नेवामृतो भवत्यत्रास्मिन्नेव शरीरे वर्त्तमानो ब्रह्म समश्नुते ब्रह्मभावं मोक्षं प्रतिपद्यत इत्यर्थः। अतो मोक्षो न देशांतरग ॥

[illegible]

वस्तुमात्मनः शक्यं प्रतिपत्तुं। निर्विशेषात्मप्रत्यायकागमविरोधादिति भावः। कथं तर्हि देहमध्ये जीवात्मतत्त्वमभ्युपगम्यते तत्राह। वयं त्विति। उपचारे निमित्तमाह। विपरीतेति। आत्मा तत्त्वतः संसारी इति विपरीतग्रहवति यादेहसंततिः तस्या विच्छेदमात्रं। ५ फलमपेक्ष्योपचार इत्यर्थः। ६ ब्राह्मणोक्तोऽर्थो मंत्रमवतारयितुं ब्राह्मणार्थमनुवदति। स्वप्नेत्यादिना। भवत्विति। अज्ञो मुग्धो भवतु यस्त्वेवंदर्शी। घटादिवत्स्वाविषयभ्रमं विविक्तं पश्यति। तं शं० वयं स्वविशेषं सर्वदा हेतुं संसारप्रकरणं तमन्तस्थापनायोपन्यस्यति। अत्रेति मोक्षप्रकरणोक्तिः। इतितु कामयमान इत्यनेनग्रंथेन। फलं। ६ हेतुभौतौ। भवतीति साक्षिणः अज्ञानाश्रयत्वं

[illegible]

तद्यथेतिवाक्यनिरस्यामाशंकामाह। प्रकृत इत्यादिना ३। कथंपुनरिति। विदुषो विषयात्मभावेन प्राणादिष्वप्रविलीनेषु सत्स्वपि देहे चेदसौ वर्त्तते ततोऽस्य पूर्ववद्देहित्वाच्चाक्षिप्ता वेद्यर्था इत्यर्थः। दृष्टांतेन परिहरति। अत्रेत्यादिना। तत्र देहे वर्त्तमानस्यापि विदुषस्तत्राभिमानराहित्ये २। ब्रह्मशब्दस्य कमलासनादिविषयत्वं वारयति। एतेजःशब्दस्य कार्यज्योतिर्विषयत्वमाशंक्याह। विज्ञानेति। प्रज्ञा प्रकृष्टज्ञानं स्वरूपचैतन्यं नेत्रं प्रकाशकमस्येति प्रज्ञानेत्रः। सोऽहमित्यादेस्तात्पर्यं वक्तुं वृत्तं कीर्त्तयति। यः कामप्रश्न इति। हृदयेऽस्मिन्निधाय चान्यविद्यादात्मकस्यागोन्तरं अनाप्नोक्तो युक्तः। श्रुतेश्च। पौरुषेयत्वाभावात् तत्त्वे दोषशंकायां वा न किन्निर्युक्ता। तदीयप्रामाण्यभंगप्रसंगादिति हृदयति। सर्वमिति। कश्चिदुक्तोऽयः परिहारस्तदसंभवे हेत्वंतरमाह। अर्थेति। आत्मज्ञानवदिति। यथा ज्ञानं मोक्षप्रयोजकं न तथा संन्यासो न वास्मिन्पक्षे तस्य कर्त्तव्यत्वं। प्रतिपत्तिकर्मवदनुष्ठानसंभवादिति राजायते मन्यते। ततः संन्यासस्य ज्ञा-

मनाद्यपेक्षते। तस्माद्विदुषो नोत्क्रामंति प्राणाः यथावस्थिता एव स्वकारणे पुरुषे समवनीयंते। नाममात्रं ह्यवशिष्यत इत्युक्तं कथं पुनः समवनीतेषु प्राणेषु देहे च स्वकारणे प्रलीने विद्वान्मुक्तोऽत्रैव सर्वात्मा सन्वर्त्तमानः पुनः पूर्ववद्देहित्वं संसारित्वलक्षणं न प्रतिपद्यत इति। अत्रोच्यते तत्तत्रायं दृष्टांतो यथा लोके अहिः सर्पस्तस्य निर्ल्वयनी निर्मोकः साऽहिनिर्ल्वयनी वल्मीके सर्पाश्रये वल्मीकादावित्यर्थं प्रत्यस्ता प्रक्षिप्ता अनात्मभावेन सर्पेण परित्यक्ता शयीत वर्त्तेत। एवमेव यथायं दृष्टांतः इदं शरीरं सर्पस्थानीयेन मुक्तेनानात्मभावेन परित्यक्तं मृतमिव शेते। अथेतरः सर्पस्थानीयो मुक्तः सर्वात्मभूतः सर्पवत्तत्र वर्त्तमानोऽशरीर एव न पूर्ववत्पुनः सशरीरो भवति। कामकर्मप्रयुक्तशरीरात्मभावेन हि पूर्वं सशरीरो मर्त्यश्च तद्वियोगादथेदानीमशरीरोऽत एव चामृतः प्राणः प्राणितीति प्राणः प्राणस्य प्राणमिति वक्ष्यमाणे श्लोके प्राणबंधनं हि सोम्य मन इति च श्रुत्यंतरे प्रकरणवाक्यसामर्थ्याच्च पर एवात्मा प्राणशब्दवाच्यः ब्रह्मैव परमात्मैव। किंपुनस्तत्तेज एव तत् विज्ञानं ज्योतिः। येन ज्योतिषा जगदवभास्यमानं प्रज्ञानेत्रं विज्ञानज्योतिषा अदविभ्रंश एव वर्त्तते। यः कामप्रश्नो विमोक्षार्थो याज्ञवल्क्येन वरो दत्तो जनकाय सहेतुको बंधमोक्षार्थलक्षणो दृष्टांतदार्ष्टांतिकभूतः सप्रपंचो निर्णीतः सविस्तरो जनकयाज्ञवल्क्याख्यायिकारूपधारिण्या श्रु-

तदेष श्लोको भवति यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति तद्यथाऽहिनि-
र्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदꣳ शरीरꣳ शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते सहस्रं ददामीति होवा-
च जनको वैदेह ॥ ५८ ॥

त्या संसारविमोक्षोपाय उक्तः प्राणिभ्यः। इदानीं श्रुतिः स्वयमेवाह। विद्यानिः क्रियार्थं जनकेनैवमुक्तमिति। कथं सोऽहमेवं विमोक्षितस्त्वया भगवते तुभ्यं विद्यानिःक्रियार्थं सहस्रं ददामीति ह स्मैवं किल। उवाचोक्तवान् जनको वैदेहः। अत्र कस्माद्विमोक्षपदार्थे निर्णीते विदेहराज्यमात्मानमेव च न निवेदयत्येकदेशोक्ताविव सहस्रमेव ददाति तत्र कोऽभिप्राय इत्यत्र केचिद्वर्णयंति अध्यात्मविद्यारसिको जनकः श्रुतमप्यर्थं पुनर्मंत्रैः शुश्रूषत्यतो न सर्वमेव निवेदयति श्रुत्वाभिप्रेतं याज्ञवल्क्यात्पुनरंते निवेदयिष्यामीति हि मन्यते। यदि चात्रैव सर्वं निवेदयामि निवृत्ताभिलाषोऽयं श्रवणादिति मत्वा श्लोकान्न वक्ष्यतीति च भयात्सहस्रदानं शुश्रूषालिंगज्ञापनायेति। सर्वमेतदसत्पुरुषस्य प्रमाणभूतायाः श्रुतेर्व्याजानुपपत्तेरर्थविशेषोपपत्तेश्च। विमोक्षपदार्थ उक्ते यद्यात्मज्ञानसाधनं आत्मज्ञानशेषभूतः सर्वैषणापरित्यागः संन्यासाख्यो वक्तव्योऽर्थशेषो विद्यते। तस्माच्छ्लोकमात्रशुश्रूषाकल्पनानृज्व्येव गतिः का हि गतिः पुनरुक्तार्थकल्पना सा वा युक्ता सत्यां गतौ न चैतच्छ्रुतिमात्रमित्यवोचाम। नन्वेवं सत्यत ऊर्ध्वं विमोक्षायैवेति वक्तव्यं नैव दोषः आत्मज्ञानवदप्रयोजकः संन्यासपक्षे प्रतिपत्तिकर्मवदिति हि मन्यते। संन्यासेन तनुं त्यजेदिति स्मृतेः। साधनत्वपक्षेऽपि नात ऊर्ध्वं विमोक्षायेति प्रश्नमर्हति मोक्षसाधनभूतात्मज्ञानाप-

नेनानुत्पन्नत्वान्नात ऊर्ध्वं विमोक्षायेति एकतीत्यर्थः। संन्यासस्य प्रतिपत्तिकर्मवत्कर्त्तव्यत्वे प्रमाणमाह। संन्यासेनेति। ननु विविदिषासंन्यासमंगीकुर्वतानन्तस्य प्रतिपत्तिकर्मवदनुष्ठेयत्वमिष्यते तत्राह। बाधितेषु-

[illegible] संन्यासस्य कर्त्तव्यत्वमस्तीति राजा मन्यते

विस्तीर्णत्वं पूर्णविषयत्वात् । तथा ज्ञानमार्गफलस्य तत्प्रतीत इत्यर्थः । इनैषदोष इति । स्तुतिपरत्वमेव प्रकटयति एवं हीति । कृतार्थोऽस्मीत्यात्मन्यभिमानकरं स्वानुभवसिद्धमात्मज्ञानं नास्मीत्यतुष्ठकृतं किं चिदितवर्चविर्यं । श्रवणारणाश्रुतिः श्रोतीत्यर्थः । यथाश्रुतार्थत्वे कोदोषः स्यादितिचेत्तत्राह नन्विति । ब्रह्मविद्यास्वर्गार्थास्वर्गसाधारणेति श्रवणादित्यादिप्राप्तिः यावत् । पूर्वपक्षमुत्थापयति । तस्मिन्निति । वायमर्थो विधेयः । विस्पष्टार इति । इदमर्थविधाने हेतुमाह । पाठांतरादिति । विद्यायास्तत्प्राप्तिः । येन हेतुना मयैव अनुविन्न इति भवधारयति । अतः प्रत्युत्तरं मंत्रे प्राप्तवानिति किं । तानेभक्ति अत्र परंपरे उत्तम पैवगुविन्न इत्यस्य वचनस्य यदा सर्वेडति मंत्र । मंत्रब्राह्मणयोरुक्तेः । माध्यंदिनश्रुतिमाश्रित्याह विस्पष्टेति । ब्रह्मविद्यायाः फलस्येणापीपूर्णान्विगमनं । यथा उजेत्यभिरूपेणापरिपूर्णता प्राप्तिस्तथेत्यर्थः ॥

क्षइति । एतस्मिन्नर्थे मंत्रब्राह्मणोक्ते विस्तरप्रतिपादका एते श्लोका भवंति । अणुः सूक्ष्मः पंथाः दुर्विज्ञेयत्वात् विततो विस्तीर्णो विस्पष्टतरणहेतुत्वाद्वा विततइति पाठांतरान्मोक्षसाधनो ज्ञानमार्गः । पुराणश्चिरंतनो नित्यश्रुतिप्रकाशितत्वात् न तार्किकबुद्धिप्रभावकुदृष्टिमार्गवदर्वाक्कालिकः । मां स्पृष्टो मां स्पृष्टो मया लब्ध इत्यर्थः । यो हि येन लभ्यते स तं स्पृशतीव संबध्यते तेनायं ब्रह्मविद्यालक्षणो मोक्षमार्गो मया लब्धत्वान्मां स्पृष्ट इत्युच्यते । न केवलं मया लब्धः किंत्वनुवित्तो मयैव अनुवेदनं नाम विद्यायाः परिपाकापेक्षया फलावसानतानिष्ठाप्राप्तिः भुजेरिव तृप्त्यवसानता पूर्वं तु ज्ञानप्राप्तिसंबंधमात्रमेवेति विशेषः । किमसावेव मंत्रदृको ब्रह्मविद्याफलं प्राप्तवान्नान्यः प्राप्तवान् येनानुवित्तो मयैवेत्यवधारयति । नैष दोषोऽस्याः फलमात्मसाक्षिकमनुवित्तमिति ब्रह्मविद्यायाः स्तुतिपरत्वात् एवं हि कृतार्थाभिमानकरमात्मप्रत्ययसाक्षिकमात्मज्ञानं किमतः परमन्यत्स्यादिति ब्रह्मविद्यां स्तौति । ननु पुनरन्यो ब्रह्मवित्तत्फलं न प्राप्नोतीति । तद्यो यो देवानामिति सर्वार्थश्रुतेस्तद्वा हि तेन ब्रह्मविद्यामार्गेण धीराः प्रज्ञावन्तोऽन्येऽपि ब्रह्मविद इत्यर्थः । अपियंति अपिगच्छंति । ब्रह्मविद्याफलं मोक्षं स्वर्गलो

तदेते श्लोका भवंति । अणुः पंथा विततः पुराणो माꣳस्पृष्टोऽनुवित्तो मयैव । तेन धीरा अपियंति
ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः ॥ ८ ॥ तस्मिं शुक्लमुत नीलमाहुः पिंगलꣳ हरितं लोहितं च

कं स्वर्गलोकशब्दस्त्रिविष्टपवाच्यपि सन्निह प्रकरणान्मोक्षाभिधायकः । इतोऽस्माच्छरीरपातादूर्ध्वं जीवंत एव विमुक्ताः संतः । तस्मिन्मोक्षसाधनमार्गे विप्रतिपत्तिर्मुमुक्षूणां ॥ ८ ॥ कथं तस्मिन् शुक्लं शुक्लं विमलमाहुः केचिन्मुमुक्षवो नीलमन्ये पिंगलमन्ये हरितं च यथा दर्शनं नाड्यस्त्वेताः सुषुम्नाद्याः श्लेष्मादिरसपूर्णाः शुक्लस्य नीलस्य पिंगलस्येत्याद्युक्तत्वात् । आदित्यं वा मोक्षमार्गमेवं विधमन्यते एष शुक्लनीलइत्यादिश्रुत्यंतरात् । दर्शनमार्गस्य च शुक्लादिवर्णासंभवात् । सर्वथापि तु प्रकृता ब्रह्मविद्यामार्गादन्य एते शुक्लादयः । ननु शुक्लः शुद्धोऽद्वैतमार्गः न नीलपीतादिशब्दवर्णवाचकैः सहानुद्रवणात् यान् शुक्लादीन् योगिनो मोक्षपथानाहुर्न ते मोक्षमार्गाः । संसारविषया एव हि ते चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्य इति शरीरदेशान्निःशरणसंबंधा ब्रह्मादिलोकप्रापका हि ते । तस्मादयमेव मोक्षमार्गो य आत्मकामत्वेनाप्तकामतया सर्वकर्मक्षयगमनात् तूपपन्नोऽप्रदीपनिर्वाणवच्चक्षुरादीनां कार्यकरणानामत्रैव समवनय इति ॥ ॥ ॥

ये स्वर्गलोकप्राप्तिमेव मोक्षमन्यंते तेषां मोक्षसाधनमार्गे विप्रतिपत्तिः । कथं मोक्षमार्गे विप्रतिपत्तिः स्वस्वज्ञानं अनतिक्रम्य आहुः श्रवणात् ब्रह्मविद्यामोक्षमित्यर्थः । अणुः पंथा इत्यत्र उक्तः । अस्याः फलमनुवित्तमात्मसाक्षिकं इन्द्रियग्राह्यं नेत्यर्थः । स्वानुभवसाक्षिकं मोक्षं गच्छतीति । पूर्वेणान्वयः । तस्मिन्मोक्षमार्गे विप्रतिपत्तिः कथमित्याह । तं मोक्षमार्गं शुक्लं केचिदाहुः । सप्रपंचं ब्रह्मरूपं परमादिमद्ब्रह्म तदुपादानमनुसृत्य तत्प्राप्तिमार्गे विवादो मुमुक्षूणामित्याह यथादर्शनमिति । तथापि कथं ब्रह्मप्राप्तिमार्गे शुक्लादिरूपासिद्धिः न हि ज्ञानस्य रूपादिमत्त्वमित्याशंक्याह । नाड्यस्त्विति ॥ ॥

[illegible]

सकलात्मबोदासीनता समतामित्रोदासीनशत्रुबुद्धिव्यतिरेकेण सर्वत्र स्वात्मन्निव दृष्टिः।दंडनिधानमहिंसापरत्वं।प्रकृते मंत्रे समुच्चयो भातीत्याशंक्याह।उपदेक्ष्यतीति।वाक्यशेषादिपर्यालोचनामि
त्यर्थमुपसंहरति।तस्माद्यथाव्याख्यातमिति।पुण्यकृतीति तेजोसि करणानुपसंहृत्यास्थितस्तेजसः दहराद्युपासीनो योगी।तस्मिन्नणिमाद्यैश्वर्याभिहेतुभावत्वप्रसिद्धिः।अत्र कृतज्ञानमार्गस्तत्य

एषज्ञानमार्गःपंथाब्रह्मणापरमात्मस्वरूपेणैवब्राह्मणेनत्यक्तसर्वैषणेनानुवित्तः।तेनब्रह्मविद्यामार्गेणब्रह्मविदन्योप्येति।कीदृशोब्रह्मवित्तेनैतीत्युच्यते
पूर्वंपुण्यकृद्भूत्वापुनस्त्यक्तपुत्राद्येषणाःपरमात्मतेजस्यात्मानंसंयोज्यतस्मिन्नभिनिर्वृत्तः।तैजसश्चात्मभूतइहैवेत्यर्थः।ईदृशोब्रह्मवित्तेनमार्गे
णैति।नपुण्यादिसमुच्चयकारिणोग्रहणंविरोधादित्यवोचाम।अपुण्यपुण्योपरमेयंपुनर्भवनिर्भयाः।शांतासंन्यासिनोयांतितस्मैमोक्षात्मनेनमः
इतिचस्मृतेः।त्यजधर्ममधर्मंचेत्यादिश्रुत्यापुण्यत्यागोपदेशात्।निराशिषमनारंभंनिर्नमस्कारमस्तुतिं।अक्षीणंक्षीणकर्माणंतंदेवाब्राह्मणं
विदुः।नैतादृशंब्राह्मणस्यास्तिवित्तंयथैकतासमतासत्यताशीलंस्थितिर्दंडनिधानमार्जवंततस्ततश्चोपरमःक्रियाभ्यःइत्यादिस्मृतिभ्यश्च।उ
पदेक्ष्यतिचेहापिएषनित्योमहिमाब्राह्मणस्यनवर्धतेकर्मणानोकनीयानितिकर्मप्रयोजनाभावेहेतुमुक्त्वातस्माद्ब्राह्मणःशांतोदांतइत्यादि
नासर्वक्रियोपरमंदर्शयति।तस्माद्यथाव्याख्यातमेवपुण्यकृत्त्वं।अथवायोब्रह्मवित्तेनैति।सपुण्यकृत्तैजसश्चेतिब्रह्मवित्स्तुतिरेषा।पुण्यकृ

एषपंथाब्रह्मणाह्यनुवित्तस्तेनैतिब्रह्मवित्पुण्यकृत्तैजसश्च॥ ५८ ॥अंधंतमःप्रविशंतियेऽविद्यामुपासते।ततोभूयइवतेतमो
यउविद्यायांरताः॥ ५९ ॥अनंदानामतेलोकाअंधेनतमसावृताः।ताꣳस्तेप्रेत्याभिगच्छंत्यविद्वाꣳसोऽबुधोजनाः॥ ६० ॥आत्मानंचेद्वि
जानीयादयमस्मीतिपूरुषः।

तितैजसेश्वर्ययोगिनिमहाभाग्यंप्रसिद्धंलोकेताभ्यामतोब्रह्मवित्स्तूयतेप्रख्यातमहाभाग्यत्वात्लोके॥ ५८ ॥अंधमदर्शनात्मकंतमःसंसारनियामकं
प्रविशंतिप्रापकंप्रतिपद्यंते।केतेयेऽविद्यांविद्यातोन्यांसाध्यसाधनलक्षणामुपासतेकर्मानुवर्तंतइत्यर्थः।ततस्तस्मादपिभूयइवतमःप्रविशंतियेउ
विद्यायामविद्यावस्तुप्रतिपादिकायांकर्मार्थायांत्रय्यामेवविद्यायांरताः।अभिरताः।विधिप्रतिषेधपरएववेदोनान्योस्तीत्युपनिषदर्थानपेक्षिणइत्य
र्थः॥ ५९ ॥यदितेऽदर्शनलक्षणंतमःप्रविशंतिकोदोषइत्युच्यते।अनंदाःअनानंदाःअसुखानामतेलोकास्तेनांधेनादर्शनलक्षणेनतमसावृता
व्याप्ताःतेतस्याज्ञानतमसोगोचरांस्तान्प्रेत्यमृत्वाभिगच्छंत्यभियांति।केयेऽविद्वांसः।किंसामान्येनाविद्वत्तामात्रेणानेत्युच्यते।अबुधःबुधअव
गमनार्थस्यधातोःक्विप्प्रत्ययांतस्यरूपं।आत्मावगमवर्जिताइत्यर्थः।जनाःप्राकृताएवजननधर्मिणोवेत्येतत्॥ ६० ॥आत्मानंस्वंपरंसर्वप्राणिम
नीषितस्थंहृत्स्थमशनायादिधर्मातीतंचेद्यदिविजानीयात्सहस्रेषुकश्चिदित्यात्मविद्यायादुर्लभत्वंदर्शयति।कथमयंपरआत्मासर्वप्राणि
प्रत्ययसाक्षीयोनेतिनेत्याद्युक्तःयस्मान्नान्योऽस्तिद्रष्टाश्रोतामंताविज्ञातासमःसर्वभूतस्थोनित्यशुद्धबुद्धमुक्तस्वभावोस्मिभवामीति।पूरुषःपुरुषः।

षंमार्गांतरंनिंदति।अंधमिति।कथंपुनस्त्रय्यामभिरतानामधःपतनमित्याशंक्याह।विधीति।उक्तात्मज्ञानस्यकृतार्थत्वमेवआत्मज्ञाननिष्ठस्यकायक्लेशराहित्यंदर्शयति।आत्मानमित्यादिना।प्रश्नपूर्व
कंज्ञानप्रकारंप्रकटयति।कथमित्यादिना।कथंकेनप्रकारेणविजानीयादितिप्रश्नः।विषयेभ्यः।आदिशब्देनज्ञानं।अज्ञानं।पुण्यकृतइत्यस्यार्थः।इत्यादिस्मृतिभ्यश्चानपुण्यादिसमुच्चयकारिणोग्रहणमितिसंबंधः।

(2)

सचेत्यथा ह्यस्मेदमित्यादियोज्यं ।३ इत्येतदासाकिमिच्छन्निति तदाधाराक्षेपोऽनिरितिरोधः।३।नकेवलमात्मविद्यारसिकस्यकामक्लेशाराहित्यं।किंतुकृतकृत्यताचास्तीत्याह।किंचेति।४।संदेहत्वंसाध
यति।अनेकेति।५ननाममात्रमित्यत्रपुरस्तान्नत्रतस्मादितिपठितव्यं।यस्मादित्युपक्रमात्।परस्यदोविद्याविषयः।६इत्याशंकायामुत्तरमुक्तं अत इति।६ मंत्रस्यतान्ययार्थंसंगृह्णाति।प्रणश्यति।

सकिमिच्छन्नात्मस्वरूपव्यतिरिक्तंमन्यद्वस्तुफलभूतंकिमिच्छन्कस्यवान्यस्यात्मनोव्यतिरिक्तस्यकामायप्रयोजनाय।नहितस्यात्मनःप्रेप्सुवंफलं॥
नचाप्यात्मनोन्योस्तियस्यकामायेच्छतिसर्वस्यात्मभूतत्वात्।अतःकिमिच्छन्कस्यकामायशरीरमनुसंज्वरेच्छरीरोपाधिकृतदुःखमनुदुःखी
स्यात्शरीरतापमनुतप्येत।अनात्मदर्शिनोहितद्व्यतिरिक्तवस्त्वंतरप्रेप्सोर्ममेदंस्यात्पुत्रस्येदंभार्याइदमितीहमानःपुनर्जननमरणप्रबंधारूढःश
रीररोगमनुरुज्यतेसर्वात्मदर्शिनस्तुतदसंभवइत्येतदाह॥ ६१ ॥किंचयस्यब्राह्मणस्यानुवित्तोनुलब्धःप्रतिबुद्धःसाक्षात्कृतःकथमहमस्मिपरं
ब्रह्मेत्येवंप्रत्यगात्मत्वेनावगतः।आत्मास्मिन्संदेह्येसंदेहेअनेकानर्थसंकटोपचयेगहनेविषमेऽनेकशतसहस्रविवेकविज्ञानप्रतिपक्षेवि
षमेप्रविष्टःसयस्यब्राह्मणस्यानुवित्तःप्रतिबोधेनेत्यर्थः।सविश्वकृद्विश्वस्यकर्त्ताकथंविश्वकृत्त्वंतस्यकिंविश्वकृदितिनाममात्रमित्याशंक्याह।सहि
यस्मात्सर्वस्यकर्त्ताननाममात्रंनकेवलंविश्वकृत्परप्रयुक्तःसन्।किंतर्हितस्यलोकःसर्वंकिमन्योलोकोन्योसावित्युच्यते।सउलोकएवलोकश

किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत्॥ ६१ ॥यस्यानुवित्तःप्रतिबुद्धआत्मास्मिन्संदेह्येगहनेप्रविष्टः।सविश्वकृत्सहिसर्व
स्यकर्त्तातस्यलोकःसउलोकएव॥ ६२॥इहैवसंतोथविद्मस्तद्वयंनचेदवेदिर्महतीविनष्टिः ॥

देनात्मोच्यते।तस्यसर्वआत्मासचसर्वस्यात्मेत्यर्थः।यएवब्राह्मणेनप्रत्यगात्माप्रतिबुद्धतयानुवित्तआत्मानर्थसंकटेगहनेप्रविष्टःसनसंसा
रीकिंतुपरमेश्वरएवयस्माद्विश्वस्यकर्त्तासर्वस्यात्मातस्यचसर्वआत्माएकएवाद्वितीयःपरएवास्मीतिमंतव्यइतिश्लोकार्थः॥ ६२॥किं
चइहैवानेकानर्थसंकुलेसंतोभवंतोऽज्ञानदीर्घनिद्राविहताःसंतःकथंचिदिवब्रह्मतत्त्वमात्मत्वेनाथविद्मःविजानीमः।तदेतद्ब्रह्मप्रकृतमहो
वयंकृतार्थाइत्यभिप्रायः।यदेतद्ब्रह्मविजानीमःतन्नचेदविदितवंतोवयंवेदनंवेदस्तद्यस्यास्तीतिवेदीवेद्येववेदिर्नवेदिरवेदिःनचेदवेदिस्त
तोहमवेदीःस्यांयस्यवेदिःस्यात्कोदोषःस्यान्महतीअनन्तपरिमाणाजन्ममरणादिलक्षणाविनष्टिर्विनशनंअहोवयमस्मान्महतोवि
नाशनात्निर्मुक्तायत्तदक्षयंब्रह्मविदितवंतइत्यर्थः॥यथाचवयंब्रह्मविदित्वाऽस्माद्विनशनाद्विप्रमुक्ताएवंयेतद्विदुरमृतास्तेभवंतीयेपु
नर्नैवंब्रह्मविदुस्तइतरेऽब्रह्मविदोऽ ॥

वयंनाशास्यामश्चेत्तर्हिअवेदिरहंअभविष्यंतथासतिमहतींजन्ममरणा ।स्वरूपम्।ईहमान ।सचममेदंस्यात्भवत्विति।यस्यब्राह्मणस्येश्छांकरोति॥
मित्यत्र।पुरुषस्यव्यतिरिक्तवस्त्वन्तरेतोऽतःसंतापंप्राप्नोतीत्यर्थः।शरीरइत्यर्थः।अनेकशतसहस्राणिविवेकविज्ञानप्रतिपक्षायस्मिन्नुगततत्रः।येनब्राह्मणेन।शरीरमनुसंज्वरेदितिसंबंधः।
विनष्टिरभविष्यत्इत्यर्थः१

यस्मादीशानादर्वाक्संवत्सरवर्त्तितत्तदुपासते देवा इति संबंध। ननु कथं संवत्सरोऽर्वागित्युच्यते। कालस्य कालांतराभावेन पूर्वकालसंबंधाभावादत आह। यस्मादिति। अनुरूपं फलं दातीत्यर्थः। ज्योतिरन्
हेतुः। आत्मज्योतिषो गुणा आयुष्ट्वलक्षणः। आयुर्जीवनमस्मात्मनो गुणः अनेनैव हि जीवति सर्वः। उपलक्षितं। दर्शनं नाम ध्यानात्। विदुः इत्यनेन संबंधः चैतन्यात्मज्योतिषो विशेषणं आत्
स्याः प्रभवेन। ज्योतिषां ज्योतिरिति। अमृतमित्युक्तं स्यादमृतत्वस्य वाधितानत्वेन साधयति। किंचेति। यथात्मानं ब्रह्मत्वेन जानामि तर्हि किं तेन दिया फलमिति प्रश्नपूर्वकमाह। किंन हीति॥

न्यः ब्रह्मविद इत्यर्थः। दुःखमेव जननमरणादिलक्षणमेवापियंति प्रतिपद्यंते न कदाचिदप्यविद्यातो विनिवृत्तिरित्यर्थः। दुःखमेव हि तत्त्वात्मत्वेनाप
गच्छंति॥ ६३॥ यदा पुनरेतमात्मानं कथंचित्परमकारुणिकं कंचिदाचार्यं प्राप्य ततो लब्धप्रसादः सन् अनुपश्यति साक्षात्करोति स्वमात्मानं देवं
द्योतनवंतं दातारं वा सर्वप्राणिकर्मफलानां यथाकर्मानुरूपमंजसा साक्षादीशानं स्वामिनं भूतभव्यस्य कालत्रयस्येत्येतत्। न ततस्तस्मादीशा
नाद्देवादात्मानं विशेषेण जुगुप्सते गोपायितुमिच्छति सर्वो हि लोक ईश्वरात् जुगुप्सितुमिच्छति भेददर्शी अयं त्वेकत्वदर्शी न बिभेति कुतश्चन अतो न
तदा विजुगुप्सते यदेशानं देवमंजसात्मत्वेन पश्यति। न तदानिंदते वा किंचित्सर्वमात्मानं हि पश्यति। य एवं पश्यति स कस्माद्विजुगुप्सेत॥ ६४॥ किंच य
स्मादीशानादर्वाक् यस्मादन्यविषयस्येत्यर्थः। संवत्सरः कालात्मा। सर्वस्य जनिमतः परिच्छेत्ता यमपरिच्छिंदन्नर्वागेव वर्त्तते अहोभिः स्वा
वयवैरहोरात्रैरित्यर्थः। तज्ज्योतिषां ज्योतिरादित्यादिज्योतिषामप्यवभासकत्वादायुरित्युपासते देवाः अमृतं ज्योतिरतो न म्रियते न हि ज्योतिः

एतद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवापियंति॥ ६३॥ यदैतमनुपश्यत्यात्मानं देवमंजसा ईशानं भूतभव्यस्य न ततो विजुगुप्स
ते॥ ६४॥ यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्त्तते। तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतं॥ ६५॥ यस्मिन्पंच पंचजना आकाशश्च

सर्वस्य हेतुत्वात् ज्योतिरायुरायुर्गुणेन यस्माद्देवास्तज्ज्योतिरुपासते तस्मादायुष्मंतो ह ते। तस्मादायुःकामेनायुर्गुणेनोपास्यं ब्रह्मेत्यर्थः॥ ६५॥
किंच यस्मिन् यत्र ब्रह्मणि पंच जना गंधर्वादयः पंचैव संख्याता गंधर्वाः पितरो देवा असुरा रक्षांसीति वा ऽपंच मावर्णाः आकाशश्चाव्याकृ
ताख्यो यस्मिन् सूत्रं यस्मिन्नोतं च प्रोतं च यस्मिन् प्रतिष्ठितः एतस्मिन्नु खल्वक्षरे गार्ग्याकाश इत्युक्तं। तमेवात्मानममृतं ब्रह्म मन्येऽहं। न चाहमा
त्मानं ततोऽन्यत्वेन जाने। किं तर्ह्यमृतोऽहं ब्रह्मविद्वान् सन् अज्ञानमात्रेण तु मर्त्योऽहमासं तदपगमात् इदानीं विद्वानहममृत एव॥ ६६॥ किंच तेन हि चै
तन्यात्मज्योतिषावभास्यमानः प्राणः आत्मभूतेन प्राणिति तेन प्राणस्यापि प्राणः स तं प्राणस्य प्राणं। तथा चक्षुषोऽपि चक्षुरुत श्रोत्रस्या
पि श्रोत्रं ब्रह्मशक्त्यधिष्ठितानां हि चक्षुरादीनां दर्शनादिसामर्थ्यं। स्वतः काष्ठलोष्टसमानि हि तानि चैतन्यात्मज्योतिः शू॥

कथं चक्षुरादिषु चक्षुरादित्वं ब्रह्मणः सिध्यति तत्राह। ब्रह्मशक्तीति। विमतानि करणानि केनचिदधिष्ठितानि वर्त्तंते करणत्वाद्वास्यादिवदिति चक्षुरादिव्यापारेणानुमितास्तित्वं प्रत्य
गात्मानं ये विदुरिति योजना। यथा दितात्र चक्षुरादिना व्यापारं कुर्वंति तथा चक्षुरादीन्यपि ब्रह्मशक्त्या व्यापारं कुर्वंतीति ब्रह्मणश्चक्षुरादीनां च चक्षुरादित्वमिति भावः। अहं आत्मानं जीवितं म
न्ये तं के यस्मिन् पंच पंचजनाः आकाशश्च प्रतिष्ठितः। यत् अमृतं यत् ब्रह्म अग्निः। पंचैव संख्याता। यस्मिन् सूत्रं वाय्वाख्यं ओतं च प्रोतं च स अव्याकृताख्य आकाशो यस्मिन् प्रतिष्ठित इति

134

प्रत्यगात्मा विदां कथं ब्रह्मविच्चमित्याशंक्याह। तदिति। द्वैताभावे कथमनुद्रष्टव्यं इत्याशंक्याह। यस्मादिति। मानान्तरैरविषयीकर्तुमशक्यत्वे हेतुमाह। सर्वस्येति। इतीति। इति सर्वद्वैतोपशान्तिश्रुते
रिति शेषः। आगमेनापि तर्हि कथमात्मानमावेदयेदित्याशंक्याह। प्रमाणेति। आत्मनः स्वर्गादिवदविषयत्वेनागमघीतिप्रयत्नाभावे हेतुमाह। प्रतिपादयित्रिति। कीदृशि तस्मिन्नागमिके
ज्ञाने तदाह। ज्ञानं चेति। परस्मिन्देहादावारोपितस्यात्मभावस्य निवृत्तिरेव वाक्येन क्रियते। न तथाचात्मनि परिशिष्टे स्वाभाविकमेव स्फुरणं प्रतिबंधविगमात्प्रकटीभवतीति भाव। नन्व

न्यानि मनसोपि मन इति ये विदुश्चक्षुरादिव्यापारद्वारानुमितास्तित्वं प्रत्यगात्मानं न विषयभूतं ये विदुस्ते निचिक्युर्निश्चयेन ज्ञातवन्तो ब्रह्म पुराणं
चिरंतनमग्र्यमग्रे भवं। तद्यदात्मविदो विदुरिति ह्याथर्वणे॥ १८ ॥ तद्ब्रह्मदर्शने साधनमुच्यते। मनसैव परमार्थज्ञानसंस्कृतेनाचार्योपदेशपूर्व
कं चानुद्रष्टव्यं। तत्र च दर्शनविषये ब्रह्मणि इह न नानास्ति किंचन किंचिदपि असति नानात्वे नानात्वमध्यारोपयत्यविद्यया। स मृत्योर्मरणान्
मरणमाप्नोति कोसौ य इह नानेव पश्यति अविद्याध्यारोपणव्यतिरेकेण नास्ति परमार्थतो द्वैतमित्यर्थः॥ १९ ॥ यस्मादेवं तस्मादेकधैवैकेनैव
प्रकारेण विज्ञानघनैकरसप्रकारेणाकाशवन्निरंतरेणानुद्रष्टव्यं। यस्मादेतद्ब्रह्माऽप्रमेयं चाप्रमेयं सर्वैकत्वात्। अन्येन ह्यन्यत्प्रमीयते इदं
त्वेकमेवातोऽप्रमेयं ध्रुवं नित्यं कूटस्थमविचालीत्यर्थः। ननु विरुद्धमिदमुच्यते। अप्रमेयं ज्ञायत इति च। ज्ञायत इति प्रमाणैर्मीयत इत्यर्थोऽप्र
मेयमिति च तत्प्रतिषेधः। नैष दोषोऽन्यवस्तुवदागमातिरिक्तप्रमाणाप्रमेयत्वप्रतिषेधार्थत्वात्। यथाऽन्यानि वस्तून्यागमनिरपेक्षप्रमाणै

तमेव मन्य आत्मानं विद्वान्ब्रह्माऽमृतोऽमृतं॥ १७ ॥ प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः। ते निचिक्यु
र्ब्रह्म पुराणमग्र्यं॥ १८ ॥ मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥ १९ ॥ एकधैवानुद्रष्टव्य
मेतदप्रमेयं ध्रुवं। विरजः पर आकाशादज आत्मा महान्ध्रुवः।

र्विषयीक्रियंते न तथैतदात्मतत्त्वं प्रमाणांतरेणाविषयीकर्तुं शक्यते सर्वस्या
त्मत्वे केन कं पश्येद्विजानीयादिति प्रमातृप्रमाणादिव्यापारप्रतिषेधेनैवागमोपि विज्ञापयति न त्वभिधानाभिधेयलक्षणवाक्यधर्मांगीक
रणेन। तस्मान्नागमेनापि स्वर्गमेर्वादिवत्प्रतिपाद्यते। प्रतिपादयित्रात्मभूतं हि तत्। प्रतिपादयितुः। प्रतिपादनस्य प्रतिपाद्यविषयत्वात्। भे
दे हि सति तद्भवति। ज्ञानं च तस्मिन्परात्मभावनिवृत्तिरेव न तस्मिन्साक्षादात्मभावः कर्त्तव्यो विद्यमानत्वादात्मभावस्य नित्यो ह्यात्मभावस
र्वस्य। अतद्विषय इव प्रत्यवभासते। तस्मादतद्विषयाभासनिवृत्तिव्यतिरेकेण न तस्मिन्नात्मभावो विधीयते। अन्यात्मभावे निवृत्ते त्वात्म
भावः स्वात्मनि स्वाभाविको यः स केवलो भवतीत्यात्मा ज्ञायत इत्युच्यते। स्वतश्चाऽप्रमेयः प्रमाणांतरेणाविषयीक्रियत इति उभयमप्यवि
रुद्धमेव। विरजो विगतरजा रजो नाम धर्माधर्मादिमलं तद्रहित इत्येतत्। परः परो व्यतिरिक्तः सूक्ष्मो व्यापी वा आकाशादप्यव्याकृताख्यात्॥ अ
जो न जायते। जन्मप्रतिषेधादुत्तरेपि भावविकाराः प्रतिषिद्धाः। सर्वेषां जन्मादित्वादात्मा महान्परिमाणतो महत्तरः सर्वस्मात्। ध्रुवोऽविनाशी।

हतात्मभावः। कर्त्तव्यो विवक्षितेन तु देहादावात्मत्वनिवृत्तिरत आह। न तस्मिन्। तस्मिन्ब्रह्मणीत्येतत्। अतद्विषयो ब्रह्मातिरिक्तविषय इत्यर्थः। तथापि विप्रतिपत्तिकत्वेनाऽप्रतिपाद्यत्वं तत्राह। प्रतिपादयि
त्रिति। अतद्विषयाभावाद्देहादावात्मप्रतिभासः। इंद्रियग्राह्य। अकुर्वन्। यदात्मविदो विदुः। तदिदमित्यर्थः। तेनात्मविदो ब्रह्मवित्त्वं। अस्यात्मनोपर्यायत्वं ज्ञेयन्। यस्मादेकरसं तस्मादप्रमेयमिति योजना
हेतुं स्फुटयति। सर्वैकत्वादिति। ज्ञायते इति वचनस्य अन्यवर्णनात्। तथा च वेदन अज्ञानमात्रं निराक्रियते इति हेतौ वेदनं ज्ञायत इत्युच्यते। अन्यदेहादेः। अप्रमेयः। अज्ञानेन। भावविकाराणाम्।

बृ॰भा॰
१३४

कण्डिकान्तरमवतारयितुं वृत्तं कीर्तयति। सहेतुकाविति। एवमिति। विरजः पर इत्यादिनोक्तक्रमेणावस्थिते ब्रह्मणीति यावत्। तदर्थो ब्रह्मात्मनि सर्वस्य वेदस्य विनियोगप्रदर्शनार्थः। ननु विविदिषावाक्येन सर्ववेदस्य ब्रह्मात्मनि विनियोगावगतेस्तथा च तस्मात्प्राक्तनं वाक्यं किमर्थमित्याशंक्याह। तच्चेति। यथास्मिन्नध्याये सकलमात्मज्ञानमुक्तं तथैव तदनूद्येति योजना। यथास्मिन्नध्याये कृत्स्नस्य काम्यराशिवर्जितस्य वेदस्य ब्रह्मण्युपयोगस्तथा तत्प्रदर्शनार्थमुक्तार्थानुवादः। पौनःपुन्येन कथने सति उक्तार्थस्य दार्ढ्यं स्यात्। अतीतेति। विरजः पर इत्यादिनोक्तो महत्त्वादिविशेषणः परमा

तमीदृशमात्मानमेव धीरो धीमान्विज्ञायोपदेशतः शास्त्रतश्च प्रज्ञां शास्त्राचार्योपदिष्टविषयां जिज्ञासापरिसमाप्तिकरीं कुर्वीत ब्राह्मणः। एवं प्रज्ञाकरणसाधनानि संन्यासशमदमोपरमतितिक्षासमाधानानि कुर्यादित्यर्थः। नानुध्यायान्नानुचिन्तयेद्बहून्प्रभूताञ्छब्दान्। तत्र बहुत्वप्रतिषेधात् केवलात्मैकत्वप्रतिपादकाः स्वल्पाः शब्दा अनुज्ञायन्ते। ओमित्येवं ध्यायथ आत्मानमन्या वाचो विमुञ्चथेति चाथर्वणे। वाचः विग्लापनं विशेषेण ग्लानिकरं श्रमकरं हि यस्मात् बहुशब्दाभिधानमिति॥ २१॥ सहेतुकौ बन्धमोक्षावभिहितौ मन्त्रब्राह्मणाभ्यां श्लोकैश्च पुनर्मोक्षस्वरूपं विस्तरेण प्रतिपादितम्। एवमेतस्मिन्नात्मविषये सर्वो वेदो यथोपयुक्तो भवति तत्तथा वक्तव्यमिति तदर्थेयं कण्डिकारभ्यते। तच्च यथास्मिन्नपाठके विहितं सप्रयोजनमनूद्यात्रैवोपयोगः कृत्स्नस्य वेदस्य काम्यराशिवर्जितस्येत्येवमर्थः उक्तार्थानुवादः स वा एष इत्यादिः संक्षेपतः परामर्शार्थः। कोऽसावुक्तः परामृश्यत इति परिनिर्दिश्यते। यः एष विज्ञानमय इत्यतीतानन्तरवाक्योक्तसंप्रत्ययो माभूदिति य एष कमय एष इत्युच्यते। विज्ञानमयः प्राणेष्विति उक्तवाक्यलिङ्गगतसंशयनिवृत्त्यर्थमुक्तं हि पूर्वं जनकप्रश्नारम्भे कतम आत्मेति योऽयं विज्ञानमयः

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनꣳ हि तदिति॥ २१॥ स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीया-

प्राणेष्वित्यादि तदुक्तं भवति। योऽयं विज्ञानमयः प्राणेष्वित्यादिना वाक्येन प्रतिपादितः स्वयंज्योतिरात्मा स एष कामकर्माविद्यानामनात्मधर्मत्वप्रतिपादनद्वारेण मोक्षितः परमात्मभावमापादितः पर एवायं नान्य इत्येष साक्षान्महानज आत्मेत्युक्तो योऽयं विज्ञानमयः प्राणेष्विति यथाव्याख्यातार्थ एव। य एषोऽन्तर्हृदये हृदयपुण्डरीकमध्ये य एष आकाशो बुद्धिविज्ञानसंश्रयः तस्मिन्नाकाशे बुद्धिविज्ञानसहिते शेत इति चतुर्थेवा संप्रसादकाले। अन्तर्हृदये य एष आकाशः परस्यैवात्मा निरुपाधिको विज्ञानमयस्य स्वभावः तस्मिन्स्वस्वभावे परमात्मस्वरूप आकाशे शेत इति चतुर्थे एतद्व्याख्यातं। किं यतदा भूदित्यस्य प्रतिवचनत्वेन। स च सर्वस्य ब्रह्मेन्द्रादेर्वशी सर्वो ह्यस्य वशे वर्तते। उक्तं चैतस्य वा अक्षरस्य प्रशासन इति। न केवलं वशी सर्वस्येशान ईशिता च ब्रह्मेन्द्रप्रभृतीनामीशितृत्वं च कदाचिज्जातिकृतं यथा राजकुमारस्य बलवत्तरानपि भृत्यान्प्रति तद्वन्मा भूदित्याह सर्वस्याधिपतिरधिष्ठाय पालयिता स्वतन्त्र इत्यर्थः। न राजपुत्रवदमात्यादिभृत्यतन्त्रः स्वयमित्येतत्। वशित्वादि हेतुहेतुमद्रूपं। यस्मात्सर्वस्याधिपतिस्ततः सर्वस्येशानो यो हि यमधिष्ठाय पालयति स तं प्रतीष्ट एवेति प्रसिद्धं॥ यस्माच्च सर्वस्येशानस्तस्मात्सर्वस्य वशीति। किं चान्यत्स एवंभूतो हृद्यन्तर्ज्योतिः पुरुषो विज्ञानमयः न साधुना शास्त्रविहितेन कर्मणा भूयान्भवति न वर्द्धते पूर्वावस्थातः केनचिद्धर्मेण नो एव शास्त्रप्रतिषिद्धेनासाधुना कर्मणा कनीयानल्पतरोभ ॥

मानस्य सशब्दात्त्वपतीति माभूदिति कृत्वा य एष इति प्राक्प्राणस्थं जीवं परामृश्य तमेवैतं ब्रह्मेति स्यादित्याशङ्क्य स इत्यनेन परेणात्मनैक्यमेषशब्देन निर्दिशतीत्यर्थः। परमात्मनि परजः पर इत्यादिनाव र्णिते तत्र ब्रह्मविषयं। यो यं विज्ञानमय प्राणेष्वित्यस्य यथाव्याख्यातमर्थं व्याख्यातार्थः। सः एष विरजः पर इति पूर्वोक्तः महान् अजः आत्मा अस्ति। स कः यः अयं अयं कः यः विज्ञानमयः प्राणेषु। परमार्थस्वरूपं। कथमिति पुनः सः कः इमस्य प्रतिवचनं य एष इत्यादि शेते इत्यन्तं ज्ञेयं। ज्ञानफलमनुवदति स च इत्यादिना। अथवा अन्तर्हृदये आकाशाख्ये संप्रसादकाले शे

[illegible]

शिवः
१३४

135

40

अधिष्ठानादिकर्तृत्वाद्विदुषोऽपि लौकिकधर्मादिसंबंधित्वं स्यादिति शंकते । सर्वो हीति । परतंत्रस्त्वमुपाधिरिति परिहरति । उच्यत इति । सर्वाधिपत्यराहित्यं चोपाधिरित्याह । किंचेति । सर्वपालकत्वराहित्यं चोपाधिरित्याह । एष इति । सर्वाधारत्वं चोपाधिरित्याह । एष इति । तादर्थ्ये न परं परपालनोत्पत्तिशेषत्वेनेत्यर्थः । विविदिषावाक्यमवतारयति । किंज्योतिरिति । संभावितपक्षांतरमाह । अथवेति । तेन विविदिषाप्रकारं प्रश्नपूर्वकं विवृणोति । कथमित्यादिना । अत्र प्रपंचप्रस्थानमुत्थाप्य प्रत्याचष्टे । ये पुनरित्यादिना । तेषां मते वेदानुवचनशब्देन उपनिषन्मात्रग्रहणाकृतं यं स्यादित्यर्थः । भवतूपनिषन्मात्रग्रहणमित्याशंक्याह वेदानुवचनशब्देन सर्ववेदग्रहसंभवतिनिर्देशात् । तदेकदेशत्यागेन त्वेक इत्याह । वेदेति । अज्ञस्य धर्माधर्मसंबंधित्वे उपाधिकरणां । धर्माधर्मसंबंधित्वे उपाधिकारणाम्

वति पूर्वावस्थातो न हीयत इत्यर्थः । किंच सर्वो ह्यधिष्ठानपालनादि कुर्वन्परानुग्रहपीडाकृतेन धर्माऽधर्माख्येन युज्यते तस्यैव तु कथं तदभाव इत्युच्यते । यस्मादेष सर्वेश्वरः सन्कर्मणोऽपीशितुं भवत्यस्य वशीलमस्य तस्मान्न कर्मणा संबध्यते । किंच एष भूताधिपतिः ब्रह्मादिस्तंबपर्यंतानां भूतानामधिपतिरित्युक्तार्थं पदम् । एष भूतानां तेषामेव पालयिता रक्षिता । एष सेतुः किंविशिष्ट इत्याह । विधरणो वर्णाश्रमादिव्यवस्थायाः विधारयिता तदाह । एषां भूरादीनां ब्रह्मलोकांतानां लोकानामसंभेदायासंभिन्नमर्यादायै परमेश्वरेण सेतुवदविधार्यमाणा लोकाः संभिन्नमर्यादाः स्युरतो लोकानामसंभेदाय सेतुभूतोऽयं परमेश्वरो यः स्वयंज्योतिरात्मैव । एवंवित्सर्वस्य वशीत्यादि ब्रह्मविद्याफलमेतन्निर्दिष्टं । किंज्योतिरयं पुरुषः इत्येवमादिप्रश्नप्रपाठकविहितायामेतस्यां ब्रह्मविद्यायामेवंफलायां काम्यैकदेशवर्जितं कृत्स्नं कर्मकांडं तादर्थ्येन विनियुज्यते तत्कथमित्युच्यते । तमेतमेवंभूतमौपनिषदं पुरुषं वेदानुवचनेन मंत्रब्राह्मणाध्ययनेन नित्यस्वाध्यायलक्षणेन विविदिषंति विदितुमिच्छंति । केन ब्राह्मणाग्रहणमुपलक्षणार्थं । अविशिष्टो ह्यधिकारस्त्रयाणां वर्णानां । अथवा कर्मकांडेन मंत्रब्राह्मणेन वेदानुवचनेन कथं विविदिषंतीत्युच्यते यज्ञेनेत्यादि । ये पुनर्मंत्रब्राह्मणलक्षणेन वेदानुवचनेन प्रकाश्यमानं विविदिषंतीति व्याचक्षते तेषामारण्यकमात्रमेव वेदानुवचनं स्यात् । नहि कर्मकांडेन परमात्मा प्रकाश्यते । तं त्वौपनिषदमिति विशेषश्रुतेः । वेदानुवचनेनेति चाविशेषितत्वात्समस्तग्राहीदं वचनं । न च तदेकदेशोत्सर्गो यु-

नेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजं

क्तः । न तु त्वत्पक्षेऽप्युपनिषच्छब्दार्थैकदेशत्वं स्यात् । नाप्यव्याख्यानेऽविरोधादस्मत्पक्षे नैष दोषो भवति । यदा वेदानुवचनशब्देन नित्यस्वाध्यायोऽभिधीयते तदोपनिषदपि परिगृहीतैवेति वेदानुवचनशब्दार्थैकदेशो न परित्यक्तो भवति । यज्ञादिसहपाठाच्च । यज्ञादीनि कर्माण्येवानुक्रमिष्यन्वेदानुवचनशब्देन प्रयुंक्ते । तस्मात्कर्मैव वेदानुवचनशब्देनोच्यत इति गम्यते । कर्म हि नित्यस्वाध्यायः कथं पुनर्नित्यस्वाध्यायादिभिः कर्मभिरात्मानं विविदिषंतीति नैव हि तान्यात्मानं प्रकाशयंत्युपनिषद्वत् । नैष दोषः कर्मणां विशुद्धिहेतुत्वात्कर्मभिः संस्कृता हि विशुद्धात्मानः शक्नुवंत्यात्मानमुपनिषत्प्रकाशितमप्रतिबंधेन वेदितुं । तथा ह्याथर्वणे । विशुद्धसत्त्वः ततस्तु तं पश्यते निःकलं ध्यायमान इति । स्मृतिश्च ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इत्यादि । कथं पुनर्नित्यानि कर्माणि संस्कारार्थानीति गम्यते । स ह वा आत्मयाजी यो वेदेदं मेऽनेनांगं संस्क्रियत इदं मेऽनेनांगमुपाधीयत इत्यादिश्रुतेः । सर्वेषु हि धर्मशास्त्रेषु कर्माणि संस्कारार्थान्येवाचक्षते । अष्टाचत्वारिंशत्संस्काराः इत्यादिषु । गीतासु च । यज्ञो दानं तपश्चैव पावनानि मनीषिणां । सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः इति । यज्ञेनेति । द्रव्ययज्ञा ज्ञानयज्ञाश्च संस्काररूपाः तैः संस्कृतस्य च विशुद्धसत्त्वस्य ज्ञानोत्पत्तिरप्रतिबंधेन भविष्यति । अतो यज्ञेन विविदिषंति । दानेन । दानमपि पापक्षयहेतुत्वाद्धर्मवृद्धिहेतुत्वाच्च । तपसातप इत्य·

अयं तु सर्वपालक इति धर्माधर्मादिभिः संबध्यते इति न भावः । कर्मफलाप्रवृत्तो वेदस्य अनुवचनेन कथं विविदिषंतीत्यत्र उत्तरमाह । यदेत्यादि । वेदानुवचनेन तदर्थसम्यक्विषयीकृत्य यज्ञादिभिः विविदिषंति । वेदानुवचनेत्यस्य आख्यानं कर्म॰णेनेति । यत्र मंत्रब्राह्मणे कर्मफलापोक्तिः तस्य वेदानुवचनेन । वेदानुवचनं कृत्वा विविदिषंतीत्यर्थं न कुर्वंतीत्यर्थः कथयिष्यत । कर्मकांडेन कर्मब्राह्मणेनेत्यनुक्तत्वात् । भविष्यतीत्यर्थः । धर्मशास्त्रविशेषणं । तेषां संस्कारार्थत्वे किंप्रमाणमिति प्रश्ने श्रौतस्मार्तं प्रमाणयति । सहवा इत्यादिना । तर्हि आख्यानांतरमुपस्थितमित्याशंक्य तदपि वाक्यशेषवशादपेक्षितमेवेत्याह । यज्ञादिसहेति । संग्रहवाक्यं विवृणोति । यज्ञादिकर्माणीति । ब्रह्मविद्यायां कर्मकांडं विनियुज्यते । उपकारकं भवति ॥

समानशक्तानां देवर्षिहितो रैडूर्यैर्विषयसेवनं यदृच्छालाभसंतुष्टत्वमित्येतावत् ।१। पारिव्राज्यविधिमुक्त्वा तदपेक्षितमर्थवादमाकांक्षापूर्वकमुत्थापयति । कुतः कस्माद्धेतोः पुनरिति । किं चेति । आत्मलोकमिच्छन्तोऽनुमुमुक्षवोऽपि कर्मत्यागश्रवणादात्मविज्ञानकर्मेति तत्किं वक्तव्यमित्यर्थः । तां स्त्रीत्वं वैराग्यातिशयशालित्वं । पारिव्राज्यमेवेति नियमे हेतुमाह । पुत्रादिकर्मण इति । तस्यानर्थनिवर्तकत्वादिति शेषः । यद्यपि केवलं पुत्रादिकं नात्मलोकप्रापकं तथापि पारिव्राज्यं समुच्चितं तथा चित्तशुद्धेः सत्त्वात्स्यादित्याशंक्याह । असंभवेनेति । आत्मलोकार्थिनः नास्ति कर्मापेक्षा

विशेषेणाहकृत्वां जायमानादिप्राप्तौ विशेषणमनाशकेनेति । कामानशनमनाशकं ननु भोजननिवृत्तिः भोजननिवृत्तौ म्रियत एव नात्मावेदनं वेदानुवचनयज्ञदानतपःशब्देन सर्वमेव नित्यं कर्मोपलक्ष्यते । एवं काम्यवर्जितं नित्यं कर्मजातं सर्वमात्मज्ञानोत्पत्तिद्वारेण मोक्षसाधनत्वं प्रतिपद्यते । एवं कर्मकाण्डेनास्यैकवाक्यतावगति । एवं यथोक्तेन न्यायेनैतमात्मानं विदित्वा यथाप्रकाशितं मुनिर्भवति मननान्मुनिर्योगी भवतीत्यर्थः । एतमेव विदित्वा मुनिर्भवति नान्यं । ननु अन्यं वेदनेपि मुनित्वं स्यात्कथमवधार्यते एतमेवेति । बाढमन्यवेदनेपि मुनिर्भवेत् किन्त्वन्यवेदनेन न मुनिरेव स्यात् किं तर्हि कर्म्यपि भवेत्सः । एतं त्वौपनिषदं पुरुषं विदित्वा मुनिरेव स्यान्न तु कर्मी । अतो साधारणं मुनित्वं विवक्षितमस्येत्यवधारयत्येतमेवेति । एतस्मिन्हि विदिते तत्केन कं पश्येदित्येवं क्रियासंभवान्मननमेव स्यात् । किं च एतमेवात्मानं स्वं लोकमिच्छन्तः प्रार्थयन्तः प्रव्राजिनः प्रव्रजनशीलाः प्रव्रजन्ति प्रकर्षेण व्रजन्ति । सर्वाणि कर्माणि संन्यस्यन्तीत्यर्थः । एतमेव लोकमिच्छन्त इत्यवधारणान्न बाह्यलोकत्रयेप्सूनां पारिव्राज्येऽधिकार इति गम्यते । न हि गंगाद्वारं प्रतिपित्सुः काशीदेशनिवासी पूर्वाभिमुखः प्रैति । तस्माद्बाह्यलोकत्रयार्थिनां पुत्रकर्माऽपरब्रह्मविद्यासाधनं पुत्रेणायं लोको जय्यो नान्येन कर्मणा पितृलोक इत्यादिश्रुतेः । अतस्तदर्थिभिः पुत्रादिसाधनं प्रत्याख्याय न पारिव्राज्यं प्रतिपत्तुं युक्तमतत्साधनत्वात्पारिव्राज्यस्य । तस्मादेतमेव लोकमिच्छन्तः प्रव्रजन्तीति युक्तमवधारणं । आत्मलोकप्राप्तिर्ह्यविद्या

एतद्धस्म वै तत्पूर्वे विद्वांसः प्रजां न कामयंते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ।

निवृत्तौ स्वात्मन्यवस्थानमेव । तस्मादात्मानं चेल्लोकमिच्छति यस्तस्य सर्वक्रियोपरम एवात्मलोकसाधनं मुख्यमन्तरंगं । यथा पुत्रादिरेव बाह्यलोकत्रयस्य पुत्रादिकर्मणः आत्मलोकं प्रत्यसाधनत्वात् । असंभवेन च विरुद्धत्वमवोचाम । तस्मादात्मानं लोकमिच्छन्तः प्रव्रजन्त्येव सर्वक्रियाभ्यो निवर्तेरन्नेवेत्यर्थः । यथा च बाह्यलोकत्रयार्थिनः प्रतिनियतानि पुत्रादीनि साधनानि विहितानि एवमात्मलोकार्थिनः सर्वैषणानिवृत्तिः पारिव्राज्यं ब्रह्मविदो विधीयत एव कुतः पुनरत्र आत्मलोकार्थिनः प्रव्रजन्त्येवेत्युच्यते । तत्रार्थवादवाक्यरूपेण हेतुं दर्शयति । एतद्ध स्म वै तत् । तदेतत्पारिव्राज्ये कारणमुच्यते । ह स्म वै किल पूर्वे अतिक्रान्तकालीना विद्वांसः आत्मज्ञाः प्रजाकर्माऽपरब्रह्मविद्यां च प्रजोपलक्षितानि हि त्रयमेतत् बाह्यलोकत्रयसाधनं निर्दिश्यते प्रजामिति । प्रजां किं न कामयन्ते । पुत्रादिलोकत्रयसाधनेनानुतिष्ठन्तीत्यर्थः । नन्वपरब्रह्मदर्शनमनुतिष्ठन्त्येव तद्बलाद्व्युत्थानं नापवादात्प्रस्तत्परायणोऽन्यत्रात्मनो ब्रह्मविदः सर्वं तत्परायणादित्यपरं ब्रह्मदर्शनमप्यपरवदन्यदेव । अपरब्रह्मणोऽपि सर्वमव्यान्तर्भावात् । अन्यत्रान्यत्पश्यतीति च पूर्वापरबाह्यं तद्दर्शनं प्रतिषेधात् । अपूर्वमनपरमनन्तरमबाह्यमिति तत्केन कं पश्येद्विजानीयादिति । तस्मान्नात्मदर्शनव्यतिरेकेणान्यद्व्युत्थानकारणमपेक्षते । कः पुनस्तेषामभिप्राय इत्युच्यते । किं प्रयोजनं फलं साध्यं करिष्यामः प्रजया साधनेन । प्रजा हि साध्यलोकसाधनं निर्ज्ञाता स च बाह्यलोको नास्त्यस्मा

[illegible] अपरब्रह्मदर्शनमनु अनुतिष्ठन्त्येव । [illegible]

पुत्रादेर्बाह्यलोकेऽनु ज्ञानकाण्डस्य । मुख्यं साधनं पारिव्राज्यमेवेति विधेयमिति नियमोऽभिप्रेतः । सर्ववक्तृकर्तृ । निराकरोत्येव । विद्वान् । अत्र त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति । सोयं मनुष्यलोकः

आत्माव्यतिरिक्तस्यैव लोकस्य प्रजादिसाध्यत्वमिष्यतामिति चेन्नेत्याह । आत्मेति । आत्मयाजिनः संस्कारार्थकर्मत्वंगीकारादात्मनोऽस्ति संस्कार्यत्वमित्याशंक्याह । यद्यपीति । अथांगांगित्वं संस्कार्यत्वं च मुमुक्षोरात्मदर्शनविषयमेव किं नेष्यते तत्राह । नहीति । यदर्थोऽयमर्थवादस्तं विधिं निगमयति । तस्मादिति । महानुभावोऽयमात्मा नाकोऽयमिति दर्शिनं दुष्करमपि पारिव्राज्यं कुर्वंतीति स्तुतिरत्र विवक्षिता न विधिरित्याशंक्याह । नहीति । किंच विदित्वा व्युत्थायाथ भिक्षाचर्यं चरन्तीत्यत्र विज्ञानेन समानकर्तृकं व्युत्थानमुपदिश्यते विज्ञानं च सर्वाप्राप्तं न तु विधीयते ऽतो व्युत्थानमपि विधिमर्हतीत्युक्तेः याचाप्राप्तिं व्युत्थानोपदेशाय पारिव्राज्यं विधेयमित्याह । विज्ञानेनेति । पारिव्राज्यस्य विधेयत्वे हेत्वंतरमाह । फलेति । पुत्रादिफलापेक्षया पारिव्राज्यफलं विभागेनापदिश्यते तथा च । फलव-

आत्मा च नः आत्मत्वादेव न केनचित्साधनेनोत्पाद्यः आप्यो विकार्यः संस्कार्यो वा । यदप्यात्मयाजिनः संस्कारार्थं कर्मेति तदपि कार्यकरणात्मदर्शनविषयमेव इदं मेऽनेनांगं संक्रियत इत्यंगांगित्वादिदर्शनवताम् । नहि विज्ञानघनैकरसनैरंतर्यदर्शिनोंऽगांगिसंस्कारोपधानदर्शनं संभवति । तस्मान्न किंचित्प्रजादिसाधनैः करिष्यामः । अविदुषां हि तत्प्रजादिसाधनैः कर्तव्यं फलं । नहि मृगतृष्णिकायामुदकपानाय तदुदकदर्शी प्रवृत्त इति तत्रोषरमात्रमुदकाभावं पश्यतोऽपि प्रवृत्तिर्युक्ता एवमस्माकमपि परमार्थात्मलोकदर्शिनां प्रजादिसाधनसाध्ये मृगतृष्णिकासमेऽविद्वद्दर्शनविषये न प्रवृत्तिर्युक्तेत्यभिप्रायः । तदेतदुच्यते । येषामस्माकं परमार्थदर्शिनां नोऽयमात्माऽशनायादिविनिर्मुक्तः साध्वसाधुभ्यामविकार्योऽयं लोकः फलमभिप्रेतं । न चास्यात्मनः साध्यसाधनादिसर्वसंसारधर्मविनिर्मुक्तस्य साधनं किंचिदेषितव्यं । साध्यस्य हि साधनान्वेषणा क्रियते । असाध्यस्य साधनान्वेषणायां हि जलबुद्ध्या स्थल इव तरणं कृतं स्यात् । खे वा शकुनपदान्वेषणं । तस्मादेतमात्मानं विदित्वा प्रव्रजेयुरेव ब्राह्मणाः न कर्मारभेरन्नित्यर्थः । यस्मात्पूर्वे ब्राह्मणाः एवं विद्वांसः प्रजामकामयमानाः । त एवं साध्यसाधनसंव्यवहारं निंदंतोऽविद्व-

ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाऽथ भिक्षाचर्यं चरंति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः

द्विषयोऽयमिति कृत्वा किमकुर्वन्निति उच्यते । ते ह स्म किल पुत्रैषणायाश्च वित्तैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीत्यादि व्याख्यातं । तस्मादात्मलोकमिच्छंतः प्रव्रजंति प्रव्रजेयुरित्येष विधिरर्थवादेन संगच्छते । नहि सार्थवादस्यास्य लोकस्तुत्याभिमुख्यमुपपद्यते । प्रव्रजंतीत्यस्यार्थवादरूपत्वे तद्ध स्मेत्यादिरुत्तरो ग्रंथः । अर्थवादश्चेन्नार्थवादांतरमपेक्षेत । अपेक्षते त्वेतद्ध स्मेत्यर्थवादं प्रव्रजंतीत्येतत् । यस्मात्पूर्वे विद्वांसः प्रजादिकर्मभ्यो विनिवृत्ताः प्रव्रजितवंत एव तस्मादधुनातना अपि प्रव्रजंति प्रव्रजेयुरित्येवं सध्यमानं न लोकस्तुत्यभिमुखं भवितुमर्हति । विज्ञानसमानकर्तृकत्वोपदेशादित्यादिनाऽवोचाम । वेदानुवचनादिसहपाठाच्च । यथात्मवेदनसाधनत्वेन विहितानां वेदानुवचनादीनां यथार्थत्वमेव न चार्थवादत्वं तथा तैरेव सह पठितस्य पारिव्राज्यस्यात्मलोकप्राप्तिसाधनत्वेनार्थवादत्वमयुक्तं । फलविभागोपदेशाच्च । एतमेवात्मानं लोकं विदित्वेत्यन्यस्मात्पुत्रसाध्याल्लोकादात्मानं फलांतरत्वेन प्रविभजति यथा पुत्रेणैवायं लोको जय्यो नान्येन कर्मणा कर्मणा पितृलोक इति न च प्रव्रजंतीत्येतत्प्राप्तवत्लोकस्तुतिपरं प्रधानवच्चार्थवादापेक्षं समंजसं । तस्मात् । तस्माद्भ्रांतिरेवैषा लोकस्तुतिपरमिति । न चानुष्ठेयेन पारिव्राज्येन स्तुतिरुपपद्यते । यदि पारिव्राज्यम-

[illegible]

त्वात्पुत्रादिवत्पारिव्राज्यस्य विधेयत्वमित्यर्थः । आत्मानं पश्यतीत्यात्मयाजी तस्य पारिव्राज्यविधानार्थः एतद्ध स्मेत्यादि । कार्यकरणस्यात्मत्वेन यद्दर्शनं तद्विषयमेव । मृगतृष्णिकायामुदकदर्शी । लोकश्चेति । न ह्येवं विदुष इति । एतमेवेति । प्रकृतमात्मानं स्वं लोकमापाततो विदित्वा तमेव साक्षात्कर्तुमिच्छंतः प्रव्रजंतीति वचनात्पुत्रादिसाध्यान्मनुष्यादिलोकादात्माख्यलोके पारिव्राज्यस्य फलांतरत्वेन यतः श्रुतिर्विभज्य विदधाति अतस्तस्य विधेयत्वमप्रत्यूहमित्यर्थः । किंच प्रधानस्य दर्शपूर्णमासादेरर्थवादापेक्षत्ववत्पारिव्राज्यस्यापि तदपेक्षत्वमुपलभ्यते । तेन तस्य दर्शादिवद्विधेयत्वमित्याह । प्रधानेति । किंच पारिव्राज्यं सकृदेव श्रुतं चेद्विवक्षितमन्यस्तुतिपरत्वान्न चेदं सकृदेव श्रूयते । प्रव्रजंतीत्युपक्रम्य प्रजां न कामयंते व्युत्थायाथ भिक्षाचर्यं चरंतीत्यभ्यासात् ।

भवतिहि पारिव्राज्येविधिस्तथापिसर्वकर्मानधिकृतविषयः स्यादित्याशंक्याह। यदपीति। तत्रकर्मानधिकृतेपुंसि। तत्रहेतुमाह। कर्त्तृत्वेनेति। कर्मानधिकृतेनपुंसाकर्त्तव्यतयाज्ञातत्वंवृक्षारोहणादाविवपारिव्राज्ये·
पिनास्तितथाचाऽनधिकृतविषयेपारिव्राज्यंकल्प्यतेतस्मिन्विषयेवृक्षारोहणाद्यपिकल्प्येत। अविशेषादित्यर्थः। पारिव्राज्यमन्यत्रयज्ञावाद्धीयतामिहत्वस्तुतिरेवेतिआशंक्याह। नचेति। आत्मज्ञानाधिकाराद

नुष्ठेयमपिसदन्यस्तुत्यर्थंस्यात्दर्शपूर्णमासादीनामप्यनुष्ठेयानांस्तुत्यर्थतास्यात्। नचान्यत्रकर्त्तव्यतेनस्माद्विधयान्निज्ञातायतइहस्तुत्यर्थोभवेत्। यदिपुनः कश्चि
द्विधिः परिकल्प्येतपारिव्राज्यस्यसइहैवमुख्योनान्यत्रसंभवति। यदप्यनधिकृतविषयेपारिव्राज्यंपरिकल्प्यतेतत्रवृक्षाग्रारोहणाद्यपिपारिव्राज्यवत्कल्प्ये
त। कर्त्तव्यत्वेनाऽनिर्ज्ञातत्वाविशेषात्। तस्मात्स्तुतित्वगंधोप्यत्रनशक्यःकल्पयितुं। यद्ययमात्मालोकइष्यतेकिमर्थंतत्प्राप्तिसाधनत्वेनकर्मानवना
रंभेरन्किंपारिव्राज्येनेति। अत्रोच्यते। अस्यात्मलोकस्यकर्मभिरसंबंधायमात्माकर्तृभिष्ठैतः प्रव्रजेयुः सत्त्वात्मासाधनत्वेनफलत्वेनचोत्पाद्यत्वादि
प्रकाराणामन्यतमत्वेनापिकर्मभिनसंबध्यते। कस्मात्सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यतइत्यादिलक्षणः। यस्मादेवंलक्षणश्चात्माकर्मफलसाध
नाऽसंबंधीसर्वसंसारधर्मविलक्षणोऽशनायायतीतोऽस्थूलादिधर्मवानजोऽजरोऽमृतोऽभयः सैंधवघनवत्विज्ञानैकरसस्वभावः स्वयंज्योतिरन्यत्र
विध्यनुपलंभेसमर्थ्यतेयदित्यादिना अन्यत्रप्रक्रियायामितियावत्। एकएवाद्वितीयोऽपूर्वोऽनपरोऽनंतरोऽबाह्यइत्येतदागमतस्तर्कतश्चस्थापितंवि
शेषश्चजनकयाज्ञवल्क्यसंवादेस्मिन्तस्मादेवंलक्षणआत्मनिविदितेआत्मतत्वेननैवकर्मारंभउपपद्यते। नहिचक्षुष्मान्पथिप्रवृत्तोऽहनिकूपे·

सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यतेऽशीर्योनहिशीर्यतेऽसंगोनहिसज्यतेऽसितोनव्यथतेनरिष्यत्येतमुहैवैतेनतरतइत्यत
पापमकरवमित्यतःकल्याणमकरवमित्युभेउहैवैषएतेतरतिनैनंकृताकृतेतपतः॥ २२॥

कंटकेवापतति। कृत्स्नस्यचकर्मफलस्यविद्याफलेंतर्भावात्। नचायत्नप्राप्येवस्तुनिविद्वान्यत्नमातिष्ठति। अंकेचेन्मधुविंदेतकिमर्थंपर्वतंव्र
जेत्। इष्टस्यार्थस्यसंप्राप्तौकोविद्वान्यत्नमाचरेत्। सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यतइतिगीतास्विहापिचैतस्यैवपरमानंदस्यब्रह्म
विदाप्यस्यान्यानिभूतानिमात्रामुपजीवंतीत्युक्तेः अतोब्रह्मविदांनकर्मारंभः। यस्मात्सर्वैषणाविनिवृत्तः सएषनेतिनेत्यात्मानमात्मत्वेनो
पगम्यतद्रूपेणैववर्त्तते। तस्मादेतमेवंविदंनेतिनेत्यात्मभूतंउहएवमेतेवक्ष्यमाणेनतरतोनप्राप्नुतइतियुक्तमेवेतिवाक्यशेषः। केते
इत्युच्यते। अतोस्मान्निमित्ताच्छरीरधारणादिहेतोः पापमपुण्यंकर्माऽकरवंकृतवानस्मिकष्टंखलुममवृत्तमनेनपापेनकर्मणाहंनरकंप्रति
पत्स्यइतियोयंपश्चात्तापःकर्मकृतवतः परितापः सएतंनेतिनेत्यात्मभूतंनतरतितथाऽतःकल्याणंफलविषयकामान्निमित्तात्। यज्ञदानादि·
निमित्तंपुण्यंशोभनंकर्मकृतवानस्मि अतोहमस्यफलंसुखमुपभोक्ष्येदेहांतरइत्येषोपिहर्षस्तंनतरति। उभेउहएवएषब्रह्मविदेतेकर्मणी
तरति। पुण्यपापलक्षणे। एवंब्रह्मविदःसंन्यासिनःउभेअपि·

कारकत्वेना। कर्मत्वरूपेण। फलत्वेनेत्यस्यविवरणंउत्पाद्यत्वादि० नाचेन। [illegible] अर्थं कर्मकांड [illegible]
स्वरूपाणांक्रियाभिः उहेतिनिपातावभ्यांस्तचितार्थोयस्मादित्यनुभाषितः। एतस्माद्विधयादन्यत्रकर्तव्यताऽनिर्ज्ञाता·
न्यत्रपारिव्राज्यविध्यनुपलंभात्इत्यर्थः। ज्ञानकांडे। उच्यतां। कर्मकांडे। पुमान्। यस्मात्कर्मफलं० अबाह्यः एवंलक्षणआत्माइत्येतत्। आगमतः उपपद्यते। सएषइत्यादिव्याकर्तुंशंकयतिपरीति।

तयोरुक्तिं कुर्वतापकत्वं तत्राह। अनात्मज्ञं हीति। नित्यानुष्ठानं। वचनाभ्यां। एषैव शवलं नामात्मविद्यया सर्वान्यविषयदृष्टितिरस्करणं तत्र बालो बाल्यं निरवशेषमात्मज्ञानं पाण्डित्यं। निर्विद्यनिःशेषं कृत्वेत्यर्थः॥

कर्माणी क्षीयेंते पूर्वजन्मनि कृतेयेते इहजन्मनि कृतेयेते च पूर्वं चनारभ्यंते। किंचनैनं कृताकृते कृतं नित्यानुष्ठानमकृतं तस्यैवाक्रियाते अपि कृताकृते एनं न
तपतो॰ नात्मज्ञं हि कृतं फलदानेनाकृतं प्रत्यवायोत्पादनेन तपनोः यंतु ब्रह्मविदात्मविद्याग्निना सर्वाणि कर्माणि भस्मीकरोति। यथैधांसि समिद्धो
ऽग्निरित्यादिस्मृतेः। शरीरारंभकं यास्तूपभोगेन क्षयः। अतो ब्रह्मविदकर्मसंबंधी॥ ७०॥ तदेतदृचा ब्राह्मणेनोक्तमर्थं मंत्रेणाभ्युक्तं प्रकाशितमेषने
४ नित्यो तिनेत्यादिलक्षणो महिमा। अन्ये तु महिमानः कर्मकृताइत्यनित्याः। अयं तु नेति नेत्यादिलक्षणो महिमा स्वाभाविकत्वान्नित्यो ब्रह्मविदो ब्राह्मणस्य त्य
क्तसर्वैषणस्य। कुतोऽस्य नित्यत्वमिति हेतुमाह। कर्मणा न वर्धते शुभलक्षणेन कृतेन वृद्धिलक्षणां विक्रियां न प्राप्नोति तथाऽशुभेन कर्मणा नो कनीया
न्नाप्यपक्षयलक्षणां विक्रियां प्राप्नोति उपचयापचयहेतुभूताएव हि सर्वा विक्रियाः इत्येताभ्यां प्रतिषिध्यंते अतो विक्रियावत्त्वान्नित्य एष

तदेतदृचाभ्युक्तम् एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान्। तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते क
र्मणा पापकेनेति तस्मादेवंविच्छांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति ॥

महिमा। तस्मात्तस्यैव महिम्नः स्याद्भवेत् पदवित् पदस्य वेत्ता पद्यते गम्यते ज्ञायते इति महिम्नः स्वरूपमेव पदं तस्य पदस्य वेदिता। किं तत्पदवेदनेस्या॰
दित्युच्यते। तं विदित्वा महिमानं न लिप्यते न संबध्यते कर्मणा पापकेन धर्माधर्मलक्षणेन। उभयमपि पापकमेव विदुषः। यस्मादेवमकर्मसं
बंधीव ब्राह्मणस्य महिमा नेति नेत्यादिलक्षणस्तस्मादेवंविच्छांतो बाह्येंद्रियव्यापारत उपशांतः तथा दांतोंतःकरणतृष्णातो निवृत्तः उपरतः
सर्वैषणाः विनिर्मुक्तः संन्यासीति तितिक्षुर्द्वंद्वसहिष्णुः समाहितः इंद्रियांतःकरणचलनरूपात् व्यावृत्त्यैकाग्र्यरूपेण समाहितो भूत्वा। तदेत
दुक्तं पुरस्तात्। बाल्यं च पाण्डित्यं च निर्विद्येति। आत्मन्येव स्वकार्यकरणसंघाते आत्मानं प्रत्यक्चेतयितारं पश्येत् पश्यति। तत्र किं तावन्मा
त्रं परिच्छिन्नं नेत्युच्यते। सर्वं समस्तमात्मानमेव पश्यति नान्यदात्मव्यतिरिक्तं वालाग्रमात्रमप्यस्तीत्येवं पश्यति मननान्मुनिर्भवति जाग्रत्
स्वप्नसुषुप्ताख्यं भावत्रयं हित्वा॥ ॥श्रीमते रामानुजाय नमो श्रीमते जानकीवल्लभाय नमः श्रीमते सीतारामपतये नमः रामरामरामराम

इति कहोलप्रश्नटीकायां। सर्ववित्। आत्मा कर्मतत्फलसंबंधशून्यस्तपापात्तनो जानन्नित्यर्थः॥ ॥रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामः

इतिकर्त्तव्यतयासहर्त्तव्यनाशेनिकर्त्तव्यतयाताका।निरुपाधिकब्रह्मज्ञानात्कैवल्यमितिगमयितुमितिशब्दः।संप्रतिसोपाधिकब्रह्मध्यानादभ्युदयंदर्शयति।योयमित्यादिना।ईश्वरस्थेत्कर्मफलंप्राणिभ्यो·

एवंपश्यंतंब्राह्मणंनैनंपाप्मापुण्यपापलक्षणःतरतिनप्राप्नोति।अयंतुब्रह्मवित्तुसर्वंपाप्मानंतरत्यात्मभावेनैवव्याप्नोत्यतिक्रामति।नचैनंपाप्माकृताकृतल
क्षणात्तपतीष्टफलप्रत्यवायोत्पादनाभ्यांसर्वंपाप्मानमयंतपतिब्रह्मवित्सर्वात्मदर्शनवह्निनाभस्मीकरोति।सएषएवंवित्विपापोविगतधर्माधर्मोवि
रजोविगतरजोविकामोविगतकामः।अविचिकित्सोअविचिकित्सः छिन्नसंशयोऽहमस्मिसर्वात्मापरंब्रह्मेतिनिश्चितमतिर्ब्राह्मणोभवत्ययंत्वेवंभू
तः एतस्यामवस्थायांमुख्योब्राह्मणः प्रागेतस्माद्ब्रह्मस्वरूपावस्थानात् गौणमस्यब्राह्मण्यं।एषब्रह्मलोकःब्रह्मैवलोकोब्रह्मलोकःमुख्योनिरु
पचरितःसर्वात्मभावलक्षणः॥हेसम्राट्॥एनंब्रह्मलोकंपरिप्रापितोस्यऽभयनेत्यादिलक्षणमितिहोवाचयाज्ञवल्क्य॥एवंब्रह्मभूतोजनको
याज्ञवल्क्येनब्रह्मभावमापादितःप्रत्याह॥सोहंत्वयाब्रह्मभावमापादितःसन्भगवतेतुभ्यंविदेहान्देशान्ममराज्यंसमस्तंददामिमांचसहविदे·

नैनंपाप्मातरतिसर्वंपाप्मानंतरतिनैनंपाप्मातपतिसर्वंपाप्मानंतपतिविपापोविरजो
विकामोऽविचिकित्सोब्राह्मणोभवत्येषब्रह्मलोकःसम्राडितिहोवाचयाज्ञवल्क्यःसोहं
भगवतेविदेहान्ददामिमांचापिसहदास्यायेति॥ ॥७१॥ ॥सवाएषः
महानजआत्मान्नादोवसुदानोविंदतेवसुयएवंवेद॥ ॥७२॥रामरामरामः

हेर्दास्यायदासकर्मणेददामीतिचसब्दात्संबध्यते॥परिसमापिताब्रह्मविद्यासहसंन्यासेनसांगास्येतिकर्त्तव्यताकापरिसमाप्तः पुरुषार्थः।
एतावत्पुरुषेणकर्त्तव्यम्॥एषानिष्ठाएषापरागतिः॥एतन्निःश्रेयसंएतत्प्राप्यकृतकृत्योब्राह्मणोभवति॥एततसर्ववेदानुशासनमिति
॥ ॥७१॥ ॥योयंजनकयाज्ञवल्क्याख्यायिकायांव्याख्यातः।आत्मासवैएषमहानजआत्माअन्नादःसर्वभूतस्थःसर्वान्नानामत्तावसुदा
नःवसुधनंसर्वप्राणिकर्मफलंतस्यदाता॥प्राणिनांयथाकर्मफलेनयोजयितेत्यर्थः॥तमेतमजमन्नादंवसुदानमात्मानमन्नादवसुः
दानगुणाभ्यांयुक्तंयोवेदससर्वभूतेष्वात्मभूतोऽन्नमत्तिविंदतेचवसुसर्वंकर्मफलजातंलभते॥सर्वात्मत्वादेवयएवंयथोक्तंवेद।अथवा
दृष्टफलार्थिभिरप्येवंगुणउपास्य॥तेनान्नादोवसोश्चलब्धा॥दृष्टेनैवफलेनाऽन्नात्त्वेनगोश्वादिनाचास्ययोगोभवतीत्यर्थः॥७२॥रामराम·

ददातीतिनहितस्यवेश्मनिर्दृष्टफलंस्यात्तमित्याशंक्याह।प्राणिनामिति।सर्वात्मत्वफलमुपासनमुक्त्वापक्षांतरमाह।अथवेति।दृष्टफलमन्नात्त्वंधनलाभश्च॥रामरामरामरामरामरामरामः॥

निरुपाधिकप्रज्ञानान्मुक्तिरुक्तास्ते पाधिकब्रह्मध्यानाद्वाभ्युदयः तत्कायात्र्किंतु नरकं डिकयेत्याशंक्याह। इदानीमिति। कल्पितप्रपंचसंबंधप्रयुक्तेः सविशेषत्वं ब्रह्मणः स्यादित्याशंक्याह। पुनरिति। तस्मिन्नात्मनि कल्पितः सृष्ट्यादिरूपायस्तेन जनितस्तस्मिन्कारणत्वादिविशेषब्रह्मणस्य निरासार्थं नेतीत्यभावविशिष्टत्वमिति चेन्नेत्याह। तदुपसंहृतमिति। नेत्यभावेनापि न संसृष्टमित्यर्थः। केवलमिति स्वयंक्ति

इदानीं समस्तस्यैवारण्यकस्य योऽर्थ उक्तः स संक्षिप्तोऽस्यां कंडिकायां निर्दिश्यते एतावान्समस्तआरण्यकार्थ इति। स वा एष महानज आत्माऽजरो न जीर्यत इति न विपरिणमत इत्यर्थः। अमरो यस्मादजरस्तस्मादमरो न म्रियत इत्यमरः। यो हि जीर्यते जायते च स विनश्यति विम्रियते वा अयं त्वजत्वादमरत्वाच्चाविनाशी अत एवामृतो यस्माज्जनिप्रभृतिभिस्त्रिभिर्भावविकारैर्वर्जितस्तस्मादितरैरपि भावविकारैस्त्रिभिस्तत्कृतैश्च काममोहादिभिर्मृत्युरूपैर्वर्जित इत्येतदभयो अत एव। यस्माच्चैवं पूर्वोक्तविशेषणस्तस्माद्भयवर्जितः। भयं चाविद्याकार्यं तत्कार्यप्रतिषेधेन भावविकारप्रतिषेधेन चाविद्यायाः प्रतिषेधः प्रसिद्धो वेदितव्यः। अभय आत्मैवंगुणविशिष्टः किमसौ ब्रह्म परिवृढं निरतिशयं महदित्यर्थः। अभयं वै ब्रह्म प्रसिद्धमेतल्लोकेऽभयं ब्रह्मेति। तस्माद्युक्तमेवंगुणविशिष्ट आत्मा ब्रह्मेति। य एवं यथोक्तमात्मानमभयं ब्रह्म वेद सोऽभयं हि ब्रह्मैव भवति। एष सर्वस्या

स वा एष महानज आत्माऽजरोऽमृतोऽभयो ब्रह्माऽभयं वै ब्रह्माऽभयं हि वै ब्रह्म भवति य एवं वेद॥ ७२ ॥

॥ ॥ चतुर्थं ब्राह्मणम्॥ ॥

उपनिषदः संक्षिप्तोऽर्थ उक्तः। एतस्यैवार्थस्य सम्यक्प्रबोधायोत्पत्तिस्थितिलयादिकल्पना क्रियाकारकफलाध्यारोपणा चात्मनि कृता तदपोहेन च नेति नेतीत्यध्यारोपितविशेषापनयद्वारेण पुनस्तत्त्वमावेदितं यथा एकप्रभृत्या परार्धसंख्यास्वरूपपरिज्ञानाय रेखाध्यारोपणं कृत्वा एकेयं रेखा दशेयं सहस्रेयमिति ग्राहयति अवगमयति संख्यास्वरूपं केवलं न तु संख्याया रेखात्मत्वमेव यथा वा अकारादीन्यक्षराणि विजिग्राहयिषुः पत्रमसीरेखादिसंयोगोपायमास्थाय वर्णानां तत्त्वमावेदयति न पत्रमस्याद्यात्मतामक्षराणां ग्राहयति। तथा चेहोत्पत्त्याद्यनेकोपायमास्थायैकं ब्रह्मतत्त्वमावेदितम्। पुनस्तत्कल्पितोपायजनितविशेषपरिशोधनार्थं नेति नेतीति तत्त्वोपसंहारः कृतः। तदुपसंहृतं पुनः परिशुद्धं केवलमेव सफलं ज्ञानमेतस्यां कंडिकायामिति॥ ॥ ७२ ॥ ॥ चतुर्थं ब्राह्मणम्॥ ॥ प्रकरणम्॥ ॥

ब्राह्मणान्तेऽस्यां कंडिकायां·

सृष्ट्यादिवचनस्य गतिमुक्त्वा प्रकृतमुपसंहरति। सफलमिति। इतिशब्दो ब्राह्मणसमाप्त्यर्थः। परिशुद्धं द्वैतभावेनैव सह हानप्रापणीयं ते। अजत्वादजरत्वादेवः जन्मजरामरणाख्यैर्जीवात्मा। कोऽसौ इत्यर्थः। अमृत इत्यस्यैवार्थकथनमिदं। अस्तिवर्द्धते विपरिणामं प्राप्नोतिति पश्चात्। सृष्ट्यादेरारोपितत्वे गमकमाह। तदपोहेनेति। उक्तं। निरूपणं। सर्वविशेषनिषेधेन तदुपसंहृतत्वं परिशुद्धं केवलमेव·

त्तस्यैव ब्रह्मणस्तत्त्वमिति शेषः । याज्ञवल्कीयं कांडं पंचमोध्यायः संपूर्णः ॥ विगृह्यवादो जयपराजयप्रधानो जल्पन्यायः । उपसंहृतं तद्देवतत्त्वमिति शेषः । संप्रत्युत्तरब्राह्मणस्यागतार्थत्वमाह । अथेति । संबंधयोजनं । आगमोपपत्तिभ्यां निश्चिते तत्त्वे निगमनमकिंचित्करमित्याशंक्याह । अयं चेति । प्रकारांतरेण संगतिमाह । अथवेति । इतिशब्दो ब्राह्मणसंगतिसमाप्त्यर्थः । समाप्ते शारीरकब्राह्मणे वंशब्राह्मणं व्याख्यातव्यं । कृतं गतार्थेन मैत्रीब्राह्मणेनेत्याशंक्य मधुकांडार्थमनुद्रवति । आगमेति । पांचमिकार्थमनुभाषते । पुनरिति । यज्ञमानं देवा दर्वी पितरोन्वायत्ता इत्यादिरुपपत्तिः निखिलपंचमाध्या

आगमप्रधानेन मधुकांडेन ब्रह्मतत्त्वं निर्द्धारितं । पुनस्तस्यैवोपपत्तिप्रधानेन याज्ञवल्कीयेन कांडेन प्रतिपक्षपरिग्रहं कृत्वा विगृह्यवादेन निर्द्धारितं शिष्याचार्यसंबंधेन च प्रश्नप्रतिवचनन्यायेन सविस्तरं विचार्योपसंहृतं । अथेदानीं निगमनस्थानीयं मैत्रेयीब्राह्मणमारभ्यते ॥ अयं च न्यायो वाक्यकोविदैः परिगृहीतो हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति । अथवागमप्रधानेन मधुकांडेन यदमृतत्वसाधनं ससंन्यासमात्मज्ञानमधिगम्यते ॥ तर्कप्रधानं हि याज्ञवल्कीयं कांडं । तस्माच्छास्त्रतर्काभ्यां निश्चितमेतद्यदात्मज्ञानं ससंन्यासममृतत्वसाधनमिति । तस्माच्छास्त्रश्रद्धावद्भिरमृतत्वप्रतिपित्सुभिरेतत्प्रतिपत्तव्यमिति । आगमोपपत्तिभ्यां हि निश्चितोर्थः श्रद्धेयो भवत्यव्यभिचारादिति ॥ अक्षराणां चतुर्थे यथा व्याख्यातोर्थस्तथा प्रतिपत्तव्योवाणि । यान्यक्षराण्यव्याख्यातानि तानि व्याख्यास्यामः । अथेति हेत्वपदेशा

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायन्यथ ह याज्ञवल्क्योन्यद्वृत्तमुपाकरिष्यन् ॥ ७४ ॥ मैत्रेयीति होवाच याज्ञवल्क्यः प्रव्रजिष्यन्वा अरेहमस्मात्स्थानादस्मि हंत तेऽनया कात्यायन्यांतं करवाणीति ॥ ७५ ॥ ॥ सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्या

नंतर्यप्रदर्शनार्थः । हेतुप्रधानानि हि वाक्यान्यतीतानि तदनंतरमागमप्रधानेन प्रतिज्ञातोर्थो निगम्यते मैत्रेयीब्राह्मणेन हशब्दो वृत्तार्थद्योतको याज्ञवल्क्यस्य ऋषेः किल द्वे भार्ये पत्न्यौ बभूवतुरास्तां मैत्रेयी च नामतः एका अपरा कात्यायनी नामतः तयोर्भार्ययोर्मैत्रेयी ह किल ब्रह्मवादिनी ब्रह्मवदनशीला बभूव आसीत् । स्त्रीयां योचिता सा स्त्रीप्रज्ञैव यस्याः प्रज्ञा गृहप्रयोजनान्वेषणालक्षणा सा स्त्रीप्रज्ञा एवं तर्हि तस्मिन्काले आसीत्कात्यायनी । अथैवं सति ह किल याज्ञवल्क्यः पूर्वस्माद्गार्हस्थ्यलक्षणाद्वृत्तात्पारिव्राज्यलक्षणं वृत्तं उपाकरिष्यन्नुपाचिकीर्षुः सन् ॥ ७४ ॥ हे मैत्रेयीति ह मैत्रेयीं स्वभार्यामामंत्रयामास आमंत्र्य चोवाच ह प्रव्रजिष्यन्पारिव्राज्यं करिष्यन्वै अरे मैत्रेयि अस्मात्स्थानाद्गार्हस्थ्यादहमस्मि भवामि मैत्रेयि अनुजानीहि मां हंत ते इच्छसि यदि तेनया कात्यायन्यांतं करवाणीत्यादि व्याख्यातं ॥ ७५ ॥ सैवमुक्तोवाच मैत्रेयी सर्वेयं पृथिवी वित्तेन पूर्णा स्यान्नु किं स्यां किमहं वित्तसाध्येन कर्मणाऽमृता स्याहो

यः संपूर्णोध्यायश्च याज्ञवल्कीयं कांडं । हेत्वपदेशानंतरं नित्यशुद्धत्वादि आत्मानात्मविवेकस्यास्य व्यभिचारादिति व्ययं न व्यभिचरति नहीत्यादेश्च न सन्धपेक्षेति हेतुस्तत्त्वः । अत्र मुनिकांडे मैत्रेयीब्राह्मणस्यारंभो ससंन्यासं न्यासस्य अवश्यकर्तव्यता नास्तीति जायेत अतः संन्यासस्य अवश्यकर्तव्यता मुनिकांडे पुनः मैत्रेयीब्राह्मणारंभः कृतः । मधुकांडेन आगम । वाक्यानां

[illegible]

139

केवकोरेगा२

निश्चयेन ध्यानुमिद्ध्यं। भवति इत्यस्य विवरणं भवंती। नेति० दि। अन्यत्समानं पूर्वव्याख्यानेन समानमित्यर्थः। आत्मनीति। दृष्टे सर्वमिदं विदितं भवतीत्यत्र यत्संबंधः। आत्मनि दृष्ट इत्युक्ते आत्मदर्शनं कै
थमत आह। इति प्रश्नमाशंक्योपायमाह श्रुते मते विज्ञात इति श्रवणमनननिदिध्यासनैर्विज्ञाते दर्शनं भवतीत्यर्थः। श्रुतमतयोरेकार्थत्वमाशंक्याह। श्रवणान्तिनि। एवं आत्मनि दृष्टे सति। स यथा दुंदुभेरिति। चिद
निरिकरणः सत्त्व दृष्टान्तेउच्यते। ग्राह्यादृष्टान्। दुंदुभिशब्दसामान्यात्भिन्नानुदुंदुभिशब्दविशेषान्। दुंदुभेस्त्वग्रहणेन दुंदुभिशब्दसामान्यस्य ग्रहणेन शब्दः दुंदुभिशब्दविशेषगृहीतः गृही
ता भवंतीत्यर्थः। उक्तेर्थं दुंदुभिध्माधातस्येत्यादिवाक्यं आचष्टे दुंदुभ्याघातविशिष्टस्य शब्दसामान्यस्य ग्रहणेन वा शब्दगता विशेषा गृहीता भवंति। यथाग्नेर्विस्फुलिंगा इत्यनेन प्रविभागात्प्र
वत्यमेकत्वं एवं जगन्नामरूपविकृतं प्राग्भुत्पत्ते। प्रज्ञानघन एवेति उक्तं गृहीतुमित्येतदुच्यते। अयथेति। उपनिषदप्रियमित्येन उपासीतेत्याद्याः। अनुव्याख्यानि मंत्रविवरणानि। आख्या

नस्यामीति नेति होवाच याज्ञवल्क्य इत्यादि समानमन्यत् ॥ ७३ ॥ ७४ ॥ स होवाच प्रियमेव पूर्वं खलु नो त्वमस्यं भवतिभवंतीति प्रियमेवा हृधवर्द्धितवती नि
हारितवत्यस्यऽतः तुष्टोहं हं ते त्वसि चेदमृतत्वसाधनेच्छातु हे भवति ते तुभ्यं तदमृतत्वसाधनं व्याख्यास्यामीति ॥ ७५ ॥ आत्मनि खलु अरे मैत्रेयि दृ
त्यान्वहं तेना मृता हो इनेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥
॥ ७६ ॥ सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेत्थ तदेव मे विब्रूहीति ॥ ७७ ॥ स होवाच याज्ञवल्क्यः प्रि
या वै खलु नो भवसतीति प्रियमवृधत्तं तती ई भवतेतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ७८ ॥ स होवाच न वा अ
रे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय
जाया प्रिया भवति न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवंत्यात्मनस्तु कामाय पुत्राः प्रिया भवंति न वा अरे वित्तस्य कामाय वित्तं प्रियं भ
वत्यात्मनस्तु कामाय वित्तं प्रियं भवति न वा अरे पशूनां कामाय पशवः प्रिया भवंत्यात्मनस्तु कामाय पशवः प्रिया भवंति न वा अरे ब्रह्मणः का
माय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति न वा
अरे लोकानां कामाय लोकाः प्रिया भवंत्यात्मनस्तु कामाय लोकाः प्रिया भवंति न वा अरे देवानां कामाय देवाः प्रिया भवंत्यात्मनस्तु कामा
य देवाः प्रिया भवंति न वा अरे वेदानां कामाय वेदाः प्रिया भवंत्यात्मनस्तु कामाय वेदाः प्रिया भवंति न वा अरे भूतानां कामाय भूतानि प्रि
याणि भवंत्यात्मनस्तु कामाय भूतानि प्रियाणि भवंति न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्या
त्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितं ॥ ७९ ॥ ब्रह्म तं परादा
द्योन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योन्यत्रात्मनो देवान्वेद
वेदास्तं परादुर्योन्यत्रात्मनो वेदान्वेद भूतानि तं परादुर्योन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे
देवा इमानि भूतानीदं सर्वं यदयमात्मा ॥ ८० ॥

केकर्यं दृष्टव्यात्मनीत्युच्यते। पूर्वमाचार्यागमाभ्यां श्रुते। पुनस्तर्केण उपपत्त्या मते विचारिते श्रवणं त्वागममात्रेण मत उपपत्त्या पश्चाद्विज्ञाते एवमे
तन्नान्यथेति निर्धारिते किं भवतीत्युच्यते। इदं सर्वं विदितं भवति। इदं सर्वमिति ॥ ८० ॥ यदात्मनोन्यदात्मव्यतिरेकेणाभावात्। चतुर्थशब्दनिश्वासनैवलोकार्थं निश्वासः
नानि अथर्वाणः। अग्रिमपत्रस्थं। अत्र स यथाऽर्द्रैधाग्नेरित्यादौ दृष्टांतमित्याद्यधिकं दृष्टं अत आह। चतुर्थेति। इदं सर्वमित्यनूद्य तस्यार्थमाह। यदात्मनोन्यदिति। तदात्मनि दृष्टे दृष्टं स्यादिति शेषः ॥

येन इयंतिता निभन्नलक्षणत्वेन स्थानिः अवसंज्ञा हिनाभवतीति वचनेन·

यथा प्रलयकाले बुद्बुदफेनादीनां सलिलव्यतिरेकेणाऽभावः। एवं प्रज्ञानव्यतिरेकेणा तत्कार्याणां तस्मिन्लीयमानानामभावः। तस्मादेकमेव ब्रह्म प्रतिपत्तव्यमित्यत्र प्रलयप्रदर्शनाय दृष्टान्तं आह स
यथेति। यागजनितधर्मः। होमजनितधर्मः। अशनजनितः पानजनितः धर्मः एकलयस्थाने। एवं इत्यस्य सर्वत्र पदेऽन्वयः। दुंदुभिशब्दसामान्यं विहाय केवलान् दुंदुभिशब्दविशेषाणां कुर्यातेत्य
कथं लिंबाख्यायाप्यकेनमुक्तः इत्युक्ते इत्यादिनाह। इहेति। सैंधवखिल्य। अपारं प्रत्युत्पथं अबाह्यः इत्युक्ते। नानाभूतं विशेषविज्ञानमनन्तमिति शेष
सामर्थ्याद्युक्तो भवतीति पृथङ्नोक्तः ।। ७० ।। ७१ ।। ७२ ।। ७३ ।। इह तु सर्वशास्त्रार्थोपसंहार इति कृत्वार्थप्राप्तोऽप्यर्थः स्पष्टीकर्तव्य इति पृथगुच्यते ।। ७४ ।। सर्वक्र
यप्रलये विषयानिमित्ते सैंधवघनवदनंतरोऽबाह्यः कृत्स्नः प्रज्ञानघनः एकरूप आत्मावतिष्ठते ।। पूर्वं तु भूतमात्रासंसर्गविशेषा आहुर्थः विशेषविज्ञानः सन्प्रविलापिते
विषयादिविशेषविज्ञाने तन्निमित्ते च भूतसंसर्गे प्रायेण संज्ञास्तीत्येवं याज्ञवल्क्येनोक्ते ।। ७५ ।। सा होवाच। अत्रैव मा भगवानेतस्मिन्नेव वस्तुनि प्रज्ञानघन·

स यथा दुंदुभेर्हन्यमानस्य न बाह्यांछब्दाञ्छक्नुयाद्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीतः ।। ८० ।। स यथा शंखस्य ध्मा
यमानस्य न बाह्यांछब्दाञ्छक्नुयाद्ग्रहणाय शंखस्य तु ग्रहणेन शंखध्मस्य वा शब्दो गृहीतः ।। ८१ ।। स यथा वीणायै वाद्यमानायै न बाह्यांछ
ब्दाञ्छक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ।। ८२ ।। स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरंत्येवं
वा अरेऽस्य महतो भूतस्य निश्वसितमेवैतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्य
नुव्याख्यानानि व्याख्यानानीष्ट ७ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसिता
नि ।। ८३ ।। स यथा सर्वासामपां ७ समुद्र एकायनमेव ७ सर्वेषां ७ स्पर्शानां त्वगेकायनमेव ७ सर्वेषां ७ रसानां जिह्वैकायनमेव ७
सर्वेषां गंधानां नासिके एकायनमेव ७ सर्वेषां रूपाणां च चक्षुरेकायनमेव ७ सर्वेषां ७ शब्दानां ७ श्रोत्रमेकायनमेव ७ सर्वेषां ७
संकल्पानां मन एकायनमेव ७ सर्वासां विद्यानां ७ हृदयमेकायनमेव ७ सर्वेषां कर्मणां ७ हस्तावेकायनमेव ७ सर्वेषामानंदाना
मुपस्थ एकायनमेव ७ सर्वेषां विसर्गाणां पायुरेकायनमेव ७ सर्वेषामध्वनां पादावेकायनमेव ७ सर्वेषां वेदानां वागेकायनं ।। ८४ ।। स
यथा सैंधवघनोऽनंतरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानंतरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्ये
वानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः ।। ८५ ।। सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहान्तमापीपिपन्न वा अ
हमिमं विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा ।। ८६ ।। ।। रामरामरामरामराम ।।

एव न प्रेत्य संज्ञास्तीति मोहान्तं मोहमध्यं आपिपिपत् अगमितवानसि मोहितवानसीत्यर्थः। अतो नैवाहमिममात्मानं उक्तलक्षणं विजानामि विवेकतः स होवाच
नाहं मोहं ब्रवीमीत्याह याज्ञवल्क्यः। अविनाशी वा अयमात्मायतः विनष्टुं शीलमस्येति विनाशी न विनाशी अविनाशी विनाशवानेन विक्रिया सर्वविनाशीत्यविक्रियात्मेत्यर्थः।
अरे मैत्रेय्ययमात्मा अतोऽनुच्छित्तिधर्मा उच्छित्तिरुच्छेदः उच्छेदो विनाशः उच्छित्तिधर्मोऽस्येत्युच्छित्तिधर्मा न उच्छित्तिधर्मा अनुच्छित्तिधर्मा नापि विक्रियालक्षणो
हणाय· आत्मेत्येवोपासीत इत्यादौ इति। इदं जन्म। प्रतिपन्न प्रजन्म। रसस्य नान्यं वेदविशेषाणां। अन्नत्वनायासेन स्पष्टप्रतिपत्त्यर्थं। इष्ट ७ हुतमासितमित्यादिना पृथक्त्वेनोक्तः कर्मविपा·

आत्मनः। अंगिरसाद्योक्तः। अंगिरसः अथर्वा। आत्म
नः सुकासात अनाया सेना निर्गतानां। स्पर्शसामान्यानां
स्पर्शविशेषाणां। निश्चयविशेषाणां। रसविशेषाणां। गमनविशेषाणां।
गंधसामान्यं। वेदसामान्यं। कर्मविशेषाणां। कर्मसामान्यं। तथा सर्वस्य अयनः।
आत्मा एकायनं इत्यर्थः। अत्रत्वनायासेन स्पष्टप्रतिपत्त्यर्थं वेदविशेषाणां। रहस्यमंत्रा

एतेभ्यो हेतुभूतेभ्यो भूतेभ्यः सम्यक् शब्दवाच्योऽभ्यास
उत्पाद्य स्वच्छं दर्पणादि बिंबः। जीवरूपेण।।
नान्योच्छेदलक्षणो विनाशोऽस्याविद्यत इत्यर्थः ।। ८६ ।।
प्रतिबिंबरूपेण तिष्ठति जीवभावं प्राप्तः स्थितस्य जीव इति संज्ञा नास्ति ।।
विशेषविज्ञाननिमित्तभूतसंसर्गं च प्रविलापितवानिति। यज्ञाध्यायो।। इंद्रियसंसर्गः

140

सतिअध्यायमन्यथान्यथाइतिप्रतिपादनादात्मनःसदिशोयत्त्वमाशंक्याह। चतुर्थ्यपीति। चातुर्थिकादूर्ध्वान्तां चाभिकर्षार्थस्य भेदं दर्शयति। स एवेति। प्रागपनीयन्यासेन मूर्द्धानं विपतिष्यतीति मूर्द्धपातोपपत्ता
वात्मगुणाः पराऽन्येन गृहीतास्मृते तेन सा कस्य ब्राह्मणो न निर्द्दिष्टोऽस्य प्रत्यगात्मा निर्द्धारितः पंचमसमाप्तौ पुनः विज्ञानमानं देवसेत्यादिना। चतुर्णामपीति। पूर्वापर्यालोचनया प्रत्युपनिषदर्थो निर्द्दिष्टो वः
नात्मतत्त्वं। कथं तर्हि इत्यसंज्ञानास्तीत्युच्यते। अविद्याकृतविशेषज्ञानाभावाभिप्रायेणानिषेधवाक्योपपत्तिरित्युत्तरमाह। यत्र हि द्वैतमित्यादिना। यच्चाप्यविद्यावस्थायामन्योऽन्यं पश्य
ति तत्राविद्ययेनेदं सर्वं विजानाति तं केन विजानीयात्। येन विजानाति तस्य करणस्य विज्ञेये विनियुक्तत्वात्। उपनकारः करणेन। चतुर्थ्यध्याये तृतीये ब्राह्मणे ग्रथाधाये। अज्ञानावस्थायाम्॥

चतुर्ष्वपि प्रपाठकेष्वेक आत्मानुत्सो निर्द्धारितः परं ब्रह्म उपायविशेषस्तु तस्याधिगमे अन्यान्यश्वोपेयस्तु। मस्य एवात्मायं चतुर्थे अथात आदेशो नेति नेति
इति निर्द्दिष्टः सस्यव पंचमे प्रागपरोपन्यासेन शाकल्ययाज्ञवल्क्यसंवादेन निर्द्धारितः पुनः पंचमसमाप्तौ पुनर्जनकयाज्ञवल्क्यसंवादे। पुनरिहायनिष
त्समाप्तौ। चतुर्णामपि प्रपाठकानामेतदात्मनिष्ठतानान्यान्तराले कश्चिदपि विवसितोऽर्थः अस्येतत्प्रदर्शनायान्त उपसंहारः स एष नेति नेत्यादिः। यस्मा
त्स्वरूपत एवायमिति नूपमाने तत्त्वं गीति नेत्यात्मैव निष्ठानान्योपलभ्यते तर्केणागमेन वा तस्मादेतदेवामृतत्वसाधनं यदेतन्नेति नेत्यात्मपरिज्ञा
नं सर्वसंन्यासश्चेत्येतमर्थमुपसंजिहीर्षन्नाह। एतावदेतावन्मात्रं यदेतन्नेति नेत्यद्वैतात्मदर्शनमिदं चान्यसहकारिकारणानिरपेक्षमेवेत्यमृ

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरꣳ रसयते तदितर इतरमभिवदते तदितर इतरꣳ
शृणोति तदितर इतरं मनुते तदितर इतरꣳ स्पृशति तदितर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्के
न कं जिघ्रेत्तत्केन कꣳ रसयेत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कं मन्वीत तत्केनꣳ स्पृशेत्तत्केन कं विजा
नीयाद्येनेदꣳ सर्वं विजानाति तं केन विजानीयात्स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽ
सितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञव
ल्क्यो विजहार॥ ७ ॥ पंचमं ब्राह्मणं॥ ॥ तत्त्वसाधनं। यत्पृष्टवत्यसि यदेव भगवान्वेत्थ तदेव मे ब्रूहीत्यमृतत्वसाधनमिति तदेतदे

लितिरोयंत्वयाइति ह किल एवं किलामृतत्वसाधनमात्मज्ञानं प्रियायै भार्यायै उक्त्वा याज्ञवल्क्यः किं कृतवान्यत्पूर्वं प्रतिज्ञातं प्रव्रजिष्यन्नस्मीति
तन्नकार्यं विजहार प्रव्रजितवानित्यर्थः। परिसमाप्ता ब्रह्मविद्या संन्यासपर्यवसाना एतावाननुपदेशः। एतद्वेदानुशासनं। एषा परमा निष्ठा। एष पु
रुषार्थकर्त्तव्यतान्त इति॥ ॥ इदानीं विचार्यते। शास्त्रार्थविवेकप्रतिपत्तये यतस्त्राकुलानि हि वाक्यानि दृश्यन्ते। यावज्जीवमग्निहोत्रं जुहुयात् यावत्
जीवं दर्शपूर्णमासाभ्यां यजेत कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एतद्वै जरामर्यꣳ सत्रं यदग्निहोत्रमित्यादीन्येकाश्रम्यज्ञापकानि अन्या
निसाश्रमांतरज्ञतिपादकानि वाक्यानि विदित्वा व्युत्थाय प्रव्रजन्ति। ब्रह्मचर्यं समाप्य

रसंन्यासमात्मज्ञानममृतत्वसाधनमित्युपपाद्य संन्यासमधिकृत्य विचारमवतारयति। इदानीमिति। विदित्वा व्युत्थाय भिक्षाचर्यं चरन्तीति वाक्यं पाठक्रमेणादि विद्वत्संन्यासपरं। अर्थक्रमा ॥
तु विविदिषासंन्यासपरं। आत्मानमेव लोकमिच्छन्तः प्रव्रजन्तीति तु विविदिषासंन्यासपरमेवेति विभागः। यत्र अग्निहोत्रं एतद्वै जरामर्यं सत्रं याग इत्या० संन्यासप्रतिपादकानि॥ ॥

तदेतत् यदनीयमस्य सर्वस्य यदयमात्माऽनेन ह्येतत्सर्वं वेद इनदेत
प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा
आत्मानि श्रीरितः। यदेव॰ साधनं इत्य
नेन ... अमृतत्वसाधनं एष वत्ती असि तत् अमृतत्वसाधनं एतदे
व पूर्वोक्तमेव तत्त्वयाविज्ञेयम॥

ज्ञाने सति क्रियाभावात्। जीवसंज्ञाभावात्। स्त्री॰ परिव्राजः इति उक्तेः अ
नुशासनं संन्यास॰ समाप्ताकं पठिष्यन्॰ गृहस्थाश्रमः। अमृतत्व
साधनं यदेव विदितवानसि॰ यदेवादीति

अक्रमसंन्यासविषयं वाक्यं पठति। यदि वेति। शास्त्रक्रमेणाभ्युदयनिःश्रेयसोपायत्वेन निक्रांतत्तराणां संन्यासस्याधिक्यपरां श्रुतिं दर्शयति। द्वावेवेति। यथेष्टाश्रमप्रतिपत्तौ प्रमाणभूतां स्मृतिं दर्शयति।
अविशीर्णेति। आश्रमविकल्पविषयां श्रुतिं पठति। तस्य ब्रह्मचारिणः स्वयं कर्मसंन्यासे प्रमाणमाह। यथेति तत्रैव वाक्यान्तरं पठति। प्राजापत्यमिति। सर्ववेदसं सर्वस्वं दक्षिणा यस्यां तां। इतश्च कर्त्तव्यो
विचार इत्याह। आचार इति। श्रुतिस्मृतिविदां विरुद्ध आचारो लक्ष्यते। केचिद्ब्रह्मचर्यादेव प्रव्रजंति। अपरे तत्परिसमाप्य गार्हस्थ्यमेवाचरंति। अन्ये चतुरोप्याश्रमान् क्रमेणाश्रयंति तत्र चाविना
विचारं निर्णयासिद्धिः। इतश्चास्ति विचारस्य कर्त्तव्यतेत्याह। विप्रतिपन्नेति। गृहस्थादिनिषेकादिश्मशानांतो मंत्रैर्यस्योदितस्तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचिदिति॥ ब्रह्मो भवति·

गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत्। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेति। द्वावेव पंथानावनु निःक्रांततरौ क्रियापथश्चैव पुरस्तात् संन्यासश्च तयोः
संन्यास एवातिरेचयतीति। न कर्मणा न प्रजया धनेन त्यागेनैकेऽमृतत्वमानशुरित्यादीनि। तथा स्मृतयश्च ब्रह्मचर्यवान् प्रव्रजति। अविशीर्णब्रह्मच
र्यो यमिच्छेत्तमावसेत्। तस्याश्रमविकल्पमेके कुर्वते। तथा वेदानधीत्य ब्रह्मचर्येणाथ पुत्रानिच्छेत्पावनं पितृणामग्नीनाधाय विधिवच्चेष्टयज्ञो वनं·
प्रविश्याथ मुनिर्बुभूषेत्। प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणां। आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहादित्याद्याः। एवं क्रमाक्रमविकल्पक्रम
यथेष्टाश्रमप्रतिपत्तिप्रतिपादकानि हि श्रुतिस्मृतिवाक्यानि शतश उपलभ्यंते इतरेतरविरुद्धानि। आचारश्च तद्विदां विप्रतिपन्नः शास्त्रार्थप्रतिप
त्तॄणां बहुविदामपि। अतो न शक्यते शास्त्रार्थो मंदबुद्धिभिर्विवेकेन प्रतिपत्तुं परिनिष्ठितशास्त्रार्थन्यायबुद्धिभिरेव ह्येषां वाक्यानां विषयविभागः
शक्यतेऽवधारयितुं। तस्मादेषां विषयविभागज्ञापनाय यथाबुद्धिसामर्थ्यं विचारयिष्यामः। यावज्जीवश्रुत्यादिवाक्यानामन्यार्थासंभवात् क्रिया
वसान एव वेदार्थः। तं यज्ञपात्रैर्दहंतीत्यंत्यकर्मश्रवणात्। यस्यश्रवणाल्लिंगाच्च भस्मांतं शरीरमिति। नहि पारिव्राज्यपक्षे भस्मांतता शरीरस्य स्यात्
स्मृतेश्च पूर्वपक्षं गृह्णाति यावदिति। समंत्रकं हि यत्कर्म वेदेन ह्यभिधीयते तस्य श्मशानांततां दर्शयति। स्मृत्याधिकारांतराभावप्रदर्शनाच्चात्यंतमेव·
श्रुत्यधिकाराभावोऽकर्मिणो गम्यते। अग्न्युद्वासनापवादाच्च। वीरहा वा एष देवानां योऽग्निमुद्वासयत इति। ननु कृष्यादिविधानादेव कल्पितं किं
यावसानत्वं वेदार्थस्य नान्यार्थत्वात् कृष्यादिश्रुतीनां यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्येवमादीनां जीवनमा
त्रनिमित्तत्वाद्यदा न शक्यतेऽन्यार्थता कल्पयितुं तदा कृष्यादिवाक्यानां कर्मानधिकृतविषयत्वसंभवात् कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं
समा इति मंत्रवर्णात् जरया वा ह्येवास्मान्मुच्यते मृत्युना वेति च जरामृत्युभ्यामन्यत्र कर्मवियोगकालासंभवात् कर्मिणां श्मशानांतत्वं न वैकल्पिकं
कारणं कृष्यादयोऽपि कर्मण्यनधिकृता अनुग्राह्या एव श्रुत्येति कृष्यादीनामश्मशानांतविधानं नानुपपन्नं। पारिव्राज्यक्रमविधानस्यानवकाशत्वमिति चेत्
विश्वजित्सर्वमेधयोर्यावज्जीवविध्यपवादत्वात्। यावज्जीवाग्निहोत्रादिविधेर्विश्वजित्सर्वमेधयोरेवापवादत्वं न च क्रमप्रतिपत्तिः संभवात् ब्रह्म
चर्यं समाप्य गृही भवेत्। गृहाद्वनी भूत्वा प्रव्रजेदिति। विरोधानुपपत्तेः। न ह्येतद्विषयत्वे पारिव्राज्यक्रमविधानवाक्यस्य कस्यचिद्विरोधः॥ ॥

इतश्च नास्ति पारिव्राज्यमित्याह। स्मृतेश्चेति। तस्य तात्पर्यमाह। समंत्रकं हीति। नान्यस्य कस्यचिदित्यत्र सूचितमर्थं कथयति। अधिकारेति। गृहस्थस्य पारिव्राज्याभावे हेत्वंतरमाह। अग्नीति।
पूर्वपक्षमाक्षिपति नन्विति। अनधिकृतविषयत्वं तस्य मशक्यं वक्तुं ब्रह्मचर्यं समाप्येत्यादावधिकृतविषये क्रमदर्शनादिति शंकते। पारिव्राज्येति। गत्यंतरं दर्शयन्नुत्तरमाह। विश्वजिदिति
यावज्जीवमग्निहोत्रं जुहोतीत्युत्सर्गः। तस्यापवादो विश्वजित्सर्वमेधौ। तदनुष्ठानेन सर्वस्वदानाद्वसाधनसंपन्नविरहात् पारिव्राज्यस्यावश्यंभावित्वात्तद्विषयं क्रमविधानमित्यर्थः। तदेव स्फुटयति
यावज्जीवेति। स्मातिर्देहे· नाग्निहिनस्य तस्य समंत्रकस्य कर्मणः श्मशानांततां दर्शयति। पारिव्राज्येऽधिकारेऽधिकारांतरस्याभावप्रदर्शनाच्च। कथं क्रमविधेरेवं विषयत्वं कल्पकाभावादित्याशंक्याह। सम·

कर्मविधेरपि तत्पक्षे संकोचः स्यादित्याशंक्याह । यावज्जीवमग्निहोत्रादेः । क्रमप्रतिपत्तेस्त्विति । सति विज्ञाने कर्मत्यागो विधित्स्यते मोक्षविधेः । सत्यां वा विविधेर्जिज्ञासायामिति कल्प्यांशं दूषयति सिद्धांती न आत्मज्ञानस्येति । विद्वत्संन्यासस्यावश्यंभावित्वात् कर्मावसानत्वं वेदार्थ इति संगृहीतं वस्तु विवृणोति । यत्त्ववादीति । विद्यास्वरूपस्य निषेधवाक्यानि नयेन यदात्मज्ञानमुपसंहृतं तत्रायं युक्तिसाधनमिति भवतापि यस्मादभ्युपगतं तस्मात् ज्ञाने सति कर्मानुष्ठानं निरवकाशमित्यर्थः । आत्मज्ञानं कर्मसहितममृतत्वसाधनमिष्यते न केवलं न तदा च ज्ञानानंतरकालमपि न कर्मत्यागसिद्धिरिति शंकते तत्रेति । आत्मज्ञानस्य अमृतत्वसाधनत्वे सत्यपीति यावत् । कर्मनिरपेक्षत्वं च त्वात्मज्ञानस्य भवतां न संमतं तर्हि किमिति ज्ञानमुपगतमिति सिद्धांती पृच्छति । तवेति । तस्य कर्मांगपक्षत्वानंगीकारे सतीत्यर्थः । तत्र पूर्ववादी शास्त्रीयत्वादात्मज्ञानममृतत्वसाधनमभ्युपगतमिति शंकते । शाब्दिति । शास्त्रानुसारेण ज्ञानांगीकारे कर्मनिरपेक्षमेवात्मज्ञानं मोक्षसाधनं स्यादिति परि

क्रमप्रतिपत्तेरुक्तविश्वजित्सर्वमेधविषयत्वान्न कश्चिद्विरोधः । नात्मज्ञानस्यामृतहेतुत्वाभ्युपगमात् । यत्त्ववदात्मेत्येवोपासीतेत्यारभ्य स एष नेति नेत्येतदंतेन ग्रंथेनोपसंहृतमात्मज्ञानं तदमृतत्वसाधनमित्यभ्युपगतं भवता । तच्चैतावदेवामृतत्वसाधनमन्यनिरपेक्षमित्येतन्न मृष्यते । तत्र भवंतं पृच्छामि किमर्थमात्मज्ञानं मर्षयति भवानिति । शृणु कारणं यथा स्वर्गकामस्य स्वर्गप्राप्त्युपायमजानतोऽग्निहोत्रादि स्वर्गप्राप्तिसाधनं ज्ञापयति तथेहाप्यमृतत्वप्राप्तिप्सोरमृतत्वोपायमजानतो यदेव भगवान्वेत्थ तदेव मे ब्रूहीत्येवमाकांक्षितममृतत्वसाधनमेतावदरे इत्येवमादौ वेदेन ज्ञाप्यत इति । एवं तर्हि यथा ज्ञापिताग्निहोत्रादि स्वर्गसाधनमभ्युपगम्यते तथेहाप्यात्मज्ञानं यथा ज्ञाप्यते तथाभूतमेवामृतत्वसाधनमात्मज्ञानमभ्युपगंतुं युक्तं । तुल्यप्रामाण्यादुभयत्र यद्येवं किं स्यात् । सर्वकर्महेतूपमर्दकत्वादात्मज्ञानस्य विद्योदये कर्मनिवृत्तिः स्यात् । दाराग्निसंबंधानां तावदग्निहोत्रादिकर्मणां भेदबुद्धिविषयसंप्रदानकारकसाध्यत्वं । अन्यबुद्धिपरोक्षेयां ह्यग्न्यादिदेवतां संप्रदानकारकभूतामंतरेणानाहितकर्माणि निर्वर्त्यंते । यथा हि संप्रदानकारकं कर्तुश्चासंप्रदानकारकं कर्मसाधनत्वेनोद्दिश्यते सह विद्यया निवर्त्यंते । अन्योऽसावन्योऽहमस्मीति न स वेद देवास्तं परादुर्योऽन्यत्रात्मनो देवान्वेद मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति एकधैवानुद्रष्टव्यं सर्वमात्मानं पश्यतीत्यादिश्रुतिभ्यः । न च देशकालनिमित्ताद्यपेक्षत्वमवस्थितात्मवस्तुविषयत्वात् आत्मज्ञानस्य । क्रियायास्तु पुरुषतंत्रत्वात् स्याद्देशकालनिमित्ताद्यपेक्षत्वं । ज्ञानं तु वस्तुतंत्रत्वान्न देशकालनिमित्ताद्यपेक्षते । यथाग्निरुष्ण आकाशोऽमूर्त इति तथात्मज्ञानमपि । नन्वेवं सति प्रमाणाभूतस्य कर्मविधेर्निरोधः स्यात् । न च तुल्यप्रमाणयोरितरेतरनिरोधो युक्तः । न स्वाभाविकभेदबुद्धिमात्रनिरोधकत्वात् । न हि विध्यंतरनिरोधकमात्मज्ञानं । स्वाभाविकभेदबुद्धिमात्रं निरुणद्धि । तथापि ह्यन्वयकारकाकर्मानुपपत्तेर्विधिनिषेध एव स्यादिति चेत् । न कामप्रतिषेधात्काम्यप्रवृत्तिनिरोधवददोषात् । यथा स्वर्गकामो यजेतेति स्वर्गसाधने यागे प्रवृत्तस्य कामप्रतिषेधविधेः कामे विहते काम्ययागानुष्ठानप्रवृत्तिर्निरुध्यते न चैतावता काम्यविधिर्निरुद्धोऽभ ॥

हरति । एवं तर्हीति । पूर्वपक्षवादी सिद्धांतिनः शंकां कृत्वा निराकरोति । क्रमविधेरिति । सर्वाधिकारी । क्रमप्रतिपत्तेऽन्यविषयकल्पनायां तु यावज्जीवविधानश्रुतेः स्वविषयासंकोचितास्यात् । यावज्जीवितस्यावत्यावस्थामिति संकोचस्तत्यासति कर्मभाव इत्यर्थः । तथा चात्मज्ञानकर्मणोर्न साम्यमिति भावः । कर्म भेदाश्रयं आत्मज्ञानं तु भेदनिवर्तकमित्यर्थः । कस्यचित् । विद्यायामुक्तानिषेध्यत्वं न च न वस्तु दर्शयति । गुरुरस्य । अन्योऽसावित्यादिना । यथाग्निरुष्ण इति ज्ञानं देशकालादिनापेक्षते तथात्मज्ञानमपि । आत्मज्ञानस्य सर्वकर्महेतूपमर्दकत्वे दोषमाशंकते । नन्वेवं सतीति । साध्यसाधनमात्मज्ञानं कर्मविधिनिरोधकमर्थादिति च कल्प्यांशं दूषयति । नेत्यादिना । न तद्वस्तु कुट्टयति । न हि विध्यंतरेति । द्वितीयं शंकते । तथापीति । यथा न कामी स्यादिति निषेधात्कस्यचित्कामप्रवृत्तिर्न भवति न चैतावता सर्वान्प्रति काम्यविधिर्निरुध्यते । न त्वात्कस्यचिदात्मज्ञानात् कर्मविधेर्निरोधेऽपि न सर्वान्प्रति असौ निरुद्धो भविष्यतीति परिहरति । न कामेति ॥

अभिप्रायमजानानः शंकते। कामप्रतिषेधेति। अन्यथानुपपत्तेः काम्येषु कर्मस्विति द्रष्टव्यं। निरूढः स्यात्काम्यविधिरित्यध्याहर्तव्यं। ग्रहाभिसंधिः सिद्धान्ती ब्रूते। भवत्विति। पुनरभिप्रायमप्रतिपद्यमानश्चोदयति। तथेति।
तदेव विशदयति। अनुष्ठेयत्व इति। सिद्धान्ती स्वाभिप्रायमुद्घाटयन्नुत्तरमाह। नेत्यादिना। तदेव दृष्टान्तेन स्पष्टयति। यथेति। अज्ञानावस्थायामेव कर्मविधिप्रवृत्तिरित्यत्रानियममाशंकते। तथासतीति। कर्म
विधेरपि पुरुषाभिप्रायवशात् पुरुषार्थोपयोगित्वसिद्धेर्नानिष्टापत्तिरित्युत्तरमाह। अथेति। अर्थस्य पुरुषाभिप्रायतंत्रत्वे मोक्षस्यापि बालवत्पुरुषार्थत्वं न स्यादित्याशंक्याह। मोक्षमिति। कर्मविधानमात्म
ज्ञानात्प्राचीनत्वमुपपादितमुपसंहरति। तस्मादिति। तथापि प्रकृते किमायातं तदाह। तस्मान्नेति। अर्थानर्थयोरभिप्रायतंत्रत्वं साधयति। पुरुषाभिप्रायतंत्राविति। मरणमहाप्रस्थानमित्या
दिकाम्यकृतजीवदवस्थायामेव महाभारतादौ स्वर्गविधानं दृष्टमतः अर्थानर्थयोरभिप्रायतंत्रकावेवमर्थः। विधेः कर्मविधेः अविद्याविषया। स्वर्गकामो यजेतेति काम्यो विधिः। कृते कस्यचित् प्रमा
णापेक्षामन्तरेणासिद्धे सर्वकर्मत्यागलक्षणं पारिव्राज्यं। पारिव्राज्यस्यान्तरंगत्वात्। प्रसिद्धानत्मादिरक्तस्य मुमुक्षोर्विनापि तानेन ब्रह्मचर्यादेव प्रव्रजेदित्याद्युपपन्नं। आत्मसंस्कारेति। [illegible]॥

वति। कामप्रतिषेधविधिना प्रतिषेधे विधेरनर्थकत्वप्रापणात् अन्यथानुपपत्तेर्निरूढ एव स्यादिति चेत्। भवत्येवैवं कर्मविधिनिरोधः यथा कामप्रतिषेधे काम्यविधेस्तथा प्र
माणानुपपत्तिरिति चेदननुष्ठेयत्वानुपपत्त्यभावादनुष्ठानविध्यानर्थक्यादप्रमाणमेव कर्मविधानमिति चेत्। न प्रागात्मज्ञानात्प्रवृत्त्युपपत्तेः। स्वाभाविकस्य
क्रियाकारकफलभेदविज्ञानस्य प्रागात्मज्ञानात्कर्महेतुत्वमुपपद्यत एव यथा कामविषयदोषज्ञानोत्पत्तेः प्राक् काम्यकर्मप्रवृत्तिहेतुत्वं स्यादेव स्वर्गादीच्छा
याः स्वाभाविक्यास्तद्वत् तथासत्यनर्थार्थविद इति चेन्नार्थानर्थयोरभिप्रायतंत्रत्वात्। मोक्षमेकं वर्जयित्वान्यस्याविद्याविषयत्वात् पुरुषाभिप्रायतंत्रो ह्य
र्थानर्थौ मरणादिकाम्येष्टिदर्शनात्। तस्माद्यावदात्मज्ञानविधेराभिमुख्यं तावदेव कर्मविषयः। तस्मान्नात्मज्ञानसहभावित्वं कर्मणामित्यतः सिद्धमा
त्मज्ञानमात्रमेतावदेव खल्वमृतत्वमिति कर्मविधिनिरपेक्षत्वाज्ज्ञानस्य। अतो विदुषस्तस्मात्पारिव्राज्यं सिद्धं संप्रदानादिकर्मकारकजात्यादिशून्यस्याविक्रि
यब्रह्मात्मत्वप्रतिपत्तिमात्रेणैव च न मतेन युक्तन्यायत। तथान्वाख्यातमेतत् येषां नोऽयमात्मायं लोक इति हेतुवचनेन पूर्वे विद्वांसः प्र
जामकामयमाना व्युत्तिष्ठन्तीति पारिव्राज्यं विदुषामात्मलोकाववोधादेव। तथा विविदिषोरपि सिद्धं पारिव्राज्यमेतमेवात्मानं लोकमिच्छन्तः प्रव्रजन्तीति वच
नात्। कर्मणां चाविद्वद्विषयत्वमवोचाम। अविद्याविषयत्वे चोत्पत्त्याप्तिविकारसंस्कारार्थानि कर्माण्यतः आत्मसंस्कारद्वारेणात्मज्ञानसाधनमपि कर्मणा
मवोचाम यज्ञादिभिर्विविदिषन्तीति। अत एवं सत्यविद्वद्विषयाणामाश्रमकर्मणां बलाबलविचारणायामात्मज्ञानोत्पत्तिं प्रति यमप्रधानानाममानित्वा
दीनां मानसानां च ध्यानज्ञानवैराग्यादीनां संनिपत्योपकारकत्वात् हिंसारागद्वेषादिबाहुल्यात्तद्बहुलकर्मविमिश्रिताश्चेतरे इत्यतः पारिव्राज्यं मुमुक्षू
णां प्रशंसंति। त्यागश्च हि सर्वेषां युक्तानामपि कर्मणां वैराग्यं पुनरेतस्यैवास्य परमो विधिः। किं तेन धनेन किं बन्धुभिस्ते किं ते दारैर्ब्राह्मण यो म
रिष्यसि। आत्मानमन्विच्छ गुहां प्रविष्टं पितामहास्ते क्व गताः पिता च। एवं सांख्ययोगशास्त्रेषु च संन्यासो ज्ञानं प्रति प्रत्यासन्न उच्यते। कामप्रवृत्त्यभावाच्च का
मप्रवृत्तौ हि ज्ञानं प्रति दूरता सर्वशास्त्रेषु सावकाशत्वादनधिकृतविषयमेतदिष्टव्यं। यावज्जीवश्रुत्यवरोधात्। नैव दोषो नितरां सावकाशत्वाद्यावज्जीवश्रु
तीनां। अविद्वत्कामिकर्तृकतां ह्यवोचाम सर्वकर्मणां। ननु निरपेक्षमेव जीवननिमित्तमेव कर्तव्यं कर्म। प्रायेण हि पुरुषाः कामबहुलाः। कामश्चानेकविषयोऽनेकका

[illegible]

उत्पन्नज्ञाने सति विद्वान्भवति पूर्वं तु अविद्वानेव अत उच्यते अविद्वद्विषयाणामिति। कर्मस्वरूपविचारणायां। संन्यासः कर्मयोगश्च निःश्रेयसकरावुभाविति स्मृतेर्विविदिषूणां मुमुक्षूणां कथं पारिव्राज्यस्यैव
कर्तव्यमित्याशंक्याह। अथैवं सतीति। यथाविद्वत्संन्यासस्तथाविविदिषासंन्यासे [illegible] सति आत्मज्ञानोत्पत्तिं प्रति आश्रमधर्माणां बलाबलविचारणायां अंतरंगत्वबहिरंगत्वचिंतायां सत्यामित्यर्थः।
अहिंसासत्यब्रह्मचर्यादयो यमास्तत्प्रधानानाममानित्वादीनां मानसानां च ध्यानज्ञानवैराग्यादीनां आदिशब्देन शमादयो गृह्यन्ते अंतरंगत्वं संनिपत्योपकारकत्वं च। इतरे नियमप्रधाना आश्रमधर्मा बहुना कृतेन।
न पापेन कर्मणा संकीर्णाः। हिंसादिप्राचुर्यात्। अतस्तेषां बहिरंगत्वं। अतः पारिव्राज्यमेव मुमुक्षूणां प्रशंसंतीति। प्रशंसाप्रकारमेव दर्शयति। त्यागश्चेति। उत्तमपुरुषार्थिनः संन्यासद्वारा श्रवणादिकर्त

[illegible] इति॥

142

[illegible] ज्ञानामविरोधमाशङ्क्याथर्वशब्दस्यार्थमाह । अथर्वेति ७

यत्तु कालाकुंठस्योपि कर्मण्यनधिकृता अनुग्रासाश्व श्रुत्येति तत्राह । अनधिकृतानां चेति । अनधिकृतानां पारिव्राज्यादौ हि कुरसान्नानधिकृतविषयत्वं पारिव्राज्यस्येत्यर्थः । सत्यामेव भार्यायां त्यक्ताग्निः कृतस्त्यक्ताग्निः । तस्यां भार्यायामसत्यां परित्यक्ताग्निक इति भेदः । यः स्नातकोऽत्यक्ताग्निस्तस्य पारिव्राज्येऽनधिकारः । योऽस्नातकोऽनग्निस्तस्य पारिव्राज्येऽनधिकारः । यत्तु यावज्जीवश्रुतेरपवादौ विश्वजित्सर्वमेधयोरिति । तदपि काम्यगृहिविषयत्वान्न ब्रह्मचर्यादेव प्रव्रजेदिति विध्यपवादकमित्याह । तस्मिंश्चेति । परोक्षलिंगमपि तद्विषयत्वान्न सर्वस्य वेदस्य कर्मावसानत्वं यातयन्नित्याह । तस्मिंश्चेति । यावज्जीवश्रुतेर्गत्यन्तरमाह । यावज्जीवश्रुतिर्वेदैकाश्रम्यप्रतिपादकश्रुतीनामपि अग्निहोत्रयादिविषयत्वमित्याह । तथेति । श्रुतिस्मृतीनां कर्मतत्संन्यासार्थानामभिन्न

राग्निसंबंधपुरुषकर्त्तव्यानि । पुनः पुनश्चानुष्ठीयमानानि बहुफलानि कृष्यादिवत् । वर्षशतसमाप्तीनि गार्हस्थ्यो वा रोपितः अतस्तदपेक्षया यावज्जीवश्रुतयः कुर्वन्नेवेह कर्माणीति । च मंत्रवर्णाः । तस्मिंश्चापस्त्रो विश्वजित्सर्वमेधयोः कर्मपरित्यागः तस्मिन्नपवादे यावज्जीवानुष्ठानेन दाहश्मशानांतत्वं च शरीरस्य इतरवर्णापेक्षया वा यावज्जीवश्रुतिः । नहि क्षत्रियवैश्ययोः पारिव्राज्यप्रतिपत्तिरस्ति । तथा मंत्रैर्यस्योदितो विधिरैकाश्रम्यं त्वाचार्या इत्येवमादीनां क्षत्रियवैश्यापेक्षत्वत्तस्मात्तुल्यसामर्थ्यज्ञानवैराग्यकामाद्यपेक्षया श्रुत्यानन्यपारिव्राज्यप्रतिपत्तिप्रकारा न विरुध्यंते । अनधिकृतानां च गृहस्थविधानात्पारिव्राज्यस्य स्नात

अथ वंशः पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौंडिन्यात्कौंडिन्यः शांडिल्याच्छांडिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥ आग्निवेश्यादाग्निवेश्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गार्ग्यो गौतमाद्गौतमः सैतवात्सैतवः पाराशर्यायणात्पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यंदिनायनान्माध्यंदिनायनः सौकरायणात्सौकरायणः काषायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥ घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजंधनेरौपजंधनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शांडिल्याच्छांडिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौंडिन्याद्विदर्भीकौंडिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाताद्बाभ्रवः पथः सौभरात्पंथाः सौभरोऽयास्यादांगिरसादयास्य आंगिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥

कोवा । स्नातको वोत्सन्नाग्निरनग्निको वेत्यादि । तस्मात्सिद्धान्याश्रमांतराण्यनधिकृतानामेव ॥ ३ ॥ षष्ठस्य पंचमं ब्राह्मणं ॥ ॥ अथानंतरं याज्ञवल्कीयस्य कांडस्य वंश आरभ्यते । । यथा मधुकांडस्य वंशः । । व्याख्यानं तु पूर्ववत् । ब्रह्म स्वयंभु ब्रह्मणे नम ३ मिति

[illegible] ज्ञानकाचार्यस्य शिष्य [illegible]

यथाप्रथमांतः शिष्योऽनुरूपेण चम्यंत इति चतुर्थीति व्याख्यातं तत्पाठमपीत्याह । व्याख्यानं त्विति । इत्यागमोपपत्तिभ्यां ससंन्यासस्तैतिकर्त्तव्यताकमात्मज्ञानममृतत्वसाधनं सिद्धमुपसंहर्त्तुमितिशब्दः परिसमाप्तौ मंगलमाचरति । ब्रह्मेति । ततः परमाभावार्थं परं परानास्ति यस्मात्ब्रह्म तन्नित्यस्वयंभूः । तस्मै ब्रह्मणे स्वयंभुवे नमः । इति चतुर्थाध्यायपरिसमाप्तौ शांकरभाष्ये । नत्वानंदगिरिः । कुतस्तर्हि ब्रह्मणो विद्याप्राप्तिस्तत्राह । ततः परमिति । स्वयं प्रतिभातवेदानां वा चार्यांतरमपेक्षते । ईश्वरानुगृहीतस्य तस्य बुद्धौ वाविर्भूताद्वेदाद्देवविद्यालाभसंभवादित्यर्थः । अतस्तद्धि वेदा जायते तत्राह । यत्पुनरिति । परस्मै ब्रह्मणो विदग्धपरावस्थानात्तस्य नित्यत्वान्नहेत्वपेक्षेत्यर्थः । सूत्रात्मनः । विराड्ढिरण्यगर्भात् । पञ्चज्ञानविषयकर्मविरक्तविषयः संन्यासः । अधिकारिभेदात् २

[illegible]

पूर्वाध्यायेष्वेव सर्वस्य वक्तव्यस्य समाप्तत्वादनर्थकं खिलकाण्डारम्भ इत्याशंक्य पूर्वत्रानुक्तं परिशिष्टं वस्तु खिलशब्दवाच्यमस्तीत्याह। अध्यायचतुष्टयेनेति। अवयवार्थमुक्त्वा समुदायार्थमाह तदेतत्
पूर्णमिति। अदः पूर्णमित्यनेन लक्ष्यं तत्पदार्थं दर्शयित्वा त्वंपदार्थं दर्शयति। तदेवेति। कथं सोपाधिकस्य पूर्णत्वमित्याशंक्याह। स्वेनेति। वाक्यार्थमाह। नोपाधीति। कथं पूर्णाकेडिकायास्तस्य
र्थत्वेनैकवाक्यत्वमित्याशंक्य तत्प्रत्याययति। तत्रेत्यादिना। सर्वोपासनशेषत्वेन दमादीनि त्रीणि विधित्सितानि ब्रह्मोपासनसाधनत्वेन च। कारविधित्सितं लक्षणाज्ञापितं चेतन्यतन्यार्थं॥

पूर्णमद इत्यादि खिलकाण्डमारभ्यते। अध्यायचतुष्टयेन यद्देवसाक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरो निरुपाधिकोऽशनायाद्यतीतो नेति नेतीति व्यपदेशेन निर्धारितः यद्वि
ज्ञानं केवलममृतत्वसाधनम् अथ नाते स एवात्मा सोपाधिकः शब्दार्थादिव्यवहारविषयापन्नस्य पुरस्तादनुक्तान्युपासनानि कर्मभिरविरुद्धानि प्रकृष्टाभ्युद
यसाधनानि क्रममुक्तिभाञ्जि च तानि वक्तव्यानीत्ययं परः संदर्भः सर्वोपासनविशेषत्वेन ओंकारो दमं दानं दयामित्येतानि च विधित्सितानि। पूर्णमदः पूर्णं न
कुतश्चिद्व्यावृत्तं व्यापीत्येतत् निष्ठा कर्तरि द्रष्टव्या अद इति परोक्षाभिधायि सर्वनाम तत्परं ब्रह्मेत्यर्थः। तत्पूर्णमाकाशवद्व्यापि निरन्तरं निरुपाधिकं च। त
देवेदं सोपाधिकं नामरूपस्थं व्यवहारापन्नं पूर्णं स्वेन रूपेण परमात्मना व्याप्येव नोपाधिपरिच्छिन्नेन विशेषात्मना तदिदं विशेषापन्नं कार्यात्मकं ब्रह्म
पूर्णात्कारणात्मन उदच्यते। उद्रिच्यते उद्गच्छतीत्येतत्। यद्यपि कार्यात्मना उद्रिच्यते तथापि यत्स्वरूपं पूर्णत्वं परमात्मभावं न जहाति पूर्णमेवो

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते॥ पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ ॥

द्रिच्यते॥ पूर्णस्य कार्यात्मनो ब्रह्मणः पूर्णं पूर्णत्वमादाय गृहीत्वात्मस्वरूपैकरसत्वमापाद्य विद्ययाऽविद्याकृतभूतमात्रोपाधिसंसर्गजमन्यत्वावभा
सं तिरस्कृत्य पूर्णमेवानन्तरमबाह्यं प्रज्ञानघनैकरसस्वभावं केवलं ब्रह्मावशिष्यते। यदुक्तं ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत्तस्मात्तत्सर्व
मभवदित्ययं चास्य मन्त्रस्यार्थः तत्र ब्रह्मेत्यस्यार्थः पूर्णमद इति इदं पूर्णमिति ब्रह्म वा इदमग्र आसीदित्यर्थः। तथा च श्रुत्यन्तरं यदेवेह तदमुत्र यदमुत्र त
दन्विहेति। अतोऽदःशब्दवाच्यं पूर्णं ब्रह्म तदेवेदं पूर्णं कार्यस्थं नामरूपोपाधिसंयुक्तमविद्ययोद्रिक्तं। तस्मादेव परमार्थस्वरूपादन्यदिव प्रत्यव
भासमानं तद्यदात्मानमेव परं पूर्णं ब्रह्म विदित्वाहमदः पूर्णं ब्रह्मास्मीत्येवं पूर्णमादाय तिरस्कृत्यापूर्णस्वरूपतामविद्याकृतां नामरूपोपाधि
संपर्कजां तया ब्रह्मविद्यया पूर्णमेव केवलमवशिष्यते। तथा चोक्तं तस्मात्तत्सर्वमभवदिति। यः सर्वोपनिषदर्थो ब्रह्म स एषोऽनेन मन्त्रेणानूद्यते उत्तर
संबन्धार्थं। ब्रह्मविद्यासाधनत्वेन हि वक्ष्यमाणानि साधना॥ ॥रामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामराम॰

तत्सोपाधिकं ब्रह्म यदा आत्मानमेव—आदाय स तया ब्रह्मविद्यया अविद्याकृतां नामरूपोपाधिसंपर्कजां अपूर्णस्वरूपां तिरस्करोतीति तदा पूर्णमेव केवलं अवशिष्यते॥ ॥
दमं दानं दयां प्रसज्जति। बुधा अतस्तानि ओंकारश्चेत्येतानि विधित्सितानि। परमार्थतः अतिव्याप्त्या। पूर्णं व्यापकं अदः तत्परं ब्रह्मेत्यर्थः। तदेव नामरूपस्थं सोपाधिकमपि स्वेन परमार्थरूपेण
पूर्णं तदिदं पूर्णं विशेषापन्नं कार्यात्मकं पूर्णात्कारणात्मनः उदच्यते उद्गच्छतीत्यर्थः। ओंकारादिषु ब्रह्मसाधनत्वेन विधित्सितेषु पूर्वोक्तं सैषा ज्ञानमनुवदति पूर्णमित्यादिना। ब्रह्मात्म
नोरैक्यमुक्तमुपजीव्य वाक्यार्थमाह। अत इति। पूर्णं यद्ब्रह्मेति। यच्छब्दोऽध्याहर्तव्यः। उक्तमेव व्यनक्ति। तस्मादेवेति। उक्तं ब्रह्मात्मनोरैक्यं। अवशिष्ट। उपजीव्य पूर्वतः उक्ताः ॥

न्नभेदप्रपंचपक्षमुत्थापयति। अत्रैके इत्यादिना। कार्यकारणयोस्तत्पत्तिकाले पूर्णत्वमुक्त्वा स्थितिकालेऽपि तदाह। उद्रिक्तमिति। प्रलयकालेऽपि तयोः पूर्णत्वं दर्शयति। पुनरिति। कालभेदेन कार्यकारणयोरुक्तां पूर्णतां निगमयति। एवमिति। कार्यकारणयोः पूर्णत्वे चेत्तर्हि कथमेकत्वसिद्धिरित्याशंक्याह। सा चेति। कथं तर्हि द्वयोः पूर्णत्वमुक्तं तदाह। कार्यकारणयोरिति। एका पूर्णता द्वयोर्व्यपदिश्यते इति स्थिते लब्धमर्थमाह। एवं चेति। प्रागभेदप्रपंचस्थानं प्रत्याचष्टे। तदसदिति। विशिष्टस्य द्वितीयं ब्रह्मणस्तद्विषयोत्सर्गापवादयोर्विकल्पसमुच्चययोश्चासंभवं वक्तुं प्रतिज्ञाभागं विभजते। नहीति। भ्रमपूर्वकं विवृणोति हेतुं कस्मादित्यादिना। यथेत्यादिग्रंथस्य न चेत्यादिना संबंधः। क्रियायामुत्सर्गापवादसंभवमुदाहरति। यथेत्यादिना। द्वयोः पूर्णत्वं व्यपदिश्यते। द्वैतस्यापि सत्यत्वं पारमार्थिकमित्यभिप्रायेणाविक्लिपसमा

ओंकारदमदानदयाख्यानि विविधानि साधनानि अखिलप्रकरणसंबंधात्सर्वोपासनांगभूतानि च॥ अत्रैके वर्णयंति। पूर्णात्कारणात्पूर्णं कार्यमुद्रिच्यते उद्रिक्तं कार्यं वर्त्तमानकालेपि पूर्णमेव परमार्थवस्तुभूतं द्वैतरूपेण। पुनः प्रलयकाले पूर्णस्य कार्यस्य पूर्णतामादायात्मनि धित्वा पूर्णमेवावशिष्यते कारणरूपम् एवमुत्पत्तिस्थितिप्रलयेषु त्रिष्वपि कालेषु कार्यकारणयोः पूर्णतैव। सा चैका पूर्णता कार्यकारणयोर्भेदेन व्यपदिश्यते। एवं च द्वैताद्वैतात्मकं ब्रह्म यथा किल समुद्रो जलतरंगफेनबुद्बुदाद्यात्मक एव यथा जलं सत्यं तदुद्भवाश्च तरंगफेनबुद्बुदादयः समुद्रात्मभूता एवाविर्भावतिरोभावधर्मिणः परमार्थसत्या एव। एवं सर्वमिदं द्वैतं परमार्थसत्यमेव जलतरंगादिस्थानीयं समुद्रजलस्थानीयं तु परं ब्रह्म। एवं च किल द्वैतस्य सत्यत्वे कर्मकांडस्य प्रामाण्यं यदा पुनर्द्वैतं द्वैतमिवाविद्याकृतं मृगतृष्णिकावदसत्यमद्वैतमेव परमार्थतस्तदा किल कर्मकांडं विषयाभावादप्रमाणं भवति। तथा च विरोध एव स्याद् वेदैकदेशभूतोपनिषत्प्रमाणं परमार्थाद्वैतवस्तुप्रतिपादकत्वाद् अप्रमाणं कर्मकांडमसद्द्वैतविषयत्वात्। तद्विरोधं परिजिहीर्षयाश्रुत्येतदुक्तं कार्यकारणयोः सत्यत्वं समुद्रवत्पूर्णमद इत्यादिनेति। तदसत्। विशिष्टविषयापवादविकल्पयोरसंभवात्। नहीयं सुविवक्षिता कल्पना कस्मात् यथा क्रियाविषये उत्सर्गप्राप्तस्यैकदेशे अपवादः क्रियते। यथा हिंस्यात्सर्वभूतान्यन्यत्र तीर्थेभ्य इति हिंसा सर्वभूतविषये उत्सर्गेण निवारितातीर्थे विशिष्टविषये ज्योतिष्टोमादावनुज्ञायते। न च तथा वस्तुविषय इहाद्वैतस्योत्सर्गेणाप्रतिपाद्य पुनस्तदेकदेशेऽपवदितुं शक्यते। ब्रह्मणोऽद्वैतत्वादेवैकदेशानुपपत्तेस्तथा विकल्पानुपपत्तेश्च। यथातिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति ग्रहणाग्रहणयोः पुरुषाधीनत्वाद्विकल्पो भवति। न त्विह तथा वस्तुविषये द्वैतं वा स्यादद्वैतं वेति विकल्पः संभवत्यपुरुषतन्त्रत्वादात्मवस्तुनः। विरोधाच्च द्वैताद्वैतत्वयोरेकस्य। तस्मान्न सुविवक्षितेयं कल्पना श्रुतिन्यायविरोधाच्च। सैंधवघनवत् प्रज्ञानैकरसघनं निरंतरं पूर्वापरबाह्याभ्यंतरभेदविवर्जितं बाह्याभ्यंतरमजं नेति नेत्यस्थूलमनण्वजमजरमभयममृतमित्येवमाद्याः श्रुतयो निश्चितार्थाः संशयविपर्यासाशंकारहिताः सर्वाः समुद्रप्रक्षिप्ताः स्युः। अकिंचित्करत्वात्। तथा न्यायविरोधोऽपि सावयवस्यानेकात्मकस्य क्रियावतो नित्यत्वानुपपत्तेः। नित्यत्वं चात्मनः स्मृत्यादिदर्शनादनुमीयते। न हि रोधश्च प्राप्नोति अनित्यत्वे भवत्वकस्य नानर्थक्यं च। स्फुटमेव चास्मिन् पक्षे कर्मकांडानर्थक्यं। अकृताभ्यागमकृतविप्रणाशप्रसंगात्। ननु ब्रह्मणो द्वैताद्वैतात्मकत्वे

र्थवस्तुभूतं द्वैतरूपेणेति। जलस्य तरंगादिद्वयः तत्स्थानीयं। इत्यंगीक्रियते चेत्। कारणं कार्यं। पदार्थस्य। व्यापकं। वैधर्म्यदृष्टांतस्य दार्ष्टांतिकमाचष्टे। न च तथा वस्तुविषय इति। विषयभेदे सतीति। उत्सर्गापवादौ दृष्टौ नत्वद्वितीये ब्रह्मणि संभवतः। न हि ब्रह्मणोऽद्वयमेव जायते लीयते चेति संभवनास्पदमिति भावः। उत्सर्गापवादानुपपत्तिं। ब्रह्मणि विकल्पानुपपत्तेश्चेतदेकरसे धितव्यमित्याह। तथा विकल्पानुपपत्तेश्चेति। विकल्पानुपपत्तिमुपपादयति। यथेत्यादिना। समुच्चयासंभवमभिदधाति। विरोधाच्चेति। उत्सर्गापवादे विकल्पसमुच्चयानामसंभवान्न युक्ता ब्रह्मणो नानारसत्वकल्पनेति फलितमाह। तस्मादिति। परकीयकल्पनानुपपत्तौ हेत्वंतरं प्रतिज्ञा श्रुतिविरोधं प्रकटीकृत्य न्यायविरोधं प्रकटयति। तथेति। २ आत्मनो नित्यत्वे दोषांतरमाह। भवत्विति। १

कर्मकाण्डप्रामाण्यं प्रत्यावष्टे। तन्नेति। इतिहं भेदमादायप्रवृत्तेर्विधिनिषेधोपदेशस्यप्रवृत्तिनिवृत्तिद्वारार्थवत्त्वान्नकर्मकाण्डानर्थक्यमित्यर्थः। द्वैतस्यपदेशार्हत्वमंगीकृत्योक्तंनेदंवनास्तीत्याह। नचोपदेशा-र्हमितिकिंचनद्वैतवेनतथ्यशास्त्रप्रामाण्यविघातनकंयन्नावोक्तादिभिःश्रेयसेप्रस्थापिताःस्वप्राप्त्याद्वैतमिथ्यात्वावगमेपिस्वर्गकामश्चैत्यंवेदत्यादिशास्त्रस्यप्रामाण्यंगच्छतीति। तथाग्निहोत्रादिशास्त्रस्यापिप्रामाण्यंभविष्यतिसाधनत्वश्रुत्यानेपहारादित्याह। नावीति। किंचतत्त्वज्ञानात्पूर्वंकांडद्वयोर्विरोधःशंक्यतेनात्रइत्याह। अथेति। अवस्थाभेदादेकस्मिन्नपिपुरुषेकांडद्वयप्रामाण्यमविरुद्धमित्यवस्थितेसति। उपनिषद्भ्यस्तत्त्वज्ञानोत्पत्त्यवंतरंतानतराधिकारत्वेनप्राप्तेकैवल्येपुरुषस्यनैराकांक्ष्यंसंजायते। नचनिराकांक्षंपुरुषंप्रतिशास्त्रस्यशास्त्रत्वमस्ति। प्रवृत्तिर्वानिवृत्तिर्वानित्येनकृतकेनवापुंसायेनोपदिश्येततच्छास्त्रमभिधीयतइतिन्यायात्कृतकृत्यंप्रतिप्रवर्तकत्वादिविरहेणशास्त्रस्यशास्त्रत्वायोगः। एकस्मिन्पुरुषदर्शितंन्यायंसर्वत्रातिदिशति। तथेति। त्वदुक्तेंगीकृतेसतिद्वैतमंगीक्रियेतचेन्न।

समुद्रादिदृष्टान्तोविरुद्धंकथमुच्यतेभवतैकस्यद्वैताद्वैतत्वंविरुद्धमितिनाऽत्यविषयत्वान्निरवयववस्तुविषयंविरुद्धत्वमवोचामद्वैताद्वैतस्य। नकार्यविषयेसावयवे। तस्माच्छ्रुतिस्मृतिन्यायविरोधाद्नुपपन्नेयंकल्पना। अस्याःकल्पनायाःवस्तुपनिषत्परित्यागएव। अर्थ्येयत्वाच्चनशास्त्रार्थोयंकल्पना। नेदंजननमरणाद्यनर्थशतसहस्रभेदसमाकुलसमुद्रवनादिवत्सावयवमनेकरसंब्रह्मध्येयत्वेनविज्ञेयत्वेनवाश्रुत्यापदिश्यते। प्रज्ञानघनंचोपदिशति। एकधैवानुद्रष्टव्यमितिचानेकधादर्शनापवादाच्च। मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतीति। यच्छ्रुत्यापानिंदितंतन्नकर्तव्यं। यच्चनक्रियतेनसशास्त्रार्थः। ब्रह्मणोनेकरसत्वमनेकधात्वंद्वैतरूपंनिंदितत्वान्नद्रष्टव्यमतोनशास्त्रार्थः। यत्त्वेकरसत्वंब्रह्मणस्तद्द्रष्टव्यत्वात्प्रशस्तंप्रशस्तत्वाच्चशास्त्रार्थोभवितुमर्हतीति। यत्तूक्तंवेदैकदेशस्याप्रामाण्यंकर्मविषयेद्वैताभावादद्वैतंचाप्रामाण्यमिति। तन्नयथाप्राप्तउपदेशार्थत्वात्। नहिद्वैतमद्वैतंवावस्तुजातमात्रमेवपुरुषंज्ञापयित्वापश्चात्कर्मवाब्रह्मविद्यांवोपदिशति। नचोपदेशार्हद्वैतंज्ञातमात्रंप्राणिबुद्धिगम्यत्वात्। नचद्वैतस्यानृतत्वबुद्धिःप्रथममेवकस्यचित्स्यात्येनद्वैतस्यानृतत्वमुपदिश्यपश्चादात्मनःप्रामाण्यंप्रतिपादयेच्छास्त्रं। नापिपाखंडिभिरपिप्रस्थापिताःशास्त्रस्यप्रामाण्यंनगच्छेयुः। तस्माद्यथाप्राप्तमेवद्वैतमविद्याकृतमविद्याकृतंस्वाभाविकमुपादायस्वाभाविक्यावाविद्यययुक्तायरागद्वेषादिदोषवतेयथाभिप्रेतपुरुषार्थसाधनंकर्मोपदिशत्यग्रेपश्चात्प्रसिद्धक्रियाकारकफलस्वरूपदोषदर्शनवतेतद्विपरीतौदासीन्यस्वरूपावस्थाफलार्थिनेतदुपायभूतामात्मैकत्वदर्शनात्मिकांब्रह्मविद्यामुपदिशति। अथएवंसतितदौदासीन्यस्वरूपावस्थानफलप्राप्तेःशास्त्रस्यप्रामाण्यप्रत्यर्थित्वंनिवर्त्यतेतद्वाभावाच्छास्त्रस्यापिशास्त्रत्वंतंप्रतिनिवर्ततएव। तथाप्रतिपुरुषंपर्यवसानमंशास्त्रस्येतिनशास्त्रविरोधगंधोप्यस्ति। अद्वैतज्ञानावसानत्वाच्छास्त्रस्यशिष्यशासनादिद्वैतभेदस्य। नह्यन्त्यतमावस्थानेहिविरोधःस्यादवस्थितस्यतरतरापेक्षितत्वात्शास्त्रशिष्यशासनानांनान्यतमोप्यवतिष्ठते। सर्वंसर्वंसमाप्नोतुकस्यविरोधशंशंकयतावैतेकेवलेशिवेनाप्यविरोधमनात्मएव। अथाभ्युपगम्यब्रूमः। द्वैताद्वैतप्रकल्पेपिशास्त्रविरोधस्यतुल्यत्वात्। यदादिसमुद्रादिवत्द्वैताद्वैतात्मकंब्रह्माभ्युपगच्छामः। नान्यवस्त्वंतरंतदपिभवदुक्तशास्त्रविरोधान्नक्रूमहे। कथमेकंहिपरंब्रह्मद्वैताद्वैतात्मकंतच्छोकमोहायतीतत्त्वउपदेशानाकांक्षति॥१८

ज्ञानादूर्ध्वंविरोधाभावमुपसंहरति। हतिनेति। कल्प्यांतरंप्रस्याह। अद्वैतेति। तत्त्वज्ञानात्पूर्वंभेदस्यावस्थितत्वात्कर्मविधिप्रमादाद्यपेक्षिकारिभेदादवस्थाभेदाद्वाकांडयोरविरोधसिद्धिरित्यर्थः। उक्तमेवोपपादयति। अन्यतमेति। कथंकैवल्येविरोधाभावसत्त्वादित्याशंक्याह। नापीति। अद्वैततत्त्वादद्वैताभावस्थापितत्वनिमज्जनादित्याह। अतएवेति। अद्वितीयमेवब्रह्मणगुह्यद्वैताद्वैतात्मकमित्युपपादितं। इदानींब्रह्मणोद्वैताद्वैतात्मकत्वाभ्युपगमेपिविरोधोनसंभवतीत्यभिहितुमित्याह। अथेति। तुल्यत्वात्तदभ्युपगमोवृथेतिशेषः। उक्तमेवोपपादयति। यदापीति। द्वैताद्वैतात्मकंब्रह्मेतिपक्षेकथंविरोधेनसमाधीयतदद्वैतंचाधिकृत्यकांडद्वयप्रामाण्यसंभवादित्याशंक्यपतिःकथमिति। किंब्रह्मविषयस्तत्रशास्त्रोपदेशःकिंवाऽब्रह्मविषयः। प्रथमेद्वैताद्वैतरूपस्यैकस्यैवब्रह्मणोभ्युपगमात्तस्यचानन्यमुक्तत्वान्नोपदेशःसंभवतीत्याह। एकहीति। नस्त्रोपदेशाभावेहेत्वंतरमाह। नचेति। उपदेशोहिप्रमाणान्योऽनन्योवानाद्यःअभ्युपगमविरोधात्नद्वितीयः

कार्यांतरमुत्थापयति। अथेति। प्रतिज्ञाविरोधेन निराकरोति। नेदेति। किंच। सर्वस्य ब्रह्मरूपत्वेयः समुद्रदृष्टांत उक्तः स न स्यात्। परस्परोपदेशस्य ब्रह्मविषयत्वादित्याह। यस्मिन्निति। अथ यथा फेनादिविकाराणामभिन्नत्वेपि समुद्रोदकात्मकत्वं तदा जीवादीनामभिन्नत्वेपि ब्रह्मस्वभावो यदीष्यते तेन द्वैतब्रह्मत्वमिति न विरुध्यते तत्राह। न चेति। सर्वस्य ब्रह्मत्वमंगीकृत्य चेत् ब्रह्मविषय एवोपदेशः स्यात् तदस्याविचारितरमणीयत्वादित्यर्थः। ननु नानावस्तुरूपस्य समुद्रस्य ब्रह्मत्वे उपदेशभेदादुपदेष्टोपदेशकभावो ब्रह्मतनोर्देशमुपदेशकं चेति तत्राह॥ नहीति। तत्र हेतुमाह। समुद्रेति। यथा समुद्रोदकात्मना फेनादिष्वेकत्वं तथा देवदत्ते क्षेत्रज्ञस्य वागाद्यवयवेष्वेकत्वेन विज्ञानवत्त्वान्न व्यवस्था संभवः तथा ब्रह्मण्यपि द्रष्टव्यमित्यर्थः। विज्ञानवतामेकत्वेन

ह्यन्यो ब्रह्मणो द्वैताद्वैतरूपस्य ब्रह्मण एकस्यैवाभ्युपगमात्। अथ द्वैतविषयानेकत्वादन्योन्योपदेशो न ब्रह्मविषय उपदेश इति चेत्। तदा द्वैताद्वैतात्मकमेकमेव ब्रह्म नान्यदस्तीति विरुध्यते। यस्मिन् द्वैतविषयेऽन्योन्योपदेशः सोऽन्यो द्वैतं चान्यदेवेति समुद्रदृष्टांतो विरुद्धः। न च समुद्रोदकैकत्ववद्विज्ञानैकत्वं ब्रह्मणोऽन्यत्रोपदेशग्रहणादिकल्पना संभवति। नहि हस्तादिद्वैताद्वैतात्मके देवदत्ते वाक्करणयोर्देवदत्तैकदेशभूतयोर्वागुपदेष्टी कर्णः केवल उपदेशस्य ग्रहीता देवदत्तस्तु नोपदेष्टा नाप्युपदेशस्य ग्रहीतेति कल्पयितुं शक्यते। समुद्रैकोदकात्मत्ववदेकविज्ञा

ॐ खं ब्रह्म खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो वेदोऽयं
ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यं॥ १॥ ॥प्रथमं ब्राह्मणं॥ ॥

नवत्वाद्देवदत्तस्य तस्माच्छ्रुतिन्यायविरोधश्चाभिप्रेतार्थासिद्धिश्चैवं कल्पनायां स्यात्॥ तस्माद्यथाव्याख्यात एवास्माभिः पूर्णाभेद इत्यस्य मंत्रस्यार्थः॥ ॥ॐ खं ब्रह्मेति मंत्रोऽयं चान्यत्रा विनियुक्त इह ब्राह्मणेन ध्यानकर्मणि विनियुज्यते। अत्र च ब्रह्मेति विशेष्याभिधानं खमिति विशेषणं। विशेषणविशेष्ययोश्च सामानाधिकरण्येन निर्देशो नीलोत्पलवत्। खं ब्रह्मेति ब्रह्मशब्दो बृहद्वस्तुमात्रास्पदोऽविशेषितोतो विशेष्यते खं ब्रह्मेति। यत्तत्खं ब्रह्म ॐ इति शब्दवाच्यं। ॐ शब्दस्वरूपमेव वा उभयथापि सामानाधिकरण्यमविरुद्धं। इह च ब्रह्मोपासनसाधनत्वार्थमोमिति शब्दः प्रयुक्तः श्रुत्यंतरात् एतदालंबनं श्रेष्ठमेतदालंबनं परमोमित्यात्मानं युंजीत ॐ मित्येतेनैवाक्षरेण परमं पुरुषमभिध्यायीत ॐ मित्येवं ध्यायथ आत्मानमित्यादि। अन्यार्थासंभवाच्चोपदेशस्य यथान्यत्रामिति॥ ॥

ध्यानशेषत्वेन प्रश्नः। अथ ध्यानविधानार्थं तस्मिन् विनियुक्तमंत्रमुत्थापयति। ॐ खमिति। खं व्योमवन्निर्लेपं ब्रह्म ॐ। ॐ शब्दस्वरूपं। इति ध्यायेदित्यर्थः। ईषेत्वेत्यादिवत्तस्य कर्मान्तरे विनियुक्तत्वमाशंक्याह। अयं चेति। ॐ ब्रह्मेति सामानाधिकरण्योपदेशस्य ब्रह्मोपासने साधनत्वमोंकारस्येत्यस्मादर्थान्तरासंभवाच्च तस्य तत्साधनत्वमेष्टव्यमित्याह। अन्यार्थेति। ब्रह्मेत्युक्ते सति आकांक्षाऽभावात् किं विशेषणेनेत्याशंक्याह। ब्रह्मशब्द इति। निरूपाधिकस्य सोपाधिकस्य वा ब्रह्मणः विशेषणत्वेपि कथं तस्मिन्नोंशब्दप्रवृत्तिरित्याशंक्याह।

ब्रह्मशब्द इति। यत्तदिति। अदृश्यक
र्मकांडे [illegible] ब्रह्मणा [illegible]
[illegible] कर्तव्य। अन [illegible]
नज्ञाना पूर्व [illegible] विकारे भेदात् उभ
याकांक्षा [illegible] विरोधाभि
[illegible] अन [illegible] ध्यायेत
[illegible] आनन्दगिरीकृतं नव प्रथम ब्राह्मणं [illegible]
प्रथमब्राह्मणं [illegible]

।दृष्टांतीभूते। फेनादि
वत् समुद्रोदकात्मवत्
[illegible] तस्य वा [illegible]
[illegible]
[illegible] यथावस्वं च भूता
[illegible] आकाशं ब्रह्म [illegible]
ब्रह्मशब्दकं ॐ [illegible]

वायोरधिकरणंपंचभूतांतर्गमाकाशं

बृ·भा·
१८५

प्रतीकत्वेनकथंसाधनत्वमितिनिष्टच्छति। प्रतीकत्वेनेति। कथमित्यध्याहारः। परिहरति। यथेति॥ किमितिसूत्राधिकरणाभ्याहृतमाकाशमत्रगृह्यतेतत्राह। वायुरिति। नैवभूताकाशात्मनापिपरिगानमितिभाव। तर्हिय·
सहृदयेसंभवमानकः सिद्धांतस्यादित्याशंक्याधिकारिभेदमाश्रित्याह। तद्वेति। अधिकारभेदेननिरुपाधिकंभूताकाशात्मनासोपाधिकंवाब्रह्मध्येयमितिभावः। ओंकारस्यप्रतीकत्वेविप्रतिपत्तिमाशंक्याह।
केवलमिति। खंशब्दार्थंनिरुपाधिकंब्रह्मकेचिन्मन्यंतेकश्चिद्भूताकाशंकेवलंएवंशब्दार्थेविप्रतिपत्तिर्नन्वोंकारस्यसगुणनिर्गुणप्रतीकत्वेविप्रतिपन्नाःकश्चिद्विवदते॥ पंचभूतांतर्गतं
पुराणंचिरंतनं। एतस्माद्वात्मनःआकाशःसंभूतइतिश्रुतेः। नतदेवब्रह्मेवभूताकाशो०ननमिवब्रह्मशब्दोआकाशेअविरुद्धः। खंब्रह्मेतिवाक्ये। प्रियतममित्यर्थः॥ मंत्रसमन्यर्थः। चतुर्थजादिरूपायां·

शंतस्तुज्ञायतीत्येवमादौस्वाध्यायारंभापवर्गयोश्चोंकारप्रयोगोविनियोगादवगम्यते। नचतथार्थान्तरमिहावगम्यते। तस्मात्ध्यानसाधनत्वेनैवेहोंकारशब्दस्योपदेशः। यद्यपिब्रह्मात्मादिशब्दाःब्रह्मणोवाचकास्तथापिश्रुतिप्रामाण्यात्ब्रह्मणोनेदिष्ठमभिधानमोंकारः। अतएवब्रह्मप्रतिपत्ताविदंपरंसाधनं। तच्चद्विप्रकारेणप्रतीकत्वेनाभिधानत्वेनप्रतीकत्वेन। यथाविष्ण्वादिप्रतिमाभेदेनेवमोंकारोब्रह्मेतिप्रतिपत्तव्यः। तथाह्योंकारालंबनस्यब्रह्मप्रसीदति॥ एतदालंबनंश्रेष्ठमेतदालंबनंपरं॥ एतदालंबनंज्ञात्वाब्रह्मलोकेमहीयतइतिश्रुतेः। तत्रखमितिभौतिकेप्रतीतिर्माभूदित्याहखंपुराणंचिरंतनंखंपरमात्माकाशमित्यर्थः। यत्तत्परमात्माकाशंपुराणंखंतदचक्षुरादिविषयत्वान्निरालंबनमशक्यंग्रहीतुमितिश्रद्धाभक्तिभ्यांभावविशेषेणचोंकारेआवेशयतियथाविष्ण्वंगांकितायांशिलादिप्रतिमायांविष्णुंलोकः एवंवायुरंखंवायुरंवायुरस्मिन्विद्यतइतिवायुरंखंमात्रंखमित्युच्यते। नपुराणंखमित्येवमाहस्मकोसौकौरव्यायणीपुत्रोवायुरंहिखंमुख्यःखशब्दव्यवहारस्तस्मान्मुक्तेसंप्रत्ययात्मकइतिमन्यते। तत्रयदिपुराणंखंब्रह्मनिरुपाधिस्वरूपंयदिवावायुरंखंसोपाधिकंब्रह्मनन्यदोंकारइतिश्रुत्यंतरात्केवलंखंशब्दार्थेविप्रतिपत्तिः। वेदोयमोंकारोवेदोविजानात्यनेनयद्वेदितव्यंयस्माद्वेदॐकारोवाचकोभिधानं। तेनायस्मात्अभिधानेनयद्वेदितव्यंब्रह्मप्रकाश्यमानमभिधीयमानंवेदसाधकोविजानात्युपलभते। तस्माद्वेदोयमिति· ब्राह्मणाविदुस्तस्माद्ब्राह्मणानामभिधानत्वेनसाधनत्वमभिप्रेतमोंकारस्य। अथवावेदोयमित्याद्यर्थवादः कथमोंकारोब्रह्मणःप्रतीकत्वेनविहितः ॐखंब्रह्मेतिसामानाधिकरण्यादस्यस्तुतिरिदानींवेदत्वेनसर्वोह्ययंवेदॐकारः एवएतत्प्रभवएतदात्मकः सर्वःऋग्यजुःसामादिभेदभिन्नःएषॐकारः। तद्यथाशंकुनासर्वाणिपर्णानीत्यादिश्रुत्यंतरात्। इतश्चायंवेदॐकारोयद्वेदितव्यंतत्सर्वमोंकारेणावेद्यतेनातोऽयमोंकारोवेदः। इतरस्यापिवेदस्यवेदत्वमतएव। तस्माद्विशिष्टोयमोंकारःसाधनत्वेनप्रतिपत्तव्यइति। अथवावेदःसःकोसोयंब्राह्मणाविदुरोंकारंब्राह्मणानांह्यसौप्रणवोद्गीथादिकल्पैर्विज्ञेयः। तस्मिन्हिप्रयुज्यमानेसाधनत्वेनसावेविदः। प्रयुक्तोभवतीति॥ ॥१॥ ॥इतिसप्तमस्यप्रथमंब्राह्मणम्॥ ॥रामरामराम॥

कौरव्यायणीपुत्रॐकाररूपेण। कल्पांतरमाह। वायुरमित्यादिना। ॐखंब्रह्मेत्यत्रवायुरंखंमुपास्यत्वेनोच्यतेनपुराणंखमितिकौरव्यायणीपुत्राभिप्रायः। अन्येषांतुपुराणंखमोंकार·
रूपेणोपास्यमित्युच्यतेॐखंब्रह्मेत्यत्रेत्याशयः। व्याप्नोति। प्रतीकपक्षमुपपाद्याभिधानपक्षमुपपादयति। वेदोयमिति। ॐकारःसर्वस्यनामजातस्यांतर्भावप्रमाणमाह। तद्यथेति। पक्षद्व
येपिसाधारण्येनयोजयति अथवेति। यस्मात्शब्दैःकृत्वा। प्रतीकपक्षेपिवेदोयमित्याद्यर्थोनिर्वहतीत्याह। अथवेति। प्रतीकपक्षयोजनांनिगमयति। तस्मादिति। अभिधानपक्षेप्रतीकप·
क्षेचवाक्यमेकैकंमयोजयित्वा। सर्वथाप्योंकारःप्रतीकत्वेनैवप्रतिमावत्साधनत्वंप्रतिपद्यते। एतद्वैसत्यकामपरंचापरंचब्रह्म ॥

शिवः
१८५
145

तद्विज्ञानसर्वोपास्तिशेषत्वेनेति द्रष्टव्यं। १ पितरि ब्रह्मचर्यमूषुरिति संबंधः। प्रजापतिसमीपे ब्रह्मचर्यवासमात्रेण किमित्यसौ देवादिभ्यो हितं ब्रूयादित्याशंक्याह। शिष्यत्वेनेति। शिष्यभावेन वृत्तेः संबं
धिनो ये धर्मास्तेषां मध्ये ब्रह्मचर्यस्येत्यादि योज्यं। विचारार्था प्लुतिः। प्रजापतेरनुशासनप्रागल्भ्यसौदित्यत्र लिंगमाह। न दन्तादिति। दमपि। निर्धारणे षष्ठी। द इति वर्णाधिकरणा वर्णान्तरभ्रमापोहार्थः

अधुना दमादिसाधनत्रयविधानार्थोऽयमारंभः। त्रयास्त्रिसंख्याकाः प्राजापत्याः प्रजापतेरपत्यानि प्राजापत्यास्ते किं प्रजापतौ पितरि ब्रह्मचर्यः। शिष्यत्ववृत्तेर्ब्रह्मचर्यस्य प्रा
धान्याच्छिष्याः सन्तो ब्रह्मचर्यमूषुरुषितवन्त इत्यर्थः। के ते विशेषतो देवा मनुष्या असुराश्च ते चोषित्वा ब्रह्मचर्यं किमकुर्वन्नित्युच्यते। तेषां देवा ऊचुः पितरं प्र
जापतिं किमिति ब्रवीतु कथयतु नोऽस्मभ्यं यदनुशासनं भवानिति तेभ्य एवमर्थिभ्यो हैतदक्षरं वर्णमात्रमुवाच द इति। उक्त्वा च तान् पप्रच्छ पिता। किं
व्यज्ञासिष्टा३ इति। मयोपदेशार्थमभिहितस्याक्षरस्यार्थं विज्ञातवन्तः आहोस्विन्नेति देवा ऊचुः व्यज्ञासिष्मेति विज्ञातवन्तो वयं यद्येवमुच्यतां किं मयोक्त
मिति देवा ऊचुः दाम्यत दान्ता यूयं स्वभावतः अतो दान्ता भवतेति नोऽस्मानात्थ कथयसि इतर आहोमिति। सम्यग्व्यज्ञासिष्टेति समानमन्यत्॥ २॥ ३॥ स्व

त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो
हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति॥ २॥
अथ हैनं मनुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दत्तेति
न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति॥ ३ ॥ अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच
द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति

भवतो लुब्धा यूयमतो यथाशक्त्या संविभजत दत्तेति नोऽस्मानात्थ किमन्यद्ब्रूयान्नो हितमिति मनुष्या यथासुरा दयध्वमिति क्रूरा यूयं हिंसादिपराः अतो
दयध्वं प्राणिषु दयां कुरुतेति। तदेतत्प्रजापतेरनुशासनमद्याप्यनुवर्तत एव। यः पूर्वं प्रजापतिर्देवादीननुशशास सोऽद्याप्यनुशास्त्येव दैवास्तनयित्नु
लक्षणया वाचा। कथं सैवाश्रूयते दैवी वाक्॥ ॥कोऽसौ स्तनयित्नुः॥ द द द इति दाम्यत दत्त दयध्वमित्येषां वाक्यानामुपलक्षणाय त्रिर्दकार उच्चार्य
ते अनुकृतिः स्तनयित्नुशब्दस्त्रिरेव संख्यानियमस्य लोके प्रसिद्धत्वात्। यस्माद्द्यापि प्रजापतिर्दाम्यत दत्त दयध्वमित्यनुशास्त्येव तस्मात्कार
णादेतत्त्रयं किं तत्त्रयमित्युच्यते दमं दानं दयामिति शिक्षेदुपाददद्यात्प्रजापतेरनुशासनमस्माभिः कर्तव्यमित्येवं मतिं कुर्यात्॥ ।

अजितेंद्रियाः। स एव प्रजापतिः। यः पूर्वोक्तो देवाद्यपि। अनु० वाचा। कथं श्रूयते यापि अनुशास्तीति। इति न। आत्थ। ऊचुः। यथा दकारत्रयमविवक्षितं तथा स्तनयित्नुशब्दे त्रित्वं विव
क्षितं। चेत्प्रसिद्धिविरोधः स्यादित्याशंक्याह। अनुकृतिरिति। शब्दानुकारमात्रमविवक्षितं स्तनयित्नुशब्दे त्रित्वं प्रमाणाभावादित्यर्थः॥ रामरामरामरामरामारामरामरामरामरामराम।

तदेतत्त्रयं शिक्षेदिति विधिश्रुत्कृतं त्रयाः प्राजापत्या इत्यादिना ग्रंथेनेत्याशंक्याह। अस्येहीति। सर्वैरेवत्रयमनुष्ठेयं चेत्तर्हि देवादीनुद्दिश्य दकारत्रयोच्चारमनुपपन्नमिति शंकते। तत्रेति। दमा
दित्रयस्य सर्वैरनुष्ठेयत्वे सतीत्यावत्। एकीयं परिहारमुत्थापयति। अत्रेति। उक्तं परिहारमंगीकृत्यास्मिन्नाख्यायिकातात्पर्यं ब्रूते। फलंत्विति। प्रत्येकमेकदकारोच्चारणं अयुक्तं। ने
घृणार्जितस्या। पूर्वोक्तः त्रयाः प्राजापत्या इत्यादि अस्यार्थः शेषः सर्वैः त्रयमनुष्ठेयं चेत् प्रत्येकं दकारत्रयोच्चारणे प्राप्ते कथं प्रजापतिना प्रत्येकमेकदकारोच्चारणं कृतं इति प्रश्ने प्रतिवाक्यं दे
वानां दानं दर्शयितानुशासनात्पूर्वमेवासीत्। किंवलं दीतित्वं नाभूत्। अतस्तदनुष्ठानार्थं देवान्प्रति एकदकारोच्चारणं प्रजापतेर्युक्तमिति एवमग्रेपि ज्ञेयं। मनोन्मोन्नोऽभिप्रायः शिक्षिसामि

तथा च स्मृतिः त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः। कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेदिति। अस्य हि विधेः शेष्यः पूर्वस्तथापि देवादीनुद्दिश्य किं
मर्थं दकारत्रयमुच्चारितवान्प्रजापतिः पृथगनुशासनार्थिनः ते वा कथं विवेकेन प्रतिपन्नाः प्रजापतेर्मनोगतं समानेनैव दकारवर्णमात्रेणेति पराभिप्रायस्ता
विकल्पयंति। अत्रैक आहुः। अदांतत्वाऽदातृत्वादयालुत्वैरपराधित्वमात्मनो मानाः शंकिता एव प्रजापतावूचुः किं नो वक्ष्यतीति। तेषां च दकारश्रवणमात्रा
देवात्माशंकावशेन तदर्थप्रतिपत्तिरभूत्। लोकेपि हि प्रसिद्धं पुत्राः शिष्याश्चानुशास्याः संतो दोषान्निवर्तयितव्या इति। अतो युक्तं प्रजापतेर्दकारमात्रोच्चारणं स्व
मादित्रये च दकारान्वयादात्मनो दोषानुरूप्येण देवादीनां विवेकेन प्रतिपत्तुं चेति। फलं त्वेतदात्मदोषज्ञाने सति दोषान्निवर्तयितुं शक्यते स्वेनाप्युपदेशेन
यथा देवादयो दकारमात्रेणेति। नन्वेतत्त्रयाणां देवादीनामनुशासनं। देवादिभिरप्येकैकमेवोपादेयं कथमपि तत्त्रयं मनुष्यैः शिक्षितव्यमिति। अत्र
उच्यते। पूर्वैर्देवादिभिर्विशिष्टैरनुष्ठितमेतत्त्रयं तस्मात्मनुष्यैरेवं च शिक्षितव्यमिति। तत्र दयालुत्वस्यानुष्ठेयत्वं स्यात्। कथमसुरैरप्रशस्तैरनु

स्तनयित्नुर्ददद इति दाम्यत दत्त दयध्वमिति तदेतत्त्रयँ शिक्षेद्दमं दानं दयामिति॥ ४ ॥द्वि० ब्राह्मणं॥ ॥एष प्रजापतिर्यद्धृदयमे

ष्ठितत्वादिति चेत्। न तुल्यत्वात्त्रयाणां मनोन्योऽभिप्रायः प्रजापतेः पुत्रा देवादयः पुत्रेभ्यश्च हितमेव पित्रोपदेष्टव्यं। प्रजापतिश्च हितज्ञो नान्यथोपदिशति तस्मा
त्तु चानुशासनं प्रजापतेः परमं मतं हितमतो मनुष्यैरेव तत्त्रयं शिक्षितव्यमिति। अथवा न देवा असुरा वा अन्ये केचन विद्यंते मनुष्येभ्यः मनुष्याणामेवाऽदांतायें
न्ये हृत्तमैर्गुणैः संपन्नास्ते देवाः लोभप्रधाना मनुष्याः तथा हिंसापराः क्रूरा असुरास्त एव मनुष्याः अदांतत्वादिदोषत्रयमपेक्ष्य देवादिशब्दभाजो भवंति
इतरांश्च गुणान्सत्वरजस्तमांस्यपेक्ष्य। अतो मनुष्यैरेव शिक्षितव्यमेतत्त्रयमिति तदपेक्षयैव प्रजापतिनोपदिष्टत्वात्। तथा हि मनुष्या अदांता लुब्धाः क्रूरा
श्च दृश्यंते। तथा च स्मृतिः। कामक्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेदिति॥ ४॥ सप्तमस्य द्वितीयं ब्राह्मणं॥ ॥दमादिसाधनत्रयं सर्वोपासनशेषं
विहितं। दांतोऽलुब्धो दयालुः सन्सर्वोपासनेष्वधिक्रियते इति तत्र निरुपाधिकस्य ब्रह्मणो दर्शनमतिक्रांतमथाधुना सोपाधिकस्य तस्यैवाभ्युदयफलानि वक्तव्या

ति यवमर्थायमारंभः। एष प्रजापतिर्हृदयं प्रजा

न्यत्र एव प्रकारः। किंच पृथक्पृथगनुशासनार्थिभ्यो देवादिभ्यो दकारमात्रोच्चारणे अपेक्षितमनुशासनं न सिध्यतीत्याह। पृथगिति। किमर्थमित्यादिना पूर्वेण संबंधः। दकारमात्रमुच्चारयतोपि प्रजापतेर्विभागेना
नुशासनं कथं ज्ञातमिति पृच्छति। तेवेति। अयं सर्वैरनुष्ठेयमिति परस्यासिद्धांतिनोभिप्रायः तदभिप्रायज्ञातुं कामाः संतः विकल्पयंतीति योजना। संप्रतिकर्ममीमांसकमतमनुसृत्याह। अ
थवेति। देवादिशब्दप्रवृत्तिनिमित्तांतरमाह॥ इतसश्चेति। पूर्ववत्॥ ॥राम।

प्रजापतिर्हृदयादीनि च सोपाधिकस्य ब्रह्मणो रूपाणि। अंतरेष्वांसोपाधिकब्रह्मरूपेणाउपासनं सोपाधिकब्रह्मण एवोपासनं। यथा प्रतिमायाः विष्णुरूपेणोपासनं विष्णोरेवोपासनं न तत्स्वं सति ॥ पञ्चमाध्यायोक्तत्व। उक्तस्य हृदयशब्दाद्येस्य पाचमिकं दर्शयन् प्रजापतित्वं साधयति। यस्मिन्निति। कथं हृदयस्य सर्वत्वं तत्राह। उक्तमिति। तत्र हृदयस्योपास्यत्वे सिद्धे सतीत्यनंतत्। न त्वेति काऽदयस्समस्यार्थः॥ एवं सति सोपाधिकब्रह्मणाउपासनप्रकृते एतत्सोपाधिकं ब्रह्म यद्धृदयमिति वक्तव्ये प्रागपि सोपाधिकब्रह्मणः प्रजापतिना १ भेदमाश्रित्याह ते। एव प्रजापतिर्हृदमिति। हृदये। सोपाधिकब्रह्मरूप प्रजापतिः ब्रह्मत्वं। हृदयस्य हृदयमिति नाम व्याख्यानं क्रियावाचिनो हृधातोः। भोक्तृ अर्थे। पायस्य यादिर्भ्युदयः तत्फलानि उपासनानि इति शेषः। अभिहरंतीति यावेद अस्मै विदुषे अभिहरंतीति संबंधः

पतिरनुशास्तीत्यनंतरमेवाभिहितं कः पुनरसावनुशास्ता प्रजापतिरित्युच्यते। एष प्रजापतिः कोसौ यद्धृदयं हृदयशब्देन हृदयस्था बुद्धिरुच्यते। यस्मिन् शाकल्यब्राह्मणांते नामरूपकर्मणामुपसंहार उक्तो दिग्विभागद्वारेण तदेतत्सर्वभूतप्रतिष्ठं सर्वभूतात्मभूतं हृदयं प्रजापतिः प्रजानां स्रष्टा एतद्ब्रह्म बृहत्त्वात्सर्वात्मत्वाच्च ब्रह्म एतत्सर्वं उक्तं पंचमाध्याये हृदयस्य हृदयत्वं सर्वत्वं च तस्मात्सर्वं यस्मात्तस्माऽुपास्यं हृदयं ब्रह्म तच्च हृदयनामाक्षरविषयमेव तावदुपासनमुच्यते। तदेतद्धृदयमिति नाम त्र्यक्षरं त्रीण्यक्षराण्यस्येति त्र्यक्षरं कानि पुनस्तानि त्रीण्यक्षराण्युच्यते हृ इत्येकमक्षरमभिहरंति हृतेराहरतिकर्मणो हृ इत्येतद्रूपमिति यो वेद। यस्माद्धृदयाय ब्रह्मणे स्वाश्चेंद्रियाण्यन्ये च विषयाः शब्दादयः स्वं स्वं कार्यमभिहरंति हृदयं च भोक्त्रर्थमभिहरत्यतो हृदयनाम्नो हृ इत्येतदक्षरमिति यो वेदास्मै विदुषेऽभिहरंति स्वाश्च ज्ञातयोऽन्ये चाऽसंबंधा बलिमिति वाक्यशेषः। विज्ञानानुरूपमेतत्फलं तथा द इत्येतदप्येकमक्षरमेतदपि दानार्थस्य ददातेर्द इति रूपं हृदयनामाक्षरत्वेन निबद्धमत्रापि हृदयाय ब्रह्मणे स्वाश्च करणान्यन्ये च विषयाः स्वं स्वं वीर्यं ददति हृदयं च भोक्त्रर्थं ददाति स्वं स्वं वीर्यमतो दकार इत्येवं यो वेदास्मै ददति स्वाश्चान्ये च तथा यमित्येतदप्येकमक्षरमिणो गत्यर्थस्य यमित्येतद्रूपमस्मिन्नाम्नि निबद्धमिति यो वेद सः स्वर्गं लोकमेति एवं नामाक्षरादपीदृशं विशिष्टं फलं प्राप्नोति किमु वक्तव्यं हृदयस्वरूपोपासनादिति हृदयस्तुतये नामाक्षरोपन्यासः॥ ५ ॥ सप्तमस्य तृतीयं ब्राह्मणं॥ ॥ तस्यैव हृदयाख्य

तद्ब्रह्मैतत्सर्वं तदेतत्त्र्यक्षरꣳ हृदयमिति हृ इत्येकमक्षरमभिहरंत्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद य इत्येकमक्षरमेति स्वर्गं लोकं य एवं वेद॥ ५ ॥ तृतीयं ब्राह्मणं॥ ॥ तद्वै तदेतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमांल्लोकान् जित इन्न्वसावसद्य एवमेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यꣳ ह्येव ब्रह्म॥ ६ ॥ चतुर्थं ब्राह्मणं॥ ॥

स्य ब्रह्मणः सत्यमित्युपासनं विधित्सन्नाह। तत् तदिति हृदयं ब्रह्म परामृश्यते वै इति स्मरणार्थं तद्यद्धृदयं ब्रह्म स्मर्यत इत्येकस्तच्छब्दः तदेतदुच्यते प्रकारांतरेणेति द्वितीयस्तच्छब्दः किं पुनस्तत्प्रकारांतरं एतदेव एतादृशेन तच्छब्देन संबध्यते तृतीयस्तच्छब्दः एतदिति वक्ष्यमाणं बुद्धौ सन्निधीकृत्याह आस बभूव किं पुनरेतदेवास यदुक्तं हृदयं ब्रह्मेति तदिति तृतीयस्तच्छब्दो विनियुक्तः किं तदिति विशेषतो निर्दिशति सत्यमेव सच्च त्यच्च मूर्तं चामूर्तं च सत्यं ब्रह्म पंचभूतात्मकमित्यर्थः। स यः कश्चित्सत्यात्मानमेतं महद्यक्षं पूज्यं प्रथमजं प्रथमजातं सर्वस्मात्संसारिणः एतदेवाग्रजातं ब्रह्मातः प्रथमजं वेद विजानाति सत्यं ब्रह्मेति तस्येदं फलमुच्यते। यथा सत्येन ब्रह्मणा इमे लोका आत्मसात्कृताः जिताः एवं सत्यात्मानं ब्रह्म महद्यक्षं प्रथमजं वेद स जयतीमांल्लोकान्। किं च जितो वशीकृत इत् नु इत्थं यथा ब्रह्मणा असौ शत्रुरिति वाक्यशेषः। असच्च असत् भवेदसौ शत्रुर्जितो भवेदित्यर्थः। तस्यैतत्फलमिति पुनर्निगमयति य एवमेतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति अतो विद्यानुरूपं फलं युक्तं सत्यं ह्येव यस्मात् ब्रह्मेति॥ ॥ ६ ॥ ॥ सप्तमस्य चतुर्थं ब्राह्मणं॥ ॥

बुद्धेः हृदयमिति नाम्नः मध्ये हृ इत्यक्षरं निबद्धं। एति स्वर्गमनेनेति व्युत्पत्तिमाश्रित्य। सोपाधिकस्य ब्रह्मणः हृदयरूपेणोपासनमुक्तं इदानीं तस्यैव सोपाधिकस्य ब्रह्मणः सत्यरूपेणोपासनं विवक्षुराह। तदित्यादि। यद्धृदयं ब्रह्म तत्तत्स्मर्यते। तद्धृदयं ब्रह्म प्रकारेणोच्यते। किं पुनस्तत्प्रकारांतरं। एतदेवास। किं पुनरेतदेवास यदुक्तं हृदयं ब्रह्मेति तत्। कारयितुमिच्छन्। पंचभूतात्मरूपेणाउपासनं। वक्ष्यमाणं त्याह एतदिति। इत्थं योजना। एतद्रूपमित्यर्थः। किंरूपमासेति प्रश्ने विशेषतो निर्दिशति। पंचभूतात्मकत्वात् सर्वस्मात् प्रथमजं। कस्मिन्कस्मिंश्चित्फलांतरमाह। किं चेति। वशीकृतस्य शत्रोः स्वरूपेण सत्त्वं वारयति। असदिति। य एवमे० ह्मेति तस्यैतत्फ० यति। य एवमित्यादेरेकार्थत्वात्पुनरुक्तिरित्याशंक्याह। तस्यैतदिति। इदं महती विद्याऽतो विद्यानुरूपमिदं महत्फलं युक्तमित्यर्थः। कथमस्य विज्ञानस्येदं फलमित्याशंक्याह। अत इति। पंचमी परामृष्टस्य सूचयति। सत्यं हीति। इति सत्यस्य विद्या

यद्यप्याद्यः सोमाद्याः क्रियमाणाः कर्मसमवायिन्यस्तथाप्युत्तरकाले कथं तासां तथात्वं। कर्मसमवायित्वं। कर्मणोऽस्थायित्वादित्याशंक्याह। ताश्चेति। कर्मसमवायित्वमपरित्यज्जनत्वसंबंधित्वेनापः प्रथमं वृत्ताः। तन्नाशोत्तरकालं सूक्ष्मेणादृष्टेनात्मना अंतीद्रियेणात्मनातिष्ठंतीति योजना। आप इति विशेषणात्भूतांतरव्यावृत्यर्थमिति भ्रांतिं वारयति। इतरेति। कथं तर्हि तासामेव श्रुतावुपादानं तत्राह। कर्मेति। इति तासामेवात्र ग्रहणमिति शेषः। विवक्षितपदार्थं निगमयति। सर्वाण्येवेति। कर्मणां सूक्ष्मरूपेणावस्थानादितरभूतसहितानामपां अपंचीकृतरूपेणावस्थानात् अपां कर्मसमवायित्वमुत्तरकालेऽप्यविरु

सत्यस्य ब्रह्मणः स्तुत्यर्थमिदमाह। महद्यक्षं प्रथमजमित्युक्तं तत्कथं प्रथमजत्वमित्युच्यते। आप एवेदमग्र आसुः। आप इति कर्मसमवायिन्योऽग्निहोत्राद्याहुतयोऽग्निहोत्राद्याहुत्यात्मकत्वादपां। ताश्चापोऽग्निहोत्रादिकर्मापवर्गोत्तरकाले केनचिददृष्टेन सूक्ष्मेणात्मना कर्मसमवायित्वमपरित्यज्य इतरभूतसहिता एव न केवलाः। कर्मसमवायित्वात्तु प्राधान्यमपामिति। सर्वाण्येव भूतानि प्रागुत्पत्तेरव्याकृतावस्थानि कर्तृसहितानि निर्दिश्यंत आप इति। ता आपो बीजभूता जगतोऽव्याकृतात्मनावस्थितास्ता एवेदं सर्वं नामरूपकृतं जगदग्र आसुर्नान्यत्किंचिद्विकारजातं आसीत्। ताः पुनरापः सत्यमसृजंत तस्मात्सत्यं ब्रह्म प्रथमजं। तदेतद्धिरण्यगर्भस्य सूत्रात्मनो जन्म यदव्याकृतस्य जगतो व्याकरणं। तत्सत्यं ब्रह्म कुतो महत्वात्। कथं महत्वमित्याह। यस्मात्सर्वस्य स्रष्टृ। कथं यत्सत्यं ब्रह्म तत्प्रजापतिं प्रजानां प

आप एवेदमग्र आसुस्ता आपः सत्यमसृजंत सत्यं ब्रह्म ब्रह्म प्रजापतिं प्रजापतिर्देवाꣳ स्ते देवाः सत्यमेवोपासते
तदेतत्त्र्यक्षरꣳ सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृ
तं तदेतदनृतमुभयतः सत्येन परिगृहीतꣳ सत्यभूयमेव भवति नैवं विद्वाꣳसमनृतꣳ हिनस्ति॥ १ ॥

तिं विराजं सूर्यादिकरणमसृजतेत्यनुषंगः। प्रजापतिर्देवान्स विराट् प्रजापतिर्देवानसृजत। यस्मात्सर्वमेव क्रमेण सत्याद्ब्रह्मणो जातं तस्मात्तन्महत्सत्यं ब्रह्म कथं पुनर्यक्षमित्युच्यते। त एवं सृष्टा देवाः पितरमपि विराजमतीत्य त एव सत्यं ब्रह्मोपासते। अतस्तत्प्रथमजं महद्यक्षं तस्मात्सर्वात्मनोपास्यं तत्रापि सत्यस्य ब्रह्मणो नाम। तदेतत्त्र्यक्षरं सत्यं कान्यक्षराणीत्याह। स इत्येकमक्षरं तीति इकारोऽनुबंधो निर्देशार्थः। यमित्येकमक्षरं तत्र तेषां प्रथमोत्तमे अक्षरे सकारयकारौ सत्यं मृत्युरूपाभावात्। मध्यतो मध्येऽनृतं। अनृतं हि मृत्युः। मृत्य्वनृतयोस्तकारस्य सामान्यात्। तदेतदनृतं मृत्युरूपमुभयतः सत्येन सकारयकारलक्षणेन परिगृहीतं व्याप्तमंतर्भावितं सत्यरूपाभ्याम्। अतो किंचित्करं तत्। सत्यभूयमेव सत्यबाहुल्यमेव भवति। एवं सत्यबाहुल्यं सर्वस्य मृत्योरनृतस्याकिंचित्करत्वं च यो वेद विद्वांस्तमेवं विद्वांसमनृतं कदाचित्प्रमादोक्तं न हिनस्ति॥ १ ॥ ॥रामरामरामरामरामरामरामरामरामरामरामः॥

द्धं। स्रष्टृत्वं। विशेषणाकर्मण्यपामिति। सत्यं पंचीकृतं भूतपंचकं। असृजंतेति पंचीकृतभूतपंचककृतसूत्रात्मनो विदुत्तमेव सत्यकृता विराट्सृष्टिर्बोध्यः। इदं सूर्यादिचक्षुरूपं। इतरभूतसहिता कर्तृयुता अपंचीकृता आपः आसन्नित्यर्थः। तद्व्याख्यातेषामक्षराणां मध्ये। अव्याकृतस्यापंचीकृतभूतपंचकस्य व्याकरणं पंचीकृतभूतपंचकरूपेण भवनं तदेतदेव सूत्रात्मनः सकाशाद्धिरण्यगर्भस्य विराट् जन्मवत्कृत्तु न चेतन्यस्य विराजः जन्माभावात्। कीदृशस्याव्याकृतस्य जगतः जगदग्रे इत्यर्थः। यन्नाम। अनृतरूपाभावात्। ॥रामरामरामरामरामराम॥

रतेउर्य । तस्य चाक्षुषपुरुषस्य स्वरूपदर्शनार्थं यत्कर्म तस्य सर्वं जानाति । एतस्मिन्नाम चेत्तत्सादिवसः । चक्षुरादिभिरिन्द्रियैः मंडलं प्रकाशयन् । तस्य दर्शनस्य किं फलमित्याशंक्याह । कथं नामेति ·
सत्यस्येत्यतो पासनस्य सोपाधिकस्य ब्रह्मणः । तदुपास्यं किं सत । यत्तत्सत्यं तत् । किं कथमुपास्यं । असौ पदार्थः । सः । सत्यं ब्रह्मस्वरूपं । उपासनान्तरं । प्रदेशभेदवाक्येनोः स्थानभेदेन भेदशंकित्वा परिहरति ।
तावेतावित्ति · अन्योन्यमुपकार्योपकारकत्वेनान्योन्यस्मिन्प्रतिष्ठितत्वं प्रश्नपूर्वकं प्रकटयति । कथमिति · स्थानभेदे । स्वरूपभेदो अत परमार्थतः न भेद इति भावः । दक्षिणाक्ष्युपलक्षणाः श्रेष्ठ सा तु यो
ये · पुरुषश्च श्रूयते । चक्षुर्भ्यां शरीरमवलोक्यादित्यो दृशेन हविर्ददातीति चाक्षुषस्यापि उपकारकत्वं । अन्यथा कथं वा दृश्येति · तत्र स्थानद्वयसंबंधिनस्सत्यस्य ब्रह्मणो ध्याने प्रकृते सतीत्यर्थः ॥

अस्याउनाम सत्यस्य ब्रह्मणः तं स्थानविशेषेऽउपासनमुपदिश्यते तत्र युक्तिं चिन्नयत सत्यं ब्रह्म प्रथमजं किमसौ सः कोसावादित्यः कः पुनरसावादित्यो य एष एतस्मिन्ना
दित्यमंडले पुरुषोऽभिमानी सोसौ सत्यं ब्रह्म यश्चाध्यात्मिकोऽयं दक्षिणोऽक्षन्निति पुरुषः स एव सत्यं ब्रह्मेति संबंधः । तावेतावादित्याक्षिस्थौ पुरुषावेकस्य ब्रह्मणः
स्थानविशेषो यस्मात्तस्मादन्योन्यस्मिन्नितरेतरस्मिन्नादित्यश्चाक्षुषे चाक्षुषश्चादित्ये प्रतिष्ठितावध्यात्माधिदैवतयोरन्योन्योपकार्योपकारकत्वात् कथं प्रतिष्ठितावित्यु
त आह रश्मिभिः प्रकाशेनानुग्रहं कुर्वन्नेष आदित्योऽस्मिंश्चाक्षुषेऽध्यात्मे प्रतिष्ठितः अयं च चाक्षुषः प्राणैरादित्यमनुगृह्णन्नमुष्मिन्नाधिदैवे प्रतिष्ठितः सोस्मिन्शरीरे विज्ञानमयो
भोक्ता यदा यस्मिन्काले उत्क्रमिष्यन्भवति तदासौ चाक्षुषः आदित्यपुरुषो रश्मीनुपसंहृत्य केवलेनोदासीनेन रूपेणावतिष्ठते तदायं विज्ञानमयः पश्यति शुद्धमे
व केवलं विरश्मि तन्मंडलं चन्द्रमंडलमिव तदेतद्दृष्टं रिष्टदर्शनं प्रासंगिकं प्रदर्श्यते । कथं नाम पुरुषः करणीये यत्नवान्स्यादिति । नैनं चाक्षुषं पुरुषमभीकृत्य एतं प्रत्य
नुग्रहाय एते रश्मयः स्वामिकर्मवशात्पूर्वमागच्छन्तोपि तत्कर्मक्षयमनुरुध्यमाना इव नापयान्ति न प्रत्यागच्छन्त्येनमतो वगम्यते परस्परोपकार्योपकारक
भावात्सत्यस्यैवैकात्मनोंऽशावेताविति ॥ ८ ॥ तत्र योसौ कोयं य एष एतस्मिन्मंडले पुरुषः सत्यनामा । तस्य व्याहृतयोऽवयवाः कथं भूरिति येयं व्याहृतिः सा तस्य शिरः

तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले पुरुषो यश्चायं दक्षिणोक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मिभिरेषोस्मिन्प्रतिष्ठितः प्राणैरयम
मुष्मिन्स यदोत्क्रमिष्यन्भवति शुद्धमेवैतन्मंडलं पश्यति नैनमेते रश्मयः प्रत्यायंति ॥ ८ ॥ य एष एतस्मिन्मंडले पुरुषस्तस्य भूरिति शिर एकं शिर एकमे
तदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हंति पाप्मानं जहाति च य एवं वेद ॥ ९ ॥ योयं दक्षिणो
क्षन्पुरुषस्तस्य भूरिति शिर एकं शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहमिति
हंति पाप्मानं जहाति च य एवं वेद ॥ १० ॥ पंचमं ब्राह्मणं ॥ ॥ मनोमयोयं पुरुषो भाः सत्यस्तस्मिन्नंतर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्ये·

आद्यत्वात्तत्सामान्यं स्वयमेवाह श्रुतिरेकं एकसंख्यायुक्तं शिरस्तथैतदक्षरमेकं भूरिति भुव इति वा द्वित्वसामान्याद्द्वौ बाहू द्वे एते अक्षरे तथा स्वरिति प्रतिष्ठा द्वे प्र
तिष्ठे द्वे एते अक्षरे प्रतिष्ठे पादौ प्रतितिष्ठत्याभ्यामिति तस्यास्य व्याहृत्यवयवस्य सत्यस्य ब्रह्मणः उपनिषद्रहस्यमभिधानं येनाभिधानेनाभिधीयमानं तद्ब्रह्माभि
मुखीभवति लोकवत्का असावित्याह । अहरिति । अहरिति चैतद्रूपं हंतेर्जहातेश्चेति यो वेद हंति जहाति च पाप्मानं य एवं वेद ॥ ९ ॥ एवं योयं दक्षिणोक्षन्पुरुषस्तस्य
भूरिति शिर इत्यादि सर्वं समानं । तस्योपनिषदहमिति प्रत्यगात्मभूतत्वात् । पूर्ववद्धंतेर्जहातेश्चेति ॥ १० ॥ सप्तमस्य पंचमं ब्राह्मणं ॥ ॥ उपाधीनामनेकत्वा
त्तदनेकविशेषणत्वाच्च तस्यैव प्रकृतस्य ब्रह्मणो मनउपाधिविशिष्टस्योपासनमभिधित्सन्नाह । मनोमयो मनः प्रायः मनस्युपलभ्यमानत्वात् । मनसा
चोपलभ्यत इति मनोमयोऽयं पुरुषो भाः सत्यः भारूप एव सत्यं सद्भावः स्वरूपं यस्य सोऽयं भाः सत्यो भास्वर इत्येतन्मनसः सर्वार्थावभासकत्वात् । मनोमयत्वाच्चाय
भास्वरस्तं तस्मिन्नस्मिन्नंतर्हृदये यथा व्रीहिर्वा यवो वा परिमाणतः एवं परिमाणो ब्रह्मस्मिन्नंतर्हृदये योगिभिर्दृश्यत इत्यर्थः । स एष सर्वस्येशानः सर्वस्य स्वभेदजा

चाक्षुषस्य पुरुषस्य कथमहमित्युपनिषदित्येतन्नाह । अस्यां गीते । स्वरूपं आत्मा जगतो गतः तस्य च श्रुति । फल । य एवं वेद तस्य स्य आरब्धानं इति यो वेदेति । उपनिषत् तस्य ध्यानार्थं स्थानं दर्शयन्ति ॥

बृ·भा·
१४८

सत्यरूपेणादित्यउपासनस्योक्तत्वाऽच्युतसत्यप्रसरणा इति। धेनुमुपासीतेति संबंधः। वाचो धेन्वा अ सादृश्यं विशदयति। यथेत्यादिना। प्रस्नाव्यते क्षरणोन्मुखा क्रियते। क्रियापाः प्रयत्नस्यैनदिति विशेषणं। तथा
था भवतीत्यर्थः। सोपाधिकस्यैव। प्राणेन हेतुना वाक् अर्थान् प्रसूते। शरीरारंभकपंचभूतान्तर्गत। सोपाधिकस्यैव। सगुणस्यैव ब्रह्मणो वागादिरूपत्वात् वागाद्युपासनं सगुणब्रह्मणस्यैवोपासनेवो
ध्यं। स्वधाहारैः पुरुषैरशितमन्नं। तं जाठराग्निं मूर्धने वह्निरूपं विराड्रूपं च उपासीत। नास्ति अधिकारित्वं यस्मात्तत्। अरिदमरणमित्यर्थः। हंतमध्यापेक्षितमित्यर्थः। सर्वभामिति फले चाश्रुतफलानां·

नस्येशानः स्वामी स्वामित्वेपि सति कश्चिदमात्यादितंत्रोयं तु न तथा किं तर्ह्यधिपतिरधिष्ठाय पालयिता सर्वमिदं प्रशास्ति यदिदं किंच यत्किंचित्सर्वं जगत्तत्सर्वं प्रशास्ति एवंम
नोमयस्योपासनात्तद्यथारूपापत्तिरेव फलं तं यथा यथोपासते तदेव भवतीति ब्राह्मणं॥ ११॥ सप्तमस्य षष्ठं ब्राह्मणं। तथैवोपासनांतरं सत्यस्य ब्रह्मणो विशिष्टफलमुच्यते। विद्यु·
द्ब्रह्मेत्याहुः। विद्युतो ब्रह्मणो निर्वचनमुच्यते विदानाद्वखंडनात्तमसो मेघांधकारं विदार्य ह्यवभासते·नोऽति विद्युद्वद्विद्युद्ब्रह्मेति यो वेदासौ विद्यत्यवखंडयति विनाशय
ति पाप्मनः। एनमात्मानं प्रति प्रतिकूलभूताः पाप्मानो ये तान्सर्वान्पाप्मनोऽवखंडयतीत्यर्थः। य एवं विद्युद्ब्रह्मेति तस्यानुरूपं फलं विद्युतो हि यस्माद्ब्रह्म॥ १२॥ सप्तमस्य सप्तमं·
ब्राह्मणं पुनरुपासनांतरं तस्यैव ब्रह्मणः वाग्वै धेनुरिति वागिति शब्दस्त्रयी तां वाचं धेनुं धेनुरिव धेनुः। यथा धेनुश्चतुर्भिः स्तनैः स्तन्यं पयः क्षरति वत्साय एवं वाग्धेनुर्वक्ष्यमाणैः स्त
नैः पय इवान्नं क्षरति देवादिभ्यः। के पुनस्ते स्तनाः के वा ते येभ्यः क्षरति। तस्याः एतस्या वाचो धेन्वा द्वौ स्तनौ देवा उपजीवंति प्राणेन हेतुना वाक् अर्थान् प्रसूते वत्सस्थानीया
कौ स्वाहाकारं च वषट्कारं च ताभ्यां हि हविर्दीयते देवेभ्यः। हंतकारं मनुष्या हंत इति मनुष्येभ्योन्नं प्रयच्छंति। स्वधाकारं पितरः स्वधाकारेण हि पितृभ्यः स्वधां प्रयच्छंति। तस्या धेन्वा
वाचः प्राण ऋषभः प्राणेन हि वाक् प्रसूयते। मनो वत्सो मनसा हि प्रस्नाव्यते। मनसा ह्यालोचिते विषये वाक्प्रवर्तते। तस्मान्मनो वत्सस्थानीयं। एवं वाग्धेनूपासकस्ता

शानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच॥ ११॥ षष्ठं ब्राह्मणं॥ ॥विद्युद्ब्रह्मेत्याहुर्विदानाद्विद्युद्विद्यत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति विद्युद्ध्येव
ब्रह्म॥ १२॥ स०सब्राह्मणं॥ ॥वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हंतकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवंति स्वाहाकारं
च वषट्कारं च हंतकारं मनुष्याः स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनो वत्सः॥ १३॥ अष्ट०ब्रा०॥ ॥अयमग्निर्वैश्वानरो योयमंतः पुरुषे येनेदमन्नं पच्य
ते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोति॥ १४॥ नव०ब्रा०॥ ॥यदा वै पुरुषोस्मा·
ल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा लंबरस्य
खं तेन स ऊर्ध्व आक्रमते स लोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीः समाः॥ १५॥ ॥दशमं ब्राह्मणम्॥ ॥ ॥

द्भावमेव प्रतिपद्यते॥ १३॥ स०अ०ब्रा०॥ ॥अयमग्निर्वैश्वानरः पूर्ववदुपासनांतरमयमग्निर्वैश्वानरः कोयमग्निरित्याह। योयमंतः पुरुषे किं शरीरारंभको नेत्युच्यते। येना
ग्निना वैश्वानराख्येनेदमन्नं पच्यते। किं तदन्नं यदिदमद्यते भुज्यतेऽन्नं प्रजाभिः जाठरोऽग्निरित्यर्थः। तस्य साक्षादुपलक्षणार्थमिदमाह। तस्याग्नेरन्नं पचतो जाठरस्यैष घो
षो भवति कोसौ यं घोषमेतदिति क्रियाविशेषणं कर्णावपिधायांगुलीभ्यामपिधानं कृत्वा शृणोति तं प्रजापतिमुपासीत वैश्वानरमग्निमत्रापि तद्भावं फलं तत्रासं
गिकमिदमरिष्टलक्षणमुच्यते शरीरे भोक्ता यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोति॥ १४॥ न०ब्रा०॥ ॥सर्वेषामस्मिन्प्रकरणे उपासनानां गतिरियं फलं चो
च्यते। यदा वै पुरुषो विद्वानस्माल्लोकात्प्रैति शरीरं परित्यजति स तदा वायुमागच्छति अंतरिक्षे तिर्यग्भूतो वायुः स्तिमितो भेद्यस्तिष्ठति वायुः स तत्र स्वात्मनि तस्मै स
प्राप्ताय विजिहीते स्वावयवान्विगमयति छिद्रीकरोत्यात्मानमित्यर्थः। किंपरिमाणं छिद्रमित्युच्यते। यथा रथचक्रस्य खं छिद्रं प्रसिद्धं परिमाणं तेन छिद्रेण स विद्वान्
मितिशेषः। आदित्यं प्रति। आगमने हेतुमाह। आदित्य इति। सगुणोपासकः। ब्रह्मलोकं जिगमिषोः संबंधी यो मार्गः तस्य निरोधं कृत्वा। आदित्यः स्थित॥ ॥रामरामरामरामरामः

शिवः
१४८
148

य० एवं अवकाशं न यावकाशं ददातीति वादित्रविवरेणस्य छिद्रस्य परिमाणं तत्परिमाणोपलक्षितमवकाशं ददातीत्यर्थः। प्रजानां पतिर्य इति प्रजापतिस्तं प्रजापतिलोकमित्यर्थः। तापं प्राप्नोति। यो इत्यस्य पश्चादित्यर्थः। बहून्कल्पानुप
त्यवान्तरकल्पानिति। यथा पूर्वस्मिन्नालयोपलवद्ब्रह्मलोकवासनं कृतमिति दीर्घं नाह। न चेति ।१। एतत्तिपासे प्राणधर्मौ। अपक्वावस्थायामन्नादुन्मूलनं प्राणं विना ते इति दृश्यते ।२। एकधाभूयमेकधाभा
वं भूत्वा प्राप्यता परमतां गच्छतीति कः। प्राप्तिमित्यर्थः। ब्रह्मज्ञात्वा। अन्नाख्याश्रयवान्प्राणाद्युवा स्यात् युवा सन् साधुयुवा स्यात् तथा अध्यापकं भवति अन्नगुणं विना प्राणगुणादेव ध्यानं सिध्यतीत्याशंक्याह। नहीति। प्रा

आक्रमते ऊर्ध्वमनू गच्छति। स आदित्यमागच्छति। आदित्यो ब्रह्मलोकं दिजिगमिषोर्मार्गनिरोधं कृत्वा स्थितः सोऽप्येवंविदे उपासकाय द्वारं प्रयच्छति तस्मै स तत्र विजिहीते यथा लंबरस्य
खं वादित्रविवरे यस्य छिद्रपरिमाणं तेन ऊर्ध्व आक्रमते। चन्द्रमसमागच्छति सोऽपि तस्मै तत्र विजिहीते यथा दुन्दुभेः खं प्रसिद्धं तेन स ऊर्ध्व आक्रमते स लोकं प्रजापतिमागच्छति किं विशि
ष्टमशोकं मानसेन दुःखेन विवर्जितमित्येतत्। अहिमं हिमवर्जितं शारीरदुःखवर्जितमित्यर्थः। तं प्राप्य तस्मिन्वसति शाश्वतीर्नित्याः समाः संवत्सरानित्यर्थः। ब्रह्मणो बहून्कल्पान्व
सतीत्येतत्॥ १५ ॥ दशमं ब्राह्मणम्॥ ॥ एतद्वै परमं तपः किं तद्यद्व्याहितो व्याधितो ज्वरादिपरिगृहीतः सन्यत्तप्यते तदेतत्परमं तप इत्येवं चिंतयेत्। दुःखसामान्यात्तस्यैवं चिन्तयतो
विदुषः कर्मक्षयहेतुस्तदेव तपो भवत्यनिंदतो अविषीदतः स एव तेन विज्ञानतपसा दग्धकिल्बिषः परमं हैव लोकं जयति य एवं वेद तथा मुमूर्षुरादावेव कल्पयति किं मेतद्वै परमं त
पो यं प्रेतं मां ग्रामादरण्यं हरन्ति ऋत्विजो अन्त्यकर्मणे तत् ग्रामादरण्यगमनसामान्यात्परमं मम तत्तपो भविष्यति। ग्रामादरण्यगमनं परं तप इति हि प्रसिद्धं परमं हैव लोकं जयति य एवं वेद।
तथैतद्वै परमं तपो यं प्रेतमग्नावभ्यादधतीत्यग्निप्रवेशसामान्यात्परमं हैव लोकं जयति य एवं वेद॥ १६ ॥ स० ए० ब्रा०॥ ॥ अन्नं ब्रह्मेति। तथैतदुपासनान्तरं विधित्सन्नाहान्नं ब्र
ह्मेत्येके आचार्या आहुस्तच्च न तथा ग्रहीतव्यमन्नं ब्रह्मेत्यन्ये चाहुः प्राणो ब्रह्मेति तच्च तथा न ग्रहीतव्यं। किमर्थं पुनरन्नं ब्रह्मेति न ग्राह्यं यस्मात्पूयति क्लिद्यते पूति

एतद्वै परमं तपो यद्व्याहितस्तप्यते परमꣳ हैव लोकं जयति य एवं वेदैतद्वै परमं तपो यं प्रेतमरण्यꣳ हरन्ति परमꣳ हैव लोकं जयति य एवं वेदैतद्वै परमं तपो
यं प्रेतमग्नावभ्यादधति परमꣳ हैव लोकं जयति य एवं वेद ॥ १६ ॥ एकादशं ब्राह्मणम् ॥ ॥ अन्नं ब्रह्मेत्येक आहुस्तन्न तथा पूयति वा अन्नमृते प्राणात्प्राणो
ब्रह्मेत्येक आहुस्तन्न तथा शुष्यति वै प्राण ऋतेऽन्नादेते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छतस्तद्ध स्माह प्रातृदः पितरं किꣳ स्विदेवैवं विदुषे साधु कुर्यां
किमेवास्मा असाधु कुर्यामिति स ह स्माह पाणिना मा प्रातृद कस्त्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति तस्मा उ हैतदुवाच वीत्यन्नं वै व्यन्ने हीमा
नि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन्भूतानि विशन्ति सर्वाणि भूतानि रमन्ते य एवं वेद ॥ ७

भावमापद्यते ऋते प्राणात्तत्कथं ब्रह्म भवितुमर्हति ब्रह्म हि नाम तद्यदविनाशि अस्तु तर्हि प्राणो ब्रह्म नैवं यस्माच्छुष्यति वै प्राणः शोषमुपैति ऋते अन्नादत्ता हि प्राणो अतो अन्नेनाद्ये
न विना न शक्नोत्यात्मानं धारयितुं तस्माच्छुष्यति वै प्राणः ऋते अन्नात्। अत एकैकस्य ब्रह्मता नोपपद्यते यस्मात्तस्मादेते ह त्वेव अन्नप्राणदेवते एकधाभूयमेकधाभावं भूत्वा गत्वा पर
मतां परमत्वं गच्छतो ब्रह्मत्वं प्राप्नुतस्तदेतदेवमध्यवस्याह स्म प्रातृदो नाम पिता आत्मनः किं स्वित्स्विदिति वितर्कयथा मया ब्रह्म कल्पितमेवंविदुषे किंस्वित्साधु कुर्यां साधु शोभ
नं पूजां कुर्यामित्यभिप्रायः। किमेवास्मै विदुषे असाधु कुर्यां कृतकृत्यासावित्यभिप्रायः। अन्नप्राणौ सह भूतौ ब्रह्मेति विद्वान्नासाधुकरणेन खण्डितो भवति नापि साधुकर
णेन महीकृतस्तमेवं वादिनं स पिता ह स्म आह पाणिना हस्तेन निवारयन्प्रातृदं मैवं वोचः कस्त्वेनयोरन्नप्राणयोरेकधाभूयं भूत्वा परमतां कस्य गच्छति न कश्चिदपि विज्ञानेन
तद्ब्रह्मत्वेनानेन परमतां गच्छति तस्मान्न एवं कृतकृत्यो असावितिय एवं ब्रवीतु भगवान्कथं परमतां गच्छतीति तस्मै एतद्वक्ष्यमाणं वच उवाच। किं तद्विशति गुणाद्वयस्य
परस्परोपस्थानमनुभवानु परस्पराह्यतिपर्यदा ति इत्युच्यते। अन्नं वै वी अन्ने हि। यस्मादिमानि सर्वाणि भूतानि विष्टान्याश्रितानि अतोऽन्नं वीत्युच्यते। किं त्वरमिति। रमिति चो
च्यते उक्तं प्राणो वै रं कुत इत्याह। प्राणे हि यस्माद्बलाश्रये सति सर्वाणि भूतानि रमन्तेऽतो रं प्राणः। सर्वभूताश्रयगुणमन्नं सर्वभूतरतिगुणश्च प्राणः। नहि कश्चिद
नायतनो निराश्रयो रमते। नापि सत्यप्यायतनेऽप्राणो दुर्बलो रमते। यदा त्वायतनवान्प्राणी बलवांश्च कृतार्थमात्मानं मन्यमानो रमते तदा लोकः युवा स्यात्साधुयुवाध्यापक इत्यादिश्रुतेः।
गुणद्वयोपेतमन्नगुणत्वसंभवादन्नं प्राणो नेत्याशंक्याह। नापीति। आयतनवत्त्वेन कृतार्थतेत्यत्र तैत्तिरीयश्रुतिं संवादयति। युवा स्यादिति। आशिष्ठो दृढिष्ठो बलिष्ठस्तस्येयं पृथिवी सर्वा वित्तेन पूर्णा स्यादि

सामशब्दांतेऽङ्गिमित्युक्त्वाउपास्यत्वेनोपन्यस्यते तन्नाह। तद्धीति। कस्मिन्किंसारोप्यतस्योपास्यत्वमिति प्रश्ने प्राणविशिष्टाणाति। किं पुनरिति। संगमनादित्येतदेव व्याचष्टे। साम्येति। बृहन्मन्त्रगायत्रीब्राह्मणस्य तात्पर्य
माह। ब्रह्मण इत्यादिना। छंदोन्तरेष्वपि विद्यमानेऽङ्गीति गायत्र्युपाधिकमेव ब्रह्मोपास्यमिष्यते तत्राह। सर्वं छंदसामिति। किंच प्राणात्मभावो गायत्र्या विवक्ष्यते। प्राणाश्च सर्वेषां छंदसां निर्वर्तकत्वादात्मा। तया·

इदानीमेवंविदः फलमाह॥ सर्वाणि ह वाऽस्मिन्भूतानि विशंत्यन्नगुणज्ञानात्सर्वाणि भूतानि रमंते प्राणगुणज्ञानाद्य एवं वेद॥ १७ ॥ द्वा॰ ब्रा॰॥ ॥उक्थं तथोपासनान्तरमुक्थं
शस्त्रं तद्धि प्रधानं महाव्रते क्रतौ। किं पुनस्तदुक्थं। प्राणो वा उक्थं। प्राणश्च प्रधानः शस्त्राणामुक्थं च यथा प्राणाः· अतं तदुक्थमित्युपासीत। कथं प्राण उक्थमित्याह प्राणो हि य
स्मादिदं सर्वमुत्थापयति। उत्थापनादुक्थं प्राणः। न ह्यप्राणः कश्चिदुत्तिष्ठति। तदुपासनफलमाह। उद्धास्मादेवंविदः उक्थवित्प्राणवित्वीरः पुत्रः उत्तिष्ठतीति दृष्ट
मेतत्फलमदृष्टं तूक्थस्य सायुज्यं सलोकतां जयति य एवं वेद॥ १८ ॥ यजुरिति चोपासीत प्राणं प्राणो वै यजुः कथं यजुः प्राणः प्राणो हि यस्मात्सर्वाणि भूतानि युज्यंते
न ह्यसति प्राणे केनचित्कस्यचिद्योगसामर्थ्यं। अतो युनक्तीति प्राणो यजुः एवंविदः फलमाह। युज्यंते उद्यमंत इत्यर्थः। ह्यस्मै एवंविदः सर्वाणि भूतानि श्रैष्ठ्या·

उक्थं प्राणो वा उक्थं प्राणो हीद॑ सर्वमुत्थापयत्युद्धास्मादुक्थविद्वीरस्तिष्ठत्युक्थस्य सायुज्य॑ सलोकतां जयति य एवं वेद॥ १८ ॥ यजुः
प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यंते युज्यंते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्य॑ सलोकतां जयति य एवं वे
द॥ १९ ॥ साम प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पंते साम्नः सायुज्य॑
सलोकतां जयति य एवं वेद॥ २० ॥ क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्र क्षत्रमत्रमाप्नोति क्षत्रस्य सायुज्य॑ सलोकतां
जयति य एवं वेद॥ २१ ॥ ॥त्रयोदशमं ब्राह्मणं॥ ॥

यश्रेष्ठभावायालं युज्नः श्रेष्ठो भवेदिति यजुषः प्राणस्य सायुज्यमित्यादि सर्वं समानं॥ १९ ॥ सामे
त्युपासीत प्राणं प्राणो वै साम कथं प्राणः साम प्राणो हि यस्मात्सर्वाणि भूतानि सम्यंचि संगच्छंते संगमनात्साम्यापत्तिहेतुत्वात्साम प्राणस्सम्यंचि संगच्छंते हास्मै
सर्वाणि भूतानि केवलं संगच्छंत एव श्रेष्ठभावाय चास्मै कल्पंते समर्थ्यंते साम्नः सायुज्यमित्यादि पूर्ववत्॥ २० ॥ तं प्राणं क्षत्रमित्युपासीत। प्राणो वै क्षत्रं प्रसिद्ध
मेतत्प्राणो हि वै क्षत्रं कथं प्रसिद्धतेत्याह। त्रायते पालयत्येनं पिंडं देहं प्राणः क्षणितोः शस्त्रादिहिंसितात्पुनर्मांसेन पूरयति यस्मात्क्षतत्राणात्प्रसिद्धं क्षत्रत्वं प्राण
स्य विद्वत्फलमाह। क्षत्रमत्रं न त्रायते नान्येन केनचिदित्यत्रं क्षत्रं प्राणः क्षत्रमत्रं क्षत्रं प्राणं प्राप्नोतीत्यर्थः। शाखांतरे वा पाठात्क्षत्रमात्रं प्राप्नोति प्राणो भवतीत्यर्थः
क्षत्रस्य सायुज्यं सलोकतां जयति य एवं वेद॥ २१ ॥ सप्तमस्य त्रयोदशं ब्राह्मणं॥ ॥ब्राह्मणे हृदयादनेकोपाधिविशिष्टस्योपासनमुक्तमथेदानीं गायत्र्यु
पाधिविशिष्टस्योपासनं वक्तव्यमित्यारभ्यते। सर्वं छंदसां हि गायत्री छंदः प्रधानभूतं तस्या यो कृ गायत्रं प्राणात्मगायत्रीति वक्ष्यति नन्वान्येषां छंदसां प्रयोक्तृप्राणा वा

गायत्र्याः सामर्थ्यं प्राणात्मभूता च सर्वछंदसां चा।

न या च सर्वछंदो व्यापक गायत्र्युपाधिकब्रह्मोपासनमेवात्र विवक्षितमित्याह। प्राणान्नेति। उक्थशब्दार्थं शस्त्रं उपासीत। उक्थं ऋग्वेदः। प्रथमस्य उद्धअपोयं। सर्वजनानां आश्रयः आनंदजनकश्च भवति। १२ अत उक्थं प्रा·
णात्तीति ध्यायेत्। उपासकस्य साम्यत्वात्। प्राणः साम। तत्प्रयोक्तृ गायत्री प्रयोक्ता। गयः वागादयः तेषां रक्षणात्। यः एवं वेद अस्मै। प्राणादनेन वागादयः सति प्राणे सर्वेषां छंदसामभिव्यक्तिः धनसर्वछंदसां·

ब्राह्मणः॥ ॥

149

गायत्रीवैशिष्ट्यं परात्मस्वरूपफलितमुपसंहरति· गायत्रीप्रथमपादे त्रैलोक्यदृष्ट्यारोपस्य प्रयोजनं दर्शयति।एवमिति·तदात्मभूता गायत्रीमुक्तं व्यक्तीकरोति·। प्राणाश्चेति·तत्त्रयोक्तगयत्राणात् त्रिगायत्री प्राणाश्च

त्मा प्राणाः प्राणाश्च सत्त्वत्राणात् क्षत्रमित्युक्तं। प्राणाश्च गायत्री। तस्मात्तदुपासनमेव विधित्स्यते। द्विजोत्तमजन्महेतुत्वाच्च। गायत्र्या ब्राह्मणमसृजत· त्रिष्टुभा राजन्यं जगत्या वैश्यमिति द्विजोत्तमस्य द्वितीयं जन्म गायत्री निमित्तं तस्मात्प्रक्षानात् गायत्री ब्राह्मणमुख्यायत्र ब्राह्मणोऽभिवदंतिस ब्राह्मणो क्रियायो विरजौ विविकित्वा ब्राह्मणो भवतीत्युक्तम पुरुषार्थसंबंधं ब्राह्मणस्य दर्शयति·तच्च ब्राह्मणत्वं गायत्री मूलमतो वक्तव्यं गायत्र्याः सतत्व·गायत्र्या हि यः सृष्टो द्विजोत्तमोऽतिरिक्तः स एवोत्तमः पुरुषार्थसाधनेऽधिक्रियते·ततस्तन्मूलः परमपुरुषार्थसंबंधः॥ ।तस्मात्तदुपासनमाह॥ भूमिः अंतरिक्षं द्यौः इत्येतान्यष्टावक्षराणि अष्टाक्षराणि अष्टाक्षरमष्टावक्षराणि यस्य तदिदमष्टाक्षरं ह वै प्रसिद्धावद्यातकावेकं प्रथमं गायत्र्यै गायत्र्याः पदं। यकारेणैवाक्षरत्व पूरणमेतदु·

भूमिरंतरिक्षं द्यौरित्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद॥ २२ ॥ ऋचो यजूंषि सामानीत्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद॥ २२ ॥ प्राणोऽपानो व्यान इत्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदिदं प्राणिजातं तावद्ध जयति योऽस्या एतदेवं पदं वेदा२ ॥

हुस्व। एतदेवास्याः गायत्र्याः पदं पादः प्रथमो भूम्यादिलक्षणस्त्रैलोक्यात्माऽष्टाक्षरत्वसामान्यादेवमेतत् त्रैलोक्यात्मकं गायत्र्याः प्रथमपदं वेद तस्यैतत्फलं स विद्वान्यावत्किंचिदेषु त्रिषु लोकेषु जेतव्यं तावत्सर्वं जयति। योऽस्या एतदेवं पदं वेद॥ २२ ॥ तथा ऋचो यजूंषि सामानीति त्रयी विद्यानामाक्षराणि एतान्यष्टावेव तथैवाक्षरं ह वा एकं गायत्र्यै पदं द्वितीयमेतदु हैवाऽस्या एतत् त्र्यृग्यजुः सामलक्षणमष्टाक्षरत्वसामान्यादेव· स यावतीयं त्रयी विद्या त्रय्या विद्यया यावत्फलजातमाप्यते तावद्ध जयति। योऽस्या एतद्गायत्र्यास्त्रयी विद्यालक्षणं पदं वेद॥ २२ ॥ तथा प्राणः अपानः व्यानः एतान्यपि प्राणाद्यभिधानाक्षराण्यष्टौ तच्च गायत्र्यास्तृतीयं पदं यावदिदं प्राणिजातं तावद्ध जयति योऽस्या एतदेवं गायत्र्यास्तृतीयं पदं वेद॥ ॥

प्राणादीनां त्राणात्मकत्वैकलक्षणत्वात्तयोस्तादात्म्यमित्यर्थः। गायत्रीप्राधान्ये हेत्वंतरमाह। द्विजेति· प्राणगायत्र्योस्तादात्म्ये फलितमाह। तस्मादिति। अतो वक्ष्यमित्यत्र श्रुतः शब्दस्यार्थमाह। गायत्र्या हीति। गायत्र्याः श्रेष्ठत्वात्। तस्मादिति। प्रसेदः। उक्तवक्ष्यमाणलक्षणां गायत्रीं सोपाधिकब्रह्मरूपेण चिंतयेत्। प्राधान्ये हेत्वंतरमाह। ब्राह्मणा इति। द्वितीयं पदं। गायत्रीमूल·

बृ·भा·
१५०

ननु त्रिपदा गायत्री व्याख्याता चेन्न किमुत्तरग्रंथेनेत्याशंक्याह । अथेति । शब्दात्मकगायत्रीप्रकरणविच्छेदार्थोऽथशब्दः । योगिभिर्दृश्यत इवेति लक्ष्यते । ननु मुख्यमीश्वरस्य दृश्यत्वमनींद्रियत्वादित्याह । दृश्यत
इवेति । लोका रजांसि उच्यंते इति निष्कृत्वांतरमाश्रित्याह । समस्तमिति । दीप्त्यात्मकरूपाणि आदित्यमंडलाद्यूर्ध्वालोकास्तद्विषयाः सर्वशब्दो न स्यात् । किं तर्हि । येवा० वीसा० । अभिधानाभिधेया
त्मिकां गायत्रीं व्याख्यायाभिधानस्याभिधेयतंत्रत्वमाह । सैवेति । ये लोकाः आदित्यात्पराः चक्षुर्ध्वाः ते वा ईशा भवंति । मंडलांतर्गतपुरुषस्य । वाक्यस्य यानि पदानि तेषां अर्थतः । प्रकाशयति ।

व्याख्यानं तं गायत्र्यास्त्रिपदायाः शब्दात्मिकायास्तुरीयं पदमुच्यते । अभिधेयभूतं तस्याः प्रकृताया गायत्र्या एतदेव वक्ष्यमाणं तुरीयं दर्शतं पदं परोरजा य एष
तपति तुरीयमित्यादि वाक्यपदार्थस्त्वयमेव व्याचष्टे श्रुतिः यद्वै चतुर्थं प्रसिद्धं लोके तदिह तुरीयशब्देनाभिधीयते । दर्शतं पदमित्यस्य पदस्य कोऽर्थ इत्युच्यते
ददृश इव दृश्यत इव हि एष मंडलांतर्गतः पुरुषः अतो दर्शतं पदमित्युच्यते । परोरजा इत्यस्य पदस्य कोऽर्थ इत्युच्यते । सर्वं समस्तं उ हि एव एष मंडलस्थः पु
रुषो रजो रजोजातं समस्तं लोकमित्यर्थः । उपर्युपरि आधिपत्यभावेन सर्वं लोकं रजोजातं तपति । उपर्युपरीति वीप्सा सर्वलोकाधिपत्यख्यापनार्था । ननु
सर्वशब्देनैव सिद्धा वीप्साऽनर्थिका । नैष दोषो ये वामुं परिखात्सविता दृश्यते तद्विषय एव सर्वशब्दः स्यादित्याशंकानिवृत्त्यर्था वीप्सा । ये चामुष्मा
त्पराः विवक्षितार्थोक्तिः सिद्धा लोकास्तेषां चेष्टे देवकामानां चेति श्रुत्यंतरात् एवं तस्मात्सर्वावरोधार्था वीप्सा । यथाऽसौ सविता सर्वाधिपत्यलक्षण

थास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति यद्वै चतुर्थं तत्तुरीयं दर्शतं पदमिति ददृश इव ह्येष परोरजा इति सर्वमु ह्ये
वैष रज उपर्युपरि तपत्येवꣳ हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ २४ ॥ सैषा गायत्र्येतस्मिꣳस्तुरीये दर्शते
पदे परोरजसि प्रतिष्ठिता तद्वै तत्सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयातामहम
दर्शमिति तस्मा एव श्रद्दध्याम

या श्रिया यशसा च ख्यात्या तपति हैवं श्रिया यशसा च तपति योऽस्या एतदेवं तुरीयं दर्शतं पदं वेद ॥ २४ ॥ सैषा त्रिपदोक्ता या त्रैलोक्यत्रैविद्यप्राणलक्षणा
गायत्री एतस्मिंश्चतुर्थे तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता । मूर्तामूर्तरसत्वादादित्यस्य रसापाये हि वस्तु नीरसमप्रतिष्ठितं भवति । यथा काष्ठादि दग्धसा
रं तद्वत् । तथा मूर्तामूर्तात्मकं जगत्त्रिपदा गायत्री आदित्ये प्रतिष्ठिता तद्रसत्वात्सह त्रिभिः पादैः । तत्तुरीयं पदं सत्ये प्रतिष्ठितं । किं पुनस्तत्सत्यमि
त्युच्यते । चक्षुर्वै सत्यं कथं चक्षुः सत्यमित्याह । प्रसिद्धमेतच्चक्षुर्हि सत्यं कथं प्रसिद्धमित्याह । तस्माद्यद्यदि इदानीमेव द्वौ विवदमानौ विरुद्धं वदमा
नावेयातामागच्छेयातां अहमदर्शं दृष्टवानस्मीत्यन्य आह । अहमश्रौषं यत्त्वया दृष्टं न तत्तथा तद्वस्त्विति । तयोर्य एवं ब्रूयादहमद्राक्षमिति तस्मै
एव श्रद्दध्याम न तु यो ब्रूयादहमश्रौषमिति श्रोतुर्मृषाश्रवणमपि संभवति । न तु चक्षुषो मृषादर्शनं । तस्मान्नाश्रौषमित्युक्तवते श्रद्दध्याम । तस्मात्सत्यं प्रतिप
त्तिहेतुत्वात्सत्यं चक्षुस्तस्मिन्सत्ये चक्षुषि सह त्रिभिरितरैः पादैस्तुरीयं पदं प्रतिष्ठितमित्यर्थः । उक्तं च स हादित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति ॥ ॥

अत्र पदे । उक्ताभिधेयरूपे वेदः । युक्तः सन् । आदित्यरूपं आदित्यस्य मूर्तामूर्तरसत्वात् । आदित्यस्य च चक्षुषि प्रतिष्ठितत्वं पंचमाध्याये प्रतिपादितमित्याह । उक्तं चेति । आदित्यस्य तुरीयपादस्य चा
ऽभेदात्तुरीये पदे गायत्री त्रिपदा प्रतिष्ठितेत्यर्थः । अभेदश्चात्र तुरीये पदे दृश्यत इवेत्युक्त्या बोध्यः ॥ ॥

राम:
१५०
150

गायत्र्याः प्राणात्वे किं सिध्यतीत्यत आह। अत इति। तदेव स्पष्टयति। यस्मिन्निति त्यादिना। गायत्रीनाम्नोऽभिनिर्वचनेन तस्याः प्राणत्राणहेतुत्वमाह। साहैषेति। आख्यायमूलत्वेनऋक्त्वं गायत्र्यास्तस्यसावित्रीत्वमाह। स आचार्यमिति। पच्छः पादशः। मतांतत्सुश्रावयति। नाभेतामिति। तत्सवितुर्वरेण्यं देवस्य भोजनं श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहीत्यनुष्टुभं सावित्रीमाहुः। सवितृदेवताकत्वादित्यर्थः। उपनीयानुष्टुप्छंदस्कैव वक्तव्या इति अपि आहुः। उपनीतस्य माणवकस्य प्रथमतः सरस्वतीवर्णात्मिकां सापेक्षत्वे द्योतयितुं हि शब्दः। दूषयति नेत्यादिना। यदि ह वा इत्यादेरुक्तार्थस्य श्रेयस्याः व्यवहितत्वं

तद्वैतुरीयपदाश्रयंसत्यंबलेप्रतिष्ठितं किंपुनस्तद्बलमित्याह। प्राणोवैबलंतस्मिन्प्राणेबलेप्रतिष्ठितंसत्यं। तथाचोक्तंसूत्रेणओतंचप्रोतंचेति। यस्माद्बलेसत्यंप्रतिष्ठितंतस्मादाहुर्बलंसत्यादोगीयओजीयःओजस्तरमित्यर्थः। लोकेपियस्मिन्हियदाश्रितंभवतितस्मादाश्रितादाश्रयस्यबलवत्तरत्वंप्रसिद्धंनहिदुर्बलंबलवतःक्वचिदाश्रयभूतंदृष्टं। एवमुक्तन्यायेनउक्तायागायत्रीअध्यात्मम्आत्मनिप्राणेप्रतिष्ठिता। सैषागायत्रीप्राणः। अतोगायत्र्यांजगत्प्रतिष्ठितं। यस्मिन्प्राणेसर्वेदेवाएकंभवंतिसर्वेवेदाःकर्माणिफलंचेत्येवंगायत्रीप्राणरूपासतीजगतःआत्मा। साहैषागयांस्तत्रेत्रातवती। केपुनर्गयाः प्राणावागादयोवैगयाःशब्दकरणात्। तांस्तत्रेसैषागायत्री। तत्रयद्यस्माद्गयांस्तत्रेतस्माद्गायत्रीनाम। गयत्राणाद्गायत्रीतिप्रथिता। सआचार्यउपनीयमाणवकमष्टवर्षंयामेवामूंसावित्रींसवितृदेवताकामन्वाहपच्छोऽर्धर्चशःसमस्तांचाचार्यएषैवसासाक्षात्प्राणोजगतआत्मामाणवकायसमर्पिताइहेदानींव्याख्यातानान्या। सआचार्योयस्मैमाणवकायान्वाहानुवक्तितस्यमा

तद्वैतत्सत्यंबलेप्रतिष्ठितंप्राणोवैबलंतत्प्राणेप्रतिष्ठितंतस्मादाहुर्बलꣳसत्यादोगीयइत्येवम्वेषागायत्र्यध्यात्मंप्रतिष्ठितासाहैषाꣳस्तत्रेप्राणावैगयास्तत्प्राणाꣳस्तत्रेतद्यद्गयाꣳस्तत्रेतस्माद्गायत्रीनामसयामेवामूꣳसावित्रीमन्वाहैषैवसासयस्माअन्वाहतस्यप्राणाꣳस्त्रायते॥ २५ ॥ ताꣳहैतामेकेसावित्रीमनुष्टुभमन्वाहुर्वागनुष्टुबेतद्वाचमनुब्रूमइतिनतथाकुर्याद्गायत्रीमेवसावित्रीमनुब्रूयाद्यदिहवाअप्येवंविद्बह्विवप्रतिगृह्णातिनहैवतद्गायत्र्याएकंचनपदंप्रति॥ २६ ॥सइमाꣳस्त्रींल्लोकान्पूर्णान्प्रतिगृह्णीयात्सोऽस्याएतत् [illegible]

णवकस्यगयान्प्राणांस्त्रायतेनरकादिपतनात्॥ २५ ॥तामेतांसावित्रींहैकेशाखिनोऽनुष्टुभमनुष्टुप्छंदस्कामन्वाहुरुपनीतायतदभिप्रायमाह। वागनुष्टुब्वाक्चशरीरेसरस्वतीतामेवहिवाचंसरस्वतींमाणवकायानुब्रूमइत्येवंवदंत। नतथाकुर्यान्नतथाविद्यात्यत्तआहुर्मृषैवतत्। किंतर्हिगायत्रीमेवसावित्रीमनुब्रूयात्। कस्माद्यस्मात्प्राणोगायत्रीत्युक्तंप्राणउक्तेवाक्सरस्वतीचान्येचप्राणाःसर्वंमाणवकायसमर्पितंभवति। किंचेदंप्रासंगिकमुक्त्वागायत्रीविदंस्तौति। यदिहवैअप्येवंवित्सर्वविद्यान्वह्विवनहितस्यसर्वात्मनोबहुनामास्तिकिंचित्सर्वात्मकत्वाद्विद्वान्बह्विवप्रतिगृह्णातिनहैवतत्प्रतिग्रहजातंगायत्र्याएकंचनैकमपिपदंप्रतिपर्याप्तं॥ २६ ॥सयइमांस्त्रीन्सयोगायत्रीवित्इमान्भूरादीन्त्रीन्गोऽश्वादिधनपूर्णान्लोकान्प्रतिगृह्णीयात्सप्रतिग्रहःअस्यागायत्र्याःयत्तत्प्रथमंपदंव्याख्यातमाप्नुयात्॥प्रतिग्रहःप्रथमपदविज्ञानफलेनैवभुक्तःस्यान्नत्वधिकदोषोत्पादकःसप्रतिग्रहः॥ ॥रामरामराम॥

ग्रंथांशसंगतिमाशंक्याह। किंचेदमिति। वायौजगत्। आधाराधेययोरभेदात्। चक्षुरादींद्रियात्प्राणोबलवत्तरः। तुरीयपदस्यादित्याश्रयंसत्याख्यंचक्षुरिंद्रियंबलाख्येप्राणेप्रतिष्ठितं। नायतोलिंगिप्रथमपुरुषैकवचनरूपंतत्रइति। तत्रेतिप्रयोक्तृशरीरस्यसम्यगर्थः। अतःसावित्रीगायत्रीतिशेषः। शब्दोच्चारणात्कायंतीतिगयागेःशब्दे। पक्षिणोयांतीतिन्यायेनसर्वेषांगमशब्दवाच्यत्वं। समीपंनीत्वा। तांहैकइत्यस्यविवरणंतामेकेइति। गायत्र्याःस्वरूपेप्राणउक्ते। गायत्रीविदःप्रतिगृह्णतोदोषाभावसामान्येनोक्तविशेषतःतदभावमाह। सयइति। इवशब्दस्यप्रयोजनं

[illegible]

बृ॰ भा॰
१५१

अंगीकृत्योत्तरवाक्यमुत्थापयति। दातेति। तदेवाकांक्षापूर्वकमाह। कस्मादिति। वागात्मकपदत्रयविज्ञानफलभोगेनत्यानंतर्यमेवशब्दार्थः। वैधर्म्यदृष्टांतमाह। यथेति। तानि प्रतिग्रहेणाव्याप्यानि न तथैतदाप्यमित्यर्थः। कु
त एतावदित्यादिवाक्यस्य तात्पर्यमाह। एतान्यपीति। एवंप्रकारापादचतुष्टयरूपा सर्वात्मिकेत्यर्थः। सोपाधिकब्रह्मरूपेणोपास्येत्यर्थः। ध्येयं रूपमुक्त्वा तस्यां गायत्र्या रूपमुपन्यस्यति। अतः परमिति। चतुर्थस्य पादस्य त्रयोपे
क्षयाप्राधान्यमभिप्रेत्याह। अत इति। यथोक्तनमस्कारप्रयोजनमाह। असाविति। योऽसवत्यारिपूर्णस्य गमनं न संभवति उच्यते न पद्यसे इति। त्रीणि पदानि। प्रतिग्रहणं। यतः गायत्र्याः चतुर्थपादविषयं विज्ञानं

अथपुनर्यावतीइयंत्रयीविद्यायस्तावत्प्रतिगृह्णीयात्सोस्याएतद्द्वितीयंपदमाप्नुयात्। द्वितीयपदविज्ञानफलंतेनभुक्तंस्यात्तथायावदिदंप्राणियस्तावत्प्रतिगृह्णीया
त्सोस्याएतत्तृतीयंपदमाप्नुयात्तेनतृतीयपदविज्ञानफलंभुक्तंस्यात्। कल्पयित्वेदमुच्यते। पादत्रयसममपियःकश्चित्प्रतिगृह्णीयात्तत्पादत्रयविज्ञानफलस्यैवक्षय
कारणंनत्वन्यस्यदोषस्यकर्तृत्वेक्षमंनचैवंदाताप्रतिग्रहीतावागायत्रीविज्ञानस्तुतयेकल्प्यतेदाताप्रतिग्रहीताचयद्यप्येवंसंभाव्यतेनासौप्रतिग्रहोऽपराधक्ष
मःकस्माद्यतोऽभ्यधिकमपिपुरुषार्थंविज्ञानमवशिष्टमेवचतुर्थपादविषयंगायत्र्यास्तद्दर्शयति। अथाऽस्याएतदेवतुरीयंदर्शितंपदंपरोरजायएषतपतितच्चै
तन्नैवकेनचिदपिप्रतिग्रहेणाप्यंनैवप्राप्यमित्यर्थः। यथापूर्वोक्तानित्रीणिपदानि। एतान्यपिनैवाप्यानिकेनचित्कल्पयित्वैवमुक्तंपरमार्थतःकुतउएतावत्प्र
तिगृह्णीयात्त्रैलोक्यादिसमंतस्माद्गायत्र्येवंप्रकारोपास्येत्यर्थः॥ ७ ॥तस्याउपस्थानंउपेत्यस्थानंनमस्करणमनेनमंत्रेणकोसौमंत्रइत्याह हेगायत्रि असि भ

दथयावतीयंत्रयीविद्यायस्तावत्प्रतिगृह्णीयात्सोऽस्याएतद्द्वितीयंपदमाप्नुयादथयावदिदंप्राणियस्तावत्प्रतिगृह्णीयात्सोस्याएतत्तृती
यंपदमाप्नुयादथास्याएतदेवतुरीयंदर्शतंपदंपरोरजायएषतपतिनैवकेनचनाप्यंकुतउएतावत्प्रतिगृह्णीयात्॥ ७ ॥तस्याउप
स्थानंगायत्र्यस्येकपदीद्विपदीत्रिपदीचतुष्पद्यपदसिनहिपद्यसे। नमस्तेतुरीयायदर्शतायपदायपरोरजसेऽसावदोमाप्रापद्
दितियंद्विष्यादसावस्मैकामोमासमृद्धीतिवानहैवास्मैसकामःसमृध्यतेयस्माएवमुपतिष्ठतेऽहमदःप्रापमिति॥ ॥ ८ ॥ ॥

वसित्रैलोक्यपादेनैकपदीत्रयीविद्यारूपेणद्वितीयेनद्विपदीप्राणादिनातृतीयेनत्रिपद्यसिचतुर्थेनतुरीयेनचतुष्पद्यसिएवंचतुर्भिःपादैरुपासकैःपद्य
सेज्ञायसेअतःपरंपरेणनिरुपाधिकेनस्वेनात्मनाःपदसिअविद्यमानंपदंयस्यास्तवयेनपद्यसेसात्वमपदसियस्मान्नहिपद्यसेनेतिनेत्यात्मत्वात्। अ
तोव्यवहारविषयायनमस्तेतुरीयायदर्शतायपदायपरोरजसे। असौशत्रुःपाप्मात्वत्प्राप्तिविघ्नकरःअदस्तदात्मनःकार्यंयत्त्वत्प्राप्तिविघ्नकर्तृत्वंमा
प्रापन्मैवप्राप्नोत्वितिशब्दोमंत्रपरिसमाप्त्यर्थः। यदिवासौप्रतिद्वेषंकुर्यात्स्वयंविद्वांस्तंप्रत्यनेनोपस्थानमसौशत्रुरमुकनामेतिनामगृह्णीयादस्मैयज्ञ
दत्तायाभिप्रेतःकामोमासमृद्धिसमृद्धिंमाप्राप्नोत्वितिचोपतिष्ठतेनहैवास्मैदेवदत्तायसकामःसमृध्यते। कस्मैयस्माएवमुपतिष्ठतेऽहमदोदेवदत्ताभि
प्रेतंप्रापमितिचोपतिष्ठते असावदोमाप्रापदित्यादित्रयाणांमंत्रपदानांयथाकामंविकल्पः॥ ॥ ८ ॥ ॥रामरामरामरामरामराम॥

अवशिष्टमिति। मनसाप्राप्य। व्यवहारविषयेचतुष्पद्यसिपरमार्थतस्तुअपद्यसीत्युक्तेनोच्यतेव्यवहारविषयायेति। व्यवहारविषयेस्त्रीकृतायेत्यर्थः। द्विविधमुपस्थानमाभिचारिकं। आभ्युदयिकंच।
तत्राद्यमेवानुवादयति। यंद्विष्यादिति। नामगृह्णीयात्तदीयंनामगृहीत्वाचतदभिप्रेतंमाप्रापदित्यनेनोपस्थानमितिसंबंधः। आभ्युदयिकमुपस्थानंदर्शयति अहमिति। तंशत्रुंप्रतिसंलक्षीकृत्यपू
र्वोक्तेनमंत्रेणनमस्कारंकृत्वाअनेनवक्ष्यमाणेनापिनमस्कारंकुर्यात्। किंवचनमित्याह। असौशत्रुरमुकनामामदभिप्रेतंमाप्रापदित्यनेनापिनमस्कारःकार्यः। यद्वाअस्मैयज्ञदत्तायाभिप्रेतःका

शिवः
१५१
151

मुखीपाविरोध्यन कोथशङ्कः। यत्तु हैतत् अहो इत्येतत् होबुडिलगायत्रीविदस्मीति यदब्रूथाः न तत्तस्य वचसः अननुरूपं इदं हस्तिरूपेण वहनं। नु किं आदित्यस्य अमृतत्वात् प्रार्थने अशंक्याहा अस्ति चेति। आदिमंडलांत

गायत्र्या मुखविधानार्थमर्थवाद उच्यते। एतत् ह किल वै स्मर्यते तत्र गायत्रीविज्ञानविषये जनको वैदेहः बुडिलं नामतोऽश्वतराश्वस्यापत्यमाश्वतराश्विं किलोक्तवान् यन्नु इति वि
तर्के हो अहो इत्येतत् यदन्नु गायत्रीविदब्रूथाः गायत्रीविदस्मीति यदब्रूथाः किमिदं तस्य वचसोऽननुरूपमथ यदि गायत्रीवित् प्रतिग्रहदोषेण हस्तीभूतो वहसीति स प्रत्याहाः
ताम्माति नः। मुखं गायत्र्याः हि यस्मादस्याः हे सम्राट् न विदां चकार नाविज्ञातवानस्मीति ह उवाच। एकाङ्गविकलत्वात् गायत्रीविज्ञानं मम अफलं जातं शृणु तर्हि तस्याः
गायत्र्याः अग्निरेव मुखं यदि ह वै अपि बह्विव इन्धनं अग्नावभ्यादधति लौकिकाः सर्वमेव तत्संदहत्येवं धनमग्निरेवं ह एवंविद् गायत्र्या अग्निमुखत्वमित्येवं वेत्तीत्यादि स्वयं
गायत्र्यात्माऽग्निमुखः सन् यद्यपि बह्विव पापं कुरुते प्रतिग्रहादिदोषं तत्सर्वं पापजातं संप्साय भक्षयित्वा शुद्धोऽग्निवत्पूतः पूतस्मात्प्रतिग्रहदोषात् गायत्र्यात्माऽजरोऽमृत
श्च संभवति।२८॥ ॥सप्तमस्य चतुर्दशं ब्राह्मणम्॥ ॥योज्ञानकर्मसमुच्चयकारी सोऽन्तकाले आदित्यं प्रार्थयति अस्ति च प्रसंगो गायत्र्यास्तुरीयपादो हि सः तदुपस्थानं प्रकृतं।

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्गायत्रीविदब्रूथा अथ कथꣳ हस्तीभूतो वहसीति मुखꣳ ह्यस्याः सम्राण्न विदां चकारे
ति होवाच तस्या अग्निरेव मुखं यदि ह वा अपि बह्विवाग्नावभ्यादधति सर्वमेव तत्संदहत्येवꣳ हैवैवंविद्यद्यपि बह्विव पापं कुरुते सर्वमेव तत्संप्साय शुद्धः पू
तोऽजरोऽमृतः संभवति।२८॥ ॥चतुर्दशं ब्राह्मणं॥ ॥हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं। तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये। पूषन्नेकर्षे यम सूर्य प्राजाप
१ त्यव्यूह रश्मीन्। समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि॥

अन्तःसमये प्रार्थने हिरण्मयेन पात्रेण यथा पात्रेणोद्दकं वस्तु पिधीयते स्वर्णमिदं तेन त्वं ब्रह्मज्योतिर्मयेन मंडलेनाऽपिहितमसमाहितचेतसामदृश्यत्वान उच्यते सत्य:
स्यापिहितं मुखं मुखं स्वरूपं तदपिधानपात्रमपिधानमिव दर्शनप्रतिबंधकारणं तत्त्वं हे पूषन् जगतः पोषणात्पूषा सविता अपावृणु अपावृतं कुरु दर्शनप्रतिबंध
कारणमपनयेत्यर्थः। सत्यधर्माय सत्यं धर्मो यस्य सोऽयं सत्यधर्मोऽहं सत्यधर्मा तस्मै त्वदात्मभूतायेत्यर्थः। दृष्टये दर्शनाय। पूषन्नित्यादीनि नामान्यामंत्रणार्थानि सवितुः एकर्षे एक
श्चासावृषिश्चैकर्षिर्दर्शनादृषिः। स हि सर्वस्य जगतः आत्मा चक्षुश्च सन् सर्वं पश्यत्येकोऽसंगः कृतात्मक ऋषिः। सूर्य आकाशात्कान्दीचरतातिमंत्रवर्णात्। यमः सर्वं हि जग
तः संयमनं त्वत्कृतं। सूर्यः स्वैरयति रसान् रश्मीन् प्राणान् धियो वा जगतः इति प्राजापत्य प्रजापतेरीश्वरस्यापत्यं हिरण्यगर्भस्य वा हे प्राजापत्य व्यूह विगमय रश्मीन् समूह
संक्षिपात्मनस्तेजो येनाऽहं शक्नुयां द्रष्टुं तेजसापहृतदृष्टिर्न शक्नुयां त्वत्स्वरूपमंजसा द्रष्टुं। विद्योतनस्वरूपाणामतः उपसंहर तेजः। यत्ते तव रूपं सर्वकल्याणानामति

वेनत्सत्पुरुषेः सत्यात्मप्रसादेन उच्यते। त्वदात्मभूतं मां उद्दिश्य दर्शनप्रतिबंधकारणं अपावृणु। अग्निहोत्रादिकर्मज्ञानं॥ यथा विद्योतनेन विद्युत्प्रकाशे रूपवतां घटादीनां स्वरूपं चक्षुष्मान्पश्यति तथा
तेजः माद्रष्टुं॥ तमं तत्ते पश्यामि पश्यामि वयं वचनव्यत्ययेन॥ ॥श्रीरामसीताराम श्रीराम सीताराम श्रीराम सीताराम श्रीराम श्रीराम श्रीमच्छिन्द्रनाथं वन्दे॥ श्री श्री श्री॥॥

शि: भा
१५२

किंचनाहं त्वां भृत्यवद्याचे ऽभेदेन ध्यातव्यादिसाह। योसाविति। व्याहृतिशरीरे उक्तस्य कथमहमिति प्रयोगाय पनित्याशंक्याह। अहरिति। न देवेदमिति अहं मम प्रयुच्यते। नतु तव शरीरपाते पिनाभूततात्। आध्यात्मिक

इत्यत्र
[illegible]
ॐकार प्रतीकत्वान्नमस्कार॥

योसौ भूर्भुवःस्वर्व्याहृत्यवयवः पुरुषः ऽक्षतित्वात्पुरुषः सोहमस्मि भवामि। अहरहमिति चोपनिषदुक्तत्वादनित्यवाक्यत्वेपि न देवेदं परामृश्यते सोहमस्म्यमृतमिति संबन्धः। ममामृतस्य सत्यस्य शरीरपाते शरीरस्थोयः प्राणो वायुः सोऽनिलं बाह्यं वायुमेव प्रतिगच्छतु तथान्यादेवताः स्वां स्वां प्रकृतिं गच्छन्तु अथेदमपि भस्मान्तं सत् पृथिवीं यातु शरीरं अथेदानीमात्मनः संकल्पभूतां मनसि व्यवस्थितामग्निदेवतां प्रार्थयति॥ ॐमिति क्रतो इति च संबन्धिनार्थविव। ॐकार प्रतीकत्वादोमनोमयत्वाच्च क्रतुः। हे ॐ क्रतो स्मर यन्मया स्मर्तव्यं तत्कालेहि त्वत्स्मरणवशादिष्टगतिः प्राप्यते ऽतः प्रार्थ्यते। यन्मया कृतं तत्स्मर पुनरुक्तिरादरार्था। किंच अग्ने नय सु

योऽसावसौ पुरुषः सोहमस्मि। वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरं। ॐ क्रतो स्मर
कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव व
युनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥२॥ ॥
॥ ॥पंचमदशाध्यायसमाप्तम्॥ ॥सप्तमोध्यायसमाप्तम्॥ ॥श्रीरामरामः॥

पथा सुपथा शोभनेन मार्गेण राये धनाय कर्मफलप्राप्तये इत्यर्थः॥ न दक्षिणेन कृष्णेन पुनरावृत्तियुक्तेन किं तर्हि शुक्लेनैव सुपथा ऽस्मान् विश्वानि सर्वाणि हे देव वयुनानि प्रज्ञानानि सर्वप्राणिनां विद्वान्। किंच युयोधि अपनय वियोजय अस्मदस्मत्तो जुहुराणं कुटिलमेनः पापं पापजातं सर्वं ततः पापे न वियुक्ता वयं मेष्यामः उत्तरेण पथा त्वत्प्रसादात्। किंतु वयं तुभ्यं परिचर्यां कर्तुं न शक्नुमः अतो भूयिष्ठां बहुतमां ते तुभ्यं नम उक्तिं नमस्कारवचनं विधेम नमस्कारोक्त्या परिचरेमेत्यर्थः॥ अन्यत्कर्तुं न समर्थाः सन्तः॥ २ ॥इति श्रीशंकरभगवतः कृतायां वाजसनेयकाण्वशाखायाम् ईशावास्योपनिषद्भाष्यं संपूर्णम्॥ ॥

शिव
१५२

वाय्वादिप्रतिबंधादन आह। ममेति। मानसो विषयभूतां अतो मनसि व्यवस्थिताः यज्ञानग्रहणां कर्मादीनां कुपलक्षणम्। नम इति वाक्यं कथयामः॥ गमिष्यामः॥ ॥श्रीरामराम श्रीरामराम॥

152

आदिशब्दादन्नवैशिष्ट्यनिर्देशः॥ ॥वक्ष्यमाणप्राणोपासनस्य पूर्वोक्तोक्ताद्गुणाविशेषान्नमाशंक्य गुणभेदात्फलभेदाच्च नैवमित्यभिप्रेत्याह। न पुनरिति। चक्षुरादीन्विहाय उक्ते प्राणस्यैवोपासने प्रकारान्तरोऽ

ॐ प्राणो गायत्रीत्युक्तं। कस्मात्पुनः कारणात्प्राणभावो गायत्र्याः न पुनर्वागादिभाव इति। यस्माज्ज्येष्ठश्च श्रेष्ठश्च प्राणो न वागादयो ज्येष्ठश्रेष्ठगुणभाजः। कथं ज्येष्ठ
त्वं श्रेष्ठत्वं च प्राणस्येति तन्निर्दिधारयिषयेदमारभ्यते। अथवा उक्थयजुःसामक्षत्रादिभावैः प्राणस्यैवोपासनमभिहितं समस्तत्वप्यन्येषु चक्षुरादिषु। न च हेतुमात्र
मिहानन्तर्येणास्य वक्ष्यते। न पुनः पूर्वशेषता विवक्षिता खिलत्वादस्य काण्डस्य पूर्वत्र यदनुक्तं विशिष्टफलं प्राणविषयमुपासनं तद्वक्तव्यमिति। यः कश्चिद्ध वै
इत्यवधारणार्थो यो ज्येष्ठश्रेष्ठगुणं वक्ष्यमाणं यो वेद स भवत्येव ज्येष्ठः श्रेष्ठश्च। एवं फलेन प्रलोभितः सन् प्रश्नायाभिमुखीभूतस्तस्मै चाह। प्राणो वै ज्ये
ष्ठः श्रेष्ठश्च। कथं पुनरवगम्यते प्राणो ज्येष्ठः श्रेष्ठश्चेति यस्मान्निषेककाल एव शुक्रशोणितसंबन्धः प्राणादिकलापस्याविशिष्टः तथापि ना प्राणेषु

भवेत्

[illegible]

[illegible]

ॐ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वा
नां भवत्यपि च येषां बुभूषति य एवं वेदेति॥१॥ ॥

[illegible]

ॐ वियोह्रातिप्रथमो वृत्तिलाभः प्राणस्य चक्षुरादिभ्योऽतो ज्येष्ठो वयसा प्राणः। निषेककालादारभ्य गर्भं पुष्यति। प्राणे हि लब्धवृत्तौ पश्चाच्चक्षुरादीनां वृत्तिलाभो
ऽतो युक्तं प्राणस्य ज्येष्ठत्वं चक्षुरादिषु भवति तु कश्चित्कुले ज्येष्ठो गुणहीनत्वान्न श्रेष्ठः। मध्यमः कनिष्ठो वा गुणाढ्यत्वाद्भवेच्छ्रेष्ठो न ज्येष्ठो न तु तथेहत्या
ह प्राणस्य तु श्रेष्ठत्वं श्रेष्ठश्च। कथं पुनः श्रेष्ठ्यमवगम्यते प्राणस्य। तदिह संवादेन दर्शयिष्यामः। सर्वथापि तु प्राणं ज्येष्ठश्रेष्ठगुणं यो वेदोपास्ते स स्वानां
ज्ञातीनां ज्येष्ठश्च श्रेष्ठश्च भवति। ज्येष्ठश्रेष्ठगुणोपासनसामर्थ्यात्स्वव्यतिरेकेणापि च येषां मध्ये ज्येष्ठश्च श्रेष्ठश्च भवामीति बुभूषति भवितुमि
च्छति। तेषामपि ज्येष्ठश्रेष्ठप्राणदर्शी ज्येष्ठश्च श्रेष्ठश्च भवति॥ ॥रामरामरामरामरामरामश्रीरामसीतारामश्री।रामरामरामरासीताराम।

[illegible]

संगतिरुच्यते। सर्वथापीति। भोगेपरागनारोपेरावेत्यर्थः॥४। येषां मध्ये ज्येष्ठश्रेष्ठोऽहं भवामि भूयासं इति येषां मध्ये ज्येष्ठश्च बुभूषति। इति योजना॥ अपिशब्दोऽन्यत्वेन वर्तमानानां येषामिति॥ ६७॥

ज्येष्ठत्वस्य विद्याफलत्वमाक्षिपति॰ नस्य विद्याफलत्वं साधयति॰ उच्यत इति॰ इष्टान्वेष्टत्वं दुःसाध्यमिति दोषस्याऽसत्त्वमीमाह नेति॰। न च हेतुमाह। प्राणवदिति। यथा प्राणस्य नासनादिप्रभृतेश्चक्षुरादीनां वृत्तिलाभ

ननु वयोनिमित्तं ज्येष्ठत्वं तदिह स्यात्ः कथं भवतीत्युच्यते॰ नैष दोषः। प्राणवृत्तिलाभस्यैव ज्येष्ठत्वस्य विवक्षितत्वात्॥१॥ यो ह वै वशिष्ठं वेद वसिष्ठः स्वानां भवति॰ तद्दर्शनानुरूप्येण फलं। येषां च ज्ञातिव्यतिरेकेन वसिष्ठो भवितुमिच्छति तेषां च वशिष्ठो भवत्युच्यते। तर्हि कासौ वसिष्ठेति॰ वाग्वै वसिष्ठा॰ वासयत्यतिशयेन वस्ते वेति वसिष्ठा॰ वाग्मिनो हि धनवंतो वसंत्यतिशयेन। आच्छादनार्थस्य वा वसेर्वसिष्ठः। अभिभवंति हि वाचा वाग्मिनोऽन्यान्। तेन वशिष्ठगुणवत्यीं ज्ञानाद्वसिष्ठगुणो भवतीति दर्शनानुरूपं फलं २। यो ह वै प्रतिष्ठां वेद। प्रतितिष्ठत्यनयेति प्रतिष्ठा तां प्रतिष्ठागुणवतीं। यो वेद तस्यैतत्फलं॰ प्रतितिष्ठत्यस्मिन्देशे काले च॰। तथा दुर्गे विषमे च दुर्गमने च देशे दुर्भिक्षादौ वा काले विषमे॰। यद्येवमुच्यते कस्तर्हि प्रतिष्ठा चक्षुर्वै प्रतिष्ठा॰॥

यो ह वै वसिष्ठं वेद वशिष्ठः स्वानां भवति वाग्वै वशिष्ठा वशिष्ठः स्वानां भवत्यपि च एषां दुर्भवति य एवं वेद २ यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठाः चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ३ यो ह वै संपदं वेद सं हास्मै पद्यते यं कामं कामयते श्रोत्रं वै संपच्छ्रोत्रे हीमे सर्वे वेदा अभिसंपन्नाः सं हास्मै पद्यते यं कामं का छां॰ उ॰ = ४ = ५

कथं चक्षुषः प्रतिष्ठात्वमित्याह। चक्षुषा हि समे च दुर्गे च द्रष्टा प्रतितिष्ठति। अतोऽनुरूपं फलं प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेदेति॥३ यो ह वै संपदं वेद संपद्गुणयुक्तं यो वेद तस्यैतत्फलं अस्मै विदुषे संपद्यते ह। किं यं कामं कामयते स कामः। किं पुनः संपद्गुणकं श्रोत्रं वै संपत्। कथं पुनः श्रोत्रस्य संपद्गुणत्वमित्युच्यते। श्रोत्रे सति हि यस्मात्सर्वे वेदाः अभिसंपन्नाः श्रोत्रेन्द्रियवतोऽध्येयत्वात्। वेदविहितकर्मायत्ताश्च कामाः तस्माच्छ्रोत्रं संपदिति विज्ञानानुरूपं फलं सं हास्मै पद्यते यं कामं कामयते य एवं वेद॥४॥ ॥श्रीश्रीश्रीरामार्प्पणमस्तु शुभम्॥ ॥

श्रीरामसीताराम श्रीराम सीताराम श्रीराम सीताराम श्रीरामसीताराम श्रीरामसीताराम श्रीरामसीताराम श्रीराम श्रीरामसीताराम श्री॰ श्री॰ श्री॰ श्री॰ श्री॰॥

तथा प्राणोपासकाधानं गावनमन्येषां स्वानां भवतीति प्रागुक्तदर्शनो ज्येष्ठत्वं न वयोनिबंधनमित्यर्थः॥ वशिष्ठत्वमपि प्राणस्यैव वक्तुमुत्तरवाक्यमुत्थाप्य वाचष्टे यो हेत्यादिना। वासयत्यतिशयेनेत्युक्तं विशदयति।

मनसर

यो ह वा आयतनं वेदायतनमाश्रयस्तं यो वेदायतनं स्वानां भवत्यायतनं जनानामन्येषामपि। किं पुनस्तदायतनमित्युच्यते। मनो वा आयतनमाश्रय इन्द्रियाणां विषयाणां च। मनआश्रिता हि विषया आत्मनो भोग्यत्वं प्रतिपद्यन्ते। मनःसंकल्पवशानि चेन्द्रियाणि प्रवर्त्तन्ते निवर्त्तन्ते वाऽतो मन आयतनमिन्द्रियाणाम् अतो दर्शनानुरूप्येण फलमायतनं स्वानां भवत्यायतनं जनानां य एवं वेद॥ ५॥ यो ह वै प्रजातिं वेद प्रजायते ह प्रजया पशुभिश्च सम्पन्नो भवति। रेतो वै प्रजातिः रेतसा प्रजननेन्द्रियमुपलक्ष्यते। तद्विज्ञानानुरूपं फलं प्रजायते ह प्रजया सपन्नोभवति॥१ पशुभिर्य एवं वेद॥ ६॥ ते हेमे प्राणा वागादयः अहंश्रेयसे अहंश्रेयानित्येतस्मै प्रयोजनाय विवदमाना विप्रवदमाना ब्रह्म जग्मुः ब्रह्म गतवन्तो ब्रह्मशब्दवाच्यं प्रजापतिं गत्वा च तद्ब्रह्म ह ऊचुरुक्तवन्तः कः नो अस्माकं मध्ये वसिष्ठः को अस्माकं मध्ये वसति वासयति च। तद्ब्रह्म तैः पृष्टं सत् ह उवाच उक्तवत् यस्मिन्वः युष्माकं मध्ये उत्क्रान्ते निर्गते शरीरादिदं

इन्द्रियाश्रयत्वं मनसः स्फुटयति। म
नः संकल्पेति। उत्क्रान्तवसिष्ठत्वादिगु
णान् वागादिगामिन

यो ह वा आयतनं वेदायतनꣳ स्वानां भवत्यायतनं जनानां मनो वा आयतनमायतनꣳ स्वानां भवत्यायतनं जनानां य एवं वेद॥
यो ह वै प्रजातिं वेद प्रजायते ह प्रजया पशुभी रेतो वै प्रजातिः प्रजायते ह प्रजया पशुभिर्य एवं वेद॥ ६॥ ते हेमे प्राणा अहꣳश्रे
यसे विवदमाना ब्रह्म जग्मुस्तद्धोचुः को नो वसिष्ठ इति तद्धोवाच यस्मिन्व उत्क्रान्त इदꣳ शरीरं पापीयो मन्यते स वो वसिष्ठ इति॥ ७
वाग्घोच्चक्राम सा संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा कला अवदन्तो वाचा प्राणन्तः प्राणेन प
श्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह वाक्॥ ८॥ श्रीरामश्रीरामरामः॥

किन्तु मुख्यप्राणागमनाय वलिदर्शि
नमाभ्यामितं करोति॥ न ह
त्यादिना

शरीरं पूर्वस्मादतिशयेन पापीयः पापतरं मन्यते लोकः। शरीरं हि नाम अनेकाशुचिसंघातत्वाज्जीवतोऽपि पापमेव ततोऽपि कष्टतरं यस्मिन्नुत्क्रान्ते भवति। वैराग्यार्थमिदमुच्यते पापीय इति स वो युष्माकं मध्ये वसिष्ठो भवति॥ ७॥ जानन्नपि वसिष्ठं प्रजापतिर्नोवाच यं वसिष्ठ इति इतरेषामप्रियपरिहाराय। तस्य एवमुक्ता ब्रह्मणा आत्मनो वीर्यपरीक्षणाय क्रमेणोच्चक्रमुः तत्र वागेव प्रथमम् अस्माच्छरीरादुच्चक्राम उत्क्रान्तवती सा चोत्क्रम्य संवत्सरं प्रोष्य प्रोषिता भूत्वा पुनरागत्योवाच कथमशकत शक्तवन्तो यूयं मदृते मां विना जीवितुमिति त एवमुक्ता ऊचुः॥ यथा लोके कला मूका अवदन्तो वाचा प्राणन्तः प्राणेन व्यापारं कुर्वन्तः प्राणेन पश्यन्तो दर्शनव्यापारं चक्षुषा कुर्वन्तः तथा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा कार्याकार्यादिविषयं प्रजायमाना रेतसा प्रजा उत्पादयन्तः॥ ॥श्रीश्रीश्री॥

बृ॰भा
१५४

मस्माजीविष्मवयमित्येवं श्रोत्रोर्दंतोन गमनागमनेनास्मिन्नवशिष्टं तं बुध्वा प्रविवेश ह वाक्॥ ॥ तथा चक्षुर्होच्चक्रामेत्यादि पूर्ववत्। श्रोत्रमनःप्रजातिरिति॥८।१०।११।१२॥ ॥अथ ह प्राण उच्चिक्रमिष्यन् उत्क्रमणं करिष्यन् तदानीमेव स्वस्थानात् प्रचलिता वागादयः किमिवेत्याह यथा लोके महाश्वासौ सुहयश्च महासुहयः शोभनो हयो लक्षणोपेतो महान् परिमाणेन सिन्धुदेशभवः सैन्धवो अभिजननं तं पड्वीशशङ्कून् पादबन्धनशङ्कून् पड्वीशाख्यान् शङ्कवः बध्यतानं संवृहेद् यथ छिद्युगपत् उत्खनेत् अश्वारोहे आरूढे परीक्षणाय एवं ह एव इमान्

चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथान्धा अपश्यंतश्चक्षुषा प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह चक्षुः॥ ॥ श्रोत्रं होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वांसो मनसा प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह श्रोत्रं॥ १०॥ मनो होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा मुग्धा अविद्वांसो मनसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना रेतसैवमजीविष्मेति प्रविवेश ह मनः॥ ॥ रेतो होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा क्लीबा अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वांसो मनसैवमजीविष्मेति प्रविवेश ह रेतः॥१२॥ ॥

यगणो अश्वः सैन्धवः इन्द्रियः यत्र त्वयं वसतीति वासिवास। यत्र पूर्वे आपितं ममाभिजननः परीक्षणाय अश्वारोहे आरूढे सति। को न खल्वत्र श्रेष्ठः इति ज्ञातुमिच्छु विद्वान् अनेन परी परीक्षणं करोतीति यथार्थता। मध्ये पयो कल्प्य प्राणः। कल्पनामात्रं न तु वस्तुतः। विदुष इति॥ न देवस्तु पश्यति अनेनेति। कथितवंतः

यथोक्त। तस्य प्राणसंवादस्य काल्पनिकत्वं दर्शयति। अयं चेति॥ संवादस्य मुख्यार्थत्वात् कल्पितत्वमाशंक्याह॥ न हीति। अदित्यादेः विवरणम् तेनेति ==

वागादीन् प्राणान् संववर्ह उद्यतवान् स्वस्थानात् भ्रंशितवान् ते वागादयः ऊचुः हे भगव भगवः प्राणोत्क्रमीर्न वै शक्ष्यामस्त्वदृते त्वां विना जीवितुं। यद्येवं मम श्रेष्ठता विज्ञाता भवद्भिरहमत्र श्रेष्ठस्तस्य उ मे मम बलिं करं कुरुत करं प्रयच्छतेति। अयं च प्राणसंवादः कल्पितो विदुषः श्रेष्ठपरीक्षणप्रकारोपदेशः॥ अनेन हि प्रकारेण विद्वान् कोऽत्र बलवत्र श्रेष्ठ इति परीक्षणं करोति। अयं च प्राणसंवादः कल्पितो विदुषः श्रेष्ठपरीक्षणप्रकारोपदेशः॥ अस्य परीक्षणप्रकारः संवादभूतः कथ्यते॥ ∴ ॥७॥ ॥७॥ ॥

शि॰व
१५४
154

शास्त्रान्तरेणास्मेयोभवत्यभक्ष्यभक्षणादित्यादिनेत्यर्थः प्राणविद्विनिश्चितविषयशास्त्रान्तरसर्वभक्षणं तु प्राणदर्शनो विवक्षितमनोव्यवस्थितविषयत्वात्स्मृतिनिषेधेन सर्वभक्षणस्यादिनामुदितहोमवद्विकल्पस्यापीति शंकते· तेनेति·। किं सर्वान्नभक्षणं विहितं न वा न चेन्न तस्य निषिद्धस्यान्नस्यास्य बाधाविहितव्यापकाभावात्· विहितं चेत्· तत्किं यदिदमित्यादिनान हेत्यादिना वा नाद्य इत्याह ॥ नाविधायकत्वादिति·।

न ह्यन्यथा संहत्यकारिणां सतामेषामञ्जसैव संवत्सरमात्रमेकैकस्य निर्गमनाद्युपपद्यते· तस्माद्विज्ञानेनानेन प्रकारेण विचारयन्ति· वागादीनां प्रधानबुभुत्सुरूपासनाय बलिं प्रार्थिताः सन्तः प्राणाय तथेति प्रज्ञानवंतः ॥१२॥ सा ह वाक् प्रथमं बलिदानाय प्रवृत्ता ह किलोवाच· उक्तवती यद्वै अहं वशिष्ठास्मि यन्मम वशिष्ठत्वं तत्त्वं तव तेन वशिष्ठगुणेन त्वं तद्वशिष्ठोऽसीति ॥ यदहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोऽसि या मम प्रतिष्ठा सा त्वमसीति चक्षुः समानमन्यत्संपदायतनप्रख्यातित्वगुणान्क्रमेण समर्पितवंतः। यद्येवं साधु बलिं दत्तवंतो भवन्तो ब्रूमः। तस्य उ मे एवंगुणवि

अथ ह प्राण उत्क्रमिष्यन्यथा महासुहयः सैन्धवः पड्वीशशंकून्संवृहेदेवꣳ हैवेमान्प्राणान्संववर्ह ते होचुः
मा भगव उत्क्रमीर्न वै शक्ष्यामस्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥१२॥ सा ह वागुवाच यद्वा
अहं वसिष्ठास्मि त्वं तद्वसिष्ठोऽसीति यद्वा अहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोऽसीति चक्षुर्यद्वा अहꣳ संपदस्मि·

शिष्यस्तु किमन्नं किं वाशनमित्याहुरितरे यदिदं लोके किंचित्किंचिदल्पमप्यन्नं वा आ श्वभ्य आ कृमिभ्यः आ कीटपतंगेभ्यः यच्छ्वान्नं कृम्यन्नं कीटपतंगान्नं च तेन सह सर्वमेव यत्किंचित्प्राणिभिरद्यमानं तत्सर्वं तवान्नं· । सर्वं प्राणस्यान्नमिति दृष्टिरत्र विधीयते·। केचित्तु सर्वभक्षणे दोषाभावं वदंति प्राणान्नविदः। तदसत् शास्त्रान्तरेण प्रतिषिद्धत्वात्· तेनास्य विकल्प इति चेत्· न अविधायकत्वात्· न ह वा अस्यानन्नं जग्धं भवतीति सर्वं प्राणस्यान्नमित्येतस्य विज्ञानस्य विहितस्य स्तुत्यर्थमेतत्· । तेनैकवाक्यतापत्तेः॥ न तु शास्त्रान्तरविहितस्य बाधने सामर्थ्यमन्यपरत्वादस्य·। प्राणः

यदिदमित्यादिना सर्वं प्राणस्यान्नमिति· ज्ञानमेव विधीयते·। ननु प्राणविदः सर्वान्नभक्षणं न देवद्योतिपदःभावान्न विकल्पो अभक्ष्येदित्यादिविहितस्य भक्षणाभावस्य बाधनेन हेत्यादिवाक्यस्य न सामर्थ्यमित्यर्थः प्रतिषेधे सर्वभक्षणस्य सर्वान्नभक्षणतः। भवता॰ तेन वाक्यं सर्वं प्राणस्य अन्नं इत्येतस्य विहितस्य विज्ञानस्य स्तुत्यर्थः ॥ न ह वा॰ न ह वेत्यादिवाक्यस्य स्तुतिपरत्वात्॰

शाखाभवनकश्चित्तुउदितेत्युक्ति·।कश्चिदन्नदिदिनज इति·।कृतार्थविसमितेन·ज्ञानेनमहः सवान्नभक्षणानत्रदोषाभावज्ञापनात्तः।दैवविधित्सितमित्याशंक्याह।यस्त्विति।प्राणस्वरूपवलाभिनियावतः

मात्रस्यसर्वमन्नमित्येतद्दर्शनमिहविधित्सितंनतुसर्वंभक्षणीयमिति। यत्तुसर्वभक्षणेदोषाभावज्ञानंतन्मिथ्यैवप्रमाणाभावात्·।विदुषःप्राणत्वात् सर्वान्नोपपत्तेः।सामर्थ्याददोषएवेतिचेन्नाशेषाऽन्नत्वानुपपत्तेः।सत्यंयद्यपिविद्वान्प्राणोयेनकार्यकरणसंघातेनविशिष्टस्यविदुः।ज्ञानेनकार्यकरणसंघातेनकृमिकीटदेवाद्यशेषान्नभक्षणंनोपपद्यते·।तेनतत्राशेषान्नभक्षणेदोषाभावज्ञापनमनर्थकम्प्राप्तत्वादशेषान्नभक्षणदोषस्य·।ननुप्राणः सन्भक्षयत्येवकृमिकीटाद्यन्नमपि।बाढं।किंतुनतुतद्विषयः प्रतिषेधोस्ति। तस्माद्दवरक्तकिंसुकेतत्रदोषाभावः अतस्तद्विषयादोषाभावज्ञापनमनर्थकं।अप्राप्तत्वादशेषान्नभक्षणेदोषस्य·।येनतुकार्यकरणसंघातसंबंधेनप्रतिषेधः क्रियतेतत्संबंधेनात्विहनैवप्रतिप्रसवोस्ति।तस्मात्तत्प्रतिषे

त्वंतत्संपदसीतिश्रोत्रंयत्तवा अहमायतनमस्मित्वंतदायतनमसीतिमनोयद्वा अहंप्रजातिरस्मि
त्वंतत्प्रजापतिरसीतिरेतस्तस्योमेकिमन्नंकिंवासइतियदिदंकिंचाश्वभ्यआकृमिभ्यआ ॥

धातिक्रमेदोषएवस्यात्।अन्नविषयत्वान्नहवाइत्यादे।नचब्राह्मणादिशरीरस्यसर्वान्नत्वदर्शनमिहविधीयते·किंतुप्राणमात्रस्यैवयथाचसामान्येनसर्वान्नस्यप्राणस्यकिंचिदन्नजातस्य·।चिज्जीवनहेतुयथाविषंविषजस्कृमेस्तदेवान्नस्यप्राणान्नमीपसतदृष्टमेवदोषा।उत्पाद्यनिमरणादिलक्षणं·।तथासर्वान्नस्यापिप्राणस्यप्रतिषिद्धान्नभक्षणेप्राप्तराणात्वादिदेहसंबंधाद्दोषएवस्यात्तस्मान्मिथ्याज्ञानमेवाऽभक्ष्यभक्षणेदोषाभावज्ञानं।आपोवासइत्यापोभक्ष्यमाणावसनस्थानीयास्तवाऽत्रप्राणस्यापोवासःयेनतद्दर्शनंविधीयतेनतुःवासकार्यंआपोविनियोक्तुशक्याः।तस्माद्यथाप्राप्तेऽवेक्षणेदर्शनमात्रंकर्तव्यंनहवैअस्यसर्वंप्राणस्यान्नमित्येवंविदः।अनन्नमनदनीयंजग्धंभुक्तंभवतीह। यद्यप्यनेनानदनीयंभुक्तमदनीयमेवतद्भुक्तंस्यान्नतुतत्कृतदोषः।॥

किंफलात्मनाविदुषः सर्वान्नभक्षणंसाध्यतेकिंवासाधकत्वरूपेणेतिविकल्पः आद्यमंगीकरोति·।बाढमिति।प्राणरूपेणसर्वभक्षणंतत्तस्यार्थः।नत्रप्रतिषेधाभावेसदृष्टांतंफलितमाह।तस्मादिति·॥

प्राणरूपं। किमित्ययं स्तुत्यर्थवादः फलवाद एव किं न स्यादित्याशंक्याह। फलं त्विति। उक्तमेवार्थं चोद्यसमाधिभ्यां समर्थयते। नन्वित्यादिना। प्रकृतवाक्यवशात्प्रतिपन्नं रूपमनतिक्रम्य। हस्तिविधानमसहमानः शंकते। नन्विति। अन्नप्रायत्यार्थमाचमनं प्राणपरिधानार्थं चेत्याशंक्याह। तन्नेति। उक्तोऽधिकरत्वदोषं दूषयति नेत्यादिना। तत्राचमनं दर्शनं निरपेक्षमित्याह। क्रियामात्रमिति। नन्वाचमनफलभूतं प्रायत्यं तादर्थ्येन सापेक्षमिति चेन्नेत्याह। नेति। क्रियायास्त्वेतदाधानसामर्थ्यादित्यर्थः। आचमने। अनेनाचमनेन मम प्रायत्यं भवतीति ज्ञानसापेक्षं। द्विवारं कर्तव्यं आचमनं स्यात्। प्रतिज्ञाह। फलवाक्यस्य द्वाररूपत्वं न कृतं इति मन्यते। आपो

राणि प्यते इत्येतद्विद्याः स्तुतिरित्युवाच। तथाप्यनन्नं प्रति गृहीतं यद्यप्यप्रतिग्राह्यं हस्त्यादि प्रतिगृहीतं स्यात्तदप्यन्नमेव अप्रतिग्राह्यं प्रतिगृहीतं स्यात्। तत्राप्यप्रतिग्राह्यप्रतिग्रहदोषेणानलिप्यत इति स्तुत्यर्थमेव य एवमेतदन्नस्य प्राणस्यान्नं वेद फलं तु प्राणात्मभाव एव न त्वेतत्फलाभिप्रायेण किं तर्हि स्तुत्यभिप्रायेणेति। नन्वेतदेव फलं कस्मान्न भवति। न प्राणात्मदर्शिनः प्राणात्मभाव एव फलं तत्र च प्राणात्मभूतस्य सर्वान्नात्मनोऽनदनीयमप्ययमप्रतिग्राह्यमपि प्रतिग्राह्यमिति यथाप्राप्तमेवोपादाय विद्या स्तूयते। अतो न च फलविधिस्वरूपता वाक्यस्य। यस्मादापो वासः प्राणस्य तस्माद्विद्वांसो ब्राह्मणाः श्रोत्रियाः अधीतवेदाः अशिष्यन्तो भोक्ष्यमाणाः आचामन्त्यपः अशित्वा चाचामन्ति भुक्त्वा चोत्तरकालमपोऽभक्षयन्ति। तत्र तेषामाचमतां कोऽभिप्राय इत्याह। एतमेवानं प्राणमनग्नं कुर्वन्तो मन्यन्ते। अस्ति चेत्ययं यो यस्मै वासो ददाति स तमनग्नं करोमीति हि मन्यते। प्राणस्य चापो वास इत्युक्तं। यदपः पिबामि तत्प्राणस्य वासो ददामीति ज्ञानं कर्तव्यमित्येवमर्थमेतत्। ननु भो

कीटपतङ्गेभ्यस्तत्तेऽन्नमापो वासो न ह वा अस्यानन्नं जग्धं भवति नानन्नं परिगृहीतं य एवमेतदनस्यान्नं वेद तद्विद्वांसः श्रोत्रिया
अशिष्यन्त आचामन्त्यशित्वाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो मन्यन्ते ॥ ॥१४॥ ॥प्रथमं ब्राह्मणं॥ ॥रामरामराम

क्ष्यमाणो भुक्तवांश्च प्रयतो भविष्यामीत्याचामति। तत्र च प्राणस्यानग्नताकरणार्थत्वे च द्विःकार्यताचमनस्य स्यात्। न च कार्यद्वयमाचमनकस्य युक्तं यदि प्रायत्यार्थं नानग्नतार्थं अथानग्नतार्थं न प्रायत्यार्थं यस्मादेवं तस्माद्द्वितीयमाचमनान्तरं प्राणस्यानग्नताकरणाय भवतु न किं यादि द्वितीयोपपन्ने द्वे हि ते क्रिये भोक्ष्यमाणस्य भुक्तवतश्च यदाचमनं स्मृतिविहितं तत्प्रायत्यार्थं भवति क्रियामात्रमेव न तु तत्र प्रायत्यदर्शनाद्यपेक्ष्यते। तत्र चाचमनाङ्गभूता आपो वास इति विज्ञानं प्राणस्येति कर्तव्यतया चोद्यते। न तु तस्मिन्क्रियमाणे आचमनस्य प्रायत्यार्थता बाध्यते। क्रियान्तरत्वादाचमनस्य। तस्माद्भोक्ष्यमाणस्य भुक्तवतश्च यदाचमनं तत्रापो वासः प्राणस्येति दर्शनमात्रं विधीयते अप्राप्तत्वादन्यतः॥ १४॥ ॥षष्ठस्य प्रथमं ब्राह्मणम्॥ ॥श्वेतकेतुर्ह वा आरुणेय इत्यस्य संबंधः। खिलाधिकारोऽयं तत्र यदनुक्तं तदुच्यते। सम्प्रति इदानीं ज्ञानकर्मसमुच्चयकारिणामग्निमार्गयाचनं कृतमग्नेन यत्कपथेति। न त्वनेकेऽपि पञ्चम ज्ञावेमं त्रैणासामर्थ्यात्प्रदर्शितः। सुपथेति विशेषणात्। पन्थानमस्मत्कृतविपाकप्रतिपत्तिमार्गः। वक्ष्यति च यत्त्वं हन्त्वेत्यादिना च कीर्तितकर्मविपाकप्रतिपत्तिःमार्गा इति सर्वसंसारगत्युपसंहारार्थोऽयमारम्भः एतावती हि संसारगतिः। एतावान्कर्मणो विपाकः स्वाभाविकस्य शास्त्रीयस्य च सविज्ञानस्येति। यद्यपि द्वया हि प्र

वास इति वाक्यं। विज्ञाने। प्रकरणं। ब्राह्मणान्तरमादाय तस्य पूर्वेण संबंधं प्रतिजानीते। श्वेतकेतुरिति। कोऽसौ संबंधस्तमाह। खिलेति। तत्र कर्मकाण्डे ज्ञानकाण्डे वा गतिरूपं प्राधान्येनोक्तं तदस्मिन्काण्डे वक्तव्यं तथा च पूर्वेमनुक्तं वक्तुमिदं ब्राह्मणमित्यर्थः। विशेषणवशाद्देवयानमार्गोऽभावि किं पुनः सोऽयं चरूपं तदाह। पथा न स्व कृतेति। तच्च वाक्यशेषमनुकूलयति। वक्ष्यति चेति। संप्रति आकांक्षाद्वारा समनन्तरब्राह्मणतात्पर्यमाह। तच्चेति। ये कश्चिद्द्विवाचनेक्रियान्ते। द्वयोः क्रिययोः कस्मिन्नेव शब्दे उपपन्नं भविष्यति। कथमित्याह। भोक्ष्यमाणस्येत्यादिना। तथा च आपः प्राणस्य वास इति विज्ञानक्रिया प्राणस्यानग्नतां करिष्यति। आचमनक्रिया केवला प्रायत्यं च करिष्यतीत्यर्थः। वक्तव्यशेषं दर्शयितुं प्रतीकं कीर्तयति। सत्रमेति। कीदृशं। आचारवान्शुद्धः। प्रयतस्य भावः प्रायत्यं। प्रायत्याय इदं प्रायत्यार्थं। मार्गाणा।

[illegible]

तत्र सुकृतविपाकस्यैवोपन्यासे हेतुमाह। ब्रह्मविद्येति। अनिष्टविपाकानुवैराग्यं सुकृतादिसुखादेवासिद्धमिति न तत्रावधेयस्या इह पुनः शास्त्रसमाप्तौ खिलाधिकारे तद्विपाको ऽप्युपसंह्रियत इति भावः। प्रकारान्तरेणासंग
तिवक्तुं स्मारयति। तत्रापीति। शास्त्रीयविपाकविषयेऽपीत्यर्थः। प्रागनुक्तेन देवदेवयानादिवक्तव्यं प्रागेवोक्तं तु ब्रह्मलोकादिकं कस्मादुच्यते तत्राह। अन्ते चेति। व्यापारोऽस्तीति। कर्मण इति शेषः। एतच्चेदं मात्रान्तरागतार्थत्वा
दारभ्यमित्याह। अपि चेति। एतावदित्यात्मज्ञानोक्तिः। अमृतत्वं तत्साधनं। प्रकारान्तरेणारम्भतात्पर्यं वक्तुमग्निहोत्रविषयजनकयाज्ञवल्क्यसंवादस्थमर्थमनुवदति। अपि चेति। एतावदित्यात्मज्ञा
नोक्तिः। एतयोरग्निहोत्राहुत्योः सायंप्रातश्चानुष्ठितयोः। प्रश्नवद्भ्यामग्निहोत्रविषयं जनकेन याज्ञवल्क्यं प्रत्युक्ते। ननु फलवतो ऽश्रवणात् कस्य स्मादाहुतिफलं तत्राह। तच्चेति। कर्तृवाचिपदाभावादाहुत्यपू

कः पाप्मा सूचितो न त्वनस्येदं कार्यमिति विपाकः प्रदर्शितः। शास्त्रीयस्यैव तु विपाकः प्रदर्शितः ब्रह्मविद्यारम्भे तद्वैराग्यस्य विवक्षितत्वा
त्। तत्रापि केवलेन कर्मणा पितृलोको विद्यया विद्यासंयुक्तेन च कर्मणा देवलोक इत्युक्तं तत्र केन मार्गेणापि तं लोकं प्रतिपद्यते केन वा देवलोकमिति नोक्तं त
दिह खिलप्रकरणे ऽशेषतो वक्तव्यमित्यत इदमारभ्यते। अन्ते च सर्वोपसंहारः शास्त्रस्येष्टः। अपि चैतावदमृतत्वमित्युक्तं न कर्मणो ऽमृतत्वाशास्तीति तत्
द्धेतुर्नोक्तः तदर्थश्चायमारम्भः। यस्मादियं कर्मणो गतिर्न नित्ये ऽमृतत्वे व्यापारो ऽस्ति तस्मादेतावदेवामृतत्वसाधनमिति सामर्थ्याद्धेतुत्वं सं
पद्यते। अपि चोक्तमग्निहोत्रे न त्वेवैनयोः त्वमुत्क्रान्तिं न गतिं न प्रतिष्ठां न तृप्तिं न पुनरावृत्तिं न लोकं प्रत्युत्थायिनं वेत्थेति। तत्र प्रतिवचने ते वा
एते आहुती हुते उत्क्रामत इत्यादिना आहुतेः कार्यमुक्तं। तच्चैतत्कर्तुराहुतिलक्षणस्य कर्मणः फलं नहि कर्तारमनाश्रित्याहुतिलक्षणस्य कर्मणः
स्वातन्त्र्येणोत्क्रान्त्यादिकार्यारम्भ उपपद्यते। कर्त्रर्थत्वात्कर्मणः कार्यारम्भस्य। साधनाश्रयत्वाच्च कर्मणः। तत्राग्निहोत्रस्तुत्यर्थत्वादग्निहोत्रस्यैव
कार्यमित्युक्तं षट्प्रकारमपीह तु तदेव कर्तुः फलमित्युपदर्श्यते षट्प्रकारमपि कर्मफलविज्ञानस्य विवक्षितत्वात्। तद्द्वारेण च पञ्चाग्निदर्श
नमिहोत्तरमार्गप्रतिपत्तिसाधनं विधित्सितं। एवमशेषसंसारगत्युपसंहारः कर्मकाण्डस्यैषा निष्ठेत्येतद्द्वयं दिदर्शयिषुराख्यायिकां प्रण
यति। श्वेतकेतुर्नामतः अरुणस्यापत्यमारुणिस्तस्यापत्यमारुणेयः। ह वा इत्यैतिह्यार्थः। पित्रानुशिष्टः सन्नात्मनो यशः प्रथनाय पञ्चालानां परि
षदमाजगाम पञ्चालाः प्रसिद्धाः। ते च परिषदमागत्य जित्वा राज्ञो ऽपि परिषदं जेष्यामीति गर्वेण स आजगाम जीवलस्यापत्यं जैवलिं पञ्चा
लराजं प्रवाहणनामानं। स्वभृत्यैः परिचारयमाणं कारयन्तमित्येतत्। स राजा पूर्वमेव तस्य विद्याभिमानगर्वं श्रुत्वा विनेतव्यो ऽयमिति म
त्वा तमुदीक्ष्योत्थेस्यागतमात्रमेवाभ्युवादोक्तवान्। कुमारा३ इति संबोध्य भर्त्सनार्था प्लुतिः। एवमुक्तः स प्रतिशुश्राव भो३ इति भो३ इ
ति अप्रतिरूपमपि सद्वचनं प्रत्युक्तवान् क्रुद्धः सन्ननुशिष्टो न्वनुशासितः असि भवसि किं पित्रा इत्युवाच राजा। प्रत्याहेतरः ओमिति पाठमनुः

वस्यैवोत्क्रान्त्यादिकार्यारम्भकत्वात् तत्कार्यं गामिफलमुक्तमित्याशंक्याह। नहीति। शास्त्रस्यान्ते चेति सम्बन्धः। अतीते अध्याये ऽशेषमेव सर्वो ब्रह्मलोकादिप्राप्तं। सुकृतस्य। तथा च उक्तमपि पुनर्वक्तव्यं। समा
न्ये प्रकरणे ऽपीति। आत्मने अकृत इत्यादि। तत्प्रकरणं। न शब्दः सर्वत्र उपमार्थः। वक्ष्यमाणज्ञेयोऽपि अग्निहोत्रस्तुत्यर्थत्वात्। स लोकं प्रत्युत्थायिनं यजमानं परिवेष्य इमं लोकं प्रति आहुत्यो ऽन्यायितां वेत्थेत्यर्थः
उत्क्रान्त्यादि षट्प्रकारं। अपि शब्दादसौ लोक इत्यादि। कर्त्राश्रयत्वात्। प्रवाहणव्यतिरिक्तानां परिषदं जित्वा। उत्क्रान्त्यादि षट्कं आहुतेः कार्यमुक्तं आहुतिः कर्मेत्यभिप्रायः। एतावदेव कर्मफलं इति विज्ञास्य
कर्मफलविज्ञानद्वारेण। वचनं। किं च कारकाश्रयत्वात्कर्मणो ऽप्युक्तं न फलस्य कर्तृगामित्वमित्याह। साधनाश्रयत्वाच्चेति। किमिति विद्याप्रकरणे कर्मफलविज्ञानं विवक्ष्यते तत्राह। तद्द्वारेणेति। आत्मगा
रम्भमुपपादितमुपसंहरति। एवमिति। संसारगत्युपसंहारेण कर्मविपाकस्य सर्वस्यैवोपसंहारः सिद्धो भवति। संसारगत्यात्मकस्य कर्मविपाकस्याभावादित्याह। कर्मकाण्डस्येति। प्रसिद्धो विद्वज्जनविशि·

पदार्थमुक्त्वा वाक्यार्थमाह ॥ समानेति । नाडीरूपेण साधारणेन मार्गेणाभ्युदयगच्छतां यत्र मार्गविप्रतिपत्तिस्तत्किं जानासीति प्रश्नार्थः । विप्रतिपत्तिमेव विशदयति । नेत्येति । प्रजानिर्धारणार्था सप्तमी । धूमादिः

यथाभवतितथावेत्थाद्यमृ१८ [illegible]

शिष्टोऽसि पृच्छ यदि संशयस्ते ॥१५॥ यथेवं वेत्थ विजानासि किं यथा येन प्रकारेणेमाः प्रजाः प्रसिद्धाः प्रयत्यो म्रियमाणाः वितिपद्यंता३ विप्रतिपद्यंते विचारणार्था प्लुतिः । समानेन मार्गेणागच्छतीनां मार्गद्वैविध्यं यत्र भवति । तत्र काश्चित्प्रजाः अन्येन मार्गेणागच्छंति काश्चिदन्येनेति विप्रतिपत्तिर्यथा ताः प्रजाः विप्रतिपद्यंते तत्किं वेत्सीत्यर्थः ॥ नेति होवाचेतरः तर्हि वेत्थ उ यथा इमं लोकं पुनरापद्यंता३ पुनरापद्यंते यथा पुनरागच्छंतीमं लोकं नेति हैवोवाच श्वेतकेतुः । वेत्थो यथासौ लोकः एवं प्रसिद्धैर्नमायेन पुनः पुनः प्रसद्भिः प्रयद्भिर्म्रियमाणैर्यथा येन प्रकारेण न संपूर्यता३ इति न संपूर्यते सौ लोकस्तत्किं वेत्थ । नेति हैवोवाच विथ्थो यतिथ्यां यत्संख्याकायामाहुत्यामाहुतौ हुतायामापः पुरुषवाचः पुरुषस्य याः वाक् सैव यासामापां वाक् ता पुरुषवाचो भूत्वा पुरुषशब्दवाच्या वा भूत्वा यथा पुरुषाकारपरिणताः सत्यः दा पुरुषवाच्यो भवंतीति । समुत्थाय समग्र्यंत्यो याः हूताः सत्यो वदंती३ इति नेति हैवोवाच । यथेव वेत्थ उ देवयानस्य पथो मार्गस्य प्रतिपदं प्रतिपद्यते येन सा प्रति

श्वेतकेतुर्हवा आरुणेयः पंचालानां परिषदमाजगाम स आजगाम जैवलिं प्रवाहणं परिचारयमाणं तमुदीक्ष्याभ्युवाद कुमारा३ इति स भो३ इति प्रतिशुश्राव अनुशिष्टो न्वसि पित्रेत्योमिति होवाच ॥१॥ वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यंता३ इति नेति होवाच वेत्थो यथेमं लोकं पुनरापद्यंता३ इति नेति हैवोवाच वेत्थो यथासौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्यता३ इति नेति हैवोवाच वेत्थो यतिथ्यामाहुत्यां हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदंती३ इति नेति हैवोवाच वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा यत्कृत्वा देवयाणं वा पंथानं प्रतिपद्यंते पितृयाणं वापि हि न ऋषेर्वचः श्रुतं द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानां । ताभ्यामिदं विश्वमेजत्समेति यदंतरा पितरं मातरं चेति नाहम-

पत्ता प्रतिपदं पितृयाणस्य वा प्रतिपदं । प्रतिपच्छब्दवाच्यमर्थमाह । यत्कर्म कृत्वा यथाविशिष्टं कर्म कृत्वेत्यर्थः ॥ देवयानं पितृयाणं वा पंथानं प्रतिपद्यंते तत्कर्म प्रतिपद्यते ना प्रतिपद्वेत्थ देवलोकपितृलोकप्राप्तिसाधनं किं वेत्थेत्यर्थः । अप्यत्रास्यार्थस्य प्रकाशकमृषेर्मंत्रस्य वचो वाक्यं न श्रुतमस्ति मंत्रोप्यस्यार्थस्य प्रकाशको विद्यत इत्यर्थः । कौसौ मंत्र इत्यपेक्षायां पठति । द्वे सृती द्वौ मार्गावश्रृणवं श्रुतवानस्मि तयोरेका पितृणां प्रापिका पितृलोकमवज्ञातयासृत्यापि लोकप्राप्तीत्यर्थः । अहमश्रृणवमिति । अवहितमनसं वन्ध्यः । देवानामुतापि देवानां संबंधिन्यन्या देवान्प्रापयति सा के पुनरुभाभ्यां सृतिभ्यां पितॄन्देवांश्च गच्छंतीत्युच्यते । उत अपि मर्त्यानां मनुष्याणां संबंधिन्यौ मनुष्या एवाभ्यां सृतिभ्यां गच्छंतीत्यर्थः । ताभ्यां सृतिभ्यामिदं विश्वं समस्तमेजच्चलत्समेति सम्यग्गच्छंतीति नैव ह्येते सृती यदंतरा ययोरंतरा यदंतरा पितरं मातरं च मातापित्रोरंतराल मध्य इत्यर्थः । कौ तौ मातापितरौ द्यावापृथिव्यौ अंडकपाले इयं वै माता असौ पितेति हि व्याख्यातं ब्राह्मणेन । अंडकपा-

[illegible]

मार्गाभ्यां गच्छतोः नाडीमार्गेण निर्गमनात् मार्गस्य साधारण्यं अभ्युदयः विभक्तमार्गेण गच्छंतीत्यर्थः । तत्त्वं वेत्थ यत्रां न वेत्थेति विचारणाः । तासंख्यातं वेत्थ किं । देवानां यानं प्राप्तिर्यस्मिन् यः देवयानस्तस्य पथो विशेषणं ।

सर्वाभिर्विद्याभिरनुशिष्टः शिक्षितान् क्षत्रिय उ तन्मम द्विजस्य पराभवं कृतवान् इत्यात्मनो निषधीमिवस्य वर्कं एतद्वचनम् । पृष्टः सन् एवं वर्त्तमानमेन प्रकारेण यदहं० वेद तेन प्रकारेण तदहं सर्ववि

लयोर्मध्ये संसारविषये येवैते सृतीनात्यंतिकामृतत्वगमनाय इतरः आह नाहमतोऽस्मात् प्रश्नसमुदायादेकंचन एकमपि प्रश्नं न वेद नाहं वेदेति होवाच श्वेतकेतुः ॥१६॥ अथानं
तरमपनीयविद्याभिमानगर्वमेनं प्रकृतं श्वेतकेतुं वसत्या वसतिप्रयोजनेनोपमंत्रयांचक्रे इह वसन्तु भवन्तः पाद्यमर्घ्यं चानीयतामित्युपमंत्रणं कृतवान् राजा अनादृ
त्य तां वसतिं कुमारः श्वेतकेतुः प्रदुद्राव गतवान् पितुः समीपं । स आजगाम पितरमागत्य चोवाच तं कथमिति । वाव किल एवं किल तस्माद् भवान् पुरा समावर्त्त
नकाले अनुशिष्टान् सर्वाभिर्विद्याभिरवोचो ऽवोच इति । सोपालंभं पुत्रस्य वचः श्रुत्वा ह पिता कथं केन प्रकारेण वत्स त्वमुपजातं हे सुमेधः शोभना मेधा यस्येति
सुमेधाः श्रुत्वाह मम यथावृत्तं पंच पंच संख्याकान् प्रश्नान् मामा राजन्यबन्धुः राजन्या बन्धवो यस्येति पालितवचनमेतत् राजन्यबन्धुमिति अप्राक्षीत् पृष्टवान् ततः
तस्मात्सकत्व एकमपि न वेद न विज्ञातवानस्मि कतमे ते राज्ञा पृष्टाः प्रश्नाः इति एवमिमे न इति ह प्रतीकानि मुखानि प्रश्नानामुदाजहार उदाहृतवान् ॥१७॥ स

अथैनं वसत्योपमंत्रयांचक्रे ऽनादृत्य वसतिं कुमारः प्रदुद्राव स आजगाम पितरं तं होवाचेति वाव किल नो भवान् पुरानुशिष्टानवोच इति क
थं सुमेध इति पंच मा प्रश्नान् राजन्यबन्धुरप्राक्षीत्ततो नैकंचन वेदेति कतमे त इतीम इति ह प्रतीकान्युदाजहार ॥१७॥ स होवाच तथा नस्त्वं तात
जानीथा यथा यदहं किंच वेद सर्वमहं तत्तुभ्यमवोचं प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति स आजगाम गौतमो यत्र प्रवाह
णस्य जैवलेरास तस्मा आसनमाहृत्योदकमाहारयांचकाराथ हास्मा अर्घ्यं चकार तं होवाच वरं भगवते गौतमाय दद्म इति ॥१८॥ स होवाच
प्रतिज्ञातो म एष वरो यां तु कुमारस्यान्ते वाचमभाषथास्तां मे ब्रूहीति ॥१९॥ स होवाच दैवेषु वै गौतम तद्वरेषु मानुषाणां ब्रूहीति ॥२०॥

होवाच पिता उक्तं कथं उपसमयत्तथा तेन प्रकारेण नोऽस्मांस्त्वं हे तात वत्स जानीथाः यथा यदहं किंच विज्ञानजातं वेद सर्वं तत्तुभ्यमवोचमित्येवं जानीथाः को
ऽस्मम प्रियतीतिम्न तस्तोयदर्थं शिष्यो ऽहमप्येतन्न जानामि यज्ञाता पृष्टं तस्मात् प्रेहि आगच्छ तत्र प्रतीत्य गत्वा राज्ञि ब्रह्मचर्यं वत्स्यावो विद्यार्थमिति स आह भगवा
नेव गच्छत्विति नाहं तस्य मुखं निरीक्षितुमुत्सहे स आजगाम गौतमो यत्र गौतमः आरुणिर्यत्र प्रवाहणस्य जैवलेरास आसनमास्थायिकायां स्थितवान् प्रथमा
स्य तस्मै गौतमाय आनीतमासनं मधुरूपमाहृत्योदकं भृत्यैराहारयांचकार अथ हास्मै अस्मै अर्घ्यं चकार धर्मतः कृतवान् सच वत्सं मधुपर्कं च कृत्वा चैवं पूजां तं हो
वाच वरं भगवते गौतमाय तुभ्यं दद्म इति ॥१८॥ गोश्वादिलक्षणं स होवाच गौतमः प्रतिज्ञातो मे एष वरस्त्वया अस्यां प्रतिज्ञायां दृष्टौ कुर्वन्मानं पातुं वाचं कुमारस्य
मम पुत्रस्यान्ते समीपे त्वमभाषथाः पंच प्रश्नरूपां तामेव मम ब्रूहि सएव नो वरः ॥१९॥ स होवाच राजा दैवेषु वरेषु तद् गौतमपृ त्वं प्रार्थयसे मानुषाणामन्यतमं प्रार्थय वरं ॥२०॥

ज्ञानं तुभ्यमवोचं इत्येवं अनेन प्रकारेण अस्मान् जानीथाः । यत्र प्रवाहणस्य जैवलेः यत्र प्रवाहणो जैवलिः आसेत्यर्थः । ।रामरामरामरामरामरामरामरामरामरामः श्रीश्रीः।

ममास्तित्प इति यदुक्तं तदुपपादयति । यस्मादित्यादिना । यत्र वाभिप्रेतं तदहं करोमीत्याशंक्याह । मम मेति । सान्ति विभवे अदाता कदर्य । गौतमो राजानं प्रति शिष्यवृत्तिं कुर्वाणः शास्त्रार्थविरोधमाचरतीत्याशं-
क्याह वाचेति । आपदि समादधिका वा विद्याप्राप्तिसंभवावस्था आशमित्यर्थः । तर्हि किमिति तिष्ठति इयं विद्या मह्यं नोपदिश्यते तत्राह । किं त्विति । तर्हि भवतासास्थितिः स्यात्तामहं तु यथागतं गमि ।

स होवाच गौतमो भवता विज्ञायते ह मम अस्ति सः न तेन प्रार्थितेन कृत्यं मम यं त्वं दित्ससि मानुषं वरं । यस्मान्ममाप्यस्ति हि हिरण्यस्य प्रभूतस्यापात्तं प्राप्तं ।
गोअश्वानामपात्तमस्तीति सर्वत्रानुषंगो दासीनां प्रवाराणां परिधानस्य न च यन्मम अविद्यमानं मया तत्त्वतः प्रार्थनीयं त्वया वा देयं प्रतिज्ञातश्च व-
रस्त्वया त्वमेव जानीषे यद्युक्तं प्रतिज्ञातः रक्षणीय मेवेति । मम पुनरयमभिप्रायो मा भूत्त्वं नोऽस्मानभि अस्मानेव केवलं प्रति सर्वत्र व-
दो भूत्वा अवदान्यो मा भूः कदर्यो मा भूदित्यर्थः । बहोः प्रभूतस्यानंतफलस्येत्येतदपर्यंतस्याऽपरिसमाप्तिकस्य पुत्रपौत्रगामिकस्येत्येतत् ईदृश-
स्य वित्तस्य मा प्रत्येव केवलमदाता मा भूः न चान्यत्रादेयमस्ति भवतः । एवमुक्त आह स त्वं वै हे गौतम तीर्थेन न्यायेन शास्त्रविहितेन वि-
द्यां मत्तः इच्छासै इच्छ त्वमित्युक्तो गौतम आह । उपैम्युपगच्छामि शिष्यत्वेनाहं भवंतमिति । वाचा ह स्म वै किल पूर्वे ब्राह्मणाः क्षत्रिया-
न्विद्यार्थिनः संतो वैश्यान्वा क्षत्रिया वा वैश्या नाम त्यापद्युपयंति शिष्यवृत्त्या उपगच्छंति नोपनयनशुश्रूषादिभिः ततः स गौतमः ह उपायनकी-

स होवाच विज्ञायते हास्ति हिरण्यस्यापात्तं गोअश्वानां दासीनां प्रवाराणां परीधानस्य मा नो भवान्बहोरनंतस्यापर्यंतस्याभ्यवदा-
न्यो भूदिति स वै गौतम तीर्थेनेच्छासा इत्युपैम्यहं भवंतमिति वाचा ह स्मैव पूर्व उपयंति स होपायनकीर्त्या उवास ॥ २१ ॥ स हो-
वाच तथा नस्त्वं गौतम मापराधास्तव च पितामहा यथेयं विद्येतः पूर्वं न कस्मिंश्चन ब्राह्मण उवास तां त्वहं तुभ्यं वक्ष्यामि
को हि त्वैवं ब्रुवंतमर्हति प्रत्याख्यातुमिति ॥ २२ ॥ असौ लोकोऽग्निर्गौतम तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिर्दिशोऽंगारा
अवांतरदिशो विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुत्यै सोमो राजा संभवति ॥ ॥ २३ ॥

र्त्या उपगमनकीर्तनमात्रेणैवोपासो धितवान् नोपनयनं चकार ॥ २१ ॥ एवं गौतमेनापदं तरेउक्ते स होवाच राजा पीडितं मत्वा क्षामयन्नुत थाऽ
नोऽस्मान्प्रति मापराधाः अपराधं मा कार्षीरस्मदीयापराधेन ग्रहीतव्य इत्यर्थः । तव च पितामहा अस्मत्पितामहेषु यथापराधेन जगृहुस्तथा
पितामहानां दृष्टं अस्मास्वपि भवता रक्षणीयमित्यर्थः । किंतु यथा इयं विद्या त्वया प्रार्थिता इतः त्वत्तः प्रदानात् पूर्वं प्राक् न कस्मिंश्चिद्
पि ब्राह्मण उवासोषितवतीति तथा त्वमपि जानीषे सर्वदा क्षत्रियपरंपरायेयं विद्यागता सा स्थिति मर्यादापि रक्षणीया यदि शक्यत इत्युक्ते दे
वेषु गौतम न वरेषु मानुषाणां ब्रूहीति न पुनः त्वया देयो वर इति । इतः परं न शक्यते रक्षितुं तामपि विद्यामहं तुभ्यं वक्ष्यामि को ह्यन्योऽपि यस्मा
देवं ब्रुवंतमर्हति प्रत्याख्यातुं न वक्ष्यामीत्यहं पुनः कथं न वक्ष्ये तुभ्यमिति ॥ २२ ॥ असौ वै लोकोऽग्निर्गौतमेत्यादिश्चतुर्थः प्रश्नः प्राथम्येन निर-
णीयते क्रमभंगस्त्वेतन्निर्णयायत्तत्वादितरप्रश्ननिर्णयस्य । असौ लोकोऽग्निर्हे गौतम असौ लोके ऽग्निदृष्टिरनग्नौ विधीयते यथा योषित्पुरुषयोरग्नि ।

ष्यामीत्याशंक्याह । इतः परमिति । अग्रिमिरित्यर्थः । मानुषः वरः । वहीनो । हाताभूत्वा । उपायनपर्यायोऽयं । आपन्निवचने मध्ये । उत्कसतीत्यर्थः । उपायनमुपगमनं पादोपसपर्णामिति यावत् । अपराधमाग्रही ।

इंद्रादीनां कर्मानधिकारत्वात् द्युलोकस्य चाहवनीयत्वात् प्रसिद्धहोमाधारत्वायोगात् अत्र यस्य च श्रद्धाया होम्यत्वानुपपत्तेस्तस्मिन्नित्यादिवाक्यमयुक्तमित्याशंक्याह। तत्रेति। होमकर्मसंबन्धार्थः। किंतदुक्तमितिचेत्तदा
ह। तत्रापीति। तत्रेति। यजमानमृतिकालः संबन्धार्थः। इहेति जीवदवस्थोच्यते। तत्रस्थानामग्न्यादीनामव्याकृतभावापन्नत्वेनाविशेषप्रसंगान्नतैः सदा कृतमग्न्यादिसिद्धिरित्याशंक्याह। तत्राग्निनीतिनाम्ना धूमं
विपरिणतिस्विकशक्तिरूपेणाग्न्यादिभूते। तथा चाविशेषप्रसंगाभावादाहुत्योः समधानपेरवोत्क्रान्त्यादिसिद्धिरित्यर्थः। यथोदितस्य विषयाकथमपि पूर्वकल्पीयं कर्मप्रलयदशायामव्याकृतात्मनास्थितं
उनजगदारभते। तथापीदानीं तन्नमग्निहोत्रादिकं कर्मकथमारंभकं भविष्यतीत्याशंक्याह। तथैवेति। धूमांगारविस्फुलिंगाहुतिद्रव्याणि तानि यो वोत्क्रामतस्ताभ्यामाकारे द्युलोके। तत्राग्निरग्नित्वेन समित्समित्त्वेन ज्वल
दंगाराः। ब्राह्मणसंबंधश्चेयं याज्ञवल्क्येन जनकं प्रति प्रतिवचनेनोक्तं इति अस्माभिरुक्तं। कर्त्रा हि साधनेन सहोत्क्रामत। भवतिष्ठते। कृतसन्नोत्क्रामनसन् अंतरिक्षमाहवनीयं कुर्वाते वायुं समिधं मरीचिरेव शुक्लाम

स्वर्गलोकोऽग्नेरादित्य एव समित्तं हीमं धनादादित्येनेद्धः समिध्यते। सौ लोकः रश्मयो धूमः समिध उत्थानसमान्यात् आदित्याद्धि रश्मयो निर्गताः समिधश्च धूमः लोके उद्गि
ष्ठति अहः अर्चिः प्रकाशसामान्यात्। दिशोऽङ्गाराः उपशमसामान्यात् अवान्तरदिशो विस्फुलिंगा विस्फुलिंगवद्विक्षेपात् तस्मिन्नेवं गुणविशिष्टे द्युलोकेऽग्नौ देवा इंद्रादयः
श्रद्धां जुह्वत्याहुतिद्रव्यस्थानीयां प्रक्षिपन्ति तस्या आहुत्या आहुतेः सोमो राजा पितृणां ब्राह्मणानां च संभवति। तत्र के देवाः कथं जुह्वति किं च श्रद्धाख्यं हविरि
त्यत उक्तमस्माभिः संबंधेन त्वेवेन योस्त्वमुक्तानिमित्यादिपदार्थषट्कनिर्णयार्थमग्निहोत्र उक्तं। ते वा एते अग्निहोत्राहुती हुते उत्क्रामतस्ते अन्तरिक्षं तर्पयतस्ते तत उत्क्रामतस्ते
दिवमाविशतस्ते दिवमाहवनीयं कुर्वाते आदित्यं समिधमित्येवमाद्युक्तं। तत्राग्निहोत्राहुती ससाधने एवोत्क्रामतः। यथेहपयः साधनैर्विशिष्टे ये ज्ञायेते आहव
नीयाग्निसमिद्धूमांगाराङ्गारत्वेन विस्फुलिंगा विस्फुलिंगत्वेन आहुतिद्रव्यमपि पयआद्याहुतिद्रव्यत्वेनैव संसर्गाद्यव्याकृतावस्थायामपि परेण सूक्ष्मे
नात्मना व्यतिष्ठेते। तदिह क्रियमाणमेव ससाधनमग्निहोत्रं फलसमाकर्म अपूर्वेणात्मना व्यवस्थितं सत् तत् पुनराकरणकाले तथैवान्तरिक्षादीनाहवनीयाग्न्यादिभावं
कुर्वद्विपरिणमते। तथैवेदानीमप्यग्निहोत्राख्यं कर्म। एवमग्निहोत्राहुत्यपूर्वविपरिणामात्मकं जगत्सर्वमित्याहुत्योरेव कृत्स्नार्थत्वेनोत्क्रान्त्याद्याः लोकं प्रत्यु
त्थापितान्ताः षट् पदार्थाः कर्मप्रकरणेऽधस्तान्निर्णीता इह तु कर्तुः कर्मविपाकविवक्षायां द्युलोकाद्यारभ्य पंचाग्निदर्शनमुत्तरमार्गप्रतिपत्तिसाधनं विशि
ष्टफलोपभोगाय विहितमिति द्युलोकाग्न्यादिदर्शनं प्रस्तूयते। तत्र या आध्यात्मिकाः प्राणाः अग्निहोत्रस्य होतारस्त एवाधिदैविकत्वेन परिणताः संत इन्द्राद
यो भवंति त एव तत्र होतारो द्युलोकाग्नौ। ते चेहाग्निहोत्रस्य फलभोगायाग्निहोत्रं हुतवन्तस्त एव फलपरिणामकालेऽपि तत्फलभोक्तृत्वात्तत्र होतृ
त्वं प्रतिपद्यन्ते तथा तथा विपरिणममानाः देवशब्दवाच्याः सन्तः। अत्र च यत्पयोद्रव्यमग्निहोत्रकर्माश्रयभूतमिहाहवनीये प्रक्षिप्तमग्निना भक्षितमदृष्टे
न सूक्ष्मेण रूपेण विपरिणतं सह कर्त्रा यजमानेनामुं लोकं धूमादिक्रमेणान्तरिक्षमन्तरिक्षात् द्युलोकमाविशति। ताः सूक्ष्मा आप आहुतिकार्यभूताः
अग्निहोत्रसमवायिन्यः कर्तृसहिताः श्रद्धाशब्दवाच्याः सोमलोके कर्तुः शरीरारंभाय द्युलोकं प्रविशन्त्यो हूयन्त इत्युच्यन्ते। तास्तत्र द्युलोकं प्रविश्य सो
ममयं द्युलोके कर्तुः शरीरमारभन्ते। तदेतदुच्यते देवाः श्रद्धां जुह्वति तस्या आहुत्यै सोमो राजा संभवतीति। श्रद्धा वा आप इति श्रुतेर्वेत्थ यतिथ्यामाहुः ॥

हृति। अधस्तात्कर्मप्रकरणे। सत्कर्मणः अनुष्ठितत्वात् यान्यनंतरं स्वा०परिणतः। यथोक्तयोराहुत्योः उत्क्रान्त्यादिसमर्थनेन अग्निहोत्रस्य जगदारंभकत्वमुक्तं भवतीत्याह। तदिह क्रियमाणमिति। जगद्रूपेणाप
रिणमते। पंचाग्नित्वादुच्यते तत्र तत्रेति। कर्मणः अग्निहोत्रप्रकरणमुपसंहरति। एवमग्निहोत्रेति। भवत्वेवं तथापि के देवा इति प्रश्नस्य किमुत्तरं तत्राह। तत्रेति। तत्र द्युलोकाग्निदर्शनप्रस्तुते सतीति। सहकर्त्रा य
जमानेनेत्यत्र तच्छब्दोऽध्याहर्तव्यः। अमुं लोकमाविशतीति संबंधः। आवेशप्रकारं प्रकटयति। धूमादीति। कथमेता वस्तोकिं पुनः श्रद्धाख्यं हविरिति। तथापि कथं जुहृतीति। प्रश्नस्य कथं निर्णयस्तत्राह। सोमलोक
इति। वेत्थेति। प्राणपुत्रेन्द्रियगणानामनर्थेन अग्निहोत्रं जुहोतीति। प्राणा अग्निहोत्रस्य होतारः। प्राणाः प्राणसहितानीन्द्रियाणीत्यर्थः। प्रश्नो निर्णीतस्तत्राह। नास्तु सूक्ष्मा इति। तथापि तस्या आहुतेः सोमो राजा

आहवनी०तेः ये. साधनैर्विशिष्टये आहुती यथाग्रायतेते आ
हुती तथास्माल्लोकादमुं लोकं प्रति उत्क्रामतः इति योजना।

तास्तत्रेति। कथं पुनरयं श्रद्धाशब्दवाच्यास्तत्राह। श्रद्धामि
उपक्रम [illegible] श्रद्धाशब्दवाच्यत्वमाह

संभवतीति कथमसुच्यते तत्राह। ।

158

अपामेव पुरुषशब्दवाच्यत्वं नो शरीरारंभकत्वं न भूतान्तराणामिति किं तन्नास्य पंचभूतारब्धत्वाभ्युपगमभंगः स्यादिति चेन्नेत्याह। भूयस्त्वादिति। अपां पुरुषशब्दवाच्यत्वे हेत्वन्तरमाह। कर्मप्रयुक्त इति। लक्षणयांगम

त्वं हुतायामापः पुरुषवाचो भूत्वा समुत्पद्यन्त इति प्रश्नस्य निर्णयविषये असौ वै लोको ऽग्निरिति प्रक्रान्तम्। तस्मादापः कर्मसमवायिन्यः कर्तुः शरीरारंभका भ्यः शब्दवाच्या इति विधीयते। भूयस्त्वादापः पुरुषवाच इति व्यपदेशो नातिरणाणां भूतानामस्तीति। कर्मप्रयुक्तश्च शरीरारंभः कर्म चापः समवायितया श्रयाः प्राधान्यं शरीरकर्तृत्वेन चापः पुरुषवाच इति व्यपदेशः। कर्म हि तोहि जन्मारंभः सर्वे च तत्र पयप्यग्निहोत्राहुतिरत्तीति शरीराणि ऋत्वाद्यपः प्रस्तुताः षट्पदार्थाः अग्निहोत्रे तथा पितृवैदिकानि सर्वाण्येव कर्माण्यग्निहोत्रप्रभृतीनि लक्ष्यन्ते। दाराग्निसंबंधं हि पाककर्मप्रक्रान्तो कर्मणापि न्हि लोके इ ति वक्ष्यति चाथ य इमे यज्ञेन दानेन तपसा लोकं जयन्तीति॥२३॥ पर्जन्यो वा अग्निर्गौतम द्वितीय आहुत्याधारः आहुत्यारोहणक्रमेण पर्जन्यो नाम वृष्ट्युपकरणा भिमानि देवतात्मा तस्य वायुरेव समित्। वायुना हि पर्जन्योऽग्निः समिध्यते तीव्रवायुप्रवृत्तौ हि वर्षिष्यतीति वदन्ति तस्य संवत्सर एव समित्संवत्सरेण हि शरदादिग्रीष्मा

पर्जन्यो वा अग्निर्गौतम तस्य संवत्सर एव समिदभ्राणि धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति तस्या आहुत्यै वृष्टिः संभवति।२४। अयं वै लोको ऽग्निर्गौतम तस्य पृथिव्येव समिदग्निर्धूमो रात्रिरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति तस्या आहुत्या अन्नं संभवति॥ २५॥

नैः स्वावयवैर्विपरिवर्तमानेन पर्जन्याग्निर्दृश्यते। अभ्राणि धूमो धूमप्रभवत्वाद्धूमवदुपलक्ष्यत्वाद्वा विद्युदर्चिः प्रकाशसामान्यात्। अशनिरङ्गाराः उपशांत काठिन्यसामान्यात्। ह्रादुनयो ह्रादुनयः स्तनयित्नुशब्दा विस्फुलिङ्गा विक्षेपानेकत्वसामान्यात्। तस्मिन्नेतस्मिन्नित्याहुत्यधिकरणनिर्देशः। देवा इति त एव होतारः सोमं राजानं जुह्वति। योऽसौ द्युलोकाग्नौ श्रद्धायां हुतायामभिनिर्वृत्तः सोमः स द्वितीये पर्जन्याग्नौ हूयते। तस्याश्च सोमाहुतेः वृष्टिः संभवति।२४। अयं वै लोको ऽग्निर्गौतम अयं लोक इति प्राणिजन्मोपभोगाश्रयः क्रियाकारकफलविशिष्टः स तृतीयो ऽग्निस्तस्याग्नेः पृथिव्येव समित्। पृथिव्या ह्ययं लोको नेकप्राणिफलोपभोगसंपन्नया समिध्यते। अग्निर्धूमः पृथिव्याश्रयोत्थानसामान्यात्। पार्थिवं हीन्धनद्रव्यमाश्रित्याग्निरुत्तिष्ठति यथा समिदाश्रयेणाग्नेर्धूमः। रात्रिरर्चिः समित्संबंधप्रभवसामान्यादग्नेः समित्संबंधेन ह्यर्चिः संभवति तथा पृथिवीसमित्संबंधेन शार्वरी पृथिवीच्छाया हि शार्वरं तम आचक्षते। चन्द्रमा अङ्गारास्तत्प्रभवत्वसामान्यादर्चिषो ह्यङ्गाराः प्रभवन्ति तथा रात्रेश्चन्द्रमा उपशान्तत्वसामान्याद्वा नक्षत्राणि विस्फुलिङ्गा विस्फुलिङ्गवत् विक्षेपसामान्यात्। तस्मिन्नेतस्मिन्नित्यादि पूर्ववत्। वृष्टिं जुह्वति तस्या आहुतेरन्नं संभवति वृष्टिप्रभवत्वस्य प्रसिद्धत्वाद्व्रीहियवादेरन्नस्य॥२५॥ राम राम राम राम श्रीराम राम राम श्रीराम।

कमाह। दाराग्नीति। हुतांसं द्वितीयत्वमिति मं किंत्वा क्रमाहुत्योरिति। एतस्यां पृथिव्यां देहदेहिभावेन भेदः। अयं वै लोक इति शब्देन पृथिव्यभिमानिनी देवतोच्यते पृथिवीशब्देन च पार्थिवी क्षितिर्द्वितीयमाहुत्याधार उच्यते॥

पुरुषो वाग्निर्गौतम प्रसिद्धः शिरःपाण्यादिमान् पुरुषश्चतुर्थोग्निस्तस्य व्यात्तं विवृतं मुखं समित् विवृतेन हि मुखेन दीप्यते पुरुषो वदन् स्वाध्यायादौ यथा समिधाग्निः प्राणो धूमः उत्थानसामान्यान्मुखाद्धि प्राण उत्तिष्ठतीति वाक्शब्दोर्चिर्व्यंजकत्वसामान्यादर्चिश्च व्यंजकं तथा वाक्शब्दोभिधेयव्यंजकश्चक्षुरंगारा उपशमः सामान्यात्प्रकाशाश्रयत्वाद्वा श्रोत्रं विस्फुलिंगा विक्षेपसामान्यात्तस्मिन्नन्नं जुह्वति। ननु नैव देवा अन्नमिह जुह्वाना दृश्यन्ते। नैष दोषः प्राणानां देवत्वोपपत्तेः। अधिदैवमिंद्रादयो देवास्त एवाध्यात्मं प्राणास्ते चान्नस्य पुरुषे प्रक्षेप्तारस्तस्या आहुते रेतः संभवत्यन्नपरिणामो हि रेतः॥ २६ ॥ योषा वाग्निर्गौतम योषेति स्त्री पंचमो होमाधिकरणाग्निस्तस्या उपस्थ एव समित्तेन हि सा समिध्यते रोमानि धूमस्त उत्थानसामान्याद्योनिरर्चिर्वर्णसामान्याद्यदंतः करोति तेंगाराः अन्तःकरणं मैथुनव्यापारस्तेंगाराः वीर्योपशमहेतुत्वसामान्याद्वीर्योपशमकरणं मैथुनं तथांगाराः भावोग्नेरुपशमकरणामभिनंदाः। सुखलवाः क्षुद्रत्वसामान्याद्विस्फुलिंगास्तस्मिन्नेतो जुह्वति तस्या आहुतेः पुरुषः संभवति।

पुरुषो वा अग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरंगाराः श्रोत्रं विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुत्यै रेतः संभवति। २६। योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरर्चिर्यदन्तः करोति तेंगारा अभिनन्दा विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुषः संभवति स जीवति यावज्जीवत्यथ यदा म्रियते। २७। अथैनमग्नये हरन्ति तस्याग्निरेवाग्निर्भवति समित्समिद्धूमो धूमोर्चिरर्चिरंगारा विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति तस्या आहुत्यै पुरुषो भास्वरवर्णः संभवति॥ २८ ॥ एवमेवः

एवं श्रद्धापर्जन्यायंलोकपुरुषयोषाग्निषु क्रमेण हूयमाना श्रद्धा सोमवृष्ट्यन्नरेतोभावेन स्थूलतारतम्यक्रममापद्यमानाः श्रद्धाशब्दवाच्या आपः पुरुषशरीरमारभन्ते। यः प्रश्नश्चतुर्थो वेत्थ यतिथ्यामाहुत्यां हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्तीति स एष निर्णीतः। पंचम्यामाहुतौ योषाग्नौ हुतायां रेतोभूता आपः पुरुषवाचो भवन्तीति स पुरुषः एवं क्रमेण जातः जीवति कियन्तं कालमित्युच्यते। यावज्जीवति यावदस्मिन्शरीरस्थितिनिमित्तं कर्म विद्यते तावदित्यर्थः। अथ तस्य यदा यस्मिन्काले म्रियते। २७। अथ तदा एनं मृतमग्नये अग्न्यर्थमेवान्त्याहुत्यै हरन्ति ऋत्विजस्तस्याहुतिभूतस्य प्रसिद्धोग्निरेव होमाधिकरणं न परिकल्प्योग्निः प्रसिद्धैव समित् समिद्धूमो धूमोर्चिरर्चिरंगारा अंगाराः विस्फुलिंगाः विस्फुलिंगाः यथाप्रसिद्धमेव सर्वमित्यर्थः। तस्मिन्पुरुषमन्त्याहुतिं जुह्वति तस्या आहुतेः पुरुषो भास्वरवर्णोतिशयदीप्तिमान्निषेकादिभिरन्त्याहुत्यन्तैः कर्मभिः संस्कृतत्वात्संभवति निष्पद्यते। २८।

[illegible]

पंचाग्निविदो गतिं विवक्षुरुत्तरग्रंथमवतारयति । पुरस्तादिति । एवंशब्दस्य प्रकृतपंचाग्निपरामर्शित्वं स्फुटीकर्तुं चोदयति । नन्विति । प्रश्नप्रतिवचनविषयस्यैव प्रकृतस्यैवंशब्देन परामर्शान्नमकप्रश्नीयं दर्शनमिह परामृष्टमिति परिहरति । नेत्यादिना । परिहारं विवृणोति । यतिष्यामिति । षष्ठप्रश्नीयमेवमवहितं दर्शनमत्र परामृष्टं वेत्तदायतिष्यामिति प्रश्नो ऽयं स्यात् षष्ठप्रश्नानिर्णायदर्शनशेषभूतदर्शनस्य प्रश्नो हि प्रतिवचने संभवादित्याह । अन्यथेति । किंच पूर्वस्मिन्ग्रंथे प्रचयश्रीणितत्याचत्वसंख्याया निश्चितत्वान्नदवधिकृत्वा । तापादिकाग्नय एवात्र एवंशब्देन परामृष्टुमुचिता इत्याह । निर्ज्ञातत्वाद्वेति । पुलाकादिद्रव्यस्य अनरिक्षादफलस्यार्थवत्त्वान्नूनं वस्यानुवादत्वसंभवादेवं शब्दस्याग्निहोत्रविषयत्वसिद्धिरिति चोदयति । अथेति । दूषयति । नापादीति । इतश्च स्वतंत्रमेव पंचाग्निदर्शनमेवंशब्दपरामृष्टमित्याह । श्रुत्यंतराद्वेति ॥ तामिदादिसाम्यदर्शनादग्निहोत्रदर्शनशेषभूतमेवैतद्दर्शनमित्युक्तमनूद्य दूषयति । यत्त्वित्यादिना । अवोचाम अग्निहोत्रास्तुत्यर्थत्वादग्निहोत्रस्यैव कार्यमित्युक्तमित्यत्रैतिशब्दः । पंचाग्निज्ञानस्य । अनुक्तत्वेन । परिहरति । वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यंत इति । यथाग्रामस्येति । यथाग्निहोत्रदर्शने ऽग्निसमावहनीयं कुर्वंति इत्यंतरारंभसमारम्य उक्तेन्ते एव वक्तुमुक्तं । ननु दिवमारम्य । अग्निहोत्रे यथाग्निसमिदादयो भवंति न ।

इदानीं प्रथमप्रश्ननिराकरणार्थमाह । ते के च य एवं यथोक्तपंचाग्निदर्शनमेतद्विदुरेवंशब्दादग्निसमिद्धूमार्चिरंगारविस्फुलिंगश्रद्धाविशिष्टाः पंचाग्नयो निर्दिष्टाः । तानेवमेतान्पंचाग्नीन्विदुरित्यर्थः । नन्वग्निहोत्राहुतिदर्शनविषयमेवैतद्दर्शनं तत्र ह्युत्क्रांत्यादिपदार्थषट्कनिर्णये दिवमेवाहवनीयं कुर्वंति इत्यादि । इहाप्यमुष्य लोकस्याग्नित्वमादित्यस्य च समित्त्वमित्यादि द्युसाम्यं तस्मात्तच्छेषमेवैतद्दर्शनमिति । न यतिष्यामिति प्रश्नप्रतिवचनपरिग्रहात् । यतिष्यामित्यस्य प्रश्नस्य प्रतिवचनस्य यावदेवं परिग्रहस्तावदेवंशब्देन परामृष्टं युक्तं । अन्यथा प्रश्नानर्थक्यान्निर्ज्ञातत्वाच्च संख्यायाः अन्यनय एव वक्तव्याः । अथ निर्ज्ञातमप्यनूद्यते यथाप्राप्तस्यैवानुवदनं युक्तं न त्वसौ लोकोग्निरिति । अग्न्युपलक्षणार्थं तथा व्याख्येनातीन न चोपलक्षणं युक्तं । श्रुत्यंतराच्च समाने हि प्रकरणे छांदोग्यश्रुतौ पंचाग्नीन्वेदेति पंचसंख्यायाः एवोपास्य·

ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धाꣳ सत्यमुपासते ते ऽर्चिरभिसंभवं·

नादग्निहोत्रशेषमेतत्पंचाग्निदर्शनं यत्त्वग्निसमिदादिसामान्यं तदग्निहोत्रस्तुत्यर्थमित्यवोचाम । तस्मान्नोत्क्रांत्यादिपदार्थषट्कपरिज्ञानादर्चिरादिप्रतिपत्तिरेवमिति प्रकृतोपादानेनार्चिरादिप्रतिपत्तिविधानात् । के पुनस्ते य एवं विदुर्गृहस्था एवानंतरं यज्ञादिसाधनेन धूमादिप्रतिपत्तिर्विधित्सिता । नानेवंविदामपि गृहस्थानां यज्ञादिसाधनोपपत्तेः । भिक्षुवानप्रस्थयोश्चारण्यसंबंधेन ग्रहणात् गृहस्थकर्मसंबद्धत्वाच्च पंचाग्निदर्शनस्य अतो नापि ब्रह्मचारिणः एवं विदुरिति गृह्यंते । तेषां तूत्तरपथिप्रवेशः स्मृतिप्रामाण्यात् । अष्टाशीतिसहस्राणामृषीणामूर्ध्वरेतसां । उत्तरेणार्यम्णः पंथास्ते ऽमृतत्वं हि भेजिरे इति । तस्माद्गृहस्था एवमग्निजो ऽहमग्न्यपत्यमित्येवं क्रमेणाग्निभ्यो जातो ऽग्निरूप इत्येवं ये विदुस्ते च ये चामी अरण्ये वानप्रस्थाः परिव्राजकाश्चारण्यनित्याः श्रद्धायुक्ताः संतः सत्यं ब्रह्म हिरण्यगर्भात्मानमुपासते न पुनः श्रद्धां चोपासते ते सर्वे ऽर्चिरभिसंभवंति ।

॥ एमरामरामरामरामरामरामरामरामरामरामरामरामरामराम ॥

ऐवस्तत्र्येव द्युलोकादौ अग्निसमिदादिकथं यत्तदग्निहोत्रस्तुत्यर्थं । सगुणाग्नेः । स्वर्गलोकस्य । संख्याया अनुक्तत्वेनैवज्ञातत्वात्संख्याप्रसक्त्या आग्नेयश्च । श्वेतकेतुप्रवाहणसंवादे । अग्निहोत्रशेषत्वं न । सामान्यवचनात्परिव्राजकादेरप्यत्र ग्रहणं स्यादिति चेन्नेत्याह । भिक्षुवानप्रस्थयोश्चेति । गृहस्थेनैवं पंचाग्निदर्शनं विधेयं । अंत इति यं चाग्निदर्शनस्य गृहस्थकर्मसंबंधादेव । कथं नाहि नैष्ठिकब्रह्मचारिणां देवयानपथि प्रवेशस्तत्राह । तेषां त्विति । अर्यम्णः संबंधीयः पंथास्ते मासा एतेनोत्तरेण यातेयथोक्तसंख्या अथ यः । सापेक्षमप्यत्वप्राप्ता इति स्मरत्यर्थः । परिव्राजकाश्च त्रिदंडिनो गृह्यंते ऽन्येषामेव रणाभ्यो व्यवस्थितानां ज्ञानिनो देवयानपथप्रवेशात् । श्रद्धामुपास्येत्याशंक्य ब्रह्मत्वयमाश्रयस्योपास्यत्वानुपपन्नमेवमित्याह न पुनरिति । समिदादिसाम्यदर्शनादग्निहोत्रदर्शनशेषभूतमेवैतद्दर्शनमित्युक्तमनूद्य दूषयति यत्त्वित्यादिना । अवोचाम अग्निहोत्रस्तुत्यर्थत्वादग्निहोत्रस्यैव कार्यमित्युक्तमित्यत्रैतिशब्दः । सामान्यवचनात्परिव्राजकादेरप्यत्र ग्रहणं स्यादिति चेन्नेत्याह । भिक्षुवानप्रस्थयोश्चेति विशेषणात्तयोरुत्तरमार्गप्रवेशात्पंचाग्निविन्न गृहणं गृहस्थानामेव यं चाग्निविरामनवग्रहणमित्यत्र हेतुं तत्राह । गृहस्थेति । य एवं विदुस्ते गृहस्था नायज्ञादिसाधनेन धूमादिप्रतिपत्तिविधित्सितेत्यर्थः ॥

विनापि विद्याबलमर्चिरभिसंपत्तिस्यादिति चेन्नेत्याह। यावदिति। अतोर्चिर्देवतायाः शकाशात्। प्राप्यभोगावसाने। दिवसमेव कुतो नाभुवंति। इत्याह मरीचीति। इमं लोकं प्रति। आपेक्षिकं मुक्तत्वं न तु आत्यंतिकं
दिवसे। शुक्लपक्षमासेषु। आहुतीरिति। दिवसाहुति। यस्मिन्कस्मिंश्चिद्दिवसे दिवसेहि कुर्यादिति पौर्णमासीयजेतेत्यस्य वाक्यार्थः। इति पूर्ववाक्याशयः ब्रह्मलोकाः। कल्पशब्दोवांतरकल्पविषयः। अस्मिन्नि
त्यादि आरभ्यावमसक्तमिति शंकते। इहेति। इहकल्पे। श्वोभूत इति। यथा श्वोभूते पौर्णमासीयजेतेत्यत्राहुति पौर्णमासीशब्दार्थः। श्वोभूतत्वं च न व्यावर्तकं पौर्णमासीपदलक्ष्येपि प्रतिपद्येव कर्तव्य

यावत् गृहस्थाः पंचाग्निविद्यां सत्यं वा ब्रह्म न विदुस्तावच्छ्रद्धाद्याहुतिक्रमेण पंचम्यामाहुतौ हुतायां ततो योषाग्नेर्जाताः पुनर्लोकं प्रत्युत्थायिनोग्निहोत्रादिकर्मानुष्ठाता
रो भवंति। तेन कर्मणा धूमादिक्रमेण पुनः पितृलोकं पुनः पर्जन्यादिक्रमेण इममावर्तंते ततः पुनर्योषाग्नेर्जाताः पुनः कर्म कृत्वेत्येवमेव घटीयंत्रवत् गत्यागति
भ्यां पुनः पुनरावर्तन्ते। यदा त्वेवं विदुस्ततो घटीयंत्रभ्रमणाद्विनिर्मुक्ताः संतो ऽर्चिरभिसंभवंति। अर्चिरिति। नाग्निज्वालामात्रं किंतु अर्चिरभिमानिन्यर्चिः
शब्दवाच्या देवता उत्तरमार्गलक्षणमवस्थिते वतामभिसंभवंति। नहि परिव्राजकानामग्न्यर्चिषैव साक्षात्संबंधोस्ति। तेन देवतैव परिगृह्यते। अर्चिः शब्दवाच्या अ
र्चिषो ऽहर्देवतां मरणकालनियमानुपपत्तेः। अहः शब्दोपि देवतैवायुषः क्षये हि मरणं नैवंविदा अहन्येव मर्तव्यमित्यहर्मरणकालो नियंतुं शक्यते। न च रात्रौ प्रेताः संतो
ऽह्नः प्रतीक्षन्ते स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छतीति श्रुत्यंतरात्। अह्न आपूर्यमाणपक्षमहर्देवतयातिवाहिता आपूर्यमाणपक्षदेवतां प्रतिपद्यंते शुक्लपक्षदेव

त्यर्चिषोहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्य
मादित्याद्वैद्युतं तान्वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसंति तेषां न पुन
रावृत्तिः॥ २९ ॥

तामित्येतदापूर्यमाणपक्षात् यान्षण्मासानुदङ् उत्तरां दिशमाश्रित्य सविता एति तान्मासान्प्रतिपद्यंते शुक्लपक्षदेवतयातिवाहिताः संतो मासानिति बहुवचनात्से
पचारिणः सदुत्तरायणदेवतास्तेभ्यो मासेभ्यः षण्मासदेवताभिरतिवाहिताः देवलोकाभिमानिनीं देवतां प्रतिपद्यंते देवलोकादादित्यमादित्याद्वैद्युतं विद्युदभिमानि
नीं देवतां प्रतिपद्यंते विद्युद्देवतां प्राप्तान् ब्रह्मलोकवासी पुरुषो ब्रह्मणा मनसा सृष्टो मानसः कश्चिदेत्यागत्य ब्रह्मलोकान् गमयति ब्रह्मलोकानित्यधरोत्तर
भूमिभेदेन भिन्ना इति गम्यंते बहुवचनप्रयोगात् उपासनातारतम्योपपत्तेश्च ते तेन पुरुषेण गमिताः संतस्तेषु ब्रह्मलोकेषु पराः प्रकृष्टाः संतः स्वयं परा
वतः प्रकृष्टाः समाः संवत्सरान् अनेकान् वसंति ब्रह्मणोनेकान्कल्पान्वसंतीत्यर्थः। तेषां ब्रह्मलोकं गतानां नास्ति पुनरावृत्तिरस्मिन्संवत्सरेण पुनरागमन
मिहेति शाखांतरपाठादिहेत्याकृतिमात्रग्रहणमिति चेत् श्वोभूते पौर्णमासीमिति त्वत्र पौर्णमास्याः श्वोभूतत्वमनुक्तं न ज्ञायत इति युक्तं विशेषयितुं न हि ।

तानियमात्। तथेहापि आकृते इहशब्दार्थत्वान्निरंकुशैवानावृत्तिरत्र सिध्यतीत्यर्थः परिहरति। नेत्यादिना। दृष्टांतं विघटयति। श्वोभूत इति। कृतसंहारदिवसापेक्षं हि श्वोभूतत्वं पौर्णमासीदिने चातु
र्मास्येष्टौ कृतायां कदा पौर्णमासी क्रियाकर्तव्येति वचनं विनाशायते। न च श्वोभूतत्वविशेषणं भवत्यव्यावर्तकः। न च इहेति विशेषणमपि अव्यावर्तकमेवेति नात्यंतिकानावृत्तिसिद्धिः। यत्तु पौ
र्णमासीशब्दवदिहशब्दस्याकृतिवाचित्वाद् व्यावर्तकत्वमिति तत्राह। नहीति। यथाऽपि प्रकृते वाक्ये पौर्णमासीशब्दो भवत्याकृतिवचनस्तथापि अर्थः शब्दार्थोपि कश्चिदाकृतिरस्तीत्यंगीकृत्याव्या
वर्तकः श्वोभूतशब्देन प्रयुज्यते तथात्रापि विशेषणशब्दस्य व्यावर्तकत्वमावश्यमित्यर्थः। कदाचित्संसारे आगमनं नेति पूर्ववाक्याशयः। इहेति यद्भृत। नहेति विशेषणानर्थक्याद्यदि हि नावर्तते स्वे
इहग्रहणमनर्थकमेव स्यात्।

कल्पांतराभिप्रायं अस्मिन्संसारे तु स्यादेवावृत्तिः। इत्यर्थः।

श्वोभूतपौर्णमासीति निरर्थकं कृतसामग्री। दिवसद्वितीयदिने
कर्तव्यत्वं

क्षयि रमाकाशमित्यादौ वाक्ये भावेपि विशेषणप्रयोगवदत्रापि विशेषणत्वरूपानुवादमात्रमित्याशंक्याह ॥ यत्त्विति॰ विशेषणफलमुपसंहरति । तस्मादिति॰ ननु दानतपसी यज्ञग्रहणेनैव गृहीते न पृथगस्य

तत्रस्थ आकृतिशब्दार्थो विधत इति च शब्दो निरर्थक एव प्रयुज्यते । यत्तु विशेषणशब्दे प्रयुक्ते अन्विष्यमाणो विषयफलं चेन्न गम्यते तत्र प्रयुक्तो निरर्थकत्वेनोक्तुं विशेषणशब्दो न तु शक्या विशेषणफलावगतौ॰ तस्मादस्मात्कल्याणदृष्टं मार्गद्वयं गम्यते ॥२८॥ अथ पुनर्ये नैवं विदुः के ते अग्निहोत्रसर्वपदार्थचक्रस्य वेदितारः केवलकर्मिणः गाय यज्ञेनाग्निहोत्रादिना दानेन वहिर्वेदि भिक्षमाणेभ्यो द्रव्यसंविभागलक्षणेन तपसा वहिर्वेद्येव दीक्षादिव्यतिरिक्तेन कृच्छ्रचान्द्रायणादिना लोकान् जयन्ति लोकानिति द्विवचनान्नापि फलतारतम्यमभिप्रेतं ते धूममभिसंभवन्ति उत्तरमार्ग इवेहापि देवता एव धूमादिशब्दवाच्याः धूमदेवतां प्रतिपद्यन्त इत्यर्थः । आतिवाहकत्वं च देवतानां ते धूमाद्रात्रिं रात्रिदेवतां ततोऽपक्षीयमाणपक्षमपक्षीयमाणपक्षदेवतां ततो यान् षण्मासान् दक्षिणां दिशमादित्य एति तान्मासदेवताविशेषानुप्रतिपद्यन्ते मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति तांस्तत्रान्नभूतान् यथा सोमं राजानमिह यज्ञे ऋत्विजः आप्यायस्वापक्षीयस्वेति भक्षयन्ति॰ एवमेनान्

अथ ये यज्ञेन दानेन तपसा लोकान् जयन्ति ते धूममभिसंभवन्ति धूमाद्रात्रिं ८० रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षाद्यान् षण्मासान् दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति तां ८० स्तत्र देवा यथा सोम ८० राजानमाप्यायस्वापक्षीयस्वेत्येवमेनां ॰ स्तत्र भक्षयन्ति तेषां यदा तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यन्त आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवन्ति ॥

तत्रस्थान् कर्मिणो भृत्यानिव स्वामिनो भक्षयन्त्युपभुञ्जते देवाः । आप्यायस्वापक्षीयस्वेति न मन्त्रः किं तर्हि आप्याय्याप्याय्य चमसस्थं भक्षणेनापक्षयं च कृत्वा पुनः पुनर्भक्षयन्तीत्यर्थः । एवं देवा अपि सोमलोके लब्धशरीरान् कर्मिण उपकरणभूतान् पुनः पुनर्विश्रामयन्तः कर्मानुरूपफलं प्रयच्छन्तः । तद्धि तेषामाप्यायनं सोमस्याप्यायनमिव विश्वोपभुञ्जते उपकरणभूतान् देवतास्तेषां कर्मिणां यदा यस्मिन् काले तद्यज्ञदानादिलक्षणं सोमलोकप्रापकं कर्म पर्यवैति परिगच्छति परिक्षीयत इत्यर्थः । अथ तदा इममेव प्रसिद्धमाकाशमभिनिष्पद्यन्ते॰ यास्ताः श्रद्धाशब्दवाच्याः द्युलोकाग्नौ हुता आपः सोमाकारपरिणता याभिः सोमलोके कर्मिणामुपभोगाय शरीरमारब्धमम्मयं ताः कर्मक्षयाद्धिमपिण्ड इवातपसंपर्कात् प्रविलीयन्ते प्रविलीनाः सूक्ष्मा आकाशभूता इव भवन्ति तदिदमुच्यते इममेवाकाशमभिनिष्पद्यन्त इति ते पि कर्मिणस्तच्छरीराः सन्तः पुरोवातादिना इतश्चामुतश्च नीयन्तेऽन्तरिक्षगास्तदाहाकाशाद्वायुमिति वायोर्वृष्टिं यन्तीति पद्यन्ते तदुक्तं पर्जन्याग्नौ

हुतेन धनेनाह । वहिर्वेदीति॰ दीक्षादीति॰ आदिपदेन पयोव्रतादियज्ञाङ्गसंग्रहः । तत्रैवेति पितृलोकोक्तिः । लोकत्रयप्रापकोपन्यासो इत्थं व्याख्यायोपनिषदं श्लोकत्रयमिह प्रकारमाह तेषामिति॰ ॥२९॥ तदवदेवेन्पुनरमा

यैन उभयेनविपरीतेनतस्यावधिंसूचयति। उत्तरसर्गायेति प्राग्व्याख्यातानांमरणानांस्वर्गेऽपि व्याख्यातमित्याह इति चिति। अतो ब्रीह्यादिभावादित्यर्थः॥ इति सूपपन्नं जनैः कः येन विक्रम्यतेइत्यर्थः॥ तृतीयस्थाने छान्दोग्यश्रुतिं
संवादयति। तथा चेति। तेनैवमार्गद्वयप्रतिपत्तिसाधनोपदेशेनैव। मृतानांप्रजानांविनिपत्तिः प्रथमप्रश्नस्यनिर्णयप्रकारमाह। अग्नेरिति उभयोर्मार्गयोः केवलकर्मिणः॥ तस्मादिति॥ अतिक्रान्तसारादित्यर्थः॥

तउक्तमस्मिंल्लोकेऽग्नौहविर्जुह्वतितस्मादाहुत्याअन्नंसंभवतीति। तेपुनः पुरुषाग्नौहूयन्तेततभूतारेतःसिञ्चितन्तोरेतोभूताः योषाग्नौहूयन्तेततोजायन्तेलोकः
प्रत्युत्थायिनस्तेलोकंप्रत्युत्थानिष्ठतेअग्निहोत्रादिकर्मानुतिष्ठन्ति ततोधूमादिनापुनः पुनः सोमलोकंपुनरिमंलोकमिति। तएवंकर्मिणोऽनुपरिवर्तन्तेघटादि
यन्त्रवच्चक्रीभूताभ्रमन्तीत्यर्थः। उत्तरमार्गायसद्योमुक्तयेवायावद्ब्रह्मविज्ञानंतावत्कामयमानास्संसरन्तीत्युक्तं। अथपुनर्येउत्तरंदक्षिणंचैतौपन्था
नौनविदुःउत्तरस्यदक्षिणस्यवापथःप्रतिपत्तयेज्ञानंकर्मवानानुतिष्ठन्तीत्यर्थः। तेकिंभवन्तीत्युच्यते। तेकीटाःपतङ्गाःयदिदंदन्दशूकंदंशमशकमित्येतत्
भवन्ति॥ एवंहीयंसंसारगतिःकष्टाऽस्यांनिमग्नस्यपुनरुद्धारोनसुलभः॥ अतोवैखलुदुर्निष्प्रपतरं। तथाचश्रुत्यन्तरंतानीमानिक्षुद्रा
ण्यसकृदावर्तीनिभवन्तिजायस्वम्रियस्वेति। तस्मात्सर्वोत्साहेनयथाशक्तिस्वाभाविककर्मज्ञानहानेनदक्षिणोत्तरमार्गप्रतिपत्तिसाधनंज्ञा:

तएवमेवानुपरिवर्तन्तेऽथयएतौपन्थानौनविदुस्तेकीटाः पटंगायदिदंदंदशूकं॥ ३०॥ द्वितीयंब्राह्मणम्॥ २॥

णीयंकर्मज्ञानंवानुतिष्ठेदितिवाक्यार्थः। तथाचोक्तंअतोवैखलुदुर्निष्प्रपतरंतस्मादस्माज्जुगुप्सेतेति कष्टतरान्मोक्षायप्रयतेतेत्यर्थः। अत्रा
त्तरमार्गप्रतिपत्तिसाधनस्यहानंयत्नः कर्तव्यः इतिगम्यते। एवमेवानुपरिवर्तन्तइत्युक्तत्वात्। एवंप्रश्नाःसर्वेनिर्णीताः। असौवैलोकइत्यारभ्यपुरुषःसं
भवतीतिचतुर्थः प्रश्नोयतिथ्यामाहुत्यामित्यादिप्राथम्येनपञ्चमस्तुकृतः। एतेनदेवयानस्यवापथःप्रतिपदंपितृयाणस्यैवेतिदक्षिणोत्तरमार्गप्रतिप
त्तिसाधनकथनेनतेनैवचप्रथमोऽप्यग्नेरारभ्यकेचिदर्चिःप्रतिपद्यन्तेकेचिद्धूममितिविप्रतिपत्तिःपुनरावृत्तिश्चद्वितीयःप्रश्नआकाशादिक्रमेणा
मुंलोकमागच्छन्तीतितेनैवासौलोकोनसंपूर्यतेकीटपतङ्गादिप्रतिपत्त्यैश्चकेषांचिदितितृतीयोऽपिप्रश्नोनिर्णीतः॥ ३०॥ अस्तमस्यद्वितीयंब्राह्मणम्॥

असौलोकोनसंपूर्यतइतिद्वितीयःप्रश्नःआकाशादिक्रमेण:

आगच्छतीत्यनेनवचनेनतेनैवासौकीटपटंगादिप्रतिपर्यन्तम्
न्यायेननिर्णीतः॥

मरणंप्राप्यत इत्यर्थः। यतिथ्यामाहुत्यांइत्यादिचतुर्थःप्रश्नः असौवैलोकइत्यारभ्यपुरुषसंभवतीत्यन्तेनग्रन्थेनकृत्वाप्राथम्येननिर्णीतः॥ देवयानस्यवापथःप्रतिपदंपितृयाणस्यवावेतिपञ्चमःप्रश्नः
दक्षिणोत्तरमार्गप्रतिपत्तिसाधनकथनेनकृत्वाद्वितीयत्वेननिर्णीत। तेनैवचप्रथमोऽपिप्रश्नःनिर्णीतः॥ आकाशादिक्रमेणाऽमुंलोकमागच्छन्तीत्यनेनपुनरावृत्तिश्चद्वितीयःप्रश्नःनिर्णीतः॥

161

सयोवित्तार्थी कामयेत न स्येदं कर्मेति शेषः। यस्य कस्यचिद्वित्तार्थिनस्तर्हीदं कर्म स्यादित्याशंक्याह॥ कर्मणः पथ्यिनेति। नत्र वित्तार्थिनि पुंसि प्रवृत्तेपि तर्हि स्तनो पचयापचयाभ्यां पयोक्षरणं स्यादित्रिवृत्त्येत्याह॥
अन्नवेति। मंथाख्यं कर्मेस न्नस्यार्थः। केवलमित्येवार्थमाह। इतिकर्तव्यताशून्यमिति। कर्मधायक पूर्वं समा स्तौन गमापिलय शुक्लने। नन्वितित। परिसमूहन परिलेपनाग्न्युपसमाधानादेः स्मार्तार्थस्मात्रोच्य·
मानत्वादियं श्रुतिः स्मृत्यनुवादिनी युक्तातथा चैनत स्मान्न कर्म भवत्येमेति परिहरति। स्मार्तमिति। मंथ कर्मणः स्मार्तत्वापिगमाह। अत एवेति। तत्रैव हेत्वंतरमाह। मंथो चेति। मंथं गना इति कर्मत्वा

सयःकामयेतज्ञानकर्मणोर्गतिरुक्ता तत्र ज्ञानं स्वतंत्रं कर्म तु दैवमानुषवित्तद्वयायत्तं तेन कर्मार्थं वित्तमुपार्जनीयम्। तच्चाप्रत्यवायकारि
णोपायेनेति। तदर्थं मंथाख्यं कर्मारभ्यते। महत्वप्राप्ते महत्वे च सत्यर्थं प्राप्तिर्हि वित्तं तदुच्यते सयःकामयेत सयो वित्तार्थः कर्मण्यधिकृ
तोयःकामयेत किं महन्महत्वं प्राप्नुयां महान्स्यामित्यर्थः। तस्य मंथकर्मणो विधित्सितस्य कालोभिधीयते। उदगयन आदित्यस्यतत्रस:
वेचपक्षे आपूर्यमाणपक्षस्य शुक्लपक्षस्य तत्रापि सर्वत्र पुण्याहे अनुकूल आत्मनः कर्मसिद्धिकर इत्यर्थः। द्वादशाहं यस्मिन्पुण्याहे का
ले कर्म चिकीर्षितं ततः प्राक्पुण्याहमेवारभ्य द्वादशाहमुपसद्व्रती उपसत्सु व्रतमुपसद्व्रतं उपहाराः केवलमितिकर्तव्यताशून्यं पयोभक्षणमात्र
मुपादीयते। ननूपसद्व्रतमिति पदाद्वितीयहस्तदा सर्वमितिकर्तव्यतारूपं प्राप्नुयात् तत्कस्मान्न परिगृह्यत इत्युच्यते स्मार्तत्वा

सयःकामयेत महत्प्राप्नुयामित्युदगायन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौडुंबरे कंसे चमसे वा
सर्वौषधं फलानीति संभृत्य·

त्कर्मणः। स्मार्तं हीदं मंथकर्म। ननु श्रुतिविहितं सत्कथं स्मार्तं भवितुमर्हति। स्मृत्यनुवादिनी ह्येषा श्रुतिरियं। श्रौतत्वे हि प्रकृतिविकार
भावस्तत्र प्राकृतधर्मग्राहित्वं विकारकर्मणो न त्विह श्रौतत्वं। अत एवावसथ्याग्नावेतत्कर्म विधीयते। सर्वा चावृत्स्मार्तैवेति उपस
द्व्रती भूत्वा पयोव्रती सन्नित्यर्थः। औडुंबरे औडुंबरवृक्षमये कंसे चमसे वा तस्यैव विशेषणं कंसाकारे चमसे वा औडुंबर एवाकारेतु·
विकल्पो नैडुंबरत्वे सर्वौषधं सर्वासामोषधीनां समूहः। यथासंभवं यथाशक्ति च सर्वा ओषधीः समाहृत्य तत्र ग्राम्यास्तु दश नियमे
न व्रीहियवाद्या वक्ष्यमाणाः अधिकग्रहणे तु दोषो आरण्याणि फलानीति फलानि च यथासंभवं यथाशक्ति च। इति शब्दः स
मस्तसंभारोपचयप्रदर्शनार्थः। अन्यदपि यत्संभरणीयं तत्सर्वं संभृत्येत्यर्थः॥ ॥रामरामरामरामरामरामरामराम॥

हिरण्यगर्भं गर्भपूर्वो कं मे वामी आरण्येप इत्यादि वक्ष्यमाणा ग्रहणंन्तु
उपसद्व्रतमिति। नन्नु कथं कुतो हेतोरा आम्नां कर्मधार्ये:कल्प्या
०द्वते।

तानि वर्धनं च। तालमेति उपलक्षणं कर्मांतिः। कर्मधारय
मंथकर्मणः। औषधयः॥ =

ऽत्र आपूर्यदित्यनेन। पयोव्रती सन्निवक्ष्यमाणकर्मणोङ्गहोत्तानि संबंधः। तात्रमौडुंबरमिति शंकां वारयति वृक्षमय इति। ननु श्रुतेर्न स्मृत्यनुवादित्वं वैपरीत्यादतो भवतीदं श्रौतमित्याशंक्याह॥ श्रौतत्वे हीति। यदिदं
कर्म श्रौतं न तदन्योनिष्टोमेनास्य प्रकृतिविकृतिभावः स्यात्समयोगसंयुक्तात्प्रकृतिः। विकलांगसंयुक्ता विकृतिरिति। विकृतिभावे च विकृतः कर्मणां प्राकृतधर्मग्राहित्वादुपसदस्य व्रतमिति। विगृह्य सर्वं इदा।
नि कर्तव्यतासंग्रहीतुं शक्यं। न चात्र श्रौतत्वमस्ति परिलेपनादिसंबंधात्। न च पूर्वभाविन्याः श्रुतेः स्तरतात्विस्मृत्यनुवादित्वासिद्धिः। तस्याः त्रैकाल्यविषयत्वाभ्युपगमादिति भावः। औडुंबरस्यैवविशेषणं॥

हृ॰ भा॰
१६२

आग्न्याधारादीनां संभाराणामनन्तरं परिसमूहनादिकर्म किंप्रमाणमित्याशंक्याह। कर्ममिति। न त्वेपि परिसमूह्याग्नौ कर्त्ति: होमाधारत्वेन चेतनाग्निपरिग्रहं कारयति।। अग्निमिति। आवसथ्योऽग्नौ होम इति शेषः।
कथमेतावता त्रेताग्निपरित्यागस्तत्राह। एकवचनादिति। कथमुपसमाधानश्रवणात्त्रेताग्निनिवारकत्वात्राह। विद्यमानस्येति। आहवनीयादेश्चाधेयत्वात्प्रागेव सत्त्वमिति भावः। मध्यस्वस्था:

कर्मान्तरं गृह्योक्तोऽस्त्वयं: परिसमूहनपरिलेपने भूमिसंस्कारोऽग्निमुपसमाधायेति वचनादावसथ्येऽग्नाविति गम्यते। एकवचनादुपस
माधानश्रवणाच्च। विद्यमानस्यैवोपसमाधानं परिस्तीर्य दर्भानाहृतास्मार्तत्वात्कर्मणः स्थालीपाकावृत्त्या गृह्यते तेनाज्यं संस्कृत्य: पु
मानंक्षत्रेण पुन्नाम्ना नक्षत्रेण पुण्याहमयुक्तेन मंथं सर्वौषधफलपिष्टं तच्चोदुंबरे चमसे दधिमधुनि घृते चोपमिश्र्यैकपाप:

परिसमुह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्याहृताज्यं मंथं संस्कृत्य पुंसा नक्षत्रेण मंथं सन्नीय जुहो
ति यावन्तो देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरुषस्य कामान्। तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वैः कामैस्त
र्पयन्तु स्वाहा।। या तिरश्ची निपद्यतेऽहं विधरणी इति तां त्वा घृतस्य धारया यजे संराधनामहं स्वाहा ।। ३१ ।।
ज्येष्ठाय स्वाहा। श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति। प्राणाय स्वाहा। वसिष्ठायै स्वाहेत्यग्नौ हु
त्वा मंथे संस्रवमवनयति वाचे स्वाहा। प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति चक्षुषे स्वा
हा। संपदे स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति। श्रोत्राय स्वाहा। आयतनाय स्वाहेत्यग्नौ हुत्वा मंथे संस्रव
मवनयति। मनसे स्वाहा। प्रजात्यै स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति। रेतसे स्वाहेत्यग्नौ हुत्वा मंथे संस्रवम

॥ ३ ॥ कंडिका

मंथन्योपसंमथ्य सन्नीय मध्ये संस्थाप्यौदुंबरेणाप्लवेणावापस्थाने आज्यस्य जुहोत्येतैर्मंत्रैर्यावन्तो देवा इत्यादौ : ॥ ३१ ॥
ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यारभ्य द्वे द्वे आहुती हुत्वा संस्रवमवनयति स्रुवावलेपमाज्यं मंथे संस्रावयति। ॥ ३२ ॥ ॥

रेतश्चेति शेषः।। आवापस्थानं आहुतिविशेषप्रक्षेपप्रदेशः। जातं जातं वेत्तीति भो जातवेदस्त्वदधीना यावन्तो देवा वक्रमतयः सन्तो मम अर्थान् प्रतिबध्नन्ति तेभ्योऽहं आज्यभागं त्वयि आर्पया
मि। ते च तेन तृप्ताः सन्तः सर्वैरपि पुरुषार्थैर्मां तर्पयन्तु इत्याद्यमंत्रार्थः। या देवता कुटिलमतिर्भूत्वा सर्वस्यैवाहं एव धारयित्री इति च मत्वा न्यामाश्रित्य वर्त्तते तां सर्वसाधनीं देवतामहं घृतस्य

शिव:
१६२
162

ऽसि स्वाहेत्यादिमंत्रेषु ध्वनितमर्थमाह। एतस्मादेवेति। भ्रमसीति भ्रमदस्य स्य प्राणदेवताकत्वात् प्राणेनैकीकृत्य सर्वात्मकत्वं। तथा च सर्वदेहेषु प्राणरूपेण त्वं भ्रमसि प्राणस्य चलनात्मकत्वा
त्तद्रूपत्वात्तव। अग्निरूपेण त्वं ज्वलदसि। प्रकाशात्मकत्वादग्नेस्तद्रूपत्वात्तव। ब्रह्मरूपेण त्वं पूर्णमसि। नभोरूपेण प्रस्तब्धं निष्कंपमसि। सर्वैरविरोधित्वात्सर्वमपि जगत् एकस
भवत्। आत्मन्यंतर्भावात् अपरिछिन्नतया स्थितैकसभं त्वमसि। प्रस्तोत्रा यज्ञारंभे त्वमेव हिंकृतमसि। तेनैव यज्ञमध्ये हिंक्रियमाणं त्वमसि उद्गात्रा च यज्ञारंभे त्वमुद्गीथमुद्गी
यमानं चासि। अध्वर्युणा त्वं श्रावितं आग्नीध्रेण च प्रत्याश्रावितमसि। आर्द्रे मेघोदरे संदीप्तमसि। विविधं भवतीति विभुः। प्रभुः समर्थः। भोग्यरूपेणासि आत्मना स्थितत्वाद्

एतस्मादेव ज्येष्ठादिप्राणलिंगात् जपेत्। श्रेष्ठादिप्राणविद एवास्मिन्कर्मण्यधिकारः। ज्येष्ठाय स्वाहा इत्यारभ्य एकैकामाहुतिं हुत्वा मंथे संस्रावमवनयत्यपरयोपमथ्यंता
पुनर्मथ्नाति॥ ३३॥ अथैनमभिमृशति भ्रमदसीत्यनेन मंत्रेण॥ ३४॥ अथैनमुद्यच्छति सह पात्रेण हस्ते गृह्णाति। आमंस्यामंहि ते महीत्यनेन॥ ३५॥ अथै
नमाचामति तत्सवितुरित्यस्या गायत्र्याः प्रथमपादेन मधुमत्यैकया व्याहृत्या च प्रथमया प्रथमं ग्रासमाचामतीति। तथा गायत्री द्वितीयपादेन मधुमत्या द्वितीयया च
व्याहृत्या द्वितीयं ग्रासं तथा तृतीयेन गायत्रीपादेन तृतीयया मधुमत्या तृतीयया च व्याहृत्या तृतीयं ग्रासं समस्तां सावित्रीं सर्वाश्च मधुमतीरुक्त्वाहमेवेदं सर्वं

अग्नये स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति सोमाय स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति भूः स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति भुवः
स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति स्वः स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति भूर्भुवः स्वः स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति ब्रह्मणे स्वा
हेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति क्षत्राय स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति भूताय स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति भविष्यते
स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति विश्वाय स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति सर्वाय स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति
प्रजापतये स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति॥ ३३॥ अथैनमभिमृशति भ्रमदसि ज्वलदसि पूर्णमसि प्रस्तब्धमस्येकसभमसि हिं
कृतमसि हिंक्रियमाणमस्युद्गीथमस्युद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमस्यार्द्रे संदीप्तमसि विभूरसि प्रभूरस्यन्नमसि ज्यो
तिरसि निधनमसि संवर्गोऽसीति॥ ३४॥ अथैनमुद्यच्छत्यामꣳस्यामꣳहि ते महि स हि राजेशानोऽधिपतिः स माꣳराजेशानोऽधिपतिं करो
त्विति॥ ३५॥ अथैनमाचामति तत्सवितुर्वरेण्यम् मधु वाता ऋतायते मधु क्षरंति सिंधवः। माध्वीर्नः संत्वोषधीः भूः स्वाहा॥ भर्गो देवस्य धीमहि।
मधु नक्तमुतोषसो मधुमत् पार्थिवꣳरजः। मधु द्यौरस्तु नः पिता। भुवः स्वाहा। धियो यो नः प्रचोदयात्। मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्
यः। माध्वीर्गावो भवंतु नः। स्वः स्वाहेति। सर्वां च सावित्रीमन्वाह सर्वाश्च मधुमतीरहमेवेदꣳसर्वं भूयासं भूर्भुवः स्वः स्वाहेत्यंतत आचम्य
पाणी प्रक्षाल्य जघनेनाग्निं प्राक्शिराः संविशति प्रातरादित्यमुपतिष्ठते दिशामेकपुंडरीकमस्यहं मनुष्याणामेकपुंडरीकं भूयासमिति

भूयासमिति स्वांते भूर्भुवः स्वः स्वाहेति समस्तं भक्षयति। यथा चतुर्भिर्ग्रासैस्तद्द्रव्यं सर्वं परिसमाप्यते तथा पूर्वमेव निरूपयेत्। यत्पात्रावलिप्तं तत्पात्रं
सर्वं निर्णिज्य तूष्णीं पिबेत्। पाणी प्रक्षाल्याप आचम्य जघनेनाग्निं पश्चादग्नेः प्राक्शिराः संविशति। प्रातः संध्यामुपास्यादित्यमुपतिष्ठते दिशामेक
पुंडरीकमित्यनेन मंत्रेण। यथेतं यथागतमेत्यागत्य जघनेनाग्निमासीनो वंशं जपति॥ ३६॥ तं हैतमुद्दालक इत्यादि सत्यकामो जाबालोंतेवासिभ्य उ
क्त्वोवाचापि य एनं शुष्के स्थाणौ निषिंचेत् जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीत्येवं संतमेतं मंथमुद्दालकात्प्रभृत्येकैकाचार्यक्रमा
न्नमसि। भोग्यरूपेणात्मना ज्योतिरसि कारणत्वान्निधनं लयोऽसि अध्यात्माधिदैवयोर्वागादीनामग्न्यादीनां च संहरणात्त्वं संवर्गोऽसि। अभिमर्शनमंत्रस्यार्थः। एवमामंत्रण

तत्सवितुर्वरेण्यं वरणीयं पदं धीमहीति
संबंधः वाता मधु सुखं [illegible]
मधु क्षरंति मधु [illegible] धीमधु रसाः संतु देवस्य सवि
तुर्भर्गस्तेजः पदं [illegible] मधु प्रीतिकराः संतु पार्थि
वं रजो मधुमत् [illegible] पिता नो [illegible] धियो यो नः [illegible] वि
यो बुद्धीः प्रचोदयात् प्रेरयेत् [illegible] मधुमानस्तु गावो
रश्मयः [illegible] माध्वीः सुखकराः संतु [illegible]

शिष्यः। श्रोत्रियो मेधावी धनदायी प्रियपुत्रः विद्यया विद्यादातेति षट् तीर्थानि संप्रदाने। उद्दालकमारभ्य। मन्थमृधः आज्यस्य आपस्थाने जुहोति। मध्यः एतत्किनापि। एतं मंथमुक्त्वा किमन्यदुवाचेत्यर्थः। मूले एवः।
धान्यादिपदार्थान्। उत्तरमंथस्य काले पत्न्याः प्रतीक्ष्यते इत्यत्र किं गमकमित्यर्थः। कालनियमाभावमाशंक्याह। यदेति। किमत्र गमकमित्याशंक्य रेतःपानिति इत्याह। इत्येनदिति। अत्र मदाद्युच्चमंथं चिकीर्षति तदा श्रीमं
गतं सत्यकामस्याचार्यैर्वक्ष्यमाणैरंतेवासिभ्य उक्त्वोवाच किमन्यदुवाचेत्युच्यते। अपि य एनं शुष्के स्थाणौ गतप्राणोऽपि एनं मंथं भक्षणाय संस्कृतं निषिंचेत् क्षिपेत् जायेरन्नुत्पद्येरन्नेवास्मिन्तथा।
रोहाः शाखाश्चावयवा वृक्षस्य प्ररोहेयुश्च पलाशपर्णानि यथा जीवतः स्थाणोः। किमुतानेन कर्मणा कामः सिध्येदिति। फलमिदं कर्मेति कर्मस्तुत्यर्थमेतद्विद्याधिगमे षट् तीर्थानि ति
षामिहस्तप्राणादर्शनस्य मर्यादा ज्ञानस्याधिगमे एवं तीर्थं अन्तेवायेनैव पुत्रश्चान्तेवासीव ॥३७।३८।३९।४०।४१।४२॥ चतुरौदुंबरो भवतीति व्याख्यातं दश ग्राम्याणि धान्यानि
भवन्ति ग्राम्याणां तु धान्यानां दश नियमेन ग्राह्याणि अन्यवीवामकानि शतानि द्रष्टव्यानि। व्रीहियवास्तिलमाषा अणुप्रियंगवश्च अणवः अणुशब्दवाच्याः। क्वचिद्देशे प्रियंगवः प्रसिद्धाः कंगुशब्देन
खल्वा निष्पावा वल्लशब्दवाच्याः लोके खलकुलाः कुलत्थाः एतद्व्यतिरेकेण यथाशक्ति सर्वौषधयो ग्राह्याः फलानि च तत्वा वाम अपाकृतानि वर्जयित्वा ॥४३॥ अष्टमस्य तृतीयब्राह्मणम्॥

यथेतमेत्य जघनेनाग्निं प्राङ्मासीनो वंशं जपति ॥३६॥ तं हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिंचेज्जायेरंछाखाः प्र
रोहेयुः पलाशानीति ॥३७॥ एतमु हैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैंग्यायान्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिंचेज्जायेरंछाखाः प्ररोहेयुः पलाशानीति ॥३८॥ एतमु
हैव मधुकः पैंग्यश्चूलाय भागवित्तयेऽन्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिंचेज्जायेरंछाखाः प्ररोहेयुः पलाशानीति ॥३९॥ एतमु हैव चूलो भागवित्तिर्जानकय
आयस्थूणायान्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिंचेज्जायेरंछाखाः प्ररोहेयुः पलाशानीति ॥४०॥ एतमु हैव जानकिरायस्थूणः सत्यकामा
य जाबालायान्तेवासिन उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिंचेज्जायेरंछाखाः प्ररोहेयुः पलाशानीति ॥४१॥ एतमु हैव सत्यकामो जाबालोऽन्
तेवासिभ्य उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिंचेज्जायेरंछाखाः प्ररोहेयुः पलाशानीति तमेतं नापुत्राय वाऽनन्तेवासिने वा ब्रूयात् ॥४२॥ च
तुरौदुंबरो भवत्यौदुंबरः स्रुव औदुंबरश्चमस औदुंबर इध्म औदुंबर्या उपमन्थन्यौ दश ग्राम्याणि धान्यानि भवन्तीति। व्रीहियवास्तिलमाषा अणुप्रियं
गवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान्पिष्टान्दधनि मधुनि घृत उपसिंचत्याज्यस्य जुहोति ॥४३॥ अष्टमस्य तृतीयब्राह्मणम्॥ ॥
एषां वै भूतानां पृथिवी रसः पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पाणि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः ॥४४॥ स ह प्रजापति
रीक्षांचक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियं ससृजे तां सृष्ट्वाध उपास्त तस्मात्स्त्रियमध उपासीत स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत्ते
नैनामभ्यसृजत् ॥४५॥ ।रामरामरामरामरामरामरारामरामरामरामरामरामरामरामरामरामराम श्रीनारामार्ष्य रामरक्ष रामरामः॥

याद्कृज्जन्माय यथेत्यादि वैतायैवारुणेर्विशिष्टः पुत्र आत्मनः पितुश्च लोक्यो भवतीति तृतीयं ब्राह्मणं समाप्तम्। प्राणदर्शिनः श्रीमंथं कर्म कृतवतः पुत्रमंथेऽधिकारो यदा पुत्रमंथं चिकीर्षति तदा श्रीमंथं कृत्वा
ऋतुकाले पत्न्याः प्रतीक्षतः इत्येतदेतस्य उपयुक्तादिरसनमतः कृत्वा व्याख्यायते एषां वै एषां चराचराणां भूतानां पृथिवी रसः सारः भूतानां सर्वभूतानामधिष्ठितः कर्म। पृथिव्या आपो रसः अप्सु हि पृथिव्योता
अपां तावद्यामोषधयः कार्यत्वात् इसत्वमोषध्यादीनां पुष्पाणि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः सर्वेभ्योंगेभ्यस्तेजः संभूतमिति श्रुत्यन्तरात्। ॥४४॥ यत एवं सर्वभूतानां सारतममेतद्
रेतः कुतः खल्वस्य योग्यं पात्रमिति चिंतितवान् प्रजापतिरीक्षांचक्रे ईक्षितवान् स्त्रियं ससर्ज तां सृष्ट्वाऽध उपास्त मैथुनाख्यं कर्माधउपासनं नाम कृतवान् तस्मात्स्त्रियमध उपासीत श्रेष्ठेन श्रयणं हि प्रजा॥
अतश्च वाजपेयसामान्यकृष्णोऽहम्। समस्तं श्रेष्ठं गतः स्मरतीति श्रेष्ठस्तुत्यर्थम्। पञ्चकर्माणि तानि गानमानं विधिरित्याशंक्याह। अवेति अथा यत् नमस्तमर्थः। आत्मनः
एव समुदपारयदिति श्रुत्यर्थः सामान्यात् प्रजने स्त्रियमुदपारयत् उन्नीतवान् स्त्रीव्यंजनं प्रति तेन ग्राव्णा स्त्रियमभ्यसृजत् अभिसंसर्गं कृतवान् ॥४५॥ ॥रामराम॥

त्रीव्यंजनस्य मध्यतः । अग्निस्त्रोग्निर्जाठरानलरूपः समिद्धः । समिद्धोग्निरित्यर्थः । यच्चाण्डद्वयं चर्म सा कर्म्मण्डनार्थत्वहृद्वाऽदृश्यदेशस्थे चर्मणि कर्त्तव्येत्याह । नाविति । तौ अण्डद्वयं च चर्म च र्माणि । रहस्यदेशस्थं च चर्मेत्यर्थः ॥

न

तस्यावेदिरित्यादि सर्वं सामान्यं प्रसिद्धोग्निः समिद्धोग्निर्मध्यतः स्त्रीव्यंजनस्यान्तौ मुष्कावधिषवणे फलकद्वये निर्व्यवहितेन संबध्यते । वाजपेययाजिनो यावन्लोकः प्रसिद्धः तावान्
विदुषो मैथुनकर्मणः फलमिति स्तूयते । तस्मादीत्मानो कार्यतिः । य एवं विद्वानधोपहासं चरत्यासां स्त्रीणां सुकृतं वृंक्ते । आवर्जयति । अथ पुनर्यो वाजपेयसम्पत्तिं न
जानाति । अविद्वान्रेतसो रसनमविद्वाधोपहासं चरति आस्य स्त्रियः सुकृतं वृंजते अविदुषः ॥ ४६ ॥ एतद्ध स्म वै तद्विद्वानुद्दालकस्यारुणिरहाधोपहासाख्यं मैथुनं
कर्म वाजपेयसम्पन्नं विधानमित्यर्थः । तथा नाको मौद्गल्यः कुमारहारितश्चाह किं चैते आहुरित्युच्यते । बहवो मर्या मरणधर्मिणो मनुष्या ब्राह्मणायना ब्राह्मणाः अयनं
येषां ते ब्राह्मणायना ब्रह्मबन्धवो जातिमात्रोपजीविन इत्येतन्निरिन्द्रिया विसृष्टेन्द्रिया विसुकृतो विगतसुकृतकर्माणः विद्वांसो मैथुनकर्मासक्ता इत्यर्थः ॥ ।

तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ स यावान्ह वै वाजपेयेन यजमानस्य लोको भवति । तावानस्य
लोको भवति य एवं विद्वानधोपहासं चरत्यासां स्त्रीणां सुकृतं वृङ्क्तेऽथ य इदमविद्वानधोपहासं चरत्यास्य स्त्रियः सुकृतं वृञ्जते ॥ ४६ ॥
एतद्ध स्म वै तद्विद्वानुद्दालक आरुणिराहैतद्ध स्म वै तद्विद्वान्कुमारहारित आह बहवो मर्या ब्राह्मणायना निरिन्द्रिया विसुकृतोऽस्माल्लोका
त्प्रयन्ति य इदमविद्वांसोऽधोपहासं चरन्तीति बहु वा इदं सुप्तस्य वा जाग्रतो वा रेतः स्कन्दति ॥ ४७ ॥ तदभिमृशेदनु वा मन्त्रयेत यन्मेऽद्य रेतः
पृथिवीमस्कान्त्सीद्यदोषधीरप्यसरद्यदपः । इदमहं तद्रेत आददे पुनर्मामैत्विन्द्रियं पुनस्तेजः पुनर्भगः । पुनरग्निर्धिष्ण्या यथास्थानं कल्पन्तामित्य
नामिकाङ्गुष्ठाभ्यामादायान्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥ ४८ ॥ अथ यद्युदक आत्मानं पश्येत्तदभिमन्त्रयेत मयि तेज इन्द्रियं यशो द्र
विणं सुकृतमिति श्रीर्ह वा एषा स्त्रीणां यन्मलोद्वासास्तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्योपमन्त्रयेत ॥ ४९ ॥ श्रीरामाय नमः ॥ एन ।

ते किमस्माल्लोकात्प्रयन्ति परलोकात्परिभ्रश्यन्ति मैथुनकर्मणोऽत्यन्तपापहेतुत्वं दर्शयति य इदमविद्वांसोऽधोपहासं चरन्ति । अथ मन्थं कृत्वा पत्न्या ऋतुकालं ब्रह्मचर्यं
गात्रादीन्स्तनादयः रेतः स्कन्दति बहु वाल्पं वा सुप्तस्य वा जाग्रतो वा रागाद्वा बलात् ॥ ४७ ॥ तदभिमृशेदनुमन्त्रयेत वा अनुजपेदित्यर्थः । यदाभिमृशति तदानामि
काङ्गुष्ठाभ्यां तद्रेत आदत्ते आददे इत्येवं मन्त्रेण पुनर्मामित्यनेन निमृज्यात् । अन्तरं मध्ये भ्रुवौ वा स्तनयोर्वा ॥ ४८ ॥ अथ यदि कदाचिदुदक आत्मानमात्मच्छा
यां पश्येत्तदाप्यभिमन्त्रयेतानेन मन्त्रेण मयि तेज इति । श्रीर्ह वा एषा पत्नी स्त्रीणां मध्ये या मलोद्वासा सा स्वलाय यशस्विनी च सा ति विषये शोभ यद्गुसंज्ञाभिः स्त्रीणां तां
मलोद्वाससं यशस्विनीं श्रीमतीमभिक्रम्याभिगम्योपमन्त्रयेत । इदमा वा भ्याकायं त्रिरात्रादनमिति ॥ ४९ ॥ श्रीरामार्पणमस्तु । श्रीरामचन्द्रार्पणमस्तु । एन ।

मुष्कौ वृषणौ योनिपार्श्वयोः काठिन्यो मांसखण्डौ तत्राधिषवणशब्दितसोमफलहद्धि । अवर्जयतीत्यर्थः । एतद्ध स्म वै तद्ध श्रूयते वा निश्चये । एतद्विद्वान् अधोपहासाख्यं मैथुनं कर्म वाजपेयरूपं संपन्नमिति । विद्वान् ॥

ह भा०
१६४

हेरेनात्वंमदीयात्सर्वस्मादंगात्संभवसि·विशेषेणनश्चहृदयादन्नरसकारणाज्जायसेसत्वंअंगानांकषायोरसः सन्दिग्धलिप्तशरविद्धांमृगीमिव·आमूंमदीयांस्त्रियंमयिमादयमदवशांकुर्वित्यर्थः।आम्नायंप्रेमातिरेकज्ञाप

नामित्यर्थः। मादधइनाअनूनूमयि अभिप्राण्यनिःश्वासंग्रहं क्षिप्यपश्चात् अपान्यात् ऊर्ध्वमाकर्षेत्। निःश्वासम् ==

विशेषेणचाप्नुयात्साचेदस्मैनदद्यान्मैथुनंकर्तुं काममेनामवक्रीणीयादाभरणादिनाज्ञापयेत्·तथापिसानैवदद्यात्काममेनांयष्ट्यावापाणिनावोपहत्याभिक्रामेन्मैथुनाय· शापंमित्वाइंभगांकरिष्यामीतिप्रख्याप्यतामनेनमंत्रेणोपगच्छेदिंद्रियेणतेयशसायशआददइति।तस्मात्तदभिशापाद्वंध्याअभगेतिख्याताअयशाएवभवति।७। साचेदस्मैदद्याद्रतेऽनुगुणैवस्यात्कर्तुं तदानेनमंत्रेणोपगच्छेदिंद्रियेणतेयशसायशआदधामीतितदायशस्विनावेवोभावपिभवतः।८।सयांस्त्वभार्यामिच्छेदियंमांकामयेतेतितस्यामर्थंप्रजननेंद्रियं निष्ठायनिक्षिप्यमुखेनमुखंसंधायउपस्थमस्याअभिमृश्यजपेदिमंमंत्रमंगादंगादिति।९।अथयामिच्छेन्नगर्भंदधीतनधारयेत्·गर्भिणीमाभूदितितस्यामर्थमितिपूर्ववदभिप्राणापाभिप्राणनंप्रथमंकृत्वापश्चादपान्यादिंद्रियेणतेरेतसारेतआददइत्यनेनमंत्रेणारेता·

साचेदस्मैनदद्यात्काममेनामवक्रीणीयात्साचेदस्मैनैवदद्यात्काममेनांयष्ट्यावापाणिनावोपहत्यातिक्रमेदिंद्रियेणतेयशसायश
आददइत्ययशाएवभवति·।७।साचेदस्मैदद्यादिंद्रियेणतेयशसायशआदधामीतियशस्विनावेवभवतः।८।सयामिच्छेत्कामयेत
मेति।तस्यामर्थंनिष्ठायमुखेनमुखंसंधायोपस्थमस्याअभिमृश्यजपेदंगादंगात्संभवसिहृदयादधिजायसे·सत्वमंगकषायोसिदि
ग्धविद्धामिवमादयेमाममूंमयीति।९।अथयामिच्छेन्नगर्भंदधीतेति।तस्यामर्थंनिष्ठायमुखेनमुखंसंधायाभिप्राण्याऽपान्यादिंद्रि
येणतेरेतसारेतआददइत्यरेताएवभवति।१०।अथयामिच्छेद्दधीतेति।तस्यामर्थंनिष्ठायमुखेनमुखंसंधायापान्याभिप्राण्यादिंद्रिये
णतेरेतसारेतआदधामीतिगर्भिण्येवभवति·।११।अथयस्यजायायैजारःस्यात्तंचेद्द्विष्यादामपात्रेऽग्निमुपसमाधायप्रतिलोमंशरब
र्हिस्तीर्त्वातस्मिन्नेताःशरभृष्टीःप्रतिलोमाःसर्पिषाक्ताजुहुयान्ममसमिद्धेहौषीः प्राणापानौतआददेसाविति· ॥ ॥

एवनितनगर्भिणीभवतीत्यर्थः।१०।अथयामिच्छेद्दधीतगर्भमितितस्यामर्थमित्यादिपूर्ववत्·पूर्वविपर्ययेणाऽपान्याभिप्राण्यादिंद्रियेणतेरेतःसारेतआदधामि
इतिगर्भिण्येवभवति।११।अथपुनर्यस्यजायायैजारउपपतिःस्यात्तंचेद्द्विष्यात्कर्मणाममिच्छेदभिचारिष्यामीतिमन्येततस्येदंकर्मामपात्रेऽग्निमुपसमाधायसर्वंप्र
तिलोमंकुर्यात्तस्मिन्नग्नावेताःशरभृष्टीःशरेषिकाःप्रतिलोमाःसर्पिषाक्ताःघृताभ्यक्ताजुहुयान्ममसमिद्धेहौषीरित्याद्याश्चाहुतीरेतेसर्वासामसावि
ति।नामग्रहणंप्रत्येकमस्यएवंविदुयंब्राह्मणःशपतिसविसुकृतो· ।रामरामरामरामरामश्रीवासुदेवार्पणमस्तु·श्रीकृष्णार्पणमस्तु।।

नंदते वा ताहनिआत्मनः हातोर्वा नामग्रह[illegible]त्यात्। यो आह[illegible]गनो। कर्तारं

रामः
१६४

यदित्यर्थः।देवताजुष्टमिदंकर्मफलवदितिवक्तुंद्विष्यादित्यधिकारिविशेषणं·एकवचनादुपसमाधानवचनाद्वावसथ्याग्नि।अविवक्षितः अपराधिनस्तवप्राणापानावाददेफट्इत्युक्ताहोमेमानिवर्तयितव्यः।

164

किंपुनरवघातनिष्पन्नैस्तंडुलैरनुष्ठेयं तदाह। स य इति। स्वाभाविकं केवलमेवौदनं पाचयन्ति चेत्किमर्थं दुग्धग्रहणं तद्व्यतिरेके औदनपाकासंभवादित्याशंक्याह। उदग्रहणमिति। अभिचारिकं कर्मप्रसं
गागतमुक्त्वा पूर्वोक्तं ऋतुकालं ज्ञापयति। अथेति। पाठक्रमादर्थक्रमस्य बलवत्त्वे हेतुमाह। सामर्थ्यादिति। अर्थवशादित्यावत्। स्वदारे सहनर्मविदपि। स कृतोत्तवासः वसीतेत्यर्थः। अमुकनाम्ना·
हे·व स्यमागाहोमानंतरं। आशाप्रार्थनावाचायस्यातिज्ञानं कर्मणा नोपपादितनस्य प्रतीसा पराकाशा। समितिति वितत्त्वभानांग छतीति। इगोल्भार्थं परित्यज्यादिदानेवो वचनामिति चेन्नेत्याह। पांधि

विगतपुण्यकर्मा इति तस्मादेवंवित् श्रोत्रियस्य दारेण नोपहासमिच्छेत् नर्मापि न कुर्यात् किमुत·ध्योपहासं हि यस्मादेवंविदपि तावत्परो भवति शत्रुर्भवतीत्यर्थः॥ ५५॥ अथ यस्य जा
यामार्त्तवं विंदेत् ऋतुभावं प्राप्नुयादित्येवमाद्ये यः श्रीहिवाण्यास्त्रीणामित्यतः पूर्वं त्र्यहं कंसेनापि वदहतवासाश्चस्यात्। नैनांस्नातामस्नां च वृषलो वृष
लीपानोपहन्यान्नोपस्पृशात्। त्रिरात्रांते त्रिरात्रव्रतसमाप्तौ वा आप्लुत्य स्नात्वा अहतवाससः स्यादिति अवहितेन संबंधः तामाप्लुतां व्रीहिनवघातयेद्व्रीहिस्व घातायेतामेवविनियु
ञ्ज्यात्॥ ५६॥ स य इच्छेत्पुत्रो मे शुक्लो वर्णो जायेत वेदमेकमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ समथो जनयितवे जन
यितुं॥ ५७॥ दध्योदनं दध्ना चरुं पाचयित्वा द्विवेदं चेदिच्छति पुत्रं तदेवमशनं नियमः॥ ५८॥ केवलमेवस्वाभाविकं उदनं तु दग्यहणमन्यप्रसंगनिवृत्त्यर्थं॥ ५९॥ दुहितुः

ममसमिद्धेहौषीः पुत्रपशूं ७ स्तत्र आददेसाविति मम समिद्धेहौषीरिष्टासुकृते तत्र आददेसाविति मम समिद्धेहौषीराशापराकाशौ तत्र आददेसाविति स वा एष निरि
न्द्रियो विसुकृदस्माल्लोकात्प्रैति यमेवं विद्ब्राह्मणः शपति तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदुत ह्येवंवित्परो भवति॥ ५५ ॥अथ यस्य जायामा
र्त्तवं विंदेत्त्र्यहं कंसेन पिबेदहतवासा नैनां वृषलो न वृषल्युपहन्यात्त्रिरात्रान्त आप्लुत्य व्रीहीनवघातयेत्॥ ५६॥ स य इच्छेत्पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत
सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥ ५७ ॥ अथ य इच्छेत्पुत्रो मे कपिलः पिंगलो जायेत द्वौ वेदावनुब्रुवीत सर्वमा
युरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥ ५८ ॥ अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रुवीत सर्वमायु
रियादित्युदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै॥ ५९ ॥ अथ य इच्छेद्दुहिता मे पंडिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पि
ष्मन्तमश्नीयातामीश्वरौ जनयितवै॥ ६०॥ अथ य इच्छेत्पुत्रो मे पंडितो विजिगीथः समितिंगमः शुश्रूषितां वाचं भाषिता जायेत सर्वान्वेदाननुब्रुवीत सर्वमा
युरियादिति मांसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवा औक्ष्णेन वार्षभेण वा॥ ६१ ॥ अथाभिप्रातरेव स्थालीपाकावृताज्यं चेष्टि
त्वा स्थालीपाकस्योपघातं जुहोत्यग्नये स्वाहानुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति हुत्वोद्धृत्य प्राश्नाति प्राश्येतरस्याः प्रयच्छति प्र

पांडित्यं गृहतंत्रविषयमेव वेदेनधिकारात्तिलौदनं कृशरं॥ ६०॥ विविधं जिगीषः प्रख्यात इत्यर्थः। समितिंगमः सभां गच्छतीति प्रगल्भ इत्यर्थः। मांसमिश्रमोदनं मा
सौदनं तन्मांसनियमार्थमाह। औक्ष्णेन वा मांसेन उक्षा सेचनसमर्थः पुंगवस्तदीयं मांसम् ऋषभस्ततोप्यधिकवयास्तदीयमार्षभं मांसं॥ ६१ ॥अथाभिप्रात
रेवकाले अवघातनिष्पन्नांस्तंडुलानादाय स्थालीपाकं कृत्वा स्थालीपाकविधिनाज्यं चेष्टित्वाज्यसंस्कारं कृत्वा चरुं श्रपयित्वा स्थालीपाकस्याहुतीर्जुहोतीति उपघा
तमुपहत्योपहत्य अग्नये स्वाहा इत्याद्याः गार्ह्यः सर्वो विधिर्द्रष्टव्यो हुत्वोद्धृत्य चरुशेषं प्राश्नाति स्वयं प्राश्येतरस्याः पत्न्यै प्रयच्छत्युच्छिष्टं। प्रक्षाल्य पाणीआ
चम्योदपात्रं पूरयित्वा तेनोदकेनेनां त्रिरभ्युक्षत्यनेन मंत्रेणोत्तिष्ठात इति सकृन्मंत्रोच्चारणं॥ ६२ ॥अथैनामभिमंत्र्य क्षीरौदनादि यथापत्यकामं भुंक्ते

त्यस्येति। ग्रहणार्थं। कदा पुनरिदमोदनपाकादि कर्त्तव्यं तदाह। अथेति। कोऽसौ स्थालीपाकविधिः। कथं वा तत्र होममंत्राह। गार्ह्य इति। गृह्यप्रसिद्धः। अथेति पुत्रकर्मोक्तिः। अमोऽहमिति। गृहपतिः अ
मथामोऽस्मि त्वं सा वा गासि कथं तव गाणत्वं मम वाक्त्वं इत्याशंक्या वाच॰ प्राणाधीनत्वं च तव मदधीनत्वादित्यभिप्रेत्य सा त्वमित्यादि पुनर्वचनं। आगाधारो हि साम गीयते अत्सीच मदाधारत्वं नवः ॥

तथाममसामत्वं ऋक्त्वं च नव द्यौरहं पृथिवीत्वं मातृत्वात्तौ आवां संरभावहै। उद्यमं करवावहै। सहिको सौ संरंभं सममाह। सहेति। पुंसः पुत्रलाभाय रेतो धारणं कर्तव्यमित्यर्थः। विजिहीथामि
ति। ऊर्वोः संबोधनं द्यावापृथिवी इति। विजिहीथां विश्लिष्टे भवतामूर्वावित्यर्थः। विष्णुर्योनिं भवत्याः कल्पयतु पुत्रोत्पत्तिसमर्थां करोतु। त्वष्टा सविता प्रजापतिर्विराडात्मा मम दात्मना स्थित्वा त्वयि रेत
आसिंचतु। धातास्त्वात्मा त्वदीयं गर्भं त्वदात्मना धारयतु। सिनीवाली दर्शदेवता त्वदात्मना वर्त्तते। पृथुष्टुका विस्तीर्णस्तुतिः। ओ पृथुष्टुके सिनीवालि गर्भमिमं धेहि। अश्विनौ देवौ सूर्याचंद्रमसौ
तव गर्भं मदात्मना स्थित्वा समाधत्तां। हिरण्मयीति। ज्योतिर्मय्यौ अरणी प्रागासतुः। याभ्यां गर्भं अश्विनौ निर्मथितवंतौ। तं तथाभूतं गर्भं ते जठरे दध्मामहे दशमे मासि प्रसवार्थं। आधीयमा
नं गर्भं हसां तेन दर्शयति। इंद्रेण स्त्रैणोत्पर्थः। असाविति पत्नीनिर्देशः तस्या नाम गृह्णातीति पूर्वेणान्वयः। हे एतन्नामके इति। तस्या इति पूर्वान्वयी शब्दः। समिंजयति स्वरूपोपघातमकृत्वा

तिक्रमोऽस्य। संवेशनकाले अमोहमस्मीत्यादिमंत्रेणाभिपद्यते ॥ ८२ ॥ अथास्या ऊरू विहापयति विजिहीथां द्यावापृथिवी इत्यनेन तस्यामर्थमित्यादि पूर्ववत्त्रिरेनांशि
रः प्रभृत्य अनुलोमामनुमार्ष्टि विष्णुर्योनिमित्यादि प्रतिमंत्रं अंते नाम गृह्णात्यसाविति ॥ ८४ ॥ ८५ ॥ तस्याः सोष्यंतीं अद्भिरभ्युक्षति प्रसवकाले सुखप्रसवनार्थमनेनमं
त्रेण यथा वायुः पुष्करिणीꣳ समिंजयति सर्वतः एवा ते गर्भ एजत्विति ॥ ८६ ॥ अथ जातकर्म जातेऽग्निमुपसमाधायांक आधाय पुत्रं कंसे पृषदाज्यं संनीय संयोम

क्षाल्य पाणी उदपात्रं पूरयित्वा तेनैनां त्रिरभ्युक्षत्युत्तिष्ठातो विश्वावसोऽन्यामिच्छ प्रपूर्व्यां संजायां पत्या सहेति ॥ ८२ ॥ अथैनामभिपद्यतेऽमोहमस्मि सा त्व
ꣳ सा त्वमस्यमोऽहं। सामाहमस्म्यृक्त्वं द्यौरहं पृथिवी त्वं तावेहि सꣳरभावहै सह रेतो दधावहै पुꣳसे पुत्राय वित्तय इति ॥ ८३ ॥ अथास्या ऊरू विहापय
ति विजिहीथां द्यावापृथिवी इति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधाय त्रिरेनामनुलोमामनुमार्ष्टि विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु
आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते। गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ८४ ॥ हिरण्मयी
अरणी याभ्यां निर्मन्थतामश्विनौ तं ते गर्भꣳ हवामहे दशमे मासि सूतये यथाग्निगर्भा पृथिवी यथा द्यौरिंद्रेण गर्भिणी वायुर्दिशां यथा गर्भ एवं ग
र्भं दधामि तेऽसाविति ॥ ८५ ॥ सोष्यंतीमद्भिरभ्युक्षति यथा वायुः पुष्करिणीꣳ समिंजयति सर्वतः। एवा ते गर्भ एजतु सहावैतु जरायुणा। इंद्रस्यायं
व्रजः कृतः सार्गलः सपरिश्रयः। तमिंद्र निर्जहि गर्भेण सावराꣳ सहेति ॥ ८६ ॥ जातेऽग्निमुपसमाधायांक आधाय कꣳसे पृषदाज्यꣳ संनीय पृषदाज्य
स्योपघातं जुहोत्यस्मिन्सहस्रं पुष्यासमेधमानः स्वे गृहे। अस्योपसंद्यां माच्छैत्सीत्प्रजया च पशुभिश्च स्वाहा। मयि प्राणाꣳस्त्वयि मनसा जुहोमि स्वा
हा। यत्कर्मणात्यरीरिचं यद्वा न्यूनमिहाकरं। अग्निष्टत्स्विष्टकृद्विद्वान्स्विष्टꣳ सुहुतं करोतु नः स्वाहेति ॥ ८७ ॥ अथास्य दक्षिणं कर्णमभिनिधा
य वाग्वागिति त्रिरथ दधि मधु घृतꣳ संनीयाऽनंतर्हितेन जातरूपेण प्राशयति भूस्ते दधामि स्वस्ते दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति ॥ ८८ ॥

दधिघृते पृषदाज्यं तस्योपघातं जुहोम्यस्मिन्सहस्रमित्याद्यावापस्थाने ॥ ८७ ॥ अथास्य दक्षिणं कर्णमभिधाय स्वं मुखं वाग्वागिति त्रिर्जपेत् अथ दधिमधुघृतं सं
नीयाऽनंतर्हितेनाव्यवहितेन जातरूपेण हिरण्येन प्राशयति। भूस्ते दधामीत्याद्यैर्मंत्रैः प्रत्येकं ॥ ८८ ॥ अथास्य नामधेयं करोति वेदोऽसीति तदस्य तद्गुह्यं नाम भव
ति वेद इति ॥ ८९ ॥ अथैनं मात्रे प्रदाय स्वांकस्थं तनयं स्तनं प्रयच्छति यस्ते स्तन इत्यादि मंत्रेण ॥ ९० ॥ अथास्य मातरमभिमंत्रयते। इलासीत्यनेन तेन

चालयति। एवमेव तव स्वरूपोपघातमकुर्वन् एजतु निर्गच्छतु। इंद्रस्येति। इन्द्रस्य प्राणस्यायं व्रजः मार्गः कृतः मार्गलश्चास्य आस्य संपरिश्रय। परिवेष्टनेन जरायुणा सहित इत्यर्थः। तं मार्गं प्राप्य त्व
मिंद्र गर्भेण सह निर्गच्छ गर्भनिःशरणानंतरं यामांसपेशी निर्गच्छति। सा सावरा तां प्रति गमय। अस्मिन्निति। अस्मिन् स्वगृहे पुत्ररूपेण वर्द्धमानोऽहं मनुष्याणां सहस्रं पुष्यासं अनेक
मनुष्यपोषको भूयासं। अस्य मम पुत्रस्य उपसंद्यां श्रियं प्रजया पशुभिश्च सह माच्छैत्सीत्। मयि पितरि ये प्राणास्तेषु सतां सुतं त्वयि मनसा समर्पयामि। घृतमिश्रं दधि पृषदाज्यं।

यत्वइति। हेसरस्वतियस्तेस्तनःशशयः। फलेनसहवर्त्तमानः। योमयोभूः सुखकर्त्ता। यथात्वंधाअन्नस्यपयसोवाधातायथकर्मफलंविंदतिइतिवसुवित्। सुदत्रःदातेतिसुदत्रः। येनस्तनेनविश्वानिवार्याणिभूतानिपुष्यसितं
स्तनंमदीयपुत्रस्यधानवेपानायमदीयभार्यास्तनेप्रविष्टंकुरु। इलासीति। इलास्तुत्याभोग्याऽसि। मैत्रावरुणीअरुंधतीनद्धनत्वंनिष्ठासिइतिसंबोधयति। मैत्रावरुणीति। हेवीरेवीरप्रसवनिमित्तभूते। वीरंपुत्रमजीजनत्। सात्वंवीरवतीजी
ववकुपुत्राभव। अतिपितेत्यादि। पितरमतीत्यनुवर्त्ततेइति। अतिपिता। अहोमहानेषविस्मयः। यत्पितरंपितामहंनसर्वमेवपरमामतीत्यसर्वस्मादधिकस्तेजसासीत्यर्थः। नकेवलंपुत्रस्यैवेयंस्तुतिः। अपितुप्रयोक्तुःपुत्रसंगतस्य
पितुरपीत्याह। यस्येति। नचापिप्रजापतिमारभ्यसंभावीपुत्रपर्यंतंवाजसनेयिशाखाप्रवर्त्तकोवंशइत्याह। समानमिति। नचात्रआदित्यःसांजीवीपुत्रादित्विवोधामितिभावः। प्रवचनाख्यस्यवंशात्मनोब्रह्मणःसर्व

एतमाहुरित्यनेनतंवाएतमाहुरित्यनेनविधिनाजातःपुत्रःपितरंपितामहंवाअतिशेतेअतिश्रियायशसाब्रह्मवर्चसेनपरमांनिष्ठांप्राप्तादित्येवंस्तुत्योभवतीत्यर्थः। यस्यचैवंविदोब्राह्मण
स्यपुत्रोजायतेसचैवंस्तुत्योभवतीत्यध्याहार्यं॥ २८॥ ॥अष्टमस्यचतुर्थब्राह्मणं॥ ॥अथेदानींसमस्तप्रवचनवंशःस्त्रीप्राधान्यात्गुणवान्पुत्रोभवतीतिप्रस्तुतमतस्त्री

अथास्यनामकरोतिवेदोसीतितदस्यतद्गुह्यमेवनामभवति॥ २६॥ अथैनंमात्रेप्रदायस्तनंप्रयच्छतियस्तेस्तनःशशयोयोमयोभूर्योरत्नधावसुविद्यःसुदत्रःयेनविश्वा
पुष्यसिवार्याणिसरस्वतितमिहधातवेकरिति॥ २७॥ अथास्यमातरमभिमंत्रयतेइलासिमैत्रावरुणीवीरेवीरमजीजनत्सात्वंवीरवतीभवयास्मान्वीरवतोकरदिति।
तंवाएतमाहुरतिपितावताभूरतिपितामहोवताभूःपरमांवतकाष्ठांप्रापच्छ्रियायशसाब्रह्मवर्चसेनयएवंविदोब्राह्मणस्यपुत्रोजायतइति॥ २८॥ ॥चतुर्थब्राह्मणं॥
अथवंशः। पौतिमाषीपुत्रःकात्यायनीपुत्रात्कात्यायनीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रःपाराशरीपुत्रात्पाराशरीपुत्रऔपस्वस्तीपुत्रादौपस्वस्तीपुत्रःपाराशरीपुत्रात्पारा
शरीपुत्रःकात्यायनीपुत्रात्कात्यायनीपुत्रःकौशिकीपुत्रात्कौशिकीपुत्रआलंबीपुत्राच्चवैयाघ्रपदीपुत्राच्चवैयाघ्रपदीपुत्रःकाण्वीपुत्राच्चकापीपुत्राच्चकापीपुत्रः॥ १॥
आत्रेयीपुत्रादात्रेयीपुत्रोगौतमीपुत्राद्गौतमीपुत्रोभारद्वाजीपुत्राद्भारद्वाजीपुत्रःपाराशरीपुत्रात्पाराशरीपुत्रोवात्सीपुत्राद्वात्सीपुत्रःपाराशरीपुत्रात्पाराशरीपुत्रोवार्कारु
णीपुत्राद्वार्कारुणीपुत्रोवार्कारुणीपुत्राद्वार्कारुणीपुत्रआर्तभागीपुत्रादार्तभागीपुत्रःशौंगीपुत्राच्छौंगीपुत्रःसांकृतीपुत्रात्सांकृतीपुत्रआलंबायनीपुत्रादालंबायनीपु
त्रआलंबीपुत्रादालंबीपुत्रोजायंतीपुत्राज्जायंतीपुत्रोमांडूकायनीपुत्रान्मांडूकायनीपुत्रोमांडूकीपुत्रान्मांडूकीपुत्रःशांडिलीपुत्राच्छांडिलीपुत्रोराथीतरीपुत्राद्राथीत
रीपुत्रोभालुकीपुत्राद्भालुकीपुत्रःक्रौंचिकीपुत्राभ्यांक्रौंचिकीपुत्रौवैदभृतीपुत्राद्वैदभृतीपुत्रःकार्शकेयीपुत्रात्कार्शकेयीपुत्रःप्राचीनयोगीपुत्रात्प्राचीनयोगी
पुत्रःसांजीवीपुत्रात्सांजीवीपुत्रःप्राश्नीपुत्रादासुरिवासिनःप्राश्नीपुत्रआसुरायणादासुरायणआसुरेरासुरिः॥ २॥ याज्ञवल्क्याद्याज्ञवल्क्यउद्दालकादुद्दालको
ऽरुणादरुणउपवेशेःउपवेशिःकुश्रेःकुश्रिर्वाजश्रवसोवाजश्रवाजिह्वावतोवाध्योगाज्जिह्वावान्वाध्योगोऽसिताद्वार्षगणादसितोवार्षगणोहरितात्कश्यपाद्धरितःकश्य
पःशिल्पात्कश्यपाच्छिल्पःकश्यपःकश्यपान्नैध्रुवेःकश्यपोनैध्रुविर्वाचोवागंभिण्याअंभिण्यादादित्यादादित्यानीमानिशुक्लानियजूंषिवाजसनेयेनयाज्ञवल्क्येनाख्यायंते
॥ ३॥ समानमासांजीवीपुत्रात्सांजीवीपुत्रोमांडूकायनेर्मांडूकायनिर्मांडव्यान्मांडव्यःकौत्सात्कौत्सोमाहित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणःशांडिल्याच्छांडिल्यो
वात्स्याद्वात्स्यःकुश्रेःकुश्रिर्यज्ञवचसोराजस्तंवायनाद्यज्ञवचाराजस्तंवायनस्तुरात्कावषेयात्तुरःकावषेयःप्रजापतेःप्रजापतिर्ब्रह्मणोब्रह्मस्वयंभुब्रह्मणेनमः॥ ४॥

विशेषणेनैवपुत्रविशेषणादाचार्यपरंपराकीर्त्यतेतानीमानीशुक्लानीत्यव्यामिश्राणिब्राह्मणेन। अथवायानीमानियजूंषितानिशुक्लानिशुद्धानीत्येतत्प्रजापतिमारभ्यावत्पौतिमाषी
पुत्रस्तावदधोमुखोनियतआचार्यपरंपराक्रमोवंशः। समानमासांजीवीपुत्राद्ब्रह्मणःप्रवचनाख्यस्यतदेतद्ब्रह्मप्रजापतिप्रबंधपरंपरयागत्यास्मास्वनेकधाविप्रसृतमनाद्यनंतंस्वयं
भुब्रह्मनित्यंतस्मैब्रह्मणेनमःनमस्तदनुवर्त्तिभ्योगुरुभ्यः॥ ४॥ ॥इतिश्रीगोविन्दभगवत्पूज्यपादशिष्यस्यपरमहंसपरिव्राजकाचार्यश्रीशंकरभगवतःकृतौबृहदारण्यकभा
ष्येषष्ठोऽध्यायःसमाप्तः॥ ॥शुभम्॥ ॥

धात्मप्रजापतिविशालवंशमित्याह। तस्यपरमात्मरूपस्यस्वयंभूत्वमभिदधाति। अनादीति। तस्याऽपौरुषेयत्वेनाऽसंभावितदोषतयाप्रामाण्यमभिप्रेत्यविशिनष्टि
नित्यमिति। आदिमध्यांतेषुकृतमंगलाग्रंथाःप्रचारिणोभवंतीतिमन्वानःसन्नाह। तस्मैब्रह्मणेनमइति॥ १॥ नमोनन्यादिसंबंधबंधविध्वंसहेतवे। हरयेपरमानन्दपरिज्ञानवपुर्भृते॥ १॥ नमस्त्रय्यंतसंदोहसरसीरुहभा
नवे। गुरवेपरपक्षौघध्वांतध्वंसपटीयसे॥ २॥ ॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्यपादशिष्यस्यपरमहंसपरिव्राजकाचार्यश्रीमदानन्दज्ञानभगवतःकृतौबृहदारण्यकभाष्यटीकायांषष्ठोऽध्या
यःसमाप्तः॥ ॥शुभम्॥ ॥